CC-0. In Public Domain. Digitization by eGangotri

वायु महापुराणम्
व्यास
द. नं. १६८02
क्र. सं. ११

Almira-1
Shelf-4
16

Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Acc: 3575

वायु पुराणम्

अथ श्रीनर्मदामाहात्म्यम्। [रेवाखण्डम] प्रारंभः

Acc:- ३६७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥ ॥ उभयतटपुण्यतीर्थां प्रक्षालितसकललोकदुरितौघा ॥ देवमुनिमनुजवंद्या हरतु सदा नर्मदा दुरितम् ॥ १ ॥ नाशयतु दुरितमखिलं भूतं भव्यं च कालसंभूतम् ॥ सकलपवित्रितवसुधा पुण्यजनावंदिता रेवा ॥२॥ बालार्कस्य प्रभाभं विबुधरिपुशिरच्छेदनाद्रक्तदिग्धं धाराप्रोद्भूतकालानलबहुलशिखातेजसा दुर्निरीक्ष्यम् ॥ निर्दग्धाशेषदैत्यं भ्रमति सुरवधुसंचयैरर्च्यमानं पायाच्चक्रं मुरारेर्विबुधनृपगणैर्वन्द्यमानं सदैव ॥ ३ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥ देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ ४ ॥ नैमिषे पुण्यनिलये नानाऋषिनिषेविते ॥ शौनकः सत्रमासीनः सूतं पप्रच्छ विस्तरात् ॥ ५ ॥ मन्येहं धर्मनैपुण्यं त्वयि सूत सदार्चितम् ॥ पुण्यामृतकथावक्ता व्यासशिष्यस्त्वमेव हि ॥ ६ ॥ अतस्त्वां परिपृच्छामि धर्मतीर्थाश्रयं कवे ॥ बहूनि सन्ति तीर्थानि बहुशो मे श्रुतानि च ॥ ७ ॥ श्रुता दि[३]व्यनदी ब्राह्मी[४] तथा विष्णुनदी[५] मया ॥ तृतीया न मया क्वापि श्रुता रौद्री[६] सरिद्वरा ॥ ८ ॥ तां वेदगर्भां विख्यातां विबुधौघाभिवंदिताम् ॥ वद मे त्वं महाप्राज्ञ तीर्थपूगैः[७]परिष्कृताम् ॥ ९ ॥ कं देशमाश्रिता रेवा कथं श्रीरुद्रसंभवा ॥ तत्संश्रितानि तीर्थानि यानि तानि वदस्व मे ॥१०॥ सूत उवाच ॥ साधु पृष्टं कुलपते[८] चरित्रं नर्मदाश्रितम् ॥ चित्रं पवित्रं दोषघ्नं श्रुतमुक्तं च सत्तम ॥ ११ ॥ वेदोपवेदवेदांगादीन्यभिव्यस्य पूरितः ॥ अष्टादशपुराणानां वक्ता सत्यवतीसुतः ॥ १२ ॥ तं नमस्कृत्य वक्ष्यामि पुराणानि यथाक्रमम् ॥ येषामभिव्य[९]हरणादभिवृद्धिर्वृषा[१०]युषोः ॥ १३ ॥ श्रुतिस्मृतिश्च विप्राणां चक्षुषी परिकीर्तिते ॥ काणस्तत्रैकया[११] हीनो द्वाभ्यामंधः प्रकीर्तितः ॥ १४ ॥ श्रुतिस्मृतिपुराणानि विदुषां लोचनत्रयम् ॥ यस्त्रिभिर्नयनैः पश्यंत्सोंशोमाहेश्वरो मतः ॥ १५ ॥ आत्मनो वेदविद्या च ईश्वरेण विनिर्मिता ॥ शौनकीयां[१२] च

---

१ ऋषिजुष्टमम्बु तीर्थं पवित्रजलमित्यर्थ । २ दिग्धं लिप्तं युक्तमित्यर्थः । ३ दिव्यनदी गङ्गा । ४ ब्राह्मी ककुद्मती ब्रह्मपुत्रा वा । ५ विष्णुनदी कृष्णा कथितमेतासां माहात्म्यं प्राक् । ६ रौद्री रुद्रस्येयं रुद्र देवताका इत्यर्थः । ७ तीर्थपूगैस्तीर्थसमूहैर्युक्ताम्. ८ ऋषिसंघाग्रेसर शौनक. ९ अध्ययनपठनपाठनश्रवणमननादिभ्यः १० वृषस्य धर्मस्य आयुषश्च 'वृषो धर्मे बलीवर्दे' इत्यादि मेदिनी । ११ श्रुतिस्मृत्योरन्यतरया । १२ शौनकेन प्रोक्ता शौनकीया शिक्षा.

पौराणी धर्मशास्त्रात्मिका च या ॥ १६ ॥ तिस्रो विद्या इमा मुख्याः सर्वशास्त्रविनिर्णये ॥ पुराणं पंचमो वेद इति
ब्रह्मानुशासनम् ॥ १७ ॥ यो न वेदं पुराणं हि न स वेदात्र किंचन ॥ कतमः स हि धर्मोऽस्ति किंवा ज्ञानं तथाविधम् ॥
१ ॥ १८ ॥ अन्यदा तत्किमत्राह पुराणे यन्न दृश्यते ॥ वेदाः प्रतिष्ठिताः पूर्वं पुराणे नात्र संशयः ॥१९॥ बिभेत्यल्पश्रुताद्वेदो मा
मयं प्रतरिष्यति ॥ इतिहासपुराणैश्च कृतोयं निश्चयः पुरा ॥ २० ॥ आत्मा पुराणं वेदानां पृथगंगानि तानि षट् ॥ यच्च दृष्टं
हि वेदेषु तद्दृष्टं स्मृतिभिः किल ॥ २१॥ उभाभ्यां यत्र दृष्टं हि तत्पुराणेषु गीयते ॥ पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणः स्मृ-
तम् ॥२२॥ अनंतरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेकमेवासीदस्मिन्कल्पांतरे मुने ॥ २३ ॥ त्रिवर्गसाधनं पु-
ण्यं शतकोटिप्रविस्तरम् ॥ स्मृत्वा जगाद च मुनीन् प्रति देवश्चतुर्मुखः ॥ २४ ॥ प्रवृत्तिः सर्वशास्त्राणां पुराणस्याभवत्ततः ॥ का-
लेन ग्रहणं दृष्ट्वा पुराणस्य ततो मुनिः ॥ २५ ॥ व्यासरूपं विभुः कृत्वा संहरेत्स युगेयुगे ॥ अष्टलक्षप्रमाणे तु द्वापरेद्वापरे सदा[1]
॥ २६ ॥ तदष्टादशधा कृत्वा भूर्लोकेस्मिन् प्रभाष्यते ॥ अद्यापि देवलोके तच्छतकोटिप्रविस्तरम् ॥ २७ ॥ तदथोत्र चतुर्लक्ष्यं
संक्षेपेण निवेशितम् ॥ पुराणानि दशाष्टौ च सांप्रतं तदिहोच्यते ॥ २८ ॥ नामतस्तानि वक्ष्यामि शृणु त्वं ऋषिसत्तम ॥ सर्गश्च
प्रतिसर्गश्च वंशो मन्वंतराणि च ॥ २९ ॥ वंशानुचरितं चैव पुराणं पंचलक्षणम् ॥ ब्रह्मपुराणं तत्राद्यं संहितायां विभूषितम् ॥
३० ॥ श्लोकानां दशसाहस्रं नानापुण्यकथायुतम् ॥ पाद्मं च पंचपंचाशत् सहस्राणि निगद्यते ॥ ३१ ॥ तृतीयं वैष्णवं नाम
त्रयोविंशतिसंख्यया ॥ चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतम् ॥ ३२ ॥ शिवभक्तिसमायोगाच्छैवं तच्चापराख्यया ॥ चतुर्विं-
शतिसंख्यातं सहस्राणि तु शौनक ॥ ३३ ॥ चतुर्भिः पर्वभिः प्रोक्तं भविष्यं पंचमं तथा ॥ चतुर्दशसहस्राणि तथा पंचशतानि

१ ह्रासः

CC-0. In Public Domain. Digitization by eGangotri

तत् ॥ ३४ ॥ मार्कण्डं नवसाहस्रं षष्ठं तत्परिकीर्तितम् ॥ आग्नेयं सप्तमं प्रोक्तं सहस्राणि तु षोडश ॥ ३५ ॥ अष्टमं नारदीयं
तु प्रोक्तं वै पंचविंशतिः ॥ नवमं भगवन्नामभागद्वयविभूषितम् ॥ ३६ ॥ तदष्टादशसाहस्रं प्रोच्यते ग्रन्थसंख्यया ॥ दशमं ब्रह्मवै-
वर्तं तावत्संख्यमिहोच्यते ॥ ३७ ॥ लैंगमेकादशं ज्ञेयं तथैकादशसंख्यया ॥ भागद्वयं विरचितं तल्लिंगमृषिपुंगव ॥३८॥ चतुर्विंशति-
साहस्रं वाराहं द्वादशं विदुः ॥ विभक्तमष्टभिः खंडैः स्कांदं भागवतां वर ॥ ३९ ॥ चतुराशीतिसाहस्रं संख्यया तन्निरूपितम् ॥
ततस्तु वामनं नाम तच्चतुर्दशमं स्मृतम् ॥४०॥ संख्यया दशसाहस्रं प्रोक्तं कुलपते पुरा ॥ कौर्मं पंचदशं प्राहुर्भागद्वयविभूषितम् ॥
४१॥ दशसप्तसहस्राणि पुरा सांख्यपते कलौ ॥ मात्स्यं मत्स्येन यत्प्रोक्तं मनवे षोडशक्रमात् ॥४२ ॥ तच्चतुर्दशसाहस्रं संख्यया वद-
तांवर ॥ गारुडं सप्तदशमं स्मृतं चैकोनविंशतिः ॥ ४३ ॥ अष्टादशं तु ब्रह्मांडं भागद्वयविभूषितम् ॥ तच्च द्वादशसाहस्रं शतमष्ट-
समन्वितम् ॥ ४४ ॥ तथैवोपपुराणानि यानि चोक्तानि वेधसा ॥ इदं ब्रह्मपुराणस्य सुलभं सौरमुत्तमम् ॥ ४५ ॥ संहिताद्वयसं-
युक्तं पुण्यं शिवकथाश्रयम् ॥ आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता ॥ ४६ ॥ सनत्कुमारनाम्ना हि तद्विख्यातं महामुने ॥
द्वितीयं नारसिंहं च पुराणे पद्मसंज्ञिते ॥ ४७ ॥ शौकेयं हि तृतीयं तु पुराणे वैष्णवे मतम् ॥ बार्हस्पत्यं चतुर्थं च वायव्यं संमतं
सदा ॥ ४८ ॥ दौर्वाससं पंचमं च स्मृतं भागवते सदा ॥ भविष्ये नारदोक्तं च सूरिभिः कथितं पुरा ॥ ४९ ॥ कापिलं मानवं
चैव तथैवोशनसेरितम् ॥ ब्रह्मांडं वारुणं चाथ कालिकाद्वयमेव च ॥ ५० ॥ माहेश्वरं तथा सांबं सौरं सर्वार्थसंचयम् ॥ पाराशरं
भागवतं कौर्मं चाष्टादश क्रमात् ॥ ५१ ॥ एतान्युपपुराणानि मयोक्तानि यथाक्रमम् ॥ पुराणसंहितामेतां यः पठेद्वा शृणोति च ॥
सोनंतपुण्यभागी स्यान्मृतो ब्रह्मपुरं व्रजेत् ॥ ५२ ॥ इति वायुपुराणे श्रीरेवाखंडे पुराणसंहिता नाम प्रथमोऽध्यायः ॥ १ ॥

१ श्रीमद्भागवतम् । २ विष्णुपुराणम्.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ सूत उवाच ॥ पुराणं यन्मयोक्तं हि चतुर्थं वायुसंज्ञितम् ॥ चतुर्विंशतिसाहस्रं शिवमाहात्म्यसंयुतम् ॥१॥ महिमानं शिवस्याह
पूर्वं पाराशरः पुरा ॥ अपरार्द्धे तु रेवाया माहात्म्यमतुलं मुने ॥ २ ॥ पुराणेषूत्तमं प्राहुः पुराणं वायुनोदितम् ॥ यस्य श्रवणमा-
त्रेण शिवलोकमवाप्नुयात् ॥ ३ ॥ यथा शिवस्तथाशैवं पुराणं वायुनोदितम् ॥ शिवभक्तिसमायोगान्नामद्वयविभूषितम् ॥४॥ नर्मदा-
यास्तु माहात्म्यं तस्मिन् द्वैपायनोऽब्रवीत् ॥ सप्तषष्टिसहस्राणि तथा सप्तशतानि च ॥ ५ ॥ सप्तषष्टिस्तथा कोट्यो लक्षाण्यपि
हि सप्त च ॥ दिवि भुव्यंतरिक्षे च तीर्थानां वायुरब्रवीत् ॥६॥ तन्मध्ये नर्मदातीर्थं समासादिह शौनक ॥ तत्तेहं संप्रवक्ष्यामि य-
त्त्वया परिपृच्छितम् ॥ ७ ॥ विस्तरं नर्मदायास्तु तीर्थानां मुनिसत्तम ॥ कोन्यः शक्तोऽस्ति वै वक्तुमृते ब्रह्माणमीश्वरम् ॥८॥ एत-
मेव पुराप्रश्नं पृष्टवान् जनमेजयः ॥ वैशंपायनसंज्ञं तु शिष्यं द्वैपायनस्य ह ॥ ९ ॥ रेवातीर्थाश्रितं पुण्यं तत्ते वक्ष्यामि शौनक ॥
पुरा परीक्षितो राजा यज्ञदीक्षासु दीक्षितः ॥ १० ॥ संभृते तु हविर्द्रव्ये वर्तमानेषु कर्मसु ॥ आसीनेषु द्विजाग्र्येषु हूयमाने हु-
ताशने ॥ ११ ॥ वर्तमानासु सर्वत्र तथा धर्मकथासु च ॥ श्रूयमाणे तथाशब्दे जनैरुक्ते त्वहर्निशम् ॥ १२ ॥ यज्ञभूमौ कुलपते
दीयतां भुज्यतामिति ॥ विविधांश्च विनोदान्वै कुर्वाणेषु विनोदिषु ॥ १३ ॥ एवंविधे वर्तमाने यज्ञे स्वर्गसदःसमे ॥ वैशंपायन
मासीनं पप्रच्छ जनमेजयः ॥१४॥ ॥ जनमेजय उ० ॥ द्वैपायनप्रसादेन ज्ञानवानसि मे मतः ॥ वैशंपायन तस्मात्त्वां पृच्छामि
ऋषिसन्निधौ ॥ १५ ॥ ब्रूहि मे त्वं पुरावृत्तं पितॄणां तीर्थसेवनम् ॥ चिरं नानाविधान् क्लेशान् प्राप्तास्त इति मे श्रुतम् ॥१६॥ कथं
द्यूतजिताः पार्था मम पूर्वपितामहाः ॥ आसमुद्रां महीं विप्र भ्रमंतस्तीर्थलोभतः ॥ १७ ॥ केन ते सहितास्तात संप्राप्ता विंध्य-
पर्वतम् ॥ तत्सर्वं कथय प्राज्ञ सर्वज्ञोसीति मे मतः ॥ १८ ॥ ॥ वैशंपायन उ० ॥ साधु पृष्टं महाभाग सोमवंशविवर्धन ॥
कथयामि यथापृष्टं त्वया यच्च श्रुतं मया ॥ १९ ॥ नमस्कृत्य त्रिकालज्ञमहं व्यासं महामुनिम् ॥ भगवंतं तपःप्रायं गुरुं गीर्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णवंदितम् ॥ २० ॥ पितामहास्तु ते पंच पांडवाः सह कृष्णया ॥ उषिता ब्राह्मणैः सार्धं काम्यके तु वनोत्तमे ॥ २१ ॥ क्रतुरुद्दाल
कस्तत्र काश्यपः कुत्सगालवौ ॥ विभांडको वेदनिधिर्भृगुश्चासितदेवलौ ॥२२॥ पुलस्त्यो लोमशश्चैव धौम्यो धौतशिरा मुनिः ॥२३॥
जैगीषव्यऋचीकाद्यास्तथा ते पुत्रपौत्रिणः ॥ प्रत्यहं भ्रममाणास्ते पांडवैः सह सुव्रताः ॥ २४ ॥ स्नाता ह्यनेकतीर्थेषु गतास्ते विं-
ध्यपर्वतम् ॥ तत्राश्रममथापश्यन् नानावृक्षविराजितम् ॥२५॥ त्रिविष्टपतरुस्पर्द्धि समर्द्धि बहुलैर्भृशम् ॥ सहकारैश्च रंभाभिर्बिल्वैः
पाटलकैर्वृतम् ॥२६॥ कदंबैश्चन्दनैर्नीपैर्निंबजंबीरतिंदुकैः ॥ नालिकेरैः कपित्थैश्च खर्जूरपनसैस्तथा ॥ २७ ॥ नानाद्रुमलताकीर्णं
नानावल्लीभिरावृतम् ॥ २७ ॥ सुपुष्पितं फलैः कांतं यथा चैत्ररथं वनम् ॥ जलाशयैस्तु विपुलैः पद्मिनीखंडमंडितम् ॥ २८ ॥
सितैश्च लोहितैः पद्मैर्नीलपीतैस्तथैव च ॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितम् ॥ २९ ॥ हंसाद्रिबकचक्रैश्च गुंजमानैश्च षट्प-
दैः ॥ सिंहव्याघ्रवराहैश्च गजैश्चैव मदोत्कटैः ॥ ३० ॥ महिषैश्च महाकायैर्हरिणैश्चित्रकैस्तथा ॥ खड्गैश्च गवयैश्चैव ऋक्षगोमायुसं-
वृतम् ॥ ३१ ॥ शशकैः शल्लकैः श्वाविद्रूकैरन्यैश्चतुष्पदैः ॥ शोभितं कोकिलानादैर्मनःकांतं सुशोभनम् ॥ ३२ ॥ जीवं जीवकसं-
घुष्टं नानापक्षिसमाकुलम् ॥ दुःखशोकविनिर्मुक्तं सत्त्वोत्कटमनोरमम् ॥ ३३ ॥ क्षुत्तृषारहितं शुद्धं सर्वव्याधिविवर्जितम् ॥
सिंहीस्तनं पिबंत्यत्र कुरंगा निर्भया नृप ॥ ३४ ॥ मार्जारमूषकौ चोभावेकत्र समवस्थितौ ॥ क्रीडंति करिणः सिंहैर्भोगिनस्तु कला-
पिभिः ॥ ३५ ॥ प्रविश्यैकत्र ते सख्यं कुर्वंत्यानंदपूरिताः ॥ एवंविधे वने तस्मिन् प्रविष्टाः पांडुनंदनाः ॥ ३६ ॥ साश्चर्यमतुलं
पश्यंत्याश्रमं ब्राह्मणैः सह ॥ मार्कंडं दृष्टवंतस्ते तरुणादित्यवर्च्चसम् ॥३७॥ गुणैर्वैषयिकैर्मुक्तं युक्तं बुद्धिगुणैः शुभैः ॥ रिक्तं सांसारि
कैर्भावैः संपृक्तं परमेष्ठिना ॥ ३८ ॥ उद्रिक्तं तपसा राजन् निर्णिक्तं चात्मविद्यया ॥ ऋषिभिः सेव्यमानं तं नानाशास्त्रविशारदैः
॥ ३९ ॥ कुलीनैः सत्त्वसंपन्नैः शौचाचारसमन्वितैः ॥ ह्रीमद्भिश्च क्षमायुक्तैस्त्रिसंध्यं जपतत्परैः॥ ४० ॥ ऋग्यजुःसामविहितैर्मंत्रैर्हो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपरायणैः ॥ केचित्पंचाग्निमध्यस्थाः केचिदेकान्तसंश्रिताः ॥ ४१ ॥ ऊर्ध्वीकृतकराः केचिदादित्यभ्रमणांतरे ॥ सायंप्रातर्भुजश्चान्ये अन्ये मासार्धभोजनाः ॥ ४२ ॥ दशाहारास्तथा चान्ये केचिच्छैवलभोजिनः ॥ फलाहारास्तथा केचिच्छीर्णपर्णाशनास्तथा ॥ ४३ ॥ अपरे नियताहारा वायुभक्षांबुभोजनाः ॥ एवंभूतैस्तपोवृद्धैः सेव्यमानं महामुनिम् ॥ ४४ ॥ दृष्ट्वा धर्मसुतः श्रीमानृषिसंघैः समावृतः॥ शुद्धं मुनिवरं शांतं ध्यायमानं परं पदम् ॥४५॥ तस्य पादतलं प्राप्य दंडवत्पतितोग्रतः॥ भक्त्या तं प्रणतं दृष्ट्वा चिरादायतलोचनम् ॥ ४६ ॥ को भवानित्युवाचैनं राजानं धर्मवत्सलम् ॥ तस्य तद्वचनं श्रुत्वा दारुको मुनिसत्तमः ॥ ४७ ॥ आचचक्षे तदा सर्वं मार्कंडेयाय धीमते ॥ युधिष्ठिरोयं नृपतिः संप्राप्तस्तव संनिधौ ॥ ४८ ॥ कौरवः पांडुतनयः सोमवंशविवर्धनः ॥ द्यूते निरस्तो राज्यार्थे भ्रातृभिर्वनमागतः ॥ ४९ ॥ तच्छ्रुत्वा वचनं तस्य मार्कंडेयो महातपाः ॥ एहीति भगवंस्तत्र समालिंग्य नृपोत्तमम् ॥ ५० ॥ मूर्ध्नि स्नेहादुपाघ्राय आसने उपवेश्य तम् ॥ आसीनस्याथ नृपतेः पूजां चक्रे महामुनिः ॥ ५१ ॥ वन्यैर्मूलफलैर्माल्यै रसैश्चापि पृथग्विधैः ॥ पांडवान् ब्राह्मणांश्चैव यथायोग्यमपूजयत् ॥५२॥ इतिश्रीवायुपुराणे रैवीसंहितायां नर्मदामाहात्म्ये-द्वितीयोऽध्यायः ॥ २ ॥

॥ वैशंपायन उवाच ॥ मुहूर्तं चैव विश्रम्य धर्मपुत्रो युधिष्ठिरः ॥ अन्योन्यकुशले वृत्ते मुनीनामपि चासकृत् ॥ १ ॥ स्वस्थासीनेषु सर्वेषु मार्कंडेये च सादरे ॥ पप्रच्छ नृपतिश्रेष्ठः कौतूहलसमन्वितः ॥ २ ॥ युधिष्ठिर उवाच ॥ भगवन् सर्वलोकानां दीर्घायुस्त्वं मतो मम ॥ सप्त कल्पानशेषेण कथयस्व प्रसादतः ॥ ३ ॥ कल्पक्षयेपि लोकस्य स्थावरस्य चरस्य च ॥ न विनष्टोसि विप्रेंद्र कथमेको युगक्षये ॥४॥ गंगाद्याः सरितः सर्वा आसमुद्राश्च याः शुभाः ॥ तासां मध्ये स्थिताः काश्चित् काश्चैव प्रलयं गताः ॥ ५ ॥ एतत्कथय मे तात प्रसन्नेनांतरात्मना ॥ ६ ॥ क आसीद्भवता सार्द्धं देवो देवी युगक्षये ॥ श्रोतुमिच्छामि विप्रेंद्र ऋषिभिः सह बांधवैः ॥ ७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ॥ साधु पृष्टं महाप्राज्ञ धर्मपुत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

युधिष्ठिर ॥ कथयामि यथान्यायं यत्त्वं पृच्छसि मामिह ॥ ८ ॥ सर्वपापहरं पुण्यं पुराणं रुद्रभाषितम् ॥ रुद्राश्च लोकपालोयं
वायुरासीच्च सर्वशः ॥ ९ ॥ श्रावयामास देवर्षीन्मुनीन् राजर्षिसत्तमान् ॥ ऋषिवृंदे समासीने श्रुतं मे तत्र भारत ॥ १० ॥
यः शृणोति नरो भक्त्या तस्य पुण्यफलं शृणु ॥ अश्वमेधसहस्रेण वाजपेयशतेन च ॥ ११ । यत्फलं समवाप्नोति तद-
स्य श्रवणान्नरः ॥ ब्रह्मघ्नश्च सुरापी च स्तेयी गोघ्नश्च यो नरः ॥ १२ ॥ पुराणमेतदाकर्ण्य मुच्यते सर्वपातकैः ॥ जाह्नवी स-
रितां श्रेष्ठा तथा चैव सरस्वती ॥ १३ ॥ कावेरी देविका भद्रा सिंधुसालकुटी तथा ॥ सरयूः शतरुद्रा च चंद्रभागेश्वरी त-
था ॥ १४ ॥ गोदावरी महेंद्री च पयोष्णी यमुना नदी ॥ क्षिप्रा शतद्रूर्वैदर्भी तथा चर्मण्वती इरा ॥ १५ ॥ एताश्चान्याः स-
रिच्छ्रेष्ठाः सर्वपापहराः शुभाः ॥ किंच ते कारणं तात वक्ष्यामि नृपसत्तम ॥ १६ ॥ समुद्राः सरितश्चैव कल्पेकल्पे क्षयंग-
ताः ॥ सप्तकल्पक्षये क्षीणे न मृता तेन नर्मदा ॥ १७ ॥ एषा देवी मया दृष्टा ततो वक्ष्यामि तेऽनघ ॥ आश्चर्यभूता राजेन्द्र त्रि-
षु लोकेषु विश्रुता ॥ १८ ॥ इति नर्मदामाहात्म्ये तृतीयोध्यायः ॥ ३ ॥ ॥ युधिष्ठिर उवाच ॥ सप्तकल्पक्षया घोरास्त्वया
दृष्टा महामुने ॥ न चान्यो दृश्यते त्वत्तो दीर्घायुरिह कश्चन ॥ १ ॥ त्वया ह्येकार्णवे सुप्तः पद्मनाभः सुरारिहा ॥ दृष्टः सहस्रचरणः
सहस्रनयनो हरिः ॥ २ ॥ त्वं किह्यानुग्रहात्तस्य दह्यमाने चराचरे ॥ न क्षयं समनुप्राप्तो वरदानान्महात्मनः ॥ ३ ॥ किं त्वमाश्च-
र्यभूतं च दृष्टं च भ्रमतानघ ॥ एतदाचक्ष्व भगवन् परं कौतूहलं हि मे ॥ ४ ॥ संप्राप्ते तु महाघोरे युगस्यांते महाक्षये ॥ अनावृष्टि
हते लोके पुरावर्षशताधिके ॥५॥ ओषधीनां क्षये प्राप्ते देवदानववर्जिते ॥ निर्वीर्ये निर्वषट्कारे कलिना दूषिते भृशम् ॥६॥ सरित्सरस्त
डागेषु पल्वलोपवनेषु च ॥ संशुष्केषु तदा ब्रह्मन् निराकारे युगक्षये ॥७॥ जाते महार्णवे घोरे निर्ब्रह्मक्षत्रविड्जने ॥ ऋषयश्च म-

१ पृषोदरादित्वात्साधु.

CC-0. In Public Domain. Digitization by eGangotri

हात्मानो दिव्यतेजःसमन्विताः ॥८॥ स्थितानि कानि भूतानि गतानि च महामुने ॥ क्षयंगते महाभाग कथयस्व प्रसादतः ॥१०॥
क्षयांते चैव विप्रेंद्र कथं सिद्धिमुपागताः ॥ ब्रह्मविष्णिंवद्ररुद्राद्याः कलौ प्राप्ते महामुने ॥११॥ एवं पृष्टस्ततस्तेन धर्मराजेन धीमता ॥
मार्कंडः प्रत्युवाचेदं ऋषिसंघसमावृत्तः ॥ १२ ॥ श्रीमार्कंडेय उवाच ॥ शृण्वंतु ऋषयः सर्वे त्वया सह नराधिप ॥ महापुराणं
पूर्वोक्तं शंभुना वायुदैवतम् ॥ १३ ॥ वायोः सकाशात् स्कंदेन श्रुतमेतत्पुरातनम् ॥ वसिष्ठः श्रुतवांस्तस्मान्मुनिः पाराशरस्ततः
॥ १४ ॥ तस्मात्तु जातूकर्णेन तस्मादपि महर्षिभिः ॥ एवं परंपराप्रोक्तं शतसंख्यैर्द्विजोत्तमैः ॥ १५ ॥ संहिताशतसाहस्री पुरोक्ता
शंभुनाऽनिलम् ॥ आलोक्य सर्वशास्त्राणि वेदार्थं तत्त्वतः पुरा ॥१६॥ युगरूपेण सा पश्चाच्चतुर्धा विनियोजिता ॥ तत्तत्प्रज्ञानुसारेण
नराणां तु महर्षिभिः ॥ १७ ॥ आराध्य पशुभर्त्तारं मया पूर्वं महेश्वरम् ॥ पुराणं यच्छ्रुतं तात तत्ते वक्ष्याम्यशेषतः ॥ १८ ॥
यच्छ्रुत्वा मुच्यते जंतुर्नानापापैर्नरेश्वर॥ मनोवाक्कर्मजैश्चैव सप्तजन्मसुसंचितैः ॥ १९ ॥ सप्तजन्मक्षया घोरा मया दृष्टा पुनःपुनः ॥
प्रसादाद्देवदेवस्य शूलिनः परमेष्ठिनः ॥ २० ॥ द्वादशादित्यनिर्दग्धे जलसंप्लाविते तदा ॥ श्रांतोहं च भ्रमंस्तत्र तरन् बाहुभिरर्णवम्
॥२१॥ अथाहं सलिलांते नु आदित्यसमरूपिणम् ॥ पुराणपुरुषं राजन्नद्राक्षं परमाद्भुतम् ॥२२॥ शृंगाग्रे गिरिराजस्य भासयन्तं दिशो
दश ॥ द्वितीयोन्यो मनुर्दृष्टः किंचिद्भयसमन्वितः ॥२३॥ अगाधे भ्रमते सोपि तमोभूते महार्णवे ॥२४॥ अविश्रमान्मुहूर्तं तु चक्रारू
ढ इवानघ ॥ अथाहं भयसंत्रस्तस्तरन् बाहुभिरर्णवम् ॥२५॥ तत्रस्थश्च महामत्स्यमपश्यं मदसंयुतम् ॥ ततोऽब्रवीत्स मां दृष्ट्वा ऐह्यहा-
ति च भारत ॥ २६ ॥ परः प्रधानः सर्वेषां मत्स्यरूपो महश्वरेः ॥ ततोहं त्वरया गत्वा सन्मुखो नृपसत्तम ॥ २७ ॥ सुश्रांतो
विगतज्ञानः परं निर्वेदमागतः ॥ अथाद्राक्षं समुद्रांते महदावर्त्तसंकुलाम् ॥२८॥ उद्यत्तरंगसलिलां फेनपुंजादिहासिनीम् ॥ नंदिका
मगमां पुण्यां नक्रमीनसमाकुलाम् ॥२९॥ ततस्तस्यास्तु मध्यस्था प्रमदा कामरूपिणी ॥ नीलोत्पलदलश्यामा पद्मेक्षणनिभानना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३० ॥ दिव्यहाटकचित्रांगी कर्णकुंडलशोभिता ॥ स्वभावशक्त्या संगृह्य महापोतं व्यवस्थिता ॥ ३१ ॥ तां मनुः प्रत्युवाचेदं
का त्वं दिव्या वरानने ॥ तिष्ठसे केन कार्येण वद त्वं सुरसुंदरि ॥३२॥ सुरासुरगणे नष्टे नष्टे स्थावरजंगमे ॥ अविनष्टा कथं देवी
भ्रमसे लीलयार्णवे ॥ ३३ ॥ सरितः सागराः शैलाः क्षयं याता ह्यनेकशः ॥ त्वमेका नु कथं देवी तिष्ठसे कारणं महत् ॥३४॥
श्रोतुमिच्छाम्यहं सर्वं कथयस्व प्रसादतः ॥ ३५ ॥ अबलोउवाच ॥ ईश्वरांगसमुद्भूता अमृता नाम विश्रुता ॥ सरित्पापहरा
विश्वे मामाश्रित्य भयं कुतः ॥ ३६ ॥ साहं पोतममुं तुभ्यं गृहीत्वा ह्यागता द्विज ॥ तत्रेदं पोतसंस्थानं यत्र तिष्ठति शंकरः॥३७॥
॥मार्कंडेय उवाच ॥ तस्यास्तद्वचनं श्रुत्वा विस्मयोत्फुल्ललोचनाः ॥ मनुना सह राजेंद्र पोतारूढो ह्यहं सदा ॥३८॥ कृतांजलिः पुरो
भूत्वा प्रणम्य शिरसा विभुम्॥ व्यापिनं परमेशानं सर्वसत्त्वाभयप्रदम् ॥३९॥ सद्योजाताय देवाय वामदेवाय वै नमः ॥ भवाभा-
व नमस्तुभ्यं भक्तिभावितमानसः ॥ ४० ॥ भूर्भुवाय नमस्तुभ्यं स्वर्मयाय च शंभवे ॥ नमोस्तु घोररूपाय वामज्येष्ठाय वै नमः
॥ ४१ ॥ नमस्ते भद्रकालाय कलिरूपाय ते नमः ॥ तथा तत्पुरुषेशानरूपायांधकनाशिने ॥ ४२ ॥ अचिंत्याव्यक्तरूपाय महादे-
वाय ते नमः ॥ जगत्सृष्टिविनाशानां कारणाय नमो नमः ॥ ४३ ॥ एवं स्तुतो महादेवः पूर्वं तु स मयानघ ॥ प्रसन्नो ह्यवदत् प-
श्चात् वरं वरयतामिति ॥४४॥ इति श्रीरेवाखंडे नर्मदामाहात्म्ये चतुर्थोध्यायः ॥४॥ ॥ मार्कंडेय उवाच ॥ ततोर्णवात्समुत्तीर्ण
स्त्रिकूटशिखरे स्थितः ॥ महत्कनकवर्णाभे नानारत्नोपशोभिते ॥ १ ॥ महासने सुखासीनं रुद्रकोटिसमन्वितम् ॥ महादेवं
महात्मानमीशानमजमव्ययम् ॥ २ ॥ सर्वभूतमयं तात मनुना सह सुव्रत ॥ भूयो ववंद चरणौ सर्वदेवनमस्कृतौ ॥ ३ ॥ त-
त्रस्थान् युगसाहस्रं सह रुद्रेण मानद ॥ तस्मिन्नेकार्णवे घोरे स्थितोहं कुरुनंदन ॥४॥ युधिष्ठिर उवाच ॥ एतच्छ्रुत्वा तु मे तात प-

१ महापोतम् नावम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रं कातूहलं हृदि ॥ जातं तत्कथयस्वेति शृण्वतः सह बांधवैः ॥ ५ ॥ काशपद्मपलाशाक्षी तमोभूते महार्णवे ॥ ब्रुवाणा रुद्रजे-
त्येका भ्रमंती योगिनी यथा ॥ ६ ॥ मार्कंडेय उवाच ॥ अयमेव मया प्रश्नः पुरा पृष्टो मनुं स्वयम् ॥ तमेव तुभ्यं वक्ष्यामि अबला-
याः समुद्भवम् ॥ ७ ॥ व्यतीतायां निशायां तु ब्रह्मणः परमेष्ठिनः ॥ प्रभाते विमले जाते सृज्यमानेषु जंतुषु ॥ ८ ॥ मनुं प्रणम्य शि
रसा पृच्छाम्येतद्युधिष्ठिर ॥ केयं हि पद्मपत्राक्षी श्यामा चंद्रनिभानना ॥ एकार्णवे भ्रमत्येका वदति रुद्रजेति ह ॥ ९ ॥ वेदमाता
तु सावित्री किंवा ब्राह्मी सरस्वती ॥ उमा वा शाश्वती देवी लक्ष्मीर्मंदाकिनी तु वा ॥ १० ॥ कालरात्री स्थिता वा सा प्रकृति-
र्वा सुखोचिता ॥ एतदाचक्ष्व भगवन् या सा त्वमृतसंभवा ॥ ११ ॥ भ्रमत्येकार्णवे घोरे नष्टे स्थावरजंगमे ॥ मनुरुवाच ॥ शृणु
विप्र यथा पृष्टमस्या वक्ष्यामि संभवम् ॥ १२ ॥ यथा रुद्रात् समुद्भूता या चेयं वरवर्णिनी ॥ पुरा शिवः शांततनुश्चचार विपुलं तपः
॥ १३ ॥ हितार्थं सर्वलोकानामुमया सह शंकरः ॥ ऋक्षशैलं समारुह्य तपोतप्यत्सुदारुणम् ॥ १४ ॥ अदृश्यः सर्वभूतानां सर्वभूता-
त्मिको विभुः ॥ तपतस्तस्य देहाच्च स्वेदः समभवत्किल ॥ १५ ॥ स गिरिं प्लावयामास स्वेदो रुद्रांगसंभवः ॥ तस्य स्वेदात्समुद्भू-
ता महापुण्या सरिद्वरा ॥ १६ ॥ या त्वयैकार्णवे दृष्टा पद्मपत्रायतेक्षणा ॥ स्त्रीरूपं सा समासाद्य रुद्रस्याराधने रता ॥ १७ ॥
आद्ये कृतयुगे तस्मिन् समानामयुतं द्विज ॥ ततस्तुष्टो महादेव उमया सह शंकरः ॥ १८ ॥ उवाचैतां महाभागे ब्रूहि यत्तेऽभिवां-
छितम् ॥ सरिदुवाच ॥ प्रलये समनुप्राप्ते नष्टे स्थावरजंगमे ॥ प्रसादात्तव देवेश अक्षय्या वै भवाम्यहम् ॥ १९ ॥ ये नराः पातकैर्यु-
क्ता महापातकिनश्च ये ॥ मुच्यंतां पातकैर्घोरैस्तथा स्नाता मयि प्रभो ॥ २० ॥ उत्तरे जाह्नवीदेशे यथा पापप्रणाशिनी ॥ भवामि
दक्षिणे देशे तथाहं सुरपूजिता ॥ २१ ॥ स्वर्गादागत्य गंगेति यथा ख्यातिं गता विभो ॥ तथा दक्षिणगंगेति भवामि त्रिदशेश्वर ॥

---

१ समानां वर्षानाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥२२॥ पृथिव्यां सर्वतीर्थेषु स्नात्वा यल्लभते फलम् ॥ तत्फलं लभतां मर्त्यो मयि स्नातो महेश्वर ॥२३॥ ब्रह्महत्यादिकं पापं मनु-
जैः संचितं क्वचित् ॥ मासमात्रेण तद्देव क्षयं यात्ववगाहनात् ॥ २४ ॥ सर्वदानोपवासेषु सर्वतीर्थावगाहने ॥ यत्फलं लभते मर्त्य-
स्तदस्तु मम दर्शनात् ॥ २५ ॥ मम तीरे नरा ये तु यजयंति महेश्वरम् ॥ त्वां विभुं परमं शांतं ते यांतु परमं पदम् ॥ २६ ॥
मम कूले महे[illegible]न उमया सहितः प्रभो ॥ वसन्नित्यं जगन्नाथ एष एव वरोस्तु मे ॥ २७ ॥ मम तोयेन संस्पृष्टाः पाषाणा मम
तीरजाः ॥ विप्राणाः शिवभावं ते यच्छन्तु नरवांछितम् ॥२८॥ सुकर्मा वा विकर्मा वा शांतो दांतो जितेंद्रियः ॥ मृतो मम ज-
लैः पृक्तो विष्णोर्वा स्याच्छिशिवातिथिः ॥ २९ ॥ त्रिषु लोकेषु विख्याता सर्व पापप्रणाशिनी ॥ भवामि देवदेवेश त्वत्प्रसादात्तथा
कुरु ॥ ३० ॥ एतांश्चान्यान् वरान् दिव्यान् प्रार्थितान् स्तुतिसंभवान् ॥ यानयुक्तान्वदाम्येतांस्तान्मे देहि महेश्वर ॥ ३१ ॥ एवं
विनययुक्तायाः प्रार्थयंत्या नृपोत्तम ॥ श्रुत्वा देवो नर्मदायाः प्रसन्नो वाक्यमब्रवीत् ॥ ३२ ॥ महेश्वर उवाच ॥ एवं भवतु कल्याणि
यत्त्वयोक्तमनिंदिते ॥ नान्यो वरो हि लोकेऽस्मिन् मुक्त्वा त्वां वरवर्णिनि ॥३३॥ यदैव मम देहात्त्वं समुद्भूता वरानने ॥ तदैव सर्व-
पापानां मोचनी त्वं न संशयः ॥ कल्पक्षयकरे काले कलौ घोरे विशेषतः ॥ ३४ ॥ उत्तरं कूलमासाद्य निवसिष्यंति सद्गतिम् ॥
दक्षिणं कूलमासाद्य ये द्विजा धर्मवत्सलाः ॥ ३५ ॥ आजन्म निवासिष्यंति पितृलोकनिवासिनः ॥ अहं तु तव वाक्येन कस्मिं-
श्चित्कारणांतरे ॥ ३६ ॥ वसिष्यामि सदा देवि वसिष्यंति ममाशया ॥ दक्षिणे पितृभिः सार्धं तथान्ये सुरसुंदरि ॥ वसि-
ष्यंति मया सार्धं दत्त एव वरो मम ॥ ३७ ॥ कल्याणं कुरु लोकानामशुभं नाशयस्व च ॥ गच्छ विन्ध्यं महाभागे मर्त्यान् पापा-
द्विमोचय ॥ ३८ ॥ सहिता ऋषिसंघैस्त्वं तथा सिद्धसुरासुरैः ॥ मार्कंडेय उवाच ॥ एवमुक्त्वा महादेवं उमया सहितो विभुः ॥
॥ ३९ ॥ वंद्यमानोथ मनुना तथा चादर्शनं गतः ॥ तेनैषा सुमहापुण्या सर्वपापप्रणाशिनी ॥ ४० ॥ या पृष्टा भवता तात मा ते

CC-0. In Public Domain. Digitization by eGangotri

भवतु विस्मयः ॥ एषा गंगा महापुण्या त्रिषु लोकेषु विश्रुता ॥ ४१ ॥ स्रोतोभिः पंचदशभिः पावयंती दिशो दश ॥ शृणु तानि
महाभाग वक्ष्यामि नृपसत्तम ॥ ४२ ॥ शोणो महानदश्चैव नर्मदा सुरसा कृपा ॥ मंदाकिनी महापुण्या त्रिकूटविमला तथा ॥
॥ ४३ ॥ चित्रोत्पला विपापा च रंजना वालुवाहिनी ॥ महार्णवा विपाशा च रेवा च करभा तथा ॥ ४४ ॥ रुक्षपादप्रसूताश्च
सर्वा वै रुद्रसंभवाः ॥ सर्वपापहरा पुण्याः सर्वा मंगलदाः शिवाः ॥४५॥ एतेश्च नामभिर्दिव्यैः श्रूयते वेदपारगैः ॥ पुराणज्ञैर्महाभागै
राज्यपैः सोमपैस्तथा ॥ ४६ ॥ इत्येतत्सर्वमाख्यातं महाभाग्यं नृपोत्तम ॥ मनुनोक्तं पुरा मह्यं अमृतायाः समुद्भवम् ॥ ४७ ॥ पु-
ण्यं पवित्रमतुलं रुद्रोदितमिदं शुभं ॥ ये नराः कीर्तयंत्यत्र भक्त्या शृण्वंति चैव ये ॥ ४८ ॥ प्रातरुत्थाय नाम्नां हि कलापदशप-
ञ्चकम् ॥ ते नराः सकलं पुण्यं लक्ष्यंते ह्यवगाहनम् ॥ ४९ ॥ विमानेनार्कवर्णेन घंटाशतनिनादिना ॥ त्यक्त्का मानुष्यकं भावं ते
यांति परमां गतिम् ॥ ५० ॥ इति श्रीवायवीये रुद्रसंगीते श्रीनर्मदामाहात्म्ये पंचमोध्यायः ॥ ५ ॥ ॥ युधिष्ठिर उवाच ॥
आश्चर्यमेतदतुलं कथितं मे द्विजोत्तम ॥ भूयोन्यत् कथयस्वेह परं कौतूहलं हि मे ॥ १ ॥ महाभाग्यमिदं श्रुत्वा नर्मदायाः समुद्भ-
वम् ॥ परं विस्मयमापन्ना ऋषिसंघा मया सह ॥ २ ॥ अहो भगवती पुण्या नर्मदेयमयोनिजा ॥ रुद्रदेहाद्विनिष्क्रांता महापाप-
क्षयंकरी ॥ ३ ॥ सप्तकल्पक्षये प्राप्ते त्वयेयं सह सुव्रत ॥ न मृता येष्वियं देवी त्वं चापि ऋषिपुंगव ॥ ४ ॥ अपक्षिगणसंघाते
जगत्येकार्णवीकृते ॥ कीदृग्रूपः समभवन्महादेवो युगक्षये ॥ ५ ॥ कथं संहरते विश्वं कथमास्ते महार्णवे ॥ कथं च सृज्यते वि-
श्वं कथं च धारये प्रजाः ॥६॥ कीदृग्रूपा भवेद्देवी जगत्येकार्णवीकृते ॥ किमर्थं नर्मदा प्रोक्ता रेवेति च कथं नु सा ॥ त्रिकूटा च
किमर्थं सा किमर्थं वालुवाहिनी ॥७॥ कोटितीर्थसमायुक्ता प्रविष्टा या महार्णवम् ॥ कियंत्यः सरितस्तात नर्मदां समुपासते ॥८॥
यज्ञोपवीतैर्ऋषिभिर्देवताभिस्तथैवच ॥ विभक्तेयं किमर्थं च श्रूयते मुनिसत्तम ॥ ९ ॥ तिष्ठामीति च पुराणज्ञैः किमर्थं प्रोच्यतेऽनघ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केषु स्थानेषु तीर्थेषु पूजनीया सरिद्वरा ॥१०॥ तीर्थानि च पृथग्ब्रूहि येषु सन्निहतो हरः ॥ किंप्रमाणा च सा देवी या रुद्रेण
विनिर्मिता ॥११॥ कीदृशानि च कर्माणि रुद्रेण कथितानि ते ॥ कथं म्लेच्छसमाकीर्णो देशोयं द्विजसत्तम ॥१२॥ पुनः पुण्यत-
मो जज्ञे ईश्वरानुग्रहेण च ॥ जाह्नव्याश्चरितं मन्ये यथावेदनिरूपितम् ॥ १३ ॥ इतिहासपुराणोक्तमिमं सर्वं ब्रवीहि मे ॥
मार्कंडेय उवाच ॥ शृण्वंतु ऋषयःसर्वे त्वं च तात युधिष्ठिर ॥ १४ ॥ पुराणं नर्मदायास्तु कथितं यत्त्रिशूलिना ॥ वायोः सका-
शात्तु मया तेनापि च महेश्वरात् ॥ १५ ॥ वेदार्णवं विनिर्मथ्य देवेन श्रावितं किल ॥ न केवलं पुराणैस्तु बहु ग्रंथार्थविस्तरात्
॥ १६ ॥ अल्पायुषां मनुष्याणां संक्षिप्तमृषीभिः पुरा ॥ कल्पनामानि वक्ष्यामि शृणुराजन्यथातथम् ॥ १७ ॥ मायूरं प्रथमं
कल्पं कौर्मं च तदनन्तरम् ॥ तथापरं कौशिकं च मात्स्यं द्विरदमेव च ॥ १८ ॥ वाराहं यन्मया दृष्टं वैष्टपं चाष्टमं परम् ॥ न्यग्रो-
धाख्यामतश्चासीदीक्षिकं तदनन्तरम् ॥१९॥ पाद्मं च तामसं चैव वर्तोद्वर्तनमेव च ॥ महाप्रलयमित्याहुः पुराणे वेदचिंतकाः ॥२०॥
एवं संक्षेपतः सर्वं संक्षिप्तं तैर्महात्मभिः ॥ विभक्तं च चतुर्भागैर्ब्रह्माद्यैश्च महर्षिभिः ॥२१॥ तदहं संप्रवक्ष्यामि पुराणार्थं विशारद
॥ सप्तकल्पा महाघोरा अनुभूता हि ये मया ॥ २२ ॥ महाभागा महापुण्या यैरियं नमिता सरित् ॥ जगदेतत्तमोभूतमप्र-
ज्ञानमलक्षणम् ॥२३॥ नष्टचंद्रार्ककिरणमासीद्भूतविवर्जितम् ॥ तमसोंते महात्मा वै पुरुषः स जगद्गुरुः ॥२४॥ चचार तस्मिन्ने-
काकी व्यक्ताव्यक्तः सनातनः ॥ स चोंकारमयोतीतो गायत्रीमसृजत्प्रभुः ॥ २५ ॥ स तया सार्धमीशानश्चिक्रीड पुरुषो विराट्
॥ स्वदेहादसृजद्विश्वं पंचभूतात्मसंशितम् ॥ २६ ॥ क्रीडन् सोप्यसृजद्बीजं हिरण्मयमथ प्रभुः ॥ तच्चाण्डमभवद्दिव्यं द्वादशा
दित्यसंप्रभम् ॥२७॥ तद्भित्त्वा पुरुषो जज्ञे चतुर्वक्त्रः पितामहः ॥ सोसृजद्विश्वमेवं तु सदेवासुरमानवम् ॥२८॥ स तिर्यक्पपशुपक्षीकं
सस्वेदांडजरायुजम् ॥ एतदंडं पुराणेषु प्रथमं परिकीर्त्यते ॥ २८ ॥ पुरा कल्पे नृपश्रेष्ठ क्रीडतः परमेष्ठिनः ॥ उमायुक्तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुद्रस्य जगत्येकार्णवीकृते ॥२९॥ हर्षाज्जज्ञे पुरा कन्या उमारुद्रांगसंभवा ॥ शर्वस्योरःस्थलतटादुमादेहविमर्दनात् ॥३१॥ स्वेदाज्जज्ञे महादेवी कन्या राजीवलोचना ॥ द्वितीयः संभवो ह्यस्या रुद्रदेहाद्युधिष्ठिर ॥ ३० ॥ सा परिभ्रमते लोकान् सदेवासुरमानवान् ॥ त्रैलोक्योन्मादजननी रूपेणाप्रतिमा तदा ॥ ३३ ॥ तां दृष्ट्वा देवदैत्येंद्रा मोहिता लुब्धमानसाः ॥ मृगयंति स्म तां कन्यामितश्चेतश्च धावतीम् ॥३४॥ हावभावविशेषैस्तु मोहयंतीं चराचरम् ॥ भ्रमते दिव्यरूपा सा विद्युत्सौदामिनी यथा ॥३५॥ ततो रुद्रं सुराः सर्वे दैत्याश्च सह दानवैः ॥ चरयंति स्म तां कन्यां कामेनाकुलिता भृशम् ॥ ३६ ॥ ततोऽब्रवीन्महादेवो देव दानवयोर्द्वयोः ॥ बलेन तेजसा चैव अधिको यो भविष्यति ॥ ३७ ॥ स इमां प्राप्स्यते कन्यां नान्यथैव सुरोत्तमाः ॥ ततो देवासुराः सर्वे तां कन्यां वव्रुरुद्यताः ॥ ३८ ॥ अहमेतां ग्रहीष्यामि न त्वं ह्यहमथाब्रुवन् ॥ तावता पश्यतां तेषां सा कन्यांतरधीयत ॥३९॥ पुनः पश्यंति तां सर्वे या जनांतरसंस्थिता ॥ जग्मुस्ते त्वरिताः सर्वे यत्र सा समदृश्यत ॥४०॥ त्रिभिश्चतुर्भिश्च तथा योजनैर्दृश्यते पुनः ॥ क्वचिद्दूरे समीपे च तां पश्यंति मृगेक्षणाम् ॥ ४१ ॥ योजनानां शतैर्भूयः सहस्रैश्च युधिष्ठिर ॥ तथा शतसहस्रैश्च लघुत्वात्सा प्रदृश्यते ॥ ४२ ॥ क्वचिदग्रे क्वचित्पृष्ठे दिशासु विदिशासु च ॥ तां पश्यन्ति वरारोहां एकधा बहुधा पुनः ॥४३॥ दिव्यं वर्षसहस्रं तु भ्रामितास्ते तया पुनः ॥ नचावाप्ता तु सा कन्या रुद्रदेहसमुद्भवा॥४४॥ सहोमया महादेवो जहासोच्चैः पुनःपुनः ॥ गणास्ते तालसंपातैर्नृत्यंति च मुदान्विताः ॥ ४५ ॥ अकस्माद्दृश्यते कन्या शंकरस्य समीपगा ॥ दृष्ट्वा विस्मयमापन्ना देवा यांति पराङ्मुखाः ॥ ४६ ॥ तस्याश्चक्रे ततो नाम हास्यदानात्पिनाकधृक् ॥ भविष्यसि वरारोहे सरिच्छ्रेष्ठा तु नर्मदा ॥ ४७ ॥ स्वरूपावस्थितो देवः प्राप्तो हास्यं यतो भुवि ॥ नर्मदा तेन चोक्तेयं सुशीतलजला शिवा ॥४८॥ कल्पकल्पक्षयेऽक्षीणा यदुक्तं शंभुना पुरा ॥ न मृता येन तेनासावमृताख्यातिमागता ॥ ४९ ॥ ततस्तामददात्कन्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

शीलरूपगुणान्विताम् ॥ महार्णवाय पतये सर्वभूतपतिः प्रभुः ॥ ५० ॥ ततः साक्रष्यशैलेंद्रात्फेनपुंजाविहासिनी ॥ विवेश नर्मदा देवी समुद्रं सरितां पतिम् ॥ ५१ ॥ एवं ब्राह्मे पुराकल्पे नर्मदाऽभवदीश्वरात् ॥ मायुरे तु यथा दृष्टा मया पूर्वं तथा शृणु ॥५२॥ इति श्रीनर्मदामाहात्म्ये कल्पसमुद्भवो नाम षष्ठोऽध्यायः ॥६॥ श्रीमार्कंडेय उवाच ॥ ॥ पुनर्युगांते संप्राप्ते तृतीये नृपसत्तम ॥ द्वादशार्कतनुर्भूत्वा भगवान्नीललोहितः ॥ १ ॥ सप्तद्वीपसमुद्रांतां सशैलवनकाननाम् ॥ दग्ध्वा वसुमतीं कृत्स्नां कालो भूत्वा महेश्वरः ॥ २ ॥ ततो महाघनो भूत्वा प्लावयामास वारिणा ॥ अतिकृष्णतनुर्देवो विद्युदिंद्रायुधांकितः ॥ ३ ॥ प्लावयित्वा जगत्सर्वं तस्मिन्नेकर्णवीकृते ॥ सुष्वाप विमले तोये संक्षिप्य जगदात्मनि ॥४॥ ततोहं विभ्रमंस्तत्र तमोभूते महार्णवे ॥ दिव्यं वर्षसहस्रं तु वायुभूतो महेश्वरम् ॥ ५ ॥ हुंकृत्वा देवदेवेशं येनेदं गहनीकृतम् ॥ ध्यायमानस्ततो दिव्यं राजेंद्र विमले जले ॥ ६ ॥ तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजंगमे ॥ मयूरं स्वर्णपक्षाढ्यमपश्यं सहसा जले ॥ विचित्रचंद्रकोपेतं नीककंठं सुलोचनम् ॥७॥ ततो मयूरः समहार्णवेपि विक्षोभयन् वारि महाजवेन॥चचार देवस्त्रिशिखी शिखंडी त्रैलोक्य गोप्ता स महानुभावः ॥ ८ ॥ शिवेन रौद्रेण मयूररूपिणा विक्षोभमाने सलिलेऽथ तस्मिन्॥ सह भ्रमंतीं च महार्णवांते सदिद्दरां तां भगवान् ददर्श॥९॥ उवाच तां दिव्यमयूररूपो दृष्ट्वा भ्रमंतीं महदूर्मिजालैः ॥ का त्वं शुभे शाश्वति दिव्यदेहे क्षयं न यातासि महाक्षयांते ॥ १०॥ देवासुरगणे नष्टे नष्टे स्थावरजंगमे ॥ का त्वं भ्रमसि पद्माक्षि कुतो यातासि न क्षयम् ॥ ११ ॥ देव्युवाच ॥ तव प्रसादाद्देवेश मृत्युर्मम न विद्यते ॥ सृज देव पुनर्विश्वं शर्वरी[1] क्षयमागता ॥ १२ ॥ एतच्छ्रुत्वा महादेवो व्यधुनत्पक्षपंजरम् ॥ तावत्पक्षपुटात्तस्य शतशोथ सहस्रशः ॥ १३ ॥ निर्गता देवदैत्येशाः सिद्धादित्यमरुद्गणाः ॥ तेषां मध्ये पुनः सा तु नर्मदा भ्रमते सरित्

१ देवरात्रिः

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ ततश्चान्यो महाशैलो दृश्यते भरतर्षभ ॥ त्रिभिः कूटैः[1] सुविस्तीर्णैः शृंगवानिव गोवृषः ॥ १५ ॥ त्रिकूट इति विख्यातः सर्वरत्नैर्विभूषितः ॥ कूटादेकादियं देवी प्लावयंती महीं ययौ ॥ १६ ॥ त्रिकूटा तेन विख्याता पितॄणां त्रायिणि[2] पुरा ॥ द्वितीयाँ[3]-च्च ततो गंगा निर्गता धरणीतले ॥ १७ ॥ तृतीयं च ततः कूटं सप्तधा खण्डशो गतम् ॥ जंबुद्वीपे तु संजाताः सप्त ते कुलपर्वताः ॥ १८ ॥ चंद्रनक्षत्रसहितं वनग्रामनगावृतम् ॥ अंडजं स्वेदजं जातमुद्भिज्जं च जरायुजम् ॥ १९ ॥ एवमादि जगत्सर्वं मयूराद्भवत् पुरा ॥ चरं स्थिरं महाराज महादेवसमुद्भवम् ॥ २० ॥ ततो नदीः समुद्रांश्च संविभज्य पृथक्पृथक् ॥ उवाच नर्मदां देवो-गच्छ त्वं दक्षिणां दिशम् ॥ २१ ॥ भव दक्षिणगंगा या महापातकनाशिनी ॥ उत्तरे जाह्नवी देवी पुण्या त्वं दाक्षिणे शुभे ॥ २२॥ यथा गंगा महापुण्या मम मस्तकसंस्थिता ॥ भारते त्वं तथा पुण्या भविष्यसि सरिद्वरे ॥ २३ ॥ त्वया सह चरिष्यामि निजांशे-नेह सुव्रते ॥ महापापगदार्तानामौषधं त्वं भविष्यति ॥ २४ ॥ एवमुक्ता तु देवेन महापापौघनाशिनी ॥ दक्षिणा दिग्विभागं तु सा जगाम महानदी ॥ २५ ॥ ऋष्यशैलेंद्रमासाद्य देवैरीशादिभिर्वृता[4]॥ महोद्यैः प्रस्थिता देवी नृत्यंतीव सुरैर्वृता ॥ २६ ॥ य-स्मान्महार्णवे घोरे दृश्यते महती सरित् ॥ महार्णवेति सा प्रोक्ता तेनेयं नृपसत्तम ॥२७॥ तप्यतस्तस्य देवस्य शूलाग्राद्बिंदवोप-तन् ॥ शोणाः शोणाभिघातेन दशार्णा देशसंज्ञया ॥ २८ ॥ सर्वासां नर्मदा पुण्या रुद्रदेहाद्विनिःसृता ॥ सर्वाभ्योपि सारिद्भ्यश्च वरदानैर्महात्मनः ॥ २९ ॥ शंकरानुग्रहाद्देवी महापुण्यतमा स्मृता ॥ यस्माद्विक्षोभ्यमानापि दिग्गजैरचलोद्यमैः ॥३०॥ कलुषत्वं न संप्राप्ता रसेन सुरसा ततः ॥ कृपां करोति सा यस्माल्लोकानामभयप्रदा ॥ ३१ ॥ संसारार्णवमग्नानां तेन नाम्ना कृपा स्मृता॥ पुरा कृतयुगे पुण्ये दिव्यमंदारभूषिता॥ कल्पवृक्षसमाकीर्णा पद्मोत्पलसमावृता ॥३२॥ भित्त्वा महार्णवं क्षिप्रं यस्माद्वेगादिहागता॥

१शृंगैः। २ उद्धारकर्त्री। ३ कूटात् ४ शिवादिभिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूज्या सुरगणैः सिद्धैस्तदेषा च महार्णवा ॥३३॥ विचित्रोत्पलसंघातैर्द्विपकक्ष्यद्विजैर्वृता ॥ भित्त्वा शैलं तु विपुलं प्रयातेयं महार्णवम् ॥ ३४ ॥ भ्रामयंती दिशः सर्वा वारिपूरेण वेगतः ॥ प्लावयंती विराजंती तेन रेवा निगद्यते ॥ ३५ ॥ भार्यापुत्रकलत्रादिपाशैः संवेष्टितान् नरान् ॥ विपाशान् कुरुते यस्मात् विपाशा तेन सा स्मृता ॥३६॥ विण्मूत्रनिचये मग्नान् संसारार्णवतारिणी ॥ नर्मदा विमलांभोजविमलेंदुशुभानना ॥ ३७ ॥ तमोभूते महाघोरे यस्मादेषा महाप्रभा ॥ विमला तेन सा प्रोक्ता विद्वद्भिर्नरसत्तम ॥ ३८ सुधाकरकरप्रख्यैस्तिग्मांशोरिव सोदरैः ॥ स्वकैरर्भावयेद्विश्वं करभा तेन चोच्यते ॥ ३९ ॥ यस्माद्रञ्जयते लोकान् दर्शनादेव भारत ॥ रंजनी तेन सा प्रोक्ता पुराणज्ञैर्नृपोत्तम ॥४०॥ तृणवीरुधगुल्माद्यान् तिर्यंचः पशुपक्षिणः ॥ बालभूतान् [1]वहेत्स्वर्गं तेनैषा बालवाहिनी ॥४१॥ एवं यो वेत्ति नाम्नां हि निर्णयं नरसत्तम ॥ स याति पापनिर्मुक्तो रुद्रलोकं न संशयः ॥ ४२ ॥ इति श्री नर्मदामाहात्म्ये रुद्रसंगीते मयूरकल्पो नाम सप्तमोऽध्यायः ॥ ॥ श्रीमार्कंडेय उवाच ॥ पुनरेकार्णवे घोरे नष्टे स्थावरजंगमे ॥सलिलेनाप्लुते लोके निरालोके तमोमये ॥१॥ ब्रह्मैको व्यचरत्तत्र तमोभूते महार्णवे॥ दिव्यं युगसहस्रं तु खद्योत इव दीप्तिमान्॥ २॥ अथ घोरार्णवे सुप्तमपश्यत् कूर्मरूपिणम् ॥ देवं योजनसाहस्रं समंताद्व्याप्यसंस्थितम ॥३॥ द्वादशादित्यसंकाशं सहस्रचरणेक्षणम् ॥ तं दृष्ट्वा विस्मयापन्नो ब्रह्मा बोधयते शनैः ॥ ४ ॥ स्तुतिभिर्मंगलैश्चैव वेदवेदांगसंभवैः ॥ ५ ॥ श्रीब्रह्मोवाच ॥ वाचस्पते प्रबुध्यस्व महाभूत नमोस्तुते ॥ तवोदरे जगत्सर्वं तिष्ठते परमेश्वर ॥ ६ ॥ तद्विमुंच महासत्त्वं यत्पूर्वं संहृतं त्वया ॥ व्यतीता रजनी ब्राह्मी दिनं समनुवर्तते ॥ ७॥ निरीक्षस्व त्रिलोकेश येन संभवते जगत् ॥ स निशम्य वचस्तस्य विबुध्य परमेश्वरः ॥ ८ ॥ तस्मिन्नेकार्णवे घोरे नदीनदविवर्जिते ॥ नानातरंगनिनदामावर्तोद्वर्तसंयुताम् ॥ ९ ॥ नदीमपश्यद्देवेशो ह्यनौपम्यजला-

---

१ सूर्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रवरे रम्ये कांचनशोभिते ॥२१॥ तथान्यत्तस्य मध्ये तु दृश्यते पुरमुत्तमम् ॥ शतयोजनविस्तीर्णं तावद्द्विगुणमायतम् ॥२२॥ पुरमध्ये ततस्तत्र नदी परमशोभना ॥ वहते पुण्यसलिला नानारत्नशिलातला ॥ २३ ॥ तस्यास्तीरे मया दृष्टं तडित्सूर्यसमप्रभम् ॥ इंद्रनीलमहानीलैश्चित्रं रत्नैः समंततः ॥ २४ ॥ क्वचिद्वह्निसमाकारं क्वचिदिंद्रायुधोपमम् ॥ क्वचित्कृष्णं क्वचित्पीतं क्वचिद्रक्तं क्वचित्सितम् ॥ २५ ॥ नानावर्णमहालिंगं दृष्टमद्भुतदर्शनम् ॥ ब्रह्मविष्णिंवद्रदेवाद्यैः समंतात्परिवारितम् ॥ २६ ॥ नंदिभृंगिगणेशाद्यैश्चंद्रादित्यैश्च संवृतम् ॥ पश्यामि लिंगमैशानं भुक्तिमुक्तिप्रदं शिवम् ॥२७॥ परिवार्य ततस्तं तु प्रसुप्तान् देवदानवान् ॥ प्रपश्यामि शुभाकारान्परमान्मीलितेक्षणान् ॥ ॥ २८ ॥ ततस्ताः पद्मपत्राक्ष्यो नार्यः परमसंमताः ॥ तस्या नद्या जले स्नात्वा दिव्यैः पुष्पैर्मनोहरैः ॥ २९ ॥ दत्वार्घ्यपाद्यं विधिवत् लिंगस्य कमलेक्षण ॥ अभ्यर्चयन्वरारोहा दश ताः प्रमदोत्तमाः ॥ ३० ॥ ततस्त्वभ्यर्चिते लिंगे तस्मिंस्ताः सर्वकन्यकाः ॥ जग्मुश्चादर्शनं राजन् विद्युतोभ्रगणेष्विव ॥ ३१ ॥ नचासौ पक्षिराट् दृष्टो न स्त्रियो न च देवताः ॥ सदैवैकं स्थितं लिंगमर्च्चितं परमाद्भुतम् ॥ ३२ ॥ आसाहं दुःखसंमूढो रुद्रमायेति चिंतयन् ॥ ततोनघा समुत्तीर्य दिव्याभरणभूषिता ॥ ३३ ॥ भ्रामयंती जगत्सर्वं कन्या राजीवलोचना॥ पद्मैर्हिरण्ययैर्दिव्यैः पूज्य तल्लिंगमुत्तमम् ॥३४॥ पुनस्तज्जलमासाद्य प्रविवेश वरांगना॥ तस्मिन् पुरवरे रम्ये तामेवाहं पुनःपुनः ॥३५॥ पश्यामि नृपते कन्या तमर्चयंती महेश्वरम् ॥ ततोहं तां वरारोहां पृष्टवान् कमलेक्षणाम् ॥ ३६ ॥ का त्वमस्मिन्पुरे देवी शिवार्चनरता वद ॥ क्व गतास्ताः स्त्रियः सर्वाः क्व गतास्ते गणेश्वराः ॥ ३७ ॥ नमोस्तु ते महाभागे ब्रूहि पुण्यमहोदये ॥ तव प्रसादाद्विज्ञातुमिच्छामि कमलेक्षणे ॥ कृपां कुरु महादेवी कथयस्व यथातथम् ॥ ३८ ॥ स्त्रीउवाच ॥ विस्मृतस्त्वं कथं विप्र दृष्ट्वा कल्पे पुरातने ॥ मा भवत्ते स्मृतिभ्रंशः सा चाहं कल्पवाहिनी ॥३९॥ नर्मदा नाम विख्याता रुद्रदेहाद्विनिर्गता ॥ यास्ताः कन्यास्त्वया दृष्टाः पूजयंत्यो महेश्वरम् ॥४०॥ याभिश्च सह-

CC-0. In Public Domain. Digitization by eGangotri

सानीतः पक्षिराजसमन्वितः ॥ विद्धि कन्यादिशस्तास्तु स च पक्षी महाप्रभुः ॥ ४१ ॥ भ्रमते पक्षिरूपेण महायोगी महेश्वरः ॥ अर्च्यते ब्रह्मविष्ण्विन्द्रैः सुरासुरगुरुर्हरः ॥ ४२ ॥ यस्मादस्मिंल्लयं याति विश्वमेतच्चराचरम् ॥ तेन लिंगमिति प्रोक्तं पुराणज्ञैर्महात्मभिः ॥ ४३ ॥ तेन देवगणाः सर्वे संक्षिप्ता मायया पुरा ॥ मल्लीनाश्चैव लोकास्ते न दृश्यंते हि सांप्रतम् ॥ ४४ ॥ पुनर्द्रक्ष्या भविष्यंति सृज्यमानाः स्वयंभुना ॥ साहं लिंगार्चनपरा नर्मदा नाम नामतः ॥ ४५ ॥ कालं युगसहस्रं तु रुद्रस्य परिचारिका ॥ अस्य प्रसादादमरा तुष्टाहं मुनिपुंगव ॥ ४६ ॥ सप्तार्जुनसमायुक्तः सिद्धोसि त्वं शिवार्चनात् ॥ पूजितः संस्तुतो वापि संस्मृतो वा महामुने ॥ ४७ ॥ किन्न दद्यान्महेशानः प्रार्थितो लिंगमूर्तिमान् ॥ एवमुक्त्वा तु मां देवी तत्रैवांतरधीयत ॥ ४८ ॥ ताः स्त्रियः स च देवेशो बकरूपो महेश्वरः ॥ तस्यस्तद्वचनं श्रुत्वा अवतीर्य महानदीम् ॥ ४९ ॥ स्नात्वा चाभ्यर्चितं राजन् तल्लिंगं भक्तितो मया ॥ ततोहं सहसा तस्मात् समुत्तीर्णो जलाशयात् ॥ ५० ॥ नच पश्यामि तल्लिंगं न च तां निम्नगां नृप ॥ तत्रैव लोकाः संजाताः क्षितिश्चैव सकानना ॥ ५१ ॥ ऋक्षचंद्रार्कसहितं समस्तं च नभस्तलम् ॥ यथा दृष्टं मयापूर्वं त्रैलोक्यं तत्तथाऽभवत् ॥५२॥ ततोहं मनसा देवं पूजयित्वा महेश्वरम् ॥ नर्मदा तीरमाश्रित्य तपसाप्तुं ततः स्थितः ॥ ५३ ॥ एवं तथा पुराकल्पे मया दृष्टेयमव्यया ॥ नर्मदा मर्त्यलोकस्य सर्वपातकनाशिनी ॥ ५४ ॥ तस्माद्धर्मपरैर्विप्रैस्तथा क्षत्रविशादिभिः ॥ सदा सेव्या महापुण्या धर्मवृद्धिमभीप्सुभिः ॥ ५५ ॥ येपि भक्त्या सकृत्तोये नर्मदाया महेश्वरम्॥ स्नात्वार्चयंति ते सर्वे प्रयांति शिवमंदिरम् ॥५६॥ इति श्रीनर्मदामाहात्म्ये बककल्पसमुद्भवो नाम नवमोध्यायः ॥ ९ ॥ श्रीमार्कंडेय उवाच॥ पुनर्युगांतमन्यत्ते संप्रवक्ष्यामि तच्छृणु ॥ सूर्यैरादीपिते विश्वे स्थावरे जंगमे पुरा ॥ १ ॥ सरित्सरःसमुद्रेषु क्षयं जातेषु सर्वशः ॥ स्वाहास्वधावषट्कारे नष्टे धर्मे च पार्थिव ॥ २ ॥ नानारूपधरैर्मेघैरिंद्रायुधसमन्वितैः ॥ सर्वमापूरितं व्योम वार्योघैः शतशस्तदा ॥ ३ ॥ ततस्त्वेकार्णवीभूते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वतः सलिलावृते ॥ जगत्कृत्वोदरे देवः सुष्वाप भगवान् हरः ॥ ४ ॥ प्रकृतिं स्वामवष्टभ्य योगात्मा स प्रजापतिः ॥ शेते सुग
सहस्रांतं कालमाविश्य सोर्णवम् ॥ ५ ॥ ततस्ते संशयारूढा ब्रह्मलोकनिवासिनः ॥ भृग्वादिऋषयः सर्वे ये चान्ये सनकादयः
॥ ६ ॥ पर्यंके विमले शुभ्रे नानास्तरणसंवृते ॥ शयानं ददृशुर्देवं सपत्नीकं वृषध्वजम् ॥ ७ ॥ विश्वरूपा च सा नारी विश्वरूपो
महेश्वरः ॥ गाढमालिंग्य सुप्तौ तौ ददृशुर्मुनिसत्तमाः ॥ ८ ॥ पादमूले ततस्तस्य रम्यां पद्मदलेक्षणाम् ॥ कन्यां पश्यंति सुश्रोणीं
चरणौ तस्य मृद्नतीम् ॥ ९ ॥ विमलांबरसंवीतां नागयज्ञोपवीतिनीम् ॥ तेजालंकृतसर्वांगीं सर्वाभरणभूषिताम् ॥ १० ॥ कालं यु-
गसहस्रं वै पादमूलमुपास्थिताम् ॥ प्रसुप्तं देवदेवेशमुपास्ते वरवर्णिनीम् ॥ ११ ॥ अथ ब्रह्मा समायुक्तो भृग्वाद्यैर्मानसैः सुतैः ॥
स्तौति शंकरमव्यग्रो भक्त्या परमया युतः ॥ १२ ॥ स्तुवतस्तस्य देवेशं मंत्रैरीश्वरसंश्रितैः ॥ अकस्माच्चतुरो वेदाः प्रलीनास्ते
महार्णवे ॥ १३ ॥ वेदैः प्रलीनैर्भगवानज्ञानतमसावृतः ॥ प्रसुप्तं देवमीशानं बोधयन् समुपस्थितः ॥ १४ ॥ श्रीब्रह्मोवाच ॥ उ-
त्तिष्ठ हर पिंगाक्ष महादेव महेश्वर ॥ मम वेदा हताः सर्वे त्वामतः स्तोतुमुद्यतः ॥ १५ ॥ वेदैर्व्याप्तं जगत्सर्वं विश्ववेदोद्भवं विभो
॥ अतीतानागतं सर्वं तैः सृष्टं च सृजाम्यहम् ॥ १६ ॥ तैर्विनाहं समभवं मूकोंधो जडवत्सदा ॥ प्रज्ञोत्साहो गतिर्वीर्यं तैर्विना न
प्रजायते ॥ १७ ॥ तस्मान्वेदान्महादेव शीघ्रं मे दातुमर्हसि ॥ जडांधबधिरत्वं च तैर्विना न प्रयाति मे ॥ १८ ॥ स्थानानि दश
चत्वारि कथं स्वक्ष्यामि शंकर ॥ सांप्रतं स्वल्पवीर्यत्वाद्वेदहीनः परंतप ॥ १९ ॥ तावच्छास्त्राणि शोभंते समस्तानि जगद्गुरो ॥
यावद्वेदोदधिरयं नोपतिष्ठेत्सनातनः ॥ २० ॥ यथोदितेन सूर्येण सद्यो याति तमः क्षयम् ॥ एवं समस्तपापानि यांति वेदस्य धा-
रणात् ॥ २१ ॥ वेदैरहमजं सूक्ष्मं यत्तु ब्रह्म सनातनम् ॥ हृदिस्थं तं च जानामि गतं तद्वेदवर्जनात् ॥ २२ ॥ वेदान्मुक्त्वान्य-
शास्त्राणि ये धीयंते द्विजातयः ॥ तेषां वृत्तं च धर्मश्च शिथिलत्वाय कल्पते ॥ २३ ॥ अकृत्वा चांबुसंस्पर्शं येधीयंते द्विजातयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा वेदाः क्षरंतीह तथैवान्ये कृताः प्रभो ॥ २४ ॥ तथा वेदानवज्ञाय योन्यत्र कुरुते श्रमम् ॥ धर्मः क्षरंति तस्यापि भिन्नभांडा-
दिवोदकम् ॥२५॥ वेदानुच्चारतो मेद्य देवदेव तवाग्रतः ॥ अकस्मात्ते गता वेदाः कथं ज्ञास्ये जगद्गतिम् ॥२६॥ ते प्रणिष्टा महादेव
प्रविष्टास्तु महार्णवे ॥ तान्समानीय देवेश कारुण्याद्दातुमर्हसि ॥ २७ ॥ दुहितेयं विशालाक्षी सर्वं जानाति ते हर ॥ जाग्रती
युगसाहस्त्रं नान्या काचिदिहेदृशी ॥ २८ ॥ कविश्चायं महाभागो मार्कंडो धीमतां वरः ॥ कल्पेकल्पे महाभाग त्वामयं पर्युपस्थितः
॥ २९ ॥ जगत्रयहितार्थाय चरते व्रतमुत्तमम् ॥ एवमुक्तस्तु देवेशो ब्रह्मणा परमेष्ठिना ॥ ३० ॥ उवाच श्लक्ष्णया वाचा नर्मदां
सरितं तदा ॥ कथयस्व महाभागे ब्रह्मणः परिपृच्छतः ॥ ३१ ॥ केन वेदा हृता देवी जगतोस्य पवित्रकाः ॥ एवमुक्ता तु रुद्रेण ब
भाषे मृगलोचना ॥ ३२ ॥ नर्मदोउवाच ॥ ब्रह्मणो जपतो वेदांस्त्वयि सुप्ते महासुरौ ॥ भवतश्छिद्रमासाद्यघोरेस्मिन्स-
लिलावृते ॥ ३३ ॥ पूर्वकल्पसमुद्भूतौ बलवंतौ सुदुर्जयौ ॥ दृष्टौ तदा महादेव भवदुत्पादितौ पुरा ॥३४॥ रणाजिरे महावीर्यौ दा-
नवौ मधुकैटभौ ॥ तौ वायुभूतौ सूक्ष्मौ च पठतोस्मत्पितामहात् ॥ ३५ ॥ हत्वाशु जृंभतो वेदान् प्रविष्टौ तौ महार्णवम् ॥ एत-
च्छ्रुत्वा महादेवो नर्मदाया वचस्तदा ॥ ३६ ॥ सस्मार देवदेवेशं शंखचक्रगदाधरम् ॥ अथ तत्रागते विष्णौ प्रोवाचेदमुमापतिः
॥ ३७ ॥ वेदानुद्धर गोविंद पाताले दानवाहृतान् ॥ अंतरेण विधिर्वेदानंधो मूको जडो भवेत् ॥ ३८ ॥ स रुद्रवचनाद्देवस्तथेति
प्रणयान्वितः ॥ प्रविवेश महाराज भूतलं कमलापतिः ॥ ३९ ॥ दानवांतकरो देवैः सर्वदेवैः प्रपूजितः ॥ मीनरूपधरो भूत्वा क्षो
भयानो महार्णवम् ॥ ४० ॥ वेदान् स ददृशे तत्र पाताले निहितान् प्रभुः ॥ तौ च दैत्यौ महावीर्यौ दृष्टवान् मधुसूदनः ॥४१॥
ततो वेगान्महाबाहुः सूदयामास तौ तदा ॥ वेदांस्तथैव तोयस्थानानयित्वा जगद्गुरुः ॥ ४२ ॥ चतुर्वक्त्राय देवेश प्रादाच्चक्रगदाधरः
॥ ततः प्रहृष्टो भगवान्वेदांल्लब्ध्वा पितामहः ॥ ४३ ॥ जनयामास निखिलं जगद्भूयश्चराचरम् ॥ सा च देवनदी पुण्या रुद्रस्य पारि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चारका ॥ ४४ ॥ पावनी सर्वभूतानां प्रावहत्सलिलं तदा तस्यास्तीरे ततो देवा ऋषयश्च तपोधनाः ॥ ४५ ॥ अजपंरुयंबकं
देवं प्रहृष्टेनांतरात्मना ॥ एकामूर्तिर्महेशस्य कारणांतरयागता ॥ ४६ ॥ त्रैगुण्यं कुरुते कर्म ब्रह्मविष्णुशिवात्मकाः ॥ एतेषां तु
पृथग्भावं ये कुर्वंति विमोहिताः ॥ ४७ ॥ तेषां धर्मः कुतः सिद्धिर्जायते पापकर्मणाम् ॥ एवंभूता महानद्यस्तिस्रो रुद्रसमुद्भवाः
॥ ४८ ॥ एकापि च त्रिधाभूता गंगा रेवा सरस्वती ॥ गंगा तु वैष्णवीमूर्त्तिः सर्वपापप्रणाशिनी ॥ ४९ ॥ रुद्रदेहसमद्भूता नर्मदा-
पुण्यवर्धिनी ॥ ब्राह्मी सरस्वती प्रोक्ता स्वर्गलोकप्रदायिनी ॥ ५० ॥ नर्मदा परमा काचिन्मूर्तिः शिवकलात्मिका ॥ दिव्या कामग-
मा देवी सुरसिद्धर्षिपूजिता ॥ ५१ ॥ व्यापिनी सर्वभूतानां सूक्ष्मात्सूक्ष्मतरा स्मृता ॥ अक्षया ह्यमृता त्वेषा स्वर्गसोपानमुत्तमम्
॥ ५२ ॥ सृष्टा रुद्रेण जंतूनां संसारार्णवतारिणी ॥ ५३ ॥ तस्या जलं ये हि पिबंति लोका भवत्यपापाश्च विमुक्तशोकाः ॥-
व्रजंति संसारविडंबनं ते त्यक्त्वा चिरं मोक्षपदं विशुद्धम् ॥५४॥ यथा गंगा तथा रेवा तथा देवी सरस्वती ॥ समं पुण्यफलं प्रोक्तं
स्नानदर्शनचिंतनैः ॥ ५५ ॥ सप्तकल्पस्मरा यस्मात्तस्मादाधिक्यमागता ॥ अमृता इति संभाव्य श्रूयते मोक्षचिंतकैः ॥५६॥ मुच्यंते
दर्शनात्तस्या मनुष्याः पापसंचयैः ॥ नर्मदायां नरश्रेष्ठ येर्चयंति त्रिलोचनम् ॥ ५७ ॥ ते रुद्रलोकमासाद्य तिष्ठंति सुखसंस्थिताः
॥ इयं रुद्रांगसंभूता महापुण्या महानदी ॥ ५८ ॥ लोकान् प्रापयते पुण्यं तेन पुण्यत्वमागता ॥ ५९ ॥ य एवमीशानवरस्य लिंगं
प्रपूजयेत्पुण्यजलाप्लुतांगः ॥ स याति रुद्रं सहपूर्वजैस्तु रेवाप्रसादादुपनीयमानः ॥६० ॥ इति श्रीवायूक्तरुद्रसंहितायां श्रीनर्मदामा
हात्म्ये मात्स्यकल्पो नाम दशमोध्यायः ॥ १० ॥ युधिष्ठिर उवाच ॥ तस्मिन् कल्पे महाभागा नर्मदेयं द्विजोत्तम ॥ विभक्ता
ऋषिभिः सर्वैरुपवीतैर्महात्मभिः ॥ १ ॥ एतद्विस्तरतः सर्वं ब्रूहि मे वदतां वर ॥ कल्पांते यद्भवेत्कष्टं लोकानां तच्चमे वद ॥ २ ॥
अतीते तु पुराकल्पे यच्चायं वर्ततेनघ ॥ अस्यान्यस्य च कल्पस्य ममावस्था वद प्रभो ॥ ३ ॥ वैशंपायन उवाच ॥ एवं तप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभामध्ये मार्कंडो धीमता वरः ॥ उवाच श्रूयतां सर्वैः कथेयं पापनाशिनी ॥ ४ ॥ महत्कथेयं वैशिष्टी कल्पादस्मात्परं तु या ॥
लोकक्षयकरो घोर आसीत्कालः सुदारुणः ॥ ५ ॥ तस्मिन्नपि महाघोरे यथेयं न मृता सरित् ॥ परतुष्टयै विभक्ता च शृणुध्वं
तत्कथामिमाम् ॥ ६ ॥ संक्षयः सर्वभूतानामभवद्धर्मदुर्गमः ॥ युगांते समनुप्राप्ते पितामहदिनक्षये ॥ ७ ॥ मानसा ब्रह्मणः पुत्राः
साक्षाद्ब्रह्मेव सत्तमाः ॥ सनकाद्या महात्मानो ये च वैमानिका गणाः ॥ ८ ॥ यमेंद्रवरुणाद्याश्च लोकपाला दिनक्षये ॥ कालापेक्षा-
स्तु तिष्ठंति लोकवृत्तांततत्पराः ॥ ९ ॥ ततः कल्पक्षये प्राप्ते तेषां ज्ञानमनुत्तमम् ॥ सर्वेषां नश्यते तत्र युगरूपानुसारतः ॥ १० ॥
भूर्लोकं ते परित्यज्य भुवर्लोकं व्रजंति च ॥ स्वर्लोकं च महश्चैव जनश्चैवं तपस्तथा ॥ ११ ॥ श्रयंति सत्यलोकं च सर्वलोकेष्वनुत्तमम् ॥
कालं युगसहस्रांतं पुत्रपौत्रसमन्विताः ॥ १२ ॥ सत्यलोके तु तिष्ठंति यावत्संभवते जगत् ॥ ब्रह्मपुत्राश्चये केचित् कल्पादौ न
भवंत्यथ ॥ १३ ॥ त्रैलोक्यं ते परित्यज्य अनाधारं विनश्वरं ॥ तैः सार्द्धं ये तु न प्राप्ता नागास्तक्षमहाग्रहाः ॥ १४ ॥ यक्षरक्षः
पिशाचाश्च अन्ये वैमानिकागणाः ॥ ऋषयश्च महाभागा वर्णाश्चान्ये पृथग्विधाः ॥ १५ ॥ पृथिव्या सह सीदंति ये चान्ये तल-
वासिनः ॥ अनावृष्टिरभूत्तत्र महती शतवार्षिकी ॥ १६ ॥ लोकक्षयकरी रौद्रावृक्षौषधिविनाशिनी ॥ त्रैलोक्यसंक्षोभकरी सप्तलोका-
वशोषणी ॥ १७ ॥ ततो लोकाः क्षुधार्ताश्च विभ्रमंति दिशो दश ॥ कंदैर्मूलैः फलैर्वापि किंचित्कालनिवर्तकाः ॥ १८ ॥ सरितः
सागरान् कूपान् सेवंते पर्वतान्यपि ॥ तत्रापि सर्वे शुष्यंति सरिद्भिः सह सागराः ॥ १९ ॥ ततो यान्यल्पसाराणि सत्त्वानि पृ-
थिवीतले ॥ तान्येवाग्नौ प्रलीयंते विना जलसमाश्रयात् ॥ २० ॥ अथ संक्षीयमाणासु सरित्सु सह सागरैः ॥ षष्टिर्मुनिसहस्राणि
कुरुक्षेत्रनिवासिनः ॥ २१ ॥ ये च वैखानसा विप्रा दंतोलूखलिनस्तथा ॥ गुहासु च हिमाद्रेर्वै ये वसंति तपोधनाः ॥ २२ ॥ सर्वे
ते मामुपागम्य तृषार्ताः क्षुत्प्रपीडिताः ॥ ऊचुः प्रांजलयः सर्वैः सीदयामो महामुने ॥ २३ ॥ सरित्सागरशैलान्ता मही शुष्का द्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जोत्तम ॥ क्व वयं तात यास्यामो यावत्कल्पविपर्ययः ॥२४॥ दीर्घायुरसि विप्रेंद्र न मृतस्त्वं जगत्क्षये॥ भूतं भव्यं भविष्यं च सर्वं तव हृदि स्थितम् ॥ २५ ॥ तस्माज्जानासि सर्वं त्वं ब्रूहि विप्र हितं द्विज ॥ अनावृष्टिहतं सर्वं सीदते सचराचरम् ॥ २६ ॥ परित्राहि महाभाग न यामो येन संक्षयम् ॥ ततः संचिंत्य मनसा तान्विप्रानिदमब्रुवम् ॥२७॥ कुरुक्षेत्रं परित्यज्य पुत्रदारसमन्विताः ॥ त्यक्त्वोदीचीं दिशं पुण्यां याम्यां यास्याम सत्तमाः ॥ २८ ॥ नगरग्रामसहितां पुरपत्तनशोभिताम् ॥ व्रजामो नर्मदाभूमिं बहुसिद्धनिषेविताम् ॥ २९ देवीं रुद्रनदीं पुण्यां सर्वपापप्रमोचनीम् ॥ पश्यामस्तां महाभागां बहुपुष्पफलावृताम् ॥ ३० ॥ नानाविहंगसंघुष्टामृषिकोटिनिषेविताम् ॥ माहेश्वरैर्भागवतैः सांख्यैः सिद्धैः समाकुलाम् ॥ ३१ ॥ अनावृष्टिभयाद्दीनाः कुलयोरुभयोरपि ॥ श्रयित्वा नियमांस्तत्र निवत्स्यामो यतव्रताः ॥ ३२ ॥ एवमुक्तास्तु ते सर्वे समेत्यानुचरैः सह ॥ नर्मदातीरमासाद्य स्थितास्तत्रैव निर्भयाः ॥ ३३ ॥ केचित्पूर्वमनुस्मृत्य पुराकल्पादिजं भयम् ॥ प्राप्तास्ते नर्मदातीरमादावेव कलौ युगे ॥ ३४ ॥ ततो वर्षशतं पूर्णं दिव्यं तत्र निवासिनाम् ॥ षड्विंशति सहस्राणि मानुषाब्दानि संख्यया ॥ ३५ ॥ तत्राश्चर्यं मया दृष्टमृषीणां वसतां नृप ॥ अनावृष्टिहते लोके नष्टे स्थावरजंगमे ॥ ३६ ॥ भिन्नचारित्रमर्यादे हाहाभूते विचेतसि ॥ चातुर्वर्ण्ये प्रलीने तु नष्टहोमक्रियाविधौ ॥ ३७ ॥ निःस्वाहे निर्वषट्कारे शौचाचारविवर्जिते ॥ इयमेका सरित् श्रेष्ठा ऋषिसंघानिषेविता ॥ ३८ ॥ नान्या काचित्त्रिलोकेषु दृश्यते धर्मनंदन ॥ तथैव पुण्यतीर्थेयमिंद्रस्येवामरावती ॥ ३९ ॥ देवतायतनैः शुभ्रैराश्रमैश्च सकल्पितैः॥ शोभते नर्मदा देवी स्वर्गे मंदाकिनी यथा ॥४०॥ तरंगकरविक्षेपा फेनपुंजाट्टहासिनी ॥ शकुंतरुतवाचाला श्वापदुर्गतिनाशिनी ॥४१॥ कूलयोरुभयोस्तावन्मंडितायतनैः शुभैः ॥ हूयद्भिरग्निहोत्रैश्च हविर्धूमसमाकुला ॥ ४२ ॥ शैवालकुंतलवती बहुद्वीपस्तना शुभा ॥ बृहत्कूलोच्चजघना खलच्चक्राह्वमेखला ॥ ४३ ॥ धूमावृत्ततटा देवी प्रावट्कालेव शर्वरी ॥ अनेकदेवायतनैः पूजासंस्कारशोभिता ॥ ४४ ॥ भ्राजते

सरितां श्रेष्ठा पुण्या सर्वार्थसाधनी ॥ केचित्पंचतपास्तत्र केचिदप्यग्निहोत्रिणः ॥ ४५ केचिद्धूमांबुवाताशास्तपस्युग्रे व्यवस्थिताः ॥
आत्मयज्ञकराः केचिदपरे परयाजिनः ॥ ४६ ॥ वैष्णवा ज्ञानिनः केचिदपरे शिवतत्पराः ॥ एकरात्रं द्विरात्रं तु केचित्षड्रात्रभोजि-
नः ॥ ४७ ॥ चांद्रायणपराश्चान्ये कृच्छ्रे केचिद्व्यवस्थिताः ॥ अश्मकुट्टास्तथा चान्ये दंतोलूखलिनः परे ॥ ४८ ॥ पक्षांताः पाणि-
पात्राश्च अश्नचूर्णाशनः परे ॥ एवंविधैस्तपोनिष्ठैर्नर्मदाशोभिता नृप ॥ ४९ ॥ जयद्भिः शंकरं देवं केशवं च निरंजनम् ॥ एवं ते
च पृथक्कृत्केन यजंते ऋषिसत्तमाः ॥ ५० ॥ कलौयुगे महाघोरे प्राप्तास्ते सिद्धिमुत्तमाम् ॥ यस्ययस्य हि या भक्तिर्विज्ञानं तस्य ता-
दृशम् ॥ ५१ ॥ यस्ययस्य हि या वांछा तांतामीशोददत्प्रभुः ॥ संसारे परिवर्तंते ये पृथग्भाजिनो नराः ॥ ५२ ॥ ये महावृक्षमी-
शानं त्यक्त्वा शाखावलंबिनः ॥ पुनरावर्तमानास्ते जायंते पशुपक्षिणः ॥५३॥ जन्मभिर्विविधाकारैर्भ्रमंते दुःखभाजिनः ॥ पुनर्ज-
न्म पुनः स्वर्गे पुनर्घोरे च रौरवे ॥ ५४ संचरंति महाराज पूर्वपापफलेन ते ॥ ये पुनर्देवमीशानमेकभावानुसंश्रिताः ॥ ५५ ॥
यजंति नर्मदातीरे न पुनः संचरंति ते ॥ आदेहपतनात्केचिदुपासं परमं गताः ॥ ५६ ॥ केचिद्द्वादशभिर्वर्षैः षड्भिरन्ये तपोधनाः ॥
त्रिभिः संवत्सरैरन्ये त्वऽन्ये संवत्सरेण तु ॥ ५७ ॥ षड्भिर्मासैस्तु संसिद्धास्त्रिभिर्मासैस्तथा परे ॥ मुनयो देवमाश्रित्य नर्मदां च
यशस्विनीम् ॥ ५८ ॥ छित्वा संसारबंधं च गतास्तद्ब्रह्म शाश्वतम् ॥ एवं कलियुगे घोरे शतशोथ सहस्रशः ॥ ५९ ॥ नर्मदातीर-
माश्रित्य मुनयो मोक्षमागताः ॥ ६० ॥ ये नर्मदातीरमुपेत्य भक्त्या शैवं व्रतं यत्नपराः प्रपन्नाः ॥ त्रिकालमंभः प्रतिगृह्य मर्त्या
देवं समभ्यर्च्य शिवं व्रजंति ॥ ६१ ॥ ध्यानार्चनैर्जाप्यमहामखैश्च नारायणं वा सततं स्मरंति ॥ ते धौतपापा इव राजहंसा सं-
सारबंधं प्रतरंत्यपारम् ॥ ६२ ॥ सत्यंसत्यं पुनः सत्यं महारुद्रेण भाषितम् ॥ नहि वेदात्परं शास्त्रं न देवः केशवात्परः ॥ ६३ ॥
आलोक्य सर्वशास्त्राणि विचार्य च पुनःपुनः ॥ इदमेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ६४ ॥ एतदेव महाराज सर्वविद्या

CC-0. In Public Domain. Digitization by eGangotri

सु संगतम् ॥ अर्चनीयो महादेवो ध्येयो नारायणः सदा ॥ ६५ ॥ सा विद्या या हरिं स्तौति हरार्चनविशारदा ॥ सद्विद्यां तां वि-
जानीयान्नान्या विद्या मता मम ॥ ६६ ॥ हरेरपि हरस्यापि न भेदोऽस्ति यथा नृप ॥ गंगाया नर्मदायाश्च न्यूनं नास्ति तथांतरम्
॥६७॥ हरिं स्तौति हरं द्वेष्टि हरिं द्वेष्टि हरार्चकः ॥ यश्च पापसमाचारः पापात्मा नास्तिकी ध्रुवम् ॥६८॥ यो वा हरं पूजयते यतात्मा
रेवां समाश्रित्य महानुभावः ॥ स वैष्णवांशोथ भवेत्पिनाकी वर्षार्धमासार्धदिनैरपीह ॥६९॥ कीटाः पतंगाश्च पिपीलिकाश्च कदापि
रेवांभसि ये म्रियंते ॥ ते दिव्यरूपाः सुकुलप्रसूताः शतं समा धर्मपरा भवंति ॥ ७० ॥ कालेन वृक्षाः प्रयतंति येपि महातरंगौ-
घनिकृत्तमूलाः ॥ ते नर्मदासंगविमुक्तपापा जाज्वल्यमानास्त्रिदिवं व्रजंति ॥ ७१ ॥ अकामतः कामत एव राजन् रेवां समा-
श्रित्य हि ये म्रियंते ॥ जडांधमूकास्त्रिदिवं प्रयांति किमत्र विप्रा भवभावयुक्ताः ॥ ७२ ॥ मासोपवासैरपि शोषितांगाः न तां ग-
तिं यांति विमुक्तदेहाः ॥ यां यांति रेवाजलपूतकायाः शिवार्चकाः केशवभक्तियुक्ताः ॥ ७३ ॥ ये नर्मदातीरमवाप्य काममभ्यर्च्य-
यंतीह शिवं शिवां च ॥ नारायणं वा मनसा सुपूताः पिबंति मातुर्न पुनस्तनांभः ॥ ७४ ॥ वसंति ये तीरमुपेत्य देव्यास्त्रिका-
लदेवार्चनसत्यपूताः ॥ विण्मूत्रचर्मास्थिशिरोपधानाः कुक्षौ युवत्या न पुनर्विशंति ॥ ७६ ॥ ते वंचिताः पंगुजडांधभूता लोके म-
नुष्याः पशुभिर्हि तुल्याः ॥ येनार्चिता रुद्रतनुप्रसूता सोपानपंक्तिस्त्रिदिवस्य रेवा ॥ ७७ ॥ कलेर्युगे घोरमिदं य इच्छेद्द्रष्टुं कदाचि-
न्नपुनर्द्विजेंद्र ॥ स नर्मदातीरमुपेत्य शर्वमभ्यर्च्य तां सर्वविमुक्तसंगः ॥ ७८ ॥ विघ्नैरनेकैरभियोज्यमाना मुंचंति तीरं नहि नर्म-
दायाः ॥ मन्ये हि विश्वस्य तु तीर्थभूता बंधाश्च ते सर्वजनस्य मान्या ॥ ७९ ॥ भवंति भृग्वत्रिवसिष्ठमुख्या महामुनींद्रा हतपाप-
संघाः ॥ सिद्धिं परां देविजलाप्लुतांगा ब्राह्मं परं पारमनुप्रपन्नाः ॥ ८० ॥ ज्ञानं महत्पुण्यतमं पवित्रं पठंति ये नित्यविशुद्धसत्त्वाः
॥ गतिं परां यांति महानुभावाः॥ वाक्यं हि रुद्रस्य यतः प्रमाणम् ॥ ८१ ॥ इति श्रीनर्मदामहात्म्ये एकादशोध्यायः ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युधिष्ठिर उवाच ॥ अहो सरित् पुण्यतमा वरिष्ठा क्षयं न याता इह या युगांते ॥ तस्मात्सदा सेव्यतमा मुनींद्रैः ध्यानार्चनायोग परैर्नरैर्हि ॥ १ ॥ ये त्वयोक्तास्तु नियमा ऋषीणां वेदनिर्मिताः ॥ मोक्षप्राप्तिर्भवेदेषां नियमैस्तु पृथकग्विधैः ॥ २ ॥ दशद्वादश-भिर्वापि षड्भिरष्टाभिरेव वा ॥ त्रिभिस्तथा चतुर्भिश्च वर्षैर्मासैस्तथैव च ॥ ३ ॥ मुच्यंते ते कलेर्घोरादीश्वरार्चनतत्पराः ॥ ब्रह्माणं वा सुरश्रेष्ठं केशवं वा जगद्गुरुम् ॥ ४ ॥ संशयः सर्वथा जातो ह्यस्मिन् प्रश्ने द्विजोत्तम ॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ ॥ ५ ॥ अस्मिन्संसारगहने निर्मग्नाः सर्वजंतवः ॥ ते कथं त्रिदिवं प्राप्ता इति मे संशयो महान् ॥ ६ ॥ मार्कंडेय उवाच ॥ शृणु राजन्परं गोप्यं यत्र चोक्तं मया क्वचित् ॥ संसारावर्तगहने जंतूनां जन्मकोटिषु ॥ ७ ॥ मानुष्यं दुर्लभं तात तत्राप्युत्तमजन्म च ॥ धर्मबुद्धिः सतां संगः श्रद्धा चापि सुदुर्लभा ॥ ८ ॥ भक्तिरुत्पद्यते भाग्यात्कथं चिदपि शंकरे ॥ तीर्थदानोपवासेषु यज्ञे देव-द्विजार्चने ॥ ९ ॥ अंवाप्तिर्जायते पुंसां श्रद्धया परया नृप ॥ तस्माच्छ्रद्धा सदा धार्या मानसे मानवैः शुभा ॥ १० ॥ ईशोपि श्रद्धया साध्यस्तेन श्रद्धा विशिष्यते ॥ अन्यथा निष्फलं सर्वं श्रद्धाहीनं हि भारत ॥ ११ ॥ भक्तिः सद्विषया बुद्धिः तिस्र ए-कार्थलक्षणाः ॥ तस्मात्तामाश्रयेद्भक्तिं रुद्रस्य परमेष्ठिनः ॥ १२ ॥ तेषां हि सफलं जन्म एषां भक्तिः सुनिश्चला ॥ सा चापि त्रिविधा भक्तिः सात्त्विकी राजसी तथा ॥ १३ ॥ तामसी सर्वलोकस्य त्रिविधं च फलं भवेत् ॥ ते कर्मफलसंयोगादावर्तंते पुनः-पुनः ॥ १४ ॥ जन्मांतरशतैस्तेषां ज्ञानिनां देवयाजिनाम् ॥ मूर्त्तित्रये भवेद्भक्तिः क्षयात्पापस्य कर्मणः ॥ १५ ॥ भक्तिज्ञानाय सर्वज्ञे मोक्षायाधोक्षजे नृप ॥ कर्मकाण्डफलावाप्त्यै भक्तिः स्याद्वेधसे शुभा ॥ १६ ॥ ये पुनर्नर्मदातीरमाश्रित्य द्विजसत्तमाः ॥ त्रयी-मार्गमतिक्रम्य ते यांति परमां गतिम् ॥ १७ ॥ एकाग्रमनसो ये तु शंकरं शिवमव्ययम् ॥ अर्चयंतिह निरताः क्षीयंते सिद्धि-

१ अनुरागः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भाजना ॥ १८ ॥ कालेन महता सिद्धिर्जायतेन्यत्र देहिनाम् ॥ नर्मदायाः पुनस्तीरे क्षिप्रं सिद्धिरवाप्यते ॥ १९ ॥ सिध्यंते वत्सरैः
षड्भिर्ये तु सांख्यविदो जनाः ॥ वैष्णवज्ञानसंपन्नास्तेपि सिध्यंति चाब्दतः ॥ २० ॥ सर्वयोगविदः संतः समुद्रमिव सिंधवः ॥
ऐक्यं भजंति कल्पांते योगे माहेश्वरे रताः ॥ २१ ॥ सर्वेषामेव योगानां योगो माहेश्वरो वरः ॥ तमासाद्य विमुच्यंते येपि स्युः
पापयोनयः ॥ २२ ॥ निर्विकल्पं शिवं ध्यात्वा जायंते नहि योनिषु ॥ गतिरेषा दुरारोहा सर्वपापक्षयंकरी ॥ २३ ॥ क्षिप्रं मुच्यंते
संसाराद्रेवामाश्रित्य जंतवः ॥ तस्यां स्नानपरो विप्रो नित्यं भस्मविलेपनः ॥ २४ ॥ नर्मदातीरमासाद्य क्षिप्रं सिद्धिमवाप्नुयात् ॥
अर्चयंति त्रिकालं तु ये नरा लिंगमैश्वरम् ॥ २५ ॥ सर्वपापविनिर्मुक्तास्ते यांति परमां गतिम् ॥ २६ ॥ षड्भिर्मासैस्तु सिध्यंति
ये मूढाः पापजंतवः ॥ ते पुनः शुद्धमनसो मासैः सिध्यंति ते त्रिभिः ॥ २७ ॥ यथा दिनकरस्पृष्टो हिमराशिर्विशीर्यते ॥ तद्वद्वि-
लीयते पापं स्पृष्टं भस्मकणैः शुभैः ॥ २८ ॥ सद्योजातादियुक्तेन भस्मना ये समुक्षिताः ॥ सूर्यवद्विमला भांति नरा रुद्रपरायणाः
॥ २९ ॥ वैनतेयभयत्रस्ता यथा नश्यंति पन्नगाः ॥ तद्वत्पापानि नश्यंति भस्मना भक्षितानि तु ॥ ३० ॥ नर्मदातोयपूतेन भ-
स्मनोद्धूलयंति ये ॥ शूद्रान्नेन विहीनास्तु तेपि यांति परां गतिम् ॥ ३१ ॥ अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् ॥ वै-
श्यान्नमन्नमेवोक्तं शूद्रान्नं रुधिरं स्मृतम् ॥ ३२ ॥ शूद्रान्नरससंपुष्टा ये म्रियंते द्विजातयः ॥ तपोज्ञानविहीतास्तु काकगृध्रा भवंति
ते ॥ ३३ ॥ दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति ॥ यो हि यस्यान्नमश्नाति स तस्याश्नाति किल्बिषम् ॥ ३४ ॥ यतिधर्मे
विशेषण वर्तयंल्लौल्यमाश्रितः ॥ नरकं यात्यसंदिग्धमित्येवं शंकरोऽब्रवीत् ॥ ३५ ॥ ईदृग्रूपाश्च ये विप्राः पाशुपत्ये व्यवस्थिताः ॥
ते महत्पापसंघातं दहंत्येव न संशयः ॥ ३६ ॥ विडंबेन च संयुक्ता लोलुपेन च पीडिताः ॥ असंभाष्या ह्यसंग्राह्या इत्येवं श्रु- १५
तिनोदिताः ॥ ३७ ॥ पितृमातृकृतैर्दोषैरन्यैः कैश्चित्स्वकर्मजैः ॥ नष्टज्ञानावलोपेन अहंकारेण चापरे ॥ ३८ ॥ शांकरेपि स्थिता-

CC-0. In Public Domain. Digitization by eGangotri

धर्मे ये स्मृत्यर्थबहिःकृताः ॥ क्लिश्यमानास्तु कालेन तेपि यांति परां गतिम् ॥३९॥अश्रद्दधानाः पुरुषा मूर्खादंभसमन्विताः॥ न सिध्यं-
ति दुरात्मानः कुदृष्टांतार्थसंश्रिताः ॥ ४० ॥ महाभावेपि तीर्थस्य शांकरव्रतमाश्रिताः ॥ वियोनिं यांत्यसंदिग्धं लौलुप्येन समन्विताः
॥४१॥ न तीर्थैन च वेदैश्च दुःकृतं हि विलुप्यते ॥ अज्ञानाच्च प्रमादाच्च कृतं पापं विनश्यति॥४२॥ एवं ज्ञात्वा तु विधिना वर्त्तितव्यं द्वि-
जातिभिः॥परं ब्रह्म जयद्भिश्च स्थातव्यं यतमानसैः॥४३॥उर्ध्वस्थितो विरुपाक्षं योधीते रुद्रमात्मनि॥सद्यः संसिध्यते साक्षात्षण्मासा-
त्संगवर्जितः॥४४॥संहितायां दशावर्तं यः करोति सुसंयतः॥नर्मदातटमाश्रित्य स मुच्येत् सर्वपातकैः॥४५॥पुराणसंहितां वापि शैवां वा
वैष्णवीमपि ॥ यः पठेन्नर्मदातीरे शिवाग्रे स शिवात्मकः ॥ ४६ ॥ आभूतसंक्षयं यावत् स्वर्गलोके महीयते ॥ संसारव्यसनं हातुं
पुरा प्रोक्तं तु नंदिना ॥ ४७ ॥ देवर्षिसिद्धगंधर्वसमवाये शिवालये ॥ नंदिगीतामिमां राजन् शृणुष्वेकमनाः शुभाम् ॥ ४८ ॥
स्वर्गमोक्षप्रदां पुण्यां संसारभयनाशिनीम् ॥ ४९ ॥ संसारगह्वरगुहां प्रविहातुमायांश्चेदिच्छथ प्रतिपदं भवतापखिन्नाः ॥ नाना
विधैर्निजकृतैर्बहुकर्मपाशैर्बद्धाः सुखाय शृणुतैकहितं मयोक्तम् ॥ ५० ॥ शक्र वक्रगतिं मा गा मा कृथा यम यातनाम् ॥ चेतः
प्रचेतः शमय लौलुप्यं त्यज वित्तप ॥ ५१ ॥ दीनानाथविशिष्टेभ्यो धनं सर्वं परित्यज ॥ यदिसंसारजलधेर्वीचीप्रेंखोल्लनातुरः
॥ ५२ ॥ जन्मोद्विग्नमृते त्रस्तं ग्रस्तं कामादिभिर्नरम् ॥ त्रस्तं योनयमादिभ्यः पिनाकी पाति पाविनम् ॥ ५३ ॥ मा धेहि गर्वं
कीनाश हास्यं यास्यासि पीडयन् ॥ प्राणिनं सर्वशरणं तद्भावि शरणं तव ॥ ५४ ॥ कालः करालको बाल को मृत्युः को
यमाधमः ॥ शिवविष्णुपराणां हि नराणां किं भयं भवेत् ॥ ५५ ॥ भवभारार्तजंतूनां रेवातीरनिवासिनाम् ॥ भर्गश्च भगवांश्चैव भ-
वभीतिविभेदनौ ॥ ५६ ॥ शिवं भज शिवं ध्याय शिवं स्तुहि शिवं यज ॥ शिवं नम वराक त्वं ज्ञानमोक्षं यदिच्छसि ॥ ५७ ॥
पठ पंचाननं शास्त्रं मंत्रं पंचाक्षरं जप ॥ धेहि पचात्मकं तत्त्वं यज पंचाननं परम् ॥५८॥ किं तैः कर्मगणैः शोच्यैर्नानाभावविशे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पितैः ॥ यदि पंचाननः श्रीमान् सेव्यते सर्वथा शिवः ॥ ५९ ॥ किं संसारगजोन्मत्तबृंहितैर्निर्भृतैरपि ॥ यदि पंचाननो देवो
भावगंधोपसेवितः ॥ ६० ॥ रे मूढ किं विषादेन प्राप्य कर्मकदर्थनाम् ॥ भवानीवल्लभं भीमं जप त्वं भयनाशनम् ॥ ६१ ॥ न-
र्मदातीरनिलयं दुःखौघविलयंकरम् ॥ स्वर्गमोक्षप्रदं भर्गं भज मूढ सुरेश्वरम् ॥ ६२ ॥ विहाय रेवां सुरसिंधुसेव्यां तत्तीरसंस्थं
च हरं हरिं च ॥ उन्मत्तवद्भावविवर्जितस्त्वं क्व यासि रे मूढदिगंतराणि ॥ ६३ ॥ भज रेवाजलं पुण्यं यज रुद्रं सनातनम् ॥
जप पंचाक्षरीं विद्यां व्रज स्थानं च वांछितम् ॥ ६४ ॥ क्लेशयित्वा निजं कायमुपायैर्बहुभिस्तु किम् ॥ भज रेवां शिवं प्राप्य सु
खसाध्यं परं पदम् ॥ ६५ ॥ एवं कैलासमासाद्य नंदी स शिवसन्निधौ ॥ जगौ यल्लोकपालानां तन्मयोक्तं तवाधुना ॥ ६६ ॥
मार्कंडेय उवाच ॥ स्नानदानपरो यस्तु नित्यं धर्ममनुव्रतः ॥ नर्मदातीरमाश्रित्य मुच्यते सर्वपातकैः ॥६७॥ विधिहीनो जपेन्नित्यं
वेदान्सर्वान् शतं समाः ॥ गायत्रीजपसंयुक्तः संयमी ह्यधिको गुणैः ॥६८॥ अग्निमीळे इषेत्वा वा अग्नआयाहि नित्यदा ॥ शन्नो-
देवीति कूलस्थो[१] जपेन्मुच्येत किल्बिषैः ॥ ६९ ॥ सांगोपांगांस्तथा वेदान् जपन् नित्यं समाहितः ॥ न तत्फलमवाप्नोति गायत्र्या
संयमी यथा ॥ ७० ॥ रुद्राध्यायं सकृज्जप्त्वा विप्रो वेदसमन्वितः ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७१ ॥ अन्यद्वै
चाप्यसंस्थानं सूक्तमारण्यकं तथा ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ७२ ॥ यत्किंचित्क्रियते जाप्यं यच्च दानं प्रदी-
यते ॥ नर्मदाजलमाश्रित्य तत्सर्वं चाक्षयं भवेत् ॥ ७३ ॥ एवंविधा द्विजा नित्यं नर्मदां ये समाश्रिताः ॥ ते मृता वैष्णवं यांति
पदं वा शैवमव्ययम् ॥ ७४ ॥ सत्यलोके नराः केचित्सूर्यलोके तथापरे ॥ अप्सरोगणसंवीता यावदाहूतसंप्लवम् ॥ ७५ ॥ एवं
वै वर्तमानेस्मिंल्लोके तु नृपपुंगव ॥ ऋषीणां दशकोट्यस्तु कुरुक्षेत्रनिवासिनाम् ॥ ७६ ॥ मया सह महाभाग नर्मदातटमाश्रि-

१ कूलस्थः नर्मदातीरस्थः।

CC-0. In Public Domain. Digitization by eGangotri

ताः ॥ फलमूलकृताहारा अर्चयंतः स्थिताः शिवम्॥७७॥तच्च वर्षशतं दिव्यं कालसंख्यानुमानतः॥ षड्विंशतिसहस्राणि तानि मानु-
षसंख्यया ॥ ७८ ॥ ततो ह्यहमतीतायां सध्यायां नृपसत्तम ॥ समासते व्यतीते तु वर्षे मानुष्यके तदा ॥ ७९ ॥ ततोऽभवद्ना
वृष्टिर्लोकक्षयकरी तदा ॥ यया जातं जगत्सर्वं क्षयं भूयो हि दारुणम् ॥ ८० ॥ ये पूर्वमिह संसिद्धा ऋषयो वेदपारगाः ॥ तेषां
प्रभावाद्भगवान् प्रावर्षद्बलवृत्रहा ॥ ८१ ॥ महती भूरिसलिला समंताद्वृष्टिराहिता ॥ ततो वृष्ट्यां तु तेषां वै वर्तनं समजायत
॥ ८२ ॥ श्यामाकेंगुदबिल्वाद्यैर्नर्मदातीरमाश्रितैः ॥ नीयते स महान्कालो महासिद्धिमभीप्सुभिः ॥ ८३ ॥ पुनर्युगांते संप्राप्ते
किंचिच्छेषे कलौ युगे ॥ निःशेषमभवत्सर्वं शुष्कं स्थावरजंगमम् ॥ ८४ ॥ निर्वृक्षौषधिगुल्मं च तृणवीरुधवर्जितम् ॥ अनावृष्टिहतं
सर्वं भूमंडलमभूद्भृशम् ॥ ८५ ॥ ततस्ते ऋषयः सर्वे क्षुत्तृषार्ताः सहस्रशः ॥ युगस्वभावमाविष्टा हीसनस्त्वा भवन्नृप ॥८६॥ नष्टहो-
मस्वधाकारे युगांते समुपस्थिते ॥ किं कार्यं कुत्र यास्यामः को वास्माकं गतिर्भवेत् ॥ ८७ ॥ तानहं प्रत्युवाचेदं मा भैष्टेति पुनः-
पुनः ॥ इदृग्विधा मया दृष्टा बहवः कालपर्ययाः ॥ ८८ ॥ नर्मदातीरमाश्रित्य ते सर्वे गमिता मया ॥ एषा हि शरणं देवी संप्रा-
प्ते तु युगक्षये ॥ ८९ ॥ नान्या गतिरिहास्माकं विद्यते द्विजसत्तमाः ॥ जनित्री सर्वभूतानां पोषणी प्रतिपालिनी ॥ ९० ॥ पितरो
मे परा जाता ये कुले द्विजसत्तमाः ॥ ते समस्ता गताः स्वर्गं समाश्रित्य महानदीम्॥९१॥भृग्वाद्याः सप्त ये त्वासन् मम पूर्वपिताम-
हाः॥ तथान्ये च महाभागा नियमव्रतचारिणः ॥९२॥ पुलस्त्यः पुलहश्चैव वसिष्ठात्रेयकाश्यपाः॥ अन्ये च शतसाहस्रा अत्र सिद्धिं
समागताः ॥ ९३ ॥ तस्मादियं महाभागा न मोक्तव्या कदाचन ॥ नान्या काचिन्नदी शक्ता लोकत्रयफलप्रदा ॥९४॥ द्वंद्वैरनेकैर्बहु-
भिः क्षुत्तृषाद्यैर्महाभयैः॥ मुच्यंते ते नराः सद्यो नर्मदातीरवासिनः ॥ ९५ ॥ तस्मात्सर्वप्रयत्नेन सेवनीया सरिद्वरा ॥ वांछद्भिः स-

१ आगमशास्त्रस्यानित्यत्वादडागमाभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्रं श्रेयः इह लोके परत्र च ॥ ९६ ॥ इति श्रीनर्मदामाहात्म्ये द्वादशोध्यायः ॥ १२ ॥ श्रीमार्कंडेय उवाच ॥ इति श्रुत्वा
वचो राजन्संहृष्टा ऋषयोभवन् ॥ नर्मदांस्तोतुमारब्धाः कृतांजलिपुटास्तदा ॥ १ ॥ नमोस्तुते पुण्यजलाश्रये शुभे विशुद्धसत्त्वे-
सुरसिद्धसेविते ॥ नमोस्तु ते तीर्थगणैर्निषेविते नमोस्तु रुद्रांगसमुद्भवे शिवे॥२॥नमोस्तु ते देवि समुद्रगामिनी नमोस्तु ते देवि वरप्र
देऽमले ॥ नमोस्तु लोकद्वयसौख्यदायिनी अनेकभूतौघसमाश्रितेऽनघे ॥ ३ ॥ सरिद्वरे पापहरे विचित्रिते गंधर्वयक्षोरगसेवितांगे ॥
सनातनि प्राणिगणानुकंपिनि मोक्षप्रदे देवि विधेहि शं नः॥४॥महागजौघैर्महिषैर्वराहैः संसेविते देवि महोर्मिमाले ॥ नताः स्म स-
र्वे सततं सुखप्रदे विमोचयास्मानिह पापसंघात् ॥ ५ ॥ पापैरनेकैर्विषमैर्निबद्धा भ्रमंति तावन्नरकेषु मर्त्याः ॥ अपारसंसारतरंग-
भूतं यावत्तवांभो नहि संस्पृशंति ॥६॥ अनेकदुःखौघभयार्दितानां पापैरनेकैरभिवेष्टितानाम् ॥ गतिस्त्वमंभोजसमानवक्त्रे द्वंद्वैरनेकै-
रपि संवृतानाम् ॥ ७ ॥ नद्यश्च पूता विमला भवंति त्वां देवि संप्राप्य न संशयोत्र ॥ दुःखातुराणामभयं ददासि शिष्टैरनेकैर-
भिपूजितासि ॥ ८ ॥ यत्रोपलाः पुण्यजलाप्लुतास्ते शिवत्वमायांति किमत्र चित्रम् ॥ भ्रमंति तावन्नरकेषु मर्त्या दुःखातुराः पापप-
रीतदेहाः ॥ ९ ॥ महानिलोद्भूततरंगभंगं यावत्तवांभो नहि संश्रयंति ॥ म्लेच्छाः पुलिंदास्त्वथ यातुधानाः पिबंति येंभस्तव देवि
पुण्यम् ॥१०॥ मुक्ता भवंतीह भयात्तु घोरान्निःसंशयं तेपि किमत्र चित्रम् ॥ सरांसि नद्यः क्षयमभ्युपेता घोरे युगेस्मिन् हि कलौ-
प्रदूषिते ॥ ११ ॥ त्वं भ्राजसे देवि जलौघपूर्णा दिवीव नक्षत्रपथीव गंगा ॥ तव प्रसादाद्वरदे वरिष्ठे कालं यथेमं परिपालयित्वा
॥ १२ ॥ यास्याम मोक्षं तव सुप्रसादात्त्वामाश्रितास्त्वां शरणं प्रपन्नाः ॥ गतिस्त्वमंबेव पितेव पुत्रान् त्वं पाहि नो यावदिमं यु-
गांतम् ॥१३॥ काले त्वनावृष्टिहतं सुघोरं यावत्तरामस्तव सुप्रसादात् ॥ पठंति ये स्तोत्रमिदं द्विजेंद्राः शृण्वंति ये चापि नराः प्रशां-

१ प्राणिसमूहेषुदयाकर्त्रि ।

ताः ॥ १४ ॥ ते यांति रुद्रं वृषसंयुतेन यानेन दिव्याब्दशतं सुपर्णम् ॥ येस्तोत्रमेतत्सततं पठंति स्नात्वा तु तोये खलु नर्मदा-
याः ॥ १५ ॥ अंते हि तेषां सरिदुत्तमेयं गतिं विशुद्धामचिराद्ददाति ॥ प्रातः समुत्थाय तथा शयाना ये स्तोत्रमेतत्सततं पठंति
॥ १६ ॥ ते मुक्तपापाः सविशुद्धदेहाः समाश्रयं यांति महेश्वरस्य ॥ १७ ॥ इति श्रीनर्मदामहात्म्ये त्रयोदशोध्यायः ॥ १३ ॥
श्रीमार्कंडेय उवाच ॥ एवं भगवती पुण्या स्तुता सा मुनिपुंगवैः ॥ चिंतयामाससर्वेषां दास्यामि वरमुत्तमम् ॥ १ ॥ ततः
प्रसुप्तांस्तान् ज्ञात्वा रात्रौ देवी जगाम ह ॥ एकैकस्य ऋषेः स्वप्ने दर्शनं चारुहासिनी ॥२ ॥ ततोर्धरात्रे संप्राप्ते उत्थिता जलमध्य-
तः ॥ विमलांबरसंवीता दिव्यमालाविभूषिता ॥३॥ जगाद माभैरिति तानेकैकं तु पृथक्पृथक् ॥ वसध्वं मम पार्श्वे तु भयं त्यक्त्वा
क्षुधादिजम् ॥ ४ ॥ एवमुक्त्वा महादेवी स्वप्नांते तान् महामुनीन् ॥ जगामादर्शनं पश्चात्प्रविश्य जलमात्मिकम् ॥ ५ ॥ ततः प्र-
भाते मुनयो मिथ ऊचुर्मुदान्विताः ॥ अभयं दत्तमस्माकं सिद्धिश्चात्र भविष्यति ॥ ६ ॥ अन्यस्मिन् दिवसे राजन् मत्स्यानां
रूपमुत्तमम् ॥ पश्यंति सपरिवाराः स्वकीयाश्रयसन्निधौ ॥ ७ ॥ तान् दृष्ट्वा विस्मयाविष्टमत्स्यांस्तत्र महर्षयः ॥ पूजयामासुरव्यग्रा
हव्यकव्येन देवताः ॥ ८ ॥ तान् मत्स्यसंघान् संप्राप्य महादेव्याः प्रसादतः ॥ सपुत्रदारभृत्यास्ते वर्तंते स्म पृथक्पृथक् ॥ ९ ॥
दिनेदिने तथाप्येवमाश्रमेषु द्विजातयः ॥ मत्स्यानां संचयं दृष्ट्वा विस्मिताश्चाभवंस्तदा ॥ १० ॥ ते जपंतस्तपंतश्च ति-
ष्ठंति भरतर्षभ ॥ अर्चयंति पितॄन् देवान् नर्मदातटवासिनः ॥ ११ ॥ तैर्जपद्भिस्तपद्भिश्च सततं द्विजसत्तमैः ॥ भ्राजते सा स-
रिच्छ्रेष्ठातारााभिर्द्यौर्ग्रहैरिव ॥ १२ ॥ तत्र तैर्बहलैः शुभ्रैः ब्राह्मणैर्वेदपारगैः ॥ नर्मदा धर्मदा पूर्वं संविभक्ता यथाक्रमम् ॥ १३ ॥
ऋषिभिर्दशकोटीभिर्नर्मदातीरवासिभिः ॥ विभक्तेयं विभक्तांगी नर्मदा शर्मदा नृणाम् ॥ १४ ॥ उत्तरीयैः शुभ्रैस्तत्र चाक्षसूत्रैश्च भा-

१ तीरे इत्यर्थः ।

रत ॥ कूलद्वये महापुण्या पश्चिमोदधिगामिनी ॥ १५ ॥ पृथगायतनैः शुभ्रैर्लिंगैर्वालुकपिंडकैः ॥ भ्राजते या सरिच्छ्रेष्ठा नक्षत्रैर्द्यौ-
रिवायता ॥ १६ ॥ एवं ते ऋषयः सर्वे तर्पयंतः सुरान् पितॄन् ॥ न्यवसन्नर्मदातीरे यावदाहूतसंप्लवम् ॥ १७ ॥ किंचिद्गते नल-
स्तस्मिन् घोरे वर्षशताधिके ॥ अर्धरात्रे तदा कन्या जलमुत्तीर्य चागता ॥१८॥ विद्युत्पुंजसमाभासा व्यालयज्ञोपवीतिनी ॥ त्रिशू-
लाग्रकरा सौम्या तानुवाच ऋषींस्तदा ॥ १९ ॥ आगच्छध्वं मुनिगणा विशध्वं मामयोनिजाम् ॥ समेताः पुत्रदारैश्च ततः सि-
द्धिमवाप्स्यथ ॥ २० ॥ यस्ययस्य हि या वांछा तस्य तां तां ददाम्यहम् ॥ विष्णुब्रह्माणमीशानमन्यं वा सुरमुत्तमम् ॥ २१ ॥ तत्र
सर्वान्नयिष्यामि प्रसन्ना वः सुरार्चिताः ॥ प्राणायामपरा भूत्वा मां विशध्वं समाहिताः ॥२२॥ सहपुत्रैश्च दारैश्च त्यक्त्वाश्रमपदानि
च ॥ कालक्षेपो न कर्तव्यः प्रलयोयमुपस्थितः ॥ २३ ॥ संहारः सर्वभूतानां कल्पवादः सुदारुणः ॥ एकाहमभवत्पूर्वं महाघोरे
जनक्षये ॥२४॥ शेषा नद्यः समुद्राश्च सर्व एव क्षयंगताः ॥ वरदानान्महेशस्य तेनाहं न क्षयं गता ॥२५ ॥ अमृतः शाश्वतो देवः
स्थाणुरीशः सनातनः॥ स पूजितो प्रार्थितो वा किं न दद्यात् द्विजोत्तमाः॥२६॥एवमुक्त्वा ऋषीन् रेवा प्रविवेश जलं ततः॥ करात्त-
शूला सा देवी व्यालयज्ञोपवीतिनी ॥२७॥ ततस्ते तद्वचः श्रुत्वा विस्मयापन्नमानसाः ॥ अभिवंद्य च मां सर्वे क्षामयंत पुनः पु-
नः ॥ २८ ॥ क्षम्यतां नो यदुक्तं हि वसतां तव संश्रये ॥ गृहांस्त्यक्त्वा महाभागाः सशिष्याः सहबांधवाः ॥२९॥ जपंत्येकाक्षरं
ब्रह्म हृदि ध्यात्वा महेश्वरम् ॥ विविशुर्नर्मदातोयं सपक्षाइव पर्वताः॥३०॥ द्योतयंतो दिशः सर्वाः कुशहस्ताः सहाग्नयः गतेषु तेषु
राजेंद्र अहमेकःस्थितस्तदा ॥३१॥ अमरेशं समासाद्य पूजयन् नर्मदां नदीम् ॥ अनुभूताः सप्तकल्पा मायूराद्या मया नृप ॥३२॥
प्रसादाद्वेधसः सर्वे रेवया सह भारत ॥ जन्मतोद्य दिनं यावत् न जानेस्याः पुरास्थितिम्॥३३॥इयं हि शांकरी शक्तिः कला शंभोरि
लाह्वया ॥ नर्मदा दुरितध्वंसकारिणी भवतारिणी ॥ ३४ ॥ यदाहमपि नाभूवं पुराकल्पेषु पांडव ॥ चतुर्दशसु कल्पेषु तेष्व पीयं

CC-0. In Public Domain. Digitization by eGangotri

सुखस्थितिः ॥ ३५ ॥ चतुर्दश पुरा कल्पा न मृता येषु नर्मदा ॥ तानहं संप्रवक्ष्यामि देवी प्राह यथा मम ॥ ३६ ॥ कापिलं प्र-
थमं विद्धि प्राजापत्यं द्वितीयकम् ॥ ब्राह्मं सौम्यं च सावित्रं बार्हस्पत्यं प्रभासकम् ॥३७॥ महेंद्रमग्निकल्पं च जयंतं मारुतं तथा ॥
वैष्णवं बहुरूपं च ज्यौतिषं च चतुर्दशम् ॥३८॥ एते कल्पा मया ख्याताः न मृता येषु नर्मदा ॥ मायूरं पंचदशमं कौर्मं चैवात्र षो-
डश ॥ ३९ ॥ बकं मात्स्यं च पद्मं च वटकल्पं च भारत ॥ एकविंशतिमं चैतद्वाराहं सांप्रतीनकम् ॥ ४० ॥ इमे सप्त मया सार्कं
रेवाया परिशीलिताः ॥ एकविंशतिकल्पास्तु नर्मदायाः शिवांगतः ॥ ४१ ॥ संजातायां नृपश्रेष्ठ भूयः किं कथयामि ते ॥ ४२ ॥
इति श्रीवायूक्तरुद्रसंहितायां रेवामहात्म्ये चतुर्दशोऽध्यायः ॥ १४ ॥ युधिष्ठिरउवाच ॥ ततस्ते ऋषयः सर्वे महाभागास्तपो-
धनाः ॥ गतास्तु परमं लोकं ततः किंजातमद्भुतम् ॥ १ ॥ श्रीमार्कंडेय उवाच ॥ ततस्तेषु प्रयातेषु नर्मदातीरवासिषु ॥ बभूव रौ-
द्रसंहारः सर्वभूतक्षयंकरः ॥ २ ॥ कैलासशिखरस्थं तु महादेवं सनातनम् ॥ब्रह्माद्याः प्रास्तुवन्देवमृग्यजुःसामभिः शिवम् ॥ ३ ॥
संहर त्वं जगद्देव सदेवासुरमानुषम् ॥ प्राप्तो युगसहस्रांतः कालः संसारसंक्षयः ॥४॥ मद्रूपं तु समास्थाय त्वया चैतद्विनिर्मितम्॥
वैष्णवीं मूर्तिमास्थाय त्वयैतत्परिपालितम् ॥५॥ एका मूर्तिस्त्रिधा जाता ब्राह्मी शौरी च शांकरी ॥ सृष्टिपालनसंहारहेतवे परमेश्व-
रः ॥ ६ ॥ एतच्छ्रुत्वा वचस्तथ्यं विष्णोश्च परमेष्ठिनः ॥ सगणः सपरीवारः सह ताभ्यां सहोमया ॥७॥ सप्तलोकान् विभिद्येमान्
भगवान् नीललोहितः ॥ भूराद्या ब्रह्मलोकानां तं भित्त्वांडं परात्परम् ॥ ८॥ शैवं यदमजं दिव्यमाविवेश जगत्प्रभुः॥ न तत्र वा-
युर्नाकाशं नाग्निस्तत्र न भूतलम् ॥ ९ ॥ यत्रासौ तिष्ठते देव उमया सह शंकरः ॥ न सूर्यो न ग्रहास्तत्र न ऋक्षाणि दिशस्तथा
॥ १० ॥ न लोकपाला न सुखं न च दुःखं नृपोत्तम ॥ ११ ॥ ब्राह्मं पदं यत्कवयो वदंति शैवं पदं यत्कवयो वदंति ॥ क्षेत्रज्ञ-
मीशं प्रवदंति चान्ये सांख्याश्च गायंति किलादिमोक्षम् ॥१२ ॥ यद्ब्रह्म आद्यं प्रवदंति केचित् तं सर्वमीशानमजं पुराणम् ॥ तमे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

करूपं तमनेकरूपमरूपमाद्यं परमव्ययाख्यम् ॥ १३ ॥ अवर्णमप्यर्थमनामगोत्रं तुर्यं पदं यत्कवयो वदंति ॥ ध्यानार्थविज्ञानमयं
सुसूक्ष्ममात्मस्थमीशानवरं वरेण्यम् ॥ १४ ॥ ततस्त्रयस्ते भगवंतमाद्यं संप्राप्य संक्षिप्य भवत्यथैकः ॥ पृथक्स्वरूपैस्तु पुनस्त एव
जगत्समस्तं परिपालयंति ॥ १५ ॥ संहारं सर्वभूतानां रुद्रत्वे कुरुते प्रभुः ॥ वैष्णवे पालयेद्राजन् ब्रह्मत्वे सृष्टिकारकः ॥ १६ ॥
तस्मादेतज्जगत्सर्वं समुद्भूतं चराचरम् ॥ एकत्वे प्रलयं याति युगांते समुपस्थिते ॥ १७ ॥ भगलिंगांकितं सर्वं व्याप्तं वै परमेष्ठिना
॥ भगरूपो भवेद्विष्णुर्लिंगरूपो महेश्वरः ॥ १८ ॥ भाति सर्वेषु लोकेषु गण्यते त्वमरैरपि ॥ प्रविष्टः सर्वभूतेषु तेन विष्णुर्भगः
स्मृतः ॥ १९ ॥ विशनाद्विष्णुरित्युक्तः सर्वदेवमयो महान् ॥ भासानांगमनाच्चैव भगसंज्ञा प्रकीर्तिता ॥ २० ॥ ब्रह्मादिस्तंबपर्यंतं
यस्मिन्नेति लयं जगत् ॥ एकभावसमापन्नं लिंगं तस्माद्विदुर्बुधाः ॥ २१ ॥ महादेवस्ततो देवीमाह पार्श्वे स्थितां तदा ॥ संहरस्व
जगत्सर्वं मा विलंबस्व शोभने ॥ २२ ॥ त्यज सौम्यमिदं रूपं सितचंद्रांशुनिर्मलम् ॥ रौद्रं वपुः समास्थाय संहरस्व चराचरम्
॥ २३ ॥ रौद्रैर्भूतगणैर्घोरैर्देवि त्वं परितो वृता ॥ जीवलोकमिमं सर्वं भक्षयस्वांबुजेक्षणे ॥ २४ ॥ ततोहं मर्दयिष्यामि प्लावयिष्ये
तथा जगत् ॥ तत एकार्णवं कृत्वा सुखं स्वप्स्ये त्वया सह ॥ २५ ॥ श्रीदेव्युवाच ॥ नाहं देव जगच्चैतत् संहरामि महाद्युते ॥
अंबाभूत्वा विचेष्टंते न भक्ष्यामि भृशातुरम् ॥ २६ ॥ स्त्रीस्वभावेन कारुण्यं करोति हृदयं मम ॥ कथं वै निर्दहिष्यामि जगदेत-
ज्जगत्पते ॥ २७ ॥ तस्मात्त्वं स्वयमेवेदं जगत्संहर शंकर ॥ अथैवमुक्तस्तां देवीं धूर्जटिर्नीललोहितः ॥ २८ ॥ क्रुद्धो निर्भर्त्सयामा-
स हुंकारेण महेश्वरीम् ॥ हुंकृत्वा तां स इत्याह कोपाविष्टैरथेक्षणैः ॥ २९ ॥ हुंकारिता विशालाक्षी पीनोरुजघनस्थला ॥ तत्क्ष-
णाच्चाभवद्रौद्रा कालरात्रीव भारत ॥ ३० ॥ हुंकुर्वती महानादैर्नादयंती दिशो दश ॥ व्यवर्धत महारौद्रा विद्युत्सौदामिनी यथा
॥ ३१ ॥ विद्युत्संपातदुःप्रेक्षा विद्युत्संघातचंचला ॥ विद्युज्ज्वालाकुला रौद्रा विद्युदग्निनिभेक्षणा ॥ ३२ ॥ मुक्तकेशी विशाला-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षी कृशग्रीवा कृशोदरी वृश्चिकैरग्निपुंजाभैर्गोनसैश्च विभूषिता ॥ ३३ ॥ त्रैलोक्यं पूरयामास विस्तारेणोच्छ्रयेण च ॥ भासुरांगा तु
संवृत्ता कृष्णसर्पैककुंडला ॥ ३४ ॥ चित्रदंडोद्यतकरा व्याघ्रचर्मोपसेविता ॥ व्यवर्धत महारौद्रा जगत्संहारकारिणी ॥ ३५ ॥ सृ-
क्किणी लेलिहाना च क्रूरफूत्कारकारिणी ॥ व्यात्तास्या घुर्घरारावा जगत्संक्षोभकारिणी ॥३६॥ खेलद्भूतानुगा क्रूरा निःश्वासोच्छ्वास-
कारिणी ॥ जाताट्टहासा दुर्नासा वह्निकुंडसमेक्षणा ॥ ३७ ॥ प्रोद्यत्किलिकिलारावा ददाह सकलंजगत् ॥ दह्यमानाः सुरास्तत्र
पतंति धरणीतले ॥ ३८ ॥ पतंति पक्षिगंधर्वाः सकिन्नरमहोरगाः ॥ पतंति भूतसंघाश्च हाहाहैहैविराविणः॥ ३९ ॥ बुंबापातैः सनि-
र्घातैः रुदितार्तस्वरैरपि ॥ व्याप्तमासीत्तदा विश्वं त्रैलोक्यं सचराचरम् ॥ ४० संपतद्भिः पतद्भिश्च ज्वलद्भूतगणैर्मही ॥ जातैश्चट-
चटाशब्दैः पतद्भिर्गिरिसानुभिः ॥ ४१ ॥ तच्च रौद्रोत्सवे जाता रुद्रानंदविवर्धिनी ॥ विहिंसमाना भूतानि चर्वमाणा चरानपि
॥ ४२ ॥ तत्तद्गंधमुपादाय शिवारावविराविणी ॥ गलच्छोणितधाराभिमुखा दिग्धकलेवरा ॥४३ ॥ चंडशीलाऽभवच्चंडी जगत्संहार-
कर्मणि ॥ येपि प्राप्ता महर्लोकं भृग्वाद्याश्च महर्षयः ॥ ४४ ॥ तेपि नश्यंति शतशो ज्वालाकुलितविग्रहाः ॥ देवासुरा भयत्रस्ताः
सयक्षोरगराक्षसाः ॥ ४५ ॥ विशंति केपि पातालं लीयंते च गुहादिषु ॥ सा च देवी दिशः सर्वा व्याप्य मृत्युरिव स्थिता ॥४६॥
युगक्षयकरे काले देवेन विनियोजिता ॥ एकापि नवधा जाता दशधा दशधा स्तथा ॥४७॥ चतुःषष्टिस्वरूपा च शतरूपाट्टहासिनी
॥ जज्ञे सहस्ररूपा च लक्षकोटितनुः शिवा ॥ ४८ ॥ नानारूपायुधाकारा नानावादनचारिणी ॥ एवंरूपाऽभवद्देवीशिवस्यानुज्ञया
नृप ॥ ४९ ॥ दिक्षु सर्वासु गगने विकटायुधशीलिनः ॥ रुंधंतो नश्यमानानां गणा माहेश्वराः स्थिताः ॥ ५० ॥ विचरंति तया
सार्द्धं शूलपट्टिशपाणयः ॥ ततो मातृगणाः केचिद्विनायकगणैः सह ॥ ५१ ॥ व्यवर्धंत महारौद्रा जगत्संहारकारिणः ॥ ततस्त-
स्या व्यवर्धत दंष्ट्राः कुंदेंदुसन्निभाः ॥ ५२ ॥ योजनानां सहस्राणि अयुतानि शतानि च ॥ दंष्ट्रावलिः कररुहाः क्रूरास्तीक्ष्णाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कर्कशाः ॥ ५३ ॥ वियद्दिशो लिखंत्येव सप्तद्वीपां वसुंधराम् ॥ तस्या दंष्ट्राभिसंपातैश्चूर्णिता गिरिसानवः ॥ ५४ ॥ शिलासंचय-
 संघाता विशीर्यंते सहस्रशः ॥ हिमवान् हेमकूटश्च निषधो गंधमादनः ॥५५॥ माल्यवान्नीलवर्णश्च श्वेतश्चैव महागिरिः ॥ मेरुमध्य-
मिलापीठं सप्तद्वीपं च सार्णवम् ॥ ५६ ॥ लोकालोकेन सहितं प्राकंपत नृपोत्तम दंष्ट्राशनिविसृष्टाश्च विशीर्यंते महाद्रुमाः ॥ ५७॥
उत्पातैश्च दिशो व्याप्ताः घोररूपैः समंततः ॥ ते च ग्रहगणा सर्वे ये च वैमानिका गणाः ॥ ५८ ॥ शिवासहस्रैराकीर्णा महामा-
तृगणैस्तथा ॥ सा चचार जगत्सर्वं युगांते समुपस्थिते ॥५९॥ प्रमथद्भिर्ज्वलद्भिश्च रौद्री व्याप्ता दिशो दश ॥ विस्तीर्णं शैलसंघातं
विघूर्णितगिरिद्रुमम् ॥ ६० ॥ विकीर्णगोपुरद्वारं केशभस्मास्थिसंकुलम् ॥ प्रदग्धग्रामनगरं भस्मपूजाभिसंवृतम् ॥ जगदेतदभूत्सर्वम-
शरण्यं निराश्रयम् ॥ ६१ ॥ इति श्रीरेवामाहात्म्ये कल्पानुकथने पंचदशोध्यायः ॥ १५ ॥ श्रीमार्कंडेय उवाच ॥ ततो मातृस-
हस्रेण रौद्रेण परिवारिता ॥ कालरात्रिर्जगत्सर्वं हरते दीप्तलोचना ॥१ ॥ ततस्तन्मातरोघोरा ब्रह्मविष्णुशिवात्मिकाः॥ वाय्विंद्रान-
लकौबेरा यमतोयेशशक्तयः ॥ २ ॥ स्कंदक्रोडनृसिंहानां विचरंत्यो भयानकाः ॥ चक्रशूलगदाखड्गवज्रशक्त्यृष्टिपट्टिशैः ॥ ३ ॥
खट्वांगैरुल्मुकैर्दीप्तैर्व्यचरंस्तत्र मातरः ॥ उमासंनोदिताः सर्वाः प्रधावंतो दिशोदश ॥४ ॥ तासां चरणविक्षेपैर्हुंकारांगारसंचयैः ॥ त्रै-
लोक्यप्रेतसकलं विप्रदग्धं समंततः ॥ ५ ॥ विदारणाक्रंदितनिःस्वनैश्च प्रभाग्ररथ्यागृहगोपुरैश्च ॥ बभूव घोरा धरणी समंतात्कपा-
लकेशाकुलकर्बुरांगी ॥ ६ ॥ यदेतच्छतसाहस्रं जंबूद्विपं निगद्यते ॥ सर्वमेव तदुच्छन्नं समाधृष्टं नृपोत्तम ॥ ७ ॥ जंबूशाकंकुशं
क्रौंचं गोमेदं शाल्मलिस्तथा ॥ पुष्करद्वीपसहिता ये च पुष्करवासिनः॥ ८ ॥ ते ग्रस्ता मृत्युना सर्वे भूतैर्मातृगणैस्तथा ॥ महासु-
रकपालैश्च मांसमेदोवसोत्कटैः ॥ ९ ॥ महानादपरैर्घोरैर्वारुणीगंधमोहितैः ॥ देवीज्वालापरितांगी विद्युज्ज्वलितकुंडला ॥ १० ॥
रुधिरोद्गारशोणांगी महामाया सुभीषणा ॥ पिबंति रुधिरं तत्र महामांसरसासवम् ॥ ११ ॥ करालहस्ता व्यचरन् भक्षयंति सुरासु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रान् ॥ नृत्यंती हसती रौद्रा विपरीता महारवा ॥ १२ ॥ त्रैलोक्यं त्रासयामास विद्युत्संस्फोटहासिनी ॥ सप्तद्वीपसमुद्रां तां भक्षयामास मेदिनी ॥ १३ ॥ ततः संस्थानमगमद्यत्र देवो महेश्वरः ॥ नर्मदातटमाश्रित्यावसन्मातृगणैः सह ॥ १४ ॥ अमराणां कटे तुंगे नृत्यती सहितानना ॥ अमरा देवताः प्रोक्ताः शरीरं कटमुच्यते ॥ १५॥ तैः कटैरावृतो यस्मात्पर्वतोऽयं नृपोत्तम ॥ छिन्नभिन्नास्थिनिकरैर्वसामेदास्रविप्लुतैः ॥ १६ ॥ अमरंकट इत्येवं तेन प्रोक्तो मनीषिभिः ॥ महापवित्रो लोकेषु शंभुना स विनिर्मितः ॥ १७ ॥ नित्यं सन्निहितस्तत्र शंकरो ह्युमया सह ॥ ततोऽहं नियतस्तत्र तस्य पादाग्रसंस्थितः ॥१८ ॥ प्रह्वः प्रणतभावेन स्तौमि तं नीललोहितम् ॥ ततोसौ तालसंप्राप्तैः गणैर्मातृगणैः सह ॥ १९ ॥ संप्राप्तनृत्यसंहृष्टो मृत्युना सह शंकरः ॥ खट्वांगैरुल्मुकैश्चैव पट्टिशैः परिघैस्तथा ॥ २० ॥ मांसमेदोवसाहस्ता हृष्टा नृत्यंति संघशः ॥ वामना जटिला मुंडा लंबग्रीवोष्ठमूर्द्धजाः ॥ २१ ॥ महाशिश्नोदरभुजा नृत्यंति च हसंति च ॥ विकृतैराननैर्घोरैर्भुजोल्बणमुखादिभिः ॥ २२ ॥ अमरं कंटकं चक्रुः प्राप्ते लोकविपर्यये ॥ तेषां मध्ये महाघोरं जगत्संत्रासकारणम् ॥ २३ ॥ मृत्युं पश्यामि नृत्यंतं तडित्पिंगलमूर्द्धजम् ॥ तस्य पार्श्वे स्थितां देवीं विमलांबरभूषिताम् ॥ २४ ॥ कुंडलोद्घृष्टगंडां तां नागयज्ञोपवीतिनीम् ॥ विचित्रैरुपहारैश्च पूजयंतीं महेश्वरम् ॥ २५ ॥ ददृशे नर्मदां तत्र मातरं विश्ववंदिताम् ॥ स्तूयमानां सुरैः सिद्धैर्मुनिसंघैश्च भारत ॥ २६ ॥ इति संहारमतुलं दृष्टवान् राजसत्तम ॥ नष्टचंद्रार्ककिरणमभूदेतच्चराचरम् ॥ २७ ॥ महोत्पातसमुद्भूतं नष्टनक्षत्रमंडलम् ॥ रुद्रवक्त्रात्समुद्भूतः संवर्तो नाम विश्रुतः ॥ २८ ॥ वायुः संशोषयामास विततान् सप्तसागरान् ॥ उद्धूलितांगः कपिलाक्षमूर्द्धजो जटाकलापैरवबद्धमूर्द्धजः ॥२९॥ महारवो दीप्तविशालशूलधृक् स पातु युष्मान् परमेश्वरो हरः ॥ ३० ॥ दंडी धनुष्मान् कवची किरीटी श्मशानभस्मोक्षितसर्वगात्रः ॥ कपालमालाकुलकंठनालो महाहिसूत्रैरवबद्धमौलिः ॥ ३१ ॥ स गोनसौघैः परिवेष्टितांगो विषाग्निचंद्रामरसिंधुमौलिः ॥ पिनाकखट्वांगकरालपा-

णिः स कृत्तिवासा डमरुप्रणादः ॥ ३२ ॥ नेत्रेण सूर्योदयसन्निभेन प्रवालकांकूरनिभोदरेण ॥ संध्याभ्ररक्तोत्पलपद्मरागसिंदूरवि-
द्रुतप्रकराङ्गेन ॥ ३३ ॥ तृतीयेन लिंगेन च लोचनेन चिक्रीडमानः स युगांतकाले ॥ प्रमुच्यमाने विकृताट्टहासं जहार सर्वं त्रिदिवं
महात्मा ॥ ३४ ॥ तं देवमीशानमजं वरेण्यं दृष्ट्वा जगत्संहरणं महेशं ॥ सा कालरात्रिः सह मातृभिश्च गणाश्च सर्वे शिवमर्चयंति
॥ ३५ ॥ नंदी च भृंगी गणकादयश्च तं सर्वभूतं प्रणमामि देवम् ॥ जगद्गुरं सर्वजनस्य कारणं हरं स्मरामि सततं तदैव ॥ ३६ ॥
इति श्रीनर्मदामाहात्म्ये षोडशोध्यायः ॥ १६ ॥ श्रीमार्कंडेय उवाच ॥ समातृभिर्भूतगणैश्च घोरैर्वृतः समंतात्स ननर्त शूली
॥ गजेंद्रचर्मा वरणावसानः संहर्तुकामश्च जगत्समस्तम् ॥ १ ॥ महेश्वरः सर्वसुरेश्वराणां मंत्रैरनेकैरवबद्धमालाः ॥ मेदोवसारक्त-
विचर्चितांगस्त्रैलोक्यदाहे प्रननर्त शंभुः॥ २ ॥ स कालरात्र्या सहितो महात्मा काले त्रिलोकीं सकलां जहार ॥ संवर्तकाख्यः सह-
भानुभावः शंभुः सदानंदितभावरूपः ॥ ३ ॥ सविस्फुलिंगोत्करधूममिश्रं महोल्कवज्राशनिवाततुल्यम् ॥ तथाट्टहासं प्रमुमोच घोरं
विवृत्य वक्त्रं वडवामुखाभम् ॥ ४ ॥ सहस्रवज्राशनिसुस्वनेन तेनाट्टहासेन हरोहुतेन ॥ आपूरितास्तत्र दिशो दशैव संक्षोभितः
सर्वमहार्णवश्च ॥ ५ ॥ स ब्रह्मलोकं प्रजगाम शब्दो ब्रह्मांडभांडं प्रचचाल सर्वम् ॥ किमेतदित्याकुलचेतनास्ते वित्रस्तरूपा ऋषयो
बभूवुः ॥ ६ ॥ प्रणम्य सर्वे सहसैव भीता ब्रह्माणमूचुः परमेश्वरेशम् ॥ विद्युत्प्रभाभासुरभीषणांगः क एष चिक्रीडति भूतलस्थः
॥ ७ ॥ कालानलं गात्रमिदं दधानो यस्याट्टहासेन जगद्विमूढम् ॥ वित्रस्तरूपं प्रबलेक्षणेशं संहर्तुमिच्छेत्किमयं त्रिलोकम् ॥ ८ ॥
सार्धं त्वया सप्तभिरर्णवैश्च जनस्तपः सत्यमभिप्रयाति ॥ संहर्तुकामो हि क एष देव एतत्समस्तं कथयाप्रमेयम् ॥ ९ ॥ तद्दृष्टमे-
तद्विषमं कदापि जानासि तत्त्वं परमो मतो नः ॥ १० ॥ श्रीब्रह्मोवाच ॥ स एष देवः परमेश्वरेश्वरः संहर्तुकामो जगद-
क्षयात्मा ॥ मूर्तोप्यमूर्तश्च विशादृष्ट्या दृश्यश्च नित्यं हि जनं जनाख्यः ॥ ११ ॥ संवत्सरोयं परिवत्सरश्च कालाग्निरूपो हि स

CC-0. In Public Domain. Digitization by eGangotri

एष देवः ॥ दृष्टोप्यनिष्टः प्रहुतः प्रकाशी स्थूलश्च सूक्ष्मः परमाणुरूपः ॥१२॥ नातःपरं किंचिदिहास्ति लोके परापरोयं प्रभुरात्मवादी ॥ इत्येवमुक्त्वा भगवान् सुरेशः सनत्कुमारप्रमुखैः समेतः ॥ १३ ॥ तं सर्वपूज्यं प्रवरं सुरेशं संतोषयामास ततो यतात्मा ॥ १४ ॥ ब्रह्मोवाच ॥ नमोस्तु सर्वाय सुरेश्वराय शांताय शांतिप्रभवाय तुभ्यम् ॥ ओंकारहुंकारपरिष्कृताय त्रयीमयाय त्रिगुणात्मने नमः ॥ १५ ॥ त्वं शंकरः सूक्ष्मवपुर्दधासि प्रधानमग्र्यं त्वमसि प्रविष्टः ॥ त्वं विष्णुशेषः प्रपितामहश्च त्वं सप्तजिह्वस्त्वमनंतजिह्वः ॥ १६ ॥ सृष्टिश्च स्रष्टा च विभो त्वमेव विश्वस्य वेद्यं परमं च वेत्सि ॥ आहुर्द्विजा वेदविदो वरेण्यं परात्परं त्वां हि तथासि नूनम् ॥ १७ ॥ श्रीमहादेव उवाच ॥ त्वया स्तुतोहं विविधैश्च मंत्रैः पुष्यामि शांतिं तव पद्मयोने ॥ इक्षस्व मां लोकमिमं ज्वलंतं भावैरनेकैः प्रसभं हरंतम् ॥ १८ ॥ एवमुक्त्वा सदेवेशस्तत्कालं जगतः पतिः ॥ पितामहं समाश्वास्य तत्रैवांतरधीयत ॥ १९ ॥ इदं महत्पुण्यतमं वरिष्ठं स्तोत्रं निशाम्येह गतिं लभंते ॥ पापैरनेकैः परिवेष्टितापि प्रयांति रुद्रं विमला मनुष्याः ॥२०॥ संग्रामचौराग्निवने तथाब्धौ तेषां शिवस्त्राति न संशयोत्र ॥ २१ ॥ इति श्रीनर्मदामाहात्म्ये सप्तदशोध्यायः ॥ १७ ॥ श्रीमार्कंडेय उवाच ॥ एवं संस्तूयमानस्तु ब्रह्माद्यैर्मुनिपुंगवैः ॥ ब्रह्मलोकगतैस्तत्र संजहार जगत्प्रभुः ॥ १ ॥ स तद्भीमं महारौद्रं दक्षिणं वक्रमव्ययम् ॥ महादंष्ट्रोत्कटाशावं पातालतलसन्निभम् ॥ २ ॥ विद्युज्ज्वलनपिंगाक्षं भैरवं लोमहर्षणम् ॥ महाजिह्वं महादंष्ट्रं महासर्पशिरोधरम् ॥ ३ ॥ महासुरशिरोमालं महाप्रलयकारणम् ॥ ग्रसत्समुद्रानिहितवातवारिमयं हविः ॥ ४ ॥ वडवामुखसंकाशं महादेवस्य तन्मुखं ॥ जिह्वाग्रेण जगत्सर्वं लेलिहानमदृश्यत ॥ ५ ॥ योजनानां सहस्राणि द्विशतानि शतानि च ॥ तस्य दंष्ट्रा व्यवर्धंत शतशोथ सहस्रशः ॥ ६ ॥ सासुरान्सुरगंधर्वान् सयक्षोरगराक्षसान् ॥ तस्य दंष्ट्राग्रसंलग्नान् स ददर्श पितामहः ॥ ७ ॥ दंतयंत्रांतसंविष्टं विचूर्णितशिरोधरम् ॥ जगत्पश्यामि राजेंद्र विशंतं व्यादिते मुखे ॥ ८ ॥ नानातरंगभंगांग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 महाफेनौघसंकुला ॥ यथा नद्यो लयं यांति समुद्रं प्राप्य सुस्वना ॥ ९ ॥ तथा ततं विश्वमिदं समस्तमनेकजीवार्णवदुर्विगाह्यं ॥
विवेश रुद्रस्य मुखं विशालं ज्वलत्तदुग्रं घननादघोरं ॥ १० ॥ ज्वालास्ततस्तस्य मुखात्सघोराः सविस्फुलिंगा बहुलाः सधूमाः ॥
अनेकरूपा ज्वलनप्रकाशाः प्रदीपयंतीव दिशो दशापि ॥ ११ ॥ ततो रविज्वालसहस्ररूपं बभूव वक्त्रं चलजिह्वदंष्ट्रं ॥ महेश्वरस्या-
द्भूतरूपिणस्तदा स द्वादशात्मा प्रबभूव एकः ॥ १२ ॥ ततस्ते द्वादशादित्या रुद्रवक्त्राद्विनिर्गताः ॥ आश्रित्य दक्षिणामाशां निर्दहं-
तो वसुंधरा ॥ १३ ॥ भौमं यज्जीवनं किं चिन्नानावृक्षतृणालयम् ॥ शुष्कं पूर्वमनावृष्ट्या सकलाकुलभूतलम् ॥ १४ ॥ तद्दीप्यमानं
सहसा सूर्यैस्तै रुद्रसंभवैः ॥ धूमाकुलमभूत्सर्वं प्रणष्टग्रहतारकम् ॥ १५ ॥ जज्वाल सहसा दीप्तं भूमंडलमशेषतः ॥ सप्तद्वीपसमुद्रेषु
विनष्टेषु सरित्सु च ॥ १६ ॥ अग्निरत्तिजगत्सर्वमाज्याहुतिमिवाध्वरे ॥ विशालतेजसा दीप्ता महाज्वालसमाकुलाः ॥ प्रदहंति जग-
त्सर्वमादित्या रुद्रसंभवाः ॥ सप्तद्वीपप्रमाणस्तु सोऽग्निर्भूत्वा महेश्वरः ॥ १८ ॥ सप्तद्वीपसमुद्रांतां ददाह सकलां भुवम् ॥ भित्त्वा तु
पातालतलं नागलोकं ततोदहत् ॥ १९ ॥ मथ्यमान इवांगारैर्लोहरात्रिरिव ज्वलन् ॥ तथा तत्प्राज्ज्वलत्सर्वं संवर्त्ताग्निप्रदीपितं
॥ २० ॥ निर्वृक्षानिस्तृणा भूमिर्निर्निर्झरसरःसरित् ॥ विशीर्णशैलशृंगौघा कूर्मपृष्ठोपमा बभौ ॥ २१ ॥ ज्वालामालाकुलं कृत्वा ज-
गत्सर्वं चिदात्मकम् ॥ महारूपधरो रुद्रो व्यतिष्ठत महेश्वरः ॥ २२ ॥ ततो देवी महादेवं विवेश हरिलोचना ॥ निर्वाणं परमाप-
न्ना शांतेव शिखिनः शिखा ॥ २३ ॥ जगत्सर्वं हि निर्दग्धं सप्तलोकैः सहानघ ॥ रुद्रप्रसादान्मुक्ता तु नर्मदां चाप्ययोनिजाम्
॥ २४ ॥ युगानामयुतं देवो मया वाय्वंबुभक्षणात् ॥ पुरा ह्याराधितः शंभुस्तेनाहमजरामरः ॥ २५ ॥ अवाप परमां जाप्यं मंत्रराजं
त्रयंबकं ॥ ऋषभं त्रिसुपर्णं च दुर्गां सावित्रमेव च ॥ २६ ॥ बृहदारण्यकं चैव बृहत्सामां तथोतरां ॥ रौद्रीं परमगायत्रीं शिवोपनिषदे
तथा ॥ २७ ॥ तथा प्रतिरथं सूक्तं जप्त्वा मृत्युंजयं तथा ॥ द्वादशादित्यनिर्दग्धाः शैलाः शीर्णशिलाः पृथक् ॥ २८ ॥ भस्मीभूतास्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृश्यंते न नष्टा नर्मदा तदा ॥ हिमवान्हेमकूटश्च निषधो गंधमादनः ॥२९॥ माल्यवांश्च गिरिश्रेष्ठो नीलः श्वेतस्तथापरः ॥ एते प-
र्वतराजानो देवगंधर्वसेविताः ॥३०॥ युगांताग्निविनिर्दग्धाः सर्वे शीर्णमहाशिलाः ॥३१॥ एवं मया पुरा दृष्टो युगांतः सर्वसंक्षयः ॥
वर्जयित्वा महापुण्यां नर्मदां नृपसत्तम॥३२॥ इति श्रीरौद्रीसंहितायां श्रीरेवामाहात्म्ये अष्टादशोऽध्यायः॥१८॥ श्रीमार्कंडेय उवाच॥
सूर्यशुष्के जगत्यस्मिन् प्रदग्धे कालवह्निना ॥ ततो मुखान्महेशस्य निश्चेरुर्जलदाः पृथक् ॥ १ ॥ ततो मुखात्तस्य घना महोल्बणा
निश्चेरुरिंद्रायुधकल्परूपाः ॥ घोराः पयोदा जगदंधकारं कुर्वंत ईशानवरप्रयुक्ताः ॥ २ ॥ नीलोत्पलाभाः क्वचिदंजनाभाः गोक्षीरकुं
देंदुनिभाश्च केचित् ॥ मयूरचंद्राकृतयस्तथान्ये केचिद्विधूमानलसप्रभाश्च ॥३॥ केचिन्महापर्वतकल्परूपाः केचिन्महावर्णधरा विशालाः॥
सगोपुराट्टालकसन्निकाशाः सविद्युदुल्काशनिमंडितांताः ॥ ४ ॥ समावृतांगः स च भूतदेवः पयोदराशिं रविकीर्णदेहैः ॥ प्रवर्षमा-
णं जगदप्रमाणं एकार्णवं सर्वमिदं बभूव ॥ ५ ॥ न दृश्यते किंचिदहो चराचरे निरग्निचंद्रार्कमयेपि लोके ॥ नष्टग्रहोडुप्रकृतांधकारे
प्रशांतवाहेपि विनिःप्रकंपे ॥ ६ ॥ अतोहमित्येव विचिंतयानः शरण्यमेकं क्व नु यामि शांतम् ॥ स्मरामि देवं शरणं प्रपद्ये
ध्यानं च तस्यार्तिहरं मयेति ॥ ७ ॥ ध्यात्वा ततोहं सलिले ततार तस्य प्रसादादविमूढचेताः ॥ ग्लानिः श्रमश्चैव मम प्रणष्टौ य-
स्य प्रसादात्परिपातु स त्वाम् ॥८॥ इति श्रीरेवामहात्म्ये एकोनविंशोऽध्यायः ॥१९॥ श्रीमार्कंडे०॥ ततस्त्वेकार्णवे तस्मिन् मुमू-
र्पुरहमातुरः ॥ काकुश्वासस्तरं स्तोयं बाहुभ्यां नृपसत्तम ॥१ ॥ शृणोम्यर्णवमध्यस्थो निशब्दस्तिमिते तदा ॥ अंभोरवमनौपम्यं दि-
शो दश विनादिनम् ॥ २ ॥ हंसकुंदेंदुसंकाशां हारगोक्षीरपांडुरां ॥ नानारत्नविचित्रांगीं स्वर्णशृंगां मनोरमाम् ॥ ३ ॥ खुरैः प्रवाल
कमयैर्लांगूलध्वजशोभिताम् ॥ प्रलंबघोरां नदतीं खुरैरर्णवगाहिनीम् ॥ ४ ॥ गां ददर्शाहमुद्विग्नो मामेवाभिमुखीं
स्थिताम् ॥ किंकीणीजालमुक्ताभिः स्वर्णघंटासमवृताम् ॥ ५ ॥ तस्याश्चरणविक्षेपैः सर्वमेकार्णवं जलम् ॥ विक्षि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रफेनपुंजं तन्नृत्यतीव समंततः ॥ ६ ॥ रराम सलिलोत्क्षेपैः क्षोभयंती महार्णवम् ॥ सा मामाह महाभागा श्लक्ष्णं मधुरया गिरा
॥ ७ ॥ मा भैस्त्वं वत्सवत्सेति मृत्युस्तव न विद्यते ॥ महादेवप्रसादेन न मृत्युस्ते ममापि च ॥८॥ ममाश्रयस्व लांगूलं त्वामत
स्तरयाम्यहम् ॥ घोरादस्माद्भयाद्विप्र यावत्संप्लवते जगत् ॥ ९ ॥ क्षुत्तृषाप्रतिघातार्थं स्तनौ मे त्वं पिबस्व ह ॥ पयोमृताश्रयं दिव्यं
तत्पीत्वा त्वं सुखीभव ॥ १० ॥ तस्यास्तद्वचनं श्रुत्वा हर्षात्पीतो मया स्तनः ॥ न क्षुत्तृषा पीतमात्रे स्तने
मह्यं तदाऽभ्रमत् ॥ ११ ॥ दिव्यं प्राणबलं जज्ञे समुद्रप्लवनक्षमम् ॥ ततस्तां प्रत्युवाचेदं का त्वमेकार्णवीकृते ॥ १२ ॥
भ्रमसे ब्रूहि तत्त्वेन विस्मयो मे महान् हृदि ॥ भ्रमतोत्र ममार्तस्य मुमूर्षोः प्रहतस्य ह ॥ १३॥ त्वं हि मे शरणं जाता भाग्यशे-
षस्तु सुव्रते ॥ १४ ॥ गौरुवाच ॥ किमहं विस्मृता तुभ्यं विश्वरूपमहेश्वरी ॥ नर्मदा धर्मदा नृणां स्वर्गशर्मबलप्रदा ॥ १५ ॥ दृष्ट्वा
त्वां सीदमानं तु रुद्रेणाहं विसर्जिता ॥ तं द्विजं तारयस्वार्थे मा प्राणान् त्यजतां जले ॥ १६ ॥ गोरूपेण विभोर्वाक्यात्त्व-
त्सकाशमिदागता ॥ मा मृषावचनः शंभुर्भवेदिति च सत्वरा ॥१७॥ एवमुक्तस्तयाहं तु इंद्रायुधनिभं शुभम् ॥ लांगूल-
मव्ययं ज्ञात्वा भुजाभ्यामवलंबितः ॥१८॥ ततो तरंतं जलधिं लांगूलध्वजमाश्रितः असौ देवो महादेव इति
मां प्रत्यभाषत ॥ १९ ॥ ततो युगसहस्रांतमहं कालं तया सह ॥ व्यचरं प्रतमीभूते सर्वतः सलिलावृते ॥ २० ॥
महार्णवे ततस्तस्मिन् भ्रमन् गोः पुच्छमाश्रितः ॥ निर्वाते चांधकारे च निरालोकनिरामये ॥ २१॥ अकस्मात्सलिले त-
स्मिन्नतसीपुष्पसन्निभे ॥ विभिन्नांजनसंकाशमाकाशमिव निर्मलम् ॥ २२ ॥ नीलोत्पलदलश्यामं पीतवासःसमावृतम् ॥ किरीटे-
नार्कवर्णेन विद्युद्विद्योतकारिणा ॥२३॥ भ्राजमानेन शिरसी स्वमिवात्यंतरूपिणम् ॥ कुंडलोद्घृष्टगल्लं तु हारोद्द्योतितवक्षसम् ॥२४॥
जांबूनदमयैर्दिव्यैर्भूषणैरुपशोभितम् ॥ नागोपधानशयनं सहस्रादित्यवर्चसम् ॥ २५ ॥ नैकबाहूदरधरं नैकवक्त्र मनोरमम् ॥ सुप्तमेकार्णवे

CC-0. In Public Domain. Digitization by eGangotri

वीरं सहस्राक्षशिरोधरं ॥ २६ ॥ जटाजूटेन महता स्फुरद्विद्युत्समार्चिषा ॥ एकार्णवं जगत्सर्वं व्याप्य देवो व्यवस्थितः ॥ ग्रसित्वा सविभुर्विश्वं सदेवासुरमानवम् ॥ प्रपश्याम्यहमीशानं सुप्तमेकार्णवे प्रभुम् ॥ २८ ॥ सर्वं व्यापिनमव्यक्तमनंतं विश्वतोमुखम् ॥ तस्य पादतलाभ्यासे स्वर्णकेयूरमंडिताम् ॥ २९ ॥ विश्वरूपां महाभागां विश्वमत्याविधारिणीम् ॥ श्रीमयीं ह्रीमयीं देवीं धीमयीं वाग्मयीं शिवाम् ॥ ३० ॥ सिद्धिं कीर्तिं रतिं ब्राह्मीं कालरात्रिमयोनिजाम् ॥ तामेवाहं तदात्यंतमीश्वरांतिकमास्थिताम् ॥ ३१ ॥ अद्राक्षं चंद्रवदनां द्युतिं सर्वेश्वरीमुमाम् ॥ ३२ ॥ शांतं प्रसुप्तं नवहेमवर्णमुमासहायं भगवंतमीशम् ॥ तमोवृतं पुण्यतमं वरिष्ठं प्रदक्षिणीकृत्य नमस्करोमि ॥ ३३ ॥ ततः प्रसुप्तः सहसा विबुद्धो रात्रिक्षये देववरः स्वभावात् ॥ विक्षोभयन् बाहुभिरर्णवांभो जगत्प्रणष्टं सलिले विमृश्य ॥ ३४ ॥ किं कार्यमित्येव विचिंतयित्वा वाराहरूपोऽभवदद्भुतांगः ॥ महाघनांभोधरतुल्यवर्चाः प्रलंबमालांबरनिष्कमाली ॥ ३५ ॥ ससंखचक्रासिधरः किरीटी सवेदवेदांगमयो महात्मा ॥ त्रैलोक्यनिर्माणकरः पुराणो देवत्रयीरूपधरश्च कार्ये ॥३६॥ स एव रुद्रः स जगज्जहार सृष्ट्यर्थमीशः प्रपितामहोभूत् ॥ संरक्षणार्थं जगतः स एव हरिः सुचक्रासिगदाब्जपाणिः ॥ ३७ ॥ कर्तुं विभेदो नहि तत्र शक्यते एकात्मनां रूपपृथक्त्वधारिणाम् ॥ मीमांसहेत्वर्थविशेषतर्कैर्यस्तेषु कुर्यात्प्रविभेदमज्ञः ॥ ३८ ॥ स याति घोरं नरकं क्रमेण विभागकृद्द्वेषमतिर्दुरात्मा ॥ या यस्य भक्तिः स तथैव नूनं देहं त्यजन् स्वं ह्यमृतत्वमेति ॥३९ ॥ संमोहयन् मूर्तिभिरत्र लोकं स्रष्टा च गोप्ता क्षयकृत्स देवः ॥ तस्मान्न मोहात्मकमाविशेत द्वेषं न कुर्यात्प्रविभिन्नमूर्तिः॥४०॥ वराहमीशानवरोप्यतोसौ रूपं समास्थाय जगद्विधाता ॥ नष्टे त्रिलोकेर्णवतोमयथे विमार्गितेयोगमयेंतरात्मा ॥ ४१ ॥ भित्त्वार्णवं तोयमथांतरस्थं विवेश पातालतलं क्षणेन ॥ जले निमग्नां धरणीं सपस्तां समस्पृशन् पंकजपत्रनेत्राम् ॥४२॥ विशीर्णशैलोपलशृंगकूटां वसुंधरां तां प्रलये प्रलीनाम् ॥ दंष्ट्रैकया विश्वपतिर्महात्मा तस्मादुदध्रे स्वयमेव देवः ॥ ४३ ॥ सा तस्य दंष्ट्राग्रविलंबिता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीं कैलासशृंगाग्रगतेव ज्योत्स्ना ॥ विभ्राजते साध्यसमानमूर्तिः सशांकशृंगे च तडिद्विलग्ना ॥४४॥ तामुज्जहारार्णवतोयमग्नां मग्नां
करेणुमिव पंकराशौ ॥ नावं विशीर्णामिव तोयमध्यादुदीर्णसत्त्वोनुपमप्रभावः ॥ ४५ ॥ सतां समुत्तार्य महाजलौघात्समुद्रमायो
व्यभजत्समस्तां ॥ महार्णवेष्वेव महार्णवांभो निक्षेपयामास पुनर्नदीषु ॥४६॥ शीर्णांश्च शैलान् स चकार भूयो द्वीपान् समस्तांश्च
तथार्णवांश्च ॥ शैलोपलैर्ये विचिताः समंताच्छीलोच्चयांस्तान् स चकार कल्पे ॥४७॥ अनेकभावं प्रविभज्य देहं चकार देवेंद्रगणान्
समस्तान् ॥ मुखाच्चवह्निर्मनसश्च चंद्रो वक्त्राच्च सूर्यः सहसा बभूव ॥ ४८ ॥ जज्ञेथतस्येश्वरयोगमूर्तेः प्रध्यायमानस्य सुरेंद्रसंघः ॥
वेदाश्च यज्ञाश्च तथैव वर्णावृतं च सर्वौषधयो रसश्च ॥ ४९ ॥ जगत्समस्तं मनसा बभूव यत् स्थावरं किंचिदिहांडजं वा॥ जरायुजं
स्वेदजमुद्भिज्जं च यत्किंचिदाकीटपीपीलकाद्यम् ॥५०॥ ततो विजज्ञे मनसा क्षणेन अनेकरूपं जगदप्रमाणम्॥ सृष्ट्वा जगन्मूर्तिधरो-
व्ययात्मा आनंदरूपः प्रभुरुग्रतेजाः ॥५१॥कृत्वात्वशेषं किललीलयैव स देवदेवो जगतां विधाता॥ सर्वत्रदृक् सर्वग एव देवो ज-
गाम चादर्शनमादिकर्ता ॥ यत्वन्मूहूर्तादिह मामरूपं तावत्प्रपश्यामि जगत्तथैव ॥ ५२ ॥ द्वीपैः समुद्रैरभिसंवृतं हि नक्षत्रताराादि-
विमानकीर्णम् ॥ वियत्पयोदग्रहचक्रचित्रं नानाविधैः प्राणिगणैर्वृतं च ॥ ५३ ॥ तां वै न पश्यामि महानुभावां गोरुपिणीं सर्वसु-
रेशराज्ञीं॥क्व सांप्रतं सेति विचिंत्य राजन् विभ्रांतचित्तस्त्वभवं तदैव॥५४॥दिशो विभागानवलोकयानो ऋतेपुनस्तां कथमीश्वरांगीम्॥
पश्यामि तामत्र त एव तावन्महाभ्रनीलां शुचिशुभ्रतोयाम् ॥ ५५ ॥ वृक्षैरनेकैरुपशोभितांगीं गजैस्तुरंगैर्विहगैर्वृतां च ॥ यथा पुरा
तीरमुपेत्य देव्याः समास्थितश्चाप्यमरंकटे तु ॥५६॥ तथैव पश्यामिसुखोपविष्टआत्मानमव्ययमवाप्तसौख्यम् ॥ तथैव पुण्यामलतो-
यवाहां दृष्ट्वा पुनः कल्पपरीक्षयेपि ॥ ५७ ॥ अंबामिवार्यामनुकंपमानां वीक्ष्याहमासे सततं विशोकः ॥ ५८ ॥ एवं महत्पुण्य-
तमं च कल्पं पठंति शृण्वंति च ये द्विजेंद्राः ॥ महावराहस्य महेश्वरस्य दिनेदिने ते विमला भवंति ॥ ५९ ॥ अशुभशतसहस्रं ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधूय प्रपन्नास्त्रिदिवममरजुष्टं सिद्धगंधर्वयुक्तं ॥ विमलशशिनिभांगाः सेव्यमानाप्सरोभिः शकलितकलिपापा रुद्रलोकं प्रयाति
॥ ६० ॥ इति श्रीनर्मदामाहात्म्ये वाराहकल्पे विंशतितमोऽध्यायः ॥ २० ॥ युधिष्ठिरउ० ॥ श्रुता मे विविधा धर्माः संहारास्त्वत्प्र-
सादतः ॥ कृता देवेन सर्वेण ये च दृष्टा स्त्वयानघ ॥ १ ॥ सांप्रतं श्रोतुमिच्छामि प्रभावं शार्ङ्गधन्वनः ॥ त्वयानुभूतं विप्रेंद्र तन्मे
त्वंवक्तुमर्हसि ॥२॥ श्रीमार्कंडेय उ० ॥ अतः परं प्रवक्ष्यामि प्रजासंहारलक्षणम् ॥ यच्चिन्हं दृश्यते तत्र यदाकल्पोवसीयते ॥३॥ उल्का
पाताः सनिर्घाताः भूमिकंपस्तथैव च ॥ पतते पांशुवर्षं च निर्घोषश्चैव दारुणः ॥ ४ ॥ यक्षाकिन्नरगंधर्वाः निशाचोरगराक्षसाः ॥ स
र्वे ते प्रलयं यांति युगांते समुपास्थिते ॥ ५॥ पर्वताः सागरा नद्यः सरांसि विविधानि च ॥ वृक्षाः शोषं समायांति सद्यो वल्यस्तृणा
नि च ॥ ६ ॥ एवं हि व्याकुलीभूते सर्वौषधिजलोज्झिते ॥ काष्टभूते तु संजाते त्रैलोक्ये सचराचरे ॥ ७ ॥ यावत्पश्यामि मध्याह्ने
स्नानकाले उपस्थिते ॥ त्रैलोक्यं ज्वलनाकारं दुर्निरीक्षं दुरासदम् ॥ ८ ॥ द्वौसूर्यौ पूर्वतस्तात पश्चिमादुत्तरस्तथौ ॥ तथैव दक्षिणे
द्वौ च सूर्यौ दृष्टौ प्रतापिनौ ॥ ९ ॥ द्वौ सूर्यौ नागलोकस्थौ मध्ये द्वौ गगनस्य च ॥ इत्येते द्वादशादित्यास्तपंते सर्वतो दिशम् ॥
॥ १० ॥ पृथिवीमदहन्सर्वां सशैलवनकाननाम् ॥ नादग्धं दृश्यते किंचित् ऋते रेवां च मां तथा ॥ ११ ॥ पृथिव्यांदह्यमानायां
हविर्गंधश्च जायते ॥ ततो मे शुष्यते गात्रं तृषाप्येवं सुदारुणम् ॥ १२ ॥ दृश्यते नहि पानीयं शोषितं स दिवाकरैः ॥ यावत्क
मंडलुं वीक्षे शुष्कं तत्रापि तज्जलम् ॥१३॥ ततोहं शोकसंतप्तो विशेषात् क्षुत्तृषार्द्दितः ॥ उत्पपात क्षितेरुर्ध्वं पश्यमानो दिवं प्रति
॥ १४ ॥ तावत्पश्यामि गगने गृहं शृंगारभूषितम् ॥ ततस्तज्ज्ञातुकामोहं प्रस्थितो राजसत्तम ॥१५॥ प्राकारेण विचित्रेण कपाटा-
र्गलभूषितं ॥ विचित्राशिखरोपेतं नानारत्नसमन्वितं ॥१६॥ तत्र मध्ये परां शय्यां पश्यामि नृपसत्तम ॥ शय्यामध्यगतं कांतं पुरु
षं दिव्यमूर्धजं ॥ १८ ॥ विकुंचिताग्रकेशांतं समस्तं योजनायतम् ॥ मुकुटेन विचित्रेण दीप्तिकांतिन शोभितम् ॥ १९ ॥ श्यामं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कमलपत्राभं सुप्रभं च सुनासिकम् ॥ सुमुखं माननभुजं गल्लश्मश्रुवरांकितम् ॥२०॥ त्रिवलीभंगसुभगं कर्णकुंडलभूषितम् ॥ वि
शालाभं सुपीनांगं पार्श्वस्वावर्तमंडितम् ॥ २१ ॥ शोभितं कटिभागेन विभक्तं जानुजंघयोः ॥ पद्मांकिततलं देवमाताम्रसुनखस्तन
म् ॥ २२ ॥ मेघनादसुगंभीरं सर्वावयवसुंदरं ॥ शय्यामध्यगतं देवमपश्यं पुरुषोत्तमम् ॥ २३ ॥ शंखचक्रगदापाणिं शयनं द-
क्षिणेनतु ॥ अक्षसूत्रोद्यतकरं सूर्यायुतसमप्रभम् ॥ २४ ॥ तं दृष्ट्वा भक्तिमान् देवं स्तोतुकामो व्यवस्थितः ॥ जयाजये वा-
गीश जय दिव्यांगभूषण ॥ १५ ॥ जय देवपते श्रीमन् साक्षाद्ब्रह्म सनातनम्ः ॥ तव लोकाः शरीरस्थास्त्वं गतिः परमेश्वरः
॥ २६ ॥ त्वदाधारा हि देवेश सर्वे लोका व्यवस्थिताः ॥ त्वं श्रेष्ठः सर्वसत्त्वानां त्वं कर्ता धरणीधरः ॥ २७ ॥ त्वं होतॄणां प्रभु-
स्तत्त्वं सूत्रमंत्रस्त्वमेव च ॥ गोकर्णतीर्थभद्रं च त्वं च माहेश्वरं पदम् ॥ २८ ॥ त्वं नैमिषं कुरुक्षेत्रं त्वं च विष्णुपदं परम् ॥
त्वया तु लीलया देव पदाक्रांता च मेदिनी ॥ २९ ॥ त्वया बद्धो बालिर्देव त्वयेंद्रस्य पदं कृतं ॥ त्वं कलिर्द्वापरं देव त्रेताकृतयुगं
तथा ॥३०॥ प्रलंबदमनश्च त्वं च स्रष्टा त्वं विनाशकृत् ॥ त्वयावैधार्यते लोकास्त्वं कालः सर्वसंक्षयः ॥३१॥ त्वया हि देवसृष्टा-
स्ताः सर्वावै देवयोनयः ॥ त्व पंथाः सर्वलोकाना त्वं च मोक्षः परा गतिः ॥३२ ॥ ब्रह्मा त्वदुद्भवो देव त्वं च सत्य मयोह्यसि ॥
एतच्चाराचरं देव क्रीडनार्थं त्वया कृतं ॥ ३३ ॥ एवं संतप्तदेहेन स्तुतो देवो मया प्रभुः ॥ भक्त्या परमया राजन् सर्वभूतपतिः
प्रभुः ॥ ३४ ॥ स्तुवन् वै तत्र पश्यामि वारिपूर्णास्ततो घटायन् ॥ ततो मया विस्मृता या तृषा सा वर्द्धिता पुनः॥ ३५ ॥ उपा-
सर्पततस्तस्य पार्श्वेवै पुरुषस्य हि ॥ नेक्षते जल्पते किंचिद्वामस्कंधे मृगाजिनी ॥३६॥ जटी कमंडलुधरो दंडी मेखलयावृतः॥ भ-
स्मोन्मृदितसर्वांगो महातेजास्त्रिलोचनः ॥ ३७ ॥ यावत्तंस्तोतुकामोहमपश्यंस्वच्छचक्षुषा ॥तावत्सर्वांगसंभूत्या महत्या रूपसंपदा
॥ ३८ ॥अपश्यं संवृतां नारीं सर्वाभरणभूषितां ॥ दृष्ट्वा तां पतितो भूतौ जयस्वेति ब्रुवंस्ततः ॥ ३९ ॥ जयरुद्रांगसंभूते जय ब्रा-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्मी सनातनि ॥ जयवैष्णवि माहेंद्रि जय कौमारि वारुणी ॥ ४० ॥ जय कौबेरि सावित्रि जय धात्रि वरानने ॥ तृष्णया तप्त-
देहं मां परिपाहि महेश्वरि ॥ ४१ ॥ श्रीदेव्युवाच ॥ प्रसन्ना विप्रवर्याद्य तववाक्यैः सुशोभनैः ॥ यत्ते मनसि संजातं मयाज्ञातं
तदुत्तम ॥ ४२ ॥ शृणु त्वं विप्रवर्याद्य वृत्तमेकं सुदारुणम् स्त्रीलघुत्वासमारब्ध दुष्करं मूढभावतः ॥४३ ॥ यदि मे जायते पुत्रो-
धर्मिष्ठो लोकविश्रुतः ॥ ब्राह्मणस्य स्तनं दत्वा पश्चाद्दास्यामि बालकम् ॥४४॥ समे पुत्रः समुत्पन्नो पथोक्तो महामुने ॥ स्त-
नं पिबस्व विप्रेंद्र यदिजीवितुमिच्छसि ॥ ४५ ॥ श्रीमार्कंडेय उ०॥ अकार्यमेत द्विप्राणां स्तनं पिबति योद्विजः ॥ पुनः संस्कारमा-
प्नोति पातित्यं चैव गच्छति ॥ ४६ ॥ ब्राह्मणत्वं त्रिलोकेस्मिन् दुर्लभं पद्मलोचने ॥ संस्कारैः संस्कृतो विप्रो जायते यैश्चतत्शृणु
॥ ४७ ॥ प्रथमं देवि नारीषु संस्कारैर्बीजपावनं ॥ बीजप्रक्षपणेदिव्यो बिजक्षेपः समुच्यते ॥ ४८॥ तथैव च महाभोग गर्भाधानं
द्वितीयकम् ॥ पुंसवनं तृतीयं तु सीमंतं तु चतुर्थकम् ॥ ४९॥ पंचमं जातकर्माख्यं नाम तत्षष्ठमुच्यते ॥ निःक्रामः सप्तमश्चैव म-
न्नप्राशनमष्टमम् ॥ ५० ॥ नवमं चौलिकर्णं च दशमं मौंजिबंधन ॥ इष्टिकं दार्विकं चैव सैामिकं व्रातिकं तथा ॥ ५१ ॥ पत्नीसं-
योजनं चान्यद्दिनकर्म ततः परम् ॥ मानुष्यं पितृकर्माख्यं दशमाष्टासु शोभनम् ॥५२॥ भूतं भव्यं तथेष्टं च पार्वणं च ततः परम्
॥ एवमष्टाचत्वारिंशत्संस्कारैः संस्कृतो द्विजः ॥ ५३ ॥ एवं ज्ञात्वा महाभागे नैव मां पातुमर्हसि ॥ शिशुपेयं स्तनं भद्रे कथ वै
मद्विधः पिबेत् ॥ ५४ ॥ ममैतद्वचनं श्रुत्वा देवीवाक्यमथाब्रवीत् ॥ यदि स्तन्यं न पिबसि योयं बालो मरिष्यति ॥ ५५ ॥
भवित्री तव हत्यास्य महाभागवतः पुनः ॥ जन्मानि च शतान्यष्टौ क्लिश्यते भ्रूणहत्यया ॥ ५६ ॥ वराहो दशजन्मानि तदंते
जायते कृमिः ॥ ततश्चारोहिणीं प्राप्य गोगजाश्वनृजन्मभाक् ॥ ५७ ॥ श्रूयते स्मृतिशास्त्रेषु वेदेषु च परंतप ॥ सर्वपापाधीका
पापा बालहत्या द्विजोत्तम ॥ ५८ ॥ बालहत्यायुतो विप्रः पच्यते नरके ध्रुवम् ॥ वर्षाणि तु शतान्यष्टौ प्राप्नोति यमयातना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. म् ॥ ५९ ॥ तस्मादल्पतरो दोषः पिबतोमे स्तनं तव ॥ तथैवापिबतः पापं जायते बहुवाजर्षिकम् ॥ ६० ॥ क्षुधातृषाविराम- अ. २२
२२ स्ते पुण्यं च पिबतः स्तनम् ॥ अतो न चेतः संदिग्धं कर्तव्यमिह कर्हिचित् ॥ ६१ ॥ एहि विप्र यथाकामं बालार्थे पिब मे
स्तनम् ॥ एवमुक्तस्तया देव्या निर्विकल्पेन चेतसा ॥ ६२ ॥ समुत्तीर्य ततस्तस्मादंके पातुं समुद्यतः ॥ नच तृप्तिं विजानामि
पिबंस्तस्याः स्तनं नृप ॥ ६३ ॥ बहुवर्षसहस्राणि पिबन्नेव स्तनं नृप ॥ तस्यांकात्पतितो भूमौ निद्राव्याकुललोचनः
॥ ६४ ॥ निद्राविगतमोहोहं यावत्पश्यामि भारत ॥ तावत्सुप्तं न पश्यामि पुरुषं बालकंचन ॥ ६५ ॥ नच पश्यामि तानकुं
भांश्चतुरः परिपूरितान् ॥ नच्च पश्यामि तां देवीं गताः सर्वेपि कुत्रचित् ॥ ६६ ॥ एवं विस्मययुक्तस्य चिंतयानस्यतिष्ठतः ॥
ईषद्धसितया वाचा देवी वचनमब्रवीत् ॥ ६७ ॥ श्रीदेव्युवाच ॥ कृष्णः स पुरुषः सुप्तो द्वितीयोप्यागतो हरः ॥ चत्वारो ये च
ते कुंभाः समुद्रास्ते द्विजोत्तम ॥ ६८ ॥ अहं च पृथिवी ज्ञेया सप्तद्वीपा सपर्वता ॥ जगतां त्वां परित्यज्य सत्वाधारा द्वि-
जोत्तम ॥ ६९ ॥ एवं ज्ञात्वा समं गच्छ स्वस्थो भव महामुने ॥ इत्युक्त्का मां तदा देवी तत्रैवांतरधीयत ॥ ७० ॥ श्रीमार्कंडेय
उ० ॥ एवं हि शेते भगवान्सत्त्वस्थः प्रलये सदा ॥ सत्त्वरूपो महादेवो यदाधारे जगत्स्थितम् ॥७१॥ विष्णोश्चरितमित्थिक्तं यत्त्व
या परिपृच्छितम् ॥ भूय एव महाबाहो किमन्यच्छ्रोतुमिच्छसि ॥ ७२ ॥ इतिश्रीरेवामहात्म्ये एकविंशतितमोध्यायः ॥ २१ ॥
युधिष्ठिर उ०॥ श्रुतमेतन्महाश्चर्यं त्वत्प्रसादाद्द्विजोत्तम ॥ भूयश्च श्रोतुमिच्छामि तन्मे कथय सुव्रत ॥१॥ कथमेषा नदी पुण्या कथं
सर्वसरिद्वरा॥ सर्वलोकेषु विख्याता महापापप्रणाशिनी ॥२॥ श्रीमार्कंडेय उ०॥ नर्मदा सरितां श्रेष्ठा सर्वपापविमोचनी ॥ तारये सर्व-
भूतानि स्थावराणि चराणि च ॥३॥ रेवायाः शृणु माहात्म्यं यत्पूर्वेण श्रुतं मया ॥ तत्तेहं संप्रवक्ष्यामि शृणुष्वेकमना नृप ॥४॥
गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वति ॥ ग्रामे वा यदि वारण्ये पुण्या सर्वत्र नर्मदा ॥ ५ ॥ त्रिभिः सारस्वतं तोयं सप्ताहेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु यामुनम् ॥ सद्यः पुनाति गांगेयं दर्शनादेव नार्मदम् ॥ ६ ॥ कलिंगदेशात्पश्चार्द्वे पर्वते ह्यमरंकटे ॥ पुण्या रेवा त्रिलोकेषु रमणीया पदेपदे ॥७॥ तत्र देवास्तु गंधर्वा ऋषयश्च तपोधनाः ॥ तपस्तप्त्वा महाराज सिद्धिं परमिकां गताः ॥ ८ ॥ तत्र स्नात्वा नरो राजन् नियमस्थो जितेंद्रियः ॥ उपोष्य रजनी मेकां कुलानां तारयेच्छतम् ॥ ९ ॥ सिद्धिक्षेत्रं परं तात पर्वतो ह्यमरंकटः ॥ सर्वदेवाश्रितो यस्माद्दषिभिः परिसेवितः ॥ १० ॥ सिद्धाविद्याधराभूतगंधर्वाः स्थानमुत्तमम् ॥ दृश्यादृश्याश्च राजेंद्र सेवंते सिद्धिकांक्षिणः ॥ ११ ॥ अहं च परमं स्थानं ततः प्रभृति संश्रितः ॥ अत्र प्रणवरुपो वै स्थाने तिष्ठत्युमापतिः ॥ १२ ॥ श्रीकंठः सगणः सर्वभूतसंघैर्निषेवितः ॥ अस्माद्गिरिवरान्नृप वक्ष्ये तीर्थस्य विस्तरम् ॥ १३ ॥ यानि संतीह तीर्थानि पुण्यानि नृपसत्तम ॥ यानि यानीह तीर्थानि नर्मदायास्तटद्वये ॥ १४ ॥ न तेषां विस्तरं वक्तुं शक्तो ब्रह्मापि भूपते ॥ योजनानां शतं साग्रं श्रूयते सरिदुत्तमा ॥ १५ ॥ विस्तरेण तु राजेंद्र अर्धयोजनमायता ॥ षष्टितीर्थसहस्राणि षष्टिकोटयस्तथैव च ॥ १६ ॥ पर्वतादुदधिं यावदुभेकूले न संशयः ॥ १७ ॥ सप्तषष्टि सहस्राणि सप्तषष्टिशतानि च ॥ सप्तषष्टिस्तथा कोट्यो वायुस्तीर्थानि चाब्रवीत् ॥ १८ ॥ परं कृतयुगे तानियांत्यप्रत्यक्षतां नृप ॥ पश्यंति मानवाः सर्वे सततं धर्मबुद्धयः ॥ १९ ॥ यथायथा कलिर्घोरो वर्तते दारुणो नृप ॥ तथातथाल्पतां यांति हीनसत्वा यतो नराः ॥ २० ॥ जालेश्वरादितीर्थानि पर्वतेस्मिन् नराधिप ॥ पितृतृप्तिप्रदान्याहुः स्वर्गमोक्षप्रदानि च ॥ २१ ॥ श्रेष्ठं दारुवनं तत्र चरुकासंगमः शुभः ॥ उत्तरे नर्मदायास्तु चरुकेश्वरमुत्तमम् ॥ २२ ॥ दारुकेश्वरतीर्थं च व्यतीपातेश्वरं तथा ॥ पातालेश्वरतीर्थं च कोटियज्ञं तथैव च ॥ २३ ॥ इति चैवोत्तरे कूले रेवाया नृपसत्तम ॥ अमरेश्वरपार्श्वे च लिंगान्यष्टोत्तरं शतम् ॥ २४ ॥ वरुणेश्वरमुख्यानि सर्वपापहराणि च ॥ २५ ॥ मांधातृपुरपार्श्वे च सिद्धेश्वरयमेश्वरौ ॥ ॐकारात्पूर्वभागे च केदारं तीर्थमुत्तमम् ॥२६॥ तत्समीपे महाराज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्वर्गद्वार मघापहम् ॥ नाम्ना ब्रह्मेश्वरं पुण्यं सप्तसारस्वतं पुरः ॥ २७ ॥ रुद्राष्टकं च सावित्रं सोमतीर्थं तथैव च ॥ एतानि दक्षिणे तीरे
रेवाया भरतर्षभ ॥२८॥ अस्मिंस्तु पर्वते तात रुद्राणांकोटयः स्थिताः ॥ स्नानैस्तुष्टिर्भवेत्तेषां गंधमाल्यानुलेपनैः ॥२९॥ प्रीतास्तेपि भ-
वंत्यत्र रुद्रा राजन्न संशयः ॥ जपेन पाप संशुद्धिर्ध्यानेनानंतमश्नुते ॥ ३० ॥ दानेन भोगानाप्नोति इत्येवं शंकरोब्रवीत् ॥ पर्वतात्प
श्चिमे देशे स्वयं देवो महेश्वरः ॥ स्थितः प्रणवरुपोसौ जगदादिः सनातनः ॥ ३१ ॥ तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी
जितेंद्रियः ॥ पितृकार्थं प्रकुर्वीत विधिदृष्टेन कर्मणा ॥ ३२ ॥ तिलोदकेन यस्तत्र तर्पयेत्पितृदेवताः ॥ आहूतसंप्लवं-
सोपि स्वर्गं गच्छति पांडव ॥ ३३ ॥ आत्मना सह भोगांश्च विविधान् लभते सुखी ॥ षष्टिवर्षसहस्त्राणि क्रीडते
सुरपूजितं ॥ ३४ ॥ मोदते सुचिरं कालं पितृपूजाफलैधितः ॥ ततः स्वर्गात्परिभ्रष्टो जायते विपुले कुले ॥ ३५ ॥
धनवान्दानशीलश्च निरुजो लोकपूजितः ॥ पुनः स्मरति तत्तीर्थं गमनं कुरुते पुनः ॥३६॥ तथैव ब्रह्मचर्येण सोपवासो जितेंद्रि-
यः ॥ सर्वहिंसानिवृत्तस्तु लभते फलमुत्तमम् ॥ ३७ ॥ एवं धर्मसमाचारो यस्तु तीर्थं व्रजेद्द्विज ॥ तस्य पुण्यफलं याद्दि तन्निबोध
नराधिप ॥ ३८ ॥ शतं वर्षसहस्त्राणि स्वर्गे मोदति पांडव ॥ अप्सरोगणसंकीर्णे दिव्यशब्दानुनादिते ॥ ३९ ॥ दिव्यागंधानुलिप्तां-
गो दिव्यालंकारभूषितः ॥ क्रीडते दैवतैः सार्द्धं सिद्धगंधर्वसंस्तुतः ॥ ४० ॥ ततः स्वर्गात्परिभ्रष्टो राजा भवति वीर्यवान् ॥ ह-
स्त्यश्वरथसंपन्नो दीर्घायुर्धर्मशास्त्रवान् ॥ ४१ ॥ गृहे स्तंभशताकीर्णे सुवर्णरजतान्विते ॥ सप्तभौमीकसुद्वारे दासीदाससमन्वि-
ते ॥ ४२ ॥ मत्तमातंगनिश्वासैर्वाजिहेषितनादितैः ॥ शोभते तस्य तद्द्वारमिंद्रस्य भुवनं यथा ॥ ४३ ॥ राजराजेश्वरः श्रीमान् सर्व-
स्त्रीजनवल्लभः ॥ तस्मिन् गृहे वसेन्मर्त्यो महाभोगसमन्वितः ॥ ४४ ॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ॥ एवं तेषां भ-
 वेत्सर्वं ये मृता ह्यमरेश्वरे ॥ ४५ ॥ अग्निप्रवेशं यः कुर्याद्भक्त्या वै ह्यमरंकटे ॥ स मृतः स्वर्गमाप्नोति याति चैव परां गतिम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४६ ॥ स्नानं दानं जपो होमः शुभं वा यदि वा शुभम् ॥ पुराणे श्रूयते राजन् सर्वं कोटिगुणं भवेत् ॥ ४७ ॥ तस्यास्तिरेऽपि ये वृक्षाः पातिताः कालपर्यये ॥ नर्मदा तोयसंस्पृष्टास्तेषामप्युत्तमागतिः ॥ ४८ ॥ दानं चैं विधिवद्दत्तंय थाशक्त्या द्विजोत्तमे ॥ इश्वरानुग्रहात्सर्वं तत्र कोटिगुणं भवेत् ॥ ४९ ॥ यस्मादनक्षरं रूपं प्रणवस्येह भारत ॥ शिवस्वरूपस्य ततः कृतमात्राक्षरं भवेत् ॥ ५० ॥ तीर्थे च पशवश्चैव वृक्षगुल्मलतादयः ॥ ते यत्र देहप्रांते तु स्वर्गं याति न संशयः ॥ ५१ ॥ विशल्या तत्र या प्रोक्ता सुपवित्रा महानदी ॥ स्नात्वा दत्त्वा यथान्यायं तत्रापि सुकृती भवेत् ॥५२॥ तत्र देवगणाः सर्वे सकिन्नरमहोरगाः॥ यक्षराक्षसगंधर्वा ऋषयश्च तपोधनाः ॥ ५३ ॥ सर्वे समागतास्तां वै पश्यंति ह्यमरेश्वरे ॥ पुरा युद्धे महाघोरे सर्वलोकभयंकरे ॥ ५४ ॥ नर्मदायाः सुतस्तत्र शल्योभूद्दशकल्पकः॥ सर्वदेवैश्च ऋषिभिः विशल्या तेन सा स्मृता ॥५५॥ युधिष्ठिर उ० ॥ उत्पन्ना तु कथं तात विशल्या कपिला कथम् ॥ कथं वा नर्मदापुत्रः शल्ययुक्तोभवन्मुने ॥ आश्चर्यभूतं लोकस्य श्रोतुमिच्छामि तत्त्वतः ॥ ५६ ॥ श्रीमार्कंडेय० ॥ पुरा दाक्षायणी नाम सहिता शूलपाणिना ॥ क्रीडते नर्मदातोये परमानंदसंयुता ॥ ५७ ॥ जलादुत्तीर्य सहसा वस्त्रमन्यत्समाहरत् ॥ देव्यातत्स्नानवस्त्रं तु पीडितं लीलया नृप ॥ ५८ ॥ सह चानुचरीभिश्च इंद्रायुधनिभं शुभम् ॥ तस्मिन्निःपीडयमाने तु वारि तत् प्रस्रुतं तथा ॥५९॥ तस्मादियं सरिज्जज्ञे कपिलाख्या महानदी ॥ संयोगादंगरागस्य वस्त्राघंकपिलं जलम् ॥ गलितं तेन कपिला वर्णतो नामतोऽभवत् ॥ ६० ॥ तथा गंधरसैर्युक्तं नानापुष्पैस्तु वासितम् ॥ नानावर्णारुणं शुभ्रं वस्त्राद्यद्वारि निःसृतम् ॥ ६१ ॥ पवित्रं कपिलं यस्मात् पुराणार्थविशारदैः ॥ एषा या वस्त्रासंभूता नर्मदा तोयसंभवा ॥ ६२ ॥ महापुण्यतमा ज्ञेया कपिला सरिदुत्तमा ॥ ६३ ॥ इति श्रीनर्मदा माहात्म्ये कपिलापूर्वसंभवो नाम द्वाविंशोध्यायः ॥२२॥ श्रीमार्कंडेय उवाच ॥ अतः परं प्रवक्ष्यामि द्विशल्यायाः समुद्भवम् ॥ आश्चर्यभूतं लोकस्य सर्वपापप्रणाशनम् ॥१॥ ब्रह्मणो मानसः पुत्रा मु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तज्ज्ञा रेवाजलं नात्र विचार्यमस्ति ॥ ५ ॥ अनेकविद्याधरकिंन्नरौघैरध्यासितं पुण्यतमाधिवासैः ॥ रेवाजलं धारयतो हि मू-
र्ध्नो स्थानं सुरेंद्राधिपतेः समीपे ॥ ६ ॥ नर्मदा सर्वथा सेव्या बहुनोक्तेन किं नृप ॥ यदिच्छन्न पुनर्द्रष्टुं घोरं संसारसागरम् ॥ ७ ॥ अ. २४
रे. खं. त्रयाणामपि लोकानां पावनी परमेश्वरी ॥ यत्रतत्र मृतस्यापि ध्रुवं गाणेश्वरी गतिः ॥ ८ ॥ अनेकयज्ञायतनैर्वृतांग्या नद्याः परं किं-
२४ चिदिहास्ति तीर्थम् ॥ अस्यास्तु तीरे भवतापयुक्तास्तपस्विनो वाप्यतपस्विनो वा ॥ ९ ॥ मर्त्याश्चि ये पापकृतो म्रियंते ते स्वर्ग- २५
२५ मायांति यथा नरेंद्राः ॥ १० ॥ एवं सरित्सा कपिला विशल्या च नृपोत्तम ॥ इश्वरेण पुरा सृष्टा लोकानां हितकाम्यया ॥११॥ २६
२६ तत्र स्नात्वा नरो राजन् सोपवासो जितेंद्रियः ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयः ॥ १२ ॥ अनाशिकं तु यः कुर्यात्तस्मिं
स्तीर्थे नराधिप ॥ सर्वपापविनिर्मुक्तः स याति परमं पदम् ॥ १३ ॥ पृथिव्यां सर्वतीर्थेषु स्नानदानेन यत्फलम् ॥ विशल्यासंगमे
स्नात्वा सकृत्तत्फलमश्नुते ॥ १४ ॥ एवं पुण्योविशल्यायाः संगमः परिकीर्तितः ॥ भूयोन्यत्पृच्छसे यच्च सर्वं ते कथयाम्यहम् ॥१५॥
इति श्रीनर्मदामाहात्म्ये विशल्यासंगमो नाम चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीमार्कंडेय उवाच ॥ संगमः करनर्मदयोः पुरो मांधा-
तृसंज्ञिते ॥ गत्वा स्नात्वा तर्पयित्वा पितॄन् विष्णुपुरं नयेत् ॥ १ ॥ मर्दयित्वा करौ पूर्वं विष्णुर्दैत्यजिघांसया ॥ चक्रं जग्राह त-
त्रैव स्वेदाज्जाता सरिद्वरा ॥ २ ॥ संगता रेवया तत्र स्नात्वा पापैः प्रमुच्यते ॥ ३ ॥ इति नर्मदासंगमो नाम पंचविंशोध्यायः
॥ २५ ॥ श्रीमार्कंडेय उवाच ॥ ॐकारात्पूर्वभागे वै संगमो लोकविश्रुतः ॥ रेवया संगता यत्र नीलगंगा नृपोत्तम ॥ १ ॥
तत्र स्नात्वा जपित्वा च कोर्थः शोच्यो भवेद्भुवि ॥ षष्टिवर्षसहस्राणि नीलकंठपुरे वसेत् ॥ २ ॥ तर्पयित्वा पितॄन् श्राद्धे तिलमि-
श्रैर्जलैरपि ॥ उद्धरेदात्मनासार्द्धं पुरुषानेकविंशतिम् ॥ ३ ॥ इति नीलगंगासंगमो नाम षड्विंशोध्यायः ॥ २६ ॥ युधिष्ठिर
उवाच ॥ ज्वालेश्वरेति यत्प्रोक्तं त्वया पूर्वं द्विजोत्तम ॥ तत्कथं नु भवेत्पुण्यंऋषिसंगनिषेवितम् ॥ १ ॥ मार्कंडेय उवाच ॥ ज्वा-
२९

CC-0. In Public Domain. Digitization by eGangotri

लेश्वरसमं तीर्थं न भूतं न भविष्यति ॥ तस्योत्पत्तिं कथयतः शृणु त्वं पांडुनंदन ॥ २ ॥ पुरा ऋषिगणा सर्वे सेंद्राश्चैव मरुद्गणाः॥
अतप्यंतासुरैः सर्वैः क्षयं नीता ह्यनेकशः ॥ ३ ॥ बाणासुरप्रभृतिभिर्जंभशुंभपुरोगमैः ॥ वध्यमाना भयोद्विग्ना ब्रह्माणं शरणं गताः
॥ ४ ॥ विमानैः पर्वताकारैर्हयैश्च वनगोपमैः ॥ स्यंदनैर्गगनाकारैः सिंहशार्दूलयोजितैः ॥ ५ ॥ कच्छपैर्मकरैश्चान्ये जग्मुश्चैव पदा-
तयः ॥ प्राप्यैवं परमं स्थानमशक्यं यदधार्मिकैः ॥ ६ ॥ दृष्ट्वा पद्मोद्भवं देवं सर्वलोकस्य शंकरम् ॥ ते सर्वे तत्र गत्वा तु स्तुतिं
चक्रुः समाहिताः ॥ ७ ॥ देवा ऊचुः ॥ जयाजेय जयाभेद्यं जय शं भूतिकारक ॥ पद्मयोने सुरश्रेष्ठं त्वां वयं शरणं गताः ॥ ८ ॥
तत् श्रुत्वा वचनं शंभुर्देवानां भावितात्म नाम् ॥ मेघगंभीरया वाचा प्रत्युवाच पितामहः ॥ ९ ॥ किंवो ह्यागमनं जातं सर्वेषां च
विवर्ण्यताम् ॥ केनापमानिताः सर्वे शीघ्रं तत्कथ्यतां सुराः ॥ १० ॥ देवा ऊचुः ॥ बाणो नाम महावीर्यो दानवो बलदर्पितः
॥ तेनास्माकं हतं सर्वं धनरत्नैर्वियोजिताः ॥ ११ ॥ देवानां वचनं श्रुत्वा त्रिलोकपितामहः ॥ चिंतयामासदेवेश स्तद्विनाशा-
य भूपते ॥ १२ ॥ अवध्यो दानवः पापः सर्वेषां वो दिवौकसाम् ॥ मुक्त्वा तु शंकरं देवं सर्वलोकस्य शंकरम् ॥ १३ ॥ ते सर्वे तत्र
गच्छामो यत्र देवो महेश्वरः ॥ स गतिः सर्वदेवानां नान्यस्त्राता भविष्यति ॥ १४ ॥ एवमुक्त्वा सुरैः सार्द्धं ब्रह्मा लोकपितामहः
॥ ऋषिभिः सह सिद्धैश्च गतो यत्र महेश्वरः ॥ १५ ॥ स्तुतिभिश्च सुपुष्टाभिस्तुष्टाव परमेश्वरम् ॥ जयस्व देवदेवेश उमाविग्रहभू-
षित ॥ वृषांतविबुधाधार भूतेश फणिभूषण ॥ १६ ॥ नमोऽस्तुते गृहस्थाय नमः खट्वांगधारिणे ॥ जय भूत्यंगरागाय जय यज्ञवि-
नाशन ॥ १७ ॥ पंचाक्षर नमो देव पंचभूतात्मविग्रह ॥ पंचवक्त्रमयेशान वेदैस्त्वं तु प्रगीयसे ॥ १८ ॥ सृष्टिपालनसंहारांस्त्वं
सदा कुरुषे नमः ॥ अष्टमूर्ते स्मरहर स्मर सत्यं यथा स्तुतः ॥१९॥ एवं स्तुतो मुनिगणैर्ब्रह्माद्यैर्जगतः पतिः ॥ प्रहृष्टमानसो भूत्वा
सुरसंघमुवाच ह ॥ २० ॥ ईश्वर उवाच ॥ स्वागतं देवविप्राणां सुप्रभाताद्यशर्वरी ॥ किं कार्यं मे वदंत्वार्यास्तत्करोमीत्युवाच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं तान् ॥ २१ ॥ किं दुःख कस्य संतापः कुतो वो भयमागतम् ॥ कथयंतु महाभागाः कारणं यन्मनोगतम् ॥ २२ ॥ एवमुक्तास्तु
२३ रुद्रेण प्रत्यवोचन् सुरर्षभाः ॥ प्रदर्शयंतः स्वान् देहान् सुप्रभान्जर्जरीकृतान् ॥ २३ ॥ अस्ति घोरो महावीर्यो दानवो बलदर्पितः अ.२३
बाणो नामेति विख्यातो यस्य तत्त्रिपुरं महत् ॥२४॥ महत्तेन तपस्तप्तं दशवर्षयुतं पुरा ॥ तेन तुष्टोभवद्ब्रह्मा नियमेन यमेन च
॥ २५ ॥ पुराणि त्रीण्यभेद्यानि ददौ कामगमानि च ॥ आयतं राजतं शुभ्रं सौवर्णं तृतीयं तथा ॥ २६ ॥ त्रिपुरं ब्रह्मणा दत्तं
भ्रमत्तत्कामचारि च ॥ वरदानबलात्क्रूरा त्रिपुरे दानवा वसन् ॥ २७ ॥ त्रैलोक्यं सकलं देव धर्षयंति महाबलाः ॥ त्रिपुरं दा-
नवैर्जुष्टं भ्रमंस्तच्चक्रसन्निभम् ॥ २८ ॥ क्वचिद्दृश्यमदृश्यं च मृगतृष्णेव सत्तम ॥ यस्मिन् पतति तद्दिव्यं दुष्टस्य त्रिपुरं महत् ॥ न
तत्र ब्राह्मणा देवा गावो वै नैव जंतवः ॥ २९ ॥ नचान्यद्दृश्यते किंचित्पतद्यत्र पुरत्रयम् ॥ नद्यो ग्रामाश्च देशाश्च बहवो भस्म-
सात्कृताः ॥ ३० ॥ सुवर्णरजतं चैव मणिमौक्तिकमेव च ॥ स्त्रीरत्नं शोभनं यच्च तत्सर्वं कर्षते बलात् ॥ ३१ ॥ न शस्त्रेण न अ-
स्त्रेण न दिवा निशिवा हर ॥ शक्यते देवसंघातैर्विनिहंतुं कथंचन ॥ ३२ ॥ तद्दहस्व महादेव त्वं हि नः परमा गतिः ॥ एवं
प्रसादं गिरिश सर्वेषां दातुमर्हसि ॥ ३३ ॥ ईश्वर उवाच ॥ एतत्सर्वं करिष्यामि विषादस्त्यज्यतां सुराः ॥ अचिरेण विधा-
स्येहं सर्वयुष्मत्सुखावहम् ॥ ३४ ॥ आश्वासयित्वा तान्देवो देवानिंद्रपुरोगमान् ॥ चिंतयामास देवेशस्त्रिपुरस्य वधं प्रति॥ ३५ ॥
केन प्रकारेण मया हंतव्यं त्रिपुरं महत् ॥ तमेकं नारदं मुक्त्वा नान्योपायो भवेदिह ॥ ३६ ॥ एवं संसूच्य चात्मानं ततो ध्यातः
स नारदः ॥ तत्क्षणादेव संप्राप्तः पुरो ध्यातो महामुनिः ॥ ३७ ॥ कमंडलुधरो विप्रस्त्रिदंडी ज्ञानकोविद ॥ योगपादाक्षसूत्रेण
सर्वतः समलंकृतः ॥ ३८ ॥ जटाजूटावृतशिरा ज्वलनार्कसमप्रभः ॥ देवं प्रदक्षिणीकृत्य दंडवत्पतितो भुवि ॥ कृतांजलिपुटो
भूत्वा मुनिस्तोत्रमिदं जगौ ॥ ३९ ॥ नारद उवाच ॥ जय शंभो विरूपाक्ष जयदेव त्रिलोचन ॥ जय शंकरसर्वेश रुद्रेश्वर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमोऽस्तु ते ॥ ४० ॥ त्वं पतिस्त्वं जगत्कर्ता त्वमेव लयकृद्विभो ॥ त्वमेव जगतां नाथो दुष्टांतकनिषूदन ॥ ४१ ॥ त्वन्नः पाहि सुरेशान त्रयीमूर्ते सनातन ॥ भवमूर्ते भवारे त्वं भजतामभयो भव ॥ ४२ ॥ भवभावविनाशार्थं भव त्वां शरणं भजे ॥ ध्यातः किमर्थं वरद ह्याज्ञां किं करवाणि ते ॥ ४३ ॥ कस्य संक्षोभयेच्चित्तं कोद्य भूम्यां पतिष्यति कमद्य कलहेनाहं योजये जयतां वर ॥ ४४ ॥ नारदस्य वचः श्रुत्वा देवदेवो महेश्वरः ॥ उत्फुल्लनयनो भूत्वा इदं वचनमब्रवीत् ॥ ४५ ॥ स्वागतं ते मुनिश्रेष्ठ सदैककलहप्रिय ॥ वीणावदनतत्त्वज्ञ ब्रह्मपुत्र सनातन ॥४६ ॥ गच्छ नारद शीघ्रं त्वं यत्र तत्त्रिपुरं महत् ॥ बाणस्य दानवेंद्रस्य सर्वलोकभयावहम् ॥ ४७ ॥ बाणासुरस्य नगरं सर्वदेवभयंकरम् ॥ तत्तेजसा मुने नित्यं भ्रमते त्रिपुरं महत् ॥ ४८ ॥ न शक्यते तु तद्भेत्तुं सर्वोपायैर्द्विजोत्तम ॥ गत्वा तं मोहय क्षिप्रं पृथग्धर्मैरनेकशः ॥ ४९ ॥ नारद उवाच ॥ तव वाक्येन देवेश साधयामि पुरोत्तमम् ॥ दुर्भेद्यं बहुधोपायैः सिद्धैरपि सुरासुरैः ॥ ५० ॥ एवमुक्त्वा गतो विप्रः शतयोजनविस्तरम् ॥ बाणस्य तत्पुरं श्रेष्ठं शुद्धिवृद्धिसमन्वितम् ॥ ५१ ॥ कृतकौतुकसंबाधं नानाधातुविचित्रितं ॥ अनेक हर्म्यसंच्छन्नं नानारत्नसमन्वितम् ॥ ५२ ॥ द्वारतोरणसंयुक्तं कपाटार्गलभूषितम् ॥ बहुयंत्रसमोपेतं प्राकारपरिखोत्तमम् ॥ ५३ ॥ वापिकूपतडागादिदेवायतनमंडितम् ॥ हंसकारंडवाकीर्णं पद्मिनीखंडशोभनम् ॥ ५४ ॥ अनेकवनशोभाढ्यं नानाविहगमंडितम् ॥ एवंगुणसमाकीर्णं तद्बाणस्य पुरोत्तमम् ॥ ५५ ॥ तस्य मध्ये महाकायं सप्तकक्षं मनोहरम् ॥बाणस्य भुवनं दिव्यं मणिकांचनमंडितम् ॥ ५६ ॥ मत्तमातंगनिःश्वासैः स्यंदनैः सकलीकृतम् ॥ हयहेषितशब्दैश्च नारीणां नूपुरस्वनैः ॥ ५७ ॥ खड्गतोमरहस्तैश्च वज्रबाणधनुर्ग्रहैः ॥ रक्षितं घोररूपैश्च दानवैर्बलदर्पितैः ॥ ५८ ॥ एवंगुणसमाकीर्णं तद्बाणस्य गृहोत्तमं ॥ कैलासशिखरप्रख्यं महेंद्रभवनोपमम् ॥ ५९ ॥ जगाम नारदस्तत्र महेशादेशनोदितः ॥ द्वारदेशं यथासाद्य क्षत्तारं वाक्यमब्रवीत् ॥ ६० ॥ नारद उवाच ॥ भोभोक्षत्तर्महाबुद्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. राजकार्यविशारद ॥ बाणाय शीघ्रमाचक्ष्व नारदो द्वारि तिष्ठति ॥६१॥ स वंदयित्वा चरणौ नारदस्य त्वरान्वितः ॥ सभामध्ये- अ. २७
२७ गतं बाणं विज्ञप्तुमुपचक्रमे ॥६२॥ वेपमानांगयष्टिस्तु हस्तेन पिहिताननः ॥ शृण्वतां सर्वयोद्धॄणांनामिदमुत्सुकताश्रितं ॥ ६३ ॥
वंदितो देवगंधर्वैर्यक्षकिंपुरुषादिभिः॥ कलिप्रियो दुराराध्यो नारदो द्वारि तिष्ठति ॥ ६४ ॥ द्वारपालस्य तद्वाक्यं श्रुत्वा बाणस्त्वरा-
न्वितः ॥ द्वास्थमाह महादैत्यः सविस्मयमिदं तदा ॥ ६५ ॥ बाण उवाच ॥ ब्रह्मपुत्रं सतेजस्कं दुःसहं दुरतिक्रमम् ॥ प्रवेशय
मुनिं द्वास्थं किमर्थं वारितो बहिः ॥ ६६ ॥ ततस्तद्वचनात्पार्थ द्वारपालस्त्वरान्वितः ॥ गत्वा प्रवेशयामास नारदमृषिसत्तमम्
॥ ६७ ॥ दृष्ट्वा देवर्षिमायांतं नारदं सुरपूजितं ॥ सहसोत्थाय संहृष्टो ववंदे चरणौ मुनेः ॥ ६८ ॥ ददौ चासनमर्घं च पाद्यं
पूजां महासुरः ॥ न्यवेदयच्च तद्राज्यमात्मानं सह बांधवैः ॥ पप्रच्छ कुशलं चापि मुनिं बाणासुरः स्वयम् ॥ ६९ ॥ नारद उवाच ॥
साधुसाधु महाप्राज्ञ दनूनां वंशवर्द्धन ॥ कोन्योस्ति भुवने श्लाघ्यो मुक्त्वा त्वामसुरेश्वर॥७०॥पूजितोहं दनुश्रेष्ठ धनरत्नैः शुभासनैः॥
राज्येन चात्मना वापि एवं कः पूजयेत्परः॥७१॥न मे कार्यं हि भोगेन भुंक्ष्व राज्यमनामयम् ॥ त्वद्दर्शनोत्सुकः प्राप्तो दृष्ट्वा देवं महेश्वरम्
॥७२॥भ्रमते त्रिपुरं लोके स्त्री सतित्वात् मया श्रुतं तां द्रष्टुकामः संप्राप्तस्त्वद्दारान् दानवेश्वर ॥७३॥ नारदस्य वचः श्रुत्वा प्राह कंचु
किनं ततः ॥ उदीक्ष्य सत्वरं बाणः पुरः सविनयां स्थितं ॥ ७४ ॥ अंतःपुरचरं वृद्धं दंडपाणिमवस्थितं ॥ दर्शयस्व महादेवीं नारद-
स्य महामुनेः ॥ ७५ ॥ अन्यच्चांतःपुरं रम्यं समंतादविशंकितः ॥ कंचुकी तद्वचः श्रुत्वा गृहीत्वा नारदं ततः ॥७६॥ प्रवेशं कथयामा-
स देव्यास्तं नारदंमुनिं ॥ दृष्ट्वा देवी मुनिश्रेष्ठं कृत्वा पादाभिवंदनं ॥ ७७ ॥ आसनं कांचनं शुभ्रं पाद्यमर्घादिकं ददौ ॥ तस्याः
स भगवांस्तुष्टो ददावाशीर्यथोचिताः ॥७८॥नान्या देवि त्रिलोकेपि दृश्यते त्वत्समांगना ॥ पतिव्रता शुभाचारा सत्यशौचसमन्विता
॥ ७९ ॥ यस्याः प्रभावात्त्रिपुरं भ्रमते स्खलनोज्झितं ॥ तस्य तद्वचनं श्रुत्वा नारदस्य मुदान्विता ॥ पर्यपृच्छत् ऋषिं भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्म धर्म भृतांवर ॥८०॥ राज्ञ्यु० ॥ भगवन् मानुषे लोके देवास्तुष्यंति केन वै ॥ कानि दानानि दानानि दीयंते कस्य दानस्य किंफलं ॥ ८१ ॥ उपवासाश्च ये केचित् स्त्रीणां प्रोक्ता बुधैर्मुने ॥ यैः कृतैः स्वर्गमायांति स्त्रियः सुकृतसंचयैः ॥ ८२ नारदउ० ॥ एतत्सर्वं महाभोग भव्यः प्रश्नस्त्वया कृतः ॥ यं श्रुत्वा सर्वनारीणां पुण्यवृद्धिः प्रजायते ॥८३॥ उपवासैश्च दानैश्च पीतपुत्रौ वशानुगौ बांधवैः पूज्यते नित्यं यै कृतैः कथयामितान ॥८४॥ दुर्भगा सुभगा या तु सुभगा दुर्भगाभवेत् ॥पुत्रिणीपुत्ररहिता अपुत्रा पुत्रिणी तथा ॥ ८२ ॥ भर्त्तारं लभते कन्या तथान्या भर्तृवर्जिता ॥ कृताकृतैस्तु जायंते तान्निबोधस्व सुंदरि ॥ ८६ ॥ तिलधेनु सुवर्णंच रौप्यं गा वाससी तथा । पानीयं भूमिदानं च तथा गंधानुलेपनं ॥८७॥ पादुकोपानहौ छत्रं पुण्यानि व्यजनानि च ॥ पादाभ्यंगं शिरोभ्यंगं स्नानं शय्यासनानि च ॥८८॥ एतान् ये वै प्रयच्छंति नोपसर्पंति ते मयं ॥ मधु मासं पयः सर्पिर्लवणं गुडमौषधं ॥८९॥ कौसभं राजनिष्पावाः शाल्यः श्वैक्षवो रसः ॥ आरक्तवाससी श्लक्ष्णे दंपत्योर्लंछितादिने ॥ ९० ॥ परत्रहे च सैाभाग्यं वांछमाना ददाति या ॥ ब्राह्मणे वृत्तसंपन्ने गुणरूपसमन्विते ॥ ९१ ॥ तिथौ यस्यामिदं देयं राज्ञितत्कथायाम्यहम् ॥ ९२ ॥ प्रतिपत्सु च या नारी पूर्वाह्णे च शुचिव्रता ॥ इंधनं ब्राह्मणे दद्यात्प्रीयतां मे हुताशनः ॥ ९३ ॥ तस्माज्जन्मान्यनेकानि अंगप्रत्यंगसंधिषु ॥ न रुजो नच संतापो जायते राजवल्लभे ॥ ९४ ॥ द्वितीयायां तु या नारी नवनीतं मुदान्विता ॥ ददाति द्विजमुख्याय सुकुमारतनुर्भवेत् ॥ ९५ ॥ लवणं विप्रवर्याय तृतीयायां प्रयच्छति ॥ गौरी मे प्रीयतां देवी तस्याः फलमिदं शृणु ॥९६॥ कौमारिका पतिं प्राप्य तेन सार्द्धमुमां यथा॥ क्रीडत्यविधवा राज्ञि विबाधा च यशास्विनी ॥ ९७॥ नक्तं कृत्वा चतुर्थ्यां च दद्याद्विप्राय मोदकान् ॥ प्रियतां मम देवेशो गणनाथो विनायकः ॥ ९८ ॥ तस्यास्तेन फलेनाशु सर्वसिद्धिः प्रजायते ॥ विघ्नं न जायतें कापि प्राहुरेवं मनीषिणः ॥ ९९ ॥ पंचम्यां सुव्रता प्राप ब्रह्मणे तिलदा तु या ॥ साभवेद्रूपसंपन्ना यथा चैव तिलोत्तमा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०० ॥ षष्ठ्यां तु या मधूकानि फलानि च ददेद् द्विजे ॥ उद्दिश्य चाग्निजं देवं नियमेन समन्विता ॥ १०१ ॥ तस्याः पुत्रो
भवेत् स्कंदसमः सर्वत्र सत्तमः ॥ उत्पद्यते महाराशिः सर्वलोकप्रपूजितः ॥ १०२ ॥ सप्तम्यां वा द्विजश्रेष्ठान् सुवर्णेनानुपूजयेत्॥
उद्दिश्य जगतो नाथं देवदेवं दिवाकरम् ॥ १०३ ॥ तस्य पुण्यफलं वृद्धिःकथितं द्विजसत्तमैः ॥ तत्तेहं संप्रवक्ष्यामि शृणु चैकाग्र-
मानसा ॥ १०४ ॥ दद्रुश्वित्रककुष्ठानि मंडलानि विचर्चिका ॥ न भवंति महादेवि पूर्वकर्मार्जितान्यपि ॥ १०५ ॥ कृष्णां धेनुं
तथाष्टम्यां या प्रयच्छति भामिनी ॥ ब्राह्मणे वृत्तसंपन्ने प्रीयतां मे महेश्वरः ॥ १०६ ॥ तस्य जन्मांतिकंपापं नश्यते विभवान्वि-
ता ॥ जायते नाम संदेहो यस्माद्दानमनुत्तमं ॥१०७॥ गंध धूपं च या नारी भक्त्या विप्रे प्रयच्छति ॥ कात्यायनीं समुद्दिश्य न-
वम्यां शृणु बत्फलम् ॥ १०८ ॥ तस्याः भ्राता पिता पुत्रः पतिर्वा ऋणमुत्तमम् ॥ ते संप्राप्य न सीदंति तेन दानेन रक्षिताः ॥
१०९ ॥ इक्षुदंडरसं देवी दशम्यां प्रयच्छति ॥ लोकपालान् समुद्दिश्य ब्राह्मणे व्यंगवर्जिते ॥ ११० ॥ तेन दानेन सा नित्यं सर्व-
लोकस्य वल्लभा ॥ जायते नात्र संदेह इत्येवं शंकरोब्रवीत् ॥१११ ॥ एकादश्यामुपोष्याथ द्वादश्यामुदकप्रदा ॥ नारायणं समु-
द्दिश्य ब्राह्मणे विष्णुतत्परे ॥ ११२ ॥ सा सदादर्शसंभाषैर्द्रावयेद्द्रावयेज्जनम् ॥ यस्माद्दानं महर्लोके अनंतमुदके भवेत् ॥११३॥
पादाभ्यंगं शिरोभ्यंगं काममुद्दिश्य वै द्विजे ॥ ददते च त्रयोदश्यां भक्त्या परमयांगना ॥११४॥ यस्यां यस्यां मृता जायेद्भूयो न्वां
तु जन्मनि ॥ तस्यांतस्यां तु सा भर्तुर्न वियुज्येत कर्हिचित् ॥ ११५ ॥ तथाप्येवं चतुर्दश्यां दद्यात्पात्र उपानहौ ॥ ब्राह्मणे धर्म-
मुद्दिश्य तस्या लोका ह्यनामयाः ॥ ११६ ॥ एवं तु पक्षपक्षांते श्राद्धे तर्पेद्द्विजोत्तमान् ॥ अव्युच्छिन्ना सदा राज्ञि संततिर्जायते
भुवि ॥ ११७ ॥ एवं ते तिथिमाहात्म्यं दानयोगे न भाषितम् ॥ तथा वनस्पतीनां तु आराधनविधिं शृणु ॥ ११८ ॥ जंबूनिंब-
तरुश्चैव तिंदुकं मधुकं तथा ॥ आम्रं चामलकं चैव शाल्मलीवटपिप्पलौ ॥ ११९ ॥ शमी बिल्वाम्लिकं वृक्षं कदली पाटली तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यान् पुण्यतमान् वृक्षान् उपेत्य स्वर्गमाप्नुयात् ॥ १२० ॥ नारदउ० ॥ चैत्रे मासे च या नारी कुर्याद्व्रतमनुत्तमं ॥ तस्य व्रतस्य चान्यानि कलां नार्हंति षोडशीम् ॥ १२१ ॥ श्रुतेन येन सुभगे दुर्भगत्वं न पश्याति ॥ यथा हिमं रविं प्राप्य विलयं याति भूतले ॥ तथा दुःखं च दौर्भाग्यं व्रतादस्माद्विलीयते ॥ १२२ ॥ मधुकाख्यां तु ललितामाराधयति येन वै ॥ तं विधिं शृणु सुभगे कथ्यमानं शुभावहम् ॥ १२३ ॥ चैत्रे शुक्लतृतीयायां संस्नाता शुद्धमानसा ॥ प्रतिमां मधुवृक्षस्य शांकरीमुमया सह ॥ १२४ ॥ कारयित्वा द्विजवरान् प्रतिष्ठाप्य यथाविधि ॥ सुगंधकुसुमैर्धूपैस्तथा . कर्पूरकुंकुमैः ॥ १२५ ॥ पूजयेद्विधिना देवं मंत्रयुक्तेन भामिनि ॥ पादौ नमःशिवायेति मेढ्रे वै मन्मथा य च ॥ १२६ ॥ काल्लोदरायेत्युदरं नीलकंठाय कण्ठके ॥ शिरः सर्वात्मने पूज्यः उमां पश्चात्प्रपूजयेत् ॥ १२७ ॥ क्षामोदरायै ह्युदरं नीलकंठाय कंठके ॥ शिरः सौभाग्यदायिन्यै पश्चादूर्ध्वं प्रदापयेत् ॥ १२८ ॥ नमस्ते देवदेवेश उमासहजगत्पते ॥ अर्घेणानेन मे सर्वं दौर्भाग्यदुःखहा भव ॥ १२९ ॥ अर्घमंत्रः ॥ अर्घंदत्वा ततः पश्चात् करकं वारिपूरितम् ॥ मधूकपात्रोपभृतं सहिरण्यं स्वशक्तितः ॥ १३० ॥ करकं वारिसंपूर्णं सौभाग्येन तु संयुतं ॥ दत्तं तु ललिते तुभ्यं सौभाग्यादिविवर्धनम् ॥ १३१ ॥ करकदानमंत्रः ॥ मंत्रेणानेन विप्राय दद्यात्करकमुत्तमम् ॥ लवणं वर्जयेच्छुक्लांभ्लांयावदन्यां तृतीयकां ॥ १३२ ॥ क्षमाप्य देवतां नक्तमश्नीयाच्च स्वयं हविः ॥ अनेन विधिना सार्द्धं मासिमासि ह्युपक्रमेत् ॥ १३३ ॥ फाल्गुनस्य तृतीयायां शुक्लायां तु समाप्यते ॥ वैशाखे लवणं देयं ज्येष्ठे माषाः प्रदीयते ॥ १३४ ॥ आषाढे मासि निष्पावान् पयो देयं तु श्रावणे ॥ मुद्गा देया नभस्ये तु शालिमाश्वयुजे तथा ॥ १३५ ॥ कार्तिके शर्करापात्रं करकं रससंभृतम् ॥ मार्गशीर्षे तु कार्पासं करकं घृतसंयुतम् ॥ १३६ ॥ पौषे तु कुंकुमं देयं माघमासेतिलैर्घृतम् ॥ फाल्गुने मासि संप्राप्ते पात्रं मोदकसंभृतम् ॥ १३७ ॥ पश्चात्तृतीयादेयं यत्पूर्वस्यां विवर्जयेत् ॥ विधानमासां सर्वासां सामान्यं मनसः प्रिये ॥ १३८ ॥ प्रतिमां मधुवृक्षस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तामेव प्रतिपूजयेत् ॥ तस्मै सर्वं तु विप्राय आचार्याय प्रदीयते ॥१३९॥ ततः संवत्सरस्यांते उद्यापनविधिं शृणु ॥ मधुवृक्ष ततो
गत्वा बहुसंभारसंभृता ॥१४०॥ निषमेत्प्रतिमां मध्ये माधुकीं मधुकस्य च ॥ ततः संपूजयेत्पूर्वं उमादेहार्द्धधारिणम् ॥१४१॥ पूजो-
पहारैर्विपुलैः कुंकुमेन पुनःपुनः॥ श्लक्ष्णाभिः पुष्पमालाभिः कौसुंभं केसराणि च ॥१४२॥कौसुंभे वाससी श्लक्ष्णे अतसीपुष्पसन्नि-
भे ॥ परिधाप्य तथैवार्चां दंपतीद्वादशाय च ॥ १४३ ॥ उपानद्युगुलैश्छत्रैः कंठसूत्रैः सकंठकैः ॥ कटकैरंगुलीयैश्च शयनीयैः शु-
भास्तृणैः ॥ १४४ ॥ कुंकुमेन विलीप्तांगौ बहुपुष्पैश्च पूजितौ ॥भोजयेद्विविधैरन्नैर्मधुकस्यालये स्थितौ ॥ १४५ ॥ भुक्तोत्थितौ
तु विश्राम्य शय्यासु च क्षमापयेत् ॥ गुरुमूलं यतः सर्वं गुरुर्ज्ञेयो महेश्वरः ॥ १४६ ॥ प्रीते गुरौ ततः सर्वं जगत्प्रीतं सुरासुरम् ॥
यद्यादिष्टतमं लोके यत्किंचिद्दयितं गृहे ॥ १४७ ॥ तत्सर्वं गुरवे देयमात्मनः श्रेय इच्छता ॥ इदं तु धनिभिर्देयमन्यैर्देयमथोच्यते
॥ १४८ ॥ दंपत्यमेकं विधिवत् प्रतिपूज्य शुभव्रतैः ॥ द्वितीयं गुरुदंपत्यं वित्तशाठ्यं विवर्जयेत् ॥ १४९ ॥ ततः क्षमापयेद्देवीं देवं
च ब्राह्मणं गुरुम् ॥ यथा त्वं देवि ललिते न वियुक्तासि शंभुना ॥ १५० ॥ तथा मे पतिपुत्राणां अवियोगं प्रदीयताम् ॥ अनेन
विधिना कृत्वा तृतीयां मधुसंज्ञकाम् ॥ १५१ ॥ इंद्राणी इंद्रपत्नीत्वमवाप शुभमुत्तमम् ॥ सौभाग्यं त्रिषु लोकेषु सर्वर्द्धिसुखमु-
त्तमम् ॥ १५२ ॥ अनेन विधिना या तु कुमारी व्रतमाचरेत् ॥ शोभनं पतिमाप्नोति यथेंद्राण्या शतक्रतुः ॥ १५३ ॥ दुर्भगा सुभ-
गत्वं च सुभगा पुत्रिणी भवेत् ॥ पुत्रिण्यक्षरमाप्नोति न शोकं पश्यति क्वचित् ॥ १५४ ॥ अनेकजन्मजनितं दौर्भाग्यं नश्यते ध्रुवं
॥ मृता तु त्रिदिवं प्राप्य उमया सह मोदते ॥ १५५ ॥ कल्पकोटिशतं साग्रं भुक्त्वा भोगान् यथेप्सितान् ॥ पुनस्तु सा भवे-
ल्लोके पार्थिवं पतिमाप्नुयात् ॥ १५६ ॥ एतत्ते कथितं सर्वं व्रतानामुत्तमं व्रतम् ॥ अन्यत् पृच्छस्व सुभगे वांछितं यद्धृदि स्थि- ३३
तम् ॥ १५७ ॥ इति श्रीनर्मदामाहात्म्येमधूकतृतीयानामसप्तविंशोध्यायः ॥ २७ ॥ मार्कंडेय उवाच ॥ नारदस्य वचः

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वा राज्ञी वचनमब्रवीत् ॥ प्रसादं कुरु विप्रेंद्र गृह्ण दानं यथेप्सितम् ॥ १ ॥ सुवर्णं मणिरत्नानि वस्त्राणि विविधानि च ॥ तत्ते दास्यामि विप्रेंद्र यच्चान्यदपि दुर्लभम् ॥ २ ॥ राज्ञ्यास्तु वचनं श्रुत्वा नारदो वाक्यमब्रवीत् ॥ अन्येषां दीयते भद्रे ये द्विजाः क्षीणवृत्तयः ॥ ३ ॥ वयं तु सर्वसंपन्ना भक्तिग्राह्याः सदैव हि ॥ आहूय ब्राह्मणान्निःस्वान्दत्त्वा त्वमुपचक्रमे ॥ ४ ॥ यत्किंचिन्नारदेनोक्तं दानं सौभाग्यवर्द्धनम् ॥ तत्तद्दानं तया दत्तं ब्राह्मणेभ्यः पृथक्पृथक् ॥ ५ ॥ दानेनानेन मे नित्यं प्रीयतां हरिशंकरौ ॥ राज्ञ्युवाच ॥ दानं दत्तं त्वयोक्तं यद्भर्तृकर्मपरं हि तत् ॥ करिष्यामो महाभाग आदेशं देहि मे प्रभो ॥ ६ ॥ आजन्मजन्मं मे भर्ता भवेद्बाणो द्विजोत्तम ॥ तेन सत्येन मे भर्ता जीवेच्च शरदां शतम् ॥७॥ नान्यो धर्मो भवेत् स्त्रीणां यथापतिर्हि दैवतम् ॥ तथापि तव वाक्येन दानं दत्तं यथाविधि ॥८॥ स्वकं कर्म करिष्यामो भर्त्तारं प्रति मानद ॥ ब्रह्मर्षे गच्छ चेदानीमाशीर्वादः प्रदीयताम् ॥ ९ ॥ तथेति तामनुज्ञाप्य नारदो नृपसत्तम ॥ सर्वासां मानसंहृत्वा अन्यतः कृतमानसः ॥ १० ॥ जगामादर्शनं विप्रः पूज्यमानश्च खेचरैः ॥ ततो गतमनाः सर्वाः भर्तारं प्रतिभारत ॥ विवर्णा निःप्रभा जाता नारदेन विमोहिताः ॥ ११ ॥ इतिश्रीनर्मदामहात्म्ये त्रिपुरक्षोभणंनाम अष्टाविंशतिमोऽध्यायः ॥२८॥ श्रीमार्कंडेय उवाच ॥ एतस्मिन्नंतरे रुद्रो नर्मदातीरमाश्रितः ॥ क्रीडते उमयासार्द्धं संप्राप्तस्तत्र नारदः ॥ १ ॥ प्रणम्य पार्वतीनाथं देव्यायुक्तं महेश्वरम् ॥ विज्ञापयत्तदा देवं यद्वृत्तं त्रिपुरे नृप ॥ २ ॥ गतोहं भवतादेशात् यत्र तद्बाणमंदिरं ॥ दृष्ट्वा बाणं तु तद्वाक्यात् गतोंतःपुरमुत्तमम् ॥३॥ तस्य भार्या सहस्राणि दृष्ट्वा बाणासुरस्य हि ॥ यथायोगं यथाकालमागतः क्षोभ्य तत्पुरम् ॥४॥ नारदस्य वचः श्रुत्वा प्रशाम्य मुनिपुंगवम् ॥ चिंतयामास देवेशो भ्रमाणं त्रिपुरस्य हि ॥ ५ ॥ करमुक्तं यथाचक्रं विष्णुना प्रभविष्णुना ॥ भ्रमते त्रिपुरं तद्वद्रक्षितं मम तेजसा ॥ ६ ॥ सच मे भक्तिनिरतो बाणस्त्रैलोक्यविश्रुतः ॥ प्रतिपन्नं च देवानां त्रिपुरस्य वधं प्रति ॥ ७ ॥ एवं स सुचिरं कालं देवदेवो महेश्वरः ॥ चिंतयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तु निर्वाणं कार्यं प्रति जनेश्वरः ॥ ८ ॥ ततोसौ मंदरं ध्यात्वा चापं कृत्वा स्वहिं गुणे ॥ विष्णुं सनातनं देवं बाणे ध्यात्वा त्रि-
लोचनः ॥ ९ ॥ मूले हुताशनं देवं ज्वलंतं सर्वतोमुखम् ॥ सुपर्णं पुंखदेशे च जवे वायुं प्रकल्प्य च ॥ १० ॥ रथं महीमयं
कृत्वा धुराभ्यामश्विनौकृतौ ॥ अक्षौ सुरेश्वरं देवमग्रकील्यां धनाधिपम् ॥ ११ ॥ यमं तु दक्षिणे पार्श्वे वामे कालं सुदारुणम् ॥
आदित्यचंद्रौ चक्रस्थौ गंधर्वा नारकादिषु ॥ १२ यंतारं च सुरज्येष्ठं वेदान् कृत्वा हयोत्तमान् ॥ खलिनादिषु चांगानि रश्मीन् छं-
दांसि चाकरोत् ॥ १३ ॥ कृत्वा प्रतोदमोंकारं मुखग्राह्यं महेश्वरः॥ धातारमग्रतः कृत्वा विधातारं च पृष्ठकम् ॥१४॥ मारुतान् स-
र्वतो दिक्षु ऊर्ध्वयंत्रे तथैव च ॥ महोरगपिशाचांश्च सिद्धविद्याधरांस्तथा ॥ १५ ॥ गणाश्च शतशस्तत्र सर्वांगे संधिबंधने ॥ सत्यं
रथध्वजे कृत्वा शौचं रक्षां समंततः ॥ १६ ॥ रथं देवमयं कृत्वा देवदेवो महेश्वरः ॥ सन्नद्धः कवची खड्गी बद्धगोधांगुलित्रवान्
॥ १७ ॥ बध्द्वा परिकरं गाढं जटाजूटं नियम्यच ॥ सज्जं कृत्वा धनुर्दिव्यं योजयित्वा रथोत्तमम् ॥ १८ ॥ रथमध्यस्थितो देवः
शुशुभे स युधिष्ठिर ॥ धनुषस्तु निनादेन प्रचकंपे जगत्रयं ॥१९॥ स्थानं कृत्वा तु वैशाखं निभृतं संस्थितो हरः ॥ निरीक्ष्य सुचिरं
कालं कोपसंरक्तलोचनः ॥२०॥ ध्यात्वा तं परमं मंत्रं स्वनिरोधाज्जगद्गुरुः ॥ मुमुक्षुः सहसा बाणं त्रिपुरस्यवधेप्सया ॥ २१॥ यदा
त्रीणि समेतानि अंतरिक्षस्थितानि वै ॥ त्रिपर्वणा त्रिशल्येन ततस्तान्यवसादयत् ॥ २२ ॥ ततः काल निमेषार्द्धं दृष्ट्वैक्यं त्रिपुर-
स्य तु ॥ त्रिपर्वणं त्रिशल्यं च शरं तत्र नियोजयेत् ॥ २३ ॥ यतो लोका भवत्रस्ता बभूवुः प्रलये यथा ॥ बभूवुश्च तथोत्पाता आ-
सन् सक्षयकारकाः ॥ २४ ॥ सर्वासुरविनाशाय कालरूपाः सुदारुणाः ॥ अट्टहासं प्रमुंचंति नराः कष्टमयास्तदा ॥ २५ ॥ चि-
त्ररूपाणि कुर्वंति निमेषोन्मेषणं तथा ॥ निष्पंदनयना मर्त्या चित्रेष्वालिखिता यथा ॥ २६ ॥ देवायतनगा देवा रुदंति च हसंति
च ॥ स्वप्ने पश्यंति चात्मानं तैलाभ्यक्तं समस्तकं ॥ २७ ॥ पश्यंति यानमारूढं युक्तमुष्ट्रैश्च रासभैः ॥ संवर्तको महावायुर्युगां-

CC-0. In Public Domain. Digitization by eGangotri

तप्रतिमो बली ॥ २८ ॥ गृहनुन्मूलयामास वृक्षजातीननेकशः ॥ भूमिकंपः सनिर्घात उल्कापातास्तथैव च ॥ २९ ॥ रुधिरं व
र्षंति घनः शर्करामिश्रितं बहु ॥ अग्निकुंडे तु विप्राणां हुतः सम्यक् हुताशनः ॥ ३० ॥ ज्वलते धूमसंयुक्तो विस्फुलिंगकणैः सह ॥
कुंजरा विमदा जातास्तुरंगाः सत्ववर्जिताः ॥ ३१ ॥ अवादितानि वाद्यंते वादित्राणि सहस्रशः ॥ ध्वजा अकंपिताः पेतु श्छत्राणि
च सहस्रशः ॥ ३२ ॥ ज्वलंति पादपास्तत्र पर्णानि च समंततः ॥ सर्वं हि व्याकुलीभूतं हाहाकारसमन्वितम् ॥ ३३ ॥ उद्याना-
नि विचित्राणि बभंजाशु प्रभंजनः ॥ तेन संप्रेषिताः सर्वे ज्वलयंति हुताशनाः ॥ ३४ ॥ वृक्षगुल्मलतावल्लीगृहाणि च समंततः ॥
दिग्भागेष्वपि सर्वेषु प्रवृत्तो हव्यवाहनः ॥ ३५ ॥ सर्वं किंशुकवर्णाभं प्रज्वलत्संप्रदश्यते ॥ गृहद्गुहं तदागंतुं नैव धूमेन शक्यते
॥ ३६ ॥ हरकोपाग्निनिर्दग्धाः क्रंदंति त्रिपुरे जनः ॥ प्रदीप्तं सर्वतो दिक्षु दह्यमानं पुरत्रयम् ॥ ३७ ॥ पतंति शिखराग्राणि वि-
स्तीर्णानि सहस्रशः ॥ पावको धूमसंवृत्तो दहमानः समंततः ॥ ३८ ॥ देवागारेषु सर्वेषु ग्रहेष्वट्टालकेषु च ॥ प्रवृत्तो हुतभुक् तत्र
त्रिपुरे हरनोदितः ॥ ३९ ॥ ददाह त्रैपुरं लोकं बालवृद्धसमन्वितं ॥ कश्चिद्भोजनसंसक्तो पानासक्तस्तथा परः ॥ ४० ॥ अपरा
गीतनृत्येषु संसक्ता वरयोषितः ॥ अन्योन्यं च परिष्वज्य हुताशनशिखार्दिताः ॥ ४१ ॥ दह्यमाना इतश्चेतो धावंते विह्वला नृप ॥
तथा न्ये दानवास्तत्र दह्यंत्यग्निविमोहिताः ॥ ४२ ॥ अशक्ताश्चान्यतो गंतुं धूमेनाकुलिताननाः ॥ हंसकारंडवाकीर्णा नलिन्यो
हेमपंकजाः ॥ ४३ ॥ दह्यंते विविधास्तत्र वापिकूपाश्च भारत ॥ दृश्यंते ऽनलदग्धानि पुरोधानानि दीर्घिकाः ॥ ४४ ॥ अम्लान-
पंकजैश्छन्ना विस्तीर्णा वसुयोजनाः ॥ गिरिकूटनिभास्तत्र प्रासादा रत्नशोभिताः ॥ ४५ ॥ दृश्यंते तेन निर्दग्धा विशीर्णा ध-
रणीतले ॥ नरस्त्रीबालवृद्धेषु दह्यमानेषु सर्वतः ॥ ४६ ॥ निर्दयं ज्वलते वह्निर्हाहाकार मभूत्तदा ॥ काचित्सुप्ता विशालाक्षी
हारावलिविभूषिता ॥ ४७ ॥ धूमेनाकुलिता दीना निपतद्धव्यवाहने ॥ ४८ ॥ काचित्तास्मिन् पुरे दीप्ते पुत्रस्नेहाकुला तु सा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. पुत्रमालिंग्यते गाढं दह्यते त्रैपुराग्निना ॥ ४९ ॥ काचित्कनकवर्णाभा इंद्रनीलनिभं शुभं ॥ भर्तारं पतितं दृष्ट्वा तस्योपरि पपातह
२९ ॥ ५० ॥ काचिदादित्यवर्णाभा प्रसुप्ता तु प्रियोपरि ॥ अग्निज्वालाहता कंठं गाढमालिंगते नृप ॥ ५१ ॥ मेघवर्णा परा नारी अ.२९
चलत्कनकमेखला ॥ श्वेतवस्त्रोत्तरीया तु पतिता धरणीतले ॥ ५२ ॥ काचित्कुंदेंदुवर्णाभा नीलरत्नविभूषिता ॥ सिरस्यंजलि-
मादाय संप्रार्थयति पावकं ॥ ५३ ॥ कस्याश्चिज्ज्वलते वस्त्रं केशाः कस्यापि भारत ॥ ज्वलन् ज्वलनसंकाशैर्हैमभांडैस्त्रसंति च
॥ ५४ ॥ काचित्प्रभूतदुःखार्ता विललाप वरांगना ॥ भस्मीभूतं पतिं दृष्ट्वा क्रंदती कुररी यथा ॥ ५५ ॥ मातरं पतितां काचित्
दृष्ट्वा विगलचेतना ॥ वेपते पतिता भूमौ खेदिता वडवा यथा ॥ ५६ ॥ इतश्चेतश्च काचिच्च दह्यमाना प्रधाविता ॥ अपश्यद्बा-
लकं दग्धं विललाप च दुःखिता ॥ ५७ ॥ कुंभिलस्य गृहं दग्धं पतितं धरणीतले ॥ कूष्मांडस्य च धूम्रस्य कुहकस्य बकस्य च
॥ ५८ ॥ विरूपनयनस्यापि विक्रूरस्य बकस्य च ॥ शुभडिंभबलांतानां रौद्रप्रल्हादयोस्तथा ॥ ५९ ॥ दंडपाणेरपाणेश्च सिंहवक्त्रस्य
मारुतेः ॥ ढुंढोश्चैव च हिंगोश्च डिंडिमुंडयोस्तथैव च ॥ ६० ॥ बाणभ्रातुश्च बाणस्य क्रव्यादव्याघ्रवक्त्रयोः ॥ एवमन्येपि ये
तत्र दानवा बलदर्पिताः ॥ ६१ ॥ तेषां गृहेषु रौद्राग्निर्ज्वलते निर्दयो नृप ॥ दह्यमाना स्त्रियस्तत्र विलपंति गृहेगृहे
॥ ६२ ॥ करुणाक्षरवादिन्यः पावकं प्रतिदुखिताः ॥ यदि वैरं सुघोरं हि पुरुषोपरि पावक ॥ ६३ ॥ स्त्रियः किमपराध्यंते
गृहपंजरकोकिलाः ॥ ६४ ॥ निर्दयत्वं नृशंसश्च कः कोपस्ते स्त्रियंप्रति ॥ किं त्वया न श्रुतं लोके न वध्याः सर्वथा
स्त्रियः ॥ ६५ ॥ न कारुण्यं दया काचिद्दाक्षिण्यं वा स्त्रियं प्रति ॥ दयां म्लेच्छोपि कुरुते वदनं वीक्ष्य योषितां ॥ ६६ ॥
म्लेच्छानामपि म्लेच्छस्त्वं दुर्निवार्यो ह्यचेतनः ॥ एवं विलपमानानां श्रुत्वा स्त्रीणां वचः शुभं ॥ ६७ ॥ करालज्वालबहुलो ज्वलंत्येव
हुताशनः ॥ एवं तज्ज्वलमानं तु दृष्ट्वा बाणासुरोब्रवीत् ॥ ६८ ॥ अवज्ञाय विनष्टोहं पापात्महरमंजसा ॥ मया पापेन मूर्खेण ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वौ लोकौ नाशितौ ध्रुवं ॥ ६९ ॥ गोब्राह्मणा स्त्रियो बाला शतशोथ सहस्रशः ॥ नाशितान्यन्नपानानि मठारामाश्रमास्तथा ॥ ७० ॥ ऋषीणामाश्रमाश्चैव देवागारा गणालयाः ॥ तेन पापेन मे ध्वंसस्तपसश्च बलस्य च ॥७१॥ किं धनेन करिष्यामि राज्येर्णांतःपुरेण किं ॥ वरं शंकरपादाब्जं शरणं यामि मूढधीः ॥७२॥ न माता न पिता बंधुर्न भ्राता नापरे जनाः ॥ मुक्त्वा देवं महेशानं परमार्तिहरं परं ॥७३॥ आत्मना यत्कृतं पापमात्मना किल भुज्यते ॥ अहं पुनः समस्तैश्च दह्यामि सहसाधुभिः ॥ ७४ ॥ एवमुक्त्वा शिवं लिंगं कृत्वा तन्मस्तकोपरि ॥ निर्जगाम गृहात् शीघ्रं पावकेनावगुंठितः ॥ ७५ ॥ खिन्नप्रस्विन्नगात्रस्तु प्रस्खवलन् स पदेपदे ॥ ततो गद्गदया वाचा प्रास्तौ च्छंकरमव्ययम् ॥७६॥ त्वत्कोपवह्निभिर्दग्धो यदि वध्योस्मि शंकर ॥ त्वत्प्रसादान्महादेव मा ते लिंगं प्रणश्यतु ॥ ७७ ॥ अर्चितं तु सुरश्रेष्ठ ध्यातं भक्त्या मया सदा ॥ प्राणादिष्टतमं तत्र रक्षां त्वं कर्तुमर्हसि ॥ ७८ ॥ यदि ते हमनुग्राह्यो वध्यो वा सुरसत्तम ॥ प्रतिजन्म महादेव त्वद्भक्तिरचलास्तु मे ॥ ७९ ॥ एवमुक्त्वा महाभागो बाणो भक्तिमतां वरः ॥ स्तोत्रेणानेन देवेशं स्तोतुं समुपचक्रमे ॥ ८० ॥ बाण उवाच ॥ शिव शंकर पापहराय नमो भवभीतिभयार्तिहराय नमः ॥ कुसमायुधनिर्दहनाय नमो गिरिजार्द्धवपुर्वहनाय नमः ॥ ८१ ॥ जयजय त्रिपुरांतक जयांधकनाशन जयजय पार्वतीश जयपरमार्थप्रकाशन ॥ जयजय विरचितभीमभुजंगहार जयजय सर्वत्रिबुधैकशृंगार ॥ ८२ ॥ जयजय उज्वलभस्मविलिप्तगात्र जयमंत्रमूल जगदेकपात्र ॥ जयविषधर कर्बूरजटाकलाप जयवैरिजयोद्यतपिनाकचाप॥ ८३ ॥ जय विषमनयन परिमुक्तसंग जयमौलिविधृतगंगातरंग ॥ जय भीमरूप खट्वांगहस्त जय शशिशेखर जगतांप्रशस्त ॥ ८४ ॥ जय सुरवरेश सर्वसुकृतसार जयसर्वज्ञ परैरदृष्टपार ॥ जयविश्वनाथांगीकृतविषकवलैकभार जयसंत्रस्तलोकशरणशृंगार ॥ ८५ ॥ जयकीर्तनीयचरित्र जगतांपवित्र जयवृषध्वज विविधविषमचरित्र ॥ जयसंसारतरून्मूलनतरलनेत्र जयजयबाणराज्यलक्ष्मीलतापवित्र ॥ ८६ ॥ जयविरचितविधृतब्रह्मकपालमालजयां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धकदेहनाशनकरालकाल ॥ जयजय जठरांतविधृतविश्वविशाल जयसंवर्तकवन्हितिलकांतनिजैकभाल ॥ ८७ ॥ जयशितिकंठ जर
ठवृषभगमन जयशरणागतदुरितानुशमन ॥ जयसिद्धसुरासुरविनतचरण जय रुद्र रौद्रभवजलधितरण ॥ ८८ ॥ जयगिरिश सुरे
शादिमाननीय जयसूक्ष्मरूपयोगिनां चिंतनीय ॥ जयदग्धपुरत्रय सर्वसत्त्व जसकयलशास्त्रपरमार्थतत्व ॥ ८९ ॥ जयरजोगुणाश्रित
ब्रह्मरूपधरसृजनकर्मकर ॥ जयसत्त्वगुणाश्रित विष्णुरूपधर परिपालनकर्मकर ॥ जयतमोगुणाश्रित रुद्रमूर्ते विश्वसंहरणकर्मकर ॥ ९० ॥
त्वमेव जगतां धाता त्वमेव परिपालकः ॥ संहारकस्त्वमेवासि त्रयीमूर्ते नमोस्तुते ॥ ९१ त्वं विष्णुस्त्वं जगन्नाथ ब्रह्मरूपः सनातनः ॥ दि
कपाला लोकपालाश्च सुरनाथ नमोस्तुते ॥ ९२ ॥ त्वं क्षितिः पवनस्त्वं हि वरुणस्त्वं हुताशनः ॥ त्वं दीक्षा यजमानश्च आकाशं
सोम एव च ॥ ९३ ॥ मोक्षस्त्वं सूर्यरूपोसि वित्तेशस्त्वं यमस्तथा ॥ ९४ ॥ इति बाणकृतं स्तोत्रं समाकर्ण्य महेश्वरः ॥ मुक्त-
कोपप्रशांतात्मा बाणं वीक्ष्याब्रवीद्विभुः ॥ ९५ ॥ ईश्वर उवाच ॥ न भेतव्यं नभेतव्यमद्यप्रभृति दानव ॥ सौवर्णभवने तिष्ठ मम-
पार्श्वेथवापुनः ॥ ९६ ॥ पुत्रापौत्रैः प्रपौत्रैश्च बांधवैः सहभार्यया ॥ अद्यप्रभृति वत्स त्वमवध्यः सर्वशत्रुषु ॥ ९७ ॥ मार्कंडेय
उवाच ॥ भूयस्तस्य वरो दत्तो देवदेवेन भारत ॥ स्वर्गे मर्त्ये च पाताले पूजितः ससुरासुरैः ॥ ९८ ॥ अक्षयैश्चाव्ययश्चैव वि-
चरस्व यथासुखं ॥ ततो निवारयामास रुद्रः सप्तार्चिषं तदा ॥ ९९ ॥ तृतीयं रक्षितं तस्य पुरं देवेन शंभुना ॥ एकं तु पतितं
तत्र श्रीशैले खंडमुत्तमम् ॥ १०० ॥ द्वितीय पतितं राजन् शैले ह्यमरकंटके ॥ ज्वालाकृत्पतितं तत्र तेन ज्वालेश्वरः स्मृतः
॥ १०१ ॥ हाहाकारो महांस्तत्र ऋषिसंघैरुदीरितः ॥ दग्धेपि त्रिपुरे राजन् पतितं खंडमुत्तमम् ॥ १०२ ॥ रुद्रो देवः स्थितस्तत्र
ज्वालामालानिवारकः ॥ हाहाकारपराणां तु ऋषीणां रक्षणाय च ॥ १०३ ॥ स्वयंमुर्ति महेशान उमावृषभसंयुतः ॥ मनसापि स्मरे-
द्यस्तु भक्त्या तं परमेश्वरम् ॥ चांद्रायणाधिकं पुण्यं लभते नात्र संशयः ॥ १०४ ॥ अतिपुण्यो गिरिश्रेष्ठः सर्वपापक्षयंकरः ॥ नाना-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रुमलताकीर्णो नानापुष्पोपशोभितः ॥ १०५ ॥ सिंहव्याघ्रोपसंयुक्तो मृगयूथैरलंकृतः ॥ घोरैश्च श्वापदारावैर्नित्यकालं विनादितः ॥ १०६ ॥ ब्रह्मेंद्रविष्णुप्रमुखैः देवैश्चैवासुरैस्तथा ॥ सेव्यते देवदेवेशः शंकरस्तत्र पर्वते ॥ १०८ ॥ पतनं कुरुते यस्तु तस्मिन्नमरकंटके ॥ क्रीडते क्रमशो राजन् भुवनानि चतुर्दश ॥ १०९ ॥ ब्राह्मं तु पदमाक्लिष्टं वैकुंठं तदनंतरं ॥ उमारुद्राश्रितं तात ऐश्वरं तदनंतरं ॥ ११० ॥ परं सदाशिवं शांतं सूक्ष्मं ज्योतिरतींद्रियं ॥ तस्मिन्याति लयं धीरो विधिना नात्र संशयः ॥ १११ ॥ युधिष्ठिर उवाच ॥ विधिःकोत्र विनिर्दिष्टः पतने ऋषिसत्तम ॥ एतद्धि सर्वमाचक्ष्वसंशयो मे महामुने ॥११२ ॥ श्रीमार्कंडेय उवाच ॥ शृणुष्व कथयिष्यामि तं विधिं पांडुनंदन ॥ यत्कृत्वा प्रथमं कर्म नियतं तु जनो नृप ॥११३ ॥ कृत्वा कृछ्रत्रमं पूर्वं जपलक्षं तथैव च ॥ शाकाहारी स्थितस्तत्र शुचिस्त्रिषवणो नरः ॥११४ त्रिकालमभ्यर्च्य शिवं सर्वपूज्यं त्रिलोचनं ॥ दशांशेन तु राजेंद्र होमं तत्रैव कारयेत् ॥ ११५ ॥ संपूज्य विधिवद्देवं गंधमाल्यानुलेपनैः ॥ अनेनैव विधानेन आत्मानं यस्तु निःक्षिपेत् ॥ ११६ ॥ स्वर्गलोकमनुप्राप्य क्रीडते दैवतैः सह॥११७॥त्रिंशद्वर्षसहस्राणि त्रिंशत्कोव्यस्तथैव च॥भुक्त्वा मनोरमान् भोगान् ततो याति महीतलं ॥ ११८ ॥ एकच्छत्रेण पृथिवीं सभुंक्ते लोकपूजितः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदांशतं ॥११९॥ ज्वालेश्वरं तु यत्तीर्थं त्रिषु लोकेषु विश्रुतं ॥ तत्र ज्वालानदी पार्थ प्रस्तुता शिवनिर्मिता ॥ १२० ॥ निर्वाप्य तद्बाणपुरं रेवया सह संगता ॥ तत्र स्नात्वा महाराज विधिना मंत्रसंयुतः ॥ १२१ ॥ तिलमिश्रेण तोयेन तर्पयेत्पितृदेवताः ॥ पिंडप्रदानं कृत्वा च सर्वतीर्थफलं लभेत् ॥ १२२ ॥ अनाशकं च यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥१२३॥ अमराणां शतैश्चैव सेवितो ह्यमरेश्वरः ॥ तथा महर्षिसंघैश्च तेन पुण्यतमो नृप ॥१२४॥ तस्य पर्वतराज्यस्य यः करोति प्रदक्षिणां ॥ प्रदक्षिणिकृतातेन- सर्वदेवा न संशयः ॥ १२५ ॥ वाचिकं मानसं चैव कायिकं त्रिविधं तु यत् ॥ नश्यते पातकं सर्वं शिवस्यैवं वचो यथा ॥ १२६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अमरेश्वरपार्श्वे च तीर्थं शक्रेश्वरं नृप ॥ तपस्तप्त्वा पुरा तत्र शक्रेण स्थापितं किल ॥ १२७ ॥ कुशावर्तं नाम तीर्थं ब्रह्मणा च कृ
तं शुभं ॥ ब्रह्मकुंडमिति ख्यातं हंसतीर्थं तथा परं ॥ १२८ ॥ अंबरीषस्य तीर्थं च महाकालेश्वरं तथा ॥ कावेर्याः पूर्वभागे च तीर्थं
वै मातृकेश्वरम् ॥ १२९ ॥ एतानि दक्षिणे तीरे रेवाया भरतर्षभ ॥ संसेवनस्नानदानैः पापसंघहराणि च ॥ १३० ॥ भृगुतुंगे म-
हाराज प्रसिद्धो भैरवः शिवः ॥ तस्य याम्यविभागे च तीर्थं वै चपलेश्वरं ॥ १३१ ॥ एतौ स्थितौ दुःखहरौ रेवायाउत्तरे तटे ॥ तावभ्यर्च्य तथा न
त्वा सम्यग्यात्राफलं भवेत् ॥ अदृष्टपूजितौ तौ हि नराणां विघ्नकारकौ ॥ १३२ ॥ इति श्रीवायुप्रोक्तं रुद्रसंहितायां श्रीरेवामहात्म्ये त्रिपुर
विध्वंसे ज्वालेश्वरतीर्थं नाम एकोनत्रिंशोध्यायः ॥ २९ ॥ ॥ युधिष्ठिरउ० ॥ या कावेरीति विख्याता त्रिषु लोकेषु सत्तम ॥ महा-
त्म्यं श्रोतुमिच्छामि तस्या मार्कंड तत्वतः ॥ १ ॥ कीदृशं दर्शनं तस्याः फलं स्नानेन किं फलं ॥ तत्र दाने जपे होमे उपवासे सु-
रार्चने ॥ २ ॥ कथयस्व मुने मह्यं कावेरीसंगमे फलं ॥ धर्मः कृतो वा दृष्टो वा कथितो वा श्रुतोपि वा ॥ ३ ॥ अनुमोदितो वा राजेंद्र पुनाती
ति श्रुतं मया ॥ यथा धर्मप्रसंगेन तथा धर्मोपि जायते ॥ स्वर्गश्च नरकश्चैवमित्येषा वैदिकी श्रुतिः ॥ ४ ॥ श्रीमार्कंडेय उ० ॥ साधु साधु
माहप्राज्ञ प्रश्नोयं यस्त्वया कृतः ॥ शृणुष्वाहं प्रवक्ष्यामि कावेरीफलमुत्तमम् ॥ ५ ॥ अस्ति यज्ञो महासत्वः कुबेरो नाम विश्रुतः ॥ सोपि
तीर्थप्रभावेन राजन् यक्षाधिपोऽभवत् ॥ ६ ॥ कावेरी नर्मदायास्तु संगमे लोकविश्रुते ॥ स तु स्नात्वा शुचिर्ध्यात्वा कुबेरः सत्यविक्रमः
॥ ७ ॥ विधिवन्नियमं कृत्वा शास्त्रयुक्त्या नृपोत्तम ॥ आराधयेन्महादेवमेकचित्तः सनातनं ॥ ८ ॥ एकाहारो ऽवसन्मासं तथा
षष्ठाहकालिकः ॥ यज्ञोपवासी निवसत्कंचित्कालं नृपोत्तम ॥ ९ ॥ फलमूलाशनो राजन् कंचित्कालं धृतव्रतः ॥ कंचित्कालं स्थि-
तस्तत्र तीर्थे सेवालभो जनः ॥ १० ॥ कंचित्पाराकनिरतः कंचित् कृच्छ्रेण व्यत्यगात् ॥ चांद्रायणपरः कंचित् कंचिद्वाय्वंबुभोजनः
॥ ११ ॥ एवं तत्र नरश्रेष्ठ कामरागविवर्जितः ॥ स्थितो वर्षशतं साग्रं कर्षयन्निजविग्रहं ॥ १२ ॥ ततो वर्षशतस्यांते देवदेवो

CC-0. In Public Domain. Digitization by eGangotri

महेश्वरः ॥ तुतोष परया भक्त्या तमुवाच परंतप ॥ १३ ॥ भोभो यक्ष महासत्व वरं वरय सुव्रत ॥ परितुष्टोस्मि ते भक्त्या तव-
दास्ये यथेप्सितं ॥ १४ ॥ यक्ष उ० ॥ यदि तुष्टोसि देवेश उमया सह शंकर मामद्य सर्वयक्षाणामधिपं कर्तुमर्हसि ॥ १५ ॥ अ-
क्षयत्वं महेशान त्वयि भक्तिमचंचलां ॥ धर्मे मतिं च मे नित्यं राजराज्यं च शाश्वतं ॥ १६ ॥ ईश्वर उ० ॥ यत्वया प्रार्थितं
सर्वं तत्तथास्तु भविष्यति ॥ एवं दत्त्वा वरं तस्या जगामादर्शनं हरः ॥१७॥ सोपि स्नात्वा विधानेन संतर्प्य पितृदेवताः ॥ आमं
त्रयित्वा तत्तीर्थं कृताहारो दिवं ययौ ॥ १८ ॥ पूजितस्तत्र यक्षैस्तु अभिषिक्तो विधानतः ॥ चकार विपुलं तत्र राज्यमीप्सित
मुत्तमं ॥ १९ ॥ तत्र चान्ये नराः सिद्धाः यक्षगंधर्वकिंनराः ॥ अपरे गणसंघाश्च अन्ये चैव तपोधनाः ॥ २० ॥ का-
वेरीसंगमं तेन सर्वपापहरं विदुः ॥ सर्वेषामपि स्वर्गाणां द्वारमेतद्युधिष्ठिर ॥ २१ ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सु-
जीवितं ॥ कावेरीसंगमे स्नात्वा यैर्दत्तं हि तिलोदकं ॥ २२ ॥ दश पूर्वे परे तात मातृतः पितृतस्तथा ॥ उद्धृत्य पुरुषान् स्वर्गे
स याति नृपसत्तम ॥ २३ ॥ तस्मात्सर्वप्रयत्नेन तत्र स्नात्वा तु मानवः ॥ अर्चयेदीश्वरं देवं यदिच्छेत् शाश्वतीं गतिं ॥ २४ ॥
कावेरीसंगमे राजन् स्नानदानार्चनं नरैः ॥ कृतं भक्त्या नृपश्रेष्ठ अश्वमेधादिकं फलं ॥ २५ ॥ होमेन चाक्षयः स्वर्गो जपादायु-
र्विवर्द्धयेत् ॥ ध्यानतो नित्यमान्याति पदं शिवकलात्मिकं ॥२६॥ अग्निप्रवेशं यः कुर्यात् तस्मिन्तीर्थे युधिष्ठिर ॥ अग्निलोके वसे-
त्तावद्यावदाभूतसंप्लवं ॥ २७ ॥ अनाशिकं तु यः कुर्यात् तस्मिंस्तीर्थे नराधिप ॥ तस्य पुण्यफलं यत्स्यात्तच्छृणुष्व युधिष्ठिर
॥ २८ ॥ अप्सरोगगणसंकीर्णे विमाने सूर्यसन्निभे ॥ चामरैर्वीज्यमानस्तु देवतैः सह मोदते ॥ २९ ॥ षष्टिवर्षसहस्राणि रुद्र-
लोके महीयते ॥ रुद्रलोकात्परिभ्रष्टः संप्राप्य पृथिवीतलं ॥३०॥ दानी भोगी च दीर्घायुर्जायते पृथिवीपतिः ॥ व्याधिशोकभयो-
द्वेगमुक्तो जीवेच्छतं समाः ॥ ३१ ॥ एवं फलप्रदाता च कावेरी सेविता नृणां ॥ त्रिषु लोकेषु विख्याता नर्मदा संगमे सदा॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जितवाक्कायचित्ताश्च ध्येयध्यानरतास्तथा ॥ कावेरीसंगमे तात तेपि मोक्षमवाप्नुयुः ॥ ३३ ॥ ये पिबंति जलं तत्र ते पुण्या नात्र संशयः ॥ तेषां पापं विलीयेत हिमं सूर्योदये यथा ॥ ३४ ॥ गंगायमुनयोः संगे यत्फलं परिकीर्तितं ॥ भौमे तु भूतजायोगे व्यतिपाते च संक्रमे ॥ ३५ ॥ राहुसोमसमायोगे तदेवाष्टगुणं स्मृतं ॥ अशीतिश्च यवाः प्रोक्ता गंगायमुनसंगमे ॥ ३६ ॥ कावेरीनर्मदायोगे तदेवाष्टगुणाः स्मृताः गंगाषष्ठिसहस्रैस्तु क्षेत्रपालैः प्रपूज्यते ॥ ३७ ॥ तदर्द्धैरन्यतीर्थानि रक्षंते नात्र संशयः ॥ अमरेश्वरे तु सरितां ये योगाः परिकीर्तिताः ॥ ३८ ॥ ते त्वशीतिसहस्रैस्तु क्षेत्रपालैस्तु रक्षिताः ॥ तथामरेश्वरे याम्ये लिंगं वै चपलेश्वरं ॥ ३९ ॥ द्वितीयं चंडहस्ताख्यं द्वे लिंगे तीर्थरक्षके ॥ शिवेन स्थापिते पूर्वं कावेर्याद्याभिरक्षके ॥ ४० ॥ लक्षेण रक्षिता देवी नर्मदा बहुकल्पगा ॥ धनुषां षष्टिभिर्युतैः पुरुषैरीशयोजितैः ॥ ४१ ॥ ॐकारशतसाहस्रैः पर्वतश्चाभिरक्षितः ॥ अन्यदेशकृतं पापमस्मिन्क्षेत्रे विनश्यति ॥ अस्मिन् तीर्थे कृतं पापं वज्रलेपो भविष्यति ॥ ४२ ॥ इति श्री रेवामहात्म्ये रेवाकावेरीसंगममहात्म्यं नाम त्रिंशोध्यायः ॥ ३० ॥ मार्कंडेय उवाच ॥ ततो गछेन्महाराज वाराहीसंगमं परं ॥ वाराहस्य महाविष्णोर्देहस्वेदसमुद्भवम् ॥ १ ॥ रेवयाः संगतस्तत्र स्नात्वा पापैः प्रमुच्यते ॥ तर्पयित्वा पितॄस्तत्र तिलतोयै र्यथाविधि ॥ २ ॥ उद्धरेदात्मना सार्धं कुलान्येकोनविंशति ॥ ३ ॥ इति वाराही संगमः ॥ रेवां भित्वा महाभागा चंडवेगा विनिसृता ॥ तत्रस्नात्वा नरव्याघ्र ब्रह्महत्यां व्यपोहति ॥१॥ तिलोदकप्रसादेन हविषापिंडदानतः ॥ पितॄन्समुद्धरेत् घोरान्नरकान्नात्र संशयः ॥ २ ॥ पाप मृत्यु मृता ये च चंडकर्मकृतो नराः ॥ मुच्यंते तेन पापेन चंडवेगासमागमे ॥ ३ ॥ चंडेश्वरं तत्र लिंगं सर्वदेवमयं शुभं ॥ स्नापनादर्चनादस्य पुष्पगंधादिदानतः ॥४ ॥ ब्रह्महत्यादि पापं हि तत्क्षणादेव नश्यति ॥ चंडसेनः पुरा ह्यासीत् दुरात्मा पापकर्मकृत् ॥ ५ ॥ परदाररतश्चोरो ब्रह्मघ्नो गुरुतल्पगः ॥ दैत्यवंशसमुद्भूतो राजा ऋषिविरोधकः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलात्कारं गृहित्वा च ऋषिपत्नी निषेवकः ॥ पतीन्हत्वा तथान्याश्च नानावर्णाः स्त्रियो हरत् ॥ ७ ॥ नैमिषारण्यवासी च शां डिल्यो ब्रह्मवित्तमः ॥ सौदामिनी तस्य भार्या धर्म पत्नी यशस्विनी ॥ ८ ॥ रुपयौवन संपन्ना चंद्रकांतिसमप्रभा ॥ कामिनी व-ल्कलधरा पीनश्रोणिपयोधरा ॥ ९ ॥ एकदाहयमारूढश्चंडसेनो वने चरन् ॥ शांडिलस्याश्रमं प्राप्तो वने स मृगयन्मृगान् ॥ १० ॥ दृष्ट्वा सौदामिनी तेन विचरंती मुनेः प्रिया ॥ उवाच तां मया गच्छ ममराज्ञी भवेति वै ॥ ११ ॥ वल्कलाजिनधारी च कुशकाशप-वित्रितः ॥ कंदमूलाशनाशीनो ब्राह्मणः किं पतिस्तव ॥१२॥ किं करिष्यासि तेन त्वं मम भोगान्सुपुष्कलान् ॥ सर्वदा मत्प्रसादे-न भुंक्ष्व त्वं वरवर्णिनी ॥ १३ ॥ तस्य तद्वचनं श्रुत्वा नृपतेः पापकर्मणः ॥ आह सौदामिनी वाक्यं चंडसेनं नृपाधमं ॥१४॥ याचस्व मे पतिं राजन् तस्याहं वशवर्तीनी ॥ ततस्तद्वचनाद्राजा गत्वा शांडिल्यमब्रवीत ॥ १५ ॥ अयोग्येयमृषिश्रेष्ठ पत्नी तव गतव्रता ॥ विरुपाचतथा क्रूरा तां मेदेहि मुने स्त्रियं ॥ १६ ॥ याचेहं कृपणामेनां पत्नीं ते शीलवर्जितां ॥ ददामिद्रविणं तूर्णं रूपकांस्ते सहस्त्रशः ॥१७॥ त्वं तेनान्यां शुभापत्नी मुद्वहस्व कुलान्वितां ॥१८॥ शांडिल्यउ०॥सर्वा स्त्रियःकैतवबद्धमूलास्तासांप्रियो नास्ति मनुष्यलोके॥दामितेनाहमिमां प्रियां मे किंमां द्विजंवोचसि दुर्बलंच ॥ १९ ॥ अनेनाध्यवसायेन किं ते श्रेयो भविष्यति ॥ नेयं तवार्हा कृपणा त्वं राजा भिक्षवो वयं ॥ २० ॥ इत्याकर्ण्याथ कामांधस्तां ग्रहीतुं गतस्त्वरन् ॥ सानिरीक्ष्याथतं पापं प्र-ज्वलंतीव कोपतः ॥ २१ ॥ अस्पृश्याहमुदक्या च त्वं चेन्मांनेतुमिछसि ॥ ब्राह्मणीं ऋषिपत्नीं च साध्वीं च पतिदैवतां ॥ २२ ॥ हादुरध्यवसायश्च चांडालस्त्वं भविष्यसि ॥ याहि याहि पराक्पाप चांडाल कृपणाधम ॥ २३ ॥ ततः श्रुत्वा स तंशापं भयार्तः प्राणविव्हलः ॥ चांडालस्तत्क्षणाजातः सर्वभूतभयावहः ॥ २४ ॥ हाहाकारं ततश्चक्रुः सर्वे ते मुनिमानुषाः ॥ अश्वमारुह्य राजा सौ अयोध्यामाविशत्पुरीं ॥ २५ ॥ दृष्ट्वा चांडालरूपं तं ब्राह्मणाःपुरवासिनः ॥ राजपुत्रा महिपालं अंतःपुरनिवासिनः ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बभूवुर्भयभीताश्च गर्हयंतो महीपतिं ॥ सर्वोपि चिंतयाविष्टो जनस्तं वीक्ष्य कुत्सितं ॥ २७ ॥ कृष्णवर्णं च दुर्गंधं क्रूरनेत्रं भयान
 कं ॥ विश्वरं ध्वजिनं पांशुगुंठितं गतिगर्हितं ॥ २८ ॥ ततस्ते ब्राह्मणा लोका बोधइत्वा विगर्हितं ॥ वसिष्ठस्याश्रमं नेतुं समुत्थाप्य
 प्रचक्रमुः ॥ २९ ॥ ततः पुरोधसं यातो ब्राह्मणैरभिसंवृतः ॥ वसिष्ठं शरणं प्राप्तः शोचहत्वात्मनस्तनुं ॥ ३० ॥ राजा विषण्ण-
वदनस्तत्कर्मस्तं निवेदयत् ॥ भीतस्खलितवाक् सर्वं साद्यंतं निजदुष्कृतं ॥ ३१ ॥ वशिष्ठोप्यब्रवीवाक्यं चंडसेनं नृपं ततः ॥
शांडिल्यं गच्छराजस्त्वं शापात्त्राणं यदिछसि ॥ ३२ ॥ सौदामिनीं च तद्भार्यां ज्वलंतीमिव तेजसा ॥ एवमस्त्विवति चोक्तातं न-
मस्कृत्य पुरोधसं ॥ ३३ ॥ साजगामाथ तैः सार्द्धं शांडिल्यं भार्ययान्वितं ॥ प्रणिपत्य च साष्टागं नमस्कृत्य पुनःपुनः ॥ ३४ ॥
अब्रवीत्तं मुनिश्रेष्टं भयत्रस्तो नराधिपः ॥ क्षमस्व मे मुनिश्रेष्ठ त्वद्भार्यांप्रति कामितं ॥ ३५ ॥ पापोहं पापकर्माहं सर्वथा त्वां
समाश्रितः ॥ इयं माता पिता त्वं मे रघुवंशं समुद्धर ॥ ३६ ॥ यन्मेत्वपकृतं तेद्यतस्य प्राप्तं फलं हि वै ॥ दीनस्य पुण्यहीनस्य
निःसत्वस्य गतस्य च ॥ ३७ ॥ पदाग्रपतितस्याद्यदयां मे कर्तुमर्हसि ॥ ततःप्रोवाच सऋषिभार्या प्रीता च सुव्रता ॥ ३८ ॥ मार्कं
डो मे पिता राजन् शिष्योहं तस्य धीमतः ॥ तं गच्छ त्वं मुनिश्रेष्ठं तस्य सर्वं निवेदय ॥ ३९ ॥ कृपानिधिं भज क्षिप्रं यदि शापां
तमिछसि ॥ तदादेशप्रमाणं मे नात्र तु प्रभवाम्यहं ॥ ४० ॥ इत्येवमुक्तो मुनिना शांडिल्येन स भुपतिः ॥ प्रणम्य तं ययौ तत्र मार्कं
डस्याश्रमं प्रति ॥ ४१ ॥ आसीनमाश्रमद्वारि प्रणम्य च कृतांजलिः ॥ निवेदयद्यथावृत्तं स्वकृतं सापकारणं ॥ ४२ ॥ चांडालत्वं
यथाप्राप्तंताभ्यां यच्चोक्तमुत्तरं ॥ मार्कंडेयः समाकर्ण्य कृपया चाभ्यचिंतयन् ॥ ४३ ॥ क्षणमेकं समाधिस्थः प्रावोच नृपतिं ततः ॥
सर्वेषां ब्राह्मणादीनां शृण्वंतांतु युधिष्ठिर ॥ ४४ ॥ याहि त्वं नृपते शीघ्रं चंडवेगास मागतं ॥ ॐकारसन्निधौ श्रेष्ठं पापशापविमुक्तये
॥ ४५ ॥ त्वं चेदिछसिशापांतं तयोरादेशमाश्रितः ॥ चंडिकेशं समभ्यर्च्य तत्र स्नात्वा विधानतः ॥ ४६ ॥ अवाप्स्यसि परं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानमुक्तश्चास्मात्तु किल्बिषात् ॥ एवं मयोक्तं वचनं श्रुत्वा मां प्रणिपत्य च ॥ ४७ ॥ शांडिल्यं च पुनर्नत्वा तथा सौदामिनी नृप ॥ स्वस्ति वोस्तु गमिष्यामि चंडवेगासमागमं ॥ ४८ ॥ मार्कंडेयोपदिष्टं मे ब्राह्मणानां तु सन्निधौ ॥ ४९ ॥ एवमुक्त्वा गतस्तत्र तदनुज्ञामवाप्य च ॥ संगमे विधिवत् स्नात्वा पूज्य चंडेश्वरं शिवं ॥ ५० ॥ जागरं सोपवासं च कृत्वा विप्रांश्च भोजनैः ॥ भूषणैश्चापि संतोष्य शुद्धात्मा प्रययौ पुरं ॥ ५१ ॥ ततः कालेन महता शुद्धबुद्धिर्महामनाः ॥ कुर्वन् स्वविहितं कर्म स्वर्गप्राप्तो नराधिपः ॥ ५२ ॥ दिव्यंविमानमारुढ स्तूयमानो प्सरोगणैः सर्वपापविनिर्मुक्तः तीर्थस्यास्य प्रभावतः ॥ ५५ ॥ ततः शिवपुरं प्राप्तश्चंडसेनो महीपतिः ॥ स्वारोचिषेंतरे पूर्वमादिकल्पे कृतयुगे ॥ ५४ ॥ राज्ञां चैव सहस्राणिसिद्धिं प्राप्तानि तत्रवै ॥ ५५ ॥ एतत्ते कथितं राजन् चंडवेगासमागमं ॥ श्रवणात्कीर्तनादस्य भ्रूणहत्या प्रणश्यति ॥ ५६ ॥ इति श्रीरेवामहात्म्येचंडवेगासंगमतीर्थनामएकत्रिंशोध्यायः ॥ ३१ ॥ श्रीमार्कंडेय उ० ॥ ततोगछेत राजेंद्र एरंडीसंगमं पुनः तत्रैव नर्मदायाश्च सर्वकामफलप्रदं ॥ १॥ तृतीया चंडवेगा च स्वार्गसोपानपद्धतिः ॥ तत्र स्नात्वा दिवं याति ये मृतास्तेऽपुनर्भवाः ॥ २ ॥ तैलोकप्रदानेन पिंडतापेन भारत ॥ अनंतकालिकी तृप्तिः पितॄणामुपजायते ॥ ३ ॥ आमासोम समायोगे व्यतिपाते च वैधृते ॥ गयाशतगुणं पुण्यं एरंडीसंगमे ॥ ४ ॥ संक्रमे पूर्णमायांच द्वादश्यां रविवासरे ॥ गयाशतगुणं पुण्यं एरंडी संगमे भवेत् ॥ ५ ॥ अमासोमसमायोगे राहुग्रस्ते दिवाकरे ॥ एरंडीसंगमे स्नात्वा पुण्यसंख्यानविद्यते ॥ ६ ॥ तत्र पिंडप्रदानेन तस्मिन् पर्वणि भारत ॥ किं गयादिकृतैः श्राद्धैः पितॄणा मनृणोभवेत् ॥ ७ ॥ एरंडेश्वरलिंगं च सर्वपापप्रणाशनं ॥ कुंकुमेन समालभ्य गंधधूपैः प्रपूज्य च ॥ ८ ॥ सूत्रेणाविष्ट्य वस्त्रैर्वा दीपनैवेद्य दानतः ॥ दिव्यं वर्षसहस्रं तु मोदते शिवसन्निधौ ॥ ९ ॥ दर्शनात्तस्य लिंगस्य गाणपत्यमवाप्नुयात् ॥ तत्रैव चापरं देवं भद्ररुद्रेश्वरं नृप ॥ १० ॥ नृणां भवार्तिभीतानां लिंगं परमसिद्धिदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भद्ररुद्रौ पुरा कल्पे गंधर्वौ भ्रतारावुभौ ॥ ११ ॥ तदभ्यर्च्य विधानेन गतौ विद्याधरं पुरं ॥ गायंति पितरो गाथां वंशद्वयसमुद्भवाम् ॥ १२ ॥ अपिस्यात्सकुले स्माकं पुत्रः परमधार्मिकः ॥ तिलोदकप्रदाताय एरंडीसंगमागमे ॥ १३ ॥ उद्धरेन्नरकात् घोरात् श्राद्धदानात् विधानतः॥तत्र श्राद्धप्रदानेन पिंडदानेन भारत॥१४॥वसेन्मन्वंतराणीह ब्रह्मलोके चतुर्दश॥शस्त्रेण चहताये वै पापमृत्युमृतास्तथा ॥ १५ ॥ एकादश्यां चतुर्दश्यां श्राद्धाश्ववृषमोक्षणात् ॥ सूर्यैंद्रवीरलोकांश्च प्राप्य क्रीडंति मानवाः ॥१६॥ तत्र यस्त्यजति प्राणानवशः सवशोपिवा ॥ तीर्थस्यास्य प्रभावेन स्वर्गांते स भवेन्नृपः ॥ १७ ॥ चतुर्युगसस्रं च राजा विद्याधरे पुरे ॥१८॥ एतत्ते कथितं राजन् तीर्थमेरंडि संगमं ॥ श्रवणात्कीर्तनाद्वापि गोसहस्रफलं लभेत् ॥ १९ ॥ इति श्रीनर्मदामहात्म्ये एरंडीसंगमतीर्थंनाम द्वात्रिंशोऽध्यायः॥३२॥ मार्कंडेय उ०॥ तत्रैव पितृतीर्थंचब्राह्मणा विहितं पुरा ॥ दुर्वाससाच ऋषीणा स्थापितं ब्रह्मशासनात् ॥ १ ॥ एरंडेनापि मुनिना सेवितं मुनिवाक्यतः ॥ पितृतीर्थं परं श्रेष्ठं पितृणांमोददायकं ॥ २ ॥ अक्षया जायते तृप्तिः पितृश्राद्धप्रदानतः ॥ जवेनाप्यधिकं राजन् गयायाः पुरतो हितत् ॥ ३ ॥ किं कृतैश्च गयाश्राद्धैः किं तीर्थैः किं तथा व्रतैः ॥ रेमूढा नर्मदा तीरे पर्वतो मरकंटके ॥ ४ ॥ एरंडीसंगमे स्नात्वा तथाचंडीसमागमे ॥ सकृद्वापि कृतं श्राद्धं विधिवत्तिलमिश्रितं ॥ ५ ॥ द्रव्येन येन केनापि पितृणां तृप्तिरक्षया ॥ तत्र स्नात्वा हिविधिवत्कामनायोगमाश्रितः ॥६॥ संतानकामः सतानं वसुकामो लभेद्वसुं॥ विद्याकामो लभेविद्यां जयकामो लभेज्जयं ॥ ७ ॥ योषिद्वा पुरुषो वापि यं यं काममिहेच्छति ॥ तंतमाप्नोति नियतंस्नात्वा-श्रद्धासमन्वितः ॥८॥ इति एरंडीसंगमे पितृतीर्थ महात्म्यं ॥ श्रीमार्कंडेय उ ०॥ ॐकारस्य तथोत्पत्तिं शृणु राजन्समासतः ॥ संभवं पंचवक्त्राणां लिंगानामर्चनं तथा ॥ १ ॥ कलेश्चापि कलानां च प्रमाणं कथयामि ते न शक्यं विस्तरेणेह वक्तुं वर्षशतैरपि ॥२॥ युगे युगे युगाचारो ब्राह्मणा वेद पारगाः ॥ कलौ कृत युगाचार परमात्स्येव दृश्यते ॥ ३ ॥ द्वात्रिंशत्तु सहस्राणि तथा लक्षचतुष्टयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ मानुषाणां तु वार्षाणां कलेर्मानं स्मृतं बुधैः ॥ ४ ॥ यवाकारः कलिर्भूप स्वभावेन सदोल्वणः ॥ अल्पक्षीरास्तथा गावो
ह्यल्पसस्या च मेदिनी ॥ ५ ॥ अल्पोदकास्तथा मेघा स्वल्पविद्या स्तथा द्विजाः ॥ वयः कौमारमारभ्य नराः
पलित यौवनाः ॥ ६ ॥ दशमे द्वादशे वर्षे नारी गर्भधरा भवेत् ॥ शूद्रा धर्मपरा नित्यं कलौ लोकादिगंवराः
॥ ७ ॥ एकवर्णाः प्रजासर्वाः प्रायो म्लेछा नृपाः नृप ॥ आयुषो नियमो नास्ती विप्राणां चावमाननात् ॥ ८ ॥ सद्विद्यायास्त-
थोच्छेदः शास्त्रं नारदकल्पितं ॥ मृतसिद्धास्तथादेवा मर्त्यसिद्धिप्रदायिनः ॥ ९ ॥ विटानां च सभागोष्ठी कुलटासु रिरंसया ॥ द्र-
व्यनाशस्त्वसत्वेन जीवनं पापचिंतनं ॥ १० ॥ कलौयुगे तथा प्राप्ते कल्कीरूपे च माधवे ॥ अग्नीहोत्रं न वेदाश्च न धर्मो न च
पावनं ॥ ११ ॥ न सत्यं न तपो दानं नतीर्थे स्थानदेवता ॥ वेदविक्रयणा विप्रा अंत्यजानां गृहे गृहे ॥ १२ ॥ अधरोत्तरभावेन
भविष्यंति कलौ नराः ॥ बोद्धाः क्षपनकामाना नग्ना मलिनकश्मलाः ॥ १३ ॥ विडंबयंति चात्मानं मोहिताः पापकर्मणा ॥ न
गुरुं मन्यते शिष्यः पुत्रश्च पितरं तथा ॥ १४ ॥ शांकरद्रव्यहर्तारो वेषप्रव्राजकास्तथा ॥ लिंगोपजीविनः पापास्तथा भस्मोप-
जीविनः ॥ १५ ॥ वैवस्वते नरे प्राप्ते कलौ सेवं भविष्यति ॥ उन्मत्तचारिणः पापास्वचारः स्त्यागिनस्तथा ॥ १६ ॥ नरा नी-
चरताः प्रायः सद्वत्ते वेषधारिणः ॥ त्यागिनः स्वकलत्राणां परभार्यासु लंपटाः ॥ १७ ॥ एवंत्वसत्कथाः प्रायः परमांसोपजीविनः॥
अल्पश्रोतास्तथा नद्यः सर्वावृक्षाश्च शाखिनः ॥ १८ ॥ एतत्ते कथितं राजन् कलौ यद्यद्भविष्यति ॥ १९ ॥ ॐकारस्यैव चो-
त्पतिं शृणु राजन् यथाश्रुतं ॥ कथयामि समासेन महात्म्यं चातुलं नृप ॥ २० ॥ कीर्तनात्श्रवणादस्य मुच्यते भवबंधनात् ॥
ॐमित्येकाक्षरं ब्रह्म व्याहरन् समनुस्मरन् ॥ २१ ॥ यः कुत्रापि त्यजेदेहं सप्रयाति परां गतिं ॥ २२ ॥ वेदमाताच गायत्री ॐ-
कारप्रभवा चया ॥ ॐमित्येकाक्षरे तत्वे ब्रह्मविष्णुमहेश्वराः ॥ २३ ॥ ॐकारोवेदमूलं तु ततः शाखाप्रतिष्ठितः ॥ अंगानि स्कं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घदेशाश्च पर्णानि स्मृतिरात्ममः ॥ २४ ॥ फलपुष्पाणि सिद्धांतो मोक्षस्वादुरसस्तथा ॥ यथादौ सर्वविद्यानां ॐकारः परिपठ्यते ॥ २५ ॥ तथादौ सर्वदेवाना मादिदेवो महेश्वरः ॥ वेददेवत्रयं चैव कालसंध्यात्रयं तथा ॥ २६ ॥ वन्हिशक्तित्रयं प्रोक्तं तद्वत्कर्मत्रयं स्मृतं ॥ २७ ॥ वृत्तित्रयं च राजेंद्र ॐकारेपरिकीर्तितं ॥ त्रिवर्गरूपो भगवानक्षरः त्रितयात्मकः ॥ अस्मिन् क्षेत्रे स भगवान् क्षेत्रीशभगवान्स्वयं ॥ २८ ॥ मूर्तः स्थितः सदाव्यक्तो व्यक्तरूपी महेश्वरः वर्तते सस्वरुपोयः शिवः श्रीनर्मदातटे ॥ २९ ॥ अष्टषष्टिश्चतीर्थानामस्मिन्क्षेत्रे व्यवस्थिता ॥ त्रयस्त्रिंशत्तथा देवाः परिवारगणैःसह ॥३०॥ अस्मिन्क्षेत्रे च रुद्राणां स्थितमष्टोत्तरं शतं ॥ पंचभूतात्मकं चैव पंचतत्वात्मकं तथा ॥ ३१ ॥ पंचाक्षरं पचवक्रमि त्युक्तोकारं युधिष्ठिर ॥ स्वायंभुवेंतरे प्राप्ते आदिकल्पे कृतेयुगे ॥ ३२ ॥ दानवैर्निर्जिता देवा नर्मदातीरमाश्रिताः ॥ शिवः सभगवान्प्राह ब्रह्माणं प्रतिभारत ॥ ३३ ॥ दृष्टिं कुरु महारौद्रीं दानवानां क्षयंकरी ॥ तथा ते दानवाः सर्वे निवीयाक्षत्वमान्पयुः ॥ ३४ ॥ इत्युवाच ततो ब्रह्मा त्रिपुरांतकरं हरं ॥ ममेश विस्मृता मंत्रा दानवानां भयेन तु ॥ ३५ ॥ ब्रह्मणोवचनाद्रुद्रोहुंकारं वै मुमोचह ॥ एतस्मिन्नंतरे भित्वा पातालानितुसप्तच ॥ ३६ ॥ ॐकारपूर्वका राजन् भूर्भूवस्वरितीरयन् ॥ पर्वतादुत्थितं लिंगं ज्वलत्कालानलप्रभं ॥ ३७ ॥ सूर्यकोटिसमप्रख्यं ज्वालामालासमावृत्तं ॥ आदिमध्यांतहीनं च नदृष्टं नश्रुतं क्वचित् ॥ ३८ ॥ ब्रह्मवक्रेषु तेवेदास्ततउल्हासमागमन् ॥ वेदांगानि च सर्वाणि भणितास्वरपथापुरा ॥ ३९ ॥ ततऊचे स्वयंशंभुर्ब्रम्हाणं लोकभावनं ॥ ब्रह्मन्समुज्झता वेदा इष्टिं कुरु यथेच्छया ॥ ४० ॥ ततो ब्रह्माचकारेष्टिं रोद्रीं दैत्यक्षयंकरीं ॥ सौम्यां चापितथैवेष्टिं लोकानां शांतिकारिणीं ॥ ४१ ॥ ततोसुरा नृपश्रुत्वा दृष्ट्वा चेष्टिं भयंकरीं ॥ हीयमानाः भयोद्विग्नानेशुःसर्वे दिशोदश ॥ ४२ ॥ ॐकारस्यप्रभावेन देवा विगतकल्मषाः ॥ संजाता असुराश्चापि रसातलतलंगताः ॥ ४३ ॥ पुष्पवृष्टिः पपातोच्चैर्लिंगमूर्द्धनि पर्वते ॥ देवा दुंदुभयो नदुः जयशद्बास्तथाभवन् ॥४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगुर्गंधर्वराजानो ननृतुश्चाप्सरोगणाः शीतोमंदश्च सुरभिर्ववौवायुस्तदाचले ॥ ४५ ॥ विश्वोत्पाताश्च संशांताः सुखमाप तदा जगत् ॥ ततोभ्यर्च्य सुरेशानं देवास्ते त्रिदिवंययुः ॥ ४६ ॥ बहुकल्पं महालिंगं सुरासुरनमस्कृतं ॥ भुक्तिमुक्तिप्रदं सौम्यं ॐकारं विद्धि पार्थिव ॥ ४७ ॥ तस्मिन्लिंगे तु लीयंते कल्पांते देवतागणाः ॥ अमरं तत्र वेत्याहुर्हरं सिद्धेश्वरं तथा ॥ ४८ ॥ पिंगलेश्वर मादित्यं सोमपानेश्वरं तथा ॥ यत्रसिद्धास्त्रयो वेदाः सषडंगपदक्रमाः ॥ ४९ ॥ तेनसिद्धेश्वरं विद्धि सर्वसिद्धि प्रदायकं ॥ स्थितंतुपर्वतस्याग्रेलिंगकोटिसमन्वितं ॥ ५० ॥ अर्चनात्तस्य लिंगस्य विष्णुलोके महीयते ॥ कल्पे कल्पे महाराज क्षीयंते सर्वदेवताः ॥५१॥ त्यत्त्कातुपंचलिंगानि मार्कंडं नर्मदां तथा ॥ ५२ ॥ अविमूक्तं चकेदारमोकारं चामरेश्वरं ॥ तथैव च महाकाल पंचलिंगानि चाप्यमी ॥ ५३ ॥ पुण्यानि पंचलिंगानि प्रातरुत्थाय यः पठेत् ॥ सर्वतीर्थफलं प्राप्य शिवलोके महीयते ॥ ५४ ॥ एकाकला महाकाले वसेद्वैन्यापिनी सदा ॥ सपादकोटिस्तीर्थानां महाकालवने नृप ॥ ५५ ॥ शिप्रारूपेण कावेरी शिवक्षेत्रे व्यवस्थिता ॥ चतुःक्रोशाभ्यंतरतो ब्रह्महत्या नसर्पति ॥ ५६ ॥ आग्नेयं सिद्धिलिंगं च तस्यातीरे समास्तृतं ॥ शिवख्यात मिति ख्यातं तत्तीर्थं कुरुनंदन ॥ ५७ ॥ स्नातस्य तत्र पुंसो हि संभवोनपुनर्भवेत् ॥ कीट पक्षी पतंगाहि तिर्यग्योनिगता नराः॥ ५८ ॥ तस्मिन् तीर्थे विमुच्यंते शिवस्य वचनं यथा ॥ तत्र यः कुरुते श्राद्धं पितॄणां च तिलोदकं ॥ युगकोटिसहस्त्रं तु पितरस्तेन तर्पिताः ॥ ५९ ॥ द्वे कले चैव केदारे शिवेन परिकीर्तिते ॥ तत्र स्नानाद्दिवं यांति नविशेद्योनि संकटं ॥ ६० ॥ यज्ञायुतफलं प्राप्य शिवलोके महीयते ॥ अर्धकोटी तु तीर्थानां केदारे कथिता नृप ॥ ६१ ॥ दर्शनात्स्पर्शनात्तस्य भवेन्मोक्षफलं नृणां ॥ स्मरणात्पापसंघातः क्षयमायाति भारत ॥ ६२ ॥ केदारस्योदके पीते पुनर्जन्म न विद्यते ॥ अहोरात्रोषितो भूत्वा पयःपानं करोतियः ॥ ६३ ॥ तस्योदरे भवेल्लिंगं षण्मासब्रह्मचारिणः ॥ केदारकीर्तनादेवः शिवलोके महियते ॥ ६४ ॥ वाराणसी महापुण्या त्रिषु लोकेषु वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुता ॥ अंतरिक्षपुरी सातु मर्त्यलोके पृथक्कृता ॥ ६५ ॥ पंचक्रोशांतरे राजन् ब्रह्महत्या न सर्पति ॥ अष्टौ कोटयस्तु लिंगानि
तथा विंशति कोटयः ॥ ६६ ॥ अविमुक्ते महाराज गुप्तानि प्रकठानि च ॥ अ शिवरुणयोर्मध्ये स्नानं कृत्वा यथोदितं ॥ ६७ ॥
सर्वपापविनिर्मुक्तो देववन्मोदते दिवि ॥ तत्र यस्त्याजति प्राणान् शिवं ध्यायन् नृपोत्तम ॥ ६८ ॥ सहस्रकुलमुद्धृत्य शिवभावं
स गच्छति ॥ ६९ ॥ तत्र यद्दीयते दानं तस्य संख्या न विद्यते ॥ तिलोदकप्रदानेन पितॄणां तृप्तिरक्षया ॥ ७० ॥ तत्र यस्त्य-
जति प्राणान् अवशः स्ववशोपि वा ॥ ऊर्ध्वदक्षिणकर्णस्तु शिवेन सहबोध्यते ॥ ७१ ॥ संपन्नतारकज्ञानो जटाशूलत्रिनेत्रवान् ॥
फणिभिः कृतशृंगारश्चंद्रमौलिर्विभूतिमान् ॥ ७२ ॥ व्याघ्रचर्मोत्तरीयश्च जरद्गवगतिर्भवेत् ॥ अविमुक्तस्य लिंगस्य स्पर्शनात्मुक्ति-
रेवहि ॥ ७३ ॥ कलात्रयं च तत्रास्ते काशिपुर्यां न संशयः ॥ गंगासागरसंभेदे चतस्रस्तु कलास्मृताः ॥ ७४ ॥ गंगासहस्रवक्रैस्तु
प्रविष्टा यत्र सागरं ॥ स्नानावगाहनात् पानात् पिंडदानाच्च तर्पणात् ॥ ७५ ॥ गाच्छेत् शिवपुरं तत्र पितृभिः सह मानवः ॥ हा-
टकेश्वरसंज्ञं हिताल्लिंगं विद्धि पार्थिव ॥ ७६ ॥ न तं दैत्याः प्रपश्यंति न तं पश्यंति मानुषाः॥पूज्यते देवमुनिभिर्यक्षगंधर्वसेवितं
॥ ७७ ॥ गंगेश्वरं द्वितीयं च तृतीयं सागरेश्वरं ॥ चतुर्थं शूलपाणिं त्वदिति ज्ञेयं चतुःकलं ॥ ७८ ॥ कला पंचात्मकं
लिंगमोकारं कामरूपिणं ॥ पंचाक्षरं पचवक्रं नवशक्तिसमन्वितं ॥ ७९ ॥ ॐकारंकल्पगातीरे पर्वते मरकंटके ॥ प्राह पुण्य
तमं वेधा लोकतृतीयपूजितं ॥ ८० ॥ शंखकुंदेंदुसंकाशं सद्यो वक्रंतु पूर्वतः ॥ ऋग्वेदोनिर्गतो यस्मात् ब्रह्मातत्रादिदेवता॥८१॥
दक्षिणे वामदेवं तु पीताभं सुमनोहरं ॥ यजुर्वेदोद्भवं विद्धि विष्णुस्तत्राधिदेवता ॥ ८२ ॥ अघोरं मेघवर्णाभं पश्चिमे न तु
संस्थितं ॥ सामवेदोद्भवं विद्धि सूर्यकालाग्नि देवेतं ॥ ८३ ॥ सौम्य तत्पुरुषं ज्ञेयं कुंकुमारुणसन्निभं ॥ अथर्वनिर्गमं तस्मात् सो-
मस्तत्राधिदेता ॥ ८४ ॥ ईशानमूर्द्धवक्रं तु पंचवर्णं महाहनुं ॥ स्मृति सिद्धांत संगितशास्त्राशेषाभिनिर्गमं ॥ ८५ ॥ रसभावात्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

का तज्ज्ञं तद्वाग्याकाशदैवतं ॥ एतत्ते कथितं राजन् ॐकारस्य तु वर्णनं ॥ वक्तुं शक्यो न लक्ष्यास्यो एकवक्त्रस्य तु का कथा ॥८६॥
स्नापयित्वोदकेनापि बिल्वपत्रैस्तु योर्चयेत् ॥ चतुर्वर्षसहस्राणि शिवलोके महीयते ॥८७॥ ॐकारे दक्षिणे भागे प्राणत्यागं करोति
यः ॥ वर्षकोटिसहस्राणि वसेन्माहेश्वरे पुरे ॥ ८८ ॥ प्रसादं वा मठं वापि पाषाणेष्टिकनिर्मितं ॥ सुधाधवलितं कृत्वा तृण-
काष्ठमयं तु वा ॥ ८९ ॥ स्थापयेत्तत्र यो राजन् स्वशक्त्या भक्तिभावितः ॥ चतुर्युगशतं पूर्णं स वसेच्छिवमंदिरे ॥ ९० ॥ चित्र-
भालेख्यशूलं च पताकाध्वजशोभितं ॥ वितानं किंकिणीयुक्तं नेत्रपादोद्भवं शुभं ॥ ९१ ॥ पंचवर्षकशोभाढ्यं ॐकारस्य निवेद-
येत् ॥ पंचामृतेन संस्नाप्य चंदनागुरुकुंकुमैः ॥ ९२ ॥ समालभ्य पटैर्नानाविधैश्च परिधापयेत् ॥ हेममौक्तिकरत्नैश्च भूषयेन्निज-
शक्तितः ॥ ९३ ॥ सघृतं गुग्गुलं वापि धूपं दद्यान्मनोहरं ॥ घृतपक्वं च नैवेद्यं भक्षभोज्यफलादिकं ॥ ९४ ॥ घंटादीपाश्वनादांश्च
कर्पूरारात्रिकं तथा ॥ अर्घं नानाविधं दद्याच्छिवाय नृपसत्तम ॥ ९५ ॥ वेणुवीणामृदंगैश्च पटहैश्चापि गीतकैः ॥ काहलाशंखवा-
द्यानि भेरीतालांश्च कांसिकाः ॥ ९६ ॥ नृत्यैश्च विविधैर्देवमोंकारं तोषयेत्तदा ॥ व्यंजनं पादुका छत्रं चामरं ध्वजमासनं
॥ ९७ ॥ राजोपयोगि चैवान्यत् शिवाय विनिवेदयेत् ॥ हेमधेनुधरादीनि गजाश्वग्रामपत्तनम् ॥ ९८ ॥ यद्यदिष्टतमं चान्यदोंका-
राय निवेदयेत् ॥ तस्य दानफलस्येहं संख्याकर्तुं शिवः स्वयं ॥ ९९ ॥ न शक्तोस्ति महाभागावशिष्टान्यस्य का कथा ॥ सिद्धे-
श्वरोंकारयोस्तु चंद्रसूर्यग्रहे नृप ॥ १०० ॥ महाध्वजाकुलं कुर्यात् आलयं तत्फलं शृणु ॥ यद्यत् प्रीतिकरं लोके तदोंकाराय
अर्पयेत् ॥ १०१ ॥ तावद्युगसहस्राणि शिवलोके वसेन्नरः ॥ १०२ ॥ इति ते कथितं राजमोंकारोत्पत्तिलक्षणं ॥ उत्पन्नमात्र
ॐकारे ब्रह्मा वेदानवाप्य च ॥१०३॥ हर्षेण महता युक्तः स्तोत्रमेतदुदाहरन् ॥ नमस्ते व्योमसंतापिन्नमो व्योमहराय च॥१०४॥
सर्वव्यापिन्नमस्तुभ्यमशिवाय शिवाय च ॥ अनंतायाप्यनाथाय अमृताय ध्रुवाय च॥ १०५ ॥ शंभवे शाश्वतायास्तु योगपीठाश्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताय च ॥ योगाय योगिने नित्यं योगधाराय ते नमः ॥ १०६ ॥ नमः शिवाय सर्वाय सर्वस्य प्रभवाय च ॥ सद्योजाताय दे-
वाय वामवक्त्राय ते नमः ॥ १०७ ॥ नमोस्त्वघोरवक्त्राय नमस्ते पुरुषाय च ॥ ईशानाय नमस्तुभ्यं त्रिपुरांतकराय च ॥१०८॥
त्रिनेत्राय त्रिशूलाय ॐकारायच ते नमः ॥ कपालीशोऽव्ययोबुद्धो वज्रदेहोपमर्द्दनः ॥ १०९ ॥ अध्यक्षश्च विधुः शास्ता पिनाकी
त्रिदशाधिपः ॥ अग्निरिंद्रो हुताशश्च पिंगलः खादनो हर ॥ ११० ॥ ज्वलनो दहनो बभ्रुर्भस्मांतश्च स्मरांतकः ॥ अपमृत्युधरो
ध्याता विधाता कर्तुसंज्ञकः ॥ १११ ॥ कालो धर्मपतिर्योक्ता नियोक्ता नियमप्रियः ॥ नैऋतो वारुणो हंता क्रूरदृष्टिर्भयावहः
॥ ११२ ॥ उर्ध्वरोमा विरूपाक्षो दंष्ट्रालो धूमलोहितः ॥ ११३ ॥ बालो ह्यतिबलश्चैव पाशहस्तो महाबलः ॥ श्वेतोच्छरुपो रूद्रश्च
दीर्घबाहुर्जलांतकः ॥ ११४ ॥ शीघ्रो लघुर्वायुवेगो भीमश्च वडवामुखः ॥ पंचवक्त्रः कपर्दी च सूक्ष्मतीक्ष्णक्षयांतकः ॥ ११५ ॥
निधीशो रौद्रगंभीरः सौम्यदेहः प्रमर्द्दनः ॥ लक्ष्मीवान् स्वप्रकाशश्च कामः सौम्यश्च दैवतं ॥ ११६ ॥ वैद्येशो ज्ञानतत्त्वज्ञो वेदज्ञो
गात्रपिंगलः ॥ भूतपालो बलिर्नेत्रं सर्वमित्राधिपः सुधीः ॥ ११७ ॥ अनंतपालको धीरः पातालेशो वृषध्वजः ॥ सुधूम्रः शा-
श्वतो मुख्यः पिशंगः पिंगलेक्षणः ॥ ११८ ॥ विष्णुरीशो महात्मा च सुखी मृत्युविवर्जितः ॥ शंभुर्विभुगणाध्यक्षस्त्र्यक्षश्चैव
दिवस्पतिः ॥ ११९ ॥ संवादश्च विवादश्च नमोलिक्षुर्विचक्षणः ॥ विसंधिर्विषमःसंधिः कामहा कामपालकः ॥ १२० ॥ य एको
भगवान् रुद्रो रुद्रकोटिस्वरुपवान् ॥ स्रष्टा पालयिता कर्ता स मे रुद्रः प्रसीदतु ॥ १२१ ॥ एवं स्तुतवतस्तस्य ब्रह्मणः परमे-
ष्ठिनः ॥ देवदेवोब्रवीद्वाक्यं ब्रह्माणंप्रति भारत ॥ १२२ ॥ स्तोत्रेणानेन ते ब्रह्मन् तुष्टोहं वै वरं वृणु ॥ दास्ये ते न च संदेहो
यदप्राप्यं सुरैरपि ॥ १२३ ॥ एवमुक्तः शिवेनाथ ब्रह्मा मुदितमानसः ॥ भूमौ प्रणम्य साष्टांगं कृत्वा वापि प्रदक्षिणं ॥ १२४ ॥
उवाच परया भक्त्या स्मरन् देवं महेश्वरं ॥ १२५ ॥ ब्रह्मो उवाच ॥ इमं स्तवं यः पठेत्तु रौद्रमोंकार तेऽग्रतः ॥ ब्राह्मणः क्षत्रियो

CC-0. In Public Domain. Digitization by eGangotri

वैश्यसदामुदितमानसः ॥ १२६ ॥ सर्वान् कामानवाप्नोतु इह लोके परत्र च ॥ योन्यान् कामयते कामान् तांस्तानाप्नोतु मानवः ॥ १२७ ॥ शतमेकोत्तरं नाम्नां पठित्वा स दिवं व्रजेत् ॥ १२८ ॥ ईश्वरउ० ॥ एवंभवतु वै ब्रह्मन् यत्ते मनसि वांछितं ॥ भविष्यति तथा सर्वं सत्यमेतत्त्वयोदितं ॥ १२९ ॥ एवमुक्तस्ततो ब्रह्मा नमस्कृत्य महेश्वरं ॥ दिव्यं विमानमारुह्य ब्रह्मलोकं मुदा ययौ ॥ १३० ॥ चतुर्युगसहस्रेण ब्रह्मणोहः प्रकीर्तितः ॥ अनेनैव तु वर्षाणां शतं ब्रह्मा तु जीवति ॥ १३१ ॥ पितामहशतं यावत् विष्णोर्मानं विधीयते ॥ महेशनिमिषार्द्धेन सहस्राणि चतुर्दश ॥ विनश्यंति तथा विष्णोरसंख्याता पितामहाः ॥ १३२ ॥ एवं कालगतिं ज्ञात्वा शिवमोंकारमर्चयेत् ॥ शिवाज्ञा वर्तते लिंगे तस्माल्लिंगं सदार्चयेत् ॥ १३३ ॥ द्वेष्टि लिंगं तु यो मोहात् सर्वदेवनमस्कृतं ॥ स याति नरकं घोरं शिवस्य वचनं यथा ॥ १३४ ॥ एतत्ते कथितं राजन् ॐकारोद्भवकीर्तनं ॥ श्रवणात्कीर्तनादस्य शिवलोके महीयते ॥ १३५ ॥ इति श्रीरेवामहात्मे ॐकारोत्पत्तिमाहात्म्यं नाम त्रयस्त्रिंशोध्यायः ॥ ३३ ॥ श्रीमार्कंडेय उ०॥ ततो गच्छेत्तु राजेंद्र कोटितीर्थमनुत्तमम् ॥ पिप्पलाकपिला योगे रेवायाश्च समागमः ॥१॥ अनेकानि सहस्राणि सिद्धिं प्राप्तानि संगमे ॥ क्षत्रियाणां नृपश्रेष्ठ कोटीतीर्थप्रभावतः ॥ २ ॥ स्नानमात्रो नरस्तत्र शिवलोके महीयते ॥ कोटितीर्थं हि तद्विद्धि कोटितीर्थसमन्वितं ॥ ३ ॥ ऋषिकोटिः समायाता देवकोटिः पुरानघ ॥ स्नानार्थं न्यवसंस्तत्र किंचित्कालं मुदान्विताः ॥ ४ ॥ ततः प्रभृति विख्यातं कोटितीर्थं नराधिप ॥ स्थापिता लिंगकोटिस्तु तैस्तैः संसिद्धिमिच्छुभिः ॥ ५ ॥ इति कोटितीर्थं ॥ मार्कंडेय उवाच ॥ कोटितीर्थात्पूर्वभागे हस्तद्वितयमानतः ॥ तीर्थं काकहदं नाम पक्षियोनिविमोक्षणं ॥ १ ॥ उलूकेन हताः काका रात्रौ च भरतर्षभ ॥ उलूकपातितान्यत्र कोटितीर्थेशिरांस्यथ ॥ २ ॥ काकानां जलमध्ये तु शतशोथ सहस्रशः ॥ तत्क्षणा दिव्यदेहास्तु ते काका यानमारुहन् ॥ ३ ॥ विद्याधराणां राजानो मया दृष्टाः पुरानघ ॥ वृंदश्चैवानुवृंदश्च सुमत्तोमत्त एव च ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विद्याधराणां पतयः श्रीमंतोनेकसंख्यया ॥ तत्र स्नात्वा च विधिवत् विद्याधरपतिर्भवेत् ॥ ५ ॥ इति श्रीकाकह्रदतीर्थं ॥ श्रीमा-
र्कंडेय उ० ॥ सर्वपापहरं दिव्यं लिंगं वै जंबुकेश्वरं ॥ तत्रैव नृपशार्दूल कोटितीर्थादनंतरं ॥ १ ॥ भीतश्च जंबुकः पूर्वंव्याघ्रादंष्ट्रा
भिविक्षतः ॥ तदा मेघावृते काले नर्मदाजलमाविशत् ॥ २ ॥ ममारार्धजले तीरे पातितः शिवदर्शने ॥ व्योमस्थः कृपया रुद्रः
स्तमागत्यानयद्दिवं ॥ ३ ॥ जंबुकेश्वरनाम्ना स तत्र तस्थौ हरः स्वयं ॥ जंबुकेश्वरतीर्थं तत्तत्तः प्रभृति भारत ॥ ४ ॥ शांतिदं
भयभीतानां तिर्यग्योनिविमोक्षणं ॥ तत्र स्नात्वा महाराज तिर्यग्जन्म न जायते ॥ ५ ॥ जंबुकेश्वरसंज्ञं तु रुद्रं संपूजयेत्तु यः ॥
दुःखत्रयसमायोगं तत्सर्वं तस्य नश्यति ॥ ६ ॥ इति जंबुकेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ पश्चिमे कोटितीर्थस्य स्वष्टहस्त
प्रमाणतः॥ तत्र सारस्वतं नाम सर्वतीर्थवरं स्मृतं॥ १ ॥तत्र स्नातश्च राजेंद्र हयमेधफलं भवेत्॥सिद्धा सरस्वती तत्र तीर्थस्यास्य प्रभावतः
॥ १ ॥तत्र यः कुरुते श्राद्धं पितॄणां प्रीतिवर्धनं ॥ स याति परमं स्थानं पितृभिः सह मानवः॥ लिंगं सारस्वतं तत्र ब्रह्महत्याव्यपोहनं
॥ ३॥ इतिसारस्वतं तीर्थं ॥ श्रीमार्कंडेय उ०॥ पूर्वं यकपिला प्रोक्ता गौरीवस्त्रोद्भवा नदी ॥ शृणु राजन्पुनस्तस्याश्चरित्रं पापशोधनं
॥ १ ॥ प्रवक्ष्यामि नृपश्रेष्ठ इतिहासं पुरातनं ॥ स्वायंभुवेंतरे पूर्वमादिकल्पे कृते युगे ॥ अयोध्याधिपतिःश्रीमान्धुंधुमाराह्वयो नृ-
पः ॥ २ ॥ शक्रतुल्यबलोपेतः सत्यवादी जितेंद्रियः ॥ राजलक्षणसंपन्नो देवतातिथिपूजकः ॥ ३ ॥ निराबाधा प्रजास्तस्य भयदा
रिद्रवर्जिताः ॥ चतुरंगबलोपेता भृत्यामात्यसमन्विताः ॥ ४ ॥ पूर्णकोशोतिबलवान् आयुष्मान् यज्ञदानवान् बहुपुत्रसुहृन्मि
त्रो यशस्वी कीर्तिमान् स्थिरः ॥ ५ ॥ सर्वकामदुघा तस्य पृथिवी वृक्षसंयुता ॥ स्वधर्मस्था प्रजास्तस्य शासने संप्रतिष्ठिता ॥ ६ ॥
एवं शशास वसुधां यथा शक्रस्त्रिविष्टपं ॥ एकदा मृगयां रंतुमतिरासीन्महात्मनः ॥ ७ ॥ पाशिभिश्च मृगव्याधैः सार्द्धं विंध्यवनं
ययौ ॥ वेदोद्धरणनिर्घोषैः द्विजानां चाग्निकर्मसु ॥ ८ ॥ नादिता त्रिषु लोकेषु विख्याता सप्तकल्पगा ॥ तपोपशोभितं रम्यं वि-

CC-0. In Public Domain. Digitization by eGangotri

चित्रं वनमंडलं ॥ ९ ॥ निघ्नन् जीवसहस्राणि क्षत्रियैः सह भारत ॥ विचचार वनं सर्वं ततोपश्यत्सुदारुणं ॥ १० ॥ भीमरूपं
महाघोरं दुःप्रेक्षं सुदुरासदं ॥ मेघनादेन गर्जंतं महांतं रोमहर्षणं ॥११॥ वाराहं श्वेतरूपं तु दंष्ट्रायुगलभीषणं ॥ तं दृष्ट्वा तादृशं तत्र
वाराहं नृपसत्तमः ॥ १२ ॥ उवाच क्षत्रियान् सर्वान् न दृष्टं न मया श्रुतं ॥ एतादृशं वराहस्य रूपं वै लोमहर्षणं ॥ १३ ॥ इ
त्युक्त्वा विविधैः शस्त्रै र्यावद्धंतुं समुद्यतः ॥ तावत्सघुघुरो वेगात् भयार्तः परिपीडितः ॥ १४ ॥ विवेश नर्मदातोये कोटितीर्थे स-
विद्रुतः ॥ पृष्ठतोनुप्रविश्याथ तं राजा हयवाहनः ॥ १५ ॥ पुनर्बाणैर्जघानाशु मृतकल्पं च तं व्यधात् ॥ मृतस्तत्रैव पयसि वा
राहः सुप्रतीकवत् ॥ १६ ॥ तत्क्षणाद्दिव्यदेहस्तु दिव्यं यानमवाप्तवान् ॥ अंतरिक्षस्थितं दृष्ट्वा किमिदं प्राह तं नृपः ॥ १७ ॥
परं विस्मयमापन्नः सत्यमेतद् ब्रवीहि मे ॥ तस्यैवं पृच्छते राज्ञि वराहो देवरूपधृक् ॥१८॥ प्रसन्नश्चाब्रवीद्वाक्यं शृणु राजन् निवेद
येत् ॥ अंगदं नाम गंधर्वं विद्धि मां शंकरस्य तु ॥ १९ ॥ गणैश्च देवगंधर्वैरुमया सह शंकरः ॥ क्रीडन्नास्ते स कैलासे तस्याग्रे
नृपसत्तम ॥ २० ॥ मंत्रगीतं मयागीतं जात्यादंदकलक्षणं ॥ दृष्ट्वोर्वशीं च रंभा च कामार्तेन विमोहितं ॥ २१ ॥ व्याहत्याश्रुतिकं
तद्वदिस्तरद्विकृताननं ॥ विह्वलेन मया तत्र ह्यप्सरोभिः प्रकल्पितं ॥ २२ ॥ तादृशं मां च दृष्ट्वा वै कामक्रीडावशंगतं ॥ शशा-
प नंदी कोपात्मा सूकरो मेध्यभुक् भव ॥२३॥ दशवर्षसहस्राणि भ्रमिष्यसि महीतले ॥ ब्रह्मापि निस्त्रपो रंतुं न शक्तः शिवस-
न्निधौ ॥ २४ ॥ त्वं तु गायनमात्रोत्र किंकरस्यापि किंकरः ॥ अमेध्यवद्रतस्तस्य शूकरस्येव ते कृतं ॥ २५ ॥ तस्मात्त्वं तादृशो
भूत्वा महीं विचर दुर्मते ॥ कुपितं नंदिनं ज्ञात्वा भयभीतांतरात्मना ॥२६॥ प्रसादितो मया नंदी शापांतं कृपयादिशत् ॥ दर्श-
नाद्धुंधुमारस्य कोटितीर्थावगाहनात् ॥ २७ ॥ त्यक्त्वा त्वं सुकरीं योनिं पुनः प्रत्यागमिष्यसि ॥ एतन्मे कथितं राजन् वाराहं
रूपकारणं ॥ २८ ॥ ततोहं किल्बिषात् मुक्तः तीर्थस्यास्य प्रभावतः ॥ ॐकारदर्शनाद्राजन् रेवातोयावगाहनात् ॥ प्राप्तो गंधर्वयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निं तु प्रहारान्मर्दनाच्च ते ॥ २९ ॥ विषादं त्यज . राजेंद्र गहना कर्मणां गतिः ॥ धर्मे बुद्धिं समाधाय सर्वभूतहितो भव ॥३०॥
जन्मतो मरणं राजन् मरणाज्जन्मसंभवः ॥ ज्ञात्वा शुभाशुभं कर्म त्वमात्मानं समुद्धर ॥ ३१ ॥ स्वयमेवार्जितं कर्म स्वयमेवो
पयुज्यते ॥स्वयं कर्ता च भोक्ता च शुभस्याप्यशुभस्य च ॥३२॥ स्वस्ति ते स्तु गमिष्यासीत्येवमुक्त्वा जगाम ह ॥ ध्रियमाणात
पत्रस्तु वीज्यमानोप्सरोगणैः ॥३३॥ शिवध्यानपरो भूत्वा कैलासं स नगोत्तमं ॥ गते तस्मिन्नृपश्रेष्ठः तृषितः श्रांतवाहनः ॥३४॥
॥ हयं मुमोच राजासावश्वोपकरणानिच ॥ पाययामास तं चाश्वं कपिलासंगमे जलं ॥३५॥ स्नापयित्वा च तं वेगादकरोत्तीरचा-
रिणं ॥ स्वयं स विस्मयाविष्टः सौकरं चरितंस्मरन् ॥ ३६ ॥ नृपः क्षुब्धमनाः श्रांतः उपविष्टः शिलातले ॥ यावद्विलोकयेदश्वं स्ना-
नपानादिकारितं ॥ ३७ ॥ तावत्तमंतरिक्षस्थं ब्राह्मणं सददर्श ह ॥ संत्यज्य तौरगं रूपं ब्रह्मज्ञानसमाश्रितं ॥ ३८ ॥ अत्यद्भुतं तु
तं दृष्ट्वा पुनर्विस्मयमाश्रितः॥ उवाच वचनं राजा पूर्वाश्वं ब्राह्मणं ततः ॥ ३९ ॥ किमेतत्कारणं ब्रह्मन् शंस मे त्वं यथातथं ॥
उवाच तद्वचः श्रुत्वा हयपूर्वो द्विजोत्तमः ॥ ४० ॥ गालवं विद्धि मां राजन् कुरुक्षेत्र निवासिनं ॥ ब्रह्मर्षिं शुभकर्माणं तपसा
दग्धकिल्बिषं ॥ ४१ ॥ अश्वप्रतिग्रहादग्धअश्वयोनिमवाप्तवान् ॥ पूर्वं तु निरयान् भुक्त्वा प्राप्य चारोहणीं गतिं ॥ ४२ ॥ दावाग्नि
ना तु यधं पुनस्तद्वै प्ररोहति ॥ प्रतिग्रहेण यो दग्धः सदग्धो न प्ररोहति ॥ ४३ ॥ द्रुमसेनः पुरावासीद्राजा परमधार्मिकः ॥ कां
तीपुरपतिः श्रीमान् चक्रवर्ती महाबलः ॥ ४४ ॥ राहुसूर्यसमायोगे कुरुक्षेत्रं जगामह ॥ गजानश्वान् समादाय हिरण्यं गाश्च भूप
तिः ॥ ४५ ॥ माणिक्यवज्रवैदूर्यवासांसि विविधानिच ॥ दानार्थं ब्राह्मणेभ्यश्च मुदा परमया युतः ॥ ४६॥ सूर्यपर्वणि स स्नात्वा
देवान्नभर्र्य च स्वयं ॥ दत्वा दानानि कतिचित् विप्रेभ्यः सव्रताश्रितं ॥ ४७ ॥ राजा स मुद्गलमृषिं शीलोंछवृत्तिमाश्रितं ॥ य-
याचे विनयोपेतः श्राद्धमुदिसमुद्धर्वप्राह्यरं नास्ति पार्श्वंसत् प्रतिग्रहं जीवनं ॥ ४८ ॥ असत् प्रतिग्रहं गृण्हन् नरकेषु निमजाति ॥ ४५

CC-0. In Public Domain. Digitization by eGangotri

पापयोनिशतं याति न चेत्कुर्यात्प्रतिक्रियां ॥ ४९ ॥ नाहं प्रतिग्रहग्राही प्रतिकारे न च क्षमः ॥ बहवो ब्राह्मणा संति याचस्वान्यं द्विजोत्तमं ॥ ५० ॥ ऋषिणा धिक्कृतो राजा प्रतिहारमथाब्रवीत् ॥ घोषणा क्रियतां क्षत्तस्यानेश्वर निवासिनां ॥ ५१ ॥ प्रतिग्रहाय यः सक्तः स आयात्विह सत्वरः ॥ कृतेपि घोषणे कश्चित् नागच्छेन्नृपतेः पुरः ॥५२॥ ततः स कुपितो राजा स्थानं निंदितवान् हि तत् ॥ अब्रह्मण्यमिदं स्थानं न वेदा न च याजनं ॥ ५३ ॥ न पात्रं शक्तमत्रास्ति यत्तु तारयतीतरं ॥ गर्हयित्वा तु तत्स्थानं तूष्णीं राजा बभूव ह ॥५४॥ ब्राह्मण उवाच ॥ श्रुत्वाहं नृपतेर्वाक्यं सामर्षमिदमब्रुवं ॥ गालवोहं नृपश्रेष्ठ चातुर्विद्यो महातपाः ॥ ५५ ॥ यज्ञयाजी तपस्वी च सर्वभूतहिते रतः ॥ गजमश्वरथं वापि अन्यद्वा दानमुत्तमं ॥ ५६ ॥ मह्यं देहि महाराज सर्वाभरणभूषितं ॥ तिस्रः सार्द्धाः स्वर्णकोटीर्दातुं मे यदि शक्यते ॥ ५७ ॥ सत्यमेतदहं ब्रूयां नानृतं गदितं क्वचित् ॥ अनुग्रहमहं कुर्वन् उद्धरिष्ये भवार्णवात् ॥ ५८ ॥ दास्यामि ते न संदेहस्त्वमेव मुनिसत्तमः ॥ ततश्चाश्वरथो दत्तो राजा मह्यं विधानतः ॥ ५९ ॥ मुहुरार्थ्यै द्विजैः सर्वैर्वार्थ्यमाणेन चानघ ॥ गृहीतोश्वरथस्तत्र मया सर्वांगभूषितः ॥ ६० ॥ पूर्वोक्तदक्षिणास्वर्णसहितस्तीर्थमध्यतः ॥ ततः स मां नमस्कृत्य द्रुमसेनः पुरं ययौ ॥ ६१ ॥ मयापि चाग्निहोत्रादि कर्म त्यक्त्वा यथासुखं ॥ तेन पापप्रसंगेन प्रतिकाराय नोप्यतः ॥६२॥ नानाविधाभिर्दिव्याभिः स्त्रीभिः सार्द्धं तु क्रीडितं ॥ तावत्स कामितः कामो यावद्वित्तं क्षयं गतं॥६३॥ विट्गोष्ठीषु च मे दत्तं व्यसनेषु व्ययी कृतं ॥ निर्द्रव्ये च पुनर्भिक्षा भिक्षिताशाकमूलिका ॥६४॥ श्रांतश्चेतस्ततः पश्चान्मृतोहं यत्र कुत्रचित् ॥ नानाविधाश्च निरयान् भुक्त्वा तिर्यग्वजातिषु ॥ ६५ ॥ आरोहणीगतिं प्राप्य तुरगश्चाभवं क्रमात् ॥ त्वया रूढो नरपते स्तापितः पावितस्त्वया ॥ ६६ ॥ अश्वयोनिं स्मरंश्चाहमात्मनस्तीर्थयोगतः ॥ मुक्तोहं त्वत्प्रसादेन तीर्थस्यास्य प्रसादतः॥ ६७ ॥ एतत्ते कथितं राजन् मा गास्त्वं विस्मयं पुनः ॥ पापं कुर्वन् पापबुद्धिः पापमेवाश्नुते फलं ॥६८॥ धर्मं कुर्वन् धर्मबुद्धिर्धर्मो पदमवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रुयात् ॥ तस्मात्पापं न कुर्वीत चंचले जीविते सति ॥ ६९ ॥ त्वत्प्रसादात्तथैं।कारकोटितीर्थप्रभावतः ॥ मुक्तोहं हययोनेस्तु ब्रह्म
लोकमवाप्तवान् ॥ ७० ॥ कपिलासंगमे पुण्यो यदि जानाति मानवः ॥ नोत्पद्यते तु सा बुद्धिः पापकर्मप्रदायिनी ॥७१॥ शांति
रस्तु शिवं चास्तु चिरं तिष्ठ महीपते ॥ एवमुक्त्वा ययौ विप्रो ब्रह्मलोकं सनातनं ॥७२॥ श्रीमार्कं० ॥ एकाकी सततो राजा चिं-
तयामास भारत ॥ एकाकी यद्यहं यामि निश्वरश्वरणेन तु ॥७३॥ राजानो मां हसिष्यंति हास्यवाक्यैः परस्परं ॥ दस्युभिर्वैहृत-
श्चास्य हय इत्येवमादिभिः ॥ ७४ ॥ अश्वोपस्करमादाय पल्याणं शिरसा कथं ॥ प्रवेष्टव्यं पुरं चैतन्मया लज्जाकरं ततः ॥७५॥ ए-
तावता मया तावद्ब्राह्मणारोहणं कृतं ॥ पापस्यास्य विशुद्ध्यर्थं प्रवेक्ष्यामि हुताशनं ॥७६॥ बहुकालं मयारूढं पृष्ठं विप्रस्य नित्यशः
॥ एवं संचिंत्य मनसा राजा तत्रैव सत्वरं ॥ ७७ ॥ दक्षिणां दिशमाश्रित्य शुष्ककाष्ठानि चाहरन् ॥ ततः प्रज्वाल्य वन्हिं स कृ-
त्वा च त्रिःप्रदक्षिणं ॥ ७८ ॥ नमस्कृत्य च वन्हिं स विवेश स्वगृहं यथा ॥ किंचिद्दग्धे चितारूढे नृपे देवी जलात्ततः ॥ ७९ ॥ सा-
क्षाद्रूपं समास्थाय विचित्राभरणांबरा ॥ दिव्य गंधानुलिप्ता च दिव्यस्रग्भिर्विभूषिता ॥८०॥ तं गृहीत्वा करे देवी त्विदं वचनमब्र-
वीत् ॥ अप्राप्ते मरणे राजन् काले च विदिते तव ॥८१ ॥ अकस्मात्साहसं देव युक्तं न प्रतिभाति मे ॥ कालप्राप्तं नरं राजन्नीश्व-
रोपि न रक्षति ॥ ८२ ॥ राजोवाच ॥ नाहं गंगा भवानी वा कपिलां विद्धि मां नृप ॥ ध्रुवं रुद्रांगसंभूता नर्मदाजलसंभवा
॥८३ ॥ गिरिजास्नानवस्त्रोत्था संभूतिर्मम पूर्वतः ॥ द्वितीया वसुदानस्य यक्षे कल्पे तु पौर्विके ॥८४॥ सोमावभृत्यमध्ये तु स-
मोत्पत्तिरिहाभवत् ॥ ब्रह्मविष्णुमहेशानां स्नानार्थोद्भूतवारिभिः ॥ ८५ ॥ तिलोदकैर्मुनीनां च प्रणिताकलशोदकैः ॥ तथासो-
मरसैश्चैव मधुदुग्धाज्यमिश्रितैः ॥ ८६ ॥ तत्र श्रुतः प्रवाहो मे द्रवद्रव्यैर्महान् पुरा ॥ रेवाजलसमुद्भूतां रुद्रपादसदाश्रितां ॥ ८७ ॥
रेवां पुनः प्रवाहेण संगताहं नृपोत्तम ॥ रुद्रावर्तपदं चात्र विद्यते मुक्तिदायकं ॥ ८८ ॥ मार्कंडेयाश्रमं गच्छ पूर्वभागे व्यवस्थितं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सपादलक्षं तत्रास्ति ऋषीणां ब्रह्मचारिणां ॥ ८९ ॥ जपध्यानरतानां च नानाव्रतवतां तथा ॥ एवमुक्तो ययौ राजा देवी चांतर्दधे
ततः ॥ ९० ॥ हृष्टपुष्टश्चक्रवर्ती मार्कंडेयाश्रमं ययौ ॥ गत्वा प्रणम्य तमृषिमुपविष्टस्तथा यतः ॥ ९१ ॥ ऋषिणा चार्घपाद्यैस्तु
सत्कृतो ह्यासनेन च ॥९२ ॥ मार्कंडेय उवाच ॥ कुशलं ते नृपश्रेष्ठ धर्माचारविशारद ॥ कथं स्वाश्वं परित्यज्य एकाकी त्वमि
हागतः ॥ ९३ ॥ राजोवाच ॥ अद्य मे सफलं जन्म त्वत्पदांबुजदर्शनात् ॥ वृत्तांतं च तथा राजा कथयामास पौर्विकं ॥ ९४ ॥
मार्कंडेयस्ततः श्रुत्वावृतांतं पृथिवीपतेः ॥ रेवाकपिलयोर्योगे स्नात्वा स्तोत्रमिदं जगौ ॥ ९५ ॥ ध्रुवं स्नाता दिवं यांति रेवाकपि-
लसंगमे ॥ प्रवाहसन्मुखं वीक्ष्य संस्मरन् कपिलांहृदि ॥ ९६ ॥ साधुसाधु शुभे भद्रे अकल्याणप्रणाशिनी ॥ कपिले सरितांश्रेष्ठे साधुरेवासमा
श्रये ॥ ९७ ॥ अमृता पुण्यगर्भा त्वं त्वमेव कलुषापहा ॥ सरस्वती तथा गंगा यमुना गौतमी शुभा ॥ ९८ ॥ रेवा प्राप्रा च
वरुणा असि त्वं शतरुद्रिका ॥ चंद्रभागा च सिंधुश्च गोमत्यैरावती तथा ॥ ९९ ॥ चर्मण्वती वितस्ता च गभस्ती च मही-
तथा ॥ सरयूर्गल्लकी चैव घर्घरा वदरी तथा ॥१००॥ गंडकी वेणुका चैव पारा वेत्रवती इरा ॥ विवशा च तथा वाहा पयोष्णी शंष्णीरिव
नी तथा ॥ १०१ ॥ वेत्रिका चैव कावेरी भीमा कृष्णा तथांबिका ॥ भद्रा सुभद्रा तारा त्वं करतोयाथ मालिनी ॥१०२॥ एता-
श्च न्यासरिश्चैव त्वत्स्वरूपास्त्वमेव वा ॥ सर्वतीर्थमयी यस्मात्सर्वगे त्वां नमाम्यहं ॥ १०३ ॥ लोकत्रयं त्वया व्याप्तमपांरूपेण
सुव्रते ॥ प्रसीद त्वं महाभागे लोकत्रितयपावनी ॥१०४॥ एवंस्तुतवतो देवी मार्कंडस्य तपोनिधेः ॥ पुष्पकं यानमारूढा सर्वाभर-
णभूषिता ॥ १०५ ॥ चतुर्भुजा त्रिनेत्रा च चंद्रबिंबनिभानना ॥ उवाच वचनं देवी मार्कंडं मुनिसत्तमं ॥ स्तोत्रेणानेन तुष्टाहं
वरं वरय सुव्रत ॥ १०६ ॥ मार्कंडेय उवाच ॥ यदि तुष्टासि देवि त्व वरं दातुं ममेच्छसि ॥ कल्मषं हर कल्याणि लोकानां
भवसंभवं ॥ १०७ ॥ देवि त्वत्संगमे स्नात्वा ध्रुवं यांति शिवांतिक ॥ प्रसन्नाचेद्वरं देहि धुंधुमाराय सांप्रतं ॥ १०८ ॥ एष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 राज्यं महद्भुक्त्वा सांतःपुरप्रतिग्रहा ॥ यं यं चिंतयते कामं तं तं प्राप्नोति सुव्रते ॥ १०९ ॥ देहांते च दिवं यातु पुत्रदारजनैः
सह ॥ ११० ॥ कपिलोवाच ॥ एवं भवतु विप्रेंद्र मत्तो यद्वांछितं त्वया ॥ तत्तदान्योनुतु नृपतिस्त्वत्प्रसादाद्विशेषतः
॥ १११ एवमुक्त्वा ययौ देवि कपिला लोकपावनी ॥ मार्कंडं च ततो राजा मुनिभिः परिवारितं ॥ ११२ ॥ प्रणिपत्य य-
थान्यायं गतस्तु स्वपुरं तदा ॥ ततः कालेन महता धर्मकर्मपरो नृपः ॥ ११३ ॥ दानं दत्वा मखैरिष्ट्वा भुक्त्वा राज्यमकंटकं ॥
सपुत्रामात्य भृत्यश्च धुंधुमारो दिवं गतः ॥ ११४ ॥ एतत्ते कथितं सर्वं मया दृष्टं पुरा यथा ॥ श्रवणात्कीर्तनादस्य मुच्यते भ-
वबंधनात् ॥ ११५ ॥ तत्रैव संगमे तीर्थे दैत्यसूदनसंज्ञितं ॥ चक्रतीर्थं च परमं सर्वपापप्रणाशनं ॥ ११६ ॥ वामनप्रभृती
न्याहुर्लक्षतीर्थानि तत्र वै ॥ पृथक् वक्तुं न शक्यंते तानि तीर्थानि भारत ॥ ११७ ॥ इति श्रीवायवीये रौद्रीसंहितायां कपिला-
संगममाहात्म्यं नाम चतुस्त्रिंशोध्यायः ॥ युधिष्ठिर उवाच ॥ के व्रजंति यमं विप्र कीदृशा नरका हि ते ॥ एतन्मे सर्वमाख्याहि
स्वर्गलोकं व्रजंति के ॥ १ ॥ मार्कंडेय उवाच ॥ यांति ते पुष्पयानेन पुष्पारामप्रदायिनः ॥ देवायतनकर्त्तारो यांति मर्त्या
श्रमस्य च ॥२॥ अनाथमंडलानां च ते क्रीडंति ग्रहोत्तमे ॥ दिव्यवर्षशतं केचित्सहस्रं केपि साधिकं ॥ स्वर्गे वसंति नियतं स्वश-
क्त्या धर्मसाधकाः ॥ देवाग्निगुरुविप्राणां मातापित्रोश्च पूजकाः ॥ ४ ॥ पूज्यमाना नरा यांति कामयानैर्यथासुखं ॥ द्योतयंति दिशः
सर्वा याति दीपप्रदानतः ॥ ५ ॥ प्रतिश्रुत्य प्रदानेन सुखं यांति सुरालयं ॥ सर्वकामसमृद्धेन यथा गच्छति गोप्रदः ॥ ६ ॥
ये चान्नपानं यच्छंति ते तृप्ता यांति मानवाः ॥ अन्नौषधप्रदानेन सुखं यांति निराकुलाः ॥ ७ ॥ दीप्यमाना हि गच्छंति गुरुशु-
श्रूषणे रताः ॥ पादाभ्यंगचयो दद्यात्सोश्वपृष्ठेन गच्छति ॥ ८ ॥ पादुकोपानहौ दत्वा अश्वारूढो दिवं व्रजेत् ॥ हेमरत्नप्रदानेन
यांति रत्नविभूषिताः ॥ ९ ॥ सुखं चान्नप्रदा यांति नरयानेन मानवाः ॥ सर्वकामसमृद्धात्मा भूमिदानेन गच्छति ॥ १० ॥ अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नपानप्रदानेन हृष्टस्तुष्टो दिवं वसेत् ॥ इत्येवमादिभिर्दानैः सुखं यांति सुरालयं ॥ ११ ॥ स्वर्गे च विपुलान् भोगान् प्राप्नुवंत्यन्न-
दानतः ॥ सर्वेषामेव दानानामन्नदानं परं विदुः ॥ १२ ॥ सदाप्रीतिकरं दिव्यं बलपुष्टिविवर्द्धनं ॥ नान्नदानसमं दानं त्रिषु
लोकेषु विद्यते ॥ १३ ॥ अन्नाद्भवंति भूतानि म्रियंते तदसंभावतः ॥ रक्तं मांसं वसा शुक्रं क्रमादन्नात्प्रवर्द्धते ॥ १४ ॥ शु-
क्राद्भवंति भूतानि तस्मादन्नमयं जगत् ॥ हेमरत्नैश्च राजेंद्र नारी स्रक् चंदनादिभिः ॥ १५ ॥ समस्तैरपि संप्राप्तैर्न रमंते बुभु-
क्षिताः॥ गर्भस्था जायमानाश्च बालवृद्धाश्च मध्यगाः ॥१६॥ आहारमभिकांक्षंते यतयो देवदानवाः ॥ क्षुधैव सर्वव्याधीनां व्याधिः
श्रेष्ठतमो मतः ॥ १७ ॥ तस्यान्नौषधदानेन प्रतीकारः प्रकीर्तितः ॥ नास्ति वै क्षुत्समं दुःखं नास्ति रोगः क्षुधासमः ॥ १८ ॥
नास्त्याहारसमं सौख्यं जीवनं नान्नतः परं ॥ अतएव महापुण्यमन्नदानेन भारत ॥ १९ ॥ अतः क्षुदग्निसंतप्ता म्रियंते सर्व-
जंतवः ॥ अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वदः ॥ २० ॥ तस्मादन्नप्रदानेन सर्वदानफलं लभेत् ॥ त्रैलोक्ये यानि दानानि
भोग्यं स्त्रीवाहनानि च ॥ २१ ॥ अन्नपानादि यत्किंचिदैश्वर्यं च युधिष्ठिर ॥ अन्नदानस्य तत्सर्वमिहामुत्र फलं लभेत् ॥ २२ ॥
यस्यान्नपानपुष्टांगः कुरुते धर्मसंचयं ॥ अन्नदातुश्च तस्यार्द्धं कर्तुश्चार्द्धं न संशयः ॥ २३ ॥ धर्मार्थकाममोक्षाणां देहः परमसाधनं
॥ अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयं ॥२४॥ तस्मादन्नसमं दानं न भूतं न भविष्यति ॥ त्रयाणामपि लोकानामुदकं
जीवनं स्मृतं ॥ २५ ॥ पवित्रममृतं दिव्यं शुद्धं सर्वरसायनं ॥ नाम्नापि जीवनं तस्माद्वितीया धूर्जटेस्तनुः ॥ २६ ॥ अन्नपाना-
श्व गोवत्सशय्याछत्रासनानि च ॥ प्रेतलोके प्रशस्तानि दानान्यष्टौ युधिष्ठिर ॥ २७ ॥ एवं पानविशेषेण धर्मराजपुरं नराः
यस्माद्यांति सुखं चैव तस्माद्धर्मं समाचरेत् ॥ २८ ॥ अन्नदानं महाराज जलं चैव तु पुष्कलं ॥ पितृभ्यः प्रयते दद्यात्तीर्थे
चैवामरेश्वरे ॥ २९ ॥ तीर्थानि पुण्यक्षेत्राणि यानि वै कीर्तितानि च ॥ काममोक्षप्रदानीह सर्वसिद्धिकराणि च ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सर्वेषामपि तेषां वै मातेयं परिकीर्तिता ॥ नर्मदा सरितां श्रेष्ठा सर्वकल्पवहा नृप ॥ ३१ ॥ तपसां यज्ञदानानां
संख्या तीर्थेषु विद्यते ॥ नर्मदायां न संख्यास्ति तेषामित्याह शंकरः ॥ ३२ ॥ यथा शिवस्तथा रेवा पूजनीया
प्रयत्नतः ॥ ये चापि क्रूरकर्माणः पापा दानविवर्जिताः ॥ ३३ ॥ तेषां शृणु महाराज यातना वै समासतः ॥ यथा
घोरेण ते यांति दक्षिणेन यमालयं ॥ ३४ ॥ षडशीतिसहस्राणि योजनानां हि तत्पुरं ॥ इतोग्रेयं महारौद्रं नानारूपैरधिष्ठि-
तं ॥ ३५ ॥ समीपस्थमिवाभाति नृणां तच्छुभकर्मणां ॥ पापानामेव दूरस्थं यथारुद्रेण जायते ॥ ३६ ॥ तीव्रकंटकयुक्तेन कर्करा
पूरितेन च ॥ क्षुरधारावृतैस्तीक्ष्णैः पाषाणैर्निचितेन च ॥ ३७ ॥ केचित्पंकेन महता दुरुत्तारैश्च पातकैः॥लोहशूलीभिरुग्राभिर्नि-
र्मितेन क्वचित् क्वचित् ॥ ३८ ॥ लताप्रतानविषये पर्वते वृक्षसंकुले ॥ सुतप्तांगारपूर्णेन यांति मार्गेण दुःखिताः ॥ ३९ ॥ क्वचि-
द्विषमगर्ताढ्ये क्वचिल्लोष्टेष्टकान्विते ॥ सुतप्तवालुकामिश्रे तथा तीक्ष्णैश्च शंकुभिः ॥४० ॥ अनेकभग्नशाखाभिरावृते च क्वचित् क-
चित् ॥ कष्टेन मनसा केचित् गच्छंत्यालंबिताः क्वचित् ॥ ४१ ॥ मार्गं शृंगाटकैस्तप्तैस्तथा दावाग्निवेष्टिताः ॥ क्वचित्तप्तशिलाभिश्च
पंकेन कटिमानतः ॥ ४२ ॥ क्वचिद्दृष्टयांबुना पूर्णे करीषाग्निचिते क्वचित् ॥ क्वचित् गृध्रबकव्याघ्रदंशकीटैः सुदारुणैः ॥ ४३ ॥ क
चिन्महद्दूलुकैश्च क्वचिच्चाजगरावृते ॥ भ्रमरीभिश्च रौद्राभिः क्वचित्सर्पैर्विषोल्बणैः ॥ ४४ ॥ मत्तमातंगयूथैश्च समंताच्च प्रमाथिभिः॥
पंथानमुल्लिखद्भिश्च तीक्ष्णशृंगैर्महाबलैः ॥ ४५ ॥ महाविषाणैर्महिषै रौद्रैर्मत्तैस्तथा वृते ॥ डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः
॥ ४६ ॥ मूर्तैश्च व्याधिभिर्घोरैः पातकैश्च दुरासदैः ॥ महापाषाणवर्षेण महाचंडेन वायुना ॥ ४७ ॥ धूलीनिकरमिश्रेण हन्यमाना
निराश्रयाः ॥ क्वचिद्विद्युत्प्रपातेन दार्यमाणा व्रजंति हि ॥ ४८ ॥ महता पांसुवर्षेण शीतेन च रुदंति हि ॥ महामेघरवैर्घोरैर्वित्रा
स्यंते मुहुर्मुहुः ॥ ४९ ॥ निशितायुधवर्षेण चूर्यमाणाश्च सर्वशः ॥ महाक्षारांबुधाराभिः सिच्यमानास्तथोपरि ॥ ४९ ॥ क्वचिद्रुदंति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धावंति क्षुत्तृषार्त्ताः पतंति च ॥ अपावृत्तशरीराश्च कृष्यंते केचिदुत्पथाः ॥ ५० ॥ इत्थं संतप्तरौद्रेण दुर्गेणांदोलितेन च ॥ निरालं-
वेन मार्गेण निर्जलाछायकेन च ॥ ५१ ॥ अविश्रामेण धुर्येण यांति पापवृता यमं ॥ तमोरूपेण कष्टेन सर्वदुःखाश्रयेण च ॥ ५२ ॥
नीयंते देहिनः सर्वे मूढा पापपरायणाः ॥ यमदूतैर्महाघोरैर्यमाज्ञाकारिभिर्बलात् ॥ ५३ ॥ एकाकिनः पराधीना मित्रबंधुविवर्जिताः॥
शोचंतः स्वानि कर्माणि दह्यंते चमुहुर्मुहुः ॥ ५४ ॥ प्रेतीभूर्तविवस्त्राश्च शुष्ककंठोष्ठतालुकाः ॥ निराश्रयाः कृशांगाश्च त्रस्ता भीता
क्षुधान्विताः ॥ ५५ ॥ केचिच्छृंखलया बद्धा गलेषु दृशर्येषु वा ॥ कृश्यंते कर्कशे मार्गे यमदूतैर्बलोत्कटैः ॥ ५६ ॥ घृष्यमाणा मु-
खेरस्का घृष्टपुष्टकटीतटाः ॥ केशपाशविबद्धाश्च जठरे च प्रपीडिताः ॥ ५७ ॥ ग्रीवापाशविकृष्टाश्च प्रयांत्यन्येसुदुःखिताः॥ जिव्हां
शंकुप्रदानेन समानीय कृकाटिकां ॥ ५८ ॥ अर्द्धचंद्रेण गृह्यंते क्षिप्यमाना इतस्त्वतः ॥ शिश्ने वृषणयोश्चैव ज्वालबद्धा तथा
परे ॥ ५९ ॥ विछिन्न हस्तपादाश्च छिन्नकर्णोष्टनासिकाः ॥ विछिन्नशिश्नवृषणाः छिन्नजिव्हांगसंधयः ॥ ६० ॥ अंकुशैर्भिद्यमानाश्च
दश्यमानाःसरीसृपैः ॥ इतश्चेतश्चधावंति क्रंदमाना निराश्रयाः ॥ ६१ ॥ मुद्गरैर्लोहदंडैश्च घनघातैश्च संडशैः ॥ कशाभिश्च प्रतोदैश्च
हन्यमानाः पुनः पुनः ॥ ६२ ॥ भिंडमालैर्विशीर्यंते वमंतः शोणितं मुहुः ॥ याचमानाश्च सलिलमन्नं चापि बुभुक्षिताः ॥ ६३ ॥
छायां प्रार्थयमानाश्च शीतार्ताश्चानलं तथा ॥ दानहीनाः प्रयांत्येवं प्रार्थनाविमुखा नराः ॥ ६४ ॥ यैः कृतं शुभपाथेयं सुखं ते
यांति वै यमं ॥ एवं यथातिकष्टेन प्राप्ताः प्रेतपुरं नराः ॥ ६५ ॥ प्रज्ञापितास्तथा दूतैर्निवेश्यंते यमाग्रतः ॥ तत्र ये शुभकर्माणः
स्तान्वै संभावयेद्यमः ॥ ६६ ॥ स्वागतासनदानेन पाद्यार्घप्रियभाषणैः ॥ धन्या यूयं महात्मान आत्मनो हितकारिणः ॥ ६७ ॥
यतो दिव्यसुखार्थं हि भवद्भिः सुकृतं कृतं ॥ नर्मदातटमाश्रित्य पर्वते मरकंटके ॥ ६८ ॥ स्नानं दत्तं तपस्तप्तं हुतं ध्यातं तथार्चि-
तं ॥ श्रुतं स्तुतं च सद्वाक्यं दृष्टं चोपकृतं तथा ॥ ६९ ॥ यातं नतं स्थितं चैव मनः पूर्वं विधानतः ॥ वाराणस्यां कुरुक्षेत्रे प्रया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गे पुष्करे तथा ॥ ७० ॥ गयायां निमिषारंण्ये गंगासागरसंगमे ॥ केदारे भैरवे चापि प्रभासे शशिभूषणे ॥ ७१ ॥ महाकालवने
रंम्ये श्रीशैले त्रिपुरांतके ॥ हरिश्चंद्रे पुरश्चंद्रे वाराहे विंध्यपर्वते ॥ ७२ ॥ त्रियंबके धौतपापे नीलकंठे तथैव च ॥ गंगाद्वारे हिम-
स्थाने तथा कालंजिरे गिरौ ॥ ७३ ॥ एतेष्वन्येषु तीर्थेषु क्षेत्रेषु च यथाक्रमं ॥ यात्वा स्नात्वा तथा चिंत्वा स्तुत्वा नत्वा विधान-
तः ॥ ७४ ॥ दत्वा तप्त्वा तथा ध्यात्वा लब्धं जन्मफलंध्रुवं ॥ भवद्भिः शीलसंपन्नै श्रुतशास्त्रैश्च सत्तमाः ॥ ७५ ॥ इमं विमानमा-
रुह्य दिव्यस्त्रीभोगभूषितं ॥ गछध्वं वांछितं स्वर्गं सर्वकामसमन्वितं ॥ ७६॥ तत्र भुक्त्का महाभोगानत्यंतान् पुण्यसंख्यया ॥ य-
त्किंचिदन्यदशुभं स्वल्पं तदपि भोक्ष्यथ ॥ ७७ ॥ पृष्टस्तैर्धर्मराजा तु पतनं पुण्यमेव च ॥ उवाच तान् धर्मराजः श्रृणुते देहिस-
त्तमाः ॥ ७८ ॥ सर्वेषामस्ति पुण्यत्नां पतनं भोगपृष्ठतः ॥ कालेन बहुना चैव नानारोगा भवंतिच ॥ ७९ ॥ केचिद्वै कर्मजा रो-
गाः केचिद्देवप्रकोपजाः ॥ केचिद्विप्रावमानाच्च केचिद्वै भूतवैकृताः ॥ ८० ॥ आंगिकाः केचिदत्युग्राः वातपित्तकफोद्भवाः ॥ तेषामु-
पशमः कार्यो भवद्भिर्यां र्वचनान्मम ॥८१॥ इतिलब्ध्वा तदादेशं मोहविक्लवमानसाः ॥ विषण्णवदनो स्पेन वर्जयित्वा तुकल्पगां ॥८२॥
आस्ने वै कल्पगा यावत्कल्पगातीर वासिनः॥ आरोहंति विमानानि सर्वेषामुपरिस्थिताः॥८३॥ सर्व तीर्थेषु संख्यास्ति दानस्यो त्क्रमणस्य
च॥ कल्पगाया न संख्यास्तीत्युक्तं ब्रह्मादिभिः पुरा ॥८४॥ तत्रयद्दीयते दानं स्वल्पं वा यदि वा बहु ॥ तदसंख्यं भवेन्नूनमनंतं स्वर्ग-
मश्नुते ॥८५॥ म्रियते तत्र यः कश्चित्पतनानशनादिभिः ॥ दिव्यं यानं समाश्रित्य ब्रह्माणामेकभुक् भवेत् ॥८६॥ तत्रापि भावना
योगात् तत्तथा ह्यधिवासिनं ॥ शिवसंनिधिमाप्नोति यदि वा ब्रह्मलोकभुक् ॥ ८७ ॥ प्रयाति वाविष्णुलोकं विष्णोरनुचरो भवेत्
॥ ८८ ॥ एतत्ते कथितं राजन् कपिला संगमाश्रितं ॥ ॐकारसंभवे चैव तीर्थे चामरकंटके ॥ ८९ ॥ पश्यंति पुण्यकर्माणो धर्मं
मित्रमिवात्मनः ॥ ये पुनः क्रूरकर्माणस्ते पश्यंति भयानकं ॥ ९० ॥ पापावष्टब्धनयना विपरीतात्मबुद्धयः ॥ दंष्ट्राकरालवदनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भृकुटीकुटिलेक्षणं ॥ ९१ ॥ अर्धकोशं महाश्मश्रुं प्रस्फुरदधरोत्तरं ॥ अष्टादशभुजं क्रूरं नीलांजनचयोपमं ॥ ९२ ॥ सर्वायुधो-
त्तमधरं गर्जंतं दंडपाणिकं ॥ महामहिषमारूढं दिप्ताग्निसमलोचनं ॥ ९३ ॥ रक्तमाल्यांबरधरं महामेरुमिवोत्थितं ॥ प्रलयांबुद-
निर्घोषं पिबंतमिववारिधिं ॥ ९४ ॥ ग्रसंतमिव त्रैलोक्यं उद्गिरंतमिवानलं ॥ मृत्युस्तस्य समीपस्थो वह्निकालानलो यथा ॥९५॥
कालश्चांजनसंकाशः कृतांतश्च भयानकः ॥ मकरश्चोग्रमकरः कालरात्रीच दारुणा ॥ ९६ ॥ विविधा व्याधयः कुत्सा नानारूपभ-
यावहाः ॥ शक्तिशूलांकुशधराः पाशचक्रासिधारिणः ॥ ९७ ॥ वज्रपट्टिशचंडाश्च रौद्रास्तूणधनुर्द्धराः ॥ असंख्यातामहावीर्याः क्रूरा-
श्चांजनसन्निभाः ॥ ९८ ॥ सर्वायुधोत्तमधरा यमदूता भयानकाः ॥ एवं विधेन चानेकपरिवारेण संवृतं ॥ ९९ ॥ यमं पश्यंति
पापिष्टाश्चित्रगुप्तं च भापणं ॥ निर्भर्त्सयति चात्यर्थं यमो वै पापकारिणां ॥ १०० ॥ चित्रगुप्तश्च भगवान्धर्मवाक्यैः प्रबोधयेत्
॥ भोभो दुःकृतकर्माण परद्रव्यापहारकाः ॥ १०१ ॥ गर्विता रूपवीर्येण परदारप्रधर्षणाः ॥ यः स्वयं क्रियते कर्म तत्स्वयं भुज्यते
पुनः ॥ १०२ ॥ तत्किमात्मोपघातार्थं भवद्भि‍ः दुष्कृतं कृतं ॥ किमर्थं परितप्यध्वं पीड्यमानाः स्वकर्मभिः ॥ १०३ ॥ भुंजंतु
स्वानि कर्माणि नास्तिदोषोस्ति कस्यचित् ॥ एतांश्च पृथिवीपालान् संपश्यध्वं समीपतः ॥ १०४ ॥ स्वकीयैः कर्मभिर्घोरैः दुः-
प्रज्ञाबलगर्वितान् ॥ भोभो नृपादुराचाराः प्रजाविध्वंसकारिणः ॥१०५॥ स्वल्पकालेन राज्येन कृतं वै दुष्कृतं परं ॥ भवद्भिः राज्यलो-
भेन मोहेनान्यायतः प्रजाः ॥१०६॥ यद्दंडिता फलं तस्य यूयं मुग्धं यथा तथं ॥ क्वतेराज्यं कलत्रं वा यदर्थमशुभं कृतं ॥ १०७ ॥
तत्सर्वं स्वं परित्यज्य यूयमेकाकिनः स्थिताः ॥ तद्बलंवो नपश्यामि येन विध्वंसिताः प्रजाः ॥ १०८ ॥ यमदूतैर्यात्यमानाना
मधुना कीदृशं भवेत् ॥ १०९ एवं बहुविधैर्वाक्यैरूपालब्धा यमेनते ॥ शोचंति स्वानि कर्माणि तूष्णीभूतास्तु पार्थिवाः ॥११०॥
इतिवाक्यैः समादिश्य नृपांस्तान् धर्मराट् ततः ॥ तेषां पाप विशुध्यर्थं यमो दूतांस्तथा ब्रवीत् ॥ १११ ॥ भोभो चंड महाचंड

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कैवर्ताजगरानल ॥ हंतुराश्मकवाहीक गृहीत्वा नृपतीनिमान् ॥ ११२ ॥ विशोधयध्वं पापेभ्यः क्रमेण नरकाग्निषु ॥ शोध्यंते धा-
तवो यद्वत् क्षारदाहाम्लशीसकैः ॥ ११३ ॥ पुटैश्च धमनैर्यद्वत् कुट्टनैः पाचनैरपि ॥ धर्मराजवचः श्रुत्वा दूतास्ते चाप्तकारिण;
॥ ११४ ॥ ततः शीघ्रं समुत्थाव नृपान् संगृह्य पादयोः ॥ भ्रामइत्वा तु वेगेन चिक्षिपुर्यमकिंकराः ॥ ११५ ॥ सर्व प्राणेन मह
ता सुप्रतप्ते महीतले ॥ आस्फालयंति च तथा अश्मसारमये द्रुमे ॥ ११६ ॥ ततस्ते सर्वएवास्त्रनिपातैर्जर्जरीकृताः ॥ विसंज्ञाश्च
तदासीरन् निश्चेष्टाश्च युधिष्ठिर ॥११७॥ ततस्ते वायुना स्पृष्टाः शनैरुज्जीविता पुनः ॥ पुनः पापविशुध्यर्थं क्षिप्यंते नरकार्णवे ॥११८॥
अष्टाविंशतिरेवाधः क्षितौ नरककोटयः ॥ सप्तत्याश्च तलस्यांते घोरेतमसि संस्थिताः ॥११९॥ अतिघोरा महाघोरा घोरा घोर तरा-
स्तथा ॥ अत्यंतदुःखजननी घोररूपाच पंचमी ॥ १२० ॥ षष्ठी तरणताराख्याः सप्तमी च भयानका ॥ अष्टमी कालरात्री च न-
वमी च भयोत्कटा ॥ १२१ ॥ दशमी विषचंडाच महाचंडा ततोप्यधः ॥ चंडकोलाहला चैवप्रचंडा च वराङ्गका ॥ १२२ ॥ प-
द्मा पद्मवती भीमा भीषणी चैव नायिका ॥ कराला विकराला च वज्रा विंशतिमा स्मृता ॥ १२३ ॥ त्रिकोणा पंचकोणा च
सुदीर्घा परिवर्त्तुला ॥ सप्तभौमाष्टभौमाच सुदीप्तामिति चापरा ॥ १२४ ॥ रतिता नामतः प्रोक्ता घोरा नरककोटयः ॥ अष्टाविंश-
तिरेवास्तु जंतूनां यातनाभुवः ॥ १२५ ॥ तासां क्रमेण विज्ञेयाः पंचपंचैव नायकाः ॥ प्रत्येकं सर्वकोटीनां नामतस्तु विशांप-
ते ॥ १२६ ॥ रौरवः प्रथमस्तेषां रोदंति यत्र जंतवः ॥ महारौरवपीडाभिःर्महदुच्चैरुदंति हि ॥ १२७ ॥ तमः शीतं तथा चोष्णं
पंचैते नायकास्मृताः ॥ अघोरः प्रथमस्तीक्ष्णः पद्मसंजीवनः शठः ॥ १२८ ॥ महामायी विलोमश्च कंकट. कटकस्तथा ॥ तीव्रवेग
करालश्च विकरालः प्रकंपनः ॥ १२९ ॥ महापद्मः सुवक्रश्च कालसूत्रः प्रगर्जनः ॥ सूचीमुखंसुनेमिश्च खादकः सुप्रपीडिकः ॥ १३० ॥
कुंभिपाकः सुपाकश्च क्रकचो यंत्रपीडकः ॥ अंगारराशिर्वधकः असृक्पूयऱ्हदस्तथा ॥ १३१ ॥ सुतीक्ष्णतुंडशकुनिर्महासंवर्तक.

CC-0. In Public Domain. Digitization by eGangotri

क्रमिः॥ तप्तजंतुः पंकलेपः पूतिमांसद्रवस्त्रपुः ॥ १३२ ॥ उच्छ्वासश्च सुनिरुच्छ्वासः सुदीर्घः कूटशाल्मलिः ॥ दुरिष्टः सुमहानादः प्रवहः संप्रवाहनः ॥ १३३ ॥ वृषशोफो वृषास्यश्च सिंहव्याघ्रगजाननाः ॥ श्वशूकराजमहिषवृषमेषखराननाः ॥ १३४ ॥ ग्राहकुंभीरनक्रास्या महाघोणभयानकाः ॥ सर्वभक्षात्मभक्षश्च सर्पकौर्मश्च वायसाः ॥ १३५ ॥ गृध्रोलूकाश्च भल्लूकाः शार्दूलकपिकर्कराः ॥ गंडकाः पिंगनेत्राश्च पूतिवक्त्राश्च मार्तिकाः ॥ १३६ ॥ कर्णधूमतुषाग्निश्च क्रमिणां निचयस्तथा ॥ आतंकश्चाप्रतिष्ठश्च रुधिरान्धश्च भोजनः ॥ १३७ ॥ कालांबुगात्ममंत्रश्च श्लेष्मभक्षः सुदारुणः ॥ कर्कटः सुविलासश्च विकटः कटपूतनः ॥ १३८ ॥ अंबरीषकटाहश्च कष्टा वैतरणी नदी ॥ सूतपुर्तोऽहशंकुश्च एकपादः स्त्रुपूरणः ॥१३९॥ असिपत्रवनं घोरं अस्थिभंगः प्रपीडनः॥ तिलातसीक्षुयंत्राणि कूटपापप्रमर्दनः ॥१४०॥ महाचुल्ही तिचुल्ही च तप्तलोहमयी शिला ॥ पर्वतः क्षुरधाराक्षः नाथो यमलपर्वतः ॥१४१॥ कफविष्टादिकूपश्च शातनः पातनस्तथा ॥ मुशलोलूखलीयंच शिलाशकटलांगलाः ॥ १४२॥ तालपत्रासिगहनं महामशकमंडपः ॥ संमोहिनोस्थिभंगश्च तप्तशूलं अयोगुडः ॥ १४३ ॥ बहुदुःखो महादुःख कश्मलो यमतस्तथा ॥ हालाहलो विरुपश्च यंत्रको गैःफणस्तथा ॥ १४४ ॥ एकपादस्त्रिपादश्च सुधापिष्टश्च मुद्गरः ॥ अष्टाविंशतिरित्येतेक्रमशःपंचकास्मृताः ॥१४५॥ कोटीनां नामरुपाश्च पंचपंचैव नायकाः ॥ रौरवाद्यं मुद्गरांतं नरकाणांशतं स्मृतं ॥१४६॥ चत्वारिंशत्समधिकं महानरकमंडलं ॥ भुंज्यंते क्रमशस्त्वेते नरैः कर्मानुरूपतः ॥ १४७ ॥ कामनाभिर्विरूपाभिरकर्मप्रक्षयाद्दृशं ॥ आमलप्रक्षयं यर्वत् ध्मायंते गनौहिधातवः ॥ १४८ ॥ तद्वत्पापक्षयात्पापाः शोध्यंते नरकाग्निषु ॥ हस्तयोः पादयोर्बध्वा तप्तशृंखलया नराः ॥ १४९ ॥ महावृक्षस्य शाखासु लंब्यंते यमकिंकरैः॥ ततस्तान् सर्वयत्नेन दोलयंति ह किंकराः ॥ १५० ॥ दोलितास्त्वातिवेगेन निःसंज्ञा यांतिदेहिनः ॥ अंतरिक्षे स्थितानां च लोहभारशतं ततः ॥ १५१ ॥ पादयोर्बध्यते तेषां यमदूतैर्बलोत्कटैः ॥ तेन भारेण महता भृशं संताडिता नराः ॥ १५२ ॥ ध्यायंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानिकर्माणि तूष्णीं तिष्ठंते निश्चलाः ॥ ततः क्रमादग्निवर्णैर्लोहदंडैः सकंटकैः ॥ १५३ ॥ सर्वप्राणंनिहन्यंते यमदूतैश्च मस्तके ॥
विष्ठापूर्णे ततः कूपे कृमिणां निचये ततः ॥ १५४ ॥ समंतात्किंकरैर्घोरैः पच्यंते पापकारिणः ॥ ततः क्षारेण तप्तेन वन्हेरपि विशे
षतः ॥ १५५ ॥ समंतत्र प्रलिप्यंते क्षतांगा जर्जरीकृताः ॥ पुनर्विदार्य चांगानि शिरसःप्रभृति क्रमात् ॥ १५६ ॥ वार्ताकवत्प्रपच्यं-
ते तप्तलोहकटाहके ॥ अमेध्यरूपे प्रक्षिप्य जलजंतु समाकुले ॥ १५७ ॥ मेदोसृक्पूयपूर्णायां वाप्यांक्षिप्तास्तु तेततः ॥ भक्ष्यंते
च ततस्तीक्ष्णैर्लोहतुंडैश्च वायसैः ॥ १५८ ॥ पच्यंते मत्स्यवच्चापि प्रदीप्तांगाराशिषु ॥ प्रोताः शूलेषु तीक्ष्णेषु नराः पापेन कर्म-
णा ॥ १५९ ॥ तैलकैरिवचाक्रम्य घोरैः कर्मभिरात्मजैः ॥ तिलवत्सं प्रपीड्यं तेयंत्राख्यनरके नराः ॥ १६० ॥ पच्यंते च पुनस्ते-
वै यमदूतैरनेकधा ॥ तैलपूर्णकटाहेषु संतप्तेषु पुनः पुनः ॥ १६१ ॥ तेषां चोत्पाद्यते जिव्हा असत्या प्रियवादिनी ॥ संदंसेन
सुतप्तेन प्रपिज्योरसि पादतः ॥ १६२ ॥ मिथ्यागमप्रयुक्तस्य द्विजिव्हस्य तथैव च ॥ जिव्हार्द्धकोशं विस्तार्य भल्लैस्तीक्ष्णैः प्रपाद्य
ते ॥ १६३ ॥ निर्भर्त्सयंति ये क्रूरा मातरं पितरं गुरुं ॥ वज्रवालुकया तेषां मुखमापूर्य सिव्यते ॥ १६४ ॥ ततः क्षारेण दीप्तेन प-
यसा च पुनःपुनः ॥ द्रुतं संपूर्यते त्यर्थं तप्ततैलेन तन्मुखं ॥ १६५ ॥ इतस्ततः पुनर्वक्त्रं श्रस्तमापूर्य हन्यते ॥ विष्ठाभिः कृमिमि-
श्राभिः सोपानच्च रणैर्नरैः ॥ १६६ ॥ परिरक्षाधिकामुग्रां प्रदीप्तां लोहशाल्मलिं ॥ हन्यंते पृष्ठदेशे तु पुनर्भीमैर्महाघनैः ॥ १६७ ॥
दंतुरेणाति क्रूरेण क्रकचेन बलीयसा ॥ शिरः प्रभृति पाट्यंते घोरैः कर्मभिरात्मजैः ॥ १६८ ॥ खाद्यंते च स्वमांसानि पीयंते च स्व-
शोणितं ॥ अन्नं पानं च दत्तं वै मूढैर्नाप्यनुनोदितैः ॥ १६९ ॥ इक्षुवत्संप्रपीड्यंतेजर्जरीकृतमुद्गरैः ॥ असितालवने घोरे छिद्यंते
खंडखंडशः ॥ १७० ॥ सूचीभिर्भिन्नसर्वांगास्तप्तशूलेषुरोपिताः ॥ संचाल्यमानाः क्लिश्यंति नम्रियंते तथापि च ॥ १७१ ॥ देहा
दुत्पाद्यते मांसं तेषामस्थीनि मुद्गरैः ॥ बाहूनाकृष्यते तूर्णं यमदूतैर्बलोत्कटैः ॥ १७२ ॥ नैरुच्छ्वासे निरुच्छ्वासा तिष्ठंते नरके च ते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उल्ह्रासंता सदोछ्लासे वालुकावेदनावृतः ॥ १७३ ॥ रौरवे चरुदंतो वै पीडयंते विविधैर्वधैः ॥ महारौरवपीडाभिः महतीभिरुदंति
हि ॥ १७४ ॥ पभ्द्यामास्ये गुदे पाष्ण्यां पाणौ चोरसि मस्तके ॥ निहन्यते घनैस्तीक्ष्णैः संतप्तैर्लौहमुद्गरैः ॥ १७५ ॥ संतप्तवालुका-
यां च प्रधोल्यंते मुहुर्मुहुः ॥ जंतुपाके सुसंतप्ते क्षिप्ताः क्रंदंति विस्वरं ॥१७६ ॥ निंदंति चैव रूपेण परदारान् हसंति च ॥ आलिं-
गंति च तेनारींर्ज्वलंतीं लौहनिर्मितां ॥ १७७ ॥ पूर्वाकारं च पुरुषं प्रज्वलंतं समंततः ॥ दुश्चारिण्यः स्त्रीयो गाढमालिंगंति रुदं-
ति च ॥ १७८ ॥ किंप्रधावसि वेगेन न ते साध्योस्ति सांप्रतं ॥ लंघितश्च त्वया भर्ता पापं भुंक्ष्व यथा सुखं ॥ १७९ ॥ लोहकुंभे
विनिक्षिप्ता पाटिताश्च शनैः शनैः ॥ मृद्वग्निना प्रपच्यंते स्वपापेनैव भारत ॥ १८० ॥ उलूखलेषु कज्यंतेप्रपीडयंतेशिलासु च ॥
क्षिप्यंते चांधकूपेषु दश्यंते भ्रमरादिभिः ॥१८१॥ येनिंदंति महात्मानमाचार्यं धर्मदर्शिनं ॥ शिवभक्तांश्च निंदंति शिवधर्मं च शाश्व-
तं ॥ १८२ ॥ तेषामुपरि कंठेच जिव्हायां दंतसंधिषु ॥ कीलकाओष्टगलके कील्यंते यमकिंकरैः ॥ १८३ ॥ येनिंदंति द्विजान् सा-
धून् वेदांश्च पितरो गुरून् ॥ विना कार्यं महाराज तेषां जिव्हा सहस्त्रधा ॥ १८४ ॥ छिद्यते त्रोद्यते चैव वज्रतुंडैः खगैरपि ॥ एव-
माद्या महाघोरास्तथैवान्यास्त्वनेकशः ॥१८५॥ संक्षेपतो मया प्रोक्ता यातना पापकारिणां ॥ एकैकनरके ज्ञेयाः शतशोथ सहस्त्र-
शः ॥ १८६ ॥ यातना गहना राजन् सर्वेषां पापकारिणां ॥ प्रत्येकं यातनाश्चित्राः सर्वेषु नरकेषु या ॥ १८७ ॥ कस्ता वर्षशते-
नापि वक्तुं शक्नोतितत्त्ववर्धीः ॥ इत्येवं विविधैर्घोरैःपाल्यमानाः स्वकर्मभिः ॥ १८८ ॥ म्रियंते नैव पापिष्ठा भुंजंतो यातना बहु ॥
तत्रान्र्ययातना कष्टा विविधा पापकर्मणां ॥ १८९ ॥ महाघोरातिघोराख्याः कल्पांग्निसदृशो यमाः ॥ श्रुत्वैता यातनाः पूर्वं म्रियं
ते मूढचेतसः ॥ १९० ॥ याम्यैर्भेदैश्च नरके संतर्जते पुनःपुनः ॥ पुत्रमित्रकलत्रार्थे यदपुण्यं त्वया कृतं ॥ १९१ ॥ एकाकी दह्य-
से तेन नात्र पश्यसि तानिहं ॥ आत्मनैव कृतं पापं भोक्तव्यं ध्रुवमव्ययं ॥ १९२ ॥ तात्किमात्मोपघातार्थं मूढ पापं त्वया कृतं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवं दूतैरुपालब्धास्तद्गच्छति ततः पुनः ॥ १९३ ॥ देवद्रव्यविनाशेन गुरुद्रोहादि कर्मभिः ॥ क्रमात्सर्वेषु पच्यंते नरकेषु न संशयः ॥ १९४ ॥ महापातकिनश्चापि सर्वेषु नरकेष्विह ॥ आचंद्रतारकं यावत् पीड्यंते विविधैर्वधैः ॥१९५॥ उपपातकिनश्चापि तदर्धं यांति मानवाः ॥ कथं संजायते मृत्युः कदा कस्य भविष्यति ॥१९६॥ प्राप्ते चाकस्मिके मृत्यौ वृत्तिं नंदति को नरः॥ परित्यज्य यतः सर्वमेकाकी यास्यसि ध्रुवं ॥ १९७ ॥ तस्मात्सर्वप्रयत्नेन नित्यं धर्मपरो भव ॥ १९८ ॥ एतत्ते सर्वमाख्यातं नरकाणां तु लक्षणं ॥ अतः परं च तीर्थानि शृणु शेषाणि भारत ॥१९९॥ इति श्रीपरमरहस्ये रौद्रीसंहितायां श्रीरेवामाहात्म्ये नरक वर्णनं नाम पंचत्रिंशोध्यायः ॥ ३५ ॥ युधिष्ठिर उवाच ॥ नमामि चरणौ ब्रह्मन् तव कल्पांतवासिनः ॥ पितामहं हरिं सर्वं शरणं यामि संततं ॥ १ ॥ शिवं नौमि शिवं स्तौमि शिवं ध्याये शिवं व्रजे ॥ शिवं गृणोमि पश्यामि शिवमेवात्मनि ध्रुवं ॥ २ ॥ द्विजवर्य मुनिश्रेष्ठ मार्कंड तपतां वर ॥ अतीव भयभीतोस्मि श्रुत्वा नरकयातनाः ॥ ३ ॥ तीर्यते येन धर्मेण संसारो हिसुदुस्तरः ॥ तं धर्मं ब्रूहि सकलं धर्मराजकथानकं ॥४॥ उवाच श्रीमार्कंडेयः॥ एवं निर्भर्त्सयन् पापानुवाच रविनंदनः॥ रक्तो मूढश्च लोकोयमकार्ये संप्रवर्तते ॥ ५ न चात्मानं विजानाति न परं न च दैवतं ॥ न शृणोति परं श्रेयः सति चक्षुषि नेक्षते ॥ ६ ॥ समे पथि शनैर्गच्छन्स्खलतीव पदेपदे ॥ ७ ॥ एवमुक्तो धर्मराजः संक्षेपात्पापदेहिनां ॥ विस्तरेण यथोवाच वार्तान्तच्छृणु सांप्रतं ॥८॥ यम उवाच ॥ मायाबद्धो जनानाति बोध्यमानो बुधैरपि ॥ संसारे क्लिश्यते तेन लोभमोहवशान्नरः ॥ ९ ॥ गर्भघातेन भावेन शास्त्रमुक्तं न बुध्यति ॥ नचोपाश्रयते कर्म स्वर्गमोक्षप्रसाधकं ॥ १० ॥ सत्यप्यस्मिन् शिवध्याने सर्वकामार्थसाधके ॥ नरकोच्छेदनं श्रेयो यदन्यदहितं कृतं ॥ ११ ॥ प्रेतीभूता नराः सर्वे मम लोकं समागताः ॥ रे मूढाः शृणुताख्यानं यथोद्दिष्टं विवस्वता ॥ १२ ॥ पुरा स्नेहात्तु मत्पित्रा नर्मदाचरितं शुभं ॥ शृण्वतां पितृदेवानां पवित्रमनुकंपया ॥ १३ ॥ कृताहि पुरुषेणेह सप्तद्वीपवती मही ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्मध्ये प्रथमं द्वीपं लक्षयोजनविस्तृतं ॥ १४ ॥ तच्चापि नवखंडं वै पुराणज्ञाः प्रचक्षते ॥ तत्र यद्भारतं वर्षं कर्मभूरिति विश्रुतं ॥१५॥
तत्र विंध्याद्रिसंभूता रुद्रदेहोद्भवा तु या ॥ नर्मदा सरितां श्रेष्ठा पापदुर्गतिनाशिनी ॥ १६ ॥ प्रवाहोद्गतिमारभ्य यावजलधिसं-
गमं ॥ साग्रं शतं योजनानां स्थिता पुण्यजला च या ॥ १७ ॥ जंतुर्जातिशतैर्जातु लभते मानुषीं तनुं ॥ संप्राप्य भारतं खंडं मा-
नुषीं योनिमाश्रितः ॥ १८ ॥ नाश्रये नर्मदादेवीं सप्तकल्पवहां तु यः ॥ दूरस्थो निकटस्थोपि तेनात्मा हारितो मुधा ॥ १९ ॥
कृतैः किं बहुभिः पुण्यैः किं दानैः किं जपैर्यदि ॥ बह्वीभिः किं सरिद्भिश्च न चेद्देवां च सेवते ॥ २० ॥ स्नानावगाहपानेज्या तपो
दानक्रियादिभिः ॥ यो न संश्रयते रेवां पापात्पापतरो हि सः ॥ २१ ॥ ये ध्यायंति महादेवीं नर्मदां पापहारिणीं ॥ प्रणश्येदशुभं
तेषां तमः सूर्योदये यथा ॥२२॥ नर्मदां संस्मरेद्यस्तु कर्मणा मनसा गिरा ॥ रेवां च संस्मरेदंते यमदूतैर्न बाध्यते ॥ २३ ॥ नर्मदां
कीर्तयेद्यस्तु पापकर्मा नराधमः॥ नरकान् समयोद्दिष्टानपक्रमाति तत्क्षणात् ॥२४॥ गंगाद्याः सरितश्चैव तीर्थकोटि वृताश्च याः॥रेवा-
तेजःप्रभावेन शुद्धिं गच्छंति किल्बिषात् ॥ २५ ॥ नरकस्थः स्मरेद्यस्तु रुद्रदेहां हरं हरिं ॥ मुच्यते यमदूतैः स तत्क्षणान्नात्र संशयः
॥ २६ ॥ यत्र तिष्ठति वैदूर्यपर्वतोमरकंटकः ॥ ॐकारः परमेशानो भुक्तिमुक्तिफलप्रदः ॥ २७ ॥ किमर्थं तत्र शोचंति पापोपहत
चेतसः ॥ सिद्धेश्वरं सिद्धिलिंगं लोकानुग्रहकारकं ॥ २८ ॥ यज्ञपर्वतमध्ये तु तत्रैव शशिभूषणः ॥ नर्मदादक्षिणे भागे लिंगं चैवा
मरेश्वरं ॥ २९ ॥ चतुर्थं कपिलेशं च शिवक्षेत्रं विदुर्बुधाः ॥ येर्चयंति सदा भक्त्या पुष्पधूपाग्नितर्पणैः ॥ ३० ॥ शिवलोकं हि ते
यांति नरकाणां कथैव का ॥ एतत्ते सर्वमाख्यातं यथोद्दिष्टं हि भानुना ॥ ३१ ॥ पापिष्ठानां धर्मपथं नर्मदापरिशीलनं ॥ गो-
हेमतिलदानानि जलान्नगृहवाससां ॥ ३२ ॥ रथाश्वमहिषीदानं शिवोपस्करमेव च ॥ प्रासादारामदानं च ये कुर्वंति नरोत्तमाः
यमलोकं न ते यांति नरकान्नोग्ररूपिणः ॥३३॥ रेवातीरे विशेषेण दानात्यंतफलेन च ॥ मुच्यंते सर्वपापेभ्यो शिवस्य वचनं यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. ॥ ३४ ॥ सम्मानश्चापमानेन वियोगेनेष्टसंगमः ॥ यौवनं जरया ग्रस्तं कष्टैः सौख्यमुपद्रुतं ॥ ३५ ॥ वलिभिः पलितैश्चापि जर्जरी अ. ३६
३६ कृतविग्रहः॥ किं करोति नरः प्राज्ञ इंद्रियैर्विकलीकृतः ॥ ३६ ॥ स्त्रीपुंसो यौवनं रूपं वदन्योन्यं प्रियं पुरा ॥ तदेव जरयाग्रस्तमुभ-
योरपि न प्रियं ॥ ३७ ॥ अपूर्वं वयमात्मानं जरया परिवर्तितं ॥ यः पश्यन्न विरज्येत कोन्यस्तस्मादचेतनः ॥ ३८ ॥ पुरुषो
जरया ग्रस्तः पत्निपुत्रादिबंधनैः ॥ अशक्तत्वात् दुराचारैर्भृत्यैश्च परिभूयते ॥३९॥ धर्मश्चार्थश्च कामश्च मोक्षश्च न तु जीर्यतः॥ शक्तः
साधयितुं यावत्तावत्सर्वं समाचरेत् ॥ ४० ॥ वातपित्तकफादीनां वैषम्यं चातिरिच्यते ॥ वातादीनां समूहश्च देहोयं परिकीर्तितः
॥४१॥ तस्माद्व्याधिसमं ज्ञेयं शरीरमिदमात्मनः॥ वाताद्यैरतिरिक्तत्वाव्याधीनां प्रचारस्यच ॥४२॥ रोगैर्नाना विधैश्चैव देहदुःखन्यनेकधा
तानि तुं स्वात्मवेद्यानि किमन्यत्कथयाम्यहं ॥ ४३ ॥ एकोत्तरं मर्मशतं तास्मिन् देहे प्रतिष्ठितं ॥ तत्रैकः काल-
मृत्युश्च शेषास्त्वागंतवःस्मृताः ॥ ४४ ॥ ये त्विहागंतवः प्रोक्तास्ते प्रशाम्यंति भेषजैः ॥ जपहोमप्रदानैश्च कालमृत्यु
र्न शाम्यति ॥ ४५ ॥ अपमृत्युश्च चेन्नस्याद्विषमाद्यादशंकितः ॥ न चापि पुरुष स्तस्मादपमृत्योर्बिभेति सः ॥ ४६ ॥
विविधा व्याधयः कष्टाः सर्पाद्याः प्राणिनस्तथा ॥ विषाणिचभिचाराश्च मृत्योर्द्वाराणि देहिनां ॥४७ ॥ पीडितं रोगसर्पाद्यैरपि ध-
न्वंतरिः स्वयं ॥ स्वस्ति कर्तुं न शक्नोति कालग्रस्तं च देहिनां॥ ४८ ॥ नौषधं न तपो दानं न मित्राणि न बांधवाः ॥ शक्नुवंति
परित्रातुं नरं कालेन पीडितं ॥ ४९ ॥ रसायनैस्तपोजाप्यैर्योगसिद्धात्मभिस्तथा ॥ कालमृत्युरपि प्राज्ञैर्जीयते नालसैर्नरैः॥५०॥
नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयं ॥ नास्ति मृत्युसमं शत्रुः सर्वेषामपि देहिनां ॥ ५१ ॥ सद्भार्यापुत्रमित्राणि राज्यै-
श्वर्य सुखानि च ॥ मृत्युः छिन्नति सर्वाणि व्याबद्धान्यपि भारत ॥ ५२ ॥ इयं ते कथिता राजन् जातिसंसारदुस्तरा ॥ परिणाम
इति ज्ञात्वा सर्वं कालस्य भोजनं ॥ ५३ ॥ तस्मात्सर्वप्रयत्नेन सेव्यते सप्तकल्पगा ॥ सर्वदुःखापहा पुण्या सर्वशोकविनाशिनी ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो यांश्चिंतयते कामास्तांस्तान् देवी प्रयच्छति ॥ इदं ज्ञानमिदं ध्यानं पांडित्यं वेदवेदनं ॥ ५५ ॥ निवासः सर्वधर्माणां
॥५४॥ यो यांश्चिंतयते कामास्तांस्तान् देवी प्रयच्छति ॥ इदं ज्ञानमिदं ध्यानं पांडित्यं वेदवेदनं ॥ ५५ ॥ ब्रह्म-
सेव्यते सप्तकल्पगाः ॥ यज्ञदानतपःसत्यस्वाध्यायपितृश्रुतर्पणैः ॥ ५६ ॥ सकलं फलमाप्नोति यो रेवां वै निषेवते ॥ ५७ ॥ ब्रह्म-
कूर्चसहस्रं हि सोमपानायुतं तथा ॥ नर्मदातोयपानस्य कलां नार्हति षोडशीं ॥ ५८ ॥ संयुक्तोपि महापापैर्नानाजन्मकृतैरपि ॥
ॐकारदक्षिणे घोरे मुच्यते तत्क्षणाज्जपन् ॥ ५९ ॥ गोदानान्न परं दानं त्रिषु लोकेषु विद्यते ॥ नर्मदापयसि स्नात्वा यो दद्याद्गां
द्विजोत्तमे ॥ ६० ॥ संख्या तच्छ्रेयसां कर्तुं देवैरपि न शक्यते ॥ ६१ ॥ इति श्रीरेवामाहात्म्ये शरीरव्यवस्था नाम षड्विंशोऽ
ध्यायः ॥ ३६ ॥ ॥ युधिष्ठिर उवाच ॥ धेनुः कतिविधा प्रोक्ता कस्मिन् काले प्रदीयते ॥ सर्वोपस्करसंयुक्ता त्वत्त इच्छामि
वेदितुं ॥ १ ॥ भविष्यद्भूततत्त्वज्ञ सत्यकल्पानुकीर्तक ॥ २ ॥ श्रीमार्कंडेय उवाच ॥ शृणु राजन् बहूक्तैः किं गोदानं कथयामि
ते ॥ यथाश्रुतं पुराख्यानमादिकल्पे कृते युगे ॥ ३ ॥ चक्रवर्त्तिशशांकोभूत्सर्वधर्मभृतां वरः ॥ न तं वर्णयितुं शक्तः सत्यधर्मवृते
स्थितं ॥ ४ ॥ बुभुजे स महीं कृत्स्नां एकच्छत्रेण पांडव ॥ नवखंडां मुनिद्वीपां यथा शक्रोमरावतीं ॥ ५ ॥ हरिश्चंद्रस्य तस्यापि
संवादश्चक्रवर्तिनः ॥ हरिश्चंद्रः कुरुक्षेत्रे गवामयुतमुत्तमम् ॥ ६ ॥ हेमभारोपकरणं सर्वरत्नविभूषितं ॥ मुद्गलाद्या द्विजाः सर्वे सत्य
धर्मपरायणाः ॥ ७ ॥ शतमष्टोत्तरं सार्धं ब्राह्मणा ब्रह्मवादिनः ॥ हरिश्चंद्रो ददौ तेभ्यो राहुसूर्यसमागमे ॥ ८ ॥ द्विजान्संपूज्य वि
धिवत् श्रद्धया परया युतः ॥ सरस्वत्यां नृपश्रेष्ठः सतिलाक्षतदर्भवान् ॥ ९ ॥ अर्चयित्वा महेशानं स्थाणुं परमसिद्धिदं ॥ चक्रपा
णिं हृषीकेशं मुदा परमया युतः ॥१०॥ दानस्यास्य प्रभावेन लोकास्तेनाखिला जिताः ॥ अंतरिक्षे पुरा प्राप्ता सर्वलोकमनोहरा
॥ ११ ॥ हरिश्चंद्रपुरि ख्याता लोका लोकेचराचरे ॥ सत्यदानक्षमात्यागैरिज्याभिः समलंकृतः ॥ १२ ॥ हरिश्चंद्रसमो राजा न भू-
तो न भविष्यति ॥ एवं गाथा पुरा गीता शक्राद्यैः सुरसत्तमैः ॥ १३ ॥ शशांकोप्यकरोत्सर्वं नर्मदातीरमाश्रितः ॥ दानयज्ञं त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पः सत्यं पर्वतेमरकंटके ॥ १४ ॥ ददौ चार्धप्रसूतां गां द्विजाग्र्याय महात्मने ॥ दानस्यास्य प्रभावेन ददाह पृथिवीपतिः ॥ १ ५॥
अनेकभाविकं पापं तृणराशिमिवानलः ॥ यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्रदृश्यते ॥ तावद्गौ पृथिवी ज्ञेया सशैलवनकानना
॥ १६ ॥ स्वर्णशृंगीं रौप्यखुरां सवत्सां कांस्यदोहनां ॥ ताम्रपृष्ठीं सुघंटां च क्षौमपुच्छां सवस्त्रकां ॥ १७ ॥ रत्ननेत्रां सवस्त्रां च
सर्वोपस्करसंयुतां ॥ नर्मदापयसिस्नातस्तिलाज्यकुशसंयुतः॥१८॥ ॐकारामरयोर्मध्ये कोटितीर्थे नराधिपः॥ एवं सहस्रसंख्याताको-
टितीर्थे स्वयं ददौ ॥ १९ ॥ एतस्मिन्नंतरे नेदुर्देवदुंदुभयो दिवि॥ तत्क्षणाद्यानमारुढो ज्वलन्मणिगणान्वितं ॥ २० ॥ स्तूयमानः
समीपस्थैर संख्यातैर्विमानिभिः ॥ धृतस्वर्णातपत्रस्तु वीज्यमानश्च चामरैः ॥ २१ ॥ योजनानां सहस्रेण हरिश्चंद्रादिविस्थितः ॥ श-
शांकोप्युपरिष्ठात्तु नृपते नृप सोप्यधः ॥ २२ ॥ तद्दृष्ट्वा तदंशं कर्म शशांकस्य महीपतेः ॥ स निनिंद कुरुक्षेत्रं विस्मयाविष्टचेतनः
॥ २३ ॥ महामाघ्या शशांकेन राहुसोमसमागमे ॥ दत्तं दानं न सामान्यं भवेदिति मतिर्मम ॥ २४ ॥ विषण्णवदनो भूत्वा हरि
श्चंद्रो नृपोत्तमः ॥ ब्रह्मलोकं गतः क्षिप्रं यत्र लोकेश्वरः प्रभुः ॥ २५ ॥ प्रणिपत्याभिवाद्याथ स पप्रच्छ पितामहं ॥ दानेन निर्जि-
ता देवा शशांकेन पितामह ॥ २६ ॥ किमिदं साहसंब्रह्मन् कुरुक्षेत्राद्विशिष्यते ॥ अमरेश्वरसंज्ञं तु तीर्थं रेवासमुद्भवं ॥ २७ ॥ के
नापि न समं मर्त्ये मन्येहं कुरुजांगल ॥ इतिश्रुत्वा वचस्तस्य हरिश्चंद्रस्य धीमतः ॥ प्रत्युवाच ततो ब्रह्म हरिश्चंद्रं नृपं नृप ॥२८
॥ विषादं यज राजेंद्र गहना कर्मणां गतिः ॥ शशांकसंज्ञो राजर्षिर्न दृष्टो न श्रुतोमया ॥२९ एवंवक्तुं न शक्तोहं नापि देवाः सवा-
सवाः ॥ अनेकानि सहस्राणि पुरा वै चक्रवर्तिनां ॥ ३० ॥ दृष्ट्वा तु सविधानेन पर्वतेमरकंटके ॥ गतानि त्रिदिवं राजन्
सत्यमेतद्ब्रवीम्यहम् ॥ त्रेतायुगे मया पूर्वं तोलितं तीर्थमुत्तमं ॥ अयुताधिकमानेन सर्वतोमरकंटकं ॥ ३२ ॥ राहुसूर्यसमायोगे
तीर्थलक्षाणि भूपते ॥ सरस्वती कुरुक्षेत्रं नैमिषं पुष्करं गया ॥ ३३ ॥ तीर्थान्येतानि चान्यानि स्नातुमायांति चात्र वै॥ नर्मदायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिश्चंद्रः कोटितीर्थे नराधिप ॥ ३४ ॥ तीर्थानां त्यज राजेंद्र स्पर्द्धा वै रेवया सह ॥ वाराणस्यादितीर्थानि तत्रैव तुलया धृतम्
॥३५॥ तीर्थानि न समानि स्युरोंकारः कोटितीर्थतः ॥ ख्यातिमात्रं कुरुक्षेत्रं लोकयात्राप्रवर्तकम् ॥३६॥ पुराणं न श्रुतं यैस्तु मि-
थ्यामानसमन्वितैः ॥ सेव्यतां कल्पगा देवी यदीच्छसि परं पदम् ॥ ३७ ॥ इत्याकर्ण्य विधेर्वाक्यं हरिश्चंद्रोपि विस्मितः ॥ प्रणि-
पत्य विधातारमयोध्याधिपतिस्तदा ॥ ३८ ॥ मुदा परमया युक्तो गतोसावमरेश्वरे ॥ किंचित्कालं स्थितस्तत्र दत्त्वा दानान्यनेक-
शः ३९ ॥ प्रसादादमरेशस्य कल्पगायाश्च भारत ॥ शशांकादधिकं प्राप पदं यानं यशस्तथा ॥ ४० ॥ एतत्सर्वं मयाख्यातं यथा-
वत्तव सुव्रत ॥ पुनरन्यत्प्रवक्ष्यामि तीर्थं परमशोभनं ॥४१॥ इतिश्रीनर्मदामाहात्म्ये अमरेश्वरक्षेत्रे गोदानमहिमावर्णनं नाम सप्त-
त्रिंशोध्यायः ॥ ३७ ॥ श्रीमार्कंडेय उवाच ॥ माहिष्मत्याः पश्चिमे च तीर्थं पापहरं परम् ॥ अशोकवनिका नाम सर्वशोकविना-
शनं ॥ १ ॥ स्नात्वातत्रार्चयेद्गौरीं यथाविभवविस्तरैः ॥ मतंगस्याश्रमस्तत्र सिद्धगंधर्वसेवितः ॥ २ ॥ शुक्लकृष्णतृतीयायां गंधधू-
पविलेपनैः ॥ उपहारैरनेकैश्च दीपमालाप्रबोधनैः ॥३॥ तत्र या पूजयेन्नारी गौरीं भक्तिसमन्विता ॥ रूपसौभाग्यसंपन्नं लभते सत्प-
तिं तु सा ॥ ४ ॥ सुखं सुतान् श्रियं प्राप्य मोदते पतिसंयुता ॥ अस्य तीर्थस्य माहात्म्यादुमामाहेश्वरे पुरे॥ ५ ॥ इति अशोक-
वनिकातीर्थं ॥ मतंगो नाम देवर्षिः पुराकल्पे युधिष्ठिर ॥ नर्मदातीरमाश्रित्य तपस्तेपे सुदुष्करम् ॥ १ ॥ जन्मन्यादौ निषादः स-
न् जातिं स्मरति पौर्विकीम् ॥ देवस्नानविधिं धर्मं पठतामघमर्षणं ॥२॥ महर्षीणां प्रसंगेन नर्मदादर्शनेन च ॥ पापबुद्धिं परित्य-
ज्य धर्मे बुद्धिं समाश्रितः ॥ ३ ॥ पापोहं पापरूपोहं प्राणिहिंसारुचिः सदा ॥ सविषादो निषादोहं म्रिये वा किं करोम्यहं ॥ ४ ॥
पापः पापकुले जातः अधुना श्वपचोपमः ॥ एवमुक्त्वा स विमृशन्नशोकवनिकांगतः ॥ ५ ॥ जटावल्कलधारी च कंदमूलफलाश-
नः ॥ दिव्यं वर्षशतं सोभूच्छिवाराधनतत्परः ॥ ६ ॥ शिवध्यानपरस्तत्र उग्रे तपसि संस्थितः ॥ दिव्यं वर्षशतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्थ तथा तस्य तपस्यतः ॥ ७ ॥ मंत्रजाप्यविहीनस्य शिवभक्तिपरस्य च ॥ वागुवाचांतरिक्षस्था मंत्रं जप षडक्षरं ॥ ८ ॥ हृच्चक्रे विमले ध्यायन्नशिवांतकरं शिवम् ॥ नमः शिवाय मंत्रस्तु प्रणवाद्यं समाहितः ॥ ९ ॥ सर्वार्थसाधकं श्रेष्ठं सर्वविघ्नविनाशकं ॥ सर्वपापहरं जाप्यं सर्वमंत्रोत्तमोत्तमं ॥ १० ॥ इत्याकर्ण्य वियद्वाण्या प्रोक्तं तद्ध्यानमागतम् ॥ जपतस्तस्य तन्मंत्रं प्रसन्नमभवन्मनः ॥ ११ ॥ तस्य भक्तिं परां ज्ञात्वा देवदेवो महेश्वरः ॥ प्रत्यक्षरूपो भगवान् शूलपाणिरुमापतिः ॥ १२ ॥ उवाच वचनं देवो मतंगं प्रति भारत ॥ वरं वृणीष्व भद्रं ते ध्यानेनानेन सुव्रत ॥ १३ ॥ मतंग उवाच ॥ यदि तुष्टोसि देवेश वरं दातुं ममेच्छसि ॥ मातंगमिति विख्यातिं तीर्थमेतत्प्रयच्छ मे ॥ १४ ॥ चांडालाः श्वपचा वापि पापयोनिं गता अपि ॥ जपादिरहिताश्चापि मुच्यतामत्र किल्बिषात् ॥१५॥ स्वयमत्र त्वया देव मत्प्रीत्या तीर्थसन्निधौ ॥ मतंगेशमितिख्यातं शैवं लिंगमिहास्तु ते ॥ १६ ॥ नर्मदातीरनिलयं विलयंकरयंहसः ॥ स्नात्वा योत्र.र्चयेत्तस्य भवेद्घविमोक्षणं ॥ इमं वरमहं याचे त्वत्प्रसादान्महेश्वर ॥ १७ ॥ ईश्वर उवाच ॥ एवं भवतु ते सर्वं मत्प्रसादात्तु मारिष ॥ एवमुक्त्वा ययौ देवः कैलासं पर्वतोत्तमं ॥१८॥ मतंगोपि वरं प्राप्य शिवलोकं जगाम ह ॥ कामिकं यानमारुह्य दिव्यमाल्यांबरावृतः ॥ १९ ॥ तेजोरूपगुणैर्युक्तः सर्वाभरणभूषितः॥ दिव्यभोगास्तु सुचिरं भोक्तुं तीर्थप्रभावतः ॥ २० ॥ या चैत्रमास्यमावास्या कृष्णपक्षचतुर्दशी ॥ तस्यां तत्र हुतं दत्तं जप्तं ध्यातं तथार्चितम् ॥ २१ ॥ स्नातं स्तुतं च नृपते सर्वमक्षयमश्नुते ॥ तिलोदकप्रदानेन पापयोनिंगतानपि ॥ २२ ॥ सक्त्वाज्यगुडपिंडेन पितॄन् मोदयते हि सः ॥ पितरस्तस्य तृप्यंति यावदिंद्राश्चतुर्दश ॥ २३ ॥ तिलतंदुलमिश्रं यः कुर्याल्लिंगस्य पूरणं ॥ सोपि वर्षसहस्राणि शिवलोके महीयते ॥ २४ ॥ अशोकवनिका नाम मातंगं तीर्थमुच्यते ॥ रेवाया उत्तरेकूले कथितं तव भारत ॥ २५ ॥ इति श्रीरेवामहात्म्ये मातंगतीर्थं नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥ श्रीमार्कंडेय उवाच ॥ अथान्यत्कथयिष्यामि रेवाया द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिणे तटे ॥ तीर्थं मृगवनं नाम सर्वपापप्रणाशनं ॥ १ ॥ तत्र स्नात्वार्चयेद्विष्णुं शंखचक्रगदाधरं ॥ एकादश्यां महाराज निराहारो जितेंद्रियः ॥ २ ॥ हरिं मृगवनं नामगंधधूपैश्च पूजयेत् ॥ एकस्मिन् भोजिते विप्रे लक्षं भवति भोजनं ॥ ३ ॥ तिलोदकप्रदानेन पितॄणां वैष्णवं पदम् ॥ तत्रैव संनिविष्टं तु वाराहं तीर्थमुत्तमं ॥ ४ ॥ यत्र वाराहरूपेण धात्री देवी समुद्धृता ॥ विश्वरूपं तथा चान्यद्धरेरमिततेजसः ॥ ५ ॥ पतिव्रता तु या नारी तथा मासोपवासिनी ॥ तत्र स्नात्वा विधानेन लोकं प्राप्नोति वैष्णवम् ॥ ६ ॥ आख्यानं कथयिष्यामि ख्यातं मृगवनं यथा ॥ व्याधः कश्चिन्निराचारः सर्वभूतेषु निर्दयः ॥ ७ ॥ पाशहस्तो धनुःपाणिर्विचरन् गिरिकंदरं ॥ ॥ आजघान मृगान् सर्वान् कुटंबार्थे युधिष्ठिर ॥ ८ ॥ ज्येष्ठे मासि तु संप्राप्ते निदाघे ज्वलनप्रभे ॥ धर्मार्त्तश्च तृषार्तश्च वृक्षमूलं समाश्रितः ॥ ९ ॥ रात्रौ सुष्वाप निश्चेष्टो दुःखार्तः स क्षुधान्वितः ॥ वनं संघर्षजो वह्निरुच्छ्रितो वृक्षकोटरात् ॥ १० ॥ प्रदग्धं च वनं तेन मृगव्याधसमन्वितं ॥ भस्मीभूतं ततः कृत्स्नं सव्याधं समृगंवनं ॥ ११ ॥ मेघज्वालावृते काले प्रवाहे नार्मदे शुभे ॥ कन्याराशिगते भानौ द्वादश्यांश्रवणेन तु ॥ १२ ॥ नर्मदातोयसंसर्गात्तस्य दुःकृतनाशनात् ॥ तत्क्षणाद्दिव्यदेहस्तु वैष्णवं यानमास्थितः ॥ १३ ॥ ततस्तुष्टाव विश्वेशं भक्तलोकानुकंपनं ॥ तीरोपरिस्थयानासौ संस्मरन् गरुडध्वजं ॥ १४ ॥ येनादौ मीनरूपेण विष्णुना निहतो सुरः ॥ ब्रह्मा संभूषितो वेदैस्तं नमामि सनातनं ॥ १५ ॥ कूर्मरूपेण येनादौ विधृतो मंदरो गिरिः ॥ सुधया धायिता देवास्तं नमामि जगद्गुरुं ॥ १६ ॥ वाराहं वपुराश्रित्य येन धात्री समुद्धृता ॥ लोकाः संस्थापिता येन तं नमाम्यखिलास्पदं ॥ १७ ॥ भूत्वा येन नृसिंहेन हिरण्यकशिपुर्हतः ॥ प्रह्लादो ह्लादितो येन तं नमाम्युरुविक्रमं ॥ १८ ॥ वामनं च वपुर्धृत्वा बलिर्येन वशीकृतः ॥ स्वपदं प्रापिता देवास्तं नमामि मलाशयं ॥ १९ ॥ पुरा परशुरामेण भूत्वा येन जिता मही ॥ क्षत्रमुच्छेदितं सर्वं तं नमाम्युग्रचारिणं ॥ २० ॥ भूत्वा रामेण येनाशु रावणः सगणो हतः ॥ पित्रोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रीतिमदात्प्रेम्णा तं नमाम्यखिलात्मकं ॥ २१ ॥ कृष्णं रूपं समास्थाय कंसो येन विहिंसितः ॥ सुराश्चानंदिताः सर्वे तं नमामि
रमापतिं ॥ २२ ॥ बौद्धं रूपं समासाद्य विश्वं येन विमोहितं ॥ योगिनस्तोषिता येन तं नमाम्यात्मतोषकं ॥ २३ ॥ कल्किरूपं
समास्थाय दुर्वृतांतकरं महत् ॥ जगद्वित्रास्यते येन तं नमाम्युग्ररूपिणं ॥ २४ ॥ एवं स्तुतवतस्तस्य विष्णुर्व्यापी सनातनः ॥ सा-
क्षाद्रूप उवाचेदं तुष्टोहं ते वरं वर ॥ २५ ॥ व्याध उवाच ॥ यदि प्रसन्नोसि विभो यदि देयो वरो मम ॥ अत्र तीर्थे भगवता
स्थेयं मृगवनांतिके ॥ २६ ॥ नाम्ना मृगवनं तीर्थं प्रसादात्ते भवत्विदं ॥ इदं स्तोत्रं च परमं तव भक्त्या मया कृतं ॥ २७ ॥
यः पठेत् शृणुयाद्वापि सलभेद्वांछितं फलं ॥ २८ ॥ श्रीभगवानु० ॥ एवं ते भविता सर्वं गच्छ व्याध यथेप्सितं ॥ अत्र तीर्थे
मया स्थेयं पुराप्यत्र स्थितोस्म्यहम् ॥२९॥ इत्युक्त्वातर्दधे देवो व्याधो विष्णोः पदं ययौ ॥ दशवर्षसहस्राणि भोगान् भुक्त्वा सपुष्कलान्
॥ ३० ॥ ततः सोप्यभवद्राजा तीर्थस्यास्य प्रभावतः ॥ येपि दग्धा मृगाद्याश्च तेपि गंधर्वतां गताः ॥ ३१ ॥ वैष्णवेनैव या-
नेन प्राप्तास्ते वैष्णवं पुरं ॥ अवशः स्ववशो वापि यस्तु प्राणान् परित्यजेत् ॥ ३२ ॥ दिव्यं वर्षसहस्रं तु विष्णुलोके महीयते ॥
तिलोदकप्रदानेन पितॄणां परमा गतिः ॥ ३३ ॥ धात्रीफलसमं वापि यस्तु पिंडं प्रदापयेत् ॥ आहूतसंप्लवं यावत् पितरस्तेन
तोषिताः ॥ ३४ ॥ इति श्री रेवामाहात्म्ये मृगवनं तीर्थं नाम एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ ॥ श्रीमार्कंडेय उवाच ॥
मनोरथं नाम तीर्थमन्यत्परमसिद्धिदं ॥ त्रिषु लोकेषु विख्यातं रेवातीरसमुद्भवं ॥ १ ॥ यान् यान् प्रार्थयते का-
मान् तत्र स्नात्वा तु मानवः ॥ तांस्तां सर्वानवाप्नोति तीर्थस्यास्य प्रभावतः ॥ २ ॥ संगमेंगारगर्तायां गोसहस्र-
फलप्रदः ॥ अंगारेश्वरदेवश्च तत्र तिष्ठति संगमे ॥ ३ ॥ स्नानमात्रो नरस्तत्र गाणपत्यमवाप्नुयात् ॥ चतुर्थ्यांगारयोगश्च
यदा भवति भारत ॥ ४ ॥ हिरण्यपुरुषं कृत्वा रक्तवस्त्रेण वेष्टयेत् ॥ घृतपूर्णं ताम्रपात्रं गुडेनापि प्रपूरयेत् ॥ ५ ॥ तत्र संस्थापये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवं संपूज्य विधिवन्नृप ॥ तत्सर्वं ब्राह्मणे दद्याच्छ्रोत्रियाय कुटुंबिने ॥ ६ ॥ तद्दानतीर्थमहात्म्याच्छ क्रार्द्धासनभाक् भवेत् ॥ दानं
स्वभावतः श्रेष्ठं तीर्थयोगाद्विशेषतः ॥ ७ ॥ तस्मात्सदैव दातव्यमविच्छिन्नं तथार्थिने ॥ विच्छिद्यंते न्यथाभोगा ग्रीष्मे कुसरितो
यथा ॥ ८ ॥ सदैव पापनाशाय संसेव्या सप्तकल्पगा ॥ येन केनाप्युपायेन पापनाशकरं चरेत् ॥ ९ ॥ तस्मात्पापेन दुःखानि ती-
व्राणि च बहूनि च ॥ तस्मात्पापं नकर्तव्यं आत्मपीडाकरं हि तत् ॥ १० ॥ यस्मिन्कुले च देशे च वयसा यादृशेन च ॥ कृतं
शुभाशुभंकर्म तत्तथा तेन भुज्यते ॥११॥ सर्वेषामेव शास्त्राणामयं पार्थ विनिश्चयः ॥ सेव्यते कल्पगा देवी शिवपूजारतैः सदा ॥ १२ ॥
पितॄणां तर्पणं कुर्यात् भिक्षां दद्याच्च भिक्षवे॥ कारुण्यं सर्वभूतेषु नर्मदाख्यानचिंतनं ॥ १३ ॥ इयं हिसर्वभूतानां शरणं भुवि न-
र्मदा ॥ अपांरूपेण या देवी लोकानुग्रहकारिणी ॥ १४ ॥ स्थावरं जंगमं चैव भूतग्रामं चतुर्विधं ॥ भगवत्युद्धरत्येव पतंतं नरके
ध्रुवं ॥ १५ ॥ इतिश्रीरेवामाहात्म्ये मनोरथतीर्थे मंगारगर्तासिंगममाहात्म्यं नाम चत्वारिंशोध्यायः ॥ ४० ॥ श्रीमार्कंडेय उवाच॥
ततो मेघवनं नामयज्ञपर्वतमाश्रितं ॥ रंतिदेवः पुरा तत्र चक्रवर्ती युधिष्ठिर ॥ १ ॥ गतिं नीतं कुलं येन सदेवासुरमानुषं ॥ पिता-
वै मोचितो येन गोभिर्विनिहतः पुरा॥२॥ गोचांडाला हता येन नाप्नुवंति परांगतिं ॥ चांडालादुदकात्सर्पात् विद्युतो ब्राह्मणाद-
पि ॥ ३ ॥ दंष्ट्रिभिश्च पशुभ्यश्च मरणं पापशीलिनां ॥ विष्णोर्बलिप्रदानेन क्रियाणां करणेन च ॥ ४ ॥ तीर्थे पिंडप्रदानेन तेपि
यांति परां गतिं ॥ दधीचिर्नाम राजर्षिरंवत्यधिपतिपुरा ॥ ५ ॥ सर्वधर्मभृतां श्रेष्ठः शक्रतुल्यपराक्रमः॥ स्वे राज्ये तनयं स्थाप्य व-
नं स नृपतिर्ययौ ॥ ६ ॥ तपश्चचार विपुलं दधीचिर्वनमास्थितः ॥ एवं काले समभवद्युद्धं देवासुरं नृप ॥ ७॥ तदा देवासुरे युद्धे
दैत्यादेवर्षिनिर्जिताः ॥ देवानां ब्राह्मणानां च हंतारो देवकंटकाः ॥ ८ ॥ नष्टास्ते पापदोषेण सभृत्यकुलबांधवाः ॥ देवाः समुदि-
ताः सर्वे लोकपालाः सवासवाः ॥ ९ ॥ विंध्यं गिरिं गतास्ते तु यस्मिन्वहति कल्पगा ॥ समर्थं भूपतिं ज्ञात्वा दधिचीं कुरुसत्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म ॥ १० ॥ दत्तान्यस्त्राणि रक्षार्थं तस्यराज्ञः सुरोत्तमैः ॥ तानि दत्वा ययुर्देवाः स्वंस्वं स्थानं मुदान्विताः ॥ ११ ॥ निर्युद्धा
निर्भयाः सर्वे न्यासे मुक्त्वास्त्रसंचयं ॥ स्वर्गभोगसुखे सक्ता निर्वैराः सुरसत्तमाः ॥ १२ ॥ सुराणां मतमाज्ञाय दधीचिः सत्यविक्र-
मः ॥ शापस्य च भयाद्भीतो नमस्कृत्य प्रगृह्यच ॥ १३ ॥ प्रभावात्तोयतां नीत्वा शरीरांतर्व्यवेशयन् ॥ कालांतरे ततः प्राप्ते दा-
नवा ववृधुः सह ॥ १४ ॥ जृंभकुंभहयग्रीवप्रमुखा बलदर्पिताः ॥ दानवान् पुनरप्युग्रान् यत्तान ज्ञात्वा ततः सुरैः ॥ १५ ॥ कार्य-
काले समुत्पन्ने स्मृतानि स्वायुधानि तैः ॥ प्रेषितो नारदमुनिर्दधीचिं प्रतिसत्वरं ॥ १६ ॥ अवंतिवनमासाद्य देवर्षिनारदस्तथा ॥
स विवेशाश्रमपदं सुद्वारांगणवेदिकं ॥१७॥ उत्थितो नृपशार्दूलो मुनिं दृष्ट्वा समागतं ॥ पूजयित्वार्घपाद्यैश्च ददौ विष्टरमासनं ॥१८॥
मुनिं दृष्ट्वा सुखासीनं राजा वचनमब्रवीत् ॥ सर्वत्र कुशलं विप्र देहे तपसि चान्यतः ॥ १९ ॥ किमर्थं मानुषं लोकं देवलोका-
दुपागतः ॥ २० ॥ नारद उवाच ॥ युद्धं समुहदुत्पन्नं देवानां दानवैः सह ॥ तान्यर्पय शस्त्राणि जीयंते दानवा यथा ॥ २१॥ कुरु-
कार्यं हि देवानां सत्यधर्मपरायण ॥ २२ ॥ दधिचि रुवाच ॥ शृणु कार्यं हि देवर्षे देवानां हितकारणं ॥ अचिरेणेव कालेन
क्षयं यास्यंति दानवाः ॥ २३ ॥ संदेहोयमनुप्राप्तः शरीरेजीवितेपिच ॥ तान्यस्त्राण्यस्थिषु मम संति ह्यस्थिमयानि म ॥ २४ ॥
किं कार्यं च कथं कार्यं किंच कृत्वा शुभं भवेत् ॥ ममागत्यात्रदेवास्ते गृण्हंत्वस्त्राणि मेंगतः ॥ २५ ॥ नारदोपि तथाकर्ण्य कंपित्त-
स्तान् सुरान् ययौ ॥ निवेदिते नारदेन सर्वे तत्रागताः सुराः ॥ २६ ॥ दधीचिर्यत्र राजर्षिस्तपस्युग्रे व्यवस्थितः ॥ ततः प्रणम्य
तान् देवान् दधीचिरिदमब्रवीत् ॥२७॥ देवा गृहंतु मे कायादस्त्राणि विविधान्यपि ॥ अपोरूपाणि मे कृत्वा ग्रस्तान्यस्त्राणि स-
र्वशः ॥ २८ ॥ तपः सिद्धिं कथं मे स्यादन्यथायुधधारणात् ॥ २९ ॥ देवा ऊचुः ॥ मनसापि न हंतव्यास्तापसाः श्रेय इच्छता
॥ यादृशस्तादृशो वापि किं पुनस्त्वादृशो मुने ॥३०॥ बहुधाचिंतयित्वैवं दधिचिर्देवतैः सह ॥ आजुहाव ततस्तूर्णं गास्ताः कामदु-

घास्तु याः ॥ ३१ ॥ लिहंतु मम गात्राणि जिह्वया शोणशीलया ॥ व्यक्तीकुर्वंतु मेस्थीनि देवकार्यार्थसिद्धये ॥ ३२
॥ दधीचि वचनाद्गाभिरस्थिवर्जं विशांपते ॥ जग्धं मांसादि तत्सर्वं निर्विवेकं तया पदा ॥ ३३ ॥ अस्त्रग्रामस्ततो-
स्थिभ्यः प्राप्तो देवैर्नृपोत्तम ॥ गोनर्द नगरं नाम जातं तत्राति विश्रुतं ॥ ३४ ॥ दानवानिहतादेवैः पुनः स्वा-
स्थिकृतं जगत् ॥ आचिंतयत्ततस्तत्र रंतिदेवो महापतिः ॥ ३५ ॥ गोविद्युत्विप्रचांडालसर्पैर्विनिहता नराः ॥ देवलो-
कं न ते यांति नतेषामुदकक्रिया ॥ ३६ ॥ शोचित्वेति चिरं कालं सांतःपुरपरिग्रहः ॥ प्रज्वाल्य नर्मदातोये शेषास्थीनि व्यसर्जे-
यत् ॥ ३७ ॥ लिंगं ब्रह्मेश्वरं यत्र यक्षपर्वतसन्निधौ ॥ धर्मसंशयमापन्नो रंतिदेवो महीपतिः ॥ ३८ ॥ वसिष्ठमुख्यैर्मुनिभिः वृतोः
मार्कंडमाययौ ॥ ममाश्रमद्वारवेद्यामासीनमृषिभिर्वृतम् ॥३९॥ कल्पगातीरनिलयं संप्राप्तो मांयुधिष्टिर ॥ रंतिदेवो द्विजैः सार्द्धं प्रणि-
पत्याभिवाद्य मां ॥ ४० ॥ कृतार्घपाद्यः स नृपो निवेदितकुशासनः ॥ समुत्थायाब्रवीद्वाक्यमासीनान् सऋषीन् प्रति ॥ कथं मे सु-
च्यते घोरात् पिता दुर्गतिबंधनात् ॥ ४१ ॥ ऋषयऊचुः ॥ एतद्वेत्स्यति मार्कंडो वेत्ता वेदपुराणयोः ॥ अस्य वाक्यप्रमाणं नस्त-
था वेदशरीरिणां ॥४२॥ श्रीमार्कंडेय उवाच ॥ शृण्वंतु मे यथा दृष्टं यथा श्रुतमकल्मषाः ॥ सर्वतीर्थमयी रेवा सर्वदेवमयी शु
भा ॥ ४३ ॥ कुब्जारेवासमायोगे विशेषा सुरपूजिता ॥ तत्र स्नाता दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥४४॥ तत्र श्राद्धेन यज्ञेन पि
तॄणां परमा गतिः ॥ अयं ते कथितो राजन् कुब्जारेवासमागमः ॥ ४५ ॥ अर्चयित्वा महेशानं तत्र ब्रिल्वाम्रकाह्वयं ॥ सर्वपाप
विनिर्मुक्तो गाणपत्यमवाप्नुयात् ॥ ४६ ॥ अष्टाधिकशतं देव्यः कन्यासिद्धिं परां गताः ॥ तपस्तप्त्वात्र राजेंद्र पूर्वकाले शुभव्रताः ॥४७॥
सर्वास्ताः सिद्धिमापन्नाः कुब्जारेवासमागमे ॥ अमासोमसमायोगे कार्तिक्यां कृतिका यदि ॥ ४८ ॥ वाराणसी प्रयागश्च पुष्करं-
नैमिषं तथा ॥ एवमादीनि तीर्थाणि स्नातुमायांति संगमे ॥४९॥ श्रवणात्कीर्तनाच्चास्य शिवलोके महीयते ॥ कार्तिक्यां कृतिका-

CC-0. In Public Domain. Digitization by eGangotri

योगे यः कुर्याच्छिवपूजनं ॥ ५० ॥ कुब्जायाः संगमे स्नात्वा वांछितं लभते फलं ॥ ५१ ॥ रंतिदेव उवाच ॥ कास्ताः कन्या
श्च किंनाम्न्यो वद सिद्धिं च कां गताः ॥ ५१ ॥ श्रीमार्कंडेय उवाच ॥ उमायाः सहचर्यस्ता देव्यः सर्वा उमात्मकाः ॥ कदा
चिदुमया सार्द्धं रोषामर्षसमन्विताः ॥ ५२ ॥ इयं दास्यति पापं न इति निश्चक्रमुश्च ताः॥ इहागम्य ततः सर्वाः स्नात्वा कुब्जा स
मागमे ॥ ५३ ॥ बिल्वाम्रकं समं पूज्य कोटया बिल्वाम्रजैर्दलैः ॥ कालेन कियता सर्वाः सिद्धिमापुः पृथक् पृथक् ॥ ५४॥ बिल्वा-
म्रकमहेशस्य प्रसादं प्राप्य तास्ततः ॥ पृथक् स्थानान्यवाप्ताश्च पूज्याः पूज्यानि भूपते ॥ ५५ ॥ वाराणस्यां विशालाक्षी नैमिषे
लिंगधारिणी ॥ प्रयागे ललितादेवी कामुका गंधमादने ॥ ५६ ॥ मानसे कुमुदा नाम विश्वकाया तथांतरे ॥ गोमये गोमती नाम
मंदारे कामचारिणी ॥५७॥ मदोत्कटा चैत्ररथे जयंतिं हस्तिनापुरे ॥ कान्यकुब्जे तथा गौरी रंभा मलयपर्वते ॥५८॥ एकाम्रे कीर्तिमा
लेति विश्वा विश्वेतरे तथा ॥ पुष्करे पुरहूतेति केदारे मार्गदायिनी ॥ ५९ ॥ नंदा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका॥स्थानेश्वरे भ
वानी च बिल्वके बिल्वपत्रिका ॥ ६० ॥ श्रीशैले माधवी नाम भद्रा भद्रेश्वरे तथा ॥जया वाराहशैले तु कमला कमलालये ॥ ६१ ॥
रुद्रकोटयां च रुद्राणी काली कालंजिरे तथा ॥ महालिंगे तु कपिला माकूटे मुकुटेश्वरी ॥६२॥ शालिग्रामे महादेवी शिवलिंगे ज
यप्रिया॥ मायापुर्यां कुमारी च संताने ललिता तथा ॥ ६३ ॥ उत्पलाक्षे सहस्राक्षी हिरण्याक्षे महोत्पला ॥ गयायां मंगला नाम
विमला पुरुषोत्तमे ॥ ६४ ॥ विपाशायाममोघाक्षी पांडुला पांडुवर्द्धने ॥ नारायणी सुपार्श्वे च त्रिकूटे भद्रसुंदरी ॥ ६५ ॥ विपुले
विपुला नाम कल्याणी मलयाचले ॥ कोटिनी कोटितीर्थे च सुगंधा माधवे वने ॥ ६६ ॥ गोदाश्रमेषु संध्याख्या गंगाद्वारे रतिप्रि
या ॥ शिवकुंडे शुभानंदा नंदिनी देविकातटे ॥ ६७ ॥ रुक्मिणी द्वारकायां च राधा वृंदावने तथा ॥ देवकी मथुरायां च पाताले
परमेश्वरी ॥ ६८ ॥ चित्रकूटे तथा सीता विंध्याद्रौ विंध्यवासिनी ॥ सह्याद्रावेकवीरा च हरिद्वारे तु चंडिका ॥६९ ॥ रमणा राम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे तु यमुनायां मृगावती ॥ कोल्हापुरे महालक्ष्मी रुमादेवी विनायके ॥ ७० ॥ आरोग्या वैद्यनाथे च महाकाले महेश्वरी ॥
अभया कृष्णतीर्थे च अमृता विंध्यकंदरे ॥ ७१ ॥ मांडव्ये मांडुकी नाम स्वाहा माहेश्वरी पुरे ॥ छागलंडे प्रचंडा च चंडिका मर-
कंटके ॥ ७२ ॥ सोमेश्वरी वरारोहे प्रभासे पुष्करावती ॥ देवमाता सरस्वत्यां पारा परतटे तथा ॥७३॥ माहलये महाभागा अ-
योध्यां पिंगलेश्वरी ॥संहिता कृतशौचे च कार्तिकेये तु शांकरी ॥ ७४ ॥ उत्पला वर्तके लोला सुभद्रा शोणसंगमे ॥ माता सिद्धव
ने लक्ष्मीरनंता भरताश्रये ॥ ७५ ॥ जालंधरे विश्वमुखी तारा किष्किंधपर्वते ॥देवदारुवने पुष्टिर्मेधा काश्मीरमंडले ॥ ७६ ॥ भी-
मादेवी हिमाद्रौ च तुष्टिर्विश्वेश्वरी तथा ॥ कपालमोचने सिद्धिर्माता कायावरोहणे ॥ ७७ ॥ शंखोद्धारे ध्वनिर्नाम धृतिः पिंडा
रके तथा ॥ ऐंद्री चोत्तरकुरौ कुशद्वीपे कुशोदरी ॥ ७८ ॥ मन्मथा हेमकूटे च कुमुदे सत्यवादिनी ॥ अश्वत्थे वंदनीया तु निधि
र्विश्रवणालये ॥ ७९॥ गायत्री वेदवदने पार्वती शिवसंनिधौ देवलोके तथेंद्राणी ब्रह्मा सतु सरस्वती ॥ ८० ॥ सूर्यबिंबे प्रभाना
म मातॄणां वैष्णवी यथा ॥ अरुंधती सतीनां च रामासु च तिलोत्तमा ॥ ८१ ॥ चित्ते चंद्राकला नाम शक्तिः सर्व-
शरीरिणां ॥ एतदुद्देशतः प्रोक्तं नाम शतमुत्तमम् ॥ अष्टोत्तरं तु तीर्थानां शतं वापि प्रसंगतः ॥ ८२ ॥ यः पठेत्
प्रातरुत्थाय लभेत् सिद्धिं सवांछितां ॥ एषु तीर्थेषु च स्नात्वा एताः पश्यति यो नरः ॥ ८३ ॥ सर्वपापविनिर्मुक्तः स
याति परमां गतिम् ॥ ८४ ॥ यः करोति परं कालमुमास्थानेषु मानवः ॥ स भित्त्वा ब्रह्मसदनं पापमाप्नोति शांकरम् ॥ ८५ ॥
नामाष्टकशतं यश्च श्रावयेत्सिद्धिसन्निधौ ॥ तृतीयायां तथाष्टम्यां बहुपुत्रो भवेन्नरः ॥ ८६ ॥ गोदाने श्राद्धकाले च विवाहे मंगले-
तथा ॥ देवार्चनविधौ चापि पठन् ब्रह्मत्वमाप्नुयात् ॥ ८७ ॥ श्रुत्वैतत् स्तोत्रमतुलं नमस्कृत्य च पार्वतीं ॥ रंतिदेवो नरपतिः
प्रपच्छ पितृसंहतिम् ॥ ८८ ॥ श्रीमार्कंडेय उवाच ॥ रेवातटे महापुण्ये पितॄणां मोक्षवांछया ॥ कुरु श्राद्धं च यज्ञं च मुच्यंते पितरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा ॥ ८९ ॥ विशेषात्पितृमोक्षार्थं कुब्जा रेवासमागमे ॥ श्रुत्वैव रंतिदेवोपि वसिष्ठप्रमुखैः सह ॥ ९० ॥ नमस्कृत्य च मार्कंडे
जगाम स्वपुरं नृप ॥ ततः श्राद्धस्य समये यज्ञकाले ह्युपस्थिते ॥ ९१ ॥ यज्ञवाटं ततः कृत्वा कुब्जा रेवासमागमे ॥ वसिष्ठप्र
मुखैर्विप्रैर्ऋषिभिः सह ॥ ९२ ॥ ईजे यज्ञं बहुगुणं बह्वन्नं बहुदक्षिणम् ॥ गजाश्वरथदानेन हेमभूमिगवादिके ॥ ९३ ॥ विप्रेभ्य-
संप्रदत्ते तु संख्यां कर्तुं न पार्यते ॥ देवगंधर्वनागाश्च ग्रहा विद्याधरास्तथा ॥ ९४ ॥ साक्षात्तत्र समागम्य शक्राद्या जगृहुर्बलिम् ॥
युगपत्पूजिता देवा ब्रह्मविष्णुमहेश्वराः ॥ अर्चिता नर्मदादेवी शैलमूले व्यवस्थिता ॥ ९५ ॥ प्रवाहो निर्गतो यत्र कुब्जारेवा-
समागमे ॥ पितरस्तर्पितास्तत्र पितृमुख्या युधिष्ठिर ॥ ९६ ॥ विविधैः श्राद्धदानैश्च प्राप्तास्ते परमां गतिं ॥ दिव्ययानसमारूढं
दधीचिं परमं स्वकम् ॥ ९७ ॥ शतमष्टोत्तरं चापि पितॄणां तदनंतरं ॥ देवयानपथे सर्वं स ददर्श नृपोत्तमः ॥ ९८ ॥ ऊचुः सर्वे
च ते देवाः ब्रह्माद्या रंतिभूभुजं ॥ वरं वृणीष्व भद्रं ते सत्येनानेन भूमिप ॥ ९९ ॥ प्राप्तोसि परमं लोकं पितृभिः सह शाश्वतं
॥ रंतिदेवोऽब्रवीद्वाक्यं यूयं मे वरदा यदि ॥ १०० ॥ कलशः स्थापितो यज्ञे ब्राह्मणैर्वेदपारगैः ॥ चातुर्विद्यैस्तु मुख्योयं पंचब्रह्म-
तनुः स्वयम् ॥ १०१ ॥ शिवलिंगं भवत्वेतत् ज्वलत्कालानलप्रभम् ॥ पर्वते यज्ञवाटे च प्रवाहा ये विनिर्गताः ॥ ३०२ ॥ एताः
पापहराः संतु नदीरूपास्तु यज्ञजाः ॥ एवं वरमहं याचे भवंतो वरदा यदि ॥ १०३ ॥ एवमस्त्विति ते देवाः उक्त्वा तं नृपतिं
पातिः ॥ स्वंस्वं यानं समारुह्य जग्मुः सर्वे यथागतम् ॥ १०४ ॥ रंतिदेवोपि नृपतिः पितॄनुद्धृत्य भारत ॥ शिवं संस्थाप्य
यत्नेन देवम् परममव्ययम्॥ १०५॥ कामगंयानमासाद्य जगाम स्वनिवेशनं ॥ वादित्रैर्विविधैर्युक्तो जयशब्दपुरस्कृतः॥ १०६॥ श्रीमार्कंडेय
उ० अमासोमसमायोगे कार्तिक्यां चैव पर्वणि ॥ अत्र यद्दियते दानं तदनंत्याय कल्पते ॥ १०७ ॥ एतत्ते कथितं राजन् तीर्थं पाप-
प्रणाशनं ॥ सपादकोटितीर्थानां कुब्जारेवासमागमे॥ १०८॥ दक्षिणोत्तरभागे च क्रोशमात्रे प्रतिष्ठितं ॥ अवशः स्ववशो वापि प्राणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्योत्र परित्यजेत् ॥ १०९ ॥ राजा वर्षसहस्राणि विद्याधरपुरे वसेत् ॥ बिल्वाम्रकं सिद्धलिंगं कामं मोक्षफलप्रदम् ॥ ११० ॥ कुजेश्वरं तथा चान्यद् ब्रह्महत्याव्यपोहनं ॥ अत्रांतरे महाराज शिवक्षेत्रं विदुर्बुधाः ॥ १११ ॥ रेवाकुब्जासमायोगे अशीतिस्तान् विदुर्बुधाः ॥ अयं ते कथितो राजन् कुब्जारेवासमागमः ॥ ११२ ॥ श्रवणात्कीर्तनादस्य तीर्थस्य नरसत्तम ॥ सर्वपापविशुद्धात्मा शिवलोके महीयते ॥ ११३ ॥ इति श्रीरेवाखंडे नर्मदामाहात्म्ये कुब्जारेवासमागमे ॥ बिल्वाकर्माहात्म्यं नाम एकचत्वारिंशोध्यायः ॥ ४१ ॥ श्रीमार्कंडेय ॥ अथान्यत्कथयिष्यामि तीर्थं पापहरं शुभम् ॥ याम्यप्रदेशे रेवाया आश्रमं सुरपूजितं ॥ १ ॥ स्वर्णद्वीपमितिख्यातं देवद्रोणिसमन्वितं ॥ हारीतो गौतमो विष्णुः सावर्णिः कौशिलस्तथा ॥ २ ॥ शोषिताः कंदमूलैश्च तथान्ये वायुभक्षकाः ॥ दंतोलुखलिनः केचित्कणधूमाशिनः परे ॥ ३ ॥ जलपर्णाशनाश्चान्ये एकपादस्थिताः परे॥ तथैवार्धकराः केचिदन्ये सूर्यावलोकिनः ॥ ४ ॥ नानाविद्यासु निरता योगाभ्यासरतास्तथा ॥ न तत्र संचगेत्पापं तमः सूर्योदये यथा ॥ ५ ॥ न्याग्रोधाशोकबदरीबिल्वपुंभागकेसरैः ॥ धवपाटलमुखैश्च चिंचिणीनिंबचंपकैः ॥ ६ ॥ पत्रपुष्पफलोपेतैः वृक्षैः सर्वैरलंकृतं ॥ नानापक्षिगणैर्युक्तं सिद्धगंधर्वसेवितम् ॥ ७ ॥ व्याहरत्यंडजा सर्वे मानुषाणां गिरो नृप ॥ एवं गुणसमायुक्तं सुवर्णद्वीपमुत्तमम् ॥ ८ ॥ अर्चानाद्देवदेवस्य सुवर्णद्वीपवासिनः ॥ अपहाय तमः कृत्स्नं लोके क्रीडंति शांकर ॥ ९ ॥ पुण्यायां भूप कार्तिक्यां सर्वतीर्थफलप्रदम् ॥ न तपस्यंति मनुजाः कलिमायाविमोहिताः ॥ १० ॥ नास्तिकैर्भिन्नमर्यादैः पुराणश्रुतिनिंदकैः ॥ कलिभावविमूढैश्च स्थानं तद्वै न दृश्यते ॥ ११ ॥ हिरण्यगर्भाख्या च सरिद् यस्मिन् वहति भारत ॥ यज्ञगर्भेश्वरं नाम शिवलिंगं प्रकीर्तितम् ॥ १२ ॥ पूज्यते सिद्धगंधर्वैः सुरासुरमहोरगैः ॥ यत्र वैवस्वतो राजा चंद्रबिंबाननोभवत् ॥ १३ ॥ चैत्रस्यापि च मासस्य शुक्लपक्षे महोदये ॥ चतुर्दशी पौर्णिमासी तत्र सन्निहितो हरः ॥ १४ ॥ तिलोदकप्रदानेन पिंडदानेन भारत ॥ पितॄन्समुद्धरेत्तत्र नरकाद्भूरिदक्षिणः ॥ १५ ॥ निवसेद्वैष्णवे लोके यावदिंद्राश्चतुर्दश ॥ १६ ॥ तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्दीयते दानं कुरुक्षेत्रसमं हि तत् ॥ प्राप्य प्राणपरित्यागं न पश्यति यमालयं ॥ १७ ॥ इति सुवर्णद्वीपे हिरण्यगर्भा संगमः ॥ श्रीमार्कं० ॥
ततो गच्छेत राजेंद्र मांडव्याश्रममुत्तमं ॥ नर्मदायाम्यभागे तु तीर्थं परमशोभनम् ॥ १ ॥ तस्मिन् सहस्रशः संति मुनयः शंसि-
तव्रताः ॥ विभांडश्च द्विजाग्र्यश्च ऋष्यशृंगो द्विजः क्रतुः ॥ २ ॥ इत्येवमादयः सर्वे नानाव्रतपरायणाः ॥ वनं चाशोकवनिका
नाम्ना राजन्प्रकीर्तितम् ॥ ३ ॥ तत्र संनिहितो देव उमयासहितो हरः ॥ प्रविष्टश्चाश्रमे तत्र विशोको विमलः शिवः ॥ ४ ॥ वि-
शोका हि ॥ सरिच्छ्रेष्ठा रेवया यत्र संमता ॥ तत्र स्नात्वा दिवं यांति ये मृतास्ते पुनर्भवाः ॥ ५ ॥ अशोकेश्वरनामानं सिद्धलिंगं तु शं-
करं ॥ पूजयातस्य देवस्य मोदते दिवि देववत् ॥ ६ ॥ अशोकेश्वरसान्निध्ये ब्रह्मशक्रपुरोगमाः ॥ देवाश्च कतिसिद्धाश्च निवसंति
युधिष्ठिर ॥ ७ ॥ विश्वेदेवाश्रमं तद्धि सर्वदेवनमस्कृतं ॥ विश्वायां च सुरान् पुत्रान्विश्वेदेवाभिधान्नृप ॥ ८ ॥ अशोकवनिकायां तु
जनयामास कश्यपः ॥ वैवस्वतेंतरे प्राप्ते त्रेतायां नृपसत्तम ॥ ९ ॥ पंचायुतानि तीर्थानां तत्र सिद्धानि भारत ॥ अशोकेश्वरपूजा-
भिरशोको जायते नरः ॥ १० ॥ सहस्रसंख्यास्तत्रादौ मुनीनां प्रवरास्त्रियः ॥ अरुंधती च सावित्री देवमातादितिस्तथा ॥ ११ ॥
देवयानी तथेंद्राणी रोहिणी सांभरायणी ॥ दाक्षायणी लोकवंद्या लोपामुद्रा महायशाः ॥ १२ ॥ रत्नावती सूर्यभार्या स्वाहाद्या दे-
वता स्त्रियाः ॥ अशोकास्तत्रस्तीर्थेस्मिन् बभूवुः शतसंख्य ॥ १३ ॥ अस्य तीर्थस्य माहात्म्यान्मुच्यते कल्मषान्नरः ॥ शुक्लपक्षे
चतुर्दश्यामाश्विने मासि भारत ॥ १४ ॥ अपुत्रिणी तथा वंध्या दुर्भगा भर्तृवर्जिता ॥ पंचरत्नौषधिफलैः स्नाप्या वै कलशैः शुभैः
॥ १५ ॥ पुत्रिणी सुभगा सा स्यात् शतजन्मनि भारत ॥ पुरा गौर्या रहो दत्तस्त्वशोकवनिकां प्रति ॥ १६ ॥ यस्मिन्वहति सा
देवी नर्मदा सप्तकल्पगा ॥ अत्रेष्टं लोकपालैश्च दिक्पालैश्चाप्यनेकधा ॥ १७ ॥ अन्यक्षेत्रात् शतगुणं तत्र दानादिकं भवेत् ॥
स्नातं जप्तं हुतं ध्यातं श्रद्धया विधिवत् कृतम् ॥ १८ ॥ बहूनि संति तीर्थानि कुरुक्षेत्रादिकानि च ॥ अशोकवनिकायास्तु नान्यत्तीर्थं स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मं विदुः ॥ १९ ॥ इति श्रीरौद्रीय संहितायां वायुपुराणे श्रीरेवामाहात्म्ये अशोकेश्वरतीर्थनाम द्विचत्वारिंशोध्यायः ॥ ४२ ॥
श्रीमार्कंडेय उवाच ॥ आथान्यत्कथयिष्यामि तीर्थं वागीश्वराभिधं ॥ वागुर्नाम नदीर्यत्र रेवया सह संगता ॥ १ ॥ मणिभद्रवी-
रभद्रास्तथान्ये शतशो नृपाः ॥ बभूवुर्मुक्तशापास्ते तीर्थस्यास्य प्रभावतः ॥ २ ॥ तत्रस्नाता दिवं यांति ये मृतास्ते ऽपुनर्भवाः ॥
वाग्वीशा तत्र चामुंडा दानवक्षयकरिणी ॥३॥ तिलपिंड प्रदानेन पितृणां परमा गतिः ॥ ब्रह्मदत्तश्चक्रवर्ती सूर्यवंशे पुराभवत् ॥४॥
अयोध्याधिपतिः श्रीमान् शक्रतुल्यपराक्रमः ॥ इष्टः क्रतुवरस्तेन नर्मदावागुसंगमे ॥५॥ ब्रह्माद्यादेवताः सर्वाः शक्रविष्णुपुरोगमाः
प्रत्यक्षाश्च महेशान गणेश्वरपुरोगमाः॥६॥लोकपालाश्च दिक्पाला ग्रहा ऋक्षाणि चागमन्॥वशिष्ठभृगुजाबालिकश्यपात्रिपुरोगमाः ॥७॥
एवमाद्याश्च मुनयो नृपेणामंत्रितास्ततः॥ हिरण्मयास्तत्र यूपाः सर्वं चापि हिरण्मयं॥८॥गजाश्वरथलक्षाणि गावो हेमसमन्विताः॥
बहुलक्षा ददौ राजा दक्षिणायां मखोत्तमे ॥ ९ स्वर्णभारसहस्राणि रत्नं नानाविधं बहु ॥ राजानः कर्मकर्तारो बहुदेशसमागताः
॥ १० ॥ ये यदिच्छंति यावच्चतत्तस्याशुप्रदीयते ॥ एवंप्रवर्तितो यज्ञो जुव्हतो बहुदक्षिणः ॥ ११॥ ब्रह्मदत्तस्य यज्ञेन वाग्वीशस्य-
प्रसादतः ॥ नर्मदासंगयोगेन पितृणां नृपसत्तम ॥ १२ ॥ कल्पावसानं यावत्तु दिवि देवत्वसंश्रिताः ॥ प्रेतत्वमुक्ताः प्रोताश्च ये के-
चित् क्रोशमात्रगाः ॥ १३ ॥ एतत्ते कथितं राजान् यथादृष्टं पुरातनं ॥ वाग्वीशानसमायुक्तं तीर्थं संगममंडितं ॥ १४ ॥ इति श्री-
रेवामहात्म्ये वागुरेवासंगममहात्म्यं नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ श्रीमार्कंडेय उवाच ॥ ततोगछेत राजेंद्र तीर्थं पाप-
हरं शुभं ॥ सहस्रावर्तकं नाम स्वर्गसाधनमुत्तमं ॥ १ ॥ तत्र ह्नातस्य विधिवत् वृषोत्सर्गफलं लभेत् ॥ आसप्तमं कुलं चैव पुनी-
ते नात्र संशयः ॥ २ ॥ रेवाया उत्तरे कूले आद्यं युगसहस्त्रिकं ॥ ३ ॥ तत्र चास्ते महाभाग कारापवनमुत्तमं ॥ अग्निष्टो-
मफलं यत्र स्नात्वा स्वर्गं च गछति ॥ ४ ॥ इति सहस्रावर्तकंनाम तीर्थं ॥ श्रीमार्कंडेय उवाच ॥ रेवाया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तरे भागे तीर्थं परमशोभनं ॥ सौगंधिकं वनं नाम ब्रह्मचारिगणाः पुरा ॥ १ ॥ शिषिंचुः पितरस्तत्तु ब्रह्माद्याश्च तपोधनाः ॥
सिद्धचारणगंधर्वाः सकिन्नरमहोरगाः ॥२॥ सदापर्वणि सेवंते दर्शितं ब्रह्मचारिभिः ॥ प्रविश्य तद्वनं मर्त्यः सर्वपापैः प्रमुच्यते ॥ ३ ॥
विप्रान्संतर्प्य तत्रैव पितॄणां तृप्तिरक्षया ॥ वनच्छायाप्रसुप्तानां न दोषा देहसंभवाः ॥ ४ ॥ इति सौगंधिकवनमाहात्म्यं ॥ श्रीमा-
र्कंडेय उवाच ॥ ततः सरस्वतीं गच्छेन्नदीनामुत्तमां नदीम् ॥ प्लक्षादेव समुद्भूतां महापुण्यां सरिद्वरां ॥ १ ॥ तत्र स्नानं प्रकुर्वीत
वल्मिकाभिवृते जले ॥ तर्पयित्वा पितॄन् देवानश्वमेधफलं लभेत् ॥ २ ॥ इति सरस्वतीतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ इशाना-
ध्युषितं नाम तीर्थं परमशोभनं ॥ तत्र स्नात्वा व्यतीपाते संक्रांतौ ग्रहणे नरः ॥ १ ॥ सहस्रकपिलादाने वाजिमेधेन यत्फलं ॥
तत्फलं समवाप्नोति इशानाध्युषिते नरः ॥ २ ॥ देवतात्रितयं तत्र सर्वाशुभविनाशनं ॥ सुगंधाः शातकुंभाश्च पंचयज्ञाश्च भार-
त ॥ ३ ॥ तत्राभिगम्य नरश्रेष्ठः स्वर्गलोके महीयते ॥ त्रिशूलखाते तत्रैव तीर्थमासाद्य भारत ॥ ४ ॥ तत्राभिषेकं यः कुर्यादर्चये
त्पितृदेवताः ॥ गणेशत्वं स लभते पुनर्जन्मनि भारत ॥ ५ ॥ ततो गच्छेन्महाराजब्रह्मणः स्थानमुत्तमं ॥ रेवाया उत्तरेकूले काम-
भोगफलप्रदं ॥ ६ ॥ ब्रह्मोदमिति विख्यातं प्रकाशं भुवि भारत ॥ तत्र सप्तर्षयः सिद्धा बहवोन्ये च योगिनः ॥ ७॥ मुनयः सि-
द्धसंघाश्च तापसा ब्रह्मवादिनः ॥ यस्य तीर्थस्य माहात्म्याद्ब्रह्मलोकमवाप्नुयुः ॥ ८ ॥ पितरः श्राद्धदानेन प्रयाता ब्रह्मणः पुरं ॥ उ-
दुंबरस्य देवस्य कृत्वा विधिवदर्चनम् ॥ ९ ॥ ब्रह्मज्ञानमवाप्नोति तपसा दग्धकिल्बिषः ॥ १० ॥ इतिब्रह्मोदतीर्थं ॥ ततो गच्छेन्म-
हाराज शंकरंलोकशंकरं ॥ कृष्णपक्षे चतुर्दश्यामभिगम्य वृषध्वजं ॥ १ ॥ लभते सर्वकामाश्च स्वर्लोकं चापि गच्छति ॥ नर्मदा-
याम्यभागे तुगोप्याद्गोप्यतरंमहत् ॥ २ ॥ सिद्धिलिंगं मणिमयं न तत्पश्यंति मानवाः ॥ नागेंद्रसुरदैत्याद्यैर्नागकन्याभिरर्च्यते ॥ ३ ॥
बहुतीर्थाश्रयं लिंगं शांकरं कुरुनंदन ॥ वसूनामाश्रमं रम्यं मुनीनां ब्रह्मचारिणाम् ॥ ४ ॥ शिवभक्तिपराणां च कंदमूलफलाशि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नां ॥ पितृणां चाक्षया तृप्तिस्तिलतोयप्रदानतः ॥ ५ ॥ शंकरं देवमभ्यर्च्य दत्वा दानं च शक्तितः ॥ शंकरस्य प्रभावेन दिवि देव-
स्वमाप्नुयात् ॥ ६ ॥ इतिदक्षिणेशंकरतीर्थं ॥ ततो गच्छेत राजेंद्र सोमतीर्थमनुत्तमं ॥ नर्मदादक्षिणे कूले पितृणां मुक्तिदायकं ॥ १ ॥
तत्र स्नात्वा नरो राजन् स्वर्गलोके महीयते ॥ पितरः श्राद्धदानेन लभंते तृप्तिमक्षयाम् ॥ २ ॥ तिलोदकप्रदानेन तथा मर्त्यः शि-
वार्चनात् ॥ शिवलोकमवाप्नोति वर्षाणामयुतं नृप ॥ ३ ॥ इति दक्षिणे सोमतीर्थं ॥ ततोगच्छेन्महाराजतीर्थं सारस्वतं परम् ॥
तामसे चांतरे पूर्वं यत्र सिद्धा सरस्वती ॥ १ ॥ द्वापरे प्रथमे पादे बहुतीर्थसमन्विता ॥ ब्राह्मी सरिच्छुद्धदेहारेवायामभवत्किल
॥ २ ॥ तत्र सा स्थापयामास लिंगं सारस्वतं शुभम् ॥ तत्र स्नात्वा दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ ३ ॥ सारस्वतं शिवं
ये च पूजयंति स्वशक्तितः ॥ ते पुण्यदेहाः पुरुषाः ब्रह्माणमभिगामिनः ॥ ४ ॥ ये त्वग्निपाबर्हिषदस्तृणपर्णजलाशनाः ॥ ते चात्र
मुनयः सिद्धाः सर्वे वै लोकविश्रुताः ॥ ५ ॥ अत्र मंकणको नाम ऋषिरादौ शिवार्चकः ॥ स्नात्वासरस्वतं देवं संपूज्याहारमत्य-
जत् ॥ ६ ॥ निराहारोतपस्तेपे परिणामविवक्षया ॥ सर्वैर्जलरसं दृष्ट्वा हर्षाविष्टोभवत्तदा ॥ ७ ॥ ननर्ताथ शताद्वांतेद्वितीये विस्मि-
तो मुनिः ॥ तस्मिन्नर्तति विप्रे तु स्थावरं जंगमं महत् ॥ ८ ॥ नर्तनात्तुमहावीर तेजसा तस्य मोहितं ॥ ब्रह्मादिभिस्ततो राज-
न् मुनिभिर्देवतैः सह ॥ ९ ॥ विज्ञप्तः शंकरो देवो नर्तनं मुनिविश्वयोः ॥ ननर्तति यथा विप्र तथा त्वं कर्तुमर्हसि ॥ १० ॥ शि-
वोप्यागत्य तं दृष्ट्वा हर्षेणाविष्टमानसं ॥ नृत्यंतमब्रवीच्चैनं सुराणां हितकाम्यया ॥ ११ ॥ भोभो महर्षे धर्मज्ञ किमर्थं नर्तितं त्व-
या ॥ हर्षस्य करणं किं वा तन्मे ब्रूह्यत्र सांप्रतं ॥ १२ ॥ मंकण उवाच ॥ किं न पश्यसि मे देहे जलस्य तु रसं शुभम् ॥
यं दृष्ट्वा संभ्रमत्तोहं हर्षेण महतान्वितः ॥ १३ ॥ प्रसन्नश्चाब्रवीद्देवो मुनिरागेण मोहितम् ॥ मयापि विस्मयो विप्रत्वां दृष्ट्वा मुनिपुं-
गव ॥ १४ ॥ एवमुक्ते नरश्रेष्ठ महादेवोन सद्विजः ॥ अंगुल्यग्रेण नृपते स्वांगुष्ठस्ताडितस्तदा ॥ १५ ॥ ततो भस्म भृशं राजन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्गतंहिमसन्निभम् ॥ तं दृष्ट्वा छलितोस्मीनि स मुनिः पादयोगतः ॥ १६ ॥ रुद्रं त्वां देव मन्येहं नान्यत्वमासि वै विभो ॥
सुरासुराणां जगतां गतिस्त्वमसि शूलधृक् ॥१७॥ त्वयासृष्टमिदं सर्वं त्रैलोक्यं त्रिपुरांतक ॥ तथैव पालयन्देववर्तसे जगतः स्व-
यम् ॥ १८ ॥ त्वया संहियते विश्वं पुनरेव युगक्षये ॥ देवैरपि न शक्यस्त्वं परोज्ञातुं कुतो मया ॥ १९ ॥ त्वत्प्रसादात्सुराः
सर्वे मोदंतेऽत्राकुतोभयम् ॥ एवं स्तुत्वा महादेवं स मुनिः प्रणतोऽभवत् ॥ २० ॥ न ज्ञातं मे न जानामि मूढोहं
चाल्पबुद्धिमान् ॥ तथा कुरु महादेव तपोमे न क्षरेद्यथा ॥ २१ ॥ ततो देवःप्रहृष्टात्माऋषिं तमिदमब्रवीत् ॥
तपस्ते वर्धतां विप्र मत्प्रसादादनेकधा ॥ २२ ॥ ततः सर्वं विजानीहीज्ञास्यसे च तथा मुने ॥ यत्वया-
ज्ञातुमारब्धं यत्प्रार्थयसि नित्यशः ॥ २३ ॥ आश्रमे चात्र वस्यामि त्वया सार्द्धं सदा मुने ॥ मंकणेश्वरनाम्नाहं लोकाना-
मभयप्रदः ॥ २४ अत्र सारस्वते तीर्थे योमामर्चयति द्विजः ॥ न तस्यदुर्लभं किंचिदिह लोके परत्र च ॥ २५ ॥ एतत्ते कथितं
राजन् तीर्थं सारस्वतं मया ॥ श्रवणात्किर्तनादस्य गोसहस्रफलं लभेत् ॥ २६ ॥ इति रेवामा० दक्षिणे सारस्वतं तीर्थनाम
चतुश्चत्वारिंशोऽध्यायः॥४४॥ श्रीमार्कंडेय उ०॥ ततः सहस्रयज्ञाख्यं त्रिषु लोकेषु विशृतं ॥ नर्मदादक्षिणे भागे तीर्थं सिद्धिप्रदायकं
॥ १ ॥ तत्र ब्रह्मादयो देवा मुनयश्चतपोधनाः॥ कार्तिकेयस्य भगवान् त्रिसंध्यं किलभारत ॥ २ ॥ सानिध्यं कुर्वते नित्यं भगवत्
प्रियकाम्यया ॥ तत्र स्नात्वा च जप्त्वा च तर्पयित्वा पितॄन् सुरान् ॥ ३ ॥ फलं यज्ञसहस्रस्य प्राप्नोति नृपसत्तम ॥ पुरा ऋषि-
सहस्रेण भार्गवप्रमुखेन तु ॥ ४ ॥ दृष्टं यज्ञसहस्रं वै विद्यया विविधात्मना ॥ सहस्रयज्ञसंज्ञं वै तेन तीर्थं विदुर्बुधाः ॥ ५ ॥ इति
दक्षिणे सहस्रयज्ञाख्यं तीर्थनाम ॥श्रीमार्कंडेय उ०॥ कपालमोचनं तीर्थं ततो गच्छेद्युधिष्ठिर ॥ कपालमोचनात् शंभोः ख्यातं पापप्र
णाशनं ॥ १ ॥ तत्र स्नात्वा नरव्याघ्र सर्वपापैः प्रमुच्यते ॥ कपालेश्वरदेवस्य लिंगं संपूज्य मानवैः ॥ २ ॥ मुक्तपापो विशुद्धात्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवलोके महीयते ॥ पितॄणामक्षया तृप्तिर्दत्वा चापि तिलोदकं ॥ ३ ॥ इति दक्षिणे कपालमोचनं तीर्थं ॥ अग्नितीर्थं ततो गछे-
न्नियतो भरतर्षभ ॥ अग्निष्टोमफलं प्राप्य कुलं चापि समुद्धरेत् ॥ १ ॥ रेवाया उतरे कुले पंचकुडानि भारत॥ भरद्वाजो गौतमोत्रिः
पुलस्त्यः पुलहस्तथा ॥ २ ॥ ब्रह्मलोकं गता राजन् ज्वलनस्य प्रसादतः ॥ हूयमानस्तु तैर्वन्हिः प्रत्यक्षोभूद्युधिष्ठिर ॥ ३ ॥ तत-
स्तोत्रेण ते सर्वे तोषयामासुरुत्थितं ॥ त्वमग्ने सर्वदेवानां मुखं वेदेषु गीयते ॥ ४ ॥ त्वमेव सर्वभूतानामंतश्चरासि पावक ॥
त्वामेव चैकमित्याहुस्त्वमेव त्रिविधः पुनः ॥ ५ ॥ त्वमष्टमूर्तियज्ञश्च यज्ञवाहस्त्व मेव च ॥ त्वया सृष्टमिदं सर्वं प्रवदंति
महर्षयः ॥ ६ ॥ त्वदंते हिजगत् कृत्स्नं सद्यो नश्येत् हुताशन ॥ तुभ्यं कृत्वा मनो विप्राः सत्कर्मावर्जितां गतिं ॥ ७ ॥
गच्छति सहपत्नीभिस्त्वत्प्रसादेन शाश्वती ॥ त्वामग्ने जलदा नेदुःखे विषक्ताश्च विद्यतः ॥ ८ ॥ ततो निर्गत्य भूतानि
त्वमेव दहसि प्रभो ॥ जातवेदास्त्वमेवासि निश्वसृष्टिर्महामते ॥ ९ ॥ त्वया यत्कर्मविदितं तत्सर्वं स्याच्चराचरे ॥
त्वयाऽपो विहिताः पूर्वं त्वमेव ग्रससि स्वयं ॥ १० ॥ त्वयि हव्यं च कव्यं च यथावत्संप्रतिष्ठितं ॥ अग्निस्त्वमेव यज्ञानां त्वं
धाता स्त्वं ब्रुहस्पतिः ॥ ११ ॥ त्वमश्विनौ यमः सूर्यः सोमस्त्वमसि पावक ॥ इत्येवंसंस्तुतोवन्हिस्तैर्द्विजैर्भक्तितत्परैः
॥ १२ ॥ प्रसन्नश्चाब्रवीत्तत्र मुनीन्पावकसत्तमः ॥ भरद्वाजादिमुनयः स्तोत्रेणाहंप्रतोषितः ॥ १३ ॥ वरं त्वयाचितम-
पि प्रदास्यामि यथेप्सितं ॥ तपोयज्ञादिकं कर्मसिध्यतां वो ह्यविघ्नितं ॥ १४ ॥ ब्रह्मलोकनिवासोस्तु वांछिता सिद्धिरस्तु वै
॥ इति दत्वा वरं वन्हिरंतर्द्धानमथागमत् ॥१५॥ ततत्प्राप्तं च तैसर्वै ऋुषिभिर्वांछितं च यत् ॥ ततश्चाग्नीश्वरंदेवं स्थापइत्वा द्वि-
जोत्तमाः ॥ १६ ॥ हर्षेण महता युक्ताः सत्यलोकमुपागताः ॥ अग्नीश्वरमिदं स्तोत्रं सर्वपापप्रणाशनं ॥ १७ ॥ यः पठेद्धोमकाले
वै ब्रह्मलोकमवाप्नुयात् ॥ अग्नीश्वरं महादेवं सुरासुरनमस्कृतं ॥ १८ ॥ नर्मदातीरसंस्थो यः स वै मे लिंगमर्चयत् ॥ न रोगो न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च दौर्भाग्यं न दुःखं नाग्निमांद्यता ॥ १९ ॥ तस्य जन्मचतुःपंच जायते व युधिष्ठिर ॥ २० ॥ इति श्री रेवामहात्म्ये उत्तरे अग्नितीर्थं नाम पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ श्रीमार्कंडेय उवाच ॥ ततो गछेन्महाराज तीर्थं त्रैलोक्यविश्रुतं ॥ अदितीश्वरं नाम देवलीनं परकारणं ॥ १ ॥ नर्मदासौम्यभागे तु महापातकनाशनं ॥ तत्र स्नाता दिवं यांति सौरं शिवमुमापदं ॥ २ ॥ तिलोदकप्रदानेन पितॄणामक्षया गतिः ॥ शृणु राजन् पुराख्यानमादिकल्पे कृते युगे ॥ ३॥ अदितिर्देवमाता तु सर्वलोकहितेच्छया ॥ दिव्यं वर्षसहस्रं तु सौर्येण सह भारत् ॥ ४ ॥ कृतोपचारा पुत्रार्थे स्वयं सर्वात्मना शिवं ॥ आराधयामास भक्त्या कल्पगा तीरमाश्रित ॥ ५ ॥ तस्या भक्तिं परां ज्ञात्वा ततस्तुष्टो ब्रवीच्छिवः ॥ वरं वरय सुश्रोणियत्ते मनसि वांछितं ॥ ६ ॥ दास्येहं तत्र संदेहो यद्यपि स्यात्सुदुर्लभं ॥ ७ ॥ अदितिरु० ॥ यदि तुष्टो महेशान वरं दातुं ममेच्छसि ॥ द्वौ सुतौ लोकपालौ मे भवेतां त्वत्प्रसादतः ॥ ८ ॥ तव तेजोभिसंभूतौ चंद्रसूर्याविवोदितौ ॥ चराचरस्यलोकस्य त्रिदिवस्य च पालकौ ॥ ९ ॥ अत्र यः पूजयेत्तुभ्यं स्नात्वा पयसि नार्मदे ॥ न तस्य पुनरावृत्तिः संसारे दुःखसागरे ॥ १० ॥ कलिंदी संगमे पुण्यं ताप्यां चैव सुरेश्वर ॥ पयोष्णीसंगमे यत्र नदीसंख्यानविद्यते ॥ ११ ॥ गंगायमुनयोर्मध्ये स्वर्गसोपानमुत्तमं ॥ एषु तीर्थेषु देवेश स्नानपुजनतर्पणैः ॥ १२ ॥ जपहोमैस्तथाश्राद्धैर्यत्पुण्यंतदिहास्तु वै ॥ एवमस्त्विवति चैवोक्त्वा गणकोटिसमावृतः ॥ १३ ॥ आदित्यै सवरं दत्वा स्वयमं तर्हितः शिवः ॥ एवंतीर्थं मयाप्रोक्तमादित्यं नृपसत्तम ॥ १४ ॥ अस्मिन् तीर्थे च ऋषयः पुरा सिध्दः सहस्रशः ॥ सावित्रश्चोपमन्युश्च ऋणगुर्वर्द्धगौतमः ॥ १५ ॥ दक्षशांतातपमुखा अत्रसिद्धि परांगताः ॥ एवं चाप्यादितिः प्राप्य वरं शर्वाद्यथे प्सितं ॥ १६ ॥ स्वस्थान मगमद्यत्र कश्यपो मुनिसत्तमः ॥ प्राप सूर्यादिकान् पुत्रान् स्वयं च प्रार्थिते द्वये ॥ १७ ॥ बहुपुत्राः समभवन् सपुत्रा योषितां वरा ॥ एतत्ते कथितं राजन्नादित्याख्यानमुत्तमम् ॥ १८ ॥ धन्यं यशस्यम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युष्यं पुत्रदं स्वर्गसाधनम् ॥ यत्रयत्र गता देवी नर्मदा लोकपावनी ॥ १९ ॥ तत्रतत्र महाराज स्वर्गसोपानपंक्तयः ॥ दक्षिणोत्तर
भागे तु नर्मदायां वसंति ये ॥ २० ॥ पापयोनिं न गच्छंति तीर्थे चास्मिन् विशेषतः ॥२१॥ इतिउत्तरेअदितीश्वरतीर्थम् ॥ अथा-
न्यत्कथयिष्यामि वाराहं तीर्थमुत्तमम् ॥ तत्र स्नात्वा नरव्याघ्र पूजयित्वा जनार्दनम् ॥ १ ॥ सर्वपापविशुद्धात्मा विष्णुलोकं स
गच्छति ॥ तत्र वाराहरूपेण चोद्धृता विष्णुनामही ॥ २॥ कार्तिके शुक्लपक्षे तु एकादश्यामुपोषितः ॥ पूजयेत्केशवं भक्त्या दीपमा-
लां प्रबोधयेत् ॥ ३ ॥ भोजयेद्ब्राह्मणान् भक्त्या कोटिर्भवति भोजिता ॥४॥ युधिष्ठिर उवाच ॥ किमर्थमुद्धृता धात्री वाराहवपु-
षा कथं ॥ एतन्मे शंस भगवन् वराहचरितं महत् ॥ ५ ॥ श्रीमार्कंडेय उवाच ॥ पुरा देवासुरे युद्धे तुमुले रोमहर्षणे ॥ दानवै-
र्निर्जिता देवाः पलायनपरायणाः ॥ ६ ॥ परं गंतुं न शक्तास्ते प्रविष्टाः शोकसागरे ॥ त्रातारं नाध्यगच्छंतः किं कृत्वा किं भवि-
ष्यति ॥ ७ ॥ ग्लानिं गता मही तद्वद्रसातलतलं ययौ ॥ सूर्याचंद्रमसौ जातौ तथैवोन्मार्गगामिनौ ॥ ८ ॥ न वाति पवनो रा-
जन् उद्वेला अर्णवा भवन् ॥ जग्मुस्ते शरणं देवाः माधवं मधुसूदनम् ॥९॥ ब्रह्मशक्रादयः सर्वे क्षीरसागरशायिनम् ॥ श्रीपतिं
श्रीसमाविष्टं शयानं योगनिद्रया ॥१०॥ शनैः शयानो यस्मिन्वै जगज्जाग्रति जाग्रति ॥ कृतांजलिपुटाः सर्वे स्तोत्रमेतदुदाहरन् ॥११॥
देवा ऊचुः ॥ सनातन जगन्मूल धर्ममूल नमोस्तु ते ॥ आदिदेव महादेव सुरासुरनमस्कृत ॥ १२ ॥ आपो नारा इतिप्रोक्ताः आपो
वै नरसूनवः ॥ तोयदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ १३ ब्रह्मो उवाच ॥ प्रपद्ये प्रातरुत्थाय प्रयतात्मा कृतांजलिः ॥
नमो नारायणायेति प्रणम्य ब्रह्म शाश्वतम् ॥ १४ ॥ यस्य नाभिस्थितं विश्वं जगदेतच्चराचरम् ॥ तमभ्यर्चितुमिच्छामि वाग्भिर्वा-
चस्पतिंगुरुम् ॥ १५ ॥ यस्मिन्नंतरिदं बाह्ये निविष्टं सचराचरम् ॥ एकस्मिन्निद्रियातीते सूत्रे मणिगणा इव ॥ १६ ॥ करुणानां
स्वभावस्य कारणं परमेश्वरम् ॥ गुणमायारथारूढं नित्यमीश्वरमव्ययम् ॥ १७ ॥ सहस्रशिरसं देवं नित्यं सकलनिष्कलम् ॥ वे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यं पुरुषमव्यक्तमाद्यं नारायणं हरिम् ॥ १८ ॥ यमाहुः परमात्मानमक्षयं ब्रह्मवादिनः ॥ तं वयं वाग्भिरीशानं वासुदेवमुपास्महे ॥ १९ ॥
ॐकारः प्रणवोद्गीथः प्रतिशास्त्रं गतोक्षरः ॥ अमृतं शाश्वतं ब्रह्म वासुदेवोस्तु मे गतिः ॥ २० ॥ भूर्भुवः स्वस्य चादर्यपुण्यकीर्ति-
रनामयः ॥ वाक्पतिर्वचसां नित्यं वासुदेवोस्तुः मे गतिः ॥ २१ ॥ ऋग्मुर्तिर्यजुषां मूर्तिः सामर्मुर्तिरकर्मकः ॥ सर्वशास्त्रमयोऽव्यक्तो-
वासुदेवोस्तुमेगतिः ॥ २२ ॥ स्वाहाकार स्वधाकारो वषट्कारो हविष्यभुक् ॥ क्षेत्रज्ञः परमः साक्षीजगतां तारको हरिः ॥ २३ ॥
ईश्वरो हृदयावासो वासुदेवोस्तु मे गतिः ॥ श्रावण्यः श्रावणोद्गीथः पुण्यश्लोकस्तु विश्रवाः ॥ २४ ॥ वरदो वायुदेवोग्निर्वा-
सुदेवोस्तु मे गतिः ॥ पुरुषः पुंडरीकाक्षः पुराणो भुवनेश्वरः ॥ २५ ॥ आदित्यांतर्गतो वह्निर्वासुदेवोस्तु मे गतिः ॥
कंसकालीयहंता च सुमालिबलमर्दनः ॥ २६ ॥ शिशुपालनिहंता च वासुदेवोस्तु मे गतिः ॥ कालनेमिनिहंता च यः का-
लो हि वनान्तकः ॥ २७ ॥ बाणासुरपुरघ्नो वै वासुदेवोस्तु मे गतिः ॥ २८ ॥ केशवः केशिहंता च मधुकैटभनाशनः ॥ शंखचक्र-
गदापाणिर्वासुदेवोस्तु मे गतिः ॥ २९ ॥ हिरण्यगर्भो भूगर्भो यज्ञगर्भोमृतेश्वरः श्रीगर्भो ज्ञानगर्भश्च वासुदेवोस्तु मे गतिः ॥ ३० ॥
ऋषिकेशश्चंद्रसखो वयोगरुडवाहनः ॥ सहस्रनामधर्मज्ञो वासुदेवोस्तु मे गतिः ॥ ३१ ॥ शुक्रभूशुक्रधामा च युगपर्णो युगांतकृत् ॥
क्षीरोदशायी विश्वात्मा वासुदेवोस्तु मे गतिः ॥ ३२ ॥ अव्यक्तात्मा महात्मा यस्त्वंतरात्मा जनार्दनः ॥ प्राणात्मेंद्रियभूतात्मा
ासुदेवोस्तु मे गतिः ॥ ३३ ॥ इतिवाग्मीश्वरोवाग्भिः पूजितः परमेश्वरः ॥ भक्तस्य भगवान् विष्णुः प्रीयतां मे जनार्दनः
॥ ३४ ॥ जन्मप्रभृति यत्किंचित् मया सुकृतमार्जितम् ॥ तेन सर्वेण सर्वात्मा प्रीयतामादिकृद्विभुः ॥ ३५ ॥ एवमभ्यसतो नित्यं-
पूजितः स्यात्स केशवः ॥ विनाशयति पापानि विकाशयति तत्फलम् ॥ ३६ ॥ एको निष्कंटकः पंथा यत्र संपूज्यते हरिः ॥
कुपथं तं विजानीयात् यत्रनाराध्यते ते हरिः ॥ ३७ ॥ वासुदेवपरा वेदा वासुदेवपराः क्रियाः ॥ वासुदेवपरा विप्रा वासुदेवपरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलम् ॥ ३८ ॥ सर्वे देवा वासुदेवात् प्रसूताः सर्वेदेवावासुदेवं यजंते ॥ सर्वेषां वै वासुदेवोधिदेवो नान्यत् किंचिद्वासुदेवातिरिक्त-
म् ॥ ३९ ॥ नास्ति विष्णुपरो देवो नास्ति विष्णोः परं तपः ॥ नास्तिविणोः परं ज्ञानं सर्वं विष्णुमयं जगत् ॥ ४० ॥ विष्णु-
र्माता पिता विष्णुर्विष्णुः स्वजनबांधवाः ॥ बिष्णुर्ज्ञातिश्च गोत्रं च सर्वं विष्णुमयं जगत् ॥ ४१ ॥ ये पठंति
नरा भक्त्या विष्णुमायांकितं स्तवं ॥ ते यांति वैष्णवं लोकं त्यक्त्वापाप मनेकधा ॥ ४२ ॥ इत्येवमादिबहुधा सं-
स्तुतः परमेश्वरः ॥ ब्रह्मणा भक्तियोगाच्च विश्वदोषापनुतिकृत् ॥ ४३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ श्रुत्वा स्तोत्रमिदं
देवो ब्रह्मणः सुमहात्मनः ॥ श्रिया प्रबोधितः कृष्णः शयानो योगनिद्रया ॥ ४४ ॥ दृष्ट्वा ब्रवीत्सुरानसर्वान् नाना
रूपान् भयान्वितान् ॥ किं कार्यं चार्तियं चार्तिर्येन त्यक्तं दिवं सुराः ॥ ४५ ॥ कथयंतु तथा तत्त्वं यतः सर्वे समागताः
॥ ४६ ॥ ब्रह्मोवाच ॥ त्वयि सुप्ते जगन्नाथ पालके देवकंटकैः ॥ दानवैः खेदिताधात्री स्वर्गश्चैव विनाशितः ॥ ४७ ॥ धर्मक-
र्मादिकं यज्ञा वेदादिष्ठाविताास्तथा ॥ धरा दनुभराक्रांता रसातलतलं गता ॥ ४८ ॥ जटासुरश्च मायावीदैत्यो मायासुरस्तथा ॥
दशकोट्यस्तु दैत्यानां समग्रबलशालिनाम् ॥ ४९ ॥ शिवप्रसादयुक्तानां स्वर्गविक्रकारिणां ॥ देवदैत्यार्णवं तूर्णमुद्धरं शाश्वत
प्रभो ॥ ५० ॥ मन्नामेकार्णवे तूर्णमुद्धर त्वं वसुंधरां ॥ श्रुत्वा वाक्यमिदं देवैर्भयार्तान् पीडितान् सुरान् ॥ ५१ ॥ उवाच वचनं
देवो भयं त्यजत दैत्यजं ॥ अचिरेणैव कालेन सूदयिष्यामि तानहं ॥ ५२ ॥ वाराहं रूपमास्थाय प्रोच्छ्रितं नर्मदाजले ॥ एवमुक्त्वा
सुरान्सर्वान् विसर्ज च जनार्दनः ॥ ५३ ॥ कालेनाल्पेन राजर्षे विष्णुना क्रोडरूपिणा ॥ दंष्ट्राग्रेणोद्धृता धात्री दानवाश्च नि-
पातिताः ॥ ५४ ॥ पुनः संस्थापितं सर्वं यथापूर्वं चराचरं ॥ ब्रह्माद्या मुदिता देवा सुखमापुस्त्रिविष्टपे ॥ ५५ ॥ वेदविद्योदित
कर्म पुनः सर्वं प्रवर्तितं ॥ एतत्ते कथितं राजान् वाराहकल्पगा तटे ॥ ५६ ॥ तीर्थानामुत्तमं तीर्थं वैष्णवं भुक्तिमुक्तिदं ॥ श्रवणा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 त्कीर्तनादस्य गोदानफलमाप्नुयात् ॥ ५७ ॥ इति नर्मदामाहात्म्ये उत्तरे वाराहतीर्थनाम षटचत्वारिंशोध्यायः ॥ ४६ ॥
श्रीमार्कंडेय उवाच ॥ ततो देवपथं गच्छेत्तीर्थं देवमयं शुभं ॥ तत्र स्नातस्य विधिवत् बहुयज्ञफलं लभेत् ॥ १ ॥
मासि मासि कुशाग्रेण सोमपानं करोति यः ॥ सकृदत्रांबुपानस्य कलां नार्हति षोडशी ॥ २ ॥ लिंगंदेवपथं नाम
सुरासुर नमस्कृतं ॥ रेवाप्रदाक्षिणे पारे सुरैः पुर्वं सवासवैः ॥ ३॥ लिंगं वै पथि निक्षिप्तं क्रमब्दिस्तैर्घटद्वयं ॥ स्थापितं पूजितं लिंगं
पथि विप्रैः सुरैश्च तत् ॥ ४ ॥ ततः प्रभृति राजेंद्र ख्यातं देवपथं हितत् ॥ शिवलिंगं तदभ्यर्च्य सर्वपापैः प्रमुच्यते ॥५॥ श्रद्धया
श्राद्धदानेन पितणां परमागतिः ॥ चैत्रेमासि चतुर्दश्यां पक्षयोरुभयोरपि ॥ ६ ॥ स्नात्वार्चनार्थं सिद्धर्षि तीर्थान्यायांति सर्वशः ॥
सहस्रशो मुनिंद्राश्च तस्मिन् शिवमुपासते ॥ ७ ॥ नानाव्रतक्रियायोगै र्ध्यानैस्तुत्यर्थसाधनैः ॥ उपास्यते देवपथं ससिद्धिं परमां
गताः॥८॥ इति दैवपथं तीर्थं ॥ श्रीमार्कंडेय उ०॥ अथान्यत्संप्रवक्ष्यामि तीर्थं पापप्रणाशनं ॥ सहस्रयज्ञसंज्ञं तु सर्वकामफलप्रदं ॥
१ ॥ एकादश्यां मार्गशीर्षे पूजयित्वा जनार्दनं ॥ सहस्रयज्ञश्रेष्ठस्य फलं प्राप्नोति मानवः ॥ २ ॥ नपश्येद्यमलोकं च तिर्यग्योनिं न
गछाति ॥ पुरा दक्षस्य तनयैनारदप्रेषितैः किल ॥ ३ ॥ भुवः प्रमाणं विज्ञातुं निर्गतैरिह चागतैः ॥ सहस्रसंख्यैरत्रेष्टं मनः शुद्धि-
समाश्रयात् ॥ ४ ॥ कृतं सहस्रयज्ञानामस्मिंस्तीर्थे नराधिप ॥ देशं कालं च वित्तं च विक्ष्य सर्वैः सुसत्कृतं ॥ ५ ॥ ततः सिद्धिं
परां जग्मुः शिवलोकं च शाश्वतं ॥ ततः सहस्रयज्ञस्य ख्यातं तीर्थं युधिष्टिर ॥ ६ ॥ अत्र स्नात्वा च यः कुर्यात्पितृणां तिलत-
र्पणं ॥ तिलहोमं यथाशक्त्या आज्यहोममथापिवा ॥ ७ ॥ स याति परमं स्थानं यत्र गत्वा न शोचति ॥ तीर्थस्यास्य प्रभावेन
नरो विगतकल्मषः ॥ ८ ॥ एतत्ते कथितं राजंस्तीर्थं परमशोभनं ॥ श्रवणात्कीर्तनादस्य स्वर्गलोके महीयते ॥ ९ ॥ इति दक्षिणे
सहस्रयज्ञतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ शुक्लतीर्थं ततो गच्छेत्सर्वतीर्थे ष्वनुत्तमं ॥ यत्र स्नात्वा तु लभते यज्ञायुत फलं नरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गे ॥ ६ ॥ अत्र देवैर्मिलित्वा तु ब्रह्मविष्णुपुरोगमैः ॥ नानापदप्रकारैश्च स्तुतो देव उमापति ॥ ७ ॥ प्रभुर्नामसहस्रेण तच्छृणुष्व-
नराधिप ॥ ८ ॥ ॐनमः शिवाय ॥ स्थिरः स्थाणुःप्रभुर्भानुप्रवरो वरदो वरः ॥ सर्वात्मा सर्वविख्यातः शर्वः सर्वकरो भवः ॥ ९ ॥
जटी चर्मी शिखि खड्गी सर्वेशः सर्वभावनः ॥ हरिश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥१०॥ प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो
ध्रुवः ॥ स्मशानवासी भगवान् खेचरो गोचरस्तथा ॥११॥ अभिवंद्यो महाकर्मा तपस्वि भूतभावनः ॥ उन्मत्तवेषः प्रच्छन्नः सर्वलोक-
प्रजापतिः ॥ १२ ॥ महारुपो महाकायः सर्वरुपो महायशाः ॥ परमात्मा च भूतानां विरूपो वामनो मतुः ॥ १३ ॥ लोकपालो
पिहितात्मा प्रसन्नो भवनाशनः ॥ पवित्रश्च महांगश्च नियमो नियताश्रयः ॥ १४ ॥ सर्वकामः स्वयंभूश्च आदिरादिकरो निधिः ॥
सहस्राक्षो विरूपाक्षः सोमनक्षत्रसाधकः ॥ १५ ॥ चंद्रसूर्यशनिः केतुग्रहो ग्रहपतिर्वरः ॥ दृष्टादृष्टश्चलस्छाणुर्मगबाणार्पणो नघः
॥ १६ ॥ महातपा दीर्घतपा आदि दीनानुकंपनः ॥ संवत्सरकरो मंत्रः प्रमाणं परमं तपः ॥ १७ ॥ योगी योगो माहावीर्यो महा-
रेता हरो हरः ॥ वसुरेताश्च सर्वज्ञः सुबीजो वृषवाहनः ॥ १८ ॥ देवबाहुर्महाबाहुर्नीलकंठउमापतिः ॥ विश्वरूपः स्वयं स्रष्टा ब-
लिर्वैरोचनो गणः ॥ १९ ॥ गणकर्ता गणपतिर्दिग्वासाः काम्य एव च ॥ सविता परमोमंत्रः सर्वपापहरो हरिः ॥ २० ॥ कमंड-
लुधरो धन्वी बाणहस्तः प्रतापवान् ॥ अशनीशतघ्नः शूली खड्वांगी पदिशीस्तथा ॥ २१ ॥ शुचिहस्तस्वरुपश्च तेजस्तेजस्करो वि-
धिः ॥ उष्णीषी वसुवक्रश्च उदक्यो विनतस्तथा ॥२२॥ हरिवान् हरिनेत्रश्च सुतीर्थः कृष्णएवच ॥ शृगालरुपी सर्वार्थो मुंडी शुद्ध-
कमंडलुः ॥ २३ ॥ अजश्च गंधमाली च मृगरुपी कपर्दधृक् ॥ ऊर्ध्वरेता ऊर्ध्वलिंगः उर्द्धसाक्षीनभस्थलः ॥ २४ ॥ त्रिजटाश्चाजवासा-
श्च रुद्रः सभापतिर्विभुः ॥ अहश्चरो रात्रिचरः सवासाश्च दिशापतिः ॥ २५ ॥ राजहा दैत्यहा लोके लोकधाता गुणात्मकः ॥ सिं-
हशार्दुलरूपश्च आर्द्रचर्मधरो हरिः ॥ २६ ॥ कालयोगी महानादः सर्वावासश्चतुष्पथः ॥ दुर्निवारः प्रेतचारो भूतचारी महेश्वरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ वहुभूतो बहुधनः सर्वांगो रुचिरांगतिः ॥ नृत्यप्रियो नृत्यकर्ता नर्तकश्च बलाहकः ॥ २८ ॥ घोरो महातपा व्यासो नि-
त्यो गिरिचरो नभः ॥ सहस्रहस्तोविजयोव्यवसायोत्यनिश्चयः ॥ २९ ॥ अमर्षणो मर्षणात्मा यज्ञहा कामशासनः ॥ दक्षयज्ञापहारी
च सुसहो मध्यमस्तथा ॥ ३० ॥ तेजोपहारि बलिहा मुदितश्चार्चितो भवः गंभिरघोषो गंभिरो गभीरबलवाहनः ॥ ३१ ॥ न्यग्रो-
धरुपो न्यग्रोधो रुक्षवर्णप्रभुर्विभुः ॥ तीक्ष्णवाहो हयाक्षश्च महेशः कर्मकालवित् ॥ ३२ ॥ दिक्षुप्रसादितो यज्ञः समुंडो वडवामुखः
॥ हुताशनश्च हार्यश्च प्रसंनात्मा प्रकाशनः ॥ ३३ ॥ महातेजाः सुतेजाश्च विजयो जय येव च ॥ ज्योतिषामयनं सिद्धिः संधिविग्र-
ह एव च ॥ ३४ ॥ शंखी दंडी जटी ज्वाली मूर्तिजो दुर्बलो बलिः ॥ वेणवी पणवि ताली कालाग्निः कालकंटकः ॥ ३५ ॥ न-
क्षत्रविग्रहो वृद्धि गुणवृद्धिरजोग्रजः ॥ प्रजापतिर्हरीबाहुविभागः सर्वतोमुखः ॥ ३६ ॥ विमोचनः सुरगणो हिरण्यकवचो लपभूः ॥
अराजो धूलिचारि च महाचारी श्रुतश्रवाः ॥ ३७ ॥ अनादिः सर्वभूतादिः सर्ववाद्यप्रतिग्रहाः ॥ व्यालरूपो गुहावासी हिममाली
तरंगवित् ॥ ३८ ॥ त्रिपदस्त्र्यंबको व्यक्तः सर्वबंधविमोचकः ॥ सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ॥ ३९ ॥ प्रस्कंदनो वि-
भागश्च स्वकल्पो यज्ञभागवित् ॥ सर्वावासः सर्वहरो दुर्द्धरो वासवो समः ॥ ४० ॥ हिमो हिमकरो वज्रः सर्वधारी बुधोत्तमः ॥
लोहिताक्षो महाक्षश्च विजयज्ञो विशारदः ॥ ४१ ॥ संग्रहो विग्रहः कर्म सर्पराजविभूषणः ॥ मुख्यो विमुक्तदेहश्च देहचारी च का-
मदः ॥ ४२ ॥ सर्वकालप्रसादश्च खेचरो बलरूपधृक् ॥ आकाशवृत्तरूपश्च निपाती उरगः खगः ॥ ४३ ॥ रौद्ररूपः स्वरादित्य-
वसुरस्मि वसुर्वशी ॥ वसुवेगो महावेगो मनोवेगो निशाचरः ॥ ४४ ॥ विप्रवासः श्रियावासः आपदीसकलोहठः ॥ आत्मदो
मदनाकारो अर्थानर्थकरो महान् ॥ ४५ ॥ मुनिरात्मागतिर्लोकसहस्रवदनांबुहा ॥ पक्षी च पाक्षिराजश्च श्येनदीप्तिर्विशांपतिः
॥ ४६ ॥ वामनो वामदेवश्च प्रागुदग्धानमस्तथा ॥ सिद्धियोगापहारी च सिद्धः सर्वार्थसाधकः ॥ ४७ ॥ भिक्षुश्च भिक्षुरूपश्च वृष-

66 not in the manuscript

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णी च मृदुत्वचः ॥ महाशेनो विशाखश्च षष्टिभागो गवांगतिः ॥४८॥ वज्रहस्तश्च विष्टंभी विष्टस्तंभनमेव च ॥ रुक्षत्राणकरः कालो
मधुर्मधुकलोचनः ॥४९॥ वाजस्यन्यो वाजसनो निष्टाश्चाश्रमकूजकः ॥ ब्रह्मचारी लोकचारी सर्वचारी सुचारुचित् ॥५०॥ ईशान ईश्वरो
ध्यक्षो निशावनप्यनेकधृक् ॥ अमितश्चाप्रमेयश्च नदी नंदकरो व्ययः ॥ ५१ ॥ नंदीश्वरःसुनंदिच नंदिनो नंदवर्धनः ॥ नगहारी विहंता च
कांतो ब्रह्मविदांवरः ॥५२॥ चतुर्मुखो महालिंगश्चारुलिंगस्तथैव च ॥ लिंगाध्यक्षः सुराध्यक्षो लोकाध्यक्षो युगावहः ॥ ५३ ॥ जीवा-
ध्यक्षो जीवकर्ता अध्यात्समत्यागतोबलः ॥ कल्पोनिहासकर्ता च गौतमोथ जलेश्वरः ॥ ५४ ॥ दंभोप्यदंभो वैदंभो विवस्वान्विकरछ
विः ॥ लोकधाता धशुपतिर्महाकर्तो महौषधं ॥ ५५ ॥ अक्षरं परमं ब्रह्म बलवान् श्लक्षणएव च ॥ एतेह्यतीतिसिद्धात्मा शुद्धशुद्धा-
तिगस्तथा ॥ ५६ ॥ बहुप्रसादः सुस्वप्नोदर्पणो ध्वजयेव च ॥ देवकारः सूत्रकारो विद्वान् परमरूपधृक् ॥ ५७ ॥ महामेघनिनादी च
महाघोरवशीकृतः ॥ अग्नीज्वालो महाज्वालो महाधूमो हविष्यभुक् ॥ ५८ ॥ वृषणः शंकरो नित्यो वर्द्धनो धूमकेतनः ॥ नील-
स्तांग्रांगेलुब्धश्च शोभतोमुक्तिविग्रहः ॥ ५९ ॥ स्वस्तिभाक् स्वस्तिभोगी च भोक्ता भोगपरोलघुः ॥ उत्संगश्च महांगश्च महाग-
र्भयुतो युवा ॥ ६० ॥ कृष्णवर्णः सुवर्णश्च कारणं सर्व देहिनां ॥ महापादो महाहस्तो महाकायो महायशाः ॥ ६१ ॥ महादं-
ष्ट्रो महाकर्णो महेषुश्च महाहनुः ॥ महाकंठो महाग्रीवो नीलकंठः श्मशानधृक् ॥ ६२ ॥ लंबनो लंबितोष्ठश्च बहुमानः पयोनिधिः
महांगश्च महाजानुर्महाजिव्हो महाशनः ॥ ६३ ॥ महाक्रमो महारोमा महाकेशो महाजटः ॥ आश्रयश्च प्रमादश्च प्रत्ययोगिरिसा
धकः ॥ ६४ ॥ स्नेहनो स्नेहनः श्रीमान् रतिज्ञश्च महामुनिः ॥ वृषाकारो वृषवेषेवृषेशो वायुवाहनः ॥६५॥ मंडली मरुधानश्च द-
नुर्दानवदर्पहा ॥ सहस्रशीर्षशाखश्च दक्शास्तोऽग्निसमेक्षणः ॥६६ ॥ यज्ञसामभुजो गुह्यं प्रकाशो जंगमस्तथा ॥ अमोघार्थ प्रसा-
दश्च सुभगो विश्वदर्शनः ॥६७॥ उपहारः प्रियः सर्वकांचनोकांचन प्रियः ॥ महीमिदकरोभाव्यः पुष्करस्थपतिस्थिरः ॥६८॥ द्वापारदम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शनः सव्यो घृणीयज्ञसमाहृतः ॥ नक्तंकालिश्च कालात्मा महाकालप्रियोर्चितः ॥ ६९ ॥ सुगणो गणकार्यश्च भूतभावनसारथिः ॥
भस्मांगो भस्मगोप्ताचभस्मरूपस्त्वर्हगणः ॥ ७० ॥ अगण्यश्चैव लोकात्मा महासर्वप्रपूजितः ॥ शंकुस्त्रिशंकु संबाधः सुचिर्भूतनिषे-
वितः ॥ ७१ ॥ आश्रमस्थः कपोतस्थो विश्वकर्मापतिर्वरः ॥ शस्तो विशालस्ताम्रोष्ठो अंधकारिर्जलाश्रयः ॥ ७२ ॥ कपिलो क-
पिलःशूरः आयुर्वैषोंगरोधकः ॥ गंधर्वश्चादितिस्ताक्ष्यों विज्ञेयश्च सुसारथिः ॥ ७३ ॥ शूलायुधो महादेवो ग्रंथकारःसुबांधवः ॥
दिव्यबाणो महाकोप उर्ध्वरेता जलात्मकः ॥ ७४ ॥ उग्रवंशःकरोवंशो वंशवादी स्तुनंदिनः ॥ सर्वांगरूपो मायावि सुमहत्घोरलो-
चनः ॥ ७५ ॥ बंधनो बंधकर्ता च सर्बंधनविमोचनः ॥ समयारिसुकर्मारिर्महादंडो विषारिहा ॥ ७६ ॥ बहुलानंदितःसौरिः सुक-
रः शंकरध्वजः ॥ समर्थश्च महादेवोनर्थहंता सुबांधवः ॥ ७७ ॥ भृत्यश्च भरणो भर्ता विश्वदेवः पुरोहितः ॥ चेतनो चानिलो भारः
सर्वलोकगुरुर्गुरुः ॥ ७८ ॥ अनेकपात्कपाली च त्रिशंकुरतिगः सुधीः ॥ धन्वंतरिर्धनुःपाणिः स्कंदो वैश्रवणोधंकः ॥ ७९ ॥
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्वरोध्रुवः ॥ प्रभवः सर्वगो वायुरर्यमासवितारविः ॥ ८० ॥ विष्वक्सेनो विधाताच
पतंगो भूततापनः ॥ रतिस्तीर्थमवाग्मीच करणानांगुणावहः ॥ ८१ ॥ पद्मवत्क्रोक्षमालीच इंद्रवक्रो मनोरथः ॥ सर्वज्ञश्चोपशांता
त्मा पुराणः पुण्यभृच्छुकः ॥ ८२ ॥ कुलकर्ता कलावांश्च कुलभूतो महेश्वरः ॥ सर्वाशयः सर्वशायि सर्वेषां प्राणिभृद्गतिः
॥ ८३ ॥ देवदेवसुखावक्तसदयः सर्वरत्नवान् ॥ कैलासवासी विश्वात्मा हिमवद्गिरिसंस्थितः ॥ ८४ ॥ महार्णवो तिनादश्च सि-
द्धानंदो महांबर. ॥ विशारदो धौरस्मृतो व्यक्ताधारस्तपोनिधिः ॥ ८५ ॥ सेनाकल्पो महाकल्पो योक्ता योगेश्वरेश्वरः ॥ युगा-
धारो महिमूर्तिः पवनो गहनो रुरुः ॥ ८६ ॥ न्यायान्निर्वापणोदश्च पंडितः पुण्यलोचनः ॥ धन्यः कपालमाली च माहामा-
ली वृषाकपिः ॥ ८७ ॥ विस्तारो लवणक्रुरः कुसुमः सफलोदयः ॥ वृषभो वृषभाक्षश्च मणिर्विश्वजटाधरः ॥ ८८ ॥ इंदुर्विसर्ग- ६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंधमाली च भगवान् उरुक्त्वांकर्मणांनरः ॥ सारं- सुमुख सुरः सर्वायुधः सहः ॥ निर्वेदो नखगंधश्च रोदनो वेदनाश्रयः ॥ ८९ ॥ चंडो विरूपो विकृतो दंडमुंडविभूषणः गः सुप्रतिष्ठश्च ऊर्द्धःसंवासनो वहः ॥ ९० ॥ छत्रं पत्रं सुविख्यातः सर्वभावाश्रयो महान् ॥ मंगलाक्षो मंगलकृत् शरण्यः ॥ ९१ ॥ हर्यक्षश्च ककुद्मी च दीप्तजिव्हसहस्रपात् ॥ सहस्रमूर्द्धा दाचंद्रो मांसलः प्रांशूरुद्रभूः ॥ ९२ ॥ ब्रह्मगर्भो वृषावासः शंतनो सर्वमंगलः ॥ पवित्रस्तिमधुर्मंत्रकालयः कृष्णशुंभकृत् ॥ ९३ ॥ ब्रह्मदंडनिर्धिर्मेधा वाराहो गजचर्मधृक् ॥ मुर्द्धगः पंगुरक्षोभ्यो जलसंभवः ॥ ९४ ॥ गभस्तिकृत्तीप्रयोगी विकलो वारिवाहनः ॥ मंत्ररूपाश्चैककालस्तिग्मतेजाः प्रतापवान् ॥९५॥ सामशंभूरमाकांतो वातरंहो मनोजवः॥ चंदनी पद्मसर्पश्च अंगुल्यत्तरणोत्तरः ॥९६॥ कर्णिकारो महास्रग्वी नालमौलिः पिनाकधृक् ॥ प्रधान मानीसोमाप्रि योंगहः ॥९७॥ जान्हवीधरणी ह्यात्मा वरो वारो वरेण्यभूः ॥ शुभांगः श्वेतकपिलश्चिरात्मा संयताग्रणीः॥९८॥ सर्वायासधरः सर्वसर्वसाधारणोधरः ॥ ९९ ॥ पारावारमातिः शाली वृषांगश्च वृषेश्वरः ॥ त्वं च सोमेशः सोमदीप्तिरनात्मकः ॥ कलाकाष्टालवोमात्रा मुहूर्तानुक्रमः क्षणः ॥ व्यासः सर्वसहः क्षेप्यो साध्यौं बु वसुरादित्यो विवस्वानग्राम्यलाचनः ॥ १०० ॥ रुतुःसंवत्सरो मासयक्षोहोरात्रसंततीः ॥ विश्वक्षेत्रं प्रजा बीजं लिंगमाद्यमुदारयः ॥ १०२ ॥ विस्तरः पर्ययोनयः ॥ १०१ ॥ स्वर्ग्रवांश्च प्रजावांमोक्षवान्विष्टपीसुकृत् ॥१०३॥ निर्वाणोल्हादनश्चैव सत्यं लोक्यं पराग सदसः संगमश्लाघी पिता माता पितामहः ॥ देवासुरगुरुर्गोप्ता देवासुरनमस्कृतः ॥ वेवासुरमाहामात्रो देवासुरसमाश्र- तिः ॥ देवासुरविनिर्माता देवासुरपरायणः ॥ १०४ ॥ देवाधिसूनुर्देवऽर्मिदेवलः पिंडपातनः ॥ १०६ ॥ सर्वदेवमयो चिंत्यो देवा- यः ॥ १०५ ॥ देवासुरगणाध्यक्षो देवासुरमिमर्दकः ॥ मौलिहस्तः सुरव्याघ्रो वृषसिंहो गजः प्रियः ॥ ध्वानो- दिसंभवः शिवः ॥ उद्भवो विक्रमो वंशो विरजो विगतप्रियः ॥ १०७ ॥ अयुक्तः शोभनो गर्भः प्रीतिसंहरणो युवा ॥ मृगी शृंगीः पयोबभ्रुरजरः प्रतिवेश्मिकः ध्वांतो ध्वनिधीरोनिजस्वर्ग्रप्रजागरः ॥१०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १०९ ॥ ललाटाक्षो विश्वदेहो हिरण्यो ब्रह्मवर्चसी ॥ स्थावराणां पतिश्चैव विषयेंद्रियवर्द्धनः ११० ॥ वृथादेहो वृथामानी प्र
स्कंनस्कंदवर्द्धनः ॥ यो न ब्रह्मादिभिर्देवैर्ज्ञायते न महर्षिभिः ॥ १११ ॥ स्तोतव्यः स कथं नाथः परमात्मा परावरः ॥
स्तोतुं त्वां वै न शक्तोहमवाग्मनसगोचरं ॥ ११२ ॥ जिव्हाचापल्यमस्माकं क्षमस्व परमेश्वर ॥ शिवं कुरुष्व देवानां स्वर्गीणां
पुष्टिमावह ॥ ११३ ॥ श्रीमार्कंडेय उवाच ॥ इति ब्रह्मादिदेवानां स्तोत्रं श्रुत्वा महेश्वरः ॥ दीप्तिमानभवत्साक्षाद्दीप्त्या
विश्वं विभासयन् ॥ ११४ ॥ प्रहसन्नब्रवीद्देवान् प्रार्थयध्वं वरान्सुराः ॥ स्तुतः सहस्रनाम्नाहं केन कार्येण सुव्रताः ॥
॥ ११५ ॥ ब्रह्मा उवाच ॥ यदितुष्टो महेशान देवानां वरदः प्रभुः ॥ तद्विनाशय दैत्येयां स्नाता भव महेश्वर ॥ ११६ ॥
तस्मादीप्त्या जगत्सर्वं तेजसा च विभासितं ॥ दीप्तिकेश्वरनाम्ना त्वं तस्मादत्रावस प्रभो ॥११७॥ दीप्तेश्वरं सिद्धिलिंगं लिंगं चाम-
रकेश्वरं ॥ नर्मदेश्वरमित्यन्यत् कपिलेश्वरमेव तु ॥ ११८ ॥ पंचमं शुक्रतीर्थे तु शुक्लेश्वर मितिप्रभो ॥ पापकर्माधमश्चैव पंचालिं
गानि योर्चयेत ॥ सोपि तां गतिमाप्नो तु दुर्लभा या महामखैः ॥११९॥ इति ब्रह्मवचः श्रुत्वा देवदेवो महेश्वरः ॥ एवमस्त्वि-
ति देवानां दत्वा वरमनुत्तमं ॥ १२० ॥ निजघ्ने दानवान् सर्वान् गणकोटिसमावृतः ॥ एतत्ते कथितं पार्थ दीप्तिकेश्वरसंज्ञितं
॥ १२१ ॥ तीर्थवरं पुण्यतमं सर्वाशुभविनाशनं ॥ तिलोदकं तु योदद्याद्दैवपित्रर्षिषु स्वयं ॥ १२२ ॥ स्नात्वा पार्थ विधानेन तेन-
स्यात्तर्पितं जगत् ॥ पितरः श्राद्धदानेन प्राप्नुयुस्तृप्तिमक्षयां ॥ १२३ ॥ पूजनाद्दीप्तिकेशस्य दिवि मन्वन्तरं वसेत ॥ बहुतीर्थाश्रयं
राजन् तीर्थमेतन्न संशयः ॥ १२४ ॥ इति ते दीप्तिकेशाख्यं तीर्थं प्रोक्तं मयानघ ॥ श्रवणात्कीर्तनादस्य वाजपेयफलं लभेत्
॥ १२५ ॥ इति श्रीवायुनोक्तरौद्रिसंहितायां श्रीरेवामहात्म्ये दक्षिणे दीप्तिकेश्वर तीर्थं नाम अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ श्री
मार्कंडेय उवाच ॥ ततो गछेद्व राजेन्द्र वैष्णवं तीर्थमुत्तमं ॥ यत्र तुष्टो हृषीकेशो ब्रह्मण्यो योगसिद्धये ॥ १ ॥ कोकिलानाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विख्याता सर्वपापविमोक्षणी ॥ वैष्णवं क्षेत्रमित्याहुस्तत्र यज्ञं विधिःपुरः ॥ २ ॥ आहरत्तुपुण्यदेशं कल्पगातीरमाश्रितः ॥ हूयमा-
ने तदा यज्ञे दैत्यदानवराक्षसैः ॥ ३ ॥ विघ्नार्थं द्रव्यहरणं कृत्वा वित्रासिता द्विजाः ॥ ततः खेदं दधौ ब्रह्मा त्रासितेषुद्विजन्मसु
॥ ४ ॥ द्रव्योपहारहरणे किंकर्तव्यमितीरयन् ॥ शरणं देवदेवेशं शंखचक्रगदाधरं ॥ ५ ॥ व्रजामीति मतिं चक्रे सब्रह्मा यज्ञसिद्ध
ये ॥ ततो रेवाजले स्नात्वा शुचोपविश्य कुशासने ॥ ६ ॥ दर्भोपग्रहपाणिस्तु स्वस्थो बद्धांजलिः स्वयं ॥ स्तोतुं प्रचक्रमे विष्णुं
दानवांतकरं हरिं ॥ ७ ॥ ब्रह्मा उवाच ॥ नमस्ते पुंडरीकाक्ष वासुदेव नमोऽस्तुते ॥ ईश्वरोसि जगन्नाथ किमतःपरमुच्यते ॥ ८ ॥
भक्तानां तद्धिताय त्वं गुरुर्वै त्रिदशेश्वरः ॥ स मे भुतपतिस्त्वंहि प्रभुर्जन्मनिजन्मनि ॥ ९ ॥ अग्निसोमार्करुद्राणां ग्रहेंद्रवसुयोगि-
नां ॥ यस्त्वं जयसि तेजांसि स मे विष्णुः प्रसीदतु ॥ १० ॥ अजस्त्वमागमः पंथा अमूर्तिर्विश्वमूर्तिमान् ॥ परं प्रधानं पुंसोय-
स्तमस्मि शरणं गतः ॥ ११ ॥ सोमसूर्याग्निगंतेजो योवतारयति स्वयं ॥ दिविशं जायते यो यः स महात्मा प्रसीदतु ॥ १२ ॥
गुणवान्निर्गुणश्चैव चेतनेऽचेतने नघे ॥ सूक्ष्मः सर्वगतो देही स महात्मा प्रसीदतु ॥ १३ ॥ सूर्यमध्ये स्थितः सोमः तन्मध्ये तु या
कला ॥ तन्मध्ये चामृताधारः स महात्मा प्रसीदतु ॥ १४ ॥ समत्वमभिकाक्षंते यद्भक्त्या नान्यचेतसः ॥ योऽजः सर्वात्मना जे
यः स मे विष्णुः प्रसीदतु ॥ १५ ॥ चराचरमिदं सर्वं भूतग्रामं चतुर्विधं ॥ त्वया तदेव तत्प्रोक्तं सूत्रे मणिगणा इव ॥ १६ ॥
इंद्रियाणि गुणाख्या तु स्वासु स्वासु च योनिषु ॥ तत्त्वं निष्केवलं देव कांक्षेहं परमं तव ॥१७॥ त्वच्छुद्धिस्त्वद्गतप्राणस्त्वद्भक्ति-
स्त्वत्परायणः ॥ त्वामेवाहं स्मराम्येकं व्यसने पर्युपस्थिते ॥ १८ ॥ प्रातरुत्थाय सततं मध्यान्हे च दिनक्षये ॥ जपामि त्वामहं
देव सर्वपापोपशांतिदं ॥ १९ ॥ हरिं कृष्णं हृषीकेशं वासुदेवं जनार्दनं ॥ प्रणतोस्मि जगन्नाथं सर्वाशुभविनाशनं ॥ २० ॥ गो-
वर्धनधरं धीरं गोब्राह्मणहितेरतं ॥ प्रणतोस्मि गदापाणिं स मे पापं व्यपोहतु ॥ २१ ॥ शंखिनं चक्रिणं शांतं शार्ङ्गिणं मधुसुदनं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं प्रणतोस्मि पतिं लक्ष्म्याः स मे पापं व्यपोहतु ॥ २२ ॥ नारायणं नरं सौरिं माधवं च जनार्दनं ॥ प्रणतोस्मि हृषीकेशं स मे अ.४९
४९ पापं व्यपोहतु ॥ २३ ॥ केशवं केशहंतारं कंसारिं कामपालकं ॥ प्रणतोस्मि चतुर्बाहुं स मे पापं व्यपोहतुं ॥ २४ ॥ श्रीवक्षं श्री-
वपुं श्रीशं श्रीधरं श्रीनिकेतनं ॥ प्रणतोस्मि श्रीयःकांतं स मे पापं व्यपोहतुं ॥ २५ ॥ यमीशं सर्वभूतानां ध्यायंति प्रणवाक्षरं ॥
वासुदेवमनिर्देश्यं तमस्मि शरणं गतः ॥ २६ ॥ समस्तालंबनं स्वस्थं संहव्य मनसोगतिं ॥ ध्यायंति वासुदेवाख्यं तमस्मि श-
रणं गतः ॥ २७ ॥ सर्वगं सर्वभूतेशं सर्वस्वाधारमीश्वरं ॥ वासुदेवं परंब्रह्म तमस्मि शरणं गतः ॥ २८ ॥ सदसत्कर्मनिर्मुक्तं पर
मात्मानमक्षरं ॥ कर्मक्षये तु यं यांती तमस्मि शरणंगतः ॥ २९ ॥ सर्वबंधविनिर्मुक्ता यं प्रविश्य पुनर्भवं ॥ प्राप्नुवंति न योगज्ञा
तमस्मि शरणं गतः ॥ ३० ॥ कृत्वा ब्रह्मवपुःसर्वं सदेवासुरमानुषं ॥ यः सृजत्यच्युतो देवं तमस्मि शरणं गतः ॥३१ ॥ ब्रह्मरू-
पधरं देवं जगद्योनिं जनार्दनं ॥ स्रष्टत्वे संस्थितं नित्यं प्रणतोस्मिजनार्दनं ॥ ३२ ॥ धृता महि हता दैत्या परित्रातास्तथामराः ॥
येन तं विष्णुमायेशं प्रणतोस्मि हरिं विभुं ॥ ३३ ॥ वर्णाश्रमांश्च मार्गस्थान् यः स्थापयाति वर्त्मनि ॥ तमादिपुरुषं विष्णुं प्रण-
तोस्मि सनातनं ॥ ३४ ॥ कल्पांते रुद्ररूपेण संहरत्याखिलं जगत् ॥ तमादिपुरुषं ध्याये हंति सृजति पाति यः ॥ ३५ ॥ लीलया
बलहंतारं मधुकैटभसूदनं ॥ जरासंधांतकं कृष्णं तमस्मि शरणं गतः ॥ ३६ ॥ भक्षइत्वा च सकलं यथासृष्टमिदं जगत् ॥ योन-
र्तती च रुद्रात्मा तं नतोस्मि जनार्दनं ॥ ३७ ॥ सुरासुराः पितृगणाः यक्षगंधर्वराक्षसाः ॥ यदंशभूतास्ते सर्वे सर्वगं तं नमाम्य-
हं ॥ ३८ ॥ यथा सर्वेषु भूतेषु स्थावरेषु चरेषु च ॥ विष्णुरेव ममाशेषं यथापापं प्रणश्यतु ॥ ३९ ॥ यस्मान्नान्यत्परं किंचित् य-
स्मिन् सर्वमिदं जगत् ॥ यः सर्वमध्यगोनंतः सर्वगं तं नमाम्यहं ॥ ४० प्रवृत्तं च निवृतं च कर्म विष्णोर्यथाकृतं ॥ अनेकजन्मजं
त्रेधा पापंनश्यतुमे तथा ॥ ४१ ॥ यन्निशायां तथा प्रातर्यन्मध्यान्हापराण्हयोः ॥ तिष्ठता व्रजता यश्च शय्यास्न्नगतेन च ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १ ॥ शुक्लीकृतास्तेन देवा ब्रह्मविष्णुमहेश्वराः ॥ सपादकोटितीर्थानां शुक्लतीर्थेषु षर्वसु ॥ २ ॥ अष्टहस्तप्रमाणं हि शुक्लतीर्थं युधिष्ठिर ॥ तत्र कालाग्निरुद्रश्च श्रीकंठश्च तथापरः ॥ ३ ॥ तैस्तैस्तपोभिरित्युग्रैस्तत्र सिद्धिं परां गताः ॥ शुक्लतीर्थप्रभावेन मोदंते दिवि देवताः ॥ ४ ॥ प्रल्हादोपि पुरा त्र्यक्षमत्रतीर्थे उमापतिं ॥ रेवातोयेन संस्नाप्य बिल्वपत्रैरथार्चयन् ॥ ५ ॥ इंद्रत्वमगमत्सोपि तीर्थस्यास्य प्रभावतः ॥ तिलोदकप्रदानेन पिंडदानेन भारत ॥ ६ ॥ नरकस्थान् पितॄन् सद्यः शतपूर्वान्समुद्धरेत् ॥ कश्यपस्याश्रमस्तत्र सुरसिद्धनिषेवितः ॥ ७ ॥ मुनयः शतशस्तत्र स्वयं तिष्ठंति भारत ॥ कृच्छ्रचांद्रायणाद्यैश्च व्रतैश्च नियमैर्यताः ॥ ८ ॥ कोटिशो देवमुनयः शुक्लेश्वरमुपासते ॥ राहुग्रस्ते तथा चंद्रे पूर्णिमायां तिथौ सदा ॥९॥ आयांति सर्वतीर्थानि शुक्लतीर्थे शिवाज्ञया ॥ अमरेश्वरे यत्फलं राहुसूर्यसमागमे ॥ १० ॥ तत्फलं प्राप्नुयात्प्राणीशुक्लतीर्थे न संशयः ॥ हेमधेनुधरादिनि गजाश्वरथगोवृषं ॥ ११॥ एतद्दत्वात्र राजेंद्र पुण्यसंख्या न विद्यते ॥ सवतीर्थमयं तिर्थं सर्वदेवमयं शुभं ॥ १२ ॥ अपि वर्षसहस्रेण शुक्लतीर्थोपवर्णनं ॥ न शक्यते सुरैः कर्त्तुमृषिभिर्वानरेश्वर ॥ १३ ॥ पापयोनिगतो यश्च तिर्यग्योनिगतो पिवा ॥ महापातकयुक्तोवा शिवनिर्माल्यभक्षकः ॥ १४ ॥ मुच्यते तेन पापेन तीर्थस्यास्य प्रभावतः ॥ तत्र स्नानं नरः कृत्वा पूजयित्वा वृषध्वजं ॥ १५ ॥ सुरासुरगणैः सर्वैः पूज्यते स वृषध्वजः ॥ पितामहेन यत्रेष्टो यज्ञो यज्ञेश्वरे पुरा ॥ १६ ॥ स्तोत्रं कृतं यथार्हं च देवदेवस्य शूलिनः ॥ पूजयित्वा तु शुक्लेशं तव वक्ष्ये समासतः ॥ १७ ॥ नमः शिवाव शांताय ज्ञानिने ज्ञानरूपिणे ॥ सूक्ष्माय सूक्ष्मरूपाय सर्वसूक्ष्मैकहेतवे ॥ १८ ॥ सूक्ष्माणामपि सूक्ष्माय नमः सूक्ष्मतराय च ॥ दिव्याय दिव्यरूपाय दिव्यभावात्मने नमः ॥ १९ ॥ सर्वज्ञाय नमस्तुभ्यं सर्वनाथाय ते नमः ॥ अव्यक्ताय नमस्तुभ्यं शाश्वताय नमोनमः ॥ २० ॥ नमः सर्वात्मने तुभ्यं विश्वेशाय नमोनमः ॥ नमः कालाग्निरुद्राय नमः पातालवासिने ॥ २१ ॥ त्वया व्याप्तमिदं विश्वं चराचर मुपासते ॥ अपिवर्षसहस्रैस्त्वां कः स्तोतुं शक्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेंदुवर्चसा ॥ ६२ ॥ संस्थाप्य देवदेवेशः तीर्थं चाखिलपुण्यदं ॥ इति ते कथितं राजन्तीर्थं वैष्णवमुत्तमं ॥ ६३ ॥ कोकिला
स्थानमाश्रित्य कल्पगातटसंस्थितं ॥ विध्वस्ते राक्षसैर्यज्ञे विष्णुं ध्यात्वा सनातनं ॥ ६४ ॥ चकार स्तोत्रमसमं वैष्णवं स प्रजा
पतिः ॥ ब्रह्मणोंगिरसाप्राप्तं वसिष्ठेन ततो नृप ॥६५॥ वसिष्ठः श्रावयामास नाभागं राजसत्तमं ॥ सोपि गत्वाथ तत्तीर्थं स्नात्वा संतर्प्य
देवताः ॥ ६६ ॥ अभ्यर्च्य केशवं राजा स्तुत्वा स्तौत्रेण चानघ ॥ दत्वा दानान्यनेकानि संतोष्य च जगद्गुरुं ॥ ६७ ॥ कामिकं
यानमारुह्य नाभागः स्वपुरं ययौ ॥ तत्र स्नात्वार्चयेद्देवं चक्रपाणिं सुरेश्वरं ॥ ६८ ॥ स्तोत्रेणानेन यस्तौति भक्त्या देवं ज-
नार्दनं ॥ न तस्य पुनरावृत्तिर्घोरे संसारसागरे ॥ ६९ ॥ इति श्रीनर्मदा महात्म्ये दाक्षिणे विष्णुतीर्थंनाम एकोनपंचाशत्तमोध्या-
यः ॥ ४९ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेन्महाराज नर्मदेश्वरसंज्ञितं ॥ स्नात्वाभ्यर्च्य महेशानं शिवलोके महीयते ॥ १ ॥
वरुणेश्वर मभ्यर्च्य तीर्थं परमसिद्धिदं ॥ लोकपालत्वमापन्नो वरुणो यत्र भारत ॥ २ ॥ देवदेवप्रसादेन तत्र स्नात्वार्चयेच्छिवं ॥
नरो वर्षसहस्राणि शिवलोके महियते ॥ ३ ॥ मारुतेश्वरमन्यच्च शिवं योगेश्वरं तथा ॥ संगतं नर्मदातीरे देवदेवेन शं-
भुना ॥ ४ ॥ संस्नाप्य कल्पगातोये बिल्वपत्रैः समर्चयेत् ॥ ये तत् ज्ञानं चमोक्षं च ब्रह्मचर्यं तपस्तथा ॥ ५ ॥ दुर्लभं च शिवज्ञा
नं दुर्लभंनर्मदाजलं ॥ येन केन प्रकारेण येन केनापि कर्मणा ॥६॥ कल्पगामाश्रयेद्धीमान् शिवं विष्णुं च पूजयेत् ॥ किं करोति
यमस्तस्य चित्रगुप्तस्य लेखकः ॥ ७ ॥ कालो मृत्युरपि प्रातर्यः स्मरेत्कल्पगांशिवं ॥ एतत्ते कथितं पार्थ यथाज्ञातं श्रुतं मया
॥ ८ ॥ मोहिता नाभिजानंती संसारे पापकर्मभिः ॥ यत्र देवो महेशानो यत्र तिष्ठति नर्मदा ॥ ९ ॥ न तत्र मरणं शोच्यं मृता
यांति शिवालयं ॥ १० ॥ इति श्रीरेवामहात्म्ये मारुतेश्वरयोगेश्वरतीर्थ द्वयं तीर्थ समुच्य कथनं पंचाशत्तमोध्यायः ॥५०॥
दक्षिणे ॥ श्रीमार्कंडेय उवाच अथान्यच्च प्रवक्ष्यामि रोहिणी तीर्थमुत्तमं ॥ यत्र स्नात्वा तर्पयित्वा पितृदेवांस्तिलोदकै ॥ १ ॥ स-

CC-0. In Public Domain. Digitization by eGangotri

र्वपाप विनिर्मुक्तः सर्वसौभाग्यसंयुतः ॥ तस्योद्दिष्टामहाराज पितॄन्नुद्धरते निजान् ॥ २ ॥ तत्राभ्यर्च्य जपेदीशं तथा मातृगणं नरः॥
प्राप्नोति सप्तजन्मानि सौभाग्यं पुत्रपौत्रकं ॥ ३ ॥ पूर्वमासी न्निषादीतु गिरिदुर्गनिवासिनी ॥ निषादं तु पतिं प्राप्य बाला सा तत्र
वै नृप ॥ ४ ॥ ममार च कदाचित्स निषादो व्याधिपीडितः ॥ ततः साविधवा जाता तारुण्ये नृपसत्तम ॥ ५ ॥ निषादी दुःख
संतप्ता विषादं परमं ययौ ॥ शौचित्वा सा चिरं कालं समुत्थायावहच्चतं ॥ ६ ॥ बध्वा च शिरसा नीत्वा ययौ सारुद्रसंभवां ॥
प्रवाहयन्नर्मदायां स्वर्याहीति मृत्तं पतिं ॥ ७ ॥ निराहारा भवन्मासं स्थिता रेवातटे तुसा ॥ नित्यं स्नात्वा शिवं गौरिं तथा मा-
तृगणं नृप ॥ ८ ॥ संपूजयति सा प्रातः सायंच नियतव्रता ॥ बिल्वपत्रैर्निराहारा शिवं गौरिं च पूजयेत् ॥ ९ ॥ मासांते साग्निमा-
नीय कृत्वा काष्ठचितां शुभां ॥ प्रज्वाल्य च ततः स्नात्वा पूजइत्वांबिकाहरौ ॥ १० ॥ तथा मातृगणं सर्वं निषादी
चाब्रवीदिदं ॥ बद्धांजालिपुटा पार्थ संप्रार्थ्य वनदेवताः ॥ ११ ॥ हरिं गौरीं च मातॄणां गणं विज्ञापयेत्तदा ॥
शृण्वंतु देवताः सर्वा मम वाक्यं सुशोभनं ॥ १२ ॥ पापजातिसमुत्पन्ना मलिनापि सती क्वचित् ॥
निषादं च पतिं प्राप्य निषादी स्नेहभाविता ॥ १३ ॥ बालवैधव्यमापन्ना आत्मानं वो निवेदये ॥ यद्यहं भर्तृसुश्रू
षानिरता हि पतिव्रता ॥ १४ ॥ इहजन्मनि मे भर्त्ता निजः प्राणेश्वरो यथा ॥ अहर्निशं यथान्यं न चिंतयामि स्व-
भर्तृतः ॥ १५ ॥ विधवा मासपर्यंतं निराहारा सुरार्चका ॥ वाग्यता नान्यचित्ता च स्नाता रुद्रोद्भवा जले ॥ १६ ॥ तेन सत्येन
पुण्येन प्रसादाद्भवतां सुराः ॥ द्विजराजश्चौषधीशो भर्तामे स्त्वमृतांशुमान ॥ १७ ॥ इति त्रिसत्यमुक्त्वा सा प्रणम्याग्निं समाविशत् ॥
नर्मदायास्तटे राजन् साहुताशनसाधनात् ॥ १८ ॥ दिव्यं विमानमारूढा गौरीलोकमवाप सा ॥ वर्षाणामयुतं तत्र गौर्याः सा प-
रिचारका ॥ १९ ॥ बभूव भोगानतुलान् भुंजाना भरतर्षभ ॥ ततःकालांतरे जाता दक्षस्य दुहिता शुभा ॥ २० ॥ सा विधुं प्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प भर्तारं सारं स्वर्गनिवासिनां ॥ इति ते कथितं राजन् रोहिणीतीर्थमुत्तमं ॥ २१ ॥ यत्रागत्य पुनस्स्नाता चंद्रेप्राप्ते तुभर्तारि ॥ स्मृत्वा ज्ञात्वा च तत्तीर्थेनिषादि यत्र चावसत् ॥ २२ ॥ अस्मिं स्तीर्थे महाराज नारीवा पुरुषोपि वा ॥ स्नात्वा सौभाग्यमाप्नोति सप्तजन्मानुगं ध्रुवं ॥ २३ ॥ पुत्रपौत्राभिवृद्धिश्च भवेत्स्वर्गे वसेच्चिरं ॥ २४ ॥ इति श्रीरेवामहात्म्ये दक्षिणे रोहिणीतीर्थ नाम एकपंचाशत्तमोध्यायः ॥५१ ॥ श्रीमार्कंडेय उवाच ॥ शृणु राजन् शरीरस्य व्यवस्थानं विनश्वर ॥ प्रातः सिद्धं यदन्नं वै सायं तच्च विनश्यति ॥ १ ॥ तज्जातरससंपुष्टे देहे का नित्यता नृप ॥ शुक्रशोणितसंभूतं शरीरं पांचभौतिकं ॥ २ ॥ अधः शिरश्चोर्द्ध्वपादं मलमूत्रांतरेधते ॥ मानुषीप्रमुखाणां तु स्त्रीणां गर्भे चिरं वसेत् ॥ ३ ॥ अत्यंतपीडितं लिप्तं योनिद्वारे विनिःसरेत् ॥ स्तनपानं च कुरुते वातपित्तकफार्द्दितः ॥ ४ ॥ म्रियते गर्भगो बालः कुमारो वा युवापि च ॥ अपि मध्यवयो वृद्ध इति देहस्य लक्षणं ॥ ५ ॥ दानं वित्तात् रुतं वाचः कीर्तिधर्मौ तथायुषः ॥ परोपकरणं कायादसारात्सारमुद्धरेत् ॥ ६ ॥ शतदेहः कथं नाम नकुर्यात्तीर्थसेवनं ॥ ७ ॥ इति शारीरव्यवस्था ॥ श्रीमार्कंडेय उवाच ॥ नर्मदाउत्तरे कुले दारुतीर्थमनुत्तमं ॥ यत्र सिद्धो महाराज तपस्तप्त्वाद्विजोत्तमः ॥ १ ॥ युधिष्ठिर उवाच ॥ कोसौ द्विजवरस्तत्र कथं सिद्धो महामुने कस्य पुत्रस्य किं नाम एतद्विस्तरतो वद ॥ २ ॥ श्रीमार्कंडेय उवाच ॥ भार्गवे विपुले वंशे विप्रर्षेर्देवशर्मणः ॥ दारुर्नामसुतस्त्वासीद्वेवदेदांगपारगः ॥ ३ ॥ ब्रह्मचारी गृहस्थश्चवानप्रस्थविधिक्रमात् ॥ यदि धर्मविधानेन चचार विपुलं तपः ॥ ४ ॥ ध्यायमानो महादेवं मिताहारो नरोत्तमः ॥ तत्र तीर्थे वसेत्तावद्यावत्प्राणपरिक्षयः ॥ ५ ॥ तस्य नाम्ना तु तत्तीर्थं त्रिषु लोकेषु विश्रुतं ॥ तत्र स्नातो विधानेन संपूज्य पितृदेवताः ॥ ६ ॥ सत्यवादी जितक्रोधो सर्वभूतहिते रतः ॥ सर्वान्कामानवाप्नोति राज्यं चात्र न संशयः ॥ ७ ॥ यः कुर्यादुपवासं वा सत्यशौचदयापरः ॥ सौत्रामणिफलं सोपि लभते नात्र संशयः ॥ ८ ॥ यः कुर्यादुपवासे तु प्राशनं पांचगव्यकं ॥ पंचामृतेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्नाप्य शिवं भक्त्या समन्वितः ॥९॥ पूजयेद्विविधैर्योगैः स राज्यमतुलं लभेत् ॥ ऋग्वेदजाप्याद्दृग्वेदी सामजाप्यात्तुसामगः ॥१०॥
यजुर्जप्त्वा च लभते द्विजातिजन्मनः फलं ॥ प्राणत्यागो भवेद्यस्य तस्मिंस्तीर्थे विधानतः ॥ ११ ॥ अनिवर्तिका गतिस्तस्य
इत्येवं शंकरोब्रवीत् ॥ १२ ॥ इति रेवा माहात्मे दारुकेश्वरतीर्थनाम द्विपंचाशतमोध्यायः ॥५२॥ श्रीमार्कंडेय उवाच ॥ ततो ग-
च्छेच्च राजेंद्र तीर्थं त्रैलोक्यविश्रुतं ॥ ब्रह्मावर्तमितिख्यातं सर्वपापप्रणाशनं ॥ १ ॥ तत्र संन्निहितोब्रह्मा नित्यं देवः सनातनः ॥
ऊर्ध्ववाहुनिरालंबः आदित्यभ्रमणात्मकः ॥ २ ॥ नित्यमावर्तते ध्येवं चिंतयानो महेश्वरं ॥ तेन पुण्यतमं ख्यातं ब्रह्मावर्तमिति
ध्रुवं ॥ ३ ॥ एकांतरत्रिरात्राशी द्वादशाहशनिस्तथा ॥ तस्मिंस्तीर्थे विधानेन रुद्रमाराधयेत्तु यः ॥ ४ ॥ सयाति परमं स्थानं य-
त्र गत्वा न शोचति ॥ तत्र स्नात्वा महाराज तर्पयेत्पितृदेवताः ॥ ५ ॥ अर्चयेद्देवमीशानं विष्णुं च परमेष्ठिनं ॥ यत्फलं सर्व-
यज्ञेषु तीर्थेषु विविधेषु च ॥ ६ ॥ तत्फलं समवाप्नोति तत्तीर्थस्य प्रभावतः ॥ तस्मिन् तीर्थे हि योदेवो दानवो वा द्विजोत्तमः
॥ ७ ॥ सिद्धस्तत्रैव तन्नाम्ना ख्यातं तत्तीर्थमुच्यते ॥ सामर्थ्यान्नियमाद्वैर्यात्सिध्यंति पुरुषा नृप ॥ ८ ॥ प्रमादात्तस्य संयुक्ताः पतंति
धरणीतले ॥ ९ ॥ सन्निरुद्धेंद्रियग्रामो यत्र यत्र वसेन्मुनिः ॥ तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्करं गया ॥ १० ॥ इति उत्तरे ब्रह्मा-
वर्ततीर्थं ॥ श्रीमार्कंडेय उवाच ॥ पत्रेश्वरं ततो गछेत्सर्वपापप्रणाशनं ॥ यत्र सिद्धो महात्मा वै चित्रसेनसुतो बली ॥ १ ॥
युधिष्ठिर उवाच ॥ कोसौ सिद्धः कदा ब्रह्मन् तस्मिंस्तीर्थेमहामनाः ॥ पुत्रः कस्य च को हेतुरेतदिछामि वेदितुं ॥२॥ श्रीमार्कंडेय उवाच ॥
चित्रसेनो महातेजा इंद्रस्य दयितः सखा ॥ तस्य पुत्रो नृपश्रेष्ठ पत्रेश्वर इति स्मृतः ॥ ३ ॥ रूपवान् सुभगः श्रीमान् सर्वशत्रुभयंकरः ॥ स
कदाचित्सभामध्ये सर्वदेवसमागमे ॥४॥ मेनकानृत्यगीतेन मोहितः सुचिरं किल ॥ स्थितस्य गतमर्यादो गतप्राणइव क्षणात् ॥५॥ ताव-
दिंद्रः शशापेनंतत्कालमजितेंद्रियं ॥ यस्मात्त्वं स्वर्गसंस्थोपि मर्त्यभावं न मुंचसि ॥६॥ तस्मान्मर्त्ये चिरं गत्वा निवत्स्यसि न संशयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७॥ एवमुक्तः सुरेंद्रेण चित्रसेनसुतो बली ॥ वेपमानः सुरश्रेष्ठं कृतांजलिरभाषत ॥ ८ ॥ पत्रेश्वर उवाच ॥ मया पापेन मूढेन अजिताक्षेण वासव ॥ प्राप्तं हि तत्फलं तस्य प्रसादं कर्तुमर्हसि ॥९॥ शक्र उवाच ॥ यत्त्वं प्रसादयसि मां मुढ मर्त्यत्वमाश्रितः ॥ नर्मदातटमासाद्य द्वादशाब्दं जितेंद्रियः ॥१०॥ आराधय महेशानं ततः प्राप्स्यसि सद्गतिं ॥ शत्यशौचरतानां च धर्मिष्ठानां यतात्मनां ॥ ११ ॥ लोकोयं सर्वथा प्रोक्तो न तु पापात्मनां क्वचित् ॥ एवमुक्त्वा सुरश्रेष्ठो पातयामास तुंभुवि ॥ १२ ॥ सोपि प्रणम्य देवेशमगमद्भूमिमंडलं ॥ ॥ नर्मदाविमले तोये ब्रह्मावर्तसमीपतः ॥ १३ ॥ स्नात्वा तत्र विधानेन पूजयामास शंकरं ॥ १४ ॥ कर्कंधु पिण्याकफलैश्च पुष्पैः पत्रैश्च मूलैः कणयावकैश्च ॥ कृच्छ्रादि सत्यव्रतमाचचार ततः प्रसन्नो भगवान्महेशः १५ ॥ पिनाकपाणिर्वरदस्त्रिशूलि प्रोवाच पत्रेश्वरमुज्वलास्यः ॥ १६ ॥ श्रीमहेश उवाच ॥ वरं वरय भद्रंते यत्ते मनसि वर्तते ॥ तं प्रयछामि ते प्रीत्या तपसा तोषितोस्म्यहं ॥ १७ ॥ पत्रेश्वर उवाच ॥ यदि तुष्टोसि मे देव यदि देयो वरोमम ॥ अत्र तीर्थे महेशानव स्तव्यं सततं त्वया ॥ १८ ॥ एवं श्रुत्वा महादेवो हर्षगद्गदया गिरा ॥ तथेत्युक्त्वा च तं सर्वं ततोंतर्द्धानमाप्तवान् ॥ १९ ॥ सोपि तत्तीर्थमासाद्य रुद्रे चांतर्हिते सति ॥ स्नात्वा तत्र विधानेन तर्पयित्वा पितॄन् तथा ॥२०॥ स्थापयामास देवेशं तस्मिंस्तीर्थे नृपोत्तम ॥ पत्रेश्वरेति विख्यातं त्रिषु लोकेषु भारत ॥ २१ ॥ इंद्रलोकं ततः सोपि सर्वाशुभविवर्जितः ॥ वरं विमानमारूढो वीज्यमानस्तु चामरैः ॥ २२ ॥ इति ते कथितं पार्थ तीर्थं परमशोभनं ॥ स्नानदानार्चनैर्यत्र सर्वपापैः प्रमुच्यते ॥ २३ ॥ येर्चयंति महादेवं तस्मिंस्तीर्थे नृपोत्तम ॥ गछांति रुद्रलोकं ते सर्वलोकमलोझिताः ॥ २४ ॥ इति श्रीनर्मदा महात्म्ये उत्तरे पत्रेश्वरतीर्थनाम त्रिपंचाशत्तमोऽध्यायः ॥ ५३ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र अग्नितीर्थमनुत्तमं ॥ यत्र संनिहतो ह्यग्निर्यतः कामेन मोहितः ॥ १ ॥ युधिष्ठिर उवाच ॥ कथं देवो जगत्राता कामेन कलुषीकृतः ॥ किं निमित्तामिह प्राप्तो नर्मदातटसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुसंस्पर्श ॥ ३ ॥ श्रीमार्कंडेय उवाच ॥ साधु पृ-
श्नये ॥ २ ॥ एतदाश्चर्यमतुलं सर्वलोकानुरंजनं ॥ कथयस्व महाभाग परंकौतुहलं हि मे ॥ ३ ॥ श्रीमार्कंडेय उवाच ॥ साधु पृ-
ष्टं महाराज सोमवंशविभूषण ॥ कथयामि यथापूर्वं श्रुतं मे देवदेवतः ॥ ४ ॥ आसीत्कृतयुगे राजानाम्ना दुर्योधनोनृपः ॥ ह-
स्त्यश्वरथसंपूर्णो मेदनिप्रतिपालकः ॥ ५ ॥ एकदा नर्मदाकूले वनेषु मृगयां गतः ॥ खेलन्नाखेटकं राजा सर्वोपकारणान्वितः
॥ ६ ॥ इतश्चेतश्च बभ्राम रेवामंभोवगाहयन् ॥ तं च सर्वांगसंपूर्णं सलक्ष्मीकं बलान्वितं ॥ ७ ॥ रूपयौवनसंपन्नं दृष्ट्वा तं पृथी-
वीपतिं ॥ इयं रेवा महाराज याता तस्य कलत्रतां ॥ ८ ॥ मुदा परमया युक्ता साक्षाद्रूपगुणान्विता ॥ स्वयमागत्य तं वव्रे मा-
हिष्मत्त्याः पतिं नृपं ॥ ९ ॥ रमयामास सतया तेन साच यशस्विनी ॥ नर्मदा जनयामास कन्यां पद्मदलेक्षणा ॥ १० ॥ अं-
गप्रत्यंगसंपन्नां सर्वलोकमनोहरां ॥ माधुर्यशीलसंयुक्तां त्रिषु लोकेषु विश्रुतां ॥ ११ ॥ चक्रतुः पितरौ तत्र तस्या नाम सुदर्श-
नां ॥ कालेन महता जाता यौवनस्था नितंबिनी ॥ १२ ॥ प्रार्थमानां च राजन्यैर्नात्मानं दातुमिच्छति ॥ ततोन्यदिवसे वन्हि-
र्द्विजरुपो महातपाः ॥ १३ ॥ राजानं प्रार्थयामास तां कन्यां चारुलोचना ॥ भोभोरघुकुलश्रेष्ठ द्विजोहं मंदसंततिः ॥ १४ ॥ द-
रिद्रश्चासहायश्च भार्यार्थीचरयाम्यहं ॥ कन्यासुदर्शना नाम रूपेणाप्रतिमा तव ॥ १५ ॥ तां ददस्व महाभाग ममसंततिहेतवे ॥
ब्रह्मचर्येण निर्विष्णुरेकाकी कामपीडितः ॥ १६ ॥ याचमानस्य मे तात प्रसादं कर्तुमर्हसि ॥ १७ ॥ राजा उवाच ॥ नाहं द्र-
व्यविहिनस्य असुवर्णस्य कर्हिचित् ॥ दास्यामि स्वसुतां दिव्यां याहि त्वं द्विजपुंगव ॥ १८ ॥ एवमुक्तस्तदा वन्हिः परां व्रीडा-
मुपागतः ॥ नार्किंचि दुक्त्का राजानं तत्रैवांतरधीयत ॥ १९ ॥ गते चादर्शनं देवे विप्ररूपे हुताशने ॥ ततः कैश्चिदहोभिः सरा-
जा मंत्रिपुरोहितैः ॥ २० ॥ मंत्रइत्वा सहचिरं यज्ञं प्रारब्धवांस्तदा ॥ यज्ञतस्तस्य यज्ञेषु भक्त्या ब्राह्मणसत्तमैः ॥ २१ ॥ गतश्चा-
दर्शनं वन्हिः सर्वेषां पश्यतां तदा ॥ विप्रादुर्मनसो जाता गत्वा राज्ञः समीपतः ॥२२॥ चकिता वन्हिनाशे तु राजानमिदमब्रुवन् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्योधन महाराज श्रूयतां महदद्भुतं ॥ २३ ॥ अदृष्टपूर्वं सर्वेषामस्माकं भवतामपि ॥ अग्निकार्ये प्रवृत्तानां विप्राणां विधिवन्नृप
॥ २४ ॥ केनापि हेतुना वह्निर्नष्टो न ज्वलति स्फुटं ॥ तच्छ्रुत्वा वचनं घोरं राजा विप्रमुखात्कृतं ॥ २५॥ आसनात्पतितो भूमौ
मूलच्छिन्नइव द्रुमः ॥ आश्वास्य च मुहुर्तेन उन्मत्तइव वै तदा ॥ २६ ॥ निरीक्ष्य तु दिशः सर्वा निःश्वस्य च पुनःपुनः ॥ क-
रं करेण चाहत्य इदं वचनमब्रवीत् ॥ २७ ॥ आश्चर्यमेतत्परमं भोभो ब्राह्मणसत्तमाः ॥ कथ्यतां कारणं सर्वं शास्त्रं दृष्ट्वा विचार्य
च ॥ २८ ॥ मम वा दुःकृतं किंचिदुताहो भवतामिह ॥ येन प्रणष्टो यज्ञो मे हुतभूक् सर्वथा द्विजाः ॥ २९ ॥ मंत्रछिद्रमिहाया-
तमथ वा किमदक्षिणं ॥ विधिक्रियाविहीनं वा येन वह्निर्न दीप्यते ॥३०॥ अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्तु ऋत्विजः ॥ यष्टारं दक्षि-
णाहीनो नास्ति यज्ञसमो रिपुः ॥३१ ॥ ब्राह्मणा ऊचुः ॥ न मंत्रहीना हि वयं न च राजन् व्रतैस्तथा ॥ न द्रव्यहीनो हि भवा-
न् अन्यत्पापं विचार्यताम् ॥ ३२ ॥ राजोवाच ॥ तथापि भो द्विजश्रेष्ठा उपायश्चिंत्यतामिह ॥ येन श्रेयोविवृद्धिः स्यादिह लो-
के परत्र च ॥ ३३ ॥ एवमुक्तास्ततस्तेन ब्राह्मणाः कृतनिश्चयाः ॥ निराहारास्थितास्तत्र यत्र रुष्टो हुताशनः ॥ ३४ ॥ तावत्स्व-
प्ने महातेजा हुतभुक् ब्राह्मणांस्तदा ॥ उवाच श्रूयतां सर्वे मम नाशस्य कारणं ॥ ३५ ॥ प्रार्थितोयं महाराज स्वसुतां देहि मे
नृप ॥ अनेन मे न दत्ता सा ततो नष्टो ममादरात् ॥ ३६ ॥ यदि मे स्वसुतां राजा ददाति परमार्चितां ॥ ज्वलमानस्ततो य-
ज्ञे विप्रास्तिष्ठामि नान्यथा ॥७३॥ तच्छ्रुत्वा वचनं विप्रा वैश्वानरमुखच्युतं ॥ विस्मयोत्फुल्लनयना राजानमिदमब्रुवन् ॥ ३८ ॥
भवतो मतमाज्ञाय सर्वे गत्वाग्निमंदिरं ॥ निराहारास्थिताः राजंस्त्रिरात्रं भूमिशायिनः ॥ ३९ ॥ रात्रौ स्वप्ने तृतीयेन्हि पश्यामो
जातवेदसं ॥ तेनोक्तं स्वसुतां सद्यो ददाति यदि मे नृपः ॥ ४० ॥ ततोस्य यज्ञे भूयोपि ज्वलेहं नान्यथा द्विजाः ॥ न दत्ता प्रार्थि-
ता पूर्वं तेनैतन्नाशकारणं ॥ ४१ ॥ एवं ज्ञात्वा महाराज क्रियतां यदनंतरं ॥ दीयतां दुहिता तात यज्ञसंसिद्धिहेतवे ॥ ४२ ॥ रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जोवाच ॥ भवतां नान्यथा कार्यं देवस्य वचनं मया ॥ समयं कर्तुमिच्छामि कन्यादाने द्विजोत्तमाः ॥ ४३ ॥ एवं ते ब्राह्म-
णां श्रुत्वा समाराध्य हुताशनं ॥ प्रत्यक्षं तमकुर्वन् वै द्विजरूपं सुतेजसं ॥ ४४ ॥ राज्ञोग्रं समयं तेन चक्रुस्तत्पुररक्षणं ॥ ४५ ॥
राजा उवाच ॥ मम संनिहितो नित्यं गृहे तिष्ठति पावकः ॥ ददामि रुचिरां विप्राः स्वसुतां विधियोगतः ॥ ४६ ॥ अग्निनांगीकृते
विप्रा अभिनंद्य हुताशनं ॥ कथयित्वा विवाहेन योजयंति स्म पावकं ॥ ४७ ॥ सुदर्शनाया लाभेन परितुष्टो हुताशनः ॥ जज्वा-
ल कुंडमध्यस्थो माहिष्मत्यां युधिष्ठिर ॥४८॥ ततः प्रभृति तत्तीर्थं अग्नितीर्थं प्रचक्ष्यते ॥ तत्र तीर्थेषु यः कश्चित्स्नानदानैः सुभावि-
तः ॥ ४९ ॥ तर्पयेच्च पितॄन् देवान् सोश्वमेधफलं लभेत् ॥ सुवर्णं यः प्रयच्छेच्च घृतमन्नं च भारत ॥ ५० ॥ स्वर्गलोके चिरं स्थि-
त्वा भुवि राजाभिजायते ॥ रूपवान् सुखसंपन्नो दीर्घायुर्व्याधिवर्जितः ॥ ५१ ॥ अनाशनं तु यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥
मृतो सावग्निलोकस्थः क्रीडते सुरपूजितः ॥ ५२ ॥ एतत्ते ह्यग्नितीर्थस्य संभवः कथितो मया ॥ सर्वपापहरः पुण्यः श्रुतमात्रे नृ-
पोत्तम ॥ ५३ ॥ इति श्रीरेवामाहात्म्ये उत्तरे अग्नितीर्थ नाम चतुःपंचाशतमोध्यायः ॥ ५४ ॥ श्रीमार्कंडेय उवाच ॥ तथैव शृणु रा-
जेंद्र सौरतीर्थमनुत्तमं ॥ नर्मदातीरसंभूतिरादित्यस्य महात्मनः ॥ १ ॥ कीर्तयामि कुरुश्रेष्ठ यदि ते श्रवणे मतिः ॥ २ ॥ युधिष्ठि-
र उवाच ॥ एतदाश्चर्यमतुलं श्रुत्वा तव मुखोद्गतं ॥ विस्मयाद् हृष्टरोमाहं जातोस्मि द्विजसत्तम ॥३॥ पुरुषाकृतिस्तत्र देवो उ-
ताहो तपसःफलं ॥ कस्य गोत्रे समुत्पन्नः कस्य देवो भवद्वशे ॥ ४ ॥ सहस्रकिरणो देवो हर्ता कर्ता निरंजनः ॥ अवतारं कथं
तात कृतवान् नर्मदातटे ॥ ५ ॥ श्रीमार्कंडेय उवाच ॥ शृणु राजन् प्रवक्ष्यामि सूर्यसंभवमुत्तमं ॥ कुशकान्वय
संभूतो ब्राह्मणो भक्तिमान् शुचिः ॥ ६ ॥ परमं व्रतमास्थाय तीर्थयात्रां जगाम सः ॥ योजनानां शतं गत्वा
नर्मदातटमाश्रितः ॥ ७ ॥ निराहारस्थितः सोथ सूर्यस्याराधने रतः ॥ परितुष्टस्ततः सूर्यः प्राह विप्रं स्वयं स्थितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८ ॥ भोभो मुने महासत्त्व अलं ते व्रतमीदृशं ॥ सर्वं व्याप्य स्थितं पश्य स्थावरं जंगमं च मां ॥ ९ ॥ तपाम्यहं ततो वर्षं निगृह्णाम्युत्सृजामि च ॥ अमृतं चैव मृत्युं च यः पश्यति सपश्यति ॥ १० ॥ वरं वरय विप्रेंद्र यत्ते मनसि वांछितं ॥११॥ ब्राह्मण उवाच ॥ यदि तुष्टोसि देवेश यदि देयो वरो मम ॥ अस्मिन् हि नर्मदाकूले सदा सन्निहितो भव ॥ १२ ॥ योजनानां शतस्थोपि यो भक्त्या परया विभो ॥ स्मरति त्वां यतात्मा वै स यातु परमां गतिं ॥ १३ ॥ गृहे वापि स्थितो नित्यं पुत्रदारधनावृतः ॥ जायतां त्वत्प्रसादाद्वै स महात्मा न संशयः ॥ १४ ॥ कुब्जांधबधिरा मूका ये केचिद्विकलेंद्रियाः ॥ संप्राप्य दर्शनं पुण्यं ते भवंतु निरामयाः ॥ १५ ॥ शीर्णघ्राणांघ्रिहस्ताश्च अस्थिचर्मावसेषिताः॥ तेषां सकलकारुण्यं कुरुष्व सुरसत्तम ॥ १६ ॥ ये च त्वां नर्मदातोये स्नात्वा संपूजयंति हि ॥ तेषां त्वं वरदानेन प्रसादं कर्तुमर्हसि ॥ १७ ॥ ये तवाग्रे च पतनं देव कुर्वंति मानवाः ॥ स्वामिंस्तेषां वरो देयो एष मे परमो वरः ॥ १८ ॥ एवमस्त्विति तं प्रोक्तो मुनिं स करुणानिधिः॥ मुक्त्का कलां निजां तत्र ततश्चादर्शनं गतः ॥ १९ ॥ तत्र तीर्थे तु यो राजन् भक्त्या स्नात्वा जितेंद्रियः ॥ तर्पयेत्पितृदेवांश्च सोग्निष्टोमफलं लभेत् ॥ २० ॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे नराधिप ॥ द्योतयानो दिशः सर्वा सूर्यलोकं स गच्छति ॥ २१ ॥ आदित्यतीर्थे यः कश्चित्संन्यासेन त्यजेत्तनुं ॥ षष्टिवर्षसहस्राणि सूर्यलोके महीयते ॥ २२ ॥ अप्सरोगणसंकीर्णे दिव्यशब्दानुनादिते ॥ ततो भूतलमासाद्य वेदवेदांगपारगः ॥ २३ ॥ व्याधिशोकविनिर्मुक्तो धनकोटिपतिर्महान् ॥ पुत्रदारसमोपेतो जीवेच्च शरदां शतं ॥ २४ ॥ प्रातरुत्थाय यस्तत्र संस्मरेद्भास्करं सदा ॥ आत्मना स कृतात्पादान्मुच्यते नात्र संशयः ॥ २५ ॥ इति श्रीरेवामाहात्म्ये उत्तरे आदित्यतीर्थनाम पंचपंचाशत्तमोध्यायः ॥ ५५ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र मेघनादमिति श्रुत ॥ जलमध्ये महादेवो यत्र तिष्ठत्यदर्शनः ॥ १ ॥ युधिष्ठिर उवाच ॥ जलमध्ये महादेवो तिष्ठते केन हेतुना ॥ उत्तरं दक्षिणं कूलं ७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घर्जयित्वा द्विजोत्तम ॥ २ ॥ श्रीमार्कंडेय उवाच ॥ एतदाख्यानमतुलं पुण्यंश्रुतिसुखावहं ॥ यत्पुराणे श्रुतं तात तत्ते वक्ष्याम्य-
शेषतः ॥ ३ ॥ त्रैतायुगे महाभाग पौलस्त्यो देवकंटकः ॥ त्रैलोक्यविजयी रौद्रः सुरासुरभयंकरः ॥ ४ ॥ अवध्यः सर्वदेवानां दे-
वगंधर्वरक्षसां ॥ कदाचित्स विमानेन चचार सकलां महीं ॥ ५ ॥ तावद्विंध्यगिरौ राजन् दानवो बलदर्पितः ॥ मयोनामसु वि-
ख्यातो गुहावासी तपश्चरन् ॥ ६ ॥ तस्य पार्श्वे स्थितां कन्यां दृष्ट्वा रूपवतीं शुभां पूजितो दानवेंद्रेण वाक्यं चेदमथाब्रवीत्
॥ ७ ॥ कस्येयं पद्मपत्राक्षी पूर्णचंद्रनिभानना ॥ किंनामधेया कस्माच्च कुरुते तपमुत्तमं ॥ ८ ॥ मय उवाच ॥ दानवानां प-
तिश्रेष्ठो मयोहं लोकविश्रुतः ॥ भार्या ते जोवती नाम तथेयं तनया शुभा ॥ ९ ॥ मंदोदरीति विख्याता पत्यर्थे कुरुते तपः ॥
आराधयंति देवेशं पार्वतिपतिमव्ययं ॥ १० ॥ तच्छ्रुत्वा वचनं तस्य रावणो मदमोहितः ॥ प्रस्तुतः प्रयतो भूत्वा वाक्यमेतदथा-
ब्रवीत् ॥ ११ ॥ पौलस्त्योहं भुविख्यातो देवदानवदर्पहा ॥ प्रार्थयामि महाभाग स्वसुतां दातुमर्हसि ॥ १२ ॥ ज्ञात्वा पैतामहं वृ-
त्तं मयेनापि महात्मना ॥ रावणाय सुता दत्ता पूजयित्वा विधानतः ॥ १३ ॥ चचारानंदिततरो वनेषूपवनेषु च ॥ केनचित्त
थकालेन रावणो लोकरावणः ॥ १४ ॥ पुत्रं पुत्रवतां श्रेष्ठं जनयामास भारत ॥ तेनापि जातमात्रेण रवो मुक्तो महात्मना
॥ १५ ॥ संवर्तकस्यमेघस्य येन लोका जडीकृताः ॥ श्रुत्वा तं निनदं घोरं ब्रह्मा लोकपितामहः ॥१६॥ नाम चक्रे ततस्तस्य मे-
घनादेति विश्रुतं ॥ कननामा ततः सोपि परमं व्रतमास्थितः ॥ १७ ॥ तोषयामास देवेशं उमयासहितं प्रभुं ॥ व्रतैर्नि-
यमदानैश्च होमजाप्यैर्विशेषतः ॥ १८ ॥ कृच्छ्रचांद्रायणैर्नित्यं कर्षयन्नात्मनस्तनुं ॥ ततोन्यदिवसे तात गत्वाकैलासपर्वतं
॥ १९ ॥ दिव्यलिंगद्वयं गृह्य प्रास्थितो दक्षिणामुखः ॥ नर्मदातटमायातस्थितस्तत्र महाबलः ॥ २० ॥ निधाय
पूजयामास तत्रलिंगद्वयं नृप ॥ कृतकृत्यमिवात्मानं मानयित्वा निशाचरः ॥ २१ ॥ लंकांप्रति जगामाशु गृह्यलिंगद्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यं तदा ॥ एकं जग्राह राजेंद्र प्रणतः सव्यपाणिना ॥ २२ ॥ द्वितीयं च द्वितीयेन भक्त्या पौलस्त्यनंदनः ॥ तावदेकं महालिंगं
पतितं नर्मदांभसि ॥ २३ ॥ याहि त्वं नत्सइत्युक्त्का जलमध्ये प्रतिष्ठितं ॥ प्रणम्य रावणिस्तत्र जलमध्ये महेश्वरं ॥ २४ ॥ ज-
गामाकाशमाविश्य पूज्यमानो निशाचरैः ॥ तदाप्रभृति तत्तीर्थं मेघनादेति विश्रुतं ॥ २५ ॥ सर्वलोकेषु विख्यातं महापापक्षयं क-
रं ॥ तस्मिन् तीर्थे तु राजेंद्र स्नात्वा यः पूजयेत्प्रभुं ॥ २६ ॥ अहोरात्रोषितो भूत्वा अश्वमेधफलं लभेत् ॥ पिंडदानं तु यः कुर्या-
त्तस्मिंस्तीर्थे युधिष्ठिर ॥ २७ ॥ तेन द्वादशवर्षाणि पितरः संति तर्पिताः ॥ यस्तु भोजयते विप्रान् षड्रसान्नेन भारत ॥ २८ ॥
अक्षया जायते तृप्तिः पितृणां युगसंख्यया ॥ प्राणत्यागं तु यः कुर्यात्तत्र निर्वृत्तचेतसा ॥ २९ ॥ सवसेच्छांकरे लोके यावदाहुतसं-
प्लवं ॥ ३० ॥ एषा ते नरशार्दूल मेघनादस्य संस्थितिः ॥ कथिता सर्वभावेषु सर्वपापक्षयं करी ॥ ३१ ॥ इति जलमध्ये मेघ-
नादतीर्थं॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र दारुतीर्थमनुत्तमं ॥ दारुतीर्थं यथापूर्व मभवत्तच्छृणुष्वमे ॥ १ ॥ अहं ते कथ-
यिष्यामि यद्वृत्तं हि पुरातनं ॥ पूर्वं स्वर्गसभामध्ये ऋषिणां भावितात्मनां ॥ २ ॥ सूतो वज्रधरस्येष्टो मातलिर्नामविश्रुतः ॥ कु
र्वन् विप्रोपहासं सः शप्तः शक्रेण भारत ॥ ३ ॥ मर्त्यस्येव यतो बुद्धिस्तव जाता दुरात्मक ॥ विप्रोपहासं कुरुषे नीचभावाश्रितो
बुधः ॥ ४ ॥ स्वर्गलोकपरिभ्रष्टो मर्त्ये मर्त्य इवावस ॥ शापाहतोसौ राजेंद्र इंद्रस्य चरणौ ततः ॥ ५ ॥ प्रपीड्य सुरनाथं तं वि-
लप्तुमुपचक्रमे ॥ मम तताभिशप्तस्य अनाथस्य सुरेश्वर ॥ ६ ॥ कर्मणा केन शापस्य घोरस्यांतो भविष्यति ॥ स्वामिन् स एव
देवेश यः शापानुग्रहे क्षमः ॥ ७ ॥ शक्र उवाच ॥ नर्मदातटमाश्रित्य पूजयस्व महेश्वरं ॥ बिल्वपत्रैः प्रतिदिनं स्नात्वा सर्वेश्वरं
विभुं ॥ ८ ॥ स एव भगवांस्तुष्टः शापस्यांतं करिष्यति ॥ यावच्चक्रधरोदेवः पृथिव्यां सनिवत्स्यति ॥९॥ तावत्त्वं तस्य सूतत्वे
भव रश्मिप्रतोदधृक् ॥ दारुको नाम विख्यातो वहित्वार्जुनसारथिं ॥ १० ॥ मानुषं भावमापन्नस्ततः सिद्धिमवाप्स्यसि ॥ एवमुक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स देवेन सहस्राक्षेण भारत ॥ ११ ॥ प्रणम्य शिरसा भूम्यां गतोसौ शापघूर्णितः ॥ नर्मदातटमाश्रित्य कर्षयन्निजविग्रहं ॥ १२ ॥ रुक्मिणीपतिसारथ्यं वांछमानः समग्रवीः ॥ व्रतोपवाससंखिन्नो जपहोमरतः सदा ॥ १३ ॥ देवमाराधयामास ततस्तुष्टो महेश्वरः ॥ उवाचैनं महाभाग प्रसंन्नेनांतरात्मना ॥ १४ ॥ अंशावतरणे विष्णोः सूतो भूत्वा महामते ॥ तोषयित्वा जगंन्नाथं ततः संस्थामवात्स्यसि ॥ १५ ॥ एतत्ते संभवस्तात दारुतीर्थस्य सुव्रत ॥ कथितो वै मया पूर्वं यथैवाकर्णितो नृप ॥१६॥ तस्मिंस्तीर्थे नरः स्नात्वा विधिपूर्वं युधिष्ठिर ॥ उपास्य संध्यां देवेशमर्चयेत महेश्वरं ॥१७॥ वेदाभ्यासं च तत्रैव द्विजः कुर्यात्समाहितः ॥ अश्वमेधफलं प्राप्य स्वर्गलोके महीयते ॥ १८ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं ॥ यत्कृतं शुद्धभावेन तदानंत्यायकल्पते ॥ १९ ॥ इति रेवा० उत्तरे दारुकं तीर्थं ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र देवतीर्थमनुत्तमं ॥ यत्र देवा महेंद्राद्याः स्नात्वा सिद्धिं परांगताः॥ १ ॥ युधिष्ठिर उवाच॥ कथंतात सुराः सर्वे नर्मदा जलमाप्लुताः ॥ भक्त्या वारिप्रसंगाद्वा तन्ममाचक्ष्व सुव्रत ॥ २ ॥ मार्कंडेय उवाच ॥ यथा देवासुरे युद्धे दानवैर्बलदर्पिभिः ॥ इंद्रो देवगणैः सार्द्धं स्वराज्यात् च्यावितो नृप ॥ ३ ॥ जृंभशुंभनिशुंभाद्यैः कुष्मांडकुहुलादिभिः ॥ संग्रामे निर्जिता देवाः प्रहारै र्जजरीकृताः ॥ ४ ॥ विलोप्यमानाः समरे ब्रह्मागमुपतस्थिरे ॥ प्रणम्य शिरसादेवं ब्रह्माणं परमेष्ठिनं ॥ ५ ॥ तदा विज्ञापयामासुर्महेंद्राद्याः सुरोत्तमाः ॥ पश्यास्मान् देव देवेश दानवैर्जर्जरीकृतान् ॥ ६ ॥ च्यावितान् राज्यसंभारात्त्वामेवशरणं गतान् ॥ परित्रायस्व देवेश सर्वलोकपितामह ॥ नान्या गतिः सुरादीनां मुक्त्का त्वां परमेश्वर ॥ ७ ॥ ब्रह्मा उवाच ॥ नसांप्रतमुपायोस्ति कश्चिदेवसुरोत्तमाः ॥ विना सर्वं च रेवां च सर्वोपद्रवनाशिनीं ॥ ८ ॥ नर्मदातटमाश्रित्य दानवानां विनाशने ॥ सततं संयतात्मानः कुरुध्वं परमं तपः ॥ ९ ॥ ततस्तपःप्रभावेन परतेजोवलोज्झिताः ॥ विजयश्चैव वो युद्धे भविष्यति न संशयः ॥ १० ॥ तच्छ्रुत्वा वचनं देवाः ब्रह्मणः परमेष्ठिनः नर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दातटमाश्रित्य तपः परममास्थिताः ॥ ११ ॥ तप्त्वातत्रतपो दिव्यं सततं नृपसत्तम ॥ संकल्पैर्विविधैः कृत्वा देवमाराध्य शंक-
रं ॥ १२ ॥ तोषयामासुरव्यग्रास्ततस्तुष्टो महेश्वरः ॥ ददौ समीहितं तेषां दैत्यदानवनाशनं ॥ १३ ॥ भविष्यथ सुरा यूयमजेया
असुरैरपि ॥ स्नात्वा मां दानवैः सार्द्धं कुरुध्वं युद्धमुत्तमं ॥ १४ ॥ हनिष्यथरिपून् सर्वान् संग्रामे वै न संशयः ॥ ततो महेशानव-
चः श्रुत्वा सर्वे सुरोत्तमाः ॥ १५ ॥ शिवं संस्थाप्य तत्रैव देवेशाह्वयमुत्तमं ॥ कृत्वा च दानवैर्युद्धं ततः सिद्धिं परां गताः ॥ १६ ॥
तदाप्रभृति तत्तीर्थं देवतीर्थमितिश्रुतं ॥ गीयते त्रीषु लोकेषु सर्वपापक्षयं करं ॥ १७ ॥ तत्र गत्वा तु यो मर्त्यो विधिवत्संजितेंद्रि-
यः ॥ स्नानमाचरते भक्त्या स लभे जन्मनः फलं ॥ १८ ॥ यश्चसंपूजयेद्देवंसर्वदेवेश्वरंनृप ॥ सलभेदश्वमेधस्य सकलं फलमुत्तमं
॥ १९ ॥ यस्तुभोजयतेविप्रंतस्मिंस्तीर्थेनराधिप ॥ सहस्रविप्रभोज्यस्यफलमाप्नोतिमानवः ॥ २० ॥ तत्रदेवशिलानंम्यामहत्पुण्य-
विवर्द्धनी ॥ संन्यासेनमृतानांचनराणामक्षयागतिः ॥ २१ ॥ अग्निप्रवेशंयःकुर्यात्तस्मिंस्तीर्थेनृपोत्तम ॥ रुद्रलोकेवसेत्तावद्यावदाहूतसं
प्लवं ॥ २२ ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं ॥ सुकृतं दुःकृतं वापि सर्वमक्षयतां व्रजेत् ॥ २३ ॥ एष ते विधि-
रुद्दिष्टो देवतीर्थस्य भारत ॥ २४ ॥ एतत्पापहरं पुण्यं सर्वदुःखविमोचनं ॥ एवमुत्पादितं देवैर्दानवानां वधार्थतः ॥ २५ ॥
इति श्रीरेवामहात्म्ये उत्तर देवतीर्थनाम षट्पंचाशत्तमोध्यायः ॥ ५६ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र गुहावा-
सीति विश्रुतं ॥ गुहावासी महादेवो यत्र सिद्धः सनातनः ॥ १ ॥ युधिष्ठिर उवाच ॥ केन कार्येण विप्रेंद्र देवदेवो जगद्गुरुः
गुहायामनयत्कालं सुचिरं तपसि स्थितः ॥ २ ॥ येतद्विस्तरतः सर्वं कथयस्व ममानघ ॥ श्रोतुमिच्छामि तत्वेन कौतुहलस-
मन्वितः ॥ ३ ॥ श्रीमार्कंडेय उवाच ॥ साधु पृष्टं महाराज पृष्टश्चाशंकचेतसा ॥ पुराणे विस्तरोप्यस्य बहुशः श्रूयते नृप ॥४॥
सांप्रतं कलियोगेन मंदचेतनतो नृप ॥ संक्षेपात्तेन ते तात कथयामि निबोधमे ॥ ५ ॥ पुराकृतयुगे राजन्नासीद्दारुवनं महत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानाद्रुमलताकीर्णं नानावल्ल्यूपशोभितं ॥ ६ ॥ सिंहव्याघ्रवराहैश्च गजऋक्षनिषेवितं ॥ बहुपक्षिस्वरैर्घुष्टं यथा चैत्ररथं तथा ॥ ७ ॥
बसंति तत्र विप्रेंद्रा सततं संशितव्रताः ॥ महातपसि संयुक्ताश्चतुराश्रमवासिनः ॥ ८ ॥ ब्रह्मचारिगृहस्थाश्च वानप्रस्थाश्च भिक्षवः
॥ स्वधर्मनिरताः सर्वे वांछंतः परमं पदं ॥ ९ ॥ तावद्वसंतसमये कस्मिंश्चित्कारणांतरे ॥ गच्छमानो वृषारुढो भवः खोशिवया
सह ॥ १० ॥ ददर्श तापसावासं ऋक्सामध्वनिनादितं ॥ यज्ञाग्निधूपसंसक्तं सर्वपापक्षयंकरं ॥ ११ ॥ तं दृष्ट्वा मुदिता देवा हर्ष-
गद्गदयागिरा ॥ पप्रच्छ देवदेवेशं शशांककृतभूषणं ॥ १२ ॥ कस्यायमाश्रमो देव वेदध्वनि निनादितः ॥ यं दृष्ट्वा क्षुत्पिपासा च
श्रमश्च परिहीयते ॥ १३ ॥ ईश्वर उवाच ॥ किं त्वया न श्रुतं देवि महादारुवनं शुभं ॥ बहुविप्रजनो यत्र गृहधर्मेण वर्तते
॥ १४ ॥ अत्रयः स्त्रीजनः कश्चित् भर्तृशुश्रूषणे रतः ॥ नान्यं धर्मं न देवं वा जानीते शैलनंदिनि ॥ १५ ॥ एतच्छ्रुत्वा वरं
वाक्यं देवदेवेन भाषितं ॥ कौतुहलपरा देवी शंकरं चाब्रवीदिदं ॥ १६ ॥ यत्त्वयोक्तं महादेव पतिधर्मरता स्त्रियः ॥ तासां त्वं
मन्मथो भूत्वा चारित्रं क्षोभय प्रभो ॥ १७ ॥ तंतपार्वत्या वचः श्रुत्वा स देवः पुनरब्रवीत् ॥ एतत्त्वयोक्तं वचनं नहि मे रो-
चते प्रिये ॥ १८ ॥ ब्राह्मणाहि महद्भूतं न तेषां विप्रियं चरेत् ॥ मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः ॥ १९ ॥ चक्रात्ती-
व्रतरो मन्युस्तस्माद्विप्रं न कोपयेत् ॥ नते देवा नतेलोका नते नागा नते सुराः ॥ २० ॥ दृश्यंते त्रिषु लोकेषु ये तैरुष्टैर्न नाशिताः
॥ तेषां मोक्षस्तथा स्वर्गो भूमिमर्त्यफलानि च ॥ २१ ॥ येषां तुष्टा महाभागा ब्राह्मणाः क्षितिदेवताः ॥ २२ ॥
एवं ज्ञात्वा महाभागे असव्याक्यमिमं प्रिये ॥ प्रेत्यलोकविरुद्धं तु ब्रह्मलोकविवर्जनः ॥ २३ ॥ श्रीदेव्युवाच ॥ नार्हते दयिता
देव नभर्तुर्मय्यनुग्रहः ॥ यदिनोधर्षणं स्त्रीणां शीलस्य कुरुषे प्रभो ॥ २४ ॥ कौतुकेन समाख्याते तच्चेन्न क्रियतेत्वया ॥ एवमु-
क्तो महादेवो देव्यावाक्यहिते रतः ॥ २५ ॥ कृत्वा कापालिकं रुपं ययौ दारुवनं शिवः ॥ महाहिना जटाजूटं नियम्य शशिभूष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 णं ॥ २६ ॥ कंठत्राणं परं कृत्वा गोनसौ कर्णकुंडले ॥ व्याघ्रचर्म परीधानो मेखलाहारभूषणः ॥२७ ॥ नूपुरध्वनिनिर्घोषैर्नादयन्
सकलां महीं ॥ कृत्वा कापालिकं रुपं महाचित्रितमद्भुतं ॥ २८ ॥ महाडमरुनिर्घोषैः पूरयन्सर्वतो दिशः ॥ एवं प्रभातसमये विभु-
र्दारुवनं गतः २९ ॥ तावद्विप्रजनः सर्वः पत्रपुष्पफलार्थिकः ॥ निर्गतो बहुभिः सार्द्धं पठमान इतस्ततः ॥ ३० ॥ आश्चर्यभूतं त-
द्रूपं दृष्ट्वा देवस्य भारत ॥ ऋषीणामंगनास्तत्र कामेन कुलुषीकृताः ॥ ३१ ॥ शोभनं पुरुषं दृष्ट्वा सर्वास्ता ऋषियोषितः ॥ वैक्ल-
व्यभावमापन्नास्तदा दारुवने स्त्रियः ॥ ३२ ॥ विकारा बहवस्तासां देवं दृष्ट्वा समुद्गताः ॥ मोहश्च ऋषिपत्नीनां संजातश्चित्तभेद-
नः ॥ ३३ ॥ त्यजंति परिधानानि काश्चितत्र वरांगनाः ॥ उत्तरीयमथाप्यन्या भूषणान्यपरा स्त्रियः ॥ ३४ ॥ विश्लिष्टकेशभाराश्च
काचिद्दर्वीकरोद्यताः ॥ दातुकामास्तथा भैक्ष्यं चेष्टं वक्तुं न चाशकन् ॥ ३५ ॥ काचिद्दृष्ट्वा दिव्यरूपं रूपयौवनगर्विता ॥ उत्संगस्थं
स्वकं बालं विस्मृतापायितुंस्तनं ॥ ३६ ॥ कामबाणहता चान्या बाहुभ्यां पीडयसुस्तनौ ॥ निःश्वसंति तदा सोष्णं न किंचित्प्र
तिजल्पति ॥ ३७ ॥ एवं संक्षोभितं सर्वं स्त्रीजनं परमेश्वरः ॥ जगामादर्शनं तासां दृग्गोचरगतो विभुः ॥ ३८ ॥ ताः पृष्ठतः प्रधा
वंति विकलाविस्मृताश्रमाः ॥ ३९ ॥ तावते ब्राह्मणाः सर्वे भ्रमित्वाकाननं नृप ॥ आगता ददृशुर्दारान्महामोहविमोहितान्
॥ ४० ॥ यासां पूर्वं परा भक्तिरासीत्तासां प्रियं प्रति ॥ चलितां तां विदित्वाशुनिर्जग्मुर्द्विजसत्तमाः ॥ ४१ ॥ ततो दृष्ट्वा तु ते स-
र्वे संभ्राता मुनयो नृप ॥ ततः समाधिज्ञानेन ज्ञातं देवस्य चेष्टितं ॥ ४२ ॥ क्षोभइत्वा मनः स्त्रीणां गतश्चादर्शनं हरः ॥ क्रोधावि-
ष्टो द्विजः कश्चिद्दंडमुद्यम्य धावति ॥ ४३ ॥ जलं गृह्यापरः कश्चितथान्ये दर्भमुष्टिकं ॥ इतश्चेतश्च ते सर्वे भ्रमित्वा काननं नृप
॥ ४४ ॥ एकत्र मिलिताः सर्वे कोपादुचुरिदंवचः ॥ यदिजप्तं हुतं किंचिद्गुरवस्तोषिता यदि ॥ ४५ ॥ तेनसत्येन रुद्रस्य लिंगंप
ततुभूतले ॥ एवं सद्यःप्रभावेनत्रिरुक्तेन द्विजोत्तमैः ॥ ४६ ॥ देवस्योमापतेर्लिंगं पयात धरणीतले ॥ देवस्य पतिते लिंगे जगता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिव संशयः ॥ ४७ ॥ हाहाकारो महानासीत्सर्वलोकेषु भारत ॥ लिंगस्य पतमानस्य तत्र शब्दोमहानभूत ॥ ४८ ॥ क्षोभयामा-
स सकलं त्रैलोक्यं भरतर्षभ ॥ उल्कापाता दिशां दाहा भूमिकंपस्तथाभवन् ॥ ४९ ॥ पतंति पर्वताग्राणि शोषमायांति सागराः ॥
शिवस्य पतिते लिंगे देवा विमनसो भवन् ॥ ५० ॥ समेत सहिताः सर्वे ब्रह्माणं पितरं ययुः ॥ कृतांजलिपुटा सर्वे स्तुवंतिस्म
तथा स्तवैः ॥ ५१ ॥ ततस्तुष्टो जगंनाथश्चतुर्वदनपंकजः ॥ उवाचतान् सुरान् सर्वान् मा विषादं गमिष्यथ ॥ ५२ ॥ ब्रह्मशापाभि
भूतोसौ देवदेवस्त्रिलोचनः ॥ तुष्टैस्तैः तपसायुक्तैः पुनर्मोक्षं गमिष्यति ॥ ५३ ॥ एतच्छ्रुत्वा ययुर्देवा यथागतमरिंदम ॥ भावयि-
त्वा जगन्नाथं तस्यवाक्यमनुत्तमं ॥ ५४ ॥ देवोपि पतिते लिंगेब्रह्मशापेन भूतले ॥ ततो दारुवने विप्रान्प्रसादयितुमागतः
॥ ५५ ॥ विश्वामित्रवसिष्ठाद्याजाबालिरथकश्यपः पैंग्यः सुमंतुर्हारीतः काण्वः प्रकण्वएवच ॥ ५६ ॥ विभांडकमतंगाद्या वीक्ष्य तं
विनयान्वितं ॥ समेत्य सहिता सर्वे तमूचु स्त्रिपुरांतकं ॥ ५७ ॥ महाजनो हि बलवान् क्रोधश्च ज्ञाननाशकः ॥ रभयासत्कृतं
कार्यं क्षमतां शापजं फलं ॥ ५८ ॥ शरीरं न तथा पूज्यं यथा ते लिंगमुत्तमं ॥ चराचरस्य विश्वस्य पूज्यस्त्वं लिंगमूर्तिमान्
॥ ५९ ॥ सांप्रतं नर्मदातोयमाश्रित्य तपसि स्थितः ॥ क्षांतियुक्तो महादेव शापक्षमवाप्स्यसि ॥ ६० ॥ न दूषणं हि विप्राणां य-
द्भावि न तदन्यथा ॥ अस्मत्स्त्रीणांमोहदोषाद्यल्लिंगं पतितं तव ॥ ६१ ॥ देवर्षिपितृगंधर्वसरित्तीर्थार्णवात्मकं ॥ तथा पुण्यगिरि-
क्षेत्रवनात्मकमिहास्तुते ॥ ६२ ॥ ब्रह्मविष्ण्वींद्रचंद्राणां ग्रहाणामर्चने हि यत् ॥ तत्फलं तव लिंगस्य दर्शनेपि भविष्यति
॥ ६३ ॥ एवमुक्तो जगन्नाथः प्रणिपत्य द्विजोत्तमान् ॥ मुदा परमया युक्तः कृतांजलिरभाषत ॥ ६४ ॥ ब्राह्मणा जंगमं तीर्थं निर्ज-
लं सार्वकामिकं ॥ तेषां वागुदकेनैव शुद्धंति मलिनो जनाः ॥ ६५ ॥ न तत् क्षेत्रं नतत्तीर्थं तुषरं मलिनं तथा ॥ कालेन शुद्धिज
ननं विप्रवाक्यं तु तत्क्षणात् ॥ ६६ ॥ पृथिव्यां यानि तीर्थानि गंगाद्याः सरितः स्तथा ॥ एकस्य विप्रवाक्यस्य पदे तत्र प्रतिष्ठि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain, Digitization by eGangotri

तं ॥ ६७ ॥ अथाभिनंद्य विप्रेंद्राननुज्ञातो महर्षिभिः ॥ जगाम सहसा देवो नर्मदातटमुत्तमं ॥ ६८ ॥ परमं व्रतमास्थाय गुहा
वासी यतेंद्रियः ॥ मौनं चचार भगवान् जपध्यानपरायणः ॥ ६९ ॥ लज्जया परया युक्तो गुहावासमुवासह ॥ समासे नियमे
तात लिंगं संस्थाप्य शांकरं ॥ ७० ॥ वंद्यमानः सुरैर्देवः कैलासमगमत्प्रभुः ॥ नर्मदाभक्तितुष्टेन आत्मानं स्थापितं यतः ॥ ७१ ॥
रेवातटे महेशानस्तेनासौ नार्मदेश्वरः ॥ गुहासंवसनाद्देवो गुहावासी निगद्यते ॥ ७२ ॥ यद्यदाचरितं श्रेष्ठस्तद्ददेवेतरे जनः ॥
सयत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥ ७३ ॥ तत्र तीर्थे नरस्नात्वा विधिना संयतेंद्रियः ॥ यः पूजयेन्महेशानं सोश्वमेधफलं ल-
भेत् ॥ ७४ ॥ पितृभ्यो ददते यस्तु तिलमिश्रं तथोदकं ॥ त्रिःसप्तपूर्वजास्तस्य स्वर्गे तिष्ठंति पांडव ॥ ७५ ॥ यथा लिंगस्य पतनं
ब्रह्मकपालधारणं ॥ मोहिन्या रूपकरणं गोवर्धनस्य धारणं ॥ ७६ ॥ जानकी लंकेशगृहे रामस्य विललामनं ॥ गोपिनां मोहनं
चैव तासां चैव प्रवर्त्तनं ॥ ७७ ॥ क्षत्रियाणां क्षयकरं मातुर्वधस्तथैव च ॥ देवतानां चरित्रं वै कोपि वेत्ता न विद्यते ॥ ७८ ॥
महानुभावजा निंदा सर्वेषां नरकाय वै ॥ पंचभर्ता च पांचाली दशभर्ताच वार्षकी ॥ ७९ ॥ व्यासस्य मत्स्यगंधायां नदेवचरितं
चरेत् ॥ यस्तु भोजयते विप्रांस्तास्मिंस्तीर्थे नराधिप ॥ ८० ॥ सहस्रविप्रभोज्यस्य प्रतिविप्रं लभेत्फलं ॥ सुवर्णं रजतं वस्त्रं तिल-
भूमिकुशोदकं ॥ ८१ ॥ प्रदत्तं तत्र विप्रेभ्यः सर्वमक्षयतां व्रजेत् ॥ आष्टम्यां वाचतुर्दश्यां निराहारो वसेत्तुयः ॥ नर्मदेश्वरमासाद्य
लभते जन्मनः फलं ॥ ८२ ॥ अग्निप्रवेशं यः कुर्यात्तस्मिं स्तीर्थे नराधिप ॥ तस्यपापभयं नास्ति दशजन्मानि भारत ॥ ८३ ॥
अनाशकं व्रतं गृह्य तत्र तीर्थे विधानतः ॥ अनिवर्तगतिस्तस्य रुद्रलोकात्कदाचन ॥ ८४ ॥ एतत्ते सर्वमाख्यातं पुराणे यन्मया
श्रुतं ॥ नर्मदेश्वरमहात्म्यं सर्वपापप्रणाशनं ॥ ८५ ॥ कीर्तयिष्यंति ये तत्र नर्मदेश्वर संभव ॥ श्रोष्यंति वामहाराज तेषां पापं
प्रयात्याति ॥ ८६ ॥ इतिश्रीरेवामहात्म्ये उत्तरे नर्मदेश्वरोत्पत्ति र्नामसप्तपंचाशत्तमोऽध्यायः ॥ ५७ ॥ श्रीमार्कंडेय उवाच ॥ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तो गछेत रजेंद्र कपीलातीर्थमुत्तमं ॥ स्नानमात्रो नरो यत्र मुच्यते सर्वकिल्बिषैः ॥ १ ॥ युधिष्ठिर उवाच ॥ अश्चर्यभूतं लोके-
स्मिन्कथितं द्विजसत्तम ॥ नर्मदेश्वरमहात्म्यं सर्वपापहरं परं ॥ २ ॥ इदानीं कपिलातीर्थमहात्म्यं कथ्यतां प्रभो ॥ कुतो वा कथ-
मुत्पन्नं सर्वं विस्तरतो वद ॥३॥ श्रीमार्कंडेय उवाच ॥ शृणुष्वैकमना राजन्कपिलातीर्थमुत्तमं ॥ श्रुतमात्रेण येनात्र सर्वं पापं वि-
लीयते ॥४ ॥ पुरा कृतयुगस्यादौ ब्रह्मा लोकपितामहः ॥ उत्पादयित्वा सकलं भूतग्रामंचतुर्विधं ॥ ५ ॥ ततोग्निहोत्रशालायां याव-
त्तिष्ठति भारत ॥ देदीप्यमाना कपिला तावत् कुंडाद्विनिः सृता ॥ ६ ॥ अग्निज्वालोज्वलः शृंगैः सुनेत्रा सुयशास्विनी ॥ सर्वल-
क्षणसंपूर्णा घंटालललितनिस्वना ॥ ७ ॥ दृष्ट्वा तु तां महाभागां कपिलां कुंडमध्यतः ॥ ब्रह्मा लोकगुरुस्तात प्रणम्यैनमुवाचह
॥ ८॥ नमस्ते कपिले पुण्ये सर्वलोकेष्वनुत्तमे ॥ मंगल्ये मंगले देवी दर्शनात्पापनाशिनि ॥ ९॥ त्वं लक्ष्मीस्त्वं धृतिर्मेधा स्मृति-
स्त्वं हि वरानने ॥ उमा त्वं ब्राह्मि देवेशि ब्रह्माणीं त्वं न संशयः ॥ १० ॥ कौमारी त्वं महाभागे शक्तिः श्रद्धा तथैव च ॥
कालरात्रिश्च भूतानां मातात्वं परमेश्वरी ॥ ११ ॥ नास्ति विश्वं त्वयाहीनं त्रैलोक्यं सचराचरं ॥ एवं स्तुता हि सातेन कपिला
परमेष्ठिना ॥ १२ ॥ तमुवाच महाभाग प्रहृष्टा पद्मसंभवं ॥ प्रसन्ना तववाक्येन स्तुत्यर्थेन जगद्गुरो ॥ १३ ॥ किं करोमि प्रियं
तद्य ब्रूहि सर्वं पितामह ॥ १५ ॥ ब्रह्मा उवाच ॥ जगद्धिताय जनिता मया त्वं परमेश्वरी ॥ नास्ति किंचित्त्वया हिनं त्रैलोक्ये
सचराचरे ॥ १५ ॥ स्वर्गान्मर्त्यं ततो गच्छलोकानां हितकाम्यया ॥ सर्वदेवमयी त्वं हि सर्वपापप्रणाशनी ॥ १६ ॥ त्वं प्रदास्यंति
ये देवि तेषां वासस्त्रिविष्टपे ॥ येवमुक्ता तु सा देवी कपिला ब्रह्मणा ततः ॥ वंद्यमाना सुरैः सर्वैराजगाम धरातलं ॥ १८ ॥
युधिष्ठिर उवाच ॥ कथं सा दीयते तात ब्राह्मणे वेदपारगे ॥ तस्याः का देवतास्तात अंगप्रत्यंग संस्थिताः ॥ १७ ॥ कुत्र वा-
सा स्थिता तत्र कपिला विश्ववंदिता ॥ किं कृतं च तया तीर्थमेतत्कथय मे प्रभो ॥ १९ ॥ श्रीमार्कंडेय उवाच ॥ सा तदा ब्रह्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णा प्रोक्ता मातालोकस्य भारत ॥ ब्रह्मसकाशाद्गत्वा तु नर्मदां लोकपावनीं ॥ २० ॥ तपः कृत्वा सुविपुलं नर्मदातटमाश्रिता ॥ चचार पृथिवीं सर्वां सशैलवनकाननां ॥ २१ ॥ तदा प्रभृति तत्तीर्थं कपिलातीर्थमुच्यते ॥ सर्वपापहरं ख्यातं ऋषिसंघनिषेवितं ॥ २२ ॥ तत्र तीर्थे नरः स्नात्वा कपिलां यः प्रयच्छति ॥ प्रदत्ता पृथिवी तेन सशैलवनकानना ॥ २३ ॥ तां पश्यंति ये भक्त्या दीयमानां नराधिप ॥ तेषां वर्षकृतं पापं सहसा याति संक्षयं ॥ २४ ॥ भूर्भुवःस्वर्महश्चैव जनः सत्यं तपस्तथा ॥ एते तत्पृष्ठियाश्रित्य स्थिता लोका नृपोत्तम ॥ २५ ॥ मुखे ह्यग्निः स्थितो देव्या दंतेषु च भुजंगमाः ॥ धातारौ ओष्ठयोर्यस्या जिव्हायां च सरस्वती ॥ २६ ॥ सहस्रकिरणौ चोभौ चंद्रादित्यौ सुलोचनौ ॥ नासिकामध्यगो देवो मारुतो नृपपुंगव ॥ २७ ॥ ललाटे च महादेवो ह्यश्विनौ कर्णसंस्थितौ ॥ नरनारायणौ शृंगे शृंगमध्ये पितामहः ॥ २८ ॥ कंबलांतर्गतस्तात वरुणो लोकनायकः ॥ यमश्च भगवान् देव उदरे संप्रतिष्ठितः ॥ २९ ॥ नाभिमध्ये स्थितः स्कंदो वेदाजंघासु भारत ॥ गंगाद्याः सरितः सर्वा मूत्रदेशे व्यवस्थिताः ॥ ३० ॥ लांगूलमाश्रितो धर्मः ककुदे मेरुमंदरौ ॥ पृथिव्यां पर्वता ये च स्थितास्ते सर्वसंधिषु ॥ ३१ ॥ कुक्षौ समुद्राश्चत्वारः स्तनेषु च व्यवस्थिताः ॥ वृक्षगुल्मलताकल्पस्ताः स्थिता अस्थिबंधने ॥ ३२ ॥ ऋषयो रोमकूपेषु वसवो ह्युदरस्थिताः श्रोणितटस्था पितरः प्रश्रवे तीर्थसंचयः ॥ ३३ ॥ यन्मंगलं पवित्रं च पुण्यं तद्गोमये स्थितं ॥ स्थावरं जंगमं यश्च तद्बाह्याभ्यंतरे स्थितं ॥ ३४ ॥ एषां मंदिरसंस्था सा ते धन्या मानवा नृप ॥ प्रातरुत्थाय यस्तस्याः कुरुते तु प्रदक्षिणां ॥ ३५ ॥ प्रदक्षिणीकृतानेन पृथिवी देवतैः सह ॥ कपिलापंचगव्येन यः स्नापयति शंकरं ॥ ३६ ॥ विष्णुं वा भास्करं देवं स यज्ञफलमाप्नुयात् ॥ दध्ना क्षीरघृतैर्विप्रं यत्र भोजयते नृप ॥ ३७ ॥ सहस्रविप्रभोज्यस्य फलं प्राप्नोति मानवः ॥ उपवासपरो यस्तु तस्मिंस्तीर्थे नराधिप ॥ स्नात्वा विधानतो भक्त्या तर्पयेत्पितृदेवताः ॥ ३८ ॥ तत्र ते द्वादशाष्टानि दशपूर्वे दशापरे ॥ तृप्ताः प्रमोदमायांति स्वर्गे पू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णमनोरथाः ॥ ३९ ॥ एषतेसंभवस्तात कपिलायाः प्रकीर्तितः ॥ तीर्थस्य च फलं पुण्यं सर्वपापविशोधनं ॥ ४० ॥ धर्म्यं यश
स्यमायुष्यं सर्वविघ्नविनाशनं ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्रसंशयः ॥ ४१ ॥ इति श्रीनर्मदामाहात्म्ये उत्तरे कपिलेश्वर-
तीर्थनाम अष्टपंचाशत्तमोध्यायः ॥ ५८ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र करंजेश्वरमुत्तमं ॥ यत्र सिद्धो महावीर्यः
करंजो दानवोत्तमः ॥१॥ युधिष्ठिर उवाच ॥ करंज इतिविख्यातः कोत्र सिद्धोद्विजोत्तम ॥ कस्य पुत्रः स कस्माच्च तपश्चक्रे म-
हामतिः ॥ २ ॥ श्रीमार्कंडेय उवाच ॥ पुराकृतयुगे राजन् मानसो ब्रह्मणः सुतः ॥ वेदवेदांगतत्वज्ञो मरीचिर्नामविश्रुतः ॥ ३ ॥
तस्यापि तपसोग्रेण कालेन महतानघ ॥ पुत्रोथ मानसो जातः साक्षाद्ब्रह्माइवापरः ॥ ४ ॥ क्षमा दमो दया दानं सत्यं शौच
मथार्जवं ॥ मारीचस्य गुणाह्येते संति भारतसत्तम ॥ ५ ॥ एवं गुणगुणाकीर्णं तंज्ञात्वा कश्यपेंद्विजं ॥ ततः प्रजापतिर्दक्षो भार्या-
र्थेस्वसुतां ददौ ॥ ६ ॥ अदितिर्दितिर्दनुश्चैव मुख्याश्रेष्ठास्त्रयोदश ॥ तासां पुत्राश्च संजाता पौत्राश्च भरतर्षभ ॥ ७ ॥
अदितिजनयामास पुत्रादिंद्रपुरोगमात् ॥ दितेश्च जातादैतेया दानवाश्च दनोस्तथा ॥ ८ ॥ नागान्प्रेतपिशाचांश्च यत्तत्रीन यक्षरा-
क्षसान् ॥ सिंहव्याघ्रवराहांश्च तथान्यांश्च महाबलान् ॥ ९ ॥ प्रसूतास्तस्य याश्चान्याः कश्यपश्च प्रजापतेः ॥ यैस्तु लोकत्रयं व्याप्तं
स्थावरं जंगमं च यत् ॥ १० ॥ तथान्यश्च महामत्तो दनोः पुत्रो व्यजायत ॥ सर्वलक्षणसंपन्नः करंजो नामदानवः ॥ ११ ॥
सबालएव सहसा चचार विपुलं तपः ॥ नर्मदातटमाश्रित्य नियमस्थो जितेंद्रियः ॥ १२ ॥ दिव्यं वर्षसहस्रं तु व्रतैश्चांद्रायणादि-
भिः ॥ शोषयामास चात्मानं जपहोमपरायणः ॥ १३ ॥ ततस्तुष्टो महादेव उमयासह शंकरः ॥ वरदानोद्यतः साक्षात्त्रिपुरांतक्
रः प्रभुः ॥ १४ ॥ श्रीशंकर उवाच ॥ भोकरंज महासत्व परितुष्टोस्मि तेनघ ॥ वरं वरय भद्रं ते यद्यपि स्यात्सुदुर्लभं ॥ १५ ॥
करंज उवाच ॥ यदितुष्टोसि देवेश यदि देयो वरो मम ॥ त्वत्पादपद्मभक्तिर्मे सदैवास्तु सुरेश्वर ॥ १६ ॥ नान्यं वरमहं याचे विनाभक्तिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रे. खं. तु शांकरीं ॥ तथेत्युक्त्का महादेव उमयासहितस्तदा ॥ १७ ॥ वृषारूढो गणैःसार्द्धं तत्रैवांतरधियत ॥ गते च दर्शनं देवो अ.५९
५९ सोपि दैत्यो मुदान्वितः ॥ १८ ॥ करंजेश्वरनामानं शिवं स्थाप्य ततो गतः ॥ तदाप्रभृति तत्तीर्थं प्रसिद्धं सार्व- ६०
६० कामिकं ॥ १९ ॥ तत्रस्नातो नरो राजन्मुच्यते सर्वकिल्बिषैः ॥ तत्र तीर्थे तु यः स्नात्वा तपर्ययेत्पितृदेवताः ॥ २० ॥
सोग्निष्टोमस्य यज्ञस्य फलं प्राप्नोत्य संशयं ॥ अनासकं तु यः कुर्यात्तत्र तीर्थे युधिष्ठिर ॥ २१ ॥ अनिवृत्ता गतिस्तस्य रुद्रलोका-
त्कथंच न ॥ ततस्तस्मात् च्युतः काले जायते राजसत्तमः ॥ २२ ॥ इतिश्रीरेवामहात्म्ये उत्तरेकरंजेश्वरतीर्थनामएकोनषष्टीतमो-
ध्यायः ॥ ५९ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत्तु राजेंद्र कुंडेश्वरमनुमत्तं ॥ यत्र सिद्धो महायक्षः कुंडोनाम नृपोत्तम ॥ १ ॥
तपः कृत्वा सुविपुलं सुरासुरभयंकरं ॥ ततः स्वर्गं जगामाथ परिपूर्णमनोरथः ॥ २ ॥ युधिष्ठिर उवाच ॥ कस्मिन् युगे समुत्प-
न्नः कस्यपुत्रो महामुने ॥ तपस्तप्त्वा सुविपुलं तोषितो येन शंकरः ॥ ३ ॥ एतद्विस्तरतः सर्वं कथय स्व ममानघ ॥ शृण्वतो न-
हि मे तृप्तिस्तव वाक्यामृतंमुने ॥ ४ ॥ श्रीमार्कंडेय उवाच ॥ त्रेतायुगे ब्रह्मसमः पौलस्योनाम विश्रवाः ॥ भरद्वाजसुतां पत्नी-
मुपयेये महातपाः ॥ ५ ॥ पुत्रं पुत्रगुणैर्युक्तं तस्याभक्त्या सुतोषितः ॥ ध नदं जनयामास सर्वलक्षणसंयुतां ॥ ६ ॥ जातमात्रं सु-
तं ज्ञात्वा ब्रह्मा लोकपितामहः ॥ चकार नाम सुप्रितो मुनिवृंदसमन्वितः ॥ ७ ॥ यस्माद्विश्रवसो जातो मम पौत्रसुतो यतः ॥
तस्माद्वैश्रवणो नाम लोके ख्यातो भविष्यति ॥८॥ तथा त्वं सर्वदेवानां धनगोप्ता भविष्यसि ॥ चतुर्थो लोकपालानामक्षयश्चाव्य-
यो भुवि ॥ ९ ॥ तस्य भद्रेश्वरी नाम भार्या रूपवती शुभा ॥ तस्यां यक्षाधिपश्रेष्ठ तस्य कुंडो भवत्सुतः ॥ १० ॥ ॥ स चरूपवरं
प्राप्य मातापित्रोरनुज्ञया ॥ तपश्चचार विपुलं नर्मदातटमाश्रितः ॥ ११ ॥ ग्रिष्मे पंचतपा भूत्वा वर्षासु स्थंडिलेशयः ॥ हेमंते ज-
लमध्यस्थो वायुभक्षः शतंसमाः ॥ १२ एवं वर्षशते पूर्णे एकांगुष्टेन संस्थितः ॥ अस्थिचर्मावशेषोभूदूर्द्ध्वबाहुः परंतप ॥ ततस्त- ८१

CC-0. In Public Domain. Digitization by eGangotri

स्य तपो दृष्ट्वा तुतोष वृषवाहनः ॥ १३ ॥ श्रीमाहादेव उवाच ॥ वरं वृणीष्व यक्षेश यत्ते मनसि वांछितं ॥ तद्ददामि न संदेहस्तपसानेन तोषितः ॥ १४ ॥ कुंड उवाच ॥ यक्षाधिपत्वं देवेश ददस्व मम शंकर ॥ अवध्यः सर्वशत्रूणां भवामि त्वत्प्रसादतः ॥ १५ ॥ तथेत्युक्त्वा महादेवः सर्वलोकनमस्कृतः ॥ जगामाकाशमाविश्य कैलासं धरणीतलात् ॥ १६ ॥ गते चादर्शनं देवे कुंडःसोपि मुदान्वितः ॥ स्थापयामासदेवेशं कुंडेश्वरमितिश्रुतं ॥ १७ ॥ संपूज्य च महादेवं पुष्पधूपानुलेपनैः ॥ कुसुमैर्विविधैश्चैव तथा वै लिंगपूरणं ॥ १८ ॥ तर्पइत्वा द्विजान् सम्यगन्नपानादिभूषणैः ॥ प्रीणयित्वा महादेवं ततः स्वभवनं ययौ ॥ १९ ॥ तदाप्रभृति तत्तीर्थं त्रिषु लोकेषु विश्रुतं ॥ परमं पुण्यजननं कुंडेश्वर मनुत्तमं ॥ २० ॥ तत्र तीर्थे तु यः कश्चिदुपवासपरायणः ॥ अर्चयेद्देवमीशानं सर्वपापैर्विमुच्यते ॥ २१ ॥ सुवर्णं रजतं वस्त्रं मणिमौक्तिकमासनं ॥ सर्वं तदक्षरं तत्र तीर्थस्यास्य प्रभावतः ॥ २२ ॥ तत्र तीर्थे च गोदानं यः कुर्याद्द्विजसत्तमे ॥ यावंति तस्य रोमाणि शरीरे राजसत्तम ॥ २३ ॥ तावद्वर्ष सहस्राणि रुद्रलोके महीयते ॥ २४ ॥ अन्नोदकं भूमिरथाश्वदानं धनं च दद्याद्द्विजपुंगवाय ॥ दाता सुखी मोदति देवलोके गंधर्वसिद्धाप्सरसोभिजुष्टाः॥२५॥ एवं हिधर्मात्मज सुप्रभाव स्तीर्थस्य सर्वः कथितो मयाते ॥ श्रुत्वा तु यं पूर्णमनो रथस्य पापानि तस्य प्रलयं प्रयांति ॥२६॥ इतिश्रीरेवामहात्म्ये उत्तरे कुंडेश्वरतीर्थनामषष्टित्तमोध्यायः॥६०॥ श्रीमार्कंडेय उवाच॥ ततो गच्छेत राजेंद्र पिप्पलेश्वर मुत्तमं॥ यत्रासिद्धो महायोगी पिप्पलादो महातपाः ॥१॥ युधिष्ठिर उवाच ॥ कस्य पुत्रो महाभागः किमर्थं तप्तवांस्तपः ॥ एतद्विस्तरतः सर्वं कथयस्व ममानघ ॥ २ ॥ श्रीमार्कंडेय उवाच ॥ मिथिलस्थो महाभागो वेदवेदांगपारगः ॥ याज्ञवल्क्यः पुरा तात चचार विपुलं तपः ॥ ३ ॥ तापसिं तस्य भगिनी याज्ञवल्क्यस्य धीमतः ॥ सा प्राप सप्तमे वर्षे वैधव्यं दैवयोगतः ॥ ४ ॥ पूर्वकर्मविपाकेन हीनाभूत्पितृमातृतः ॥ नाभूत्तत्पतिपक्षेपि कोपीत्वेकाकिनी स्थिता ॥५॥ भूमौ भ्रमंती भ्रातुः सा समीपमगमच्छनैः ॥ तीर्थसेवारुचिः सा च पर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकसुखेषिणी ॥ ६ ॥ चचार सापि तत्रस्था सुश्रूषंती महत्तपः ॥ कस्मिंश्चित्समये सापि स्नानाहनि रजस्वला ॥ ७ ॥ अंतर्वासः
कृतवती दृष्ट्वा कर्प्पटमाश्रमे ॥ तन्मुनेर्याज्ञवल्कस्य रेतसाभिक्षुतंनिशि ॥ ८ ॥ पुनरन्वेषयत्तत्र कौपीनं स महामुनिः ॥ ततः
सा ब्राह्मणी प्राह किमन्वेष्यसि मानद ॥ ९ ॥ किंच कार्यं तव विभो भ्रातर्मे ब्रूहि तत्त्वतः ॥ १० ॥ याज्ञवल्क्य उवाच ॥ अ
पवित्रो महाभद्रे स्वप्नो दृष्टोद्य वै निशि ॥ सरेतस्तत्र मे वस्त्रं निक्षिप्तं तन्न दृश्यते ॥ ११ ॥ तच्छ्रुत्वा ब्राह्मणी वाक्यं भीतभी-
तावदंनृप ॥ तद्वस्त्रं हिमयाविप्रस्नानांतर्द्धानकेकृतं ॥ १२ ॥ तस्यास्तद्वचनं श्रुत्वा हाहेत्युक्त्का महातपाः ॥ पपात सहसा भूमौ मू-
लच्छिन्नइव द्रुमः ॥ १३ ॥ किमेतच्च तदा प्रोक्ता आकाशमिव निर्मला ॥ ऋषिमाश्वासयामास पतितं नृपसत्तम ॥ १४ ॥ ब्रूहि
तत्कारणं तात गुह्याद्गुह्यतरं यदि ॥ प्रतिकारोस्य येनैव विमृश्य क्रीयतेधुना ॥१५॥ ततः स सुचिरं ध्यात्वा लज्जया वनतः स्थि-
तः ॥ प्रोवाच साध्वसमनाः शृणुष्वेति नृपोत्तम ॥ १६ ॥ तवात्रदोषो नास्तीह मम चैव शुभव्रते ॥ आज्ञानाद्दैवयोगाच्च जातो
गर्भस्तवोदरे ॥ १७ ॥ तस्यतत्त्वेन रक्षा च त्वया कार्या सदैवहि ॥ विनाशो नैव कर्तव्योयावत्कालस्य पर्ययः॥१८॥ तथोक्त्का
व्रीडिता सापि दूयमानेन चेतसा ॥ पालयामास तं गर्भं यावत्पुत्रो व्यजायत ॥ १९ ॥ जातमात्रं तु तं गर्भं कथयित्वा द्विजो-
त्तमे ॥ छायामश्वत्थजां प्राप्य सोत्ससर्ज महीतले २० ॥ यानि सत्वानि लोकेस्मिं स्थावराणि चराणिच ॥ तानि सर्वाणि रक्षंतु
त्यक्तं वै बालकं मया ॥ २१ ॥ एवमुक्त्का गता सातु ब्राह्मणी नृपसत्तम ॥ सबालोपि स्थितस्तत्र मूहूर्तमिव निश्चलः ॥ २२ ॥
प्रसारयत्पाणिपादौ निकुंच्य नयने शुभे ॥ आस्यं च विवृतं कृत्वा रुरोद विकृतैः स्वरैः ॥२३ ॥ तेन शब्देन वित्रस्ता स्थावरा जं-
गमाश्च ये ॥ अकंपिता मही तात सशैलवनकानना ॥२४॥ ततो ज्ञात्वा महद्भूतं क्षुधाविष्टं द्विजर्षभं ॥ न जहाति नगर्छ्या
ददौ पानार्थिने पयः ॥ २५ ॥ आप्यायितस्ततस्तेन अमृतेनैव भारत ॥ चिंतयामास विश्रब्धः कोनु मे ग्रहगोचरः ॥ २६ ॥ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तःक्रूरसमाचारंक्रूरदृष्ट्या निरीक्षितः ॥ पपात सहसा भूमौ शनैश्चारी शनैश्चरः ॥ २७ ॥ उवाच च भयत्रस्तः कृतांजलिपुटस्तदा ॥
किं मयापकृतं विप्र पिप्पलाद महामुने ॥ २८ ॥ निरीक्ष्य गगना येन पातितो धरणीतले ॥ सौरिणा ह्येवमुक्तस्तु पिप्पलादो
महानघ ॥ २९ ॥कोपादब्रवीद्वाक्यं तच्छृणुष्व युधिष्ठिर ॥ पितृमातृविहीनस्य मम बालस्य दुर्मते ॥ पीडां प्रकुरुषे कस्मात्तन्म-
माचक्ष तत्वतः ॥ ३० ॥ शनिश्चर उवाच ॥ सर्वदा क्रूरभावोहं क्रूरा दृष्टिर्ममेदृशी ॥ मुंच मां तद्विकर्तास्मि यद्ब्रवीषि महा-
मुने ॥ ३१ ॥ पिप्पलाद उवाच ॥ अद्यप्रभृती बालानां न कदाचिच्छनैश्चर ॥ प्रकर्तव्या त्वया पीडा एष ते समयः प-
रः ॥ ३२ ॥ एवमस्त्विति चोक्त्वाथ सजगाम यथागतं ॥ देवमार्गे शनैश्चारि प्रणम्य ऋषिसत्तमं ॥ ३३ ॥ गते शनैश्चरे तत्र
सोपि बालो महाग्रहे ॥ विचिंतयन्वै पितरं कोपेन कलुषीकृतः ॥ ३४ ॥ आग्नेयीं धारणां कृत्वा जनयामास पावकं ॥ कृत्यामुत्पा-
दयामास तत्राग्नौ रुद्ररूपिणी ॥ ३५ ॥ तावज्झटितिसाकृत्या ज्वालामालाविभूषिता ॥ हुताशनसमाकारा किंकरोमितिचाब्रवीत्
॥ ३६ ॥ शोषयामि समुद्रांश्च चूर्णयामीह पर्वतान् ॥ त्रैलोक्यं क्षोभयाम्यद्य पातयामि नभस्तलं ॥ ३७ ॥ कस्य मूर्ध्नि पतिष्या-
मि योत्र त्वामपराध्यति ॥ शीघ्रमादिश्यतां विप्र मामेका ल[illegible]योभवेत् ॥ ३८ ॥ तस्यास्तद्वचनं श्रुत्वा पिप्पलादो महातपाः ॥
कोपरक्तांतनयन इदं वचनमब्रवीत् ॥ ३९ ॥ महता क्रोधवेगेन मया त्वं चिंतिता शुभे ॥ पितुर्मे याज्ञवल्क्यस्य सद्यस्त्वं पत
मूर्द्धनि ॥ ४० ॥ एवमुक्ता ततस्तेन स्फोटयंती नभस्तलं ॥ कोपेन निर्गता कृत्या यत्रास्ते स महामुनिः ॥ ४१ ॥ मिथिलस्थो
महाप्राज्ञ उग्रेतपसि संस्थितः ॥ यावत्पश्यति दिग्भागे ज्वलनार्कसमप्रभं ॥ ४२ ॥ याज्ञवल्क्यो महातेजा महद्भूतमुपस्थितं ॥
तं दृष्ट्वा सहसा यांतंभीतस्तत्र महामुनिः ॥ ४३ ॥ भूतेनानुगतः शीघ्रं जनकं नृपतिं ययौ ॥ शरणार्थिनमायांतंविद्धि मां नृप-
सत्तम ॥ महदद्भुतभयाद्रक्ष यदि शक्तोसि पार्थिव ॥ ४४ ॥ जनक उवाच ॥ ब्रह्मतेजोभवं भूतमनिवार्यं दुरासदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ तंन्निषेद्धुं नशक्नोनि बहुना किं द्विजोत्तम ॥ ४५ ॥ ततश्चान्यं नृपश्रेष्ठंशरणार्थी महातपाः ॥ जगाम तेन निर्मुक्तं
इंद्रस्यभवनं ययौ ॥ ४६ ॥ देवराजानमभ्येत्य महाभूतभयान्नृप ॥ कंपमानो ब्रवीद्वाक्यं रक्षस्वेति पुनःपुनः ॥ ४७ ॥
तस्य तद्वचनं श्रुत्वा देवराजो ब्रवीदिदं ॥ नशक्नोमि परित्रातुं ब्रह्मकोपान्महामुने ॥ ४८ ॥ ततः सतेन मुक्तश्च जगाम
ब्रह्मणोंतिकं ॥ ब्रह्मणा न परित्रातो भयभीतो मुनिस्ततः ॥ ४९ ॥ जगाम शरणं विष्णुं त्यक्तस्तेनापि सत्तम ॥ ५० ॥ ततः स
परमोद्विग्नो निराशो जीविते तदा ॥ अनुगम्यमानो भूतेन संगतः शंकरालयं ॥ ५१ ॥ तेन योगबलोपेतो महादेवेन पांडव ॥
नखमांसांतरे गुप्तो यथा देवी न विंदति ॥ ५२ ॥ तत्रा गतं ततो भूतं ज्वलनार्कसमप्रभं ॥ मुंचमुंचेति पुरुषं महादेवमुवाचह
॥५३॥ एवमुक्तो महादेवस्तेनभूतेन भारत ॥ योगींद्रं दर्शयामास नखमांसांतरे स्थितं ॥५४॥ संस्थाप्य भूतं भूतेशः परमापद्गतिं
मुनिं ॥ उवाचशंभुर्विप्रर्षे निर्गच्छस्व महामुने ॥ ५५ ॥ ततस्तं सूक्ष्मदेहंतु कृत्वेदं भूतमब्रवीत ॥ किमस्य त्वं महद्भूतं करिष्यसि
वदस्वमे ॥ ५६ ॥ कृत्या उवाच ॥ क्रोधाविष्टेन देवेश पिप्पलादेन प्रेषिता ॥ अस्यदेहं दहिष्यामि क्षणार्द्धेन सुरेश्वर ॥ ५७॥
एतच्छ्रुत्वा महादेवो भूतस्य वचनं तदा ॥ ततस्तद्ववचनात्कार्थं विचार्याथ महेश्वरः ॥ ५८ ॥ पिप्पलादं समेत्यैवमुवाच वचनं
हरः ॥ मुने त्वद्वचनं सत्यं नान्यथा जायतेमया ॥ ५९ ॥ प्रसादयामि त्वां ब्रह्मन् रक्षैनं पितरं तव ॥ यथातथ्यकरां कृत्यां मुं-
चस्व दुःकृतं प्रति ॥ ६० ॥ प्रार्थयामि तवाहं वै शारदाभ्रसमस्मृतः ॥ इत्युक्ते पिप्पलादेन दृष्ट्वा शिवमुपागतं ॥ ६१ ॥ प्रण-
म्याक्रुद्धचित्तेन तथेत्युक्तं विभुंप्रति ॥ रक्षां वै याज्ञवल्क्यबंधयाम सुरेश्वर ॥ ६२ ॥ योगेश्वरेति विप्रस्य कृत्वा नामयुधिष्ठिर ॥
पिप्पलादमुवाचेह कृत्या हरतु दुःकृतं ॥ ६३ ॥ तदाज्ञया ततः कृत्या मंत्ररक्षायुतं मुनिं ॥ पालयामास तत्पापं ददाह च य-
थेच्छया ॥ ६४ ॥ ततस्तु भगवान् रुद्रः कृपया परया युतः ॥ तावुभावनुमान्याथ याज्ञवल्क्यं क्षमाप्यच ॥ ६५ ॥ विसर्जयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेशस्तत्रैवबांतरधीयत ॥ एवं भूते ततो भूते पिप्पलादोपि दुर्मनाः ॥ ६६ ॥ पितुरुद्वेगयोगाच्च नर्मदातटमाश्रितः ॥ एकांगुष्ठो
निराहारः स्थित्वा वर्षशतं नृप ॥ ६७ ॥ तोषयामास देवेशं पार्वत्या परमप्रियं ॥ ततस्तु तपसा तस्य शर्वःप्रत्यक्षतां गतः
॥ ६८ ॥ ईश्वरोवाच ॥ परितुष्टोस्मि ते विप्र तपसानेन सुव्रत ॥ वरं वृणीष्व भद्रं ते मनसा यदभिप्सितं ॥ ६९ ॥ पिप्प-
लाद उवाच ॥ यदि मे भगवंस्तुष्टो यदि देयो वरो मम ॥ पितुरुद्वेगजं दोषं कृत्या संजननान्मम ॥ ७० ॥ नाशयस्व म-
हेशान पापं हर सुरेश्वर ॥ अत्रसन्निहितो देव तीर्थे भवसदाशिव ॥ ७१ ॥ एवमुक्तस्तथेत्युक्त्वा पिप्पलादं महामुनिं ॥ जगामा
दर्शनं देवो भूतसंघनिषेवितः ॥ ७२ ॥ पिप्पलादो गते देवे स्नात्वा रेवांभसाततः ॥ स्थापयित्वा महादेवं जगामोत्तरपर्वतं ॥७३॥
तत्र तीर्थे नरो भक्त्या स्नात्वा मंत्रयुतं नृप ॥ तर्पयित्वा पितॄन्देवान् पूजइत्वा महेश्वरं ॥ ७४ ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नो
त्यनुत्तमं ॥ मृतो रुद्रपदं याति दिव्याभरणभूषितः ॥ ७५ ॥ तत्र यो भोजयेद्विप्रान्पितॄनुद्दिश्य भारत ॥ तस्य ते द्वादशाब्दानि
तृप्ता यांति सुरालयं ॥ ७६ ॥ संन्यासेन तु यः कश्चित्तत्र तीर्थे तनुं त्यजेत् ॥ अनिवृत्ता गतिस्तस्य रुद्रलोकात्कथंच न ॥ ७७ ॥
एतत्सर्वं मयाख्यातं यत्पृष्टोहं त्वया नघ ॥ माहात्म्यं पिप्पलादस्य तीर्थस्यापि च संभवं ॥ ७८ ॥ एतत्पुण्यं पापहरं धन्यं दुःख-
प्रणाशनं ॥ पठतः शृण्वतां वापि सर्वपापक्षयो भवेत् ॥ ७९ ॥ इति श्रीरेवामाहात्म्ये उत्तरेपिप्पलादतीर्थनामएकषष्टित्तमोध्यायः
॥ ६१ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र विमलेश्वरमुत्तमं नर्मदाउत्तरे कूले सर्वपापप्रणाशनं ॥ १ ॥ तत्र देव-
शिला रंम्या स्वयं देवेन निर्मिता ॥ तत्र स्नात्वा तु ये भक्त्या पूजयंति महेश्वरं ॥ २ ॥ विक्षोभ्य पापसंघातं प्राप्नुवंति
परंपदं ॥ तत्र तीर्थे तु यो भक्त्या ब्राह्मणं भोजयेन्नृप ॥ ३ ॥ सहस्रविप्रभोज्यस्य फलं प्राप्नोति मानवः ॥ ४ ॥
सुवर्णरजतं वापि मणिमौक्तिकमेव च ॥ भूमिवस्त्रं च गोदानं सर्वमक्षयतां व्रजेत् ॥ ५ ॥ तत्र तीर्थे तु यः कश्चि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्प्राणत्यागं करोतियः ॥ रुद्रलोके वसेत्तावद्यावदाहूतसंप्लवं ॥ ६ ॥ अनावृष्टिहते काले पुरा कल्पे नराधिप ॥
गंगायमुनयोर्मध्ये ऋषिभिः स्तपसा न्वितैः ॥ ७ ॥ अभक्षभक्षणैश्चैव कृतं वैप्राणधारणं ॥ नित्यकर्मभवा हानिस्तेषां तद्वद्वभूवह
॥ ८ ॥ एवं तत्रकियत्कालं स्थित्वा रेवामुपागताः ॥ श्रुत्वा तु नर्मदातीरमनश्वरमघापहं ॥ ९ ॥ तत्रावसन्समागत्य ऋषयः
शंसितव्रताः ॥ त्रिकालं स्नाननिरता कंदमूलाशनाः सकृत ॥ १० ॥ कदापि च त्रिरात्रं वै सप्तरात्रव्रतं श्रिताः ॥ कृछ्रातिकृछ्रपा-
राकचांद्रायणपरायणाः ॥ ११ ॥ स्तुवंतः शिवमव्यग्राः सूक्तैर्वेदोदितैर्नृप ॥ १२॥ कालेन कियता तेषां शर्वः प्रत्यक्षतां ययौ ॥
साक्षाद्रुद्रउवाचेदं प्रसन्नः पार्वतीपतिः ॥ १३ ॥ श्रीमहादेव उवाच ॥ ऋषयो वः प्रसन्नोस्मि ब्रूत किंकरवाणि वः ॥ प्रार्थय-
ध्वं वरं श्रेष्ठा यद्यपिस्यात्सुदुर्लभं ॥ १४ ॥ ऋषय उवाच ॥ अनावृष्टिहते काले मलिनत्वमुपागतं ॥ आपद्गतानां विप्राणां नै-
र्मल्यं कुरु शंकर ॥ १५ ॥ यथा विहाय कालुष्यं लोकान् गच्छंति वांछितान् ॥ ततस्तेषां तथेत्युक्त्का विभूर्वैमल्दयो भवः ॥१६॥
जगामाकाशमाविश्य कैलासं नगसत्तमं ॥ १७ ॥ ततस्ते ऋषयः सर्वे विमलत्वमुपागताः ॥ तत्र संस्थापयामासुर्विमलेश्वरसंज्ञि-
तं ॥१८॥ शिवं शांतं जगन्नाथं प्रणतार्तिहरं हरं ॥ संस्नाप्य नर्मदातोयैर्बिल्वपत्रैरपूजयन् ॥१९॥ किंचित्कालं स्थितास्तत्र ततः सि-
द्धिमुपागताः ॥ २० ॥ इति ते कथितस्तात विमलेश्वरसंज्ञितः ॥ स्मरणात्कीर्तनादस्य विमलोजायते नरः ॥ २१ ॥
इति उत्तरे विमलेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ ततः पुष्करणीं गच्छेत्सर्वपापप्रणाशिनीं ॥ तत्र स्नात्वा जपेद्देवं
तेजोराशिं दिवाकरं ॥ १ ॥ ऋचमेकां जपेत्साम्नः सामवेदफलंलभेत् ॥ यजुर्वेदस्य यजुषा ऋग्वेदस्य यथा ऋचा ॥ २ ॥ अक्षरं
वा जपेन्मंत्रं ध्यायमानो दिवाकरं ॥ आदित्यहृदयं जप्त्वा मुच्यते सर्वकिल्विषैः ॥ ३ ॥ तत्र तीर्थे तु यः स्नात्वा विधिना पूजये-
द्द्विजान् ॥ तस्य लक्षगुणं दानं जायते नात्रसंशयः ॥ ४ ॥ अनाशके जले वाथ कृत्वा पंचाग्निसाधनं ॥ तस्मिंस्तीर्थे मृतो यस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सयातिपरमांगतिं ॥ ५ ॥ तिलोदकी तिलस्नायी कामक्रोधविवर्जितः ॥ ब्राह्मणो नशने प्राणांस्त्यजन्सद्गतिमाप्नुयात् ॥ ६ ॥ ब्रा-
ह्मणः क्षत्रियो वाथ शूद्रो वाथ नृपोत्तम ॥ कुर्वन् हिविहितं कर्म प्राप्नोति परमां गतिं ॥ ७ ॥ संग्रामे तद्गतिं तात क्षत्रियो
निधनाल्लभेत् ॥ तदभावान्महादेवं सेवन् सिद्धिं लभेदिति ॥ ८ ॥ व्याधिग्रहगृहितो वा वृद्धो वा विकलेंद्रियः ॥ आत्मानं
दाहयित्वाग्नौ विधिना सद्गतिं लभेत् ॥ ९ ॥ वैश्योपि हिमहादेवं पूजयित्वाग्निमाविशेत् ॥ जलेवाशुद्धभावेन त्यक्त्वा प्राणान्
शिवं व्रजेत् ॥ १० ॥ शूद्रोपि द्विजशुश्रूषां कुर्वन्नाचारसंस्थितः ॥ पूजयित्वा शिवं लिंगं ततोमोक्षमवाप्नुयात् ॥ ११ ॥ अथवा
भक्तिसंयुक्तो गुरुद्विजरतः सदा ॥ व्रतं कुर्याद्यथार्हंतु विप्रवाक्येन भारत ॥ १२ ॥ शांतो दांतो जितक्रोधः शास्त्रवांश्च विचक्षणः ॥
तेषां चैवोपदेशेन कुर्वन् कारीशसाधनं ॥ १३ ॥ एवं वर्णान्यथार्थेन मूढाहंकारमोहिताः ॥ पतंति नरके घोरे यथांधो गिरिगह्वरे
॥ १४ ॥ ये शास्त्रविधिमुत्सृज्य वर्तंते कामचारतः ॥ कृमियोनिं प्रपद्यंते सर्वधर्मबहिःकृताः ॥ १५ ॥ अष्टाविंशति कोट्योवै नर-
काणां युधिष्ठिर ॥ प्रत्येकं तत्र पच्यंते मग्ना नरकसागरे ॥ १६ ॥ दुर्लभं मानुषं जन्म बहुजन्मार्जितं नृप ॥ तल्लब्ध्वा यदि मा-
त्सर्ययोदधाति समोहितः ॥ १७ ॥ यमितव्यः सदात्मा वै नरेण ज्ञानचक्षुषा ॥ १८ ॥ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ॥
यस्यनोन्मीलितं चक्षुः ज्ञेयो जात्यंधएव सः ॥ १९ ॥ एतत्ते कथितं सर्वं यत्पृष्टं हि त्वया नघ ॥ वर्णानां विहितं यश्च पुराणेषु
प्रकीर्तितं ॥ २० ॥ युधिष्ठिर उवाच ॥ यदाह मुनयो वैतत्सत्यं वै नान्यथा भवेत् ॥ किं त्वत्र प्रष्टुमिच्छामि तन्मे ब्रूहि द्वि-
जोतम ॥ २१ ॥ कस्मात्पुष्करिणीनाम कदा केनावतारिता ॥ २२ ॥ श्रीमार्कंडेय उवाच ॥ यदा शुलेन निर्भिन्ना पुरा वै
शूलपाणिना ॥ नर्मदा दक्षिणे कूले कर्तुं क्षेत्रपरिक्षणं ॥ २३ ॥ तदा निर्घातसंत्रस्ता भानोरश्वा किलांतरे ॥ तथा चकितसूर्यस्य
हस्तात्पुष्करमुत्तमं ॥ २४ ॥ पपात नर्मदापार्श्वे ह्युत्तरे नृपसत्तम ॥ तन्निस्पंदभवा नाम्ना पुष्करिणी इति स्मृता ॥ २५ ॥ सू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 योंपि पुष्करार्थंच तत्रागत्य ग्रहाधिपः ॥ तत्तीर्थं स्थापयामास रोगदुःखौघनाशनं ॥ २६ ॥ नर्मदा सरितां श्रेष्ठा रुद्रदेहाद्विनिर्गता
॥ तारयेत्सर्वभूतानि स्थावराणि चराणि च ॥२७॥ सर्वदेवाधिदेवेन इश्वरेण महात्मना ॥ लोकानां वै हितार्थाय पुण्येयमवतारिता
॥ २८ ॥ वाचिकं मानसं वापि कर्मजं नृपयद्भवेत् ॥ यस्मात्तद्दर्शनादेव सर्वपापं विलीयते ॥ २९ ॥ प्रातरुत्थाय यो नित्यं
नर्मदाभावसंयतः ॥ मंत्रमेनं जपेत्तात सस्नानफलमाप्नुयात् ॥ ३० ॥ नमःपुण्यजले देविनमः सागरगामिनी ॥ न-
मस्ते पापनिर्मोचे नमो देवी वरांगने ॥ ३१ ॥ नमोस्तु ते ऋषिगणसिद्धसेविते विशेषतस्त्रिपुरहराद्विनिःसृते ॥ न-
मोस्तु ते सुकृतभृतां सदावरे नमोस्तु ते सकलपवित्रपावनी ॥ ३२ ॥ इति श्रीवायुपुराणे रौद्र्यासंहितायां श्रीकल्पगा
महात्म्ये उत्तरे विमलेश्वरपुष्करणीसंगमतीर्थनाम द्वियुक्षष्टितमोध्यय: ॥ ६२ ॥ श्रीमार्कंडेय उवाच ॥ तीर्थानां परमं ती-
र्थं शृणुष्व नृपसत्तम ॥ रेवाया दक्षिणे कूले निर्मितं शूलपाणिना ॥ १ ॥ रक्षार्थं मानवेंद्राणां पूर्वपापप्रणाशनं ॥ तत्र तीर्थेल्प-
कष्टेन प्राप्यते सुमहत्फलं ॥ २ ॥ युधिष्ठिर उवाच ॥ श्रुता मया महाधर्मास्तीर्थानि विविधानि च ॥ व्रतानि चापि सर्वाणि
त्वत्प्रसाद्द्विजोत्तम ॥ ३ ॥ इदानीं श्रोतुमिच्छामि तीर्थमेतत्सुशोभनं ॥ संसारछेदकरणं सद्योमोक्षफलप्रदं ॥ ४ ॥ तदाख्याहि महा-
भाग सद्यः प्रत्ययकारकं ॥ प्रसादं परमं कृत्वा ममोपरि मुनीश्वरा: ॥ ५ ॥ श्रीमार्कंडेय उवाच ॥ शृणुष्वावहितो भूप तीर्थं पु-
ण्यतमं महत् ॥ श्रुते यस्य प्रभावो पि संक्षयंयातिपातकं ॥ ६ ॥ वाचिकं मानसं वापि कर्मजं च विशेषत: ॥ कीर्तनात्तस्य
तीर्थस्य सर्वपापं क्षयं व्रजेत् ॥ ७ ॥ पंचक्रोशप्रमाणं तु तीर्थमेतन्नृपोत्तम ॥ भुक्तिमुक्तिप्रदं प्रोक्तंप्राणिनां पापकर्मणां ॥ ८ ॥ रेवा-
या दक्षिणे कूले पर्वतो भृगुसंज्ञितः ॥ तस्यैव मुर्ध्नितत्तीर्थंप्रधानमवनीतले ॥ ९ ॥ उत्पादितं पुरा तीर्थं स्वयमेवेह शंभुना ॥
शूलभेदमितिख्यातं त्रिषु लोकेषु भूपते ॥ १० ॥ तत्रस्थिताश्च यावल्यो महावृक्षाश्चतुर्दिशं ॥ पतिता जलपूतास्ते रुद्रस्य भुवनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गताः ॥११॥ मृतास्तत्रैव ये केचिज्जंतवौ दक्षिणे पिच ॥ ते गताः शांकरं लोकं तत्र तीर्थप्रभावतः ॥१२॥ पातालान्निःसृता गंगा भोगवत्येति संज्ञिता ॥ पतिता कुंडमध्ये तु यत्र भिन्नं त्रिशुलिना ॥१३॥ शंभुना च पुरा तात अनीता वै सरस्वती ॥ सा तत्र पतिता राजन् प्राचीनार्घविमोचनी ॥१४॥ तत्र तस्याः समीपे तु शिला गीर्वाणसंज्ञिता ॥ तत्र तीर्थानि तत्तीर्थे नभूतं नभविष्यति ॥१५॥ केदारं चप्रयागं च कुरुक्षेत्रं तथा गया ॥ शूलभेदस्य चान्यानि कलां नांहाति षोडशीं ॥ १६ ॥ पंचस्थानानि पुण्यानि पृथक्भुतानि यानि च ॥ प्रवक्ष्यामि समासेन तदैकैकं पृथक् पृथक् ॥१७ ॥ गयाश्राद्धे गयापुण्यं चक्रतीर्थेचतत्समं ॥ धर्मारण्ये यथा कूपे रुद्रकुंडंच तत्समं ॥ १८ ॥ ब्रह्मकूपे यथा पुण्यं तथा देवनदी शुभा ॥ गयाशिरो यथा पुण्यो तथा धर्मशिला शुभा ॥१९॥ यथा च पुष्करं पुण्यं मार्कंडेशं तथानृप ॥ तीलोदकं तत्र तीर्थे पितृणां दत्तमक्षयं ॥ २० ॥ यस्तत्र कुरुते स्नानं तोयंवापिबाति पुनः ॥ समुच्यते महापापात् उरगः कंचुकं यथा ॥ २१ ॥ तत्र तीर्थे तु यद्दानं विप्रेभ्यो दीयते नृप ॥ त्रयोदशादिनान्येव त्रयोदशगुणं भवेत् ॥ २२ ॥ तं दृष्ट्वागणनाथं वै सर्वदैव गजाननं ॥ नश्यंति सर्वविघ्नानि दृष्ट्वा वै क्षेत्रकंबलं ॥ २३ ॥ संपूज्य परया भक्त्या शूलपाणिं महेश्वरं ॥ देवीमुमां च संपूज्य प्राप्नोतिपरमां गतिं ॥ २४ ॥ गुहावासि नमाराध्य मार्कंडेशमनुत्तमं ॥ मुच्यते पातकैः सर्वैर्ज्ञाताज्ञातसमुद्भवैः ॥ २५ ॥ गुहामध्ये प्रतिष्ठस्तु जपेत्सूक्तं समाहितः ॥ ससर्ववेदपाठस्य फलंप्राप्नोत्यसंशयं ॥ २६ ॥ त्रयोदेवास्तु तिष्ठंति आदित्या मरुतैः सह ॥ सर्वदेवमयं तीर्थं कोटिलिंगसमन्वितं ॥ २७ ॥ यथा नद्यो नदाः सर्वे सागरे यांति संक्षयं ॥ तथा पापानि नश्यंति शूलभेदस्य दर्शनात् ॥२८॥ प्रत्यक्षो दृश्यतेद्यापि प्रत्ययो नृपसत्तम ॥ पतितो जलमध्यस्थस्तैलबिंदुर्नसर्पति ॥ २९ ॥ यः स्मरेत् शूलभेदं तु त्रिकालं नित्यमेव च ॥ पवित्रस्तु भवेत्साक्षात्सबाह्याभ्यंतरं नृप ॥ ३० ॥ न कस्य चिन्मया ख्यातं पृष्टोपि त्रिदशैरपि ॥ गुह्याद्गुह्यतरं तीर्थं सदा गोप्यं कृतं विभो ॥ ३१ ॥ सर्वपापहरं पुण्यं दुःखदुःस्वप्नना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शनं ॥ सर्वतीर्थमयं तीर्थं शूलभेदंनरेश्वर ॥ ३२ ॥ श्रुते तस्य प्रभावेपि मुच्यते सर्वपातकैः ॥ इदं तीर्थं मया पुत्र
संक्षेपात्कथितं तव ॥ ३३ ॥ इतिश्रीरेवामहात्म्ये शूलभेदप्रशंसायांदक्षिणोत्रियुक्षष्ठितमोध्यायः ॥ ६३ ॥ श्रीमार्कंडेय
उवाच ॥ एतदेव महाराज परिपृष्ठो महेश्वरः ॥ राज्ञा उत्तानपादेन ऋषिदेवसमागमे ॥ १ ॥ उत्तानपाद उवाच ॥ शूलभेद-
मितिख्यातं यत्तीर्थं सुरसत्तम ॥ इदं तीर्थं महापुण्यंसर्वतीर्थमयं परं ॥ २ ॥ गुह्याद्गुह्यतरं स्थानं न दृष्टं न श्रुतं हर ॥
शूलभेदं कथं जातं केनाप्युत्पादितं पुरा ॥ ३ ॥ महात्म्य मस्य तीर्थस्य कथयस्व प्रसादतः ॥ ४ ॥ ईश्वर उवाच ॥ आसीत्
पुरा महावीर्यो दानवो बलदर्पितः ॥ न लोके तादृशःकश्चिद्विक्रमेण बलेन वा ॥ ५ ॥ सूनुर्ब्रह्मसुतस्यायमंधकोनाम दुर्मदः ॥
स सदानंदितमना सुरासुरभयंकरः ॥ ६ ॥ निजस्थाने वसन् पापः कुर्वन् राज्यमकंटकं ॥ एतस्मिन्नेव काले तु तपः कर्तुं मनो
दधे ॥ ७ ॥ तोषयामि महादेवं येन मेनुग्रहो भवेत् ॥ प्रार्थयामि वरं दिव्यं यन्मे मनसिवांछितं ॥ ८ ॥ नान्यं देवमहं मन्ये
मुत्त्कातं कृत्तिवाससं ॥ एवं स निश्चयं कृत्वा अंधको निर्गतो गृहात् ॥ ९ ॥ सगंगातटमाश्रित्य दानवस्तपसि स्थितः ॥ उग्रं
तपश्चचारासौ दारुणं लोमहर्षणं ॥ १० ॥ दिव्यं वर्षसहस्रं वै धूम्रपानपरो भवत् ॥ द्वितीयं वर्षसाहस्रं एकपादेन संस्थितः
॥ ११ ॥ तृतीयं वर्षसाहस्रं पंचाग्निपरिसेवकः ॥ चतुर्थे वर्षसाहस्रे योगाभ्यासेन संस्थितः ॥ १२ ॥ न केनापीदृशं तप्तं तपो
लोकभयंकरं ॥ अस्थिचर्मावशेषस्तु संजातो दानवेश्वरः ॥ १३ ॥ तस्य मूर्ध्निदततोः राजन् धूमवर्तिविनिःसृता ॥ देवलोकमती-
त्यासौ कैलासं प्राप्य संस्थिता ॥ १४ ॥ पार्वत्युवाच ॥ चतुर्वर्षसहस्राणि दिव्यान्येवं महेश्वर ॥ नकेनापीदृशं तप्तं तपो दृष्टं
शुभं मया ॥ १५ ॥ तस्यावज्ञां कथं देव कुरुषे त्रिदशेश्वर ॥ यावन्नो स्थापितो देवो दानवो भक्तवत्सल ॥ १६ महेश्वर उवाच ॥
साधु साधु महादेवी सर्वलोकाहितैषिणि ॥ अहमेवं नजानामि क्लिश्यंतं दानवेश्वरं ॥ १७ ॥ योगाभ्यासे स्थितं भद्रे ध्यायंतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमं पदं ॥ तत्रगच्छ मया सार्द्धं यत्रासौ तप्यते तपः ॥ १८ ॥ उमया सहितस्तत्र गतो देवो महेश्वरः ॥ अस्थिचर्याविशेषं तु दृ-
ष्ट्वा तं दानवोत्तमं ॥ १९ ॥ उवाच भगवान् रुद्रः प्रसंन्नेनांतरात्मना ॥ २० ॥ महेश्वर उवाच ॥ भोभो कष्टं कृतं वत्स दारु-
णं लोमहर्षणं ॥ यदिदृशं तपो घोरं कृतं पूर्वं न केनचित् ॥ २१ ॥ प्रीतस्तेह्यसुरश्रेष्ठ वरं वरय सुव्रत ॥ मनसोभी-
प्सितं यत्ते तत्प्रयच्छामि दानव ॥ २२ ॥ अंधक उवाच ॥ यदितुष्टोसि मे देव यदि देयो वरो मम ॥ सुरान्सवान्
विजितास्मि संग्रामे त्वत्प्रसादतः ॥ २३ ॥ ईश्वर उवाच ॥ पराजयो हि देवानां दूर्लभोदानवेश्वर ॥ असंभाव्यो व-
रो मह्यं मनसायं न रोचते ॥ २४ ॥ अन्यत्प्रार्थय माक्षिप्रं यत्ते मनसि वर्त्तते ॥ त्रैलोक्ये दुर्लभं यच्च तच्च दास्याम्यसंशयः
॥ २५ ॥ राज्यं प्रार्थय सर्वांगं भोगांश्चैव मनोरमान् ॥ स्वर्गैश्वर्यं परं तात भुंक्ष्व त्वं वृत्रहा यथा ॥ २६ ॥ श्रीमार्कंडेय उवाच ॥
देवस्य वचनं श्रुत्वा अंधको विस्मयान्वितः ॥ चिंतयामास निर्विण्णो वृथा क्लेशः कृतो मया ॥ २७ ॥ तत उत्थाय परमं पपात
धरणीतले ॥ मूलच्छिन्नो यथा वृक्षो निरुछ्वासस्तदा भवत् ॥ २८ ॥ मूर्छापन्नं हि तं दृष्ट्वा देवी देवमथाब्रवीत् ॥ यं यं प्रार्थयते
देव वरं सुरसुरोत्तम ॥ २९ ॥ तं तमस्मै प्रयच्छाद्य यद्यहं ते प्रिया प्रभो ॥ त्रैलोक्ये परमा देव वाच्यता ते भविष्यति ॥ ३० ॥
ईश्वरोवाच ॥ यदीदृशो वरो देवी दीयते दानवाय वै ॥ ब्रह्माणं च हरिं मां च आन्यानापि सुरेश्वरान् ॥ ३१ ॥ उच्चभावं गतो
देवी नकिंचिन्मानयिष्यति ॥ ३२ ॥ उमा उवाच ॥ उपायश्चिंत्यतां देव दानवार्थे विचक्षण ॥ वर्जयित्वारणे विष्णुमन्यान् देवा-
न् विजेष्यति ॥३३॥ ईश्वरोवाच ॥ उपायः शोभनो दृष्टो देवी मे मनसोगतः ॥ ददाम्यस्य वरं देवी छलेनानेन सुंदरी ॥३४॥
विसंज्ञं पतितं दृष्ट्वा भूमौ तं दानवेश्वरं ॥ अमृतेन पुनर्देवस्तस्य कायं व्यवर्द्धयत् ॥ ३५ ॥ ततस्तं प्राह देवेशो वरं वरय दानव
॥ विष्णुवर्जान् सुरान् सर्वान् विजेष्यसि महारणे ॥ ३६ ॥ अंधक उवाच ॥ भवत्वेवमिदं याचे बलमास्थाय केवलं ॥ विष्णु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेकं विजेष्यामि स्वबलेनापि धूर्जटे ॥ ३७ ॥ एवं कृतार्थमात्मानं मन्यमानो हि दानवः ॥ प्रदक्षिणीकृत्य देवं प्रणाममकरोत्ततः
॥ ३८ ॥ ईश्वरोपि वरं दत्वा दानवाय यथेप्सितं ॥ वृषप्रधानमारुह्य तत्रैवांतरधीयत ॥ ३९ ॥ इति श्रीवायूक्तशिवसंहितायां
श्रीरेवामाहात्म्ये दक्षिणे शूलभेदे अंधकवरप्रदानोनाम चतुर्युक्षष्टितमोध्यायः ॥ ६४ ॥ महेश्वर उवाच ॥ दानवेंद्रो वरं लब्ध्वा
स जगाम निजां पूरीं ॥ ददर्श स्वपुरीं तत्र चत्वराट्टशोभितां ॥१॥ हृष्टतुष्टजनाकीर्णां तुंगतोरणमंडितां ॥ विभक्तगोपुरद्वारां पता-
काध्वज मालिनीं ॥ २ ॥ विस्तारायामसंयुक्तां कृतकौतुकमंगलां ॥ देवतायतनैश्चित्रैः समंतादुपशोभितां ॥ ३ ॥ नानावृक्षस-
मोपेतां शस्तवल्लशतावृतां ॥ हंसकारंडवाकीर्णां चक्रवाकानुनादितां ॥ ४ ॥ उत्फुल्लपद्मसहितैस्तडागैरुपशोभितां ॥ वेदाध्ययननि-
र्घोषैः गीतवाद्यैर्निनादितां ॥ ५ ॥ तां तथा शोभितां दिव्यां स्वर्णप्राकारवेष्टितां ॥ प्रविवेश पुरीं रम्यां मुदितो दानवेश्वरः ॥ ६ ॥
ततो निजगृहं प्राप्य उपविष्टः कृतार्थवत् ॥ ददर्श सर्वदारांश्च पुत्रभृत्यान् सदारकान् ॥ ७ ॥ ततो जनपदं सर्वं परिभ्रमति
दानवः ॥ जना शोभां प्रकुर्वंति सदा नंदितमानसाः ॥ ८ ॥ तोरणानि विचित्राणि पताका वस्त्रवल्लरीः ॥ पुष्पमालाविचित्राश्च
पूर्णकूंभकराः पृथक् ॥ ९ पुरोजनाश्च दृश्यंते भाजनैर्मणिमंडितैः ॥ दानवं वर्द्धयंतिस्म वरदानाभिपूरितं ॥ १० ॥ मांगल्य गीत-
स्तवनैः शतशस्तत्रयोषितः ॥ मंत्रध्वनिभिरत्यंतंब्राह्मणानां समंततः ॥ ११ ॥ आशिर्भिःपूर्यमाणोसौ दानवेंद्रः प्रतापवान् ॥ व-
र्द्धापयांति ते सर्वे पुरैर्जानपदा जनाः ॥ १२ ॥ ततस्तुष्टमना राजन् दानवेंद्रो भवत्तदा ॥ अमात्यैः सहितस्तत्र चतुरंगबलान्वि-
तः ॥ १३ ॥ गजवाजिरथैश्चैव कोशैः कांचनमंडितैः ॥ सर्वतः परिपूर्णो सौदानवो बलदर्पितः ॥१४॥ न किंचिन्मन्यते शूरं न पुमां
सं वैरैधितः ॥ चिरकालं महादेववरदानेन मोहितः ॥ १५ ॥ तं च लब्ध्वा वरं ज्ञात्वा देवास्तद्भयशंकिताः ॥ एकीभूय ततः सर्वे
शक्रस्य शरणंगताः ॥ १६ ॥ शक्र उवाच ॥ कथमागमनं वोत्र सर्वेषां तु दिवौकसां ॥ कस्माच्च भयमुत्पन्नं किमेतत्कथ्यतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मम ॥ १७ ॥ देवाउचुः ॥ आस्ते सदोल्बणः पापः अंधको नामदानवः ॥ तद्भयात् शंकिताः देवा आगता शरणं तव ॥ १८ ॥
एतस्मिन्नंतरे सोपि दानवो बलदर्पितः ॥ ज्ञात्वा देवसमूहंतं शक्रसंस्थितं च निर्गतः ॥ १९ ॥ एकाकी रथमारुढो बहुशस्त्राभि-
संवृतः ॥ परिभ्रमंस्ततः सोपि मेरुपृष्ठमवाप्तवान् ॥ २० ॥ ददर्श तत्र नगरीं स्वर्णप्राकारतोरणां ॥ परिखादुर्गगहनां समंतादम-
रावतीं ॥ २१ ॥ प्रविवेशासुरस्तत्र लीलया स्वगृहं यथा ॥ इंद्रोपि दानवं दृष्ट्वा रथारूढं भयानकं ॥ २२ ॥ निजासनं ततः प्रा-
दाद्भयार्तः त्रिदिवेश्वरः ॥ उपविष्टोंधकस्तत्र, शक्रस्यैवासने शुभे ॥ २३ ॥ आसनं कल्पयामास सर्वतस्त्रिदशोवृतं ॥ २४ ॥ शक्र
उवाच ॥ किमत्रागमनं तुभ्यं किं कार्यं दानवेश्वर ॥ यदस्मदीयं सर्वस्वं तत्ते दास्यामि दानव ॥ २५ ॥ अंधक उवाच ॥ न-
मे कोशेन ते कार्यं नगजैर्न तुरंगमैः ॥ स्वकीयं दर्शयस्वाद्य स्वर्गशृंगारभूषितं ॥ २६ ॥ ऐरावतो महानागस्तथैवोच्चैश्रवा हयः ॥
उर्वश्यादीनि सर्वाणि रत्नान्यत्सरसामपि ॥२७॥ पारिजातकपुष्पाणि वृक्षजातीरनेकशः ॥ वादित्राणि च सर्वाणि वज्रंचापि तवा-
युधं ॥ २८ ॥ तस्य तद्वचनं श्रुत्वा भयभीतः सुरेश्वरः ॥ सुचिरं चिंतयित्वा च किंकार्यमिति तत्वतः ॥२९॥ दर्शयामास सर्वस्वं
प्रेक्षणीयादिकंततः ॥ उपविष्टाः सुराः सर्वे यक्षकिंन्नरपन्नगाः ॥ ३० ॥ सर्वाश्चाप्सरसस्तत्र तथा मंत्रिपुरोहिताः ॥ एकैकशो ह्यप्स-
रसो नृत्यंति सुसमाहिताः ॥ ३१ ॥ प्रारब्धे प्रेक्षणीये च नृत्यगीतमनोहरे ॥ ततोस्य पत्नीं संरब्धो गृहितुमुपचक्रमे ॥ ३२ ॥ ब-
लादेव महापापो दानवो बलदर्पितः ॥ ततः प्रववृते युद्धं तस्य तैस्त्रिदशैः सह ॥ ३३ ॥ तेन देवगणाः सर्वे ध्वस्ताः पार्थिवसत्त-
म ॥ संग्रामे विविधैः शस्त्रैर्जर्जरीकृतविग्रहाः ॥ ३४ ॥ संतापिताः सुराः सर्वे क्षयं नितास्त्वनेकशः ॥ सुराश्च मारुतस्तेन भग्ना सं-
ग्राममंडले ॥ ३५ ॥ यथा सिंहः करीन् सर्वान् विजित्य विचरेद्वनं ॥ तद्वदेकेन ते सर्वे जिता जाता पराङ्मुखाः॥३६॥ गृहीत्वा
शक्रभार्यां स निर्गतो दानवो बलात ॥ ३७ ॥ इतिश्रीरेवामहात्म्ये अंधकयुद्धे दक्षिणे शचीग्रहणंनाम पंचषष्टितमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यायः ॥ ६५ ॥ ईश्वरोवाच ॥ इंद्राद्याः देवताः सर्वे ब्रह्माणं शरणं गताः ॥ गजैश्च पर्वताकारैर्हयैश्चैव गजोपमैः ॥१॥ स्यंदनैर्मक-
राकारैः सिंहशार्दूलयोजितैः ॥ कच्छपैर्मकरैश्चान्ये मृगैर्मेषैस्तथा परे ॥ २ ॥ ब्रह्मलोकमनुप्राप्ता देवाइंद्रपुरोगमाः ॥ दृष्ट्वा पद्मोद्भवं
देवं साष्टांगं प्रणताः सुराः ॥ ३ ॥ देवाऊचुः ॥ जयाजेय जयाभेद्य जयसंभूतिकारक ॥ पद्मयोने नमस्तुभ्यं पाहि नः शरणाग-
तान् ॥ ४ ॥ सोद्वेगं भाषितं श्रुत्वा देवानां भावितात्मनां ॥ मेघगंभिरया वाचा देवान् प्राह विधिः स्वयं ॥ ५ ॥ किमत्रागमनं
देवाः सर्वेषां च विवर्णतां ॥ केनापमानिताः सर्वे शीघ्रं कथयतामराः ॥ ६ ॥ देवाऊचुः ॥ अंधकोहि महावीर्यो दानवो बलद-
र्पितः ॥ तेन देवगणाः सर्वे धनरत्नैर्विवर्जिताः ॥ ७ ॥ जित्वा देवगणान् सर्वान् असिचक्रगदायुधैः ॥ शक्रभार्यां गृहीत्वा स
निर्गतो दानवो बलात् ॥ ८ ॥ देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ॥ चिंतयामास देवेशो दानवस्य वधंप्रति
॥ ९ ॥ अवध्ये दानवः पापः सर्वेषां वो दिवौकसां ॥ मुक्त्का जनार्दनं देवं सर्वदानवनाशनं ॥ १० ॥ तत्रैव सर्वेगच्छामो यत्र
देवो जनार्दनः ॥ सत्राता सर्वदेवानां विश्वस्यापि न संशयः ॥ ११ ॥ एवमुक्त्का सुरैः सार्द्धं ब्रह्मा लोकपितामहः ॥ इंद्रादिदेव-
तैः सार्द्धं गतो यत्र जनार्दनः ॥ १२ ॥ अस्तुवन् विविधैः स्तोत्रैः सर्वे देवा जगत्पतिं ॥ जय त्वं देवदेवेश लक्ष्मीवक्षस्थलाश्रय ॥ १३ ॥
दानवेशविनाशार्थं त्वामेव शरणं गताः ॥ एवं हि स्तुयमानो सौ सर्वैर्देवैर्जनार्दनः ॥ संप्रहृष्टमना भूत्वा सुरसंघानुवाचह ॥१४॥
श्रीभगवानुवाच ॥ स्वागतं देव विप्राणां सुविभाता च शर्वरी ॥ किं कार्यं प्रोच्यतां शीघ्रं कस्य रुष्टंदिवौकसः ॥ १५ ॥ किं
दुःखं कोनु संतापः कुतोवा भयमागतं ॥ कथयंतु महाभागाः कारणं यन्मयोदितं ॥ १६ ॥ एवमुक्तास्तु देवेन कथयंतिस्म देवताः
॥ प्रदर्शयंतस्वान् देहान् लज्जमानाह्यधोमुखाः ॥ १७ ॥ हतराज्यास्म सर्वेपि ह्यंधकेन् निराकृताः ॥ परिरक्षस्व तस्मान्नः प्रसादं
कर्तुमर्हसि ॥ १८ ॥ एवमुक्तः सुरैः सर्वैर्देवदेवो जनार्दनः ॥ शंखचक्रगदाचापं संगृह्य परमेश्वरः ॥ १९ ॥ उत्थितो नागपर्यंका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवानामभयप्रदः ॥ २० ॥ श्रीभगवानुवाच ॥ पाताले यदि वा मर्त्ये नाके वा यदि तिष्ठति ॥ वधिष्यामि तु तं पापं येन
संतापिता सुराः ॥ २१ ॥ स्वस्थानं यांतु गीर्वाणाः संतोषाद्भावितौजसः ॥ विष्णोस्तु वचनं श्रुत्वा ब्रह्माद्या सुरसत्तमाः ॥२२॥
स्वंस्वं यानं समारूढाहृष्टतुष्टा दिवौकसः ॥ २३ ॥ इतिश्रीरेवामाहात्म्ये गीर्वाणाश्वासनोनाम षट्षष्टितमोध्यायः ॥६६॥ उत्तान-
पाद उवाच ॥ कस्मिंस्थाने वसंदेवाः अंधकोपि कथंगतः ॥ सर्वान् देवान् स निर्जित्य कस्मिन् स्थाने समाश्रितः ॥ १ ॥ ईश्वर
उवाच ॥ प्रविष्टो दानवो यत्र कथयामि नराधिप ॥ पाताललोकमाश्रित्य कन्याविध्वंसते तु सः ॥ २ ॥ तत्र स्थितं तं विज्ञाय
चापं संगृह्य केशवः ॥ मुमोच बाणमाग्नेयं कुपितो दानवं प्रति ॥ ३ ॥ वारुणास्त्रेण सद्यो वै आग्नेयं शामितं तदा ॥ तत्रासौ
चिंतयामास केनबाणो विसर्जितः ॥ ४ ॥ कस्यैषा पौरुषी शक्तिः कोद्य यास्यति संक्षयं ॥ ततोंधकः कोपयुक्तो बाणमार्गेण निः-
सृतः ॥ ५ ॥ सददर्श महात्मानं चापहस्तं जनार्दनं ॥ ६ ॥ अंधक उवाच ॥ न शर्म यास्यसे कृष्ण मया दृष्ट्वा निरीक्षितः ॥
न शक्नोति यथा गंतुं नागः सिंहनिरीक्षतः ॥ ७ ॥ अहमन्वेषय नूनंमायास्यं किंतते गृहं ॥ तावत्त्वंकालपाशेन समानितो म-
मांतिकं ॥ ८ ॥ यत्त्वया निर्जिता पूर्वं दानवाः सत्ववर्जिताः ॥ न भवंति पुमांसस्ते योषि त्सत्वामता मम ॥ ९ ॥ परं न शस्त्र-
संग्रामं करिष्यामि त्वयासह ॥ बाहुयुद्धे मयासार्द्धं कुरुयत्नं यथाबलं ॥ १० ॥ सएवमुक्त्का संरब्धः केशवं योद्धुमुद्यतः ॥ स
कृष्णेन यदाक्षिप्य पातितो धरणीतले ॥ ११ ॥ नयोत्स्यामि त्वयासार्द्धं इत्युक्त्का चांधकं ततः ॥ १२ ॥ ततोंधकः
समाश्वास्य चिंतयित्वा मुहुर्मुहुः ॥ साष्टांगप्रणतो भूत्वा स्तुतिं चक्रेहरेस्तदा ॥ १३ ॥ अंधक उवाच ॥ जयकृष्णाय
हरये जिष्णवे विष्णवे नमः ॥ हृषीकेशाय केशाय जगद्धात्रेच्युताय च ॥ १४ ॥ नमः पंकजनेत्राय नमः पंकज-
नाभये ॥ जनार्दनाय श्रीशाय श्रीपते पीतवाससे ॥ १५ ॥ गोविंदाय नमो नित्यं नमस्तेंबुधिशायिने ॥ नमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करालवक्राय नमः श्रीवत्सवक्षसे ॥ १६ ॥ शार्ङ्गिणे शतवक्राय शंखचक्रगदाभृते ॥ नमस्ते मत्स्यरूपाय कूर्मरूपाय ते नमः ॥ १७ ॥ नमस्ते कृष्णरूपाय कंसविध्वंसकारणे ॥ नमस्ते बुधरुपाय कल्किरुपाय ते नमः ॥ १८ ॥ हयमौले नमस्तुभ्यं हंसाय परमात्मने ॥ नमस्ते यज्ञरूपाय विश्वरूपाय ते नमः ॥ १९ ॥ व्याप्तसर्वदिगंताय केशवाय नमोनमः ॥ नमो वाराहरुपाय नृसिंहाय जनार्दने ॥ २० ॥ नमो वामनरूपाय क्रांतलोकत्रयाय च ॥ नमः परशुरामाय रामचंद्राय ते नमः ॥ २१ ॥ वासुदेव नमस्तुभ्यं नमः कैटभनाशिने ॥ नमोस्तु सृष्टिकर्त्रे हि नमस्ते सुरनायक ॥ २२ ॥ अस्य यज्ञवराहस्य विष्णोरमिततेजसः ॥ प्रमाणं येप्रकुर्वंति तेषामपि नमोनमः ॥ २३ ॥ तस्य तस्तुतिवाक्यं हि श्रुत्वा देवो जानर्दनः ॥ प्रसन्नः प्राह सहसा दानवेंद्रं सुरेश्वरः ॥ २४ ॥ श्रीभगवानुवाच ॥ संतुष्टो दानवेंद्राहं वरं वरय सुव्रत ॥ ददामि ते वरं ह्यद्य याच्यामानं हिदानव ॥ २५ ॥ अंधक उवाच ॥ यदि तुष्टोसि मे देव यदि देयो वरो मम ॥ ततो ददस्व मे देव युद्धं परमशोभनं ॥ २६ ॥ त्वदस्त्रपूतो येनाहं लोकान् गंतासि शोभनान् ॥ २७ ॥ श्रीभगवानुवाच ॥ कथं ददामि ते युद्धं तोषितोहं त्वया पुनः ॥ न त्वां प्रति भवेत्कोपः कथं युध्यामि चांधक ॥ २८ ॥ यदि ते वर्तते बुद्धिर्युद्धं प्रति न संशयः ॥ ततो गच्छस्व शीघ्रं त्वं देवं प्रति महेश्वरं ॥ २९ ॥ दानव उवाच ॥ न तत्र सिध्यते कार्यं देवंप्रति महेश्वरं ॥ पुत्रवन्मन्यते मांवै नमेयुद्धं प्रदास्यति ॥ ३० ॥ श्रीभगवानुवाच ॥ भद्रं तेकथयिष्यामि येनयुध्यतिशंकरः ॥ कैलासशिखरं गृह्य धूनयस्व मुहुर्मुहुः ॥ ३१ ॥ धूनितेसति देवेशो महत्कोपं करिष्यति ॥ कोपितः शंकरो रौद्रं युद्धं दास्यातिदानव ॥ ३२ ॥ ततोसौ विष्णुवाक्येन गतो यत्र महेश्वरः ॥ कैलासशिखराग्राणि धूयमानान्यनेकशः ॥ ३३ ॥ चत्वारः सागरास्तद्वदैक्यभावं हि भेजिरे ॥ तथा पतंति प्रासादाः पादपाश्च समंततः ॥ ३४ ॥ उमया सहितो देवो विस्मयं परमं गतः ॥ गाढमालिंग्य सा देवी शंकरं वाक्यमब्रवीत् ॥ ३५ ॥ किमर्थं कंपते शैलः किमर्थं कंपते धरा ॥ किमर्थं कंपते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाको मर्त्यः पातालमेवच ॥ ३६ ॥ किंवा युगक्षयो देव तन्ममाख्यातुमर्हसि ॥ ईश्वर उवाच ॥ कस्यैषा दुर्मतिर्जाता केनेदं दुः-
कृतं कृतं॥३७॥ ललाटाच्चाविता धर्मः सोद्य यास्यति संक्षयं ॥ कैलाससंस्थितो येन सुप्तोहं प्रतिबोधितः॥३८॥ तं वधिष्ये न संदेहो
यद्यपिस्यात्सुतोगुहः॥ एवमुक्त्वा सदेवेशश्चिंतयामास तत्वतः॥३९॥ तमंधकं परिज्ञाय कोपं चक्रे ततो विभुः ॥ उपायश्चिंतयामास
येनासौ वध्यते सुरः ॥ ४० ॥ ततस्तानाव्हयामास ब्रह्माद्यान् सुरसत्तमान् ॥ रथं देवमयं कृत्वा सर्वलक्षणसंयुतं ॥ ४१ ॥
आरूढस्तत्र देवेशो विश्वत्राता जगद्गुरुः ॥ ययौ स दानवो यत्र कोपाविष्टो महेश्वरः ॥ ४२ ॥ अब्रवीत्तिष्ठ तिष्ठेति कथं यास्यसि
दुर्मते ॥ दानवेंद्रोपि संगृह्य शरासनवरं ततः ॥ ४३ ॥ चकार युद्धमतुलं देवेनसह शंभुना ॥ देवमुक्तान् शरान् संख्ये चिच्छेद
स निजैःशरेः ॥ ४४ ॥ देवेन दानवेंद्रोथ छादितः शरसंचयैः ॥ नतत्र दृश्यते सूर्यो नाकाशं नैव चंद्रमाः ॥ ४५ ॥ अथाग्ने
येन बाणेन दानवो दहते शरान् ॥ दह्यमानास्ततो देवास्तेनाग्नेयेन कंपिताः ॥ ४६ ॥ रक्ष रक्ष महादेवेत्यूचुस्ते वै पुनःपुनः
॥ ततो देवाधिदेवेन वारुणास्त्रं विसर्जितं ॥ ४७ ॥ तेनैव वारुणास्त्रेण ह्याग्नेयं शमितं तदा ॥ दानवेन तदा मुक्तं वायव्यं वा-
रुणं प्रति ॥४८॥ वारुणं शोषितं तत्र वायव्येन रणाजिरे ॥ देवो विसर्जयामास सार्पं सक्रोधचेतसा ॥ ४९ ॥ तेनास्त्रेण तु
तत्सार्पं अदृष्टं समजायत ॥ ततो रुद्रेण शीघ्रं हि नारसिंहं विसर्जितं ॥ ५० ॥ नारसिंहेन बाणेन गारुडास्त्रं विनाशितं ॥
एवमस्त्रास्त्रसंबाधे तदा दानवदेवयोः ॥ ५१ ॥ महद्युद्धमभूत्तत्र सुरासुरभयंकरं ॥ चक्रनालीकनाराचैस्तोमरैः खड्गमुद्गरैः ॥ ५२ ॥
एवंनशक्यते हंतुं दानवं विविधायुधैः ॥ अस्त्रयुद्धं परित्यज्य बाहुयुद्धमुपागतौ ॥ ५३ ॥ करं करेण संगृह्य उभौ प्रहरणौ ततः ॥
दानवेनाथ देवेशो बंधेनाक्रम्य पीडितः ॥ ५४ ॥ निष्पंदं भावमापन्नस्ततो मूर्छामवापसः ॥ मूर्छागतं तु तं ज्ञात्वा चिंतयामास
दानवः ॥ ५५ ॥ मया कृतमिदं कष्टं दुःकृतं पापकर्मणा ॥ मूर्छागतमिमं कुत्र मोचयामि महेश्वरं ॥ ५६ ॥ गृहित्वा देव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुत्संगे गतः कैलासपर्वतं ॥ शय्यायामुपरिस्थाप्य अंधको निर्गतस्ततः ॥ ५७ ॥ यावत् शय्यास्थितः स्थाणुस्तत् क्षणाल्लब्धचेतसः ॥ तदासौ चिंतयामास स्वकीये भवने स्थितः ॥ ५८ ॥ पराभवः कृतो मह्यं दानवेन दुरात्मना ॥ पुनः क्रोधसमाविष्टो निर्गतो दानवं प्रति ॥ ५९ ॥ आयसीं लकुटीं गृह्य प्रभुर्भारसहस्त्रिकां ॥ दानवेंद्रं ततः प्राप्य ताडयामास मूर्द्धनी ॥ ६० ॥ सोपि खड्गेन देवेशं ताडयामास वेगतः ॥ अथदेवो पिसस्मार कौबेरास्त्रं महाहवे ॥ ६१ ॥ अस्त्रेण तेन हृदये ताडयामास दानवं ॥ ततः सताडितस्तेन रुधिरोद्गारमुद्वमन् ॥ ६२ ॥ पतितोधोमुखोभूत्वा ततःशूलेन भेदितः- शूलाग्रसंस्थितः ॥ पापश्चक्रवद्भ्रमते तदा ॥ ६३ ॥ ये ये भूम्यां पतंतिस्म तत्कायाद्रक्तबिंदवः ॥ तयेतेतुसमुत्तस्थुर्दानवाः शस्त्रपाणयः ॥ ६४ ॥ व्याकुलस्तु कृतो देवो दानवेन तरस्विना ॥ सस्मार शंकरो दुर्गां चामुंडां मुंडभूषणां ॥ ६५ ॥ स्मृतमात्रा गता तत्र महाभूतगणावृत्ता ॥ महादंष्ट्री महाकाया पिंगाक्षी लंबमूर्द्धजा ॥ ६६ ॥ उवाचदेवदेवेशं क्रुद्धाविष्टा ततोंबिका ॥ आदेशो दीयतांदेव कं नयामि यमक्षयं ॥ ६७ ॥ ईश्वर उवाच ॥ पिबस्व रुधिरं भद्रे दानवस्यास्य सर्वतः ॥ पतितं रुधिरं भूमौ दुर्गेगृह्णस्व यत्नतः ॥ ६८ ॥ यथैनं दारयाम्यद्य साहाय्याभव सुंदरि ॥ एवमुक्ता तु सा दुर्गा पपौ तद्रुधिरं ततः ॥ ६९ ॥ अंधकोपि च तां दृष्ट्वा वध्यमानांश्च दानवान् ॥ ततोवाग्भिः सुपुष्टाभिरस्तौद्देवं महेश्वरं ॥ ७० ॥ अंधक उवाच ॥ नमस्ते जगतां धात्रे शर्वाय त्रिगुणात्मने ॥ वृषभासनसंस्थाय शशांककृतभूषणे ॥ ७१ ॥ नमः खट्वांगहस्ताय नमः शूलधरायच ॥ नमोडमरुकोदंडकपालानलधारिणे ॥ ७२ ॥ स्मरदेहविनाशाय मूर्त्यष्टकमयाय ते ॥ नमः सुरूपदेहाय अरूपबहुरूपिणे ॥ ७३ ॥ उत्तमांगविनाशाय विरंचेः सृष्टिकारिणः ॥ स्मशानवाशिने नित्यं नमो भैरवरूपिणे ॥ ७४ ॥ सर्वगः सर्वकर्ता च त्वं हंता नान्यएव हि ॥ त्वं भूमिस्त्वं रजश्चैव त्वं ज्योतिस्त्वं तमस्तथा ॥ ७५ ॥ त्वं वायुः सर्वभूतानांजावभूतो महेश्वरः ॥ ७६ ॥ अस्तौद्देवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानवेंद्रो देवं शूलाग्रसंस्थितः ॥ बद्धांजलिपुटं प्रव्हं ततः प्राहमहेश्वरः ॥ ७७ ॥ शंकर उवाच ॥ साधु साधु महासत्व तुष्टोहं तवदानव ॥ वरं वरय सुप्रीतो यत्ते मनसि वांछितं ॥ ७८ ॥ अंधक उवाच ॥ यदि तुष्टोसि मे देव यदि देयो वरो मम ॥ तदात्मसदृशो देव कर्तव्योहं प्रसादतः ॥ ७९ ॥ भस्मी जटी त्रिशूली च त्रिनेत्री च चतुर्भुजः ॥ व्याघ्रचर्मोत्तरीयश्च नागयज्ञोपवीतकः ॥ ८० ॥ एवं भूतो भविष्यामि त्वत्प्रसादान्महेश्वर ॥ ८१ ॥ ईश्वरोवाच ॥ तवदत्तो वरोह्येष प्रसन्नेनांतरात्मना ॥ अन्यदेह स्थितः पुत्रभृंगिरीति भविष्यति ॥ ८२ ॥ इतिश्री रेवामहात्म्ये दक्षिणे सुलभेदेअंधकवधोनामसप्तषष्टितमोध्यायः ॥ ६७ ॥ श्रीमार्कंडेय उवाच ॥ दानवेंद्रं निगृह्याथ कृतो देवो महेश्वरः ॥ उमया सहितः श्रीमत्कैलासं पर्वतोत्तमं ॥१॥ आगताश्च ततस्तत्र ब्रह्माद्या सुरसत्तमाः ॥ हृष्टपुष्टाश्च ते सर्वेप्रणमंतिस्म शंकरं ॥ २ ॥ तत्रासीनानुवाचेदं ज्ञात्वा सर्वमहेश्वरः ॥ घातितो दानवः पापो गीर्वाणार्थेपितामह ॥३॥ तस्यरक्तेन मे शूलं समलं दृश्यतेधुना ॥ कर्तव्यमत्र किं देव उपायं मे विधेवद ॥ ४ ॥ सुव्रतात्मा कश्यपस्य सुतो वै निहतो मया ॥ निरर्थं घातितो यस्माद्युद्धमिच्छन् हि दानवः ॥ ५ ॥ कर्तुमिच्छाम्यहं सम्यक् तीर्थयात्रां चतुर्मुख ॥ ततोसौ निश्चयं कृत्वा निर्वेदाकुलचेतनः ॥ ६ ॥ देवतैः सहदेवेशः प्रभासंप्रति निर्ययौ ॥ प्रभासाद्यानि तीर्थानि गंगाद्या सरितस्तथा ॥ ७॥ अवगाह्यापि शूलस्य निर्मलत्वं न दृश्यते ॥ नीलारक्तं यथा सूत्रं निर्मलत्वं नगच्छति ॥ ८ ॥ तथा देवस्य तच्छूलं निर्मलत्वं नगच्छति ॥ नर्मदायां ततो गत्वा देवो देवैः समन्वितः ॥ ९ ॥ उत्तरं दक्षिणं कूलं गाहयामास ॥ यत्नतः ॥ गतस्तु दक्षिणे कूले पर्वते भृगुसंज्ञिते ॥ १० ॥ तत्रावलोकयामास देवो देवैः समन्वितः ॥ मनोहारि च तत्स्थानंसर्वेषां च दिवौकसां ॥ ११ ॥ ज्ञात्वा तीर्थविशेषंतु स्थितो देवो महेश्वरः ॥ गिरिं विव्याध शूलेन भिन्नं तेन रसातलं ॥ १२ ॥ निर्मलं चाभवच्छूलं न लेपो दृश्यते क्वचित् ॥ देवैराव्हानिता तत्र महापुण्या सरस्वती ॥ १३ ॥ पर्वतान्निःसृता भूप सर्वतीर्थमयी शुभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ द्वितीयः संगमस्तत्रयथा वेण्यां सितासिते ॥ १४ ॥ तत्र ब्रह्मा स्वयं देवो ब्रह्मेशं लिंगमुत्तमं ॥ सर्वपापहरं पुण्यं सर्वदुःखप्र णाशनं ॥ १५ ॥ स्थापयामास विप्रेंद्र दृष्ट्वा तीर्थं महाद्भुतं ॥ तस्य याम्यदिशाभागे स्वयं देवो जनार्दनः ॥ १६ ॥ स तिष्ठति सदा तत्र जगन्नाता महाभूजः ॥ तोयस्य नाभवन्मार्गाः कुंडमध्येन भारत ॥ १७ ॥ शुलेनैव कृता रेखा ततस्तेन ययौ जलं ॥ तत्तोयं च गतं तत्र यत्र रेवा महानदी ॥ १८ ॥ तत्र तद्वै समुत्पन्नं चक्रतीर्थं द्विजोत्तमः ॥ शूलभेदे तु विधिवत्स्नानं कृत्वा द्वि- जोत्तमः ॥ १९ ॥ आत्मानं मन्यते शुद्धं न किंचित्कलुषं कृतं ॥ तस्य चोत्तररेवायां देवदेवो जगद्गुरुः ॥ शूलभेदं प्रतिष्ठाप्य पूज्य चात्मानमात्मना ॥ २० ॥ सर्वतीर्थमयं तीर्थं सर्वदेवमयं पुरं ॥ सर्वपापहरं पुण्यं दुःखदुर्गतिनाशनं ॥ २१ ॥ तत्र तीर्थं प्रतिष्ठा- प्य देवदेवो महेश्वरः ॥ मुमोच रक्षपालानां शतमष्टोत्तरं तदा ॥ २२ ॥ शतंच क्षेत्रपालानां रक्षणार्थं प्रयत्नतः ॥ उत्पादयंति वि- घ्नानि यस्तत्र स्थातुमिछती ॥ २३ ॥ तानि विघ्नानि रक्षामि शृणु विप्रेंद्र तत्वतः केचित् कुटुंबचिंतासु गृहकृत्ये तु चापरे ॥२४॥ केचिदुत्सवसंगेषु केचित् द्रव्यार्जने रताः ॥ परदाररताश्चान्ये परद्रव्याणि चापरे ॥ २५ ॥ परापवादं कुर्वंति येन्ये हिंसारतास्त- था ॥ मुच्यंते पातकान्मर्त्यास्तेत्र स्नात्वा यथाविधिः ॥ २६ ॥ पापाचाराश्च ये मर्त्यास्तेषां स्नानं नजायते ॥ अन्येपि च वदेत्येवं कष्टं तीर्थेषु गम्यते ॥ २७ ॥ क्षुधया पीड्यते भार्या बालका भृत्यकिंकराः ॥ मम वित्तार्जनं नास्ति गृहेधान्यं न विद्यते ॥ २८ ॥ केचित् शंसंति रोगित्वं केचिदेकाकिनस्तथा ॥ हेतुवादांस्तथा केचिदस्वास्थ्यं पथि चापरे ॥ २९ ॥ एवं हि मोहजालेन योजयंति- स्म रक्षकाः ॥ तत्रैवं पापशीलानां गमनं नहि विद्यते ॥ ३० ॥ संरक्षते हि तत्तीर्थं देवभृत्यगणास्तथा धन्या पुण्याश्च ये मर्त्या- स्तेषां स्नानं प्रजायते ॥ ३१ ॥ सरस्वतिदेवनद्यां भोगवत्यां विशेषतः ॥ अयं हि संगमः पुण्यो यथावेण्यासितासिते ॥ ३२ ॥ दृष्ट्वा तीर्थं च ते सर्वे गीर्वाणा हृष्टचेतसः ॥ देवस्य सन्निधौ भूत्वा वर्णयंति परस्परं ॥ ३३ ॥ इदं तीर्थं वरं देव सर्वतीर्थेष्वनु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमं ॥ गुह्याद्गुह्यतरं तात न भूतं न भविष्यति ॥ ३४ ॥ ततो देवाः सगंधर्वा ब्रह्मशक्रपुरोगमाः ॥ देवेशं पूजयामासुः स्तोत्रैश्च
विविधैस्तदा ॥ ३५ ॥ संपूज्यमानो देवेशः सर्वदेवैर्नमस्कृतः ॥ स्थितस्तत्रैव भगवान् शूलभेदेति विश्रुतः ॥ ३६ ॥ देवेन भेदितं
यत्र शूलाग्रेण नृपोत्तम ॥ त्रिधा तेद्यापि दृश्यंते तोयावर्ताः सुपूजिताः ॥ ३७ ॥ कुंडाकृतिस्तु तीर्थंतदगाधं जलपुरितं ॥ सर्वपा-
पक्षयकरं सर्वदुःखविनाशनं ॥ ३८ ॥ तस्मिन्तीर्थे तु यः स्नात्वा उपवासपरायणः ॥ दीक्षामंत्रविहिनोपि मुच्यते सर्वपातकैः
॥ ३९ ॥ ये पुनर्विधिवत् स्नात्वा रौद्रमंत्रैस्तु पंचभिः ॥ वेदोक्तैः पंचभिर्मंत्रैस्तुवंतः स्वर्गमाप्नुयुः ॥ ४० ॥ ब्रह्मक्षत्रविशोवापि
शूद्राद्याश्च स्त्रियस्तथा ॥ तत्र देवं हृदि ध्यात्वा स्नानं कुर्वंति ये नराः ॥ ४१ ॥ दशाक्षरेण मंत्रण जपंति च समाहिताः ॥ ते
गच्छंति परं लोकं यत्र देवो महेश्वरः ॥ ४२ ॥ केदारे वै तथा पीतंरुद्रकुंडे तथैव च ॥ तत्र तीर्थे कृतं सर्वं सफलं जायते नृप
॥ ४३ ॥ तत्र स्नात्वा नरः सम्यक् विधियुक्तो जितेंद्रियः ॥ तिलमिश्रेण तोयेन तर्प्यंते पितृदेवताः ॥ ४४ ॥ कुलानि तारयेत्तत्र
दशपूर्वान् दशापरान् ॥ गयादिपंचस्थानेषु कृते श्राद्धे तु यत्फलं ॥ इह तत्फलमाप्नोति शूलभेदे न संशयः ॥४५॥ ददाति भक्त्या
यस्तत्र कांचनं गां महीतिलान् ॥ आसनोपानहौ शयां बलिवर्दांश्च मंदिरं ॥ ४६॥ वस्त्रोपानहधान्यानि रथं शकटमेव च ॥ दाना-
नीत्येवमाद्यानि योदद्याद्वेदपारगे ॥ ४७ ॥ श्रोत्रिये कुलसंपन्ने शुचौ शांते चितेंद्रिये ॥ श्रुताध्ययनसंपन्ने दंभहीने क्रियान्विते
॥ ४८ ॥ त्रयोदशदिनान्येव त्रयोदशगुणं भवेत् ॥ ४९ ॥ इतिश्रीरेवामहात्म्ये दक्षिणे शूलभेदोत्पत्तिर्नाम अष्टषष्टितमोऽध्यायः
॥ ६८ ॥ उत्तानपाद उवाच ॥ द्विजाश्च कीदृशाः पूज्या अपूज्याश्चैव कीदृशाः ॥ श्राद्धे वैवाहिके कार्ये दानेचैव विशेषतः
॥ १ ॥ एतदाख्याहि मे देव दानं कस्य प्रदीयते ॥ २ ॥ ईश्वर उवाच ॥ यथा काष्ठमयो हस्ति यथा चर्ममयो मृगः ॥ ब्राह्म-
णश्चानधीयानस्त्रयस्ते नामधारकाः ॥ ३ ॥ यथा षंढो फलस्त्रीषु यथागौर्गवि चाफला ॥ तथा ज्ञेयं फलं दानं एवं विप्रो नृपाफ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 लः ॥ ४ ॥ यथारण्ये बीजमुक्त्कावत्पानलभते फलं ॥ तथा राजन विनापात्रं दाता न लभते फलं ॥ ५ ॥ रोगी हीनातिरक्तांगः
काणः पौनर्भवस्तथा ॥ अवकीर्णी श्यामदंतः सर्वाशी वृषलीपतिः ॥ ६ ॥ मित्रध्रुक पिशुनश्चैव कुनखी सोमविक्रयी ॥ पितृमा-
तृगुरुत्यागी नित्यं ब्राह्मणनिंदकः ॥ ७ ॥ शुद्रान्नं मंत्रसंयुक्तं यो विप्रो जुहुयाद्धविः ॥ सोस्पृश्यः कर्मचांडालः स्पृष्ट्वा स्नानं समा-
चरेत् ॥ ८ ॥ माहिष्यः कुनखी स्तेयी वार्द्धुष्यः कुंडगोलकौ ॥ महादानरतो यश्च सर्वाशी चात्मघातकः ॥ ९ ॥ भृतकाध्यापकः
क्लीबः कन्याविक्रयकारकः ॥ एते विप्रा सदा त्याज्याः परिभाव्य प्रयत्नतः ॥ १० ॥ एषां दानं न दातव्यं दत्तं तेभ्यो वृथा भ-
वेत् ॥ ११ ॥ उत्तानपाद उवाच ॥ विधिश्च कीदृशस्तत्र तीर्थश्राद्धक्रिया च या ॥ कथं च दीयते दानं तन्ममाख्यातुमर्हसि
॥ १२ ॥ ईश्वर उवाच ॥ श्रुताध्ययनसंपन्ना ये विप्राःवृत्ततत्पराः ॥ तेभ्यो ये दीयते दानं सर्वमक्षयतां व्रजेत् ॥ १३ ॥ श्राद्धं
कृत्वा गृहे भक्त्या शुचिर्भूत्वा जितेंद्रियः ॥ गुरुं प्रदक्षिणीकृत्य सर्वभूतदयापरः ॥ १४ ॥ वाग्यतः प्रव्रजेत्तावद्यावत् सीमां न लं-
घयेत् ॥ शूलभेदं ततो गत्वा स्नानं कृत्वा यथाविधिः ॥ १५ ॥ पंचस्थानेषु वै श्राद्धं हव्यकव्यादिभिः क्रमात् ॥ पिंडदानं प्रकर्त-
व्यं पायसैर्मधुसर्पिषा ॥१६॥ पितरस्तस्य तुष्यंति यावदाभूतसंप्लवं ॥ अक्षतैर्वरदैर्बिल्वैरिंगुदैर्मधुसर्पिषा ॥ १७ ॥ पिंडदाने कृते त-
त्र सर्वतीर्थफलं लभेत् ॥ उपानहौ तु यो दद्याद्ब्राह्मणेभ्यः प्रयत्नतः ॥ सोपि स्वर्गमवाप्नोति अश्वारूढो न संशयः ॥१८॥ शय्यादानं तु यो
दद्यात् छत्रिकां च विशेषतः ॥ वरं विमानमारूढः स याति परमं पदं ॥ १९ ॥ शुभं च यो गृहं दद्यात् सवत्सां विधिनानरः ॥
नाकपृष्ठे वसेत्तावद्यावदाहुतसंप्लवं ॥ २० ॥ सर्वेषामेवदानानामक्षयं फलमाप्नुयात् गृहे वा यदिवारण्ये तीर्थे ग्रामे प्रतिश्रये ॥२१ ॥
तोयमन्नंच यो दद्यात् वृषयश्च समुत्सृजेत् ॥ तस्य वासो भवेत्तत्र यत्राहं नृपसत्तम ॥२२॥ उत्तानपादउवाच ॥ कन्यादानं कथं देव
कर्तव्यं धर्मबुद्धिभिः ॥ कीदृशश्च विधिस्तत्र कस्य दानं विधियते ॥ २३ ॥ कथं दानं महादानं दत्तं भवति चाक्षयं ॥ उत्तमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजसं तामसं यश्च नैश्वर्येसमथापि वा ॥ एतत्सर्वं महादेव कथ्यतां मे महेश्वर
मध्यमं यच्च कनीयं स्यात्कथं विभो ॥ २४ ॥ राजसं तामसं यश्च नैश्वर्येसमथापि वा ॥ एतत्सर्वं महादेव कथ्यतां मे महेश्वर
॥ २५ ॥ इश्वरो० ॥ सर्वेषामेव देवानां कन्यादानं विशिष्यते ॥ दातव्यं परया भक्त्या स्वभिगम्य प्रयत्नतः ॥ २६ ॥ कुलीनाय
रुरूपाय गुणज्ञाय विशेषतः ॥ सुलग्ने सुमुहुर्ते च दद्यात्कन्यामलंकृतां ॥ २७ ॥ तस्य वासो भवेत्तत्र यत्र देवः प्रजापतिः ॥ येन
स्वदुहिता दत्ता प्राणेभ्योपि गरीयसी ॥ २८ ॥ प्रदत्ता तेन पृथिवी सशैलवनकानना ॥ कन्यार्थं याचते यस्तु सधनो निर्धनोपिवा
॥ २९ ॥ अभोज्यः स भवेन्मर्त्यः सर्वधर्मबहिः कृतः ॥ ३० ॥ यज्ञकन्यार्थतोलब्धंसंचयेद्यस्तु तद्धनं ॥ स भवेत्कर्मचांडालः काष्ट-
कीटो भवन्मृतः ॥ ३१ ॥ गृहेपि तस्य योश्नीयात् जिह्वालंपटतां गतः ॥ चांद्रायणेन शुद्ध्येत तप्तकृच्छ्रेण वा ॥ ३२ ॥ उत्तानपाद
उवाच ॥ नास्ति यस्य धनं देव कन्याद्वारि विवर्द्धते ॥ कथमुद्वाहयेत्कन्यां याञ्चां न कुरुते यदि ॥ ३३॥ इश्वरोवाच ॥ स्ववित्तेनै-
व कर्तव्यो कन्योद्वाहो नृपोत्तम ॥ कन्यानाम परित्यज्य न दोषो यावतो भवेत् ॥ ३४ ॥ अभिगम्योत्तमं दानं आहूते तच्च मध्यमं
॥ याच्यमानंद कनीयंस्यावेहि देहितिचाधमं ॥ ३५ ॥ यथाश्मास्मनिबद्धश्च क्षिप्यते वारिमध्यतः॥ द्वावेतौ निम्नतां याति तथा तौ
दातृयाचकौ ॥ ३६ ॥ दानं नामासमर्थे तु नदेयं वै कथंचन ॥ स्वैदातारमात्मानं अधस्तान्नयते नृप ॥ ३७ ॥ समर्थस्तरयेत् द्वौ-
च शुष्कं काष्टं यथाजले ॥ यथा नौ तारयेत्सर्वं प्रापयेत परं तटं ॥ ३८ ॥ विद्यावृतयुतस्तद्ददातारं तारयेन्नृप ॥ आहिताग्निर्हि यो
भूत्वा कुर्यच्छूद्रप्रतिग्रहं ॥ ३९ ॥ इहजन्मनि शूद्रोसौ मृतश्वा चैव जायते ॥ अग्निहोत्रस्य सुश्रूषा वृथा तस्य प्रजायते ॥ ४० ॥
य सत्प्रतिग्रहं कुर्यात् कुलनीचस्य कर्हिचित् ॥ इहजन्मनि चांडालो मृतः श्वा जंबुकः खरः ॥ ४१ ॥ लज्जादा-
क्षिण्ययोगेन यद्दानं क्रियते नृप ॥ स्वभृत्येषु च तत्सर्वं वृथा भवति निश्चितं ॥ ४२ ॥ इति श्री वायुपुराणोक्तशिवसं-
हितायां श्री नर्मदा माहात्म्ये दक्षिणे शूलभेदोत्पत्तौ पात्रपरिक्षानाम एकोनसप्ततितमो ध्यायः ॥ ६९ ॥ उत्तानपाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उवाच ॥ श्राद्धकालाश्च के देव पुराणेषु प्रकिर्तिताः ॥ कस्यां तिथौ हि यात्राहि कर्तव्येति ममादिश ॥ १ ॥ ईश्व-
र उवाच ॥ पितृतीर्थे महापुण्यं सर्वकामिकमुत्तमं ॥ इदं तीर्थं तथा पुण्यं स्नानदानादिकर्मसु ॥ २ ॥ विशेषणतु कुर्वीत श्रा-
द्धं चतुर्युगादिषु ॥ मन्वंतरादयो भूप श्रूयंतां च चतुर्दश ॥ ३ ॥ अश्वयुक् शुक्लनवमी द्वादशी कार्तिकस्य च ॥ तृतीया चैत्रमास-
स्य तथा भाद्रपदस्य च ॥ ४ ॥ आषाढस्यैव दशमी माघमासस्य सप्तमी ॥ श्रावणस्याष्टमी कृष्णा तथा पाठस्य पूर्णिमा ॥ ५ ॥
फाल्गुणस्य आमावास्या पौषे ह्येकादशी तथा ॥ कार्तिकी फाल्गुनी चैत्री ज्येष्टी पंचदशी तथा ॥ ६ ॥ मन्वतरादयश्चैता अनंत-
फलदाः स्मृताः ॥ उत्तरायनमाद्यं चदक्षिणायनमेवच ॥ ७ ॥ कार्तिकीच तथा माघी वैशाखस्यतृतीयका ॥ पूर्णमासी च
चैत्रस्य जेष्ठस्य च विशेषतः ॥ ८ ॥ संक्रांत्योह्यष्टकाश्चैव व्यतीपातादयस्तथा ॥ श्राद्धकालाश्च जायंते पुराणेषु प्रकीर्तिताः ॥ ९ ॥
चैत्रे मासे सिते पक्षे एकादश्यामुपोषिकः ॥ क्षपाजागरणं कृत्वा तत्रविष्णोः समीपतः ॥ १० ॥ पूजां करोति यो भक्त्या पठ-
न्पौराणिकां स्तुतिं ॥ सधूपदीपनैवेद्यैः स्रग्मालाभिश्च चंदनैः ॥ ११ ॥ ऋग्यजुः सामवेदानां सूक्तं योजपते द्विजः ॥ प्रभाते कुरु-
ते श्राद्धं द्विजान् संपूज्य शक्तितः ॥ १२ ॥ ददाति दानमव्यग्रो यथाशक्तिर्नृपोत्तम ॥ पितरस्तस्य ॥ तृप्यंति यावदाहूतसंप्लवं
॥ १३ ॥ वसति श्राद्धदस्तत्र यत्र देवो जनार्दनः ॥ १४ ॥ त्रयोदश्यां ततो गत्वा गुहामध्यगतं नृप ॥ मार्कंडेश्वरमीशानं दृष्ट्वा
पापात्प्रमुच्यते ॥ १५ ॥ उत्तानपाद उवाच ॥ गुहामध्ये कथं देव लिंगं परमशोभनं ॥ कथं प्रतिष्ठितं केन तन्ममाख्यातुमर्हसि
॥ १६ ॥ ईश्वर उवाच ॥ त्रिषु लोकेषु विख्यातो मार्कंडेयो महातपाः ॥ तत्रवर्षसहस्रं तु तपस्तेन कृतं नृप ॥ १७ ॥ गुहा-
मध्ये प्रविष्टोसौ योगाभ्यासेन संस्थितः ॥ लिंगं प्रतिष्ठितं तेन मार्कंडेश्वरसंज्ञितं ॥ १८ ॥ तत्र स्नात्वा च यो भक्त्या उपवास
परायणः ॥ रात्रौ जागरणं कृत्वा दत्वा दीपं च यत्नतः ॥ १९ ॥ देवस्य स्नापनं कार्यं पंचामृतसमान्वितं ॥ चंदनेन समालिप्य

CC-0. In Public Domain. Digitization by eGangotri

पूजां कृत्वा यथाविधिः ॥ २० ॥ वेदोक्तैश्च तथा मंत्रैः जाप्यं कृत्वा प्रयत्नतः ॥ नैवेद्यादिप्रणामं च कुर्याद्भूप स्वशक्तितः ॥२१॥
एवं कृत्वा नृपश्रेष्ठ जन्मनः फलमाप्नुयात् ॥ चतुर्दश्यां ततः स्नात्वा श्राद्धं कृत्वा विधानतः ॥२२॥ पात्रे दानं प्रकर्तव्यं आत्मनः श्रेयइच्छ
ता॥पितरस्तस्य तृप्यंति द्वादशाब्दानि सत्तम॥२३॥दाता वै याति तत्रैव यत्र भोगाह्यनेकशः॥गुहामध्ये प्रविष्टन लुंयो ठते च स्वशक्तितः
॥२४॥ नीले गिरौ हि यत् पुण्यं तत्समस्तं हि लभ्यते ॥ सोपि स्वर्गमवाप्नोति नानाभोगांश्च पुष्कलान् ॥२५॥ रुद्रकुंडे च यः कुर्यात
श्राद्धं पर्वणि पर्वणि ॥ विशेषाच्चैत्रमासांते तस्य पुण्यफलं शृणु ॥ २६ ॥ केदारे च प्रयागे च कुरुक्षेत्रेमरेश्वरे प्रभासे चैव गोम-
त्यां गंगासागरसंगमे ॥ २७ ॥ पुष्करे पुष्करावर्ते रुद्रावर्ते विशेषतः ॥ गंगादिसर्वतीर्थेषु यत्पुण्यं लभतेनरः ॥ २८ ॥ अत्रतीर्थे
च तत् सर्वं लभते नात्र संशयः ॥ विधिमंत्रसमायुक्तः संतर्प्य पितृदेवताः ॥ २९ ॥ कुलजांस्तारयेत्तत्र दशपूर्वान् दशापरान् ॥ द-
क्षिणामूर्तिमासाद्य शुचिर्भूत्वा जितेंद्रियः ॥ ३० ॥ न्यासं कृत्वा तु पूर्वोक्तां प्रदद्यादष्टपुष्पिकां ॥ वारिजं सौम्यमाग्नेयं वायव्यं
पार्थिवं तथा ॥ ३१ ॥ वानस्पत्यं भवेत्षष्ठं प्राजापत्यं च सप्तमं ॥ अष्टमं शिवपुष्पंच शृणुतेषां च निर्णयं ॥ ३२ ॥ वारिजं स-
लिलं ज्ञेयं सौम्यं मधुघृतं पयः ॥ आग्नेयं धूपदीपाद्यं वायव्यं चंदनादिकं ॥ ३३ ॥ पार्थिवं कुशमुलाद्यं वानस्पत्यं फलादिकं ॥ प्रा-
जापत्यं पठन्नाद्यं शिवपुष्पं तु वासना ॥ ३४ ॥ अहिंसा प्रथमं पुष्पं पुष्पमिंद्रियनिग्रहः ॥ तृतीयं चदयापुष्पं क्षमापुष्पं चतुर्थकं
॥ ३५ ॥ ध्यानपुष्पं तपःपुष्पं ज्ञानपुष्पं च सप्तमं ॥ सत्यं चैवाष्टमं पुष्पं एभिस्तुष्यंति देवताः ॥ ३६ ॥ अत्र तीर्थे महाराज पू-
जयेद्यस्तपस्विनं ॥ तेन पूजितमात्रेण पूजिताः पुरुषास्त्रयः ॥ ३७ ॥ वसति स्वर्गलोके स यावदाहूतसंप्लवं ॥ शूलपाणिस्तु यो
भक्त्या कारयेत् स्नपनंनरः ॥ ३८ ॥ पंचामृतेन दिव्येन कुंकुमेन समन्वितं ॥ समालभत देवेशं कर्पूरागरुचंदनैः ॥ ३९ ॥ नाना-
विधैश्च कुसुमैर्माल्यैः पूजां करोतियः ॥ क्षपाजागरणं कृत्वा दीपं दत्वा प्रयत्नतः ॥ ४० ॥ नैवेद्यं विविधं दद्यात् पठेत् पौरा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिकिं कर्था ॥ पुरुषसूक्तं श्रीसूक्तं एवमादिसमाहितः ॥ ४१ ॥ तत्रस्थाने स्थितो जाप्यं यःकरोति द्विजोत्तमः ॥ शिवसंकल्पजं
जप्त्वा मुच्यते सर्वपातकैः ॥ ४२ ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ पादशौचं द्विजाभ्यंगं यः प्रयच्छति सत्तम ॥४३॥
गोदानेनैव यत् पुण्यं तल्लभेन्नात्र संशयः ॥ ब्राह्मणान् भोजयेत्तत्र पायसैर्मधुसर्पिषा ॥ ४४ ॥ सहस्रविप्रभोज्यस्य फलं स लभ-
ते नरःसुवर्णं रजतं वस्त्रं धान्यमन्नं कुशोदकं ॥ ४५ ॥ तत्र यद्दीयते दानं सर्वमक्षयतां व्रजेत् ॥ चंद्रसूर्यग्रहे जाते स्नानं कुर्वंति
ये नराः ॥ ४६ ॥ शूलभेदे महापूजां जपं होमं विशेषतः ॥ दद्याद्दानं यथाशक्तिर्ब्राह्मणे वेदपारगे ॥ ४७ ॥ गजमश्वरथाद्यंच तु-
लापुरुषमेव च ॥ शंकरं वृषसंयुक्तं सप्तधान्यप्रपूरितं ॥ ४८ ॥ सुयुक्तं लांगुलं दद्यात् युवानौच धुरंधरौ ॥ गोभूतिलहिरण्यादि पात्रे
देयं विजानता ॥ ४९ ॥ अपात्रे विदुषा किंचिन्नदेयं श्रेयइच्छता ॥ अन्यच्च शृणु राजेंद्र महादानमनुत्तमं ॥ ५० ॥ दत्तोभयमुखीं
मर्त्यो लभतेत्र कृतार्थतां यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्रदृश्यते ॥ तावत्सा पृथिवी ज्ञेया यावद्गर्भं न मुंचति ॥ ५१ ॥ य-
स्तु तां परया भक्त्या ब्राह्मणाय प्रयच्छति ॥ प्रदत्ता पृथिवी तेन सशैलवनकानना ॥ ५२ ॥ तारयेत्सा प्रदत्ता हि सार्द्धं कुलशतं
नृप ॥ सुवर्णशृंगीं रूप्यखुरां कांस्यदोहां सवत्सकां ॥ ५३ ॥ घंटाभरणसंयुक्तां ताम्रपृष्ठीं पयस्विनीं ॥ ये प्रयच्छंति धर्मिष्ठा अ-
स्मिंस्तीर्थे नराधिप ॥ ५४ ॥ विशेषात्पर्वसंपत्तौ चंद्रसूर्यग्रहादिषु ॥ तेषां स्युरक्षया लोकाः दानं चैवाक्षयं भवेत् ॥ ५५ ॥ सर्व-
स्यापि हि दानस्य संख्या वै प्रोच्यते बुधैः ॥ चंद्रसूर्योपरागे च दानसंख्या न विद्यते ॥ ५६ ॥ यत्र गौस्तत्र तत्तीर्थं तत्र तीर्था-
नि सर्वशः ॥ जातिस्मरत्वं लभते तत्र तस्याः प्रदानतः ॥ ५७ ॥ पुनः स्मृत्वा तु तत्तीर्थं तद्यात्रां रोचते नृप ॥ तत्रासौ मृत्यु-
मासाद्य रुद्रस्यानुचरो भवेत् ॥५८॥ इति श्रीरेवामाहात्म्येदक्षिणे शूलभेदे दानधर्मकथनंनाम सप्ततितमोऽध्यायः ॥७०॥ ईश्वरोवा-
च ॥ अन्यदाख्यानकं वत्स पुरावृत्तं निरामय ॥ सकुटुंबो गतः स्वर्गं ऋषिर्दीर्घतपा यथा ॥ १ ॥ उत्तानपाद उवाच ॥ कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्गं गतो विप्रः सकुटुंबो महामुनिः ॥ कौतुकं मे परं देव कथयस्व प्रसादतः ॥ २ ॥ ईश्वर उवाच ॥ काशीराजेति विख्या-
तो चित्रसेनो महाबलः ॥ धर्मवान् शीलसंपन्नो गुणरत्नमहोदधिः ॥ ३ ॥ नगरीतस्य संपूर्णा नानारत्नोपशोभिता ॥ वाराण-
शीति विख्याता गंगातीरसमाश्रया ॥ ४ ॥ कोटिचंद्रप्रतीकाशा विद्वज्जनविभूषिता ॥ बहुद्विजसमाकीर्णा वेदध्वनिनिनादिता
॥ ५ ॥ चारुचत्वरसंपन्ना पताकाध्वजमालिनी ॥ नानाद्रुमलताकीर्णा कदलीखंडमंडिता ॥ ६ ॥ विस्तीर्णोद्यानसंपूर्णा गोपुराट्टा-
लकावृता ॥ यज्ञाग्निधूमनिचयैः पवित्रीकृतदिग्मुखा ॥ ७ ॥ तस्याश्चोत्तरदिग्भागे आसीत्परमशोभनं ॥ तन्मंदारवनं
नाम त्रिषु लोकेषु विश्रुतं ॥ ८ ॥ नानाद्रुमलताकीर्णं नानापुष्पोपशोभितं ॥ बहुमंदारसंयुक्तं तेन मंदारकं स्मृतं
॥ ९ ॥ विप्रो दीर्घतपा नाम सर्वदा तत्र तिष्ठति ॥ तपः कुर्वं दीर्घकालं तेनदीर्घतपाः स्मृतः ॥ १० ॥ वे-
दाध्ययनसंपन्नो ब्रह्मचारी गुणान्वितः ॥ योगाभ्यासरतो नित्यं कंदमूलफलाशनः ॥ ११ ॥ तिष्ठते मृगरूपेण मृगमध्ये वसन्सदा
॥ ततो दिनांते संप्राप्ते पित्रोः पादाग्रसंस्थितः ॥ १२ ॥ अभिवादयते नित्यं भक्तिमान् ऋषिपुत्रकः ॥ प्रातः पुनः प्रयात्येवं का-
नने गिरिगव्हरे ॥ १३ ॥ क्रीडन्वनमृगैः सार्द्धं स रेमे हर्षसंयुतः ॥ एवं पर्यरतस्तस्य मृगमध्ये महात्मनः ॥ १४ ॥ मृगरूपेण
राजेंद्र कालोयाति महाशुभः ॥ अथ काश्यां महाराज महाबलपराक्रमः ॥ १५ ॥ चित्रसेनइति ख्यातः कुरुते राज्यमुत्तमं ॥ वेद-
धर्मरतो नित्यं प्रजापालनतत्परः ॥ १६ ॥ सर्वै राज्यगुणैर्युक्तो धर्ममूर्तिरिव स्वयं ॥ क्षत्रधर्माश्रितः सोपि संग्रामेष्वपराजितः
॥ १७ ॥ गजवाजिसहस्रैस्तु कोशेन महतान्वितः ॥ श्रुताध्यनसंपन्नैः पंडितैः सहसंगतः ॥ १८ ॥ भ्राजते सर्वलोकेषु कैलासे
शंकरोयथा ॥ एवं स कुरुते राज्यं सदा निहतकंटकं ॥ १९ ॥ अथान्यदिवसे राजन् मृगयां निर्गतो नृपः ॥ अश्वारूढो धनुर्धारी
चतुरंगबलान्वितः ॥ २० ॥ निर्ययुस्तेन सहिताः राजानो मंडलाधिपाः ॥ छत्रैश्छत्राणि घृष्यंते गच्छतः काननं प्रति ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रजस्तत्रोत्थितं भूमौ गजवाजिपदाहतं ॥ तेन संछादितं सर्वं भूमंडलमशेषतः ॥ २२ ॥ न तत्र दृश्यते सूर्यो नाकाशं न दि-
शस्तथा ॥ पादपाश्च न दृश्यंते रिक्तसानूनि सर्वतः ॥ २३ ॥ ततस्ते ददृशुस्तत्र मृगयूथमवस्थितं ॥ धावंतिस्म ततः सर्वे
राजानो राजपुत्रकाः ॥ २४ ॥ वृंदस्फोटोह्यभूत्तेषां शीघ्रं जग्मुर्दिशो दश ॥ पथैकेनगतो राजा चित्रसेनो नराधिपः ॥ २५ ॥
मृगयूथं समासाद्य एकाकी पृष्ठतो गतः ॥ प्रविष्टः स ततो दुर्गं काननं पक्षिवर्जितं ॥ २६ ॥ वल्लीगुल्मलताकीर्णं सर्वतः सुभयं-
करं ॥ अथ नष्टा मृगास्तत्र दिशो राजा व्यलोकयन् ॥ २७ ॥ दृष्ट्वैकाकिनमात्मानं बलभृत्यविवर्जितं ॥ कां दिशं नु गमिष्यामि
क्वसैन्ये तु समागमः ॥ २८ ॥ कां गतिं क्वनु यास्यामि इति चिंतान्वितो नृपः ॥ एवं कष्टगतो राजा चित्रसेनो महीपतिः ॥२९॥
वृक्षछायां समाश्रित्य विश्राममकरोत्तदा ॥ क्षुतृषार्तो भ्रमन् दुर्गे कानने गिरिगव्हरे ॥ ३० ॥ ददर्शाथ सरोदिव्यं पद्मिनीखंडमं-
डितं ॥ हंसकारंडवाकीर्णं चक्रवाकोपशोभितं ॥ ३१ ॥ सरो दृष्ट्वा स राजेंद्रः समानंदितमानसः ॥ तर्पइत्वा पितॄन् देवान् मनु-
ष्यांश्च यथाविधिः ॥ ३२ ॥ आच्छिद्य शतपत्राणि पूजयामास शंकरं ॥ ततः पपौ स पानीयं यथावत्समभिप्सितं ॥ ३३ ॥
उत्तीर्य च जलात्तीरे दृष्ट्वा वृक्षं समीपतः ॥ उत्तरीयमधः कृत्वा उपविष्टो महीपतिः ॥ ३४ ॥ चिंतयामास धर्मज्ञः किं कार्यमि-
ति तत्वतः ॥ अथापश्यन्मृगांस्तत्र छायामाश्रित्य संस्थितान् ॥ ३५ ॥ केचित्पूर्वमुखास्तत्र अपरे दक्षिणामुखाः वारुण्यभिमुखाः
केचित्केचित्कौबेरादिङ्मुखाः ॥ ३६ ॥ केचिन्निद्रां प्रकुर्वंति स्तब्धकर्णास्थिताः परे ॥ तेषां मध्ये स्थितो योगी ऋष्यःशृंगो महातपाः
॥ ३७ ॥ विचचार वनोद्देशे क्रीडंस्तैः सहसर्वतः ॥ मृगान् दृष्ट्वा ततोराजा आहारार्थमचिंतयन् ॥ ३८ ॥ व्यापद्य मृगमेकं तु
भक्षयामि यदृच्छया ॥ स्वस्थावस्थोभविष्यामि मृगमांसस्य भक्षणात् ॥ ३९ ॥ ततः काशिं गमिष्यामि मार्गमन्वीक्षयानतः ॥
विचिंत्येवं ततो राजा वृक्षमूलं समाश्रितः ॥ ४० ॥ चापं गृह्य करे तद्वच्छरं संधाय चाशुगं ॥ विचिक्षेप शरं राजा तत्र ये सं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिता मृगाः ॥ ४१ ॥ तेषां मध्ये स वै विद्धो ऋष्य:श्रृंगो महातपा:॥ प्रजग्मुरन्ये वित्रस्ताः शब्दं श्रुत्वा वनौकसः ॥ ४२ ॥ स ऋषिः पतितस्तत्र कृष्णकृष्णेति चाब्रवीत् ॥ हाहाकष्टं कृतं तेन येनाहं घातितोधुना ॥ ४३ ॥ कस्यैषा दुर्मतिर्जाता पापबुद्धेर्दुरात्मनः ॥ तां वाचं मानुषीं श्रुत्वा स राजा विस्मयान्वितः ॥ ४४ ॥ शीघ्रं गतस्ततो पश्यन् ब्राह्मणं ब्रह्मचारिणं ॥ मया कृतं दुःकृतं च येनासौ घातितो द्विजः ॥ ४५ ॥ चित्रसेन उवाच ॥ अकामात्घातितस्त्वं हि मृगभ्रांत्या मयानघ किमिदानीं करिष्यामि कथं शुद्धिर्भविष्यति ॥ ४६ ॥ गृहीत्वा बहुकाष्ठानि स्वां तनुं दाहयाम्यहं ॥ अन्यथा ब्रह्महत्यायाः शुद्धिर्मे न भविष्यति ॥ ४७ ॥ दृष्ठा क्षंतु यत्किंचित्तनश्ये ब्रह्महत्ययाः ॥ ४७ ॥ ऋष्यशृंग उवाच ॥ दृष्ट्वा क्षंतु यत्किंचित्तन्नश्येत् ब्रह्महत्यया ॥ न ते शुद्धिर्भवेत्काचिन्मयि पंचत्वमागते ॥ ४८ ॥ जननी मेपिता वृद्धो भ्रातरश्च तपस्विनः भ्रातृजाया मरिष्यंति कथं शुद्धिर्भवेत्तव ॥ ४९ ॥ उपायं कथयिष्यामि यदि त्वं कुरुषे नृप ॥ ५० ॥ राजा उवाच ॥ उपायः कथ्यतां तात कारुण्येन ममानघ ॥ तं करिष्यामि सकलं कारुण्येन ममादिश ॥५१॥ ऋष्यशृंग उवाच ॥ कस्त्वं कथमिहायातः कस्य पुत्रः क्व संस्थितः ॥ ब्रह्मक्षत्रविशांमध्ये शूद्रोवाप्यंत्यजो भवान् ॥ ५२ ॥ चित्रसेन उवाच ॥ नाहं शूद्रो न वैश्यो वा न च ब्राह्मणसत्तमः ॥ नांत्यजोपि ऋषिश्रेष्ठ क्षत्रियोहं महामुने ॥ ५३ ॥ धर्मज्ञश्च कृतज्ञश्च सर्वसत्वहिते रतः ॥ अकामात्पातकं जातं कथं शुद्धिर्भविष्यति ॥ ५४ ॥ ऋष्यशृंग उवाच ॥ मां गृहीत्वाश्रमंगच्छ यत्र तौपितरौ मम ॥ आवेदयस्व चात्मानं पुत्रघातिनमातुरं ॥ ५५ ॥ तौ दृष्ट्वा मां मरिष्येते कारुण्यं चतवोपरि ॥ उपायं कथयिष्ये ते येन शुद्धिर्भविष्यति ॥ ५६ ॥ तस्य तद्वचनं श्रुत्वा चित्रसेनो नृपोत्तमः ॥ स्कंधे कृत्वा तु तं विप्रं जगामाश्रमसन्निधौ ॥ ५७ ॥ अशक्तोपि च तं वोढुं विश्रम्य च पुनःपुनः ॥ तावत्पश्यति तं विप्रं मुर्छितं विकलेंद्रियं ॥ ५८ ॥ मुमोच चित्रसेनो पि वृक्षछायां समाश्रयन् ॥ वस्त्रं चतुर्गुणं कृत्वा वातं कृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा मुहुर्मुहुः ॥ ५९ ॥ पश्यतस्तस्य राजेंद्रऋष्यशृंगो महातपाः ॥ पंचत्वमगमत्तत्र ध्यानयोगेन योगवित् ॥ ६० ॥ दाहयामास तं विप्रं विधिदृष्टेन कर्मणा ॥ स्नानं कृत्वा तु शोकार्तो रुरोद च मुमोह च ॥ ६१ ॥ इति श्रीरेवामहात्म्ये शूलभेदमाहात्म्ये दक्षिणे ऋष्यशृंगस्वर्गगमनंनाम एकसप्ततितमोऽध्यायः ॥ ७१ ॥ ईश्वर उवाच ॥ ततश्चानंतरं राजा उद्वेगं परमं गतः ॥ कथं किंवा करिष्यामि एवं चिंतापरोभवत् ॥ १ ॥ ब्रह्महत्यासमाविष्टो जुहोम्यग्नौ कलेवरं ॥ अथवा ऋषिवाक्येन तंगच्छाम्याश्रमं प्रति ॥ २ ॥ कथयामि यथावृत्तं महर्षेस्तस्य धीमतः ॥ एवं विचिंत्य वै राजासजगामाश्रमं प्रति ॥ ३ ॥ गृहीत्वा ऋषिशृंगस्य सर्वास्थीनि त्वरान्वितः ॥ दृष्टिमार्गस्थितस्तस्य महर्षेर्भावितात्मनः ॥ ४ ॥ मुक्त्वास्थीनि ततस्तस्य प्रणाममकरोत्ततः ॥ ५ ॥ दीर्घतपा उवाच ॥ आगच्छ स्वागतं तेद्य स्वासने उपविश्यतां ॥ अर्घं ददाम्यहं येन मधुपर्कसमन्वितं ॥ ६ ॥ चित्रसेन उवाच ॥ संभाषणे न योग्योहं किमुतार्घस्य सत्तम ॥ मृगमध्ये स्थितो विप्र तव पुत्रो मया हतः ॥ ७ ॥ पुत्रहं विद्धि मां तात तीव्रदंडेन दंडय ॥ मृगभ्रांत्या विनिहतो ऋष्यशृंगो महातपाः ॥ ८ ॥ इति कृत्वा ऋषीश्रेष्ठ कुरु मे त्वं यथोचितं ॥ माता तद्वचनं श्रुत्वा गृहान्निर्गत्य विव्हला ॥ ९ ॥ हाहतास्मीति चोक्त्वा सा क्रोशंती कुररीयथा ॥ रुरोद करुणं माता क गतो मां विहाय च ॥ १० ॥ श्रुताध्ययनसंपन्नं जपहोमपरायणं ॥ आगतं त्वां गृहद्वारि कदा द्रक्ष्यामि पुत्रक ॥ ११ ॥ श्रूयते लोकवाक्येन चंदनं किल शीतलं ॥ पुत्रगात्रपरिष्वंगः चंदनादपि शीतलः ॥ १२ ॥ परित्यक्तुं नचच्छामि त्वामहं पुत्र सुप्रियं ॥ पंचत्वमागमिष्यामि त्वद्विहीना सुदुःखिता ॥ १३ ॥ एवं विलपति दीना पुत्रशोकेन पीडिता ॥ मूर्छिता विह्वलीभूता पपात धरणीतले ॥ १४ ॥ भार्यां तां पतितां दृष्ट्वा पुत्रशोकप्रपीडीतां ॥ चुकोपसमुनिश्रेष्ठश्चित्रसेनं नृपं प्रति ॥ १५ ॥ दीर्घतप उवाच ॥ याहि याहि महापाप मा मुखं दर्शयस्व मे ॥ किं त्वया घातितो विप्रस्त्वकामा च सुतो मम ॥१६॥ ब्रह्महत्या भविष्यंति वद्धस्ते-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यनृपाधम ॥ सकुटुंबस्य मेत्वंहि मृत्युरूपउपागतः ॥ १७ ॥ एवमुक्त्का ततो विप्रो विचिंत्य च पुनःपुनः ॥ स्वयं कोपं परित्य-
ज्य मुनिभावं समागतः ॥ १८ ॥ दीर्घतपा उवाच ॥ उद्वेगं त्यज भोवत्स दुरुक्तं गदितं मया ॥ पुत्रशोकाभिभूतेन दुःखत-
प्तेन पार्थिव ॥ १९ ॥ किंकरोति नरप्राज्ञः प्रेर्यमाणः स्वकर्मभिः ॥ प्रायेण हि मनुष्याणां बुद्धिः कर्मानुसारिणी ॥ २० ॥ अने-
नैव विधानेन पंचत्वं लिखितं हिनः ॥ हत्या तव भविष्यंति पूर्वदत्ता न संशयः ॥ २१ ॥ ब्रह्मक्षत्रविशांमध्ये शूद्रोवा चांत्यजोपि
वा ॥ न विप्रोहं मुनिश्रेष्ठ नवैश्यो नैव शूद्रजः ॥ २३ ॥ न व्याधो नांत्यजश्चापि क्षत्रियोहं महामुने ॥ काशिराजो मृगान्
हंतुमागतो वनमुत्तमं ॥ २४ ॥ भ्रांत्या निपातितो तत्र मृगरूपधरो मुनिः ॥ २५ ॥ इदानीं तव पादांते संश्रितः पापकान्वितः ॥
किं कर्तव्यं मया विप्र उपायं कथयस्व मे ॥ २६ ॥ दीर्घतपा उवाच ॥ ब्रह्महत्या न शक्येत एकानिस्तरितुं नृप ॥ एकादशं
कथंशक्या जन्मांतरशतैरपि ॥ २७ ॥ चत्वारो मे सुता राजन्सभार्या मातृपूर्वकाः ॥ मयासह न जीवंति ऋष्यशृंगस्य कारणे
॥ २८ ॥ उपायं कथयिष्यामि येन शांतिर्भवेत्तव ॥ शक्नोषि यदि तं कर्तुं सुखोपायेन सत्तम ॥ २९ ॥ कुटुंबं मे मृतं सर्वं दाहयि-
त्वा यथाविधिः ॥ गृहीत्वास्थीनि सर्वेषां नर्मदातटमाश्रयः ॥ ३० ॥ नर्मदादक्षिणे कूले शूलभेदमितिश्रुतं ॥ सर्वपापहरं तीर्थं
दुःखदुःस्वप्ननाशनं ॥ ३१ ॥ शुचिर्भुत्वा ममास्थीनि तत्र तीर्थे विनिःक्षिप ॥ मुक्तिस्ते सर्वपापानां स्वर्गोस्माकं भविष्यति
॥ ३२ ॥ चित्रसेन उवाच ॥ सर्वमेतत्करिष्यामि तववाक्यान्न संशयः ॥ सर्वस्वमपि यत्किंचित् जीवितं च ममानघ ॥ ३३ ॥
तवाधीनं हि तत्सर्वं प्रयच्छामि प्रसीद मे ॥ एवं वचनसंवादे वर्तमाने नृपोत्तम ॥ ३४ ॥ स्फुटित्वा हृदयं तत्र मृतोसौ मुनि-
सत्तमः ॥ मुनिशोकसमाक्रांता मृताभार्यापि तत्क्षणात् ॥ ३५॥ पुत्राश्च मातृशोकेन सर्वेपंचत्वमागताः ॥ स्नुषाः पतिव्रताः सर्वाः
मृतास्ताभर्तृभिः सह ॥ ३६ ॥ पंचत्वमागतान् ज्ञात्वा मुनिमुख्यान्नृपोत्तमः ॥ विप्रानाह्वाहयामास ये तत्राश्रमवासिनः ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तेभ्यो निवेदयामास यथावृत्तं सपार्थिवः ॥ सतैस्तदाभ्यनुज्ञातः काष्ठान्यानीय यत्नतः ॥ ३८ ॥ दाहं संचयनं कृत्वा चित्रसेनस्त-
तः स्वयं ॥ गृहीत्वास्थीनि सर्वेषां रुदन्नार्त्तः सुदुःखितः ॥ ३९ ॥ उत्तरीयं द्विधा कृत्वा संवेष्ठ्यास्थीनि सर्वशः ॥ याम्याशां प्रस्थि-
तो राजा महादैन्यसमन्वितः ॥ ४० ॥ नशक्नोति यदा गंतुं छायामाश्रित्य तिष्ठति ॥ विश्रामं च तथा कृत्वा पुनर्याति त्वरान्वि
तः ॥ ४१ ॥ सचैलं कुरुते स्नानं मुक्त्वास्थीनि पदेपदे ॥ पयोजलं निराहारः सगच्छन् दक्षिणामुखः ॥ ४२ ॥ अचिरेणैव कालेन
सगतो नर्मदातटं ॥ आश्रमस्थान् द्विजान् दृष्टा पप्रछैवं नृपोत्तमः ॥ ४३ ॥ चित्रसेन उवाच ॥ कथ्यतां शूलभेदस्य मार्गो मे-
द्विजसत्तमाः ॥ येन यामि महाभागा स्वकीयार्थस्य सिद्धये ॥४४॥ ऋषय ऊचुः ॥ इतः क्रोशांतरादर्वाक् तीर्थं परमशोभनं ॥ न-
र्मदादक्षिणे कूले गतो इक्षसि नान्यथा ॥ ४५ ॥ ऋषिवाक्यं तथा श्रुत्वा गतः शीघ्रं नृपस्ततः ॥ स ददर्श ततस्तीर्थं द्विजसंघ-
समाकुलं ॥ ४६ ॥ वहुद्रुमलताकीर्णं ब्रहुपुष्पोपशोभितं ॥ सेव्यमानं ऋषिकुलैर्नानाव्रतधरैः शुभैः ॥ ४७ ॥ एकपादस्थिताः केचि-
त् सूर्यावर्तास्तथापरे ॥ एकांगुष्ठस्थिताः केचिदपरे चार्द्धबाहवः ॥ ४८ ॥ दिनैकभोजिनः केपि कंदमुलफलाशनाः ॥ त्रिरात्रभोज-
नाः केचित्पाराकव्रतिनोपरे ॥ ४९ ॥ चांद्रायणरताः केचित्केचित्पक्षोपवासिनः ॥ मासोपवासिनः केचित्केचिदृतुषुभोजिनः
॥ ५० ॥ शीर्णपर्णाशनाः केचित्केचिच्छैवालभोजिनः ॥ जलापूरास्तथा केचित्केचिद्वै मारुताशनाः ॥ ५१ ॥ योगाभ्यासरताश्चा-
न्ये ध्यायमानाः परंपदं ॥ एवं विधान् द्विजान् दृष्ट्वा जानुभ्यामवनीं गतः ॥ ५२॥ प्रणाममकरोत्तेषां भक्तिपूर्वं नृपस्तदा ॥ सतैस्तत्राभ्य-
नुज्ञातः ज्ञात्वा तीर्थवरं ततः ॥ ५३ ॥ जगाम तत्र तत्तीर्थं कुंडत्रयविभूषितं ॥ दृष्ट्वा चैव तु तत्तीर्थं कुंडत्रयमशेषतः ॥ ५४ ॥ गंगां
तत्रसमासाद्य नाम्नादेवनीतिया ॥ प्राचीं सरस्वतीं दृष्ट्वा भ्रांतिर्जाता नृपस्यवै ॥ ५५ ॥ ततो विस्मयमापन्नश्चिंतयानो मुहुर्मुहुः ॥
ददर्शामिषसंयुक्तं आकाशे कुररंतदा ॥ ५६ ॥ अन्येच कुररास्तत्र आयाता आमिषार्थिनः ॥ अभूद्युद्धंततस्तेषां आकाशे त्वामिषा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थिनां ॥ ५७ ॥ अथपक्षिमुखात्सार्प्पमामिषं पतितं जले ॥ शूलेन शूलिना यत्र भूभागो भेदितो जले ॥ ५८ ॥ कुंडे पतितमा-
त्रस्तु ससर्पः पुरुषोभवत् ॥ विमानस्थं तु तं दृष्ट्वा पुरुषं दिव्यरूपिणं ॥ ५९ ॥ अप्सरोभिः समाकीर्णं कुंडलोत्तमभूषितं ॥ तं दृष्ट्वा
चित्रसेनोपि विस्मयं परमं गतः ॥ ६० ॥ ऋषिभिः कथितं यद्वत्तत् वै तीर्थे न संशयः ॥ हृष्टरोमा भवदृष्ट्वा प्रभावं तीर्थसंभवं
॥ ६१ ॥ अस्थीनि भूमौ निक्षिप्य स्नानं कृत्वा यथाविधिः ॥ तर्पयित्वा पितॄन् देवान् पूजयित्वा महेश्वरं ॥ ६२ ॥ गृह्यास्थीनि
ततो राजा चिक्षेपांतर्जले तदा ॥ वीक्षते क्षणमेकं तु राजा तूर्ध्वमुखस्थितः ॥ ६३ ॥ तान् ददर्श ततः सर्वान् दिव्यमूर्तिधरान् शु-
भान् ॥ दिव्यवस्त्रैश्च संवितान् दिव्यरत्नोपभूषितान् ॥ ६४ ॥ ततस्तांश्च समालोक्य राजा संहर्षितो भवत् ॥ ऋषिर्विमानमारू-
ढश्चित्रसेनमथाब्रवीत् ॥ ६५ ॥ भोभो राजन् चित्रसेन कृतं साधु महामते ॥ त्वत्प्रसादान्नृपश्रेष्ठ दिव्यांगतिमहं गतः ॥ ६६ ॥
सकुटुंबस्तु तीर्थस्य प्रभावादुद्यमाच्चते ॥ ईदृशं यत्त्वया कष्टं कृतं परमदुःकरं ॥ ६७ ॥ स्वसुतोपि न शक्नोति पितॄणां कर्तुमीदृ-
शं ॥ मदीयवचनात्त्वंहि निःपापो भव पार्थिव ६८ ॥ फलं प्राप्स्यासि राजेंद्र मद्वाक्यान्मनसेप्सितं ॥ ६९ ॥ आशिर्वाक्यानि दत्वा-
थ चित्रसेनाय धीमते ॥ स्वर्गं जगाम स सुतस्ततो दीर्घतपा मुनिः ॥ ७० ॥ इतिश्रीरेवामहात्म्येशुलभेदोत्पत्तौ दक्षिणे दीर्घतपा-
स्वर्गगमनंनामद्विसप्तित्तमोऽध्यायः ॥ ७२ ॥ उत्तानपाद उवाच ॥ महात्म्यं तीर्थजं दृष्ट्वा चित्रसेनो नृपोत्तमः ॥ ततः परं किंच
कार तन्मे वद सुरेश्वर ॥ १ ॥ ईश्वर उवाच ॥ भृगुतुंगं समारुह्य ईशान्यां दिशि संस्थितः ॥ तपश्चचार विपुलं कुंडे तस्मिन्
महीपतिः ॥ २ ॥ त्रीन् देवान् सहदिध्यात्वा ब्रह्मविष्णुमहेश्वरान् ॥ पतनाय मतिं चक्रे भृगुपर्वतमस्तकात् ॥ ३ ॥ एतास्मिनंतरे-
देवो जगत्कर्ता महाप्रभुः ॥ करे गृहीत्वा राजानं रुद्रो वचनमब्रवीत् ॥ ४ ॥ ईश्वर उवाच ॥ प्राणत्यागमकाले त्वं मा
कुरुष्व महीपते ॥ अद्यापि त्वं युवा तात न युक्तं मरणं तव ॥ ५ ॥ स्वस्थानं गच्छ शीघ्रं त्वं भोगान् भंक्ष्व यथेप्सितान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ कुरु निःकटकं राज्यं नाके वृत्रारिवत्स्वयं ॥ ६ ॥ चित्रसेन उवाच ॥ नहि राज्येन मे कार्यं न पुत्रैर्न च बांधवैः ॥ न भार्यया न कोशेन गजैर्न तुरंगमैः ॥ ७ ॥ मुंच मुंच महादेव माविघ्नः क्रियातांमम ॥ स्वर्गप्राप्तिर्ममाद्यैव त्वत्प्रसादाद्भविष्यति ॥ ८ ॥ ईश्वर उवाच ॥ यस्याग्रतः स्थितोविष्णुर्ब्रह्मारुद्रस्तथै वच ॥ स्वर्गेण तस्यकिं कार्यं स्वर्गतः किं करिष्यति ॥९॥ तुष्टाव यं त्रयो देवा ब्रह्मविष्णुमहेश्वराः ॥ १० ॥ चित्रसेन उवाच ॥ अद्यप्रभृति युष्माभिः स्थातव्यमिह सर्वदा ॥ इदं तीर्थं महापुण्यं सर्वतीर्थवरं परं ॥११॥ शूलभेदमिति ख्यातं त्रैलोक्येपि भविष्यति ॥ यत्र यत्र स्थिता यूयं तत्र तत्र वसाम्यहं ॥ गणानां शिव सर्वेषां भवेयमधिपस्तथा ॥१२॥ ईश्वर उवाच ॥ अद्यप्रभृति तीर्थेस्मिन् स्थास्यामो नृपसत्तम ॥ कलांशेन त्रयोदेवास्त्रिकालं निवसामहे ॥१३॥ नंदिसंज्ञो गणस्त्वंहि भविष्यसि न संशयः ॥ भविष्यत्यग्रपूजा च मत्समीपे सदा त्वयि ॥१४॥ एवं देवा वरं दत्वा चित्रसेनाय पार्थिव ॥ कुंडसंन्निधिमासाद्य यत्रो देवा व्यवस्थिताः ॥ १५ ॥ परस्परं वदंत्येवं पुण्यतीर्थमिदं शुभं ॥ सर्वतीर्थमयं तीर्थं शूलभेदं भविष्यति ॥ १६ ॥ इदं तीर्थं महापुण्यं यथापुण्यं गयाशिरः ॥ सकृत्पुण्योदकेनैव तुष्यंति पितरः सदा ॥ १७ ॥ एकं गयाशिरो मुक्का सर्वतीर्थानि सर्वतः ॥ शूलभेदस्य तीर्थस्य कलां नार्हंति षोडशीं ॥ १८ कुंडमुत्तरयाम्यायां दशहस्तप्रमाणतः ॥ ऐंद्रवारुणकाष्ठायां प्रमाणं चैकविंशति ॥ १९ ॥ एतत्प्रमाणं तीर्थस्य पिंडदानादिकर्मसु ॥ लोकाः पुण्याश्च ते मर्त्यै दातुमत्र लभंति ये ॥ २० ॥ विष्णुर्वै पितृरूपेण ब्रह्मरूपी पितामहः ॥ प्रपितामहश्चरुद्रोभूत्त्रयस्तत्रैव संस्थिताः ॥ २१ ॥ पितरः पितामहा येच तथा ये प्रपितामहाः ॥ अत्र तीर्थे स्थिता नित्यं पूजां गृण्हंति शाश्वतीं ॥ जातं जातं निरीक्ष्यंते स्वपुत्रं तत्र संस्थिताः ॥ २३ ॥ कदायास्यति तीर्थेस्मिन् कदानस्तारयिष्यति ॥ २४ ॥ शूलभेदे नरः स्नात्वा दृष्ट्वा शूलधरं सकृत् ॥ नापुत्री नाधनी रोगी सप्तजन्मानि जायते ॥ २५ ॥ शूलभेदवने राजन् शाकमूलफलैरपि ॥ एकस्मिन् भोजितेविप्रे कोटिर्भवति भोजिताः ॥ २६ ॥ पंचस्थानेषु वै श्राद्धं कुरुते भक्तिमान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरः ॥ तारयेत न संदेहः सकुलान्येकविंशति ॥ २७ ॥ पितृदेवप्रसादेन विप्राणां भाषितेन च ॥ श्राद्धदस्तु वसेत्तत्र यत्र देवो महेश्वरः ॥ २८ ॥ आत्मघातकरा ये च गोब्राह्मणहताश्च ये ॥ दंष्ट्रिभिर्जलपाते च विद्युत्पातेन ये मृताः ॥ २९ ॥ न येषामग्निसंस्कारो न शौचं नोदकक्रियाः ॥ अत्र तीर्थे तु यस्तेषां श्राद्धं कुर्यात्प्रयत्नतः ॥ ३० ॥ मोक्षप्राप्तिर्भवेत्तेषां पिंडदानान्न संशयः ॥ अज्ञानाद्यत्कृतं पापं बालभावाच्च यत्कृतं ॥ ३१ ॥ तत्सर्वं नश्यते तत्र महातीर्थप्रभावतः ॥ ३२ ॥ रजकेन यथा धौतं वस्त्रं निर्मलतां व्रजेत् ॥ तथा तत्र महादेवं सयाति परमां गतिं ॥ ३३ ॥ क्रीडां कृत्वा यथाकामं स्वेच्छया शिवमंदिरे ॥ ततो वेदांगतत्वज्ञो जायते विपुले कुले ॥ ३४ ॥ रूपवान् सुभगो वाग्मी सर्वव्याधिविवर्जितः ॥ राजा वा राजतुल्यो वा धर्माचारसमन्वितः ॥ ३५॥ एतत्ते कथितं राजन्तीर्थस्य फलमुत्तमं ॥ यत् श्रुत्वा मानवो नित्यं सर्वपापैः प्रमुच्यते ॥३६॥ यश्चेदं श्रावयेद्भक्त्या आख्यानं द्विजसन्निधौ ॥ श्राद्धेदेवकूले चैव नश्यते पापसंचयः ॥ ३७ ॥ लिखित्वा तीर्थमहात्म्यं ब्राह्मणेभ्यो ददाति यः ॥ जातिस्मरत्वं सलभे तथाचानिमतं फलं ॥ ३८ ॥ इति श्रीवायव्यरेवामाहात्म्ये शूलभेदोपाख्याने दक्षिणेचित्रसेनोपाख्यानंनाम त्रिसप्ततितमोध्यायः ॥ ७३ ॥ उत्तानपाद उवाच ॥ अन्यच्च श्रोतुमिच्छामि केन गंगावतारिता ॥ रुद्रमुर्ध्निस्थिता देवी पुण्या कथमिहागता ॥ १ ॥ यथा देवशिलानाम मस्यामाहात्ममुत्तमं ॥ एतदाख्याहि मे सर्वं प्रसादात्परमेश्वर ॥ २ ॥ ईश्वर उवाच ॥ शृणुष्वेकमना भूप यथा गंगावतारिता ॥ पुरा देवैर्महाभाग सर्वलोकहितार्थिभिः ॥ ३ ॥ अस्तिविंध्योनाम नगो याम्याशामाश्रितो नृप ॥ गीर्वाणा वै गतास्तत्र तपोनिष्ठा नृपोत्तम ॥ ४ ॥ तत्राहूता तदा गंगा ब्रह्माद्यैः सुरसत्तमैः ॥ समभ्यर्च्य जगन्नाथं देवदेवं महेश्वरं ॥ ५॥ जटामध्यस्थितां गंगां मोचयस्व जगत्पते ॥ तपः सिद्धिमिहेच्छामो विंध्याद्रौ नर्मदातटे ॥ ६ ॥ तेषां वाक्यात्ततो मुक्ता रुद्रेण शिरसः सरित् ॥ तत्र स्थाने महापुण्या देवैरुत्पादिता स्वयं ॥ ७ ॥ ततो देवनदी जाता हिताय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु नृणां भुवि ॥ वसंति ये तटे तस्याः स्नानं कुर्वंति भक्तितः ॥ ८ ॥ पिबंति विमलं तोयं न ते यांति यमालयं ॥ यत्र सा पति
ता कुंडे शूलभेदे नराधिप ॥ ९ ॥ देवनद्याः प्रतिच्यां तु तत्र प्राचीसरस्वती ॥ याम्यायां शूलभेदस्य तत्रतीर्थमनुत्तमं ॥ १० ॥
यत्र देवशिला पुण्या स्वयं देवेन निर्मिता ॥ तत्र स्नात्वा तु यो भक्त्या तर्पयेत्पितृदेवताः ॥ ११ ॥ पितरस्तस्य तृप्यंति यावदाभू-
तसंप्लवं ॥ १२ ॥ तत्रतीर्थे तु यो भक्त्या ब्राह्मणान् भोजयेन्नृप ॥ एकभुक्तेन विप्रेण दानसंख्या न विद्यते ॥ १३ ॥ उत्तानपाद
उवाच ॥ कति दानानि शस्तानि देवेश धरणीतले ॥ यानि दत्वा नरो भक्त्या मुच्यते सर्वकिल्बिषैः ॥ १४ ॥ तत्र देवशि-
लायाश्च माहात्म्यं विस्तराद्वद ॥ फलं यत्तस्य तीर्थस्य स्नानदानादिजं विभो ॥ १५ ॥ ईश्वर उवाच ॥ आसीत्पुरा माहावीर्यो
'च'दिनाथो नराधिपः ॥ वीरसेन इति ख्यातः सर्वभूत हिते रतः ॥ १६ ॥ गुणवान् शील संपन्नो धर्ममूर्तिरिव स्वयं
॥ कुरुते राज्यमव्यग्रं सदा निहतकंटकं ॥ १७ ॥ सदा मुदान्वितो राजा सभार्यो बहुपुत्रकः ॥ एकारुपवती तस्य दुहिता गि
रिजा यथा ॥ १८ ॥ इष्टा च पितृमातृभ्यां बभूव गुणसंश्रया ॥कृत्वा विवाहिकं कर्म काले प्राप्ते यथाविधिः ॥ १९ ॥ अनंतरं
चेदिपतिः द्वादशाहमखे स्थितः ॥ तस्यास्ततस्तु यो भर्ता सम्मृत्युवशमागतः ॥ २० ॥ विधवां तां सुतां मत्वा राजा कोपसम-
न्वितः ॥ उवाच वचनं तत्र स भार्यां दुःखपीडितां ॥ २१ ॥ महदुःखमिदं जातं यावज्जीवं सुदुःसहं ॥ नैषावै रक्षितुं शक्या
रूपभ्यौवनगर्विता ॥ २२ ॥ गच्छाद्भिर्दिवसैर्भद्रे कुलं नो दूषयिष्यति ॥ नोवायो विद्यते भार्ये भानुमत्या हि रक्षणे
॥ २३ ॥ परस्परं विवंदतौ श्रुत्वा तौ पितरौ तदा ॥ प्रहस्य भानुमत्याह वचनं गौरवान्वितं ॥ २४ ॥ भानुमती उवाच ॥ प-
रिभावय राजेंद्र विषादं माकरिष्यसि ॥ सत्यं नो त्वस्यते दोषो मदर्थे ते नराधिप ॥ २५ ॥ नाद्यप्रभृति केशान्वैधारयामिह
मस्तके ॥ स्थूलवस्त्रमहं राजन् धारयिष्ये जितेंद्रिया ॥ २६ ॥ चरिष्यामि व्रतानीह पुराण विहितानिच आत्मानं शोषयिष्यामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोषयिष्यामि माधवं ॥ २७ ॥ ममैषा वर्तते बुद्धिर्यदि त्वं तात मन्यसे ॥ भानुमत्या वचः श्रुत्वा राजासमुदितोभवत्
॥ २८ ॥ ततः प्रस्थापयामास तनयां वृद्धसंयुतां ॥ तीर्थयात्रां समुद्दिश्य कोशं दत्वा सुपुष्कलं ॥ २९ ॥ विससर्ज नृपः पुत्रीं
नानाव्रतपरायणां ॥ पुरुषान् सायुधान् विप्रान् विदुषः सपुरोहितान् ॥३०॥ दत्वा दासी वदातिश्च तस्याः संरक्षणे क्षमान् ॥ ततः
पितुर्मतेनैव गंगातीरं जगाम सा ॥ ३१ ॥ गाहयामास राजेंद्र गंगाया द्वे तटे तु सा ॥ नित्यं पूजयति देवान् विप्रानन्यांश्च
तापसान् ॥ ३२ ॥ भूषणच्छादनैर्भोज्यैर्गंधैर्माल्यैस्तु भक्तितः ॥ द्वादशाद्वानि सा तिरे गंगायाः साप्यवस्थिता ॥ ३३ ॥ त्यक्त्वा
गंगां तदा राज्ञी प्राप्य काष्ठां तु दक्षिणां ॥ जगाम ब्राह्मणैः सार्द्धं यत्र रेवा महानदी ॥ ३४ ॥ समीपंच स्थिता तत्र ॐकारेमर-
कंटके ॥ उदक् याम्ये तटे तात तीर्थात्तीर्थं जगाम सा ॥ ३५ ॥ तत्र स्नात्वा द्विजान्पूज्य भक्तिपूर्वमतंद्रिता ॥ जगाम वारुणीं
काष्ठां देवनद्याश्च संगमे ॥ ३६ ॥ ददर्श चाश्रमं तत्र ऋषीसंघसमाकुलं ॥ दृष्ट्वा ऋषिसमूहं सा प्रणिपत्येदमब्रवीत् ॥ ३७ ॥
माहात्म्यमस्य तीर्थस्य नामवाप्यस्ययत्श्रुतं ॥ कथयंतु महाभागाः प्रसादः क्रियतां मम ॥ ३८ ॥ ऋषय ऊचुः ॥ चक्रतीर्थं
सु विख्यातं चक्रं दत्तं पुरा हरौ ॥ महेश्वरेण तुष्टेन यत्र देवेन शूलिना ॥ ३९ ॥ अत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥
अनिवर्तगतिस्तस्य जायते नात्र संशयः ॥ ४० ॥ द्वितीयेन्हि ततो गच्छेत् शूलभेदे तपस्विनी ॥ पूर्वोक्तेन विधानेन स्नानं कु-
र्यात्प्रयत्नतः ॥ ४१ ॥ जन्मत्रयकृतं पापं नश्यते तस्य तत्क्षणात् ॥ तिलमिश्रेण तोयेन प्रदद्यात्रींजलित्रयं ॥ ४२ ॥ तृप्यंति
पितरस्तस्य द्वादशाष्टानि पंचच ॥ श्राद्धं यः कुरुते तत्र त्वनिंद्यैर्ब्राह्मणैर्नरः ॥ ४२ ॥ जायते पिंडदानेन पितॄणां तृप्तिरक्षया ॥
अपरेन्हि ततो गच्छेत् यत्र देवशिला शुभा ॥ ४४ ॥ यत्र सा जान्हवी पुण्या देवैरुत्पादिता पुरा ॥ स्नात्वा तत्र जलं दत्वा
तिलमिश्रं नराधिप ॥ ४५ ॥ सकृत् पिंडप्रदानेन मुच्यते सऋणत्रयात् ॥ एकादशींउपवासेन कृष्णभक्तिपरायणः ॥ कृत्वा जागरणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात्रौ पठन् पौराणिकीं कथां ॥ ४६ ॥ कृष्णे पूजां प्रकुर्वीत पुष्पधूपादिभिः क्रमात् ॥ ४७ ॥ प्रभाते भोजयेद्विप्रान् दानं द-
त्वा चशक्तितः ॥ चतुर्थेन्हि ततोगच्छेद्यत्र प्राचीसरस्वती ॥ ४८ ॥ ब्रह्मदेहाद्विनिः क्रांता जगत्त्रयहिताय वै ॥ यत्र स्नात्वा नरो
भक्त्या तर्पयेत्पितृदेवताः ॥ ४९ ॥ श्राद्धं च विधिवत् कुर्यात् पूजार्हान् पूजयेत् द्विजान् ॥ पितरस्तस्य तुष्यंति बहुवर्षाण्यसंश-
यं ॥ ५० ॥ सर्वदेवमयं स्थानं तीर्थानामुत्तमं परं ॥ सर्वपापहरं पुण्यं लिंगकोटिनिषेवितं ॥ ५१ ॥ त्रिकालं कुरुते यस्तु तत्र
स्नानं जितेंद्रियः ॥ न तस्यसंभवो मर्त्ये कदाचिदपि जायते ॥ ५२ ॥ नियमस्थो विमुच्येत त्रिजन्मजनितादघात् ॥ ५३ ॥
भर्तृहीना तु या नारी तत्र तिष्ठति सुव्रता ॥ लभते साक्षयं लोकं गौर्यासायुज्यमाप्नुयात् ॥ ५४ ॥ श्रीमार्कंडेय उवाच ॥ मु-
नीनां वचनात्सा वै मुदा परमया युता ॥ गाहयामास तत्तीर्थमहर्निशमतंद्रिता ॥ ५५ ॥ दृष्ट्वा तीर्थप्रभावं तु राज्ञी वचनमब्रवीत्
॥ शृण्वंतु वचनं मह्यं ब्राह्मणाः सपुरोहिताः ॥ ५६ ॥ नत्यजामीदृशं तीर्थं यावज्जीवमहर्निशं ॥ मत्पितुश्च तथा मातुःकथयध्व-
मिदं वचः ॥ ५७ ॥ पुत्री वः शूलभेदस्था तिष्ठति व्रतचारिणी ॥ एवमुक्त्वा स्थिता सा तु तत्रैव च सुसंस्थिता ॥ ५८ ॥ एकांत-
रोपवासस्था विविधव्रततत्परा ॥ नित्यं देवशिलासंस्था ध्यायमाना जगत्पतिं ॥ ५९ ॥ समयंपरमं कृत्वा नित्यं तद्गतमानसा
॥ ६० ॥ चरणक्षालनं कृत्वा तत्र भोजयती द्विजान् ॥ द्वादशाब्दानि सा राज्ञी सुव्रता तत्र संस्थिता ॥ ६१ ॥ ईश्वर उवाच ॥
अथांतरे देवशिला माहात्म्यं कथयामि ते ॥ शृणु राजन् महाबाहो इतिहासं पुरातनं ॥ ६२ ॥ कश्चिद्वनचरो व्याधः शबरो
भार्ययासह ॥ दुर्भिक्षपीडितस्तत्र आमिषार्थी समागतः ॥ ६३ ॥ नपश्यत्पक्षिणस्तत्र मृगानन्यान् फलानि च ॥ ततः स चिंत-
यामास क्षुधापीडितविग्रहः ॥ ६४ ॥ ददर्शाथ सरस्तत्र पद्मिनीखंडमंडितं ॥ तद्दृष्ट्वा हर्षसंयुक्ता शबरी वाक्यमब्रवीत्
॥ ६५ ॥ कुमुदानि गृहाणत्वं दिव्यान्याहारसिद्धये ॥ देवस्य पूजनार्थं चशूलभेदस्य भक्तितः ॥ ६६ ॥ विक्रयः कमलानांहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यो भवतानघ ॥ कमलानि गृहीष्यंति धर्मशीला यतो जनाः ॥ ६७ ॥ भार्यायाः स वचः श्रुत्वा जग्राह कुमुदानि वै ॥
उत्तीर्णस्तुददर्शाथ तत्र श्रीवृक्षमायतः ॥६८॥ श्रीफलान्यपि जग्राह पुष्टानि सुबहुनी च ॥ शूलभेदे स संप्राप्तो ददर्श बहुमानवान्
॥ ६९ ॥ मधुमासि सिते पक्षे एकादश्यां नराधिप ॥ तत्रोपवासिनः सर्वे बालवृद्धास्तथा स्त्रियः ॥ ७० ॥ ददर्श मंडपं तत्र कृतं
देवशिलोपरि ॥ वस्त्रैः संवेष्टितं दिव्यैः स्रग्माल्यै रुपशोभितं ॥ ७१ ॥ ऋषयश्चागताः सर्वे ये तत्राश्रमवासिनः ॥ सोपवासाः सनि-
यमाः सर्वे वै सपरिग्रहाः ॥ ७२ ॥ देवनद्यास्तटे रम्ये ऋषिसंघनिषेविते ॥ आगच्छद्भिर्नरैस्तत्र मार्गोपि न लभ्यते ॥ ७३ ॥ दृष्ट्वा
जनसमूहं स तां भार्यां शबरोब्रवीत् ॥ गच्छ पृच्छस्व कमपि किमद्य स्नानकारणं ॥ ७४ ॥ किमद्य पर्व संजातं चंद्रसूर्यग्रहादिकं ॥
किमद्यायनमन्वादियुगादि रविसंक्रमः ॥ ७५ ॥ ततः सा भर्तृवचनाच्छबरी तत्र वै गता ॥ पप्रच्छ नारीमग्रस्थां दत्वा द्वे कमले
तदा ॥ ७६ ॥ का तिथिः कोद्य वै वारः किं पर्व कथयस्व मे ॥ किमर्थं स्नातिलोकोयमेतत्कथय शोभने ॥ ७७ ॥ नारी उवाच ॥
एकादशी ह्यद्य पुण्या सर्वपापक्षयंकरी ॥ उपोषिता सती नूनं नानानाकफलप्रदा ॥ ७८ ॥ तस्यास्तद्वचनात्तुर्णं शबरी शबराय
वै ॥ कथयामास तत्सर्वं स्त्रीवाक्यं नृपसत्तम ॥ ७९ ॥ अद्य एकादशीशुक्ला बालवृद्धै रुपास्यते ॥ मदनैकादशिनाम सर्वपापक्षयं
करी ॥ ८० ॥ तथा तत्र मया दृष्टा एका राज्ञी शुभानना ॥ व्रतस्था नियताहारा नाम्ना भानुमती शुभा ॥ ८१ ॥ नतस्याः स-
दृशीकाचित्त्रिषुलोकेषु विद्यते ॥ वन्ये दिव्या वरारोहा अवतीर्णा महीतले ॥ ८२ ॥ भार्यायाः वचनं श्रुत्वा शबरस्तामथाब्रवीत् ॥
कमलानिभानु मत्या दत्वा त्वं भुंक्ष्व सत्वरं ॥ ८३ ॥ ममैवावर्तते बुद्धिर्न भोक्तव्यं ममापि च ॥ न मयोपार्जितं भद्रे पापशुद्धी
करं क्वचित् ॥ ८४ ॥ शबर्युवाच ॥ नकदाचिन्मयाभुक्तं तुभ्यं पूर्वंहि सत्तम ॥ त्वभ्दुक्तशेषं मे भुक्तं यावत्कालं स्मराम्यहं ॥ ८५ ॥
भार्यायानिश्चयं ज्ञात्वा स्नातुं तीर्थं जगाम सः अथोत्तरीयवस्त्रेण स्नानं कृत्वा तु भक्तितः ॥ ८६ ॥ सर्वान् देवान्नमस्कृत्य गतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवाशीलां प्रति ॥तत्रस्थौ शंकमानौ तुध्यायमानौ जनार्दनं॥८७॥ तस्यास्तु कमले दत्ते तया संज्ञानिवेदिते॥ दृष्ट्वा भानुमती पद्मे दासीं पप्रच्छविस्मिता ॥ ८८ ॥ कुत्रपुष्पद्वयं लब्धंइदं वै कथ्यतां मम ॥ शीघ्रं तत्रैव गत्वा च पुष्पाण्यन्यानि यानि च ॥ ८९ ॥ धान्येन वसुना वापि सर्वस्वेनापि भामिनी ॥ ९० ॥ भानुमत्या वचः श्रुत्वा गता सा शबरं प्रति ॥ प्रार्थयामास देहीति पद्मानि श्रीफलानि च ॥ ९१ ॥ शबर उवाच ॥ विनामूल्येन दास्यामि पद्मानि श्रीफलानि च ॥ मूल्ये मम स्पृहा नास्ति गत्वा राज्ञीं निवेदय ॥ ९२ ॥ तया च सत्वरं गत्वा यथावच्च निवेदितं ॥ ९३ ॥ तद्दासीवचनं श्रुत्वा सा च राज्ञीस्वयंगता॥ उवाच शबरं प्रीत्या पुष्पाण्यर्पय मूल्यतः ॥ ९४ ॥ शबर उवाच ॥ न मूल्यं कामये देवि फलपुष्पसमुद्भवं ॥ विनामूल्यं च पुष्पाणि यथेष्टं समगृह्यतां ॥ ९५ ॥ पूजां कुरु यथान्यायं वासुदेवे जगत्पतौ ॥ ९६ ॥ राज्ञ्युवाच ॥ मूलं विना न गृण्हामि कमलानि बताधुना ॥ दशद्रोण मितं धान्यं साधिकं वा प्रगृह्यतां ॥ ९७ ॥ वसुरत्नसुवर्णं च अन्यत्ते यदभीप्सितं ॥ तत्सर्वं संप्रदास्यामि कमलार्थे तवाद्य वै॥९८॥ शबर उवाच ॥ नाहारं चिंतयाम्यद्यमुक्त्का देवं वरानने॥ देवकार्यंविना मेद्य नान्या बुद्धिः प्रवर्तते ॥९९॥ राज्ञ्यु उवाच ॥ नत्वयान्नं परित्याज्यं सर्वमन्ने प्रतिष्ठितं ॥ तस्मात्सर्वप्रयत्नेन ममान्नं प्रतिगृह्यतां ॥ १०० ॥ तपस्विनो महाभागा ये चारण्यनिवासिनः ॥ गृहधर्मरताः सर्वे याचंते चान्नकांक्षिणः ॥ १०१ ॥ शबर उवाच ॥ नियमो मे कृतः पूर्वं सत्येन द्योतते शशी ॥ सत्येन तिष्ठत्युदधिर्वायुः सत्येन वाति वै ॥ १०२ ॥ सत्येन पच्यते सस्यं गावः क्षीरं ददंति च ॥ सत्याधारमिदं सर्वं जगत्स्थावरजंगमं ॥ १०३ ॥ तस्मात्सर्वप्रयत्नेन सत्यं देवी न लोपये ॥ देवकार्यं हि मुक्त्का मे नान्या बुद्धिः प्रवर्तते ॥ १०४ ॥ गृहाण राज्ञि पुष्पाणि कुरु पूजां जनार्दने ॥ श्रुयते द्विजवाक्यं तददोषास्पदमादितः ॥ १०५ ॥ कुशाः शाकं पयो मत्स्यागंधपुष्पंदधिक्षिति ॥ मांसं शय्यासनं वस्त्रं प्रत्याख्येयं न वारि च ॥ १०६ ॥ राज्ञ्यु उवाच ॥ आरामो पद्मतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्पंआरण्यं पुष्पमेव च ॥ क्रीतं प्रतिग्रहे लब्धं पुण्यमेतच्चतुर्विधं ॥ १०७ ॥ गृहाण राज्ञि पुष्पाणि पूजां चक्रे जनार्दने ॥ क्षपा-
जागरणं श्चैव श्रुत्वापौराणि कींकथा ॥ १०८ ॥ शबरस्तु ततो भार्या इदं वचन मब्रवीत् ॥ दीपार्थं गृह्यतां स्नेहो यथा लाभे न-
सुंदरि ॥ १०९ ॥ सागृहीत्वा ततः स्नेहं कृत्वा दीपं च भक्तितः ॥ कृत्वा जागरणं रात्रौ ध्यायमानौ जनार्दनं ॥ ११० ॥ ततः प्रभा-
तसमये दृष्टः स्नानोत्सुकोजनः ॥ रुद्रकुंडे स्थिताः केचिद्देवनद्यां स्थिताः परे ॥ १११ ॥ सरस्वत्यां स्थिताः केचिन्मार्कंडेयन्हदे तथा
॥ चक्रतीर्थगता केचित् स्नानं कुर्वंति भक्तितः ॥ ११२ ॥ शुचिभयजनाः सर्वे स्थिता देवशिलोपरि ॥ श्राद्धं कुर्वंति ते तत्र प्रयत्नेन
द्विजर्षभैः ॥ ११३ ॥ तत्दृष्ट्वाशबरो बिल्वैः पिंडान् निर्वपते तदा ॥ भानुमत्या तथा भर्तुः पिंड निर्वपणकृतं ॥ ११४ ॥ अनिंद्यान्
भोजयामास विप्रान्सर्वार्थसाधकान् ॥ हविष्यन्नैस्तथा दध्ना शर्करामधुसर्पिषा ॥ ११५ ॥ पायसेन च गव्येन कृतान्नेन विशेषतः
॥ भोजयित्वा द्विजान्राज्ञी ददौ दानं यथाविधिः ॥ ११६ ॥ तत्र तीर्थे महाराज कपिलां यः प्रयछति ॥ तेन दत्ता भवेत् पृथ्वी
सशैवनकानना ॥ ११७ ॥ उत्तानपाद उवाच ॥ यानि यानि तु दानानिशस्तानि जगतीतले ॥ तानि सर्वाणि देवेश कथयस्व
प्रसादतः ॥११८॥ ईश्वर उवाच॥ तिलप्रदः प्रजामिष्टां दीपदाश्चक्षुरुत्तमं ॥ भूमिदः स्वर्गमाप्नोति दीर्घायुश्च हिरण्यदः ॥ ११९ ॥ गृ-
हदो रोगरहितो रूप्यदो रूपवान् भवेत् ॥ वासोदश्चंद्रलोकं तु अश्वदोर्कस्य लोकभाक् ॥ १२० ॥ वृषदस्तु श्रिया पुष्टां गोदाताच-
त्रिविष्टपं ॥ यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः ॥ १२१ ॥ धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मशाश्वतं ॥ सर्वेषामेव दानानां
ब्रह्मदानं विशेष्यते ॥ १२२ ॥ येन येनेह भावेन दानं विप्राय दीयते ॥ तेन तेनेह भावेन प्राप्नोत्यप्रतिमं फलं ॥ १२३ ॥ दृष्ट्वा
दानानि सर्वाणि राज्ञीदत्तानि यानि च ॥ उवाच शबरो भार्यां तत्श्रुणुष्व नराधिप ॥ १२४ ॥ शबर उवाच ॥ पुराणं पठितं
भद्रे ब्राह्मणैर्वेदपारगैः ॥ श्रुतं चत न्मयासर्वं दानधर्मफलंशुभं ॥ १२५ ॥ पूर्वजन्मार्जितं पापं स्नानदानादिभिर्हतं ॥ शरीरं दुस्त्यजं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्त्का लभामि गति मुत्तमां ॥ १२६ ॥ संसारसागराद्भीतो नित्यं भद्रे वसाम्यहं ॥ अनेकानि च पापानि कृतानि बहुशो मया ॥ १२७ ॥ घातिताः जंतवो भद्रे निर्दग्धाः पर्वता सदा ॥ तेन पापेन दग्धोहं दरिद्रं न निवर्तते ॥ १२८ ॥ तीर्थावगाहनं पूर्वं पापेन न कृतं मया ॥ तेनाहं दुःखितो भद्रे दारिद्रं न निवर्तते ॥ १२९ ॥ मातुर्गृहं प्रयाहि त्वंत्यज स्नेहं ममोपरि ॥ भृगुतुंगं समारुह्य क्षेप्तुमीच्छाम्यहं तनुं ॥ १३० ॥ शबरी उवाच ॥ मात्रा पित्रा न मे कार्यं स्वजनैर्न च बांधवैः ॥ यागतिर्वै भवेत्तेद्य सा ममापि भविष्यति ॥ १३१ ॥ न स्त्रीणामीदृशो धर्मो विना भर्त्रा हि जीवनं ॥ श्रुयंते बहवो दोषा धर्मशास्त्रेष्वनेकधा ॥ १३२ ॥ पारणं कुरु भो कांतव्रतं येन समाप्यते ॥ यत्तेभिवांछितं किंचिद्दिषुवे कुरु मे प्रभो ॥ १३३ ॥ भर्याया वचनं श्रुत्वा सानंदंशबरस्तदा ॥ गृहीत्वा श्रीफलं शीघ्रं देवाय विनिदेद्य च ॥ १३४ ॥ सर्वान् देवान् नमस्कृत्य भुक्त्का च सहभार्यया॥ चैत्र्यां च विषुवं कृत्वा तस्थौ तत्र दिनत्रयं ॥ १३५ ॥ मार्कंडेय उवाच ॥ विप्रान्भानुमती भोज्य बुभुजे शेषमग्रतः ॥ भुक्त्का तु सुखमास्थाय तदन्नं परिणाम्य च ॥ १३६ ॥ त्रयोदश्यां ततो नत्वा भक्त्या भानुमती तदा ॥ मार्कंडस्य ह्रदे स्नात्वा पूज्यदेवं गुहास्थितं ॥ १३७ ॥ कृतोपवासा सा स्थित्वा पूजयामास शंकरं ॥ पंचामृतेन दिव्येन धूपदीपनिवेदनैः ॥ १३८ ॥ पूजयामास विधिवत् गंधपुष्पैरनेकशः ॥ क्षपाजागरणं कृत्वा श्रुत्वा पौराणिकीं कथां ॥ १३९ ॥ नृत्यगीतैस्तथा स्तोत्रैर्ध्यायमाना महेश्वरं ॥ प्रभाते भोजयामास विप्रान् पायससर्पिषा ॥ १४० ॥ दत्वा दानानि विप्रेभ्यो भक्त्या शक्त्यनुसारतः ॥ चातुवर्णांस्ततो लोकान् भोजयामास सर्वतः ॥ १४१ ॥ चतुर्दश्यादिने देवी संपूज्य वृषभध्वजं ॥ वादित्रशंखभेरीभिः पटहध्वनिनादितं ॥ १४२ ॥ क्षपाजागरणं कृत्वा प्रभूतजनसंकुलं ॥ कथाश्रवणव्याजेन प्रोषिता सा निशा तदा ॥ १४३ ॥ ततस्ते ब्राह्मणाः सर्वे वेदाध्ययन तत्पराः ॥ तत्पर्व कीर्तयामासुः पद्मकं नाम नामतः ॥१४४॥ आदित्यस्य दिनं त्वद्य तिथिःपंचदशि तथा ॥ यत्वाष्ट्रमेव च नक्षत्रं संक्रांतिविषुवत्तथा ॥१४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यतीपातस्तथा योगः करणं विष्टिसंज्ञितं ॥ पञ्चकंनाम पर्वस्यादयनादेः शताधिकं ॥ १४६ ॥ अस्मिन् दत्तं हुतं जप्तं सर्वमेवाक्षयं भवेत् ॥ ततो राज्ञीद्विजैः सार्द्धं शूलभेदं गता सती ॥ १४७ ॥ ददर्श शबरं कुंडे भार्यया सह पार्थिव ॥ १४८ ॥ राज्ञी उवाच ॥ तिष्ठ तिष्ठ महासत्व शृणुष्व वचनं मम ॥ किमर्थं त्यजसे प्राणान् अद्यापि हि युवाभवान् ॥ १४९ ॥ किं दुखं कोनु संतापः कमुद्वेगः पराभवः ॥ युवा त्वं दृश्यतेद्यापि मरणे कारणंवद ॥ १५० ॥ शबर उवाच ॥ कारणं नास्ति मे किंचिन्न दुःखं किंचिदेव हि ॥ संसारतापतप्तस्य नान्या बुद्धिः प्रवर्तते ॥ १५१ ॥ दुःखेन लभते यस्मान्मानुषत्वं वरानने ॥ मानुषं जन्म संप्राप्य यो न धर्मं समाचरेत् ॥१५२॥ स याति नरकं घोरं आत्मदोषेण सुंदरि ॥ तस्मात्पतितुमिच्छामितीर्थेस्मिन्सुखसिद्धये ॥१५३॥ राज्ञी उवाच ॥ अद्यापि वर्तते कालो धर्मस्यैवार्जने तव ॥ पापसंभवजैर्दोषैः सर्वैर्नैवं विशुद्ध्यति ॥ १५४ ॥ अहं दास्यामि ते धान्यं वासांसि द्रविणं तथा ॥ नित्यमाचर धर्मत्वं ध्यायमानो महेश्वरं ॥ १५५ ॥ शबर उवाच ॥ न देवी परकीयान्नं प्रार्थयामि कदाचन ॥ योयस्यान्नं समश्नाति सतस्याश्नाति किल्बिषं ॥ १५६ ॥ राज्ञी उवाच ॥ कंदमूलफलाहारोभ्रमित्वा भैक्षमुत्तमं ॥ अवगाह्य च तीर्थानि सर्वपापैः प्रमुच्यते ॥ १५७ ॥ ततो विमुक्तपापस्तु यत्किंचित् कुरुषे शुचिः ॥ कर्मणा तेन तत्र त्वं सद्गतिं प्राप्स्यसि ध्रुवं ॥ १५८ ॥ शबर उवाच ॥ अन्नमद्य मया त्यक्तं प्राणादिष्टतरं हि यत् ॥ सत्यं न लोपयाम्यद्य इति मेवर्तते मतिः ॥ १५९ ॥ प्रसादः क्रियतां देवि क्षमस्व त्वं जनैः सह ॥ इत्युक्त्वा निश्चयं कृत्वा प्रणिपत्य च तां ततः ॥ १६० ॥ अथोत्तरीयवस्त्रेण बध्वा त्मानंप्रयत्नतः ॥ भार्यया सहितो व्याधो हरिं ध्यात्वा पपातह ॥ १६१ ॥ नगाद्धत्पिपतितो यावद्गतजीवौ बभूवतुः ॥ चूर्णीभूतौ ततस्तौ तु पतितौ कुंडमध्यतः ॥ १६२ ॥ त्रिमुहुर्ते गते काले शबरो भार्ययासह ॥ दिव्यं विमान मारूढो रुद्रलोकं जगामह ॥ १६२ ॥ इतिश्रीरेवामाहात्म्येशूलभेदोपाख्यानेदक्षिणेशबरस्वर्गगमनोनामचतुःसप्ततितमोध्यायः ॥ ७४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तानपाद उवाच ॥ स्वर्गतं शबरं दृष्ट्वा देवी किमकरोत्ततः ॥ अतः परं तच्चरितं वद देव प्रसादतः ॥ १ ॥ ईश्वर उवाच ॥ चिंतइत्वा मुहुर्तं सा गता वै कुंडसन्निधौ ॥ दृष्ट्वा कुंडस्य महात्म्यं राज्ञी हर्षेण पूरिता ॥ २ ॥ विप्रानाहूय च बहून् पूजयामास भामिनी ॥ दत्वा तु विविधं दानं ब्राह्मणेभ्यो नराधिप ॥ ३ ॥ निश्चयं परमं कृत्वा स्थिता सा शांतचेतसा ॥ ततः संपूज्य विधिवत्पितृदेवद्विजार्थिनः ॥ ४ ॥ क्षपित्वा पक्षमेकं तुमधुमासस्य सत्वरा ॥ पक्षांते च ततो राज्ञी गता पर्वतमूर्द्धनि ॥ ५ ॥ नगश्रृंगं समारुह्य चकार करसंपुटं ॥ आहूय ब्राह्मणान् सर्वान् इदं वचनमब्रवीत् ॥ ६ ॥ मम माता पिता भ्राता तथान्यान् सर्वबांधवान् ॥ सर्वान् क्षमापयित्वेति वचनं मम कथ्यतां ॥ ७ ॥ पुत्री तेशूलभेदस्था तपः कृत्वा सुदुष्करं ॥ प्रक्षिप्य श्रृंगादात्मानं तस्मिन् तीर्थे दिवं गता ॥ ८ ॥ विप्राऊचुः ॥ संदेशं कथयिष्वामि त्वयोक्तं शोभनव्रते ॥ मातुस्ते भ्रातृबंधूनां माते भूदत्रसंशयः ॥ ९ ॥ ततो विसृज्य तान् लोकान् स्थितान् पर्वतसन्निधौ ॥ तथोत्तरीयवस्त्राभ्यां गाढं कृत्वा ततस्तनुं ॥ १० ॥ ततश्चिक्षेप चात्मानमेकचित्ता नृपात्मजा ॥ नगार्द्धे पतिता यावत्तावत्प्राप्ता सुरांगना ॥ ११ ॥ भोभो वत्से महाभागे राजपुत्रि तपस्विनी ॥ दिव्यं विमानमारुह्य कैलासं व्रज शोभने ॥ १२ ॥ ततो वै पश्यतां तेषां जनानां सा दिवं गता ॥ वरं विमानमारुढावीज्यमाना सुचामरैः ॥ १३ ॥ एषते कथितः सर्वं शूलभेदस्य विस्तरः ॥ यः श्रुतो शंकरात्पूर्वं ऋषिदेवसमागमे ॥ १४ ॥ यइदं पठते भक्त्या तीर्थे देवकुलेपिवा ॥ स मुच्यते पापसंघादपिजन्मशतार्जितात् ॥ १५ ॥ ब्रह्महा च सुरापी च स्तेयी च गुरुतल्पगः ॥ गोघाती स्त्रीविघाती च देवब्रह्मस्वहारकः ॥ १६ ॥ स्वामिद्रोहि मित्रघाती तथा विश्वासघातकः ॥ परन्यासापहारी च परनिक्षेपलोपकः ॥ १७ ॥ परभार्याभ्रातृभार्यागोस्नुषाकन्यकासु च ॥ अभिगामि परद्वेषी तथा धर्मप्रदूषकः ॥ १८ ॥ देवानां वेदविप्राणां निंदकः कायदूषकः ॥ य इदं श्रावयेत् श्राद्धे ब्राह्मणान् भुंजतो नृप ॥ १९ ॥ मुदं प्रयांति ते तृप्ता पितरस्तस्य स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वदा ॥ यश्चेदं शृणुयाद्भक्त्या पठमानं नृपोत्तम ॥ २० ॥ समुक्तस्सर्वपापेभ्यो सर्वकल्याणमाप्नुयात् ॥ २१ ॥ इदं यशस्य मायुष्यं
पुण्यं पापप्रणाशनं ॥ आख्यानं शूलभेदस्यकिमतःपरमुत्तमं ॥ २१ ॥ इतिश्रीरेवामहात्म्येवायूक्ताशिवसंहितायां शूलभेदे दक्षिणे
भृगुतुंगतीर्थनाम पंचसप्ततितमोध्यायः ॥ ७५ ॥ श्रीमार्कंडेय उवाच ॥ अतः परं महाराज रेवाया उत्तरे तटे॥ कपिलेश्वरतीर्थंतु
दुःखदुःस्वप्ननाशनं ॥ १ ॥ पुरा नारायणस्यांशः कपिलो वै महामुनिः ॥ तेनेदं स्थापितं तीर्थं तपः कृत्वा सुदारुणं ॥ २ ॥ सगरा-
न्षष्टिसाहस्रान्दृग्गोचरगतान् ऋषिः ॥ भस्मिचकार पाताले निमिषार्धेन सर्वशः ॥ ३ ॥ दुर्दृष्टयातान् प्रदग्ध्वादौ तूर्णमत्रागतो
मुनिः ॥ तपोध्यायाच्च कपिलः स्वदोषं च विचार्य च ॥ ४ ॥ नर्मदातीरमासाद्य तपस्तेपे सुदुःकरं ॥ बहुकालं नृपश्रेष्ठ स्थापया-
मास शंकरं ॥ ५ ॥ स्वनाम्ना सर्वपापघ्नं लोकानां च हिताय वै ॥ ततः प्रभृति तत्तीर्थं कपिलेश्वरसंज्ञितं ॥ ६ ॥ अत्र स्नानं
तथा श्राद्धं दानं च कुरुतेनरः ॥ पुण्यं लोकमवाप्नोति यत्र सिद्धाः सनातनाः ॥ ७ ॥ इत्युत्तरे कपिलेश्वरतीर्थं ॥ श्रीमार्कंडेय उ-
वाच ॥ ततोगच्छेत राजेंद्र संगमं पापनाशनं ॥ नर्मदादक्षिणे कूले मोक्षनद्याः सुखावहं ॥ १ ॥ क्रोशद्वयांतरे पार्थ पुण्यं ऋषि-
निषेवितं ॥ पुरामुमुक्षुभिः सिद्धैः नर्मदातीरमाश्रितैः ॥ २ ॥ संगमार्थं सरित्श्रेष्ठा मोक्षसंज्ञा विनिर्मिता ॥ संगमे द्विगुणं पुण्यं
महानद्याश्चतुर्गुणं ॥ ३ ॥ इति मत्वा फलाधिक्य मिछद्भिर्मुक्तिलक्षणं ॥ विप्रैरावाहिता पूर्वं तेन मोक्षनदी स्मृता ॥ ४ ॥ तत्र
स्नात्वा महाराज संगमे पापनाशने ॥ पुण्यां गतिमवाप्नोति पितृस्तारयते तथा ॥ ५ ॥ तिलोदकप्रदानेन कष्टान्मोचयते पितॄन्
॥ ६ ॥ इति दक्षिणे मोक्षनदीसंगमः ॥ श्रीमार्कंडेय उवाच ॥ ततो गछेत राजेंद्र विमलेश्वरमुत्तमं ॥ विमलत्वप्रदं पुण्यं पुरा
वैश्यप्रकाशितं ॥ १ ॥ गोपालः कंपिलोनाम चारयन् बहुगोधनं ॥ निर्दयत्वेन गाः पापः परंताडययति व्रजन् ॥ २ ॥ एकदा
गोधनात् भ्रष्टा गौरेका कुपथाश्रिता ॥ दृष्टा तेन द्रुतं गत्वा ताडिता लकुटेन हि ॥ ३ ॥ मूर्छिता सा ततः पार्थः पपात च ममार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च ॥ वत्सस्तस्या ग्रहे वद्धो विनास्तन्यं मृतस्तथा ॥ ४ ॥ ततः कालेन राजेंद्र रात्रौ नित्यं स मुढधीः ॥ सुप्तोभवेद्यदा तस्य मुखात्
हूंकारवो भवेत् ॥ ५ ॥ कृमिराशिश्च मुखतः कर्णनासाक्षितो महान् ॥ निःसरत्याति पापाच्च पुनःस्वस्थानमाप्नुयात् ॥ ६ ॥ एवं
गते तस्य भार्या कालेन महता ततः ॥ एकदा शब्दमाकर्ण्य जाग्रती विस्मिता भवत् ॥ ७ ॥ दीपः प्रद्योतीतः कृत्वा यावत्प-
श्यति सर्वतः ॥ तावत्तत्रैव भर्तारं ददर्श दूषितं निशि ॥ ८ ॥ सर्वश्रोत्रेषु सर्वांगे क्रिमिभिः परिवेष्टितं ॥ ततः सा बोधयामास
पात कुत्सितमादरात् ॥ ९ ॥ यावद्बोधयते तं सा तावत्ते कृमयो गताः ॥ यथास्थानं नृपश्रेष्ठ स तथैव पुनः स्थितः ॥ १० ॥
तया तु कथितं सर्वं गोशब्दादि विचेष्टितं ॥ स भार्यावचनं श्रुत्वा विषादं परमं गतः ॥११॥ विहाय गेहव्यापारं कर्म गोरक्षणादि-
कं ॥ तीर्थात्तीर्थं व्रजन् दीनो यथालाभेन वर्तयन् ॥१२॥ इमं देशमनुप्राप्तो रेवाया उत्तरे तटे ॥ द्वादशाहं निराहारः स्थापमास शंकरं
॥ १३ ॥ नार्मदं शिवलिंगं तु सवदार्षमेलापहं ॥ विनिद्रश्च निराहारस्त्रिनायी मौनमाश्रितः ॥१४॥ बिल्वपत्रार्कधत्तूरैः पूजयन् पर-
मेश्वरं ॥ त्रयोदशेन्हि संप्राप्ते रात्रौ जाग्रद्यदास्थितः ॥ १५ ॥ पूजां कृत्वाग्रतः पार्थ तावत्साक्षान्महेश्वरः ॥ प्रत्यक्षस्तस्य वैश्यस्य
तमुवाच जगत्पतिः ॥ १६ ॥ भोवैश्यवर्य तुष्टोस्मि ब्रूहि किंते ददाम्यहं ॥ १७ ॥ वैश्य उवाच ॥ यदि तुष्टोसि देवेश मम सर्वं
जगत्पते ॥ ज्ञाताज्ञातं लघुस्थूलं कृतं नानाविधं मया ॥ १८ ॥ तं पापसंघं सकलं नाशयस्व मयिस्थितं ॥ वैमल्य मतुलं देहि
शिवभक्तिं च शाश्वतीं ॥ १९ ॥ देहांते त्वद्गुणोभूत्वा यामिदेहं महेश्वर ॥ येन येन हि भावेन तं कामं तस्य पूरय ॥ २० ॥
सानिध्यमत्र सततं तीर्थे भज सनातने ॥ २१ ॥ इश्वरोवाच ॥ एवं भवतु भोवत्स दत्तमेतन्मया तव ॥ विमलस्त्वं सदा भूत्वा
गणत्वं मम यास्यसि ॥ २२ ॥ विमलेश्वरनाम्नाहं चिरंस्थास्ये भयापहः ॥ इत्युक्त्वांतर्दधे देवो वरं दत्वा युधिष्ठिर ॥ २३ ॥ ततः
कालेन कियता वैश्यो रुद्रगणो भवत् ॥ इति ते कथितं तीर्थं विमलेश्वरमुत्तमं ॥ २४ ॥ विमलेश्वरतीर्थे तु यः स्नानं कुरुते नृप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ सवै पापमलं त्यक्त्वा शिवलोकमवाप्नुयात् ॥ २५ ॥ पूजयित्वा महेशानं विमलेश्वरसंज्ञितं ॥ महेश्वर गणो भूत्वा चिरकालं स-
मोदते ॥२६॥ तीलोदकेन पितरतृप्तिं गछंति शाश्वतीं ॥ २७ ॥ इतिश्रीरेवा माहात्मये उतरे विमलेश्वरतीर्थे नाम षटसप्ततितमोऽध्यायः
॥७६॥ श्रीमार्कंडे० ॥ अतःपरं प्रवक्ष्यामि उलूहृदमुत्तमं ॥ संगमान्मोक्षनद्यास्तु स्थितं क्रोशत्रयांतरे ॥१॥ गौरग्रामसमीपे तु स्थितं क्रो-
शांतरे नृप ॥ रेवाया दक्षिणे कूले पापक्षयकरं शुभं ॥२॥ उलूकश्चिरजीवीतु पुरारेवातटाश्रिते ॥ बिलसंस्थाश्चिरं कालं वर्तते निशिसंचर
न् ॥३॥ कालव्यापादनं नित्यं कुरुते निशि संचरन् ॥ यथा लब्धेन च सदा करोति प्राणधारणं ॥ ४ ॥ एवं वर्षशतानीहन्यातितानि
तु तस्य वै ॥ भ्रमद्भिरेकदा काकैर्दृष्टस्तत्र बिलेशयः ॥ ५ ॥ तन्मध्ये चिरजीवीतु महाध्वांक्षोहि कश्चन ॥ काकराजेन सर्वैश्च कृ-
ता तन्मारणे मतिः ॥ ६ ॥ भोकाकाः शत्रुरस्माकमुलूकश्चिरजीवनः ॥ सर्वैर्मिलित्वा पापात्मा मारणीयो रिपुर्हि नः ॥ ७ ॥
इति कृत्वा मतिं सर्वे काष्ठान्यानीय यत्नतः ॥ कोलाहलं प्रकुर्वाणा बिलं वै तदपूरयन् ॥ ८ ॥ वन्हिं चापि समानीय ज्वाल-
यामासुरुद्धताः ॥ दिवा न पश्यति रिपुर्वयं रात्रौ कदाचन ॥ ९ ॥ तस्माद्दिवांधः पापात्मा दग्ध एष ममार च ॥ गच्छध्वं वृक्ष-
निलया वसध्वं हि यथासुखं ॥ १० ॥ शत्रुर्नश्चिरकालीनो दग्धः सर्वैरुपायतः ॥ इति संभाष्य सर्वेपि परस्परहितैषिणः ॥ ११ ॥
नानागतिः प्रकुर्वाणा जग्मुः सर्वे यथागतं ॥ ततः संशांतिकुर्वाणं बिलद्वार्यनलं खगः ॥ १२ ॥ मत्वा निशागमे तस्मान्मंदं मं-
दं विनिर्गतः ॥ दग्धपक्षस्तृषार्तो वै मांसपिंडसमो नृप ॥ १३ ॥ क्षुधितो ग्लानिमापन्नः परितप्तवपुः क्रमात् ॥ पपातांभसि रेवा-
या दग्धपक्षो ममार च ॥ १४ ॥ लहरीभिः समाकृष्टो मत्स्यैर्दग्धं तदामिषं ॥ रेवान्हदे तदस्थीनि स्थितानि चिरमंजसा ॥ १५ ॥
उलुकश्च महाराज तेन काशीपुरे भवत् ॥ राजा काशीश्वरः पार्थ तीर्थस्यास्य प्रभावतः ॥ १६ ॥ जातिस्मरः सवै राजा तीर्थं
स्मरति नित्यशः ॥ प्रछत्यभ्यागतान् रेवां तथा गृध्रन्हदं च तं ॥ १७ ॥ निवासस्तस्य तीर्थस्य रोचयत्यनिशं नृपः ॥ एवं ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथितं पार्थ उलूकं तीथ मुत्तमं ॥ १८ ॥ ततः प्रभृति विख्यातं नाम्ना गृध्रन्हदं शुभं ॥ कलशा नदी समीपेतु तत्र स्नानं समाचरे त् ॥ १९ ॥ लभते चाक्षयान् लोकान्नृपतिर्जायते भुवि ॥ श्राद्धं प्रकुरुते यस्तु येनकेनापि पांडव ॥ २० ॥ पितरस्तस्य तुष्यंति वर्षाणि दशपंचच ॥२१॥ इति श्रीरेवामहात्म्येदक्षिणे उलुकतीर्थनाम सप्तसप्ततित्तमोऽध्यायः॥ ७७॥ श्रीमार्कंडेय उवाच ॥ ततः पुष्करणीं गच्छेत्सर्वपापप्रणाशनीं ॥ रेवाया उत्तरे कूले क्रोशार्धे विमलेशतः ॥ १ ॥ श्रुते यस्याः प्रभावे तु सर्वपापैः प्रमुच्यते ॥ यत्रास्ते सर्वदा देवो वेदमूर्तिर्दिवाकरः ॥ २ ॥ कुरुक्षेत्रं यथापुण्यं सार्वकामिकमुत्तमं ॥ कुरुक्षेत्रे यथा वृद्धिर्दानस्य जगतीपते ॥ ३ ॥ पुष्करिण्यां तथादानं वर्द्धते नात्रसंशयः ॥ यवमेकं तु यो दत्वा सौवर्णं मस्तके नृप ॥ ४ ॥ पुष्करिण्यां कृतस्नानः सर्वपापैः प्रमुच्यते ॥ सूर्यग्रहे तु यः स्नात्वा दद्याद्दानं यथाविधिः ॥ ५ ॥ हस्त्यश्वरथरत्नानि गृहं गावो धुरं धरान् ॥ सुवर्णं रजतं वापि ब्राह्मणेभ्यो ददाति यः ॥ ६ ॥ त्रयोदशदिनान्येव त्रयोदशगुणं भवेत् ॥ ७ ॥ तिलोदकेन यस्तत्र तर्पयेत्पितृदेवताः ॥ द्वादशाब्दभवेतृप्तिस्तत्र तीर्थे नृपोत्तम ॥ ८ ॥ यस्तत्र कुरुते श्राद्धं पायसैर्मधुसार्पिषा ॥ पिंडदो लभते स्वर्गं पितॄणां दत्तमक्षयं ॥ ९ ॥ इंगुदैर्बदरैर्बिल्वैरक्षतैर्वातिलैस्तथा ॥ अक्षयंफलमाप्नोति तस्मिंस्तीर्थे नराधिप ॥ १० ॥ तत्र स्नात्वा तु यो देवं पूजयेत्तं दिवाकरं ॥ आदित्यहृदयं मंत्रं मुच्यते सर्वपातकैः ॥ ११ ॥ यस्तत्र त्यजति प्राणान् विधिवन्नृपसत्तम ॥ सयाति परमं स्थानं यत्र देवो दिवाकरः ॥ १२ ॥ इति उत्तरे पुष्करणीतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ भूयो न्यत्संप्रवक्ष्यामि आदित्येश्वर मुत्तमं ॥ सर्वदुःखहरं पार्थ सर्वपापप्रणाशनं ॥१॥ आयुःश्रीवर्धनं नित्यं पुत्रदं स्वर्गसाधनं ॥ यस्य तीर्थस्य चान्यानि तीर्थानि कुरुनंदन ॥ २ ॥ न लभंते श्रियं नाके मर्ते पाताल गोचरे ॥ कुरुक्षेत्रं गया गंगा नैमिषं पुष्करं तथा ॥ ३ ॥ वाराणशी वा केदारं प्रयागं रुद्रसंभवं ॥ महाकालं सहस्राक्षं शुक्लतीर्थं नृपोत्तम ॥ ४ ॥ स्नेहात्ते कथयिष्यामि वार्धक्येनापि पीडितः श्रृण्वंतु ऋषयः सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपोनिष्ठामहौजस ॥ ५ ॥ श्रुतं मे रुद्रसान्निध्ये नंदिस्कंदगणैः सह ॥ देव्यापृष्टो महादेवो रवितीर्थस्य तत्फलं ॥ ६ ॥ शंभुनापि तदाख्यातं गिरिजायाः ससंभ्रमं ॥ तत्सर्वमेकचित्तेन रुद्रोद्गीतं श्रुतं मया ॥ ७ ॥ तत्तेहं संप्रवक्ष्यामि शृणु यत्नेन पांडव ॥ दुर्भिक्षोपहताः पूर्वं नर्मदामाश्रिता द्विजाः ॥ ८॥ उद्दालको वशिष्ठश्च मांडव्यो गौतमः कविः ॥ याज्ञवल्क्योथ गर्गश्च शांडिल्यो भार्गवो यमः ॥ ९ ॥ नाचिकेतुर्विभांडश्च वालखिल्यादयस्तथा ॥ शातातपश्च शंखश्च जैमिनिर्गोभिलोवसुः ॥ १० ॥ जैगीशव्यः शतानीको ऋषितौ विष्णुदेवलौ ॥ एते चान्ये च बहवः ऋषिसंघसमावृताः ॥ ११ ॥ तीर्थयात्रा कृता तैस्तु नर्मदाया समंततः ॥ आदित्येश्वरमायाताः प्रसंगादृषिपुंगवाः ॥ १२ ॥ तत्र दृष्टं वनं तैस्तु प्रसंगात्कौतुकान्वितं ॥ वृक्षैसंच्छादितं शालैर्धवैस्तिंदुकपाटलैः ॥ १३ ॥ जंबीरैरर्जुनैर्बिल्वैः किंशुकैर्नागकेसरैः ॥ पुन्नागैर्नालिकेरैश्च खदिरैः कल्पपादपैः ॥ १४ ॥ अनेकश्वापदाकीर्णं मृगमार्जारसंकुलं ॥ ऋक्षहस्तिसमायुक्तं चित्रकैश्च सुशोभितं ॥ १५ ॥ प्रविष्टाऋषयस्तत्र वने पुष्पफलान्विते ॥ नारी वनांते तैर्दृष्टारक्ता रक्तांबरावृता ॥ १६ ॥ रक्तमाल्यसुशोभाढ्या रक्तचंदनचर्चिता ॥ रक्ताभरणसंयुक्ता पाशहस्ता भयानका ॥ १७ ॥ तस्यासमीपे पुरुषो दृष्टो जीमूतसन्निभः ॥ महाकायो भीमवक्त्रः पाशहस्तो भयावहः ॥ १८ ॥ अनादृष्योपमो दृष्टो विकटः पिंगलोचनः ॥ दीर्घजिव्हः करालास्यस्तीक्ष्णदंष्ट्रो विरावणः ॥ १९ ॥ द्वितीया स्त्री कुरुश्रेष्ठ दृष्टान्या ऋषिपुंगवैः ॥ नरयुग्मं तथा दृष्टं भीमरूपं भयानकं ॥ २० ॥ एवं तत्पंचकं दृष्टं पापरूपं तपोधनैः ॥ ऋषयस्ते च तैर्दृष्टास्तापसा मूर्तिपंचकैः ॥ २१ ॥ उचुस्ते तु समूहेन तान्नृषीनागतान्नृप ॥ आदित्येश्वरतीर्थेस्मिन्यूयं नूनं गमिष्यथ ॥ २२ ॥ तत्रास्मत्स्वामिनः सर्वे तिष्ठंति कृतसंश्रयाः ॥ आश्रिता जीवनार्थाय नर्मदातटमुत्तमं ॥ २३ ॥ प्रस्थाप्याः सत्वरं सर्वे ते भवद्भिर्मुनीश्वराः ॥ तत्तेषां वचनं श्रुत्वा ते विप्रा शंसितव्रताः ॥ २४ ॥ प्रजग्मुर्नर्मदातीरं दृष्ट्वा रेवां द्विजोत्तमाः ॥ प्रशांताश्च स्तुवंते तां जयदेवि नमोस्तु ते ॥ २५ ॥ नमोस्तु ते सिद्धगणै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निषेविते नमोस्तु ते सर्वपवित्रमंगले ॥ नमोस्तु ते विप्रसहस्रसेविते नमोस्तु ते रुद्रसमुद्भवे शिवे ॥ २६ ॥ नमोस्तु ते सर्वपवि-
त्रशेखरे नमोस्तु ते देवि वरप्रदे शुभे ॥ नमोस्तु ते शीतजले सुखप्रदे सरिद्वरे पापहरे विशोधने ॥ २७ ॥ अनेकभुतौघसुसेवितां
गे गंधर्वयक्षोरगसंश्रितांगे ॥ महागजौघैर्महिषैर्वराहैरापीयसे तोयमहोर्मिमाले ॥ २८ ॥ नमोस्तु सर्वेश्वरि सर्वभूते विमोचयास्मा-
नघपाशबद्धान् ॥ भ्रमंति तावन्नरकेषु मर्त्या यावत्त्वांभो नहि संस्पृशंति ॥ २९ ॥ अनेकसंसारभयार्दितानां पापैरनेकैरभिवेष्टिता-
नां ॥ गतिस्त्वमंभोजसमानवक्त्रे द्वंद्वैरनेकैरभिसंवृतानां ॥३०॥ नद्योपि पूता विमला भवंति त्वत्तोयमासाद्य न संशयोत्र ॥ दुःखा-
तुराणामभयं ददासि देवैरनेकैरभिपुजितासि ॥ ३१ ॥ विण्मूत्रकीटार्णवमग्नदेहा भ्रमंति तावन्नरकेषु जीवाः ॥ महानिलोद्भूततरंगभंगं
यात्त्वांभो नहि संस्पृशंति ॥ ३२ ॥ म्लेंछाः पुलिंदास्त्वथ यातुधानाः पिबंति येंभस्तव देविपुण्यं ॥ तेमुक्तपापाः प्रभवंति सद्यः
किमत्र विप्रा भवतापभीताः ॥ ३३ ॥ सर्वाहिनद्यःक्षयमभ्युपेता घोरे युगेस्मिन्कलिनावसृष्टे ॥ त्वं भ्राजसे देवि जलौघपूर्णा
दिवीव नक्षत्रपथीव गंगा ॥ ३४ ॥ तवप्रसादाद्वरदेविशिष्टे कालं यथेमं परिपालयित्वा ॥ यास्याम मोक्षं खलु मुक्तबंधा
स्वयं तथा त्वं कृपया कुरुष्व ॥ ३५ ॥ त्वामाश्रितास्त्वां शरणं गताःस्म गतिस्त्वमंबे वपितेवपासि ॥ त्वां संश्रिता या
वदिमं सुघोरं कालं त्वनावृष्टिहतं क्षिपामः ॥ ३६ ॥ रुद्रोद्भवे देवधुनिप्रसन्ना येषां सुधासारजले मले त्वं ॥ किं यज्ञदानैः सुतपो
भिरार्जितैस्तेषां सुखस्वर्ग विमुक्तिदात्वं ॥३७॥ योगाभ्यासेन किं तेषां किमन्यैस्तीर्थ सेवनैः ॥ किं तपोभिः प्रदानैर्वा ये त्वयासं-
गभाजिनः ॥ ३८ ॥ एवं स्तुता तदा देवी नर्मदा सरितां बरा ॥ भूत्वा देवी समक्षा तद्विप्रवृंदमुवाचह ॥ ३९ ॥ श्रीमार्कंडेय उ-
वाच ॥ पठंति ये स्तोत्रमिदं नरेंद्र श्रृण्वंति भक्त्या परया प्रशांताः ॥ ते यांति रुद्रं वृषसंयुतेन यानेन दिव्यांरभूषणाढयाः
॥ ४० ॥ ये स्तोत्रमेतत्सततं जपंति स्नात्वा तु तोयेन तु नर्मदायाः ॥ देहावसाने सरिदुत्तमेयंगतिं विशुद्धामचिराद्ददाति ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रातः समुत्थाय तथा शयानो यः कीर्तयेतानुदिनं स्तवेंद्रं ॥ देहक्षये स्वे सलिले ददाति समाश्रयं तस्य महानुभावा ॥ ४२ ॥
प्रसन्ना नर्मदादेवी स्तोत्रेणानेन भारत ॥ जलेनाप्यायितान्विप्रान् ददौ वरमनुत्तमं ॥ ४३ ॥ योगिगम्यं पदं दिव्यं अमृतं शाश्वतं
ध्रुवं ॥ दुर्लभं यत्सुरैः सर्वैर्मत्प्रसादाद्विलप्स्यथ ॥ ४४ ॥ इति तेब्राह्मणा राजन् लब्ध्वा तं वरमुत्तमं ॥ स्थिता तत्रैव सुप्रीता द-
दृशुः परमद्भूतं ॥ ४५ ॥ दृष्टास्ते पुरुषाः पार्थ नर्मदाजलतीरगाः ॥ स्नानदेवार्चनरताः पंचापि च सुतेजसः ॥ ४६ ॥ दृष्टास्ते
च महाराज यथातदवधारय ॥ ४७ ॥ विप्राऊचुः ॥ वनांते महिला युग्मं दृष्टं रौद्रं भयावहं ॥ त्रयो वृद्धाश्च पुरुषाः पाशहस्ता
भयंकराः ॥ ४८ ॥ दुर्द्धर्षा दुर्निरीक्षाश्च इतश्चेतश्च चंचलाः ॥ व्याहरंत इमा वाचो अस्माकं पतयः स्थिताः ॥ ४९ ॥ तैस्तु य-
द्वचनं प्रोक्तं तत्सर्वं कथयामहे ॥ अस्माकं पुरुषाः पंच तत्र तिष्ठंति सत्तमाः ॥ ५० ॥ ते प्रस्थाप्या हि वेगेन सर्वेस्मत्पतयो
द्विजाः ॥ ५१ ॥ श्रीमार्कंडेय उवाच ॥ अथ तेपुरुषा पंच श्रुत्वां वाक्यमिदं तदा ॥ परस्परं निरीक्षंते वदंति च मुहुर्मुहुः
॥ ५२ ॥ के ते कुतः समायाता किं तेषां कार्यमुत्तमं ॥ ५३ ॥ ऋषय ऊचुः ॥ इति तत्कथितं यैस्तु तच्छृणुध्वं यथातथं
॥ तीर्थावगाहनं पुण्यं दक्षिणोत्तरतः कृतं ॥ ५४ ॥ पंचभिस्तैर्नरैर्भक्त्या तत्तत्पापं व्यपोहितं ॥ निष्पापास्त्वद्य ते
जातास्तीर्थस्यास्य प्रभावतः ॥ ५५ ॥ शृण्वंतु ऋषयः सर्वे तपोनिष्ठा महौजसः ॥ पातकान्यतिघोराणि यान्याचिं-
त्यानि देहिनां ॥ ५६ ॥ कृतानि तानि सर्वाणि पंचाभिः पंचमुख्यतः ॥ एकेन पापमतिना गुरुदारा निषेविता ॥ ५७ ॥
हृतं चान्येन ब्रह्मस्वं सुवर्णं वै महाधनं ॥ एकेन पापिना विप्रो धनार्थं निहतो द्विज ॥ ५८ ॥ सुरापानमथान्येन कृतं वै कामतः
पुरा ॥ गोवधश्च कृतोन्येत कथंचिदपि पापिना ॥ ५९ ॥ एवं पापानि सर्वेषां संजातान्यपि कामतः ॥ प्रत्यक्ष्याण्यपि तान्येवं
वयमेव द्विजोत्तमाः ॥ इति तैरुक्तपूर्वं नोवनांते संस्थितैस्तदा ॥ ६० ॥ श्रीमार्कंडेय उवाच ॥ ब्राह्मणानां तुतद्वाक्यं श्रुत्वाते वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्मयान्विताः ॥ सद्यएव तदा जाता ज्ञात्वा वै गतकल्मषाः ॥ ६१ ॥ परस्परं वदंत्येवं प्रभावं तीर्थसंभवं ॥ अस्माकं पातकं न-ष्टमज्ञानात् ज्ञानतः कृतं ॥ ६२ ॥ सुतीर्थस्य प्रभावोयं यन्नोजातं विशोधनं ॥ पातकानां प्रवेशोत्र नकश्चिदपि विद्यते ॥ ६३ ॥ एवं संचिंत्य ते सर्वे पापिष्ठाः पापशंकिताः ॥ आत्मनो देहनाशाय मतिं चक्रुः समाहिताः ॥ ६४ ॥ कृत्वा समिद्धं ज्वलनं वि-चिंत्य हृदये हरिं ॥ स्नात्वा रेवाजले पुण्ये तर्पिताः पितृदेवताः ॥ ६५ ॥ प्रणम्य भास्करं देवं हृदि ध्यात्वा जनार्दनं ॥ प्रद-क्षिणं ततः कृत्वा ज्वलितं जातवेदसं ॥ ६६ ॥ पतिताः पांडवश्रेष्ठ पापोद्विग्ना नरास्तदा ॥ सात्विकीं वासनां कृत्वा त्यक्त्वासांस-रिकंसुखं ॥ ६७ ॥ तत्क्षणाच्च ततो जाता स्तस्मिंस्तीर्थे नरोत्तमाः ॥ विमानस्था तदा दृष्टा ब्राह्मणैस्तैर्युधिष्ठिर ॥ ६८ ॥ आश्चर्यमतुलं दृष्टं मुनिभिर्नर्मदातटे ॥ तदाप्रभृति ते सर्वे रागद्वेषविवर्जिताः ॥ ६९ ॥ रवितीर्थं मुनिश्रेष्ठा न त्यजंति मुमुक्षवः ॥ ७० ॥ श्रीमार्कंडेय उवाच ॥ सुतीर्थस्यास्य यत्पुण्यं तच्छृणुष्व नराधिप ॥ पीडितो वृद्धभावेन भक्तिप्रीतो नरेश्वर ॥ ७१ ॥ उद्देशात्कथयिष्यामि प्रभावं तीर्थसंभवं ॥ कुरुक्षेत्रं यथापुण्यं रवितीर्थश्रुतं तथा ॥ ईश्वरेण पुराख्यातं देवसिद्धगणैःसह ॥ ७२ ॥ ईश्वर उवाच ॥ मार्तंडग्रहणे प्राप्ते ये व्रजंति षडाननं ॥ रवितीर्थे कुरुक्षेत्रे तुल्यमेतत्फलं भवेत् ॥ ७३ ॥ स्नाने दाने तथा जाप्ये होमे चैव विशेषतः ॥ कुरुक्षेत्रसमं पुण्यं जायते नात्र संशयः ॥ ७४ ॥ ग्रामे वा यदिवा रण्ये पुण्या सर्वत्र नर्मदा ॥ रवितीर्थे विशेषेण सूर्यपर्वणि सत्तम ॥ ७५ ॥ षष्ठ्या सूर्यदिने भक्त्या व्यतिपाते च वैधृते ॥ संक्रांतौ ग्रहणे वाथ ये व्रजंति जितेंद्रियाः ॥ ७६ ॥ कामक्रोधविनिर्मुक्ता रागद्वेषविवर्जिताः ॥ उपोष्य परया भक्त्या देवस्याग्रे नराधिप ॥ ७७ ॥ रात्रौ जागरणं कृत्वा दीपमुज्वाल्य यत्नतः ॥ कथ पौराणिकिं पार्थश्शृणुयाद्भक्तिमान्नरः ॥ ७८ ॥ ऋग्वेदं च यजुर्वेदं सामवेदमथर्वणं ॥ ऋच मेकां जपेद्यस्तु सवै वेदफलं लभेत् ॥७९॥ गायत्र्या वा यजुर्वेदफलं प्राप्नोतिमानवः ॥ प्रभाते भोजयेद्विप्रान् विशेषां-

CC-0. In Public Domain. Digitization by eGangotri

नेन भारत ॥ ८० ॥ भूमिवस्त्रान्नदानेन स्वर्णदानेन भक्तितः ॥ छत्रोपानहशय्यानां ग्रहदानेन पांडव ॥ ८१ ॥ ग्रामधूर्वाहदानेन
गजकन्याहयादिभिः ॥ विद्याशकटदानेन सर्वसत्वाभयेन च ॥८२॥समानि सर्वदानानि रवितीर्थे युधिष्ठिर ॥ तीर्थसेवाप्रभावेन व्या-
धयो यांति संक्षयं ॥ ८३ ॥ शत्रवो मित्रतां यांति विषमप्यमृतायते ॥ ग्रहाभवंति सुप्रीता विशेषेण दिवाकरः ॥ ८४ ॥ रवि
तीर्थे समासाद्य प्राणत्यागं करोति यः ॥ सूर्यलोकं समासाद्य मोदते कल्पमक्षयः ॥ ८५ ॥ सप्तम्यां शुक्लपक्षस्य रविवारो यदाभवेत्
॥ तथा सूर्योपरागे च दानं कोटिगुणं भवेत् ॥ ८६ ॥ एतत्ते सर्वमाख्यातं रवितीर्थफलं नृप ॥ ये शृण्वंति नरा भक्त्या रवितीर्थ
स्य संभवं ॥८७॥ विमुक्ताः सर्व पापौघैः सूर्य लोकं व्रजंति ते॥ गोदानेन तु यत्पुण्यं यत्पुण्यं व्रतसेवनात् ॥८८॥ केदारदर्शने पुण्यं
तत्पुण्यं कीर्तनाद्भवेत् ॥ अश्वमश्वत्थसेवायां तिलपात्रप्रदेपि वा ॥ ८९ ॥ तत्फलं समवाप्नोति आदित्येश्वरकीर्तनात् ॥ पापानी
च प्रलीयंते भिन्नपात्रे जलं तथा ॥ ९० ॥ तीर्थस्याभिमुखो नित्यं जायते सौ नृपोत्तम ॥ श्रुत्वा तीर्थप्रभावं हि भवेच्च विमलं
मनः ॥ ९१ ॥ गुह्याद्गुह्यतरं तीर्थं कथितं यन्नकस्यचित् ॥ तव भक्त्यातितुष्टेन कथितं पांडुनंदन ॥ ९२ ॥ श्रोतव्यं हि सदा
भक्त्या पापक्षयमभीप्सुभिः ॥ ९३ ॥ इति श्रीरेवामाहात्म्ये उत्तरे आदित्येश्वरतीर्थनाम अष्टसप्ततितमोध्यायः ॥ ७८ ॥ श्रीमा-
र्कंडेय उवाच ॥ तत्र कंबलनाथस्य पूजनं पापनाशनं कंबलेश्वरपूजायां कार्यसिद्धिर्भवेन्नृणां ॥ १ ॥ तीर्थमार्गभवे द्वारि स्थापितः
सर्वदेवतैः पूजयित्वा तु तं देवं योदद्यात्कंबलं नृप ॥ २ ॥ सभवेद्विघ्ननिर्मुक्तः सुखं पूर्णफलं भवेत् ॥ कष्टानि विलयं यांति निः-
प्रत्यूहगतिर्भवेत् ॥ ३ ॥ इति उत्तरे कंबलनाथपूजा ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र भीमकुल्यासमागमं ॥
नर्मदाउत्तरे कूले पुण्यं ऋषिनिषेवितं ॥ १ ॥ शंभोर्यत्सप्तमं नाम भीमेती प्रथितं श्रुतौ ॥ तद्रूपं नामचासाद्य देवानाम-
भयप्रदः ॥ २ ॥ शूलपाणिर्महादेवो देवैः सर्वैः समावृतः ॥ संस्थापयामास शिवं स्वयं भीमेन संज्ञया ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असुराणां क्षयं चक्रे पूजितः संस्तुतः सुरैः ॥ संगमेश्वरनाम्ना च स्वयं तस्थौ महेश्वरः ॥ ५ ॥ तत्र स्नानं प्रकुर्वंति ते नराः पुण्यजीविनः ॥ पितॄणां श्राद्धदानेन तृप्तिर्द्वादशवार्षिका ॥ ६ ॥ इति उत्तरे भीमकुल्यासंगमे भीमेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ श्रुत्वा संस्थापितं लिंगं भीमेन सुरपूजितं ॥ ततोहं पूजनार्थं च यात्राभावेन पांडव ॥ १ ॥ मयाच स्थापितलं लिंगं ममनाम्ना सुशोभनं ॥ मार्कंडेश्वरनामानं पूजयेद्भक्तिसंयुतः ॥ २ ॥ तस्य भीमेश्वरे यात्रा संपूर्णा जायते नृप ॥ ३ ॥ इति उत्तरे श्रीरेवामहात्म्येमार्कंडेश्वरंनाम एकोनाशीतितमोध्यायः॥ ७९ ॥ श्रीमार्कंडेय उवाच॥ ततो गच्छेत राजेंद्र पिप्पलादाश्रमं शुभं यत्र सिद्धो महाभागः पिप्पलादो महामुनिः॥ १ ॥ बाल्यात्प्रभृति वश्यात्मा तपस्तेपे सुदुश्चरं॥ विविक्ते नर्मदातीरे दक्षिणे पुण्यलक्षणे॥ २॥ इह कृत्वा श्रमं पुण्यं ऋषिसिद्धजनान्वितः ॥ प्रतिष्ठाप्य शिवं शांतं स्वनाम्ना भुक्तिमुक्तिदं ॥ ३ ॥ त्रिकालसेवनासक्तो रेवातीरे मनोद्भवैः ॥ पूजयत्यनिशं पुष्पैः फलैश्च स्वयमर्जितैः ॥ ४ ॥ कालेन बहुना पार्थ तस्य तुष्टो महेश्वरः॥ उवाच वरदोस्मीति साक्षाद्रूपो जगत्पतिः ॥ ५ ॥ पिप्पलाद उवाच ॥ यदि तुष्टोसि देवेश वरार्हो यद्यहं मतः ॥ स्थापितोसि स्वनाम्ना मे स्थाने चास्मिन् स्थिरो भव ॥ ६ ॥ यो यत्प्रार्थयते देव संपूज्य त्वां महेश्वर ॥ अष्टम्यां च चतुर्दश्यां स्नात्वा रेवाजले शुभे ॥ ७ ॥ तथा तत्तस्य देयं वै यदि देयो वरो मम ॥ पितरः श्राद्धदानेन तथा च तिलतर्पणैः ॥ ८ ॥ रेवातोयोद्भवैर्देव सदा दर्शादिपर्वसु ॥ पितरः स्तस्य तृप्यंतु चिरकालं मुदान्विताः ॥ ९ ॥ ऋषीणां संन्निधौ देहि स्थानं मर्त्यैः सुदुर्लभं ॥ यत्ते सप्तर्षयः प्रीताः वरं स्थानं चिरं श्रुताः ॥ १० ॥ तेषां मे सन्निधौ देव प्रार्थये त्वां तवांतिकं ॥ ११ ॥ श्रीमहेश उवाच ॥ एवं भवतु ते विप्र यद्यन्मनसि वांछितं ॥ स्थास्ये हमत्रत्वन्नाम्ना पिप्पलाद महामते ॥ १२ ॥ श्राद्धमत्र नरैर्दत्तं पितृणां तृप्तिकारकं ॥ अथान्यदपि विप्रर्षे यत्तेमनसि वांछितं ॥ १३ ॥ भविष्यत्ये वतत्त्वै नराणां विजितात्मनां ॥ इत्युक्त्वांतर्दधे देवो महेशानो युधिष्ठिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ पिप्पलादोपि तीर्थेवै ततः स्थित्वा चिरं नृप ॥ विधूतपापपंकोसौ स्थानमिष्टं ततो गतः ॥ १५ ॥ इति
ते कथितं राजंस्तीर्थं परमशोभनं ॥ श्रुत्वापि यस्य माहात्म्यं मुच्यते किल्बिषान्नरः ॥ १६ ॥ इतिश्रीरेवाखंडे ॥ दक्षिणे पि-
प्पलेश्वरतीर्थनाम अशीतितमोध्यायः ॥ ८० ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र कराहीश्वरसंज्ञितं ॥ नर्मदाउत्तरे कूले
तीर्थं सुरनिषेवितं ॥ १ ॥ गरुडेन धृतः पूर्वं गजरूपो महासुरः ॥ भक्षितश्चात्र शिखरे पर्वतस्याद्भुतोपमः ॥ २ ॥ करोटिस्तस्य
शिखरात्पपात जलसन्निधौ ॥ रेवायाः पांडवश्रेष्ठ स्पर्शाद्दिव्यं वपुर्दधौ ॥ ३ ॥ ज्ञात्वा तीर्थप्रभावं सस्तपस्तेपे तुदानवः ॥
दृष्ट्वात्मानं दिव्यदेहं शांतावस्थः शतं समाः ॥ ४ ॥ ततः सभगवानीशः प्रत्यक्षः समजायत ॥ ज्ञात्वा संशोषिततनुं शांतात्मानं
तु दानवं ॥ ५ ॥ ईश्वर उवाच ॥ भोवत्स दानवेंद्र त्वं किं क्लिश्यतिवदाद्य मे ॥ प्रसन्नोस्मि महाभाग वरं वरय हृद्गतं
॥ ६ ॥ दानव उवाच ॥ नमामि देवमीशानं जगतः प्रभवाव्ययं ॥ वरदं विश्वजनकं सने पापं व्यपोहतु ॥ ७ ॥ यद्वपुः प्र-
भवा देवी रेवा पापौघनाशनी ॥ स एव भगवान् प्रीतः किं न दद्यात्कृपाकरः ॥ ८ ॥ धर्मो ज्ञानं च वैराग्यं सदा यच्छूलसंस्थितं
॥ भुक्तिमुक्तिप्रदो देवः सदुःखं किन्न नाशयेत् ॥ ९ ॥ यन्मौलिसंस्थिता गंगा नेत्रे कालानलःस्थितः ॥ अमृतांशुः स्थितो भाले
सदा तद्वणनास्तु मे ॥ १० ॥ जगद्धिताय विधृतं कालकूटं विषं गले ॥ येन सो व्या च्छिवो मह्यं नीलकंठः पिनाकधृक् ॥ ११ ॥
स्मशानवासि भस्मांगो भूतेशो व्यालभूषणः ॥ परिधानांबरं चर्म किंन्नदद्याच्छिवो मम ॥ १२ ॥ एवं स्तुतवतस्तस्य पुनः
प्राह महेश्वरः ॥ प्रसंन्नोस्मि प्रसंन्नोस्मि ब्रूहि यत्तेभिवांछितं ॥ १३ ॥ अदेयमपि दास्यामि दानवेश त्वया स्तुतः ॥ स्तोत्रेणानेन
नृवरो योमांस्तोष्यति नित्यशः ॥ १४ ॥ तस्य दास्यामि भोगान्वै सुखं ज्ञानं च निर्मलं ॥ १५ ॥ दानव उवाच ॥ यादेतुष्टोसि
देवेश वरं दास्यसि वांछितं ॥ पर्वतान्मे करोटिर्या पपात गजरूपिणः ॥ १६ ॥ यत्र सा पतिता तत्र तीर्थमत्संज्ञया कुरु ॥ ग्रामे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवश्च तीर्थं च करोटीश्वरनामतः ॥ १७ ॥ यत्र मे जलसंस्पर्शात् करोटिर्हि व्यता भवत् ॥ पापाद्वोपरतं चेतः सुसांतं त्वयि भक्ति-
मत् ॥ १८ ॥ तत्र यः कुरुते स्नानं तर्पणं च तिलोदकैः ॥ तस्य पापक्षयः सद्यो जायतां सुरसत्तम ॥ १९ ॥ इंदुक्षये क्षयेमासि
गजछायार्कपर्वणि ॥ व्यतिपाते च संक्रांतौ वारेच रविसोमयोः ॥२०॥ स्नानदानार्चनैः श्राद्धैस्तिलतोयैश्च तर्पणैः ॥ फल लक्षगुणं
चास्तु कुरुक्षेत्रे यथा नृणां ॥ २१ ॥ अष्टम्यां च चतुर्दश्यां पक्षयो रुभयोरपि ॥ उपोषणपरो यस्तु पूजयेत्त्वां महेश्वर ॥ २२ ॥
करोटीश्वरनामानं कुर्वन् जागरणं निशि ॥ २३ ॥ स पापसंघनिर्मुक्तः पुत्रपौत्रसमन्वितः ॥ भुक्त्वेह विपुलान् भोगान्
अंतेलोकं प्रयातु ते ॥ २४ ॥ ईश्वर उवाच ॥ एवं हि भवतां सर्वं यत्त्वया परिकीर्तितं ॥ करोटिस्थानमासाद्य
पश्य लिंगं ममोद्गतं ॥ २५ ॥ गजासुर महाबाहो पूजयस्वात्रमां सुखं ॥ ततो गजासुरेणादौ कृता पूजा शिवाज्ञया ॥ २६ ॥
वन्यैः पुष्पैश्च पत्रैश्च फलैर्नानाविधैरपि ॥ समभ्यर्च महेशानं पुनस्तुत्वा प्रणम्य च ॥ २७ ॥ उवाच स महेशानं धूर्जटिं प्रणत-
स्थितः ॥२८॥ गजासुरउवाच ॥ पुनर्याचे महादेव प्रसन्नो यदिसर्वज्ञः॥ वरत्रयं मम प्रीत्यै दातुमर्हसि शंकर ॥२९॥ यथा विषं यथा
वन्हिं यथा हिगणभूषणं ॥ मुंडमाळां यथा धत्से यथा भस्मानुलेपनं ॥ ३० ॥ व्याघ्रचर्मोत्तरीयं च तथामे कृत्तिमावह ॥ गजच-
र्मपरिधानो भव भूतपतेव्यय ॥ ३१ ॥ इत्युक्तः प्रददौ दैत्यः सुगंधं श्लक्ष्णमुत्तमं ॥ स्वयंस्वचर्म देवाय परिधानार्थमुद्धितम् ॥३२॥
पुनर्ययाचे देवेशं गणमुख्यत्वमात्मनः ॥ शांकरे वसतिं लोके भक्तिं चाव्यभिचारिणीं ॥ ३३ ॥ तृतीयं च वरं याचे गरुडस्यो
पकारकं ॥ ३४ ॥ दानव उवाच ॥ जयदेव महाभाग शंकर त्रिपुरांतक ॥ गरुडेन कृतोमह्यमुपकारः स्वयं महान् ॥ ३५ ॥
पापात्मा पापरूपोहं पापकर्मा सदैव हि ॥ निगृह्य येन निःपापःकृतो रुद्रगणस्तथा ॥ ३६ ॥ वांछासितस्योपकृतिं वैनतेयस्य धू-
र्जटे ॥ यत्र स्थित्वा कृतं तेन स्वयं मन्मांसभक्षणं ॥ ३७ ॥ तत्रैव तस्यनाम्ना त्वां स्थापयिष्ये महेश्वर ॥ तत्रापि न त्वया त्याज्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानं पशुपते क्वचित् ॥३८॥ गरुडेश्वरनामानं यस्त्वा पूजयति प्रभो ॥ तस्य सर्वार्थ सिद्धिस्यात्तथा कुरु महेश्वर ॥ इत्युक्त्वा प्रणतो भूमौ साष्टांगमसुरोत्तमः ॥ ३९ ॥ महेश उवाच ॥ उत्तिष्ठोत्तिष्ठ भद्रं ते गजासुर महामते ॥ एवं प्रदत्तं वै सर्वं मया तुष्टेन तेनघ ॥ ४० ॥ धृतं ते चर्म वासो मे प्रीत्या वरमभीक्षितं ॥ गरुडेश्वर संज्ञं मां स्थापयित्वा गिरेस्तटे ॥ ४१ ॥ विहृत्य च चिरं स्वर्गे भविता त्वं गणो मम ॥ एवमुक्त्का महादेवस्तत्रैवांतर्दधे नृप ॥ ४२ ॥ दानवोपि ततः स्नात्वा नर्मदांभसि भारत ॥ करोटीश्वरमभ्यर्च्य जगाम गिरिमूर्द्धनि ॥ ४३ ॥ तत्र संस्थाप्य परमं शिवलिंगमनुत्तमं ॥ गरुडेश्वरनामानं समभ्यर्च्य स्वयं च तं ॥ ४४ ॥ जगामाकाशमाविश्य विमानेनार्कवर्च्चसा ॥ ४५ ॥ श्रीमार्कंडेय उवाच ॥ एतत्ते कथितं पार्थ करोटीश्वर मुत्तमं ॥ तीर्थं तीर्थवरं पुण्यं भुक्तिमुक्तिफलप्रदं ॥ ४६ ॥ अत्र तीर्थे नरः स्नात्वा यः कश्चित्पूजयेच्छिवं ॥ सयाति शिवसान्निध्यं यावदिंद्राश्चतुर्दश ॥४७॥ अष्टम्यां च चतुर्दश्यां शुक्लेकृष्णेथवानृप ॥ उपोष्य शंकरस्याग्रे रात्रौ जागरणेनच॥४८॥स्वपितॄनुद्धरेन्नूनं दशपूर्वान् दशापरान्॥ प्रभाते विमले तद्वत् पूजयेत्रिदिवेश्वरं ॥४९॥ पंचामृतेन संस्नाप्य श्रीखंडेनावगुंठयेत् ॥ पुष्पैश्चापि यथाप्राप्तैः पूजयेत्तं प्रयत्नतः ॥ ५० ॥ बहुरूपं जपेन्मंत्रं दक्षिणाशां व्यवस्थितः ॥ यथोक्तेन विधानेन नाभिमात्रे जले स्थितः ॥ ५१ ॥ जलांजलिं तु प्रेताय क्षिपेद्दक्षिणदिग्मुखः ॥ दद्याच्छ्राद्धं च सर्वेषां स्वाचारे ब्राह्मणैर्नृप ॥ ५२ ॥ गोहिरंण्येन संपूज्य वस्त्रतांबुलभोजनैः ॥ भूषणैः पददानैश्च ब्राह्मणान्पांडुनंदन ॥ ५३ ॥ अस्मिंस्तीर्थे यथाशक्तिः संपन्नांनेन भारत ॥ एकस्मिन् भोजिते विप्रे लक्षं भवति भोजितं ॥ ५४ ॥ धान्यं नानाविधं वापि दद्याद्रूप्यं गजं ॥ अक्षयं फलमाप्नोति चिरंच दिवि मोदते ॥ ५५ ॥ तत्र तीर्थे तु यः कश्चिद्देहं त्यजति मानवः ॥ यावदस्थीनि तिष्ठंति नर्मदातोयमध्यतः ॥ ५६ ॥ तावद्वसति धर्मात्मा शिवलोके सुदुर्लभे ॥ ततः कालाच्च्युतस्तस्मादिहमानुष्यतां गतः ॥ ५७ ॥ महाधनपतिः श्रीमान् जायते राजपूजितः ॥ पुनः स्मरति तत्तीर्थं तत्र गत्वा नृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. पोत्तम ॥ ५८ ॥ करोटीश्वरमभ्यर्च्य प्राप्नोति परमां गतिं ॥ दुर्लभां योगिगम्यां वै यां प्राप्य नानुशोचति ॥ ५९ ॥ तस्मिंस्तीर्थे अ.८२
८२ नृपश्रेष्ठ कारयेद्यः सुरालयं ॥ तृणैः काष्ठैश्च पाषाणैर्न स शोच्यो नराधिप ॥ ६० ॥ श्रुत्वा तीर्थस्य माहात्म्यं करोटीश्वरसंभवं ॥ य- ८३
८३ त्र यत्र स्थितो वापि मुच्यते दुःकृतान्नरः ॥ ६१ ॥ इति श्रीरेवामहात्म्येउत्तरे करोटीश्वरतीर्थनाम एकाशीतितमोध्यायः ॥ ८१ ॥
श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदादक्षिणे तटे ॥ क्रोशमात्रे स्थितं पुण्यं पिप्पलेश्वरतीर्थतः ॥ १ ॥ शक्रतीर्थं सु-
विख्यातमशेषाघौघ नाशनं ॥ जृंभकुंभनिकुंभाद्यैर्हृते राज्ये सुराधिपः ॥ २ ॥ इहागत्य तपस्तेपे स्मरन् देवं वृषध्वजं ॥ सर्वाहि-
तक्षयकरं सर्वैश्वर्यप्रदं शिवं ॥ ३ ॥ पदभ्रष्टः पुरा राजन् स्तोत्रैः संपूजनैस्तथा ॥ नियमैस्तोषयामास हरं पापहरं परं ॥ ४ ॥
ततः संतोषितस्तेन भवानीवल्लभो विभुः ॥ ददौ राज्यं तदतुलं शक्तिं जृंभवधाय च ॥ ५ ॥ शक्रोपि पांडवश्रेष्ठ लब्ध्वा राज्यं नि-
जं पुनः ॥ मत्वा मनसि सामर्थ्यं जृंभादिरिपुनाशने ॥ ६ ॥ स्नात्वा शक्रेश्वरं नाम शिवं संस्थापयत्ततः ॥ तत्र संपूज्य देवेशं त-
तः स्वर्गं जगामह ॥ ७ ॥ एवं पुण्यतमं तीर्थं संजातं वसुधातले ॥ कृष्णपक्षे चतुर्दश्यां कार्तिकेमासि यो नरः ॥ ८ ॥ उपोष्य
पूजयेद्देवं सर्वपापैः प्रमुच्यते ॥ दुःस्वप्नं च नरैर्दृष्टं सुस्वप्नं जायते नृप ॥ ९ ॥ ग्रहशांतिर्भवेत्तेषां दुर्निमित्तं प्रशाम्यति ॥ शक्रेश्वरं
प्रपश्यंति ये भक्त्या पांडुनंदन ॥ १० ॥ तेषां जन्मकृतं पापं नश्यते नात्र संशयः ॥ गोप्रदानं प्रकर्तव्यं तत्र ब्राह्मणपुंगवे ॥११ ॥
धूर्योवा दीयते तत्र सर्वांगरुचिरो नृप ॥ दानं देय यथाशक्त्या स्वर्गवासमभीप्सता ॥ १२ ॥ एतत्ते सर्वमाख्यातमिंद्रेश्वरफलं नृप ॥
यत् श्रुत्वा तीर्थमाहात्म्यं नशत्रुभयमाप्नुयात् ॥ १३ ॥ इति श्रीरेवामहात्म्ये दक्षिणे शक्रेश्वरतीर्थनाम व्द्यशीतितमोध्यायः ॥ ८२ ॥
श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र कुमारेश्वरमुत्तमं ॥ प्रसिद्धं सर्वतीर्थानां करोटीश्वरसंन्निधौ ॥ १ ॥ षण्मुखेन पुरा तात
देवतीर्थे महेश्वरं ॥ समाराध्य परं भक्त्या सिद्धिः प्राप्ता नरेश्वर ॥ २ ॥ देवसैन्याधिपो जातः सर्वशत्रुविमर्दनः ॥ उग्रतेजा माहा ११०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मासौ संजातस्तीर्थ सेवानात् ॥ ३ ॥ तदाप्रभृति तत्तीर्थं संजातंनर्मदातटे ॥ तत्रतीर्थे तु यो गत्वा एकचित्तो जितेंद्रियः ॥ ४ ॥
कार्तिकस्य चतुर्दश्यामष्टम्यां च विशेषतः ॥ पंचामृतेन दिव्येन स्नापयेत्परमेश्वरं ॥ ५ ॥ स सामर्थ्यमवाप्नोति शत्रुभिर्नच बाध्यते
॥ पूजनं गीतवादित्रं नीराजननिवेदितं ॥ ६ ॥ पिंडदानं प्रकर्तव्यं पितॄणां तृप्तिकारकं ॥ षट्कर्मनिरतानां च ब्राह्मणानां नृपोत्तम
॥ ७ ॥ यत्किंचिद्दीयते तत्र तदक्षयफलं लभेत् ॥ सर्वतीर्थोत्तमं तीर्थं कुमारेण विनिर्मितं ॥ ८ ॥ चंदनं योगपट्टं च कंबलं सित-
वाससी ॥ यज्ञोपवीतदानं च ब्राह्मणानां यतात्मनां ॥ ९ ॥ छत्रं कमंडलुं चैव यथासंपन्नभोजनं ॥ प्रदत्तं द्विजवर्येभ्यो निखिलं
षण्मुखप्रियं ॥१०॥ आयुष्यं भोगसौख्यानां साधनं स्वर्गतिप्रदं ॥ एतत्ते सर्वमाख्यातं कुमारेश्वर मुत्तमं ॥११॥ कुमारेश्वरमाहात्म्यं
यः शृणोतीह मानवः॥ सर्वपापविनिर्मुक्तो देहांते स्वर्गमाप्नुयात् ॥१२॥ इति उत्तरे कुमारेश्वर तीर्थ नाम ॥ श्रीमार्कंडेय उवाच ॥
अतःपरं महाराज आगस्त्येश्वरमुत्तरे ॥ सर्वपापहरं तीर्थं स्थितं क्रोशांतरे नृप ॥ १ ॥ अगस्त्येन मुनींद्रेण स्थापितं नर्मदातटे ॥
स्पर्द्धमानस्य विंध्याद्रेमेरुणा सह भारत ॥ २ ॥ वर्धमानस्य शिखरै रुद्धा सूर्यगति र्दिवि ॥ अहोरात्रव्यवस्था च भग्ना सूर्येण ति-
ष्ठति ॥ ३ ॥ ततो ब्रह्मादयो देवाः सर्वेचिंतान्विता किल ॥ अगस्त्यस्याश्रमं गत्वा प्रोचुः सर्वे महामुनिं ॥ ४ ॥ समर्थः सर्वकार्ये-
षु देवकार्ये विशेषतः ॥ विंध्याचलं स्थापयस्व मर्यादायां महामुने ॥ धन्योस्म्यनुगृहीतोस्मि भवंतो यत्रआगतः ॥ ७ ॥ सर्वं-
स्वेन शरीरेण करिष्ये देवनोदितं ॥ देवकार्यं विधातव्यमिति मेहृद्व्रतं सदा ॥ ८ ॥ इत्युरीकृतमाकर्ण्य देवाब्रह्मादयस्ततः ॥ ज-
ग्मुर्यथागतं सर्वे दत्वाशीर्वचनानि च ॥ ९ ॥ अगस्त्योपि ययौ विंध्यं सशिष्यः सहभार्यया ॥ विंध्यमावाहयामास मार्गो मे दी-
यतामिति ॥ १० ॥ ततः कोपभयाद्विंध्यः साक्षान्मूर्तिरुपागतः ॥ अर्घपात्रप्रणामैश्च तोषयामास तं मुनिं ॥ ११ ॥ ब्रूहि कुंभो-
द्भव मुने स्वागतं तेस्तु सत्तम ॥ १२ ॥ अगस्त्य उवाच ॥ तीर्थयात्रां प्रयास्येहं क्षेत्रेष्वायतनेषु च ॥ दक्षिणाशांप्रति श्रीमान्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंतास्मि सहभार्यया ॥ १३ ॥ मार्गो मे दीयतां श्रेष्ठ सुखं यामि यथा तथा ॥ ततो विंध्याद्रिरात्मानं दर्शयामास भारत ॥ १४ ॥ विमृश्य बहुधा कार्यं चिंतां परमवाप्नुवान् ॥ प्रसिद्धोयं ऋषिः श्रीमानगस्त्यः कुंभसंभवः ॥१५॥ क्रोधनस्तब्धविध्वंसी देयः पंथा ततो मया ॥ विचिंत्यैवं ददौ मार्गं प्राप्य वै पूर्वसंस्थितिं ॥ १६ ॥ गच्छ गच्छ ऋषिश्रेष्ठ मार्गो दत्तो मया तव ॥ इत्युक्तवत्यद्रिराज मया चैनं मुनिःपुनः ॥ १७ ॥ अगस्त्य उवाच॥ विंध्याद्रे किंतु याचे त्वां यावदागमनं पुनः ॥ तावद्वृद्धिर्न कर्तव्या मद्वाक्यादात्मनस्त्वया ॥१८॥ अन्यथा मां गतं वापि कोवेत्स्यति नगाधिप ॥ तथेत्युक्ते च गिरिणा ययौ मुनिवरस्ततः ॥१९॥ लोपामुद्रापतिः श्रीमान्सभार्यो दक्षिणां दिशं ॥ उल्लंघ्य पर्वतवरं विंध्यमादिस्थितौ स्थितं ॥२०॥ श्रीमार्कंडेय उवाच ॥ तदावै गच्छता तेन मुनिना नर्मदा तटे ॥ स्थापितं परमं लिंगं स्नात्वा शर्वस्य भारत ॥ २१ ॥ स्वनाम्ना तं तथाभ्यर्च्य वीक्ष्य तीर्थान्यनेकशः ॥ ततस्तमुल्लंघ्य गिरिं जातोगस्त्यः सुरार्थितः ॥ २२ ॥ ततः प्रभृति विख्यातमगस्तेश्वरसंज्ञया ॥ तीर्थं सिद्धिप्रदं पार्थ सुराणां प्रीतिवर्द्धनं ॥ २३ ॥ तत्र स्नात्वा नरो राजन् मुच्यते ब्रह्महत्यया ॥ कृष्णपक्षे चतुर्दश्यां कार्तिकेमासि पांडव ॥ २४ ॥ देवं घृतेन संस्नाप्य संपूज्य च महेश्वरं ॥ सपूर्वपुरुषोपेतो नच्यवेदीश्वरात्पदात् ॥ २५ ॥ तत्र यद्दीयते दानं तथा च घृतकंबलं ॥ भोजनं ब्राह्मणानां च सर्वमक्षयतां व्रजेत् ॥ २६ ॥ तिलोदकं पितॄणां च दत्तं पर्वणि भूपते ॥ श्राद्धं च श्रद्धया दत्तं पितॄणां तृप्तिकारकं ॥ २७ ॥ अगस्त्येश्वरसंज्ञंयः पूजयेद्भक्तितत्परः ॥ स याति शिवलोकं तं यमुमाहरभूषितं ॥ २८ ॥ इति श्रीवायूक्तशिवसंहितायां श्रीनर्मदामहात्म्ये उत्तरे अगत्स्येश्वरतीर्थनाम त्र्यशीतितमोध्यायः ॥ ८३ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र व्यासेश्वरमनुत्तमं ॥ शक्रेश्वरात्तत्तीर्थं स्मृतं कोशांतरे नृप ॥ १ ॥ विश्वप्रख्याततीर्थानि वेदव्यासो विलोकयन् ॥ शूलभेदमिति ख्यातं त्रैलोक्ये यत्पुरापि च ॥ २ ॥ तत्तीर्थमागतो द्रष्टुं व्यासः सत्यवती सुतः ॥ सतीर्थमवगाह्याद्यं शूलपाणिं प्रपूज्यच ॥३॥ पुनर्विवर्तितस्तत्र स्थापयामास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताभ्यामेवं स्तुतः शर्वः साक्षाद्रूपो जगद्गुरुः ॥ प्रोवाच सद्यो भगवान् युवां जातौ भिषग्वरैः ॥ १५ ॥ सर्वव्याधिहरा विद्या विदि-
ता वां भविष्यति ॥ व्याधयो देवलोके ये मर्त्ये पातालगोचरे ॥ १६ ॥ तेषां संशमनोपायं मत्प्रसादाद्विवित्स्यथ ॥ इत्युक्त्वांतर्द-
धे देवो वरं दत्वा यथेप्सितं ॥ १७ ॥ तावुभावश्विनौ तत्र स्थापयित्वा महेश्वरं ॥ वैद्यनाथमितिख्यातं सर्वव्याधिविनाशनं
॥ १८ ॥ संप्राप्य वांछितां सिद्धिं मुदा तौ जग्मतुर्दिवं ॥ तदाप्रभृति विख्यातं तत्तीर्थं पांडवर्षभ ॥ १९ ॥ तत्र स्नात्वा नरो रा-
जन् यथासंतर्प्यपूर्वजान् ॥ आधिव्याधिविनिर्मुक्तः पापनाशमवाप्नुयात् ॥ २० ॥ तथानानोपचारैस्तु पूजयित्वा महेश्वरं ॥ वैद्यनाथं
नृपश्रेष्ठ सर्वलोके महीयते ॥ २१ ॥ दद्यादन्नोदकं तत्र भेषजं च पृथग्विधं ॥ सर्वपापविनिर्मुक्तो भवेद्व्याधिविवर्जितः ॥ २२ ॥ इ-
तिश्रीवायूक्तशिवसंहितायां श्रीनर्मदामहात्म्ये दक्षिणे वैद्यनाथतीर्थनाम चतुराशीतितमोऽध्यायः ॥ ८४ ॥ श्रीमार्कंडेय उवाच ॥
ततो क्रोशांतरे पार्थ तीर्थं परमशोभनं रेवाया उत्तरे कूले केदारमिति विश्रुतं ॥ १ ॥ शांडिल्योनाम धर्मात्मा ब्राह्मणो वेदपार-
गः ॥ अंध्रदेशेषु विख्यातः पुरातीर्थमनाभवत् ॥ २ ॥ केदारदर्शनाकांक्षी नियम्यान्नं स निर्ययौ ॥ कियत्कालेन संप्राप्तो रेवाति-
रमथोत्तरं ॥ ३ ॥ श्रांतो निरन्नः सुकृशः क्षुधाग्लानेंद्रियो नृप ॥ स्नात्वा रेवाजले पुण्ये तर्पयित्वा सुरान् पितॄन् ॥ ४ ॥ सुप्तोः
सौ श्रांतभावेन निद्रारूढो भवत् द्विजः ॥ तावत्स्वप्ने ददर्शाद्यं केदारं वै यथाश्रुतं ॥ ५ ॥ केदार उवाच ॥ भोभो विप्र नया-
तव्यं त्वयाश्रांतेन दूरतः ॥ अहमेवागतो नूनमासि धाराव्रतेनते ॥ ६ ॥ इहैव तिष्ठ मां पश्य स्थितकेदारसंज्ञकं ॥ नियम्यान्नं प्र-
यातं त्वां ज्ञात्वाहं कृपयागतः ॥ ७ ॥ तत्राहं नर्मदातीरे स्थितोस्मि तवसाहसात् ॥८॥ ब्राह्मण उवाच ॥ नमन्येहमिदं किंचित्
यतः सुप्तोस्मि चिंतया ॥ हिमाद्रौ तिष्ठते देवः केदारः पापनाशनः ॥ ९ ॥ तत्रस्थो नर्मदातीरं सदेवः कथमागतः ॥ यदि प्राप्तो-
सि नियतं नमन्ये मूर्तिमागतं ॥ १० ॥ साहसभ्रंशकरणी या मायेयं बिभीषका ॥ यदि लिंगात्मकं देवं केदारमहमीक्षये ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शंकरं ॥ स्वनाम्ना तीरमासाद्य विविक्तं पांडुनंदन ॥४॥ निकटं शूलभेदात्तु सर्वकल्मषनाशनं ॥ स्वयं व्यासेश्वरं देवं स्थापयित्वा महामतिः ॥५॥ स्नात्वा संपूज्य च पुनर्जगामाथ स्वमाश्रमं ॥ तदाप्रभृति विख्यातं तीर्थं व्यासेश्वरं परं ॥६॥ तत्र स्नात्वा च संतर्प्य पितॄंश्चैव तिलोदकैः ॥ आधिव्याधिविनिर्मुक्तो जायते पितृवल्लभः ॥ ७ ॥ तथा यः पूजयेद्देवं भक्त्या व्यासेश्वरं नृप ॥ पंचामृतेन संस्नाप्य वन्यैः पुष्पफलैस्तथा ॥ ८ ॥ अर्घनीराजनाद्यैश्च स्तुतिपाठैर्द्विजार्चनैः ॥ सर्वासिद्धिर्भवेत्तस्य वांछिता नृपसत्तम ॥ ९ ॥ द्वैपायनः परां तृप्तिमाप्नोति च शिवार्चनात् ॥ १० ॥ इति दक्षिणे व्यासेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ तत्रैव परमं तीर्थं वैद्यनाथाव्हयं नृप ॥ धनुः शतद्वयं तद्वै स्मृतं व्यासेश्वरान्नृप ॥ १ ॥ अश्विभ्यां स्थापितं पूर्वमायुर्वेदस्य सिद्धये ॥ समुत्पद्य च यौ सूर्यात्तपः कर्तुमिहागतौ ॥ २ ॥ रेवाकूले सुविमले विविक्ते शांतिदे नृप ॥ बहुकालं तपस्तप्त्वा तोषयामास तं शिवं ॥ ३ ॥ सर्वज्ञं सर्वभूतेशं सर्वलोकनिवर्हणं ॥ तुष्टुवुर्विविधैस्तोत्रैरेकमव्ययमीश्वरं ॥ ४ ॥ अश्विनावूचतुः ॥ जयदेव महारुद्र त्र्यंबकत्वं जगत्पते ॥ सर्वतीर्थमयी गंगा सा धृता शिरसा त्वया ॥ ५ ॥ तेन गंगाधरोसि त्वं नाम्ना वृषभवाहन ॥ दुःकृतव्याधिनाशाय तेनवैद्योसि धूर्जटे ॥ ६ ॥ सर्वामृतमयश्चंद्रः सभाले विधृतो त्वया ॥ सचंद्रशेखरो नाम्ना तेनासित्रिपुरांतक ॥ ७ ॥ सर्वव्याधिविनाशाय तेन वैद्यः परोमतः ॥ कल्पांतवन्हिरतुलो यो जगद्भस्मकारणं ॥ ८ ॥ स संयम्य स्वनेत्रे वै भीमो भीम त्वया धृतः ॥ विश्वहानिप्रतीकारा त्तेन वैद्योसि निश्चितं ॥ ९ ॥ विषं यत्कालकुटाख्यं विश्वनिर्नाशनक्षमं ॥ तत्त्वया विधृतं कंठे नीलकंठोसि तेनवै ॥ १० ॥ विश्वनाशप्रतीकारात्तेनवैद्यो भवान्मतः ॥ येदंदशूकास्त्वहयः सर्वप्राणिभयंकराः ॥ ११ ॥ ते त्वया विधृता देहे स्वयं विश्वहिताय च ॥ अहिभूषणसंज्ञं त्वां तेन विश्वे विदुर्बुधा ॥ १२ ॥ कश्यपाय प्रदत्ता च विषघ्नी जिह्मनाशिनी ॥ विश्वोपद्रवनाशाय तेनवैद्योसि वै भवान् ॥ १३ ॥ स्वयं विषमशीलस्त्वं श्रितानां दुःखनाशनः ॥ जगतां दुःखनाशात्तु वैद्यं त्वामेवविद्महे ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्सीर्षकसमीपस्थं यथावस्थं श्रुतं मया ॥ हिमाद्रिसंन्निधिं प्राप्तं ततो मन्येतनान्यथा ॥ १२ ॥ एवमुक्तेच विप्रेण स्वप्नएव युधि-
ष्ठिर ॥ शिरःसमीपे भगवान् लिंगरूपो भवत्किल ॥ १३ ॥ हिमाद्रिशिखरं पार्श्वे स्थापयित्वा महेश्वरः ॥ १४ ॥ ईश्वरोवाच ॥
भो विप्रवर्य पश्यत्वं लिंगरूपं हिमां स्थितं ॥ हिमाद्रेः शिखरे चैतन्मन्यसे यदिनिश्चितं ॥ १५ ॥ माकार्षीस्तत्र याने त्वं क्लेशं
क्षुत्क्षामदेहधृक् ॥ यात्रा ते सफला जाता संपूर्णा चैतदर्चनात् ॥ १६ ॥ पश्येममेवकेदारं ततस्त्वं नियमं त्यज ॥ इत्युक्त्वा स्थाप-
यामास स च देवो द्विजं हितं ॥ १७ ॥ तावत्प्रबुद्धः सहसा विस्मयाविष्टचेतनः ॥ किमेतदिति संचिंत्य नूनं स्वप्नो ममाभवत्
॥ १८ ॥ को देवः किं मया दृष्टं क्व लिंगं तदिहोद्गतं ॥ इति संचिंतयन्यावद्वीक्षते सर्वतो दिशं ॥ १९ ॥ तावद्दृष्टं गिरितटे
विप्रेणादूरतस्थितं ॥ ददर्शच समीपस्थं लिंगं केदारसंभवं ॥ २० ॥ पुनर्विस्मयमापन्नो ह्यतीव द्विजसत्तमः ॥ शेषा निशा व्यती-
ता च तस्य चिंतयतो भृशं ॥ २१ ॥ प्रभाते विमले स्नात्वा संतर्प्य पितृदेवताः ॥ बिल्वपत्रैश्च मंदारैः पूजार्थं
स्वयमाहृतैः ॥ २२ ॥ सिंदुंवारैश्च[1] कल्हारैः पूजयामास शंकरं ॥ केदारमिति निश्चित्य ध्यात्वा चमनसा शिवं ॥ २३ ॥ श्रीफलै-
रर्घदानं च नैवेद्यं विदधेद्विजः ॥ वेदसूक्तैः शिवं स्तुत्वा प्रणम्य च पुनःपुनः ॥ २४ ॥ यावन्नियममोक्षार्थं संशयं समुपागतः ॥
तावदाकाशवागुच्चैर्बभाषे तं द्विजंप्रति ॥ २५ ॥ वागुवाच ॥ पारणं कुरुभो विप्र पूर्णा यात्रा तवाभवन् ॥ मा संशयं कुरुष्वात्र
संशयः फलनाशनः ॥२६ ॥ श्रीफलैः पक्वबदरैर्वन्यैश्चान्यैः स्वयंहृतैः ॥ पारणं कुरु देवाग्रे ःविसृज्यनियमं द्विज ॥ २७ ॥ इत्यु-
क्तोपरता देवी ब्राह्मणोपि मुदान्वितः ॥ फलानि स्वयमाहृत्य विसृज्य नियमं तदा ॥ २८ ॥ पारणं कृतवान् भूप विप्रोहर्षस-
मन्वितः ॥ सप्तरात्रं स्थितस्तत्र ततो देशं स्वयं ययौ ॥ २९ ॥ तदाप्रभृति राजेंद्र विख्यातं तीर्थमुत्तमं ॥ केदारतीर्थे यःस्नात्वा

१ निर्गुंडीपुष्पैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तर्पयेत्पितृदेवताः ॥ ३० ॥ यथाप्राप्तोपहारैश्च केदारं पूजयेच्छिवं ॥ सर्वपापविनिर्मुक्तो वसेच्छिवपुरे चिरं ॥ ३१ ॥ श्रुत्वा केदार-
तीर्थस्य माहात्म्यं पांडुनंदन ॥ गोदानफलमाप्नोति श्रद्धया परया नरः ॥३२॥ इति श्रीनर्मदामाहात्म्येउत्तरे केदारतीर्थनाम पंचा-
शीतितमोऽध्यायः ॥ ८५ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदादक्षिणे तटे ॥ वैद्यनाथात्क्रोशमात्रं आनंदेश्वरसंज्ञ-
कं ॥ १ ॥ रुद्रस्य परमानंदो यत्र जातो युधिष्ठिर ॥ तीर्थं तत्कथयिष्यामि सर्वपापक्षयंकरं ॥ २ ॥ युधिष्ठिर उवाच ॥ आनं-
दो येन रुद्रस्य संजातो मुनिसत्तम ॥ सर्वं विस्तरतश्चैव वदस्व मुनिसत्तम ॥३॥ श्रीमार्कंडेय उवाच ॥ पार्वत्या हरणे प्राप्तैः सुरां-
तकमुखैःपुरा ॥ कुजृंभचंद्रपीडाद्यैर्युद्धं रुद्रस्य चाभवत् ॥ ४ ॥ पूर्णवर्षतुदेवानां विश्वस्य तु भयंकरं ॥ दैत्यास्ते बलिनः सर्वे
पार्वत्या प्रेरितेन तु ॥ ५ ॥ महादेवेन शूलेन नाशिताः सर्वशो सुराः ॥ केपि मग्ना जले चाब्धौ केपि भग्नादिशो ययुः ॥ ६ ॥
दानवानां वधं कृत्वा देवदेवो महेश्वरः ॥ पूजित स्त्रिदशैः सर्वैर्यक्षकिंन्नरपन्नगैः ॥ ७ ॥ पपात पुष्पवृष्टिश्च देववाद्यानि सस्वनुः ॥
आनंदपरमायुक्तो भगवान् वृषवाहनः ॥ ८ ॥ भैरवं रुपमास्थाय व्यालावलिविभूषितं ॥ भूतवैतालकंकालैर्भैरवैरावृतस्तदा ॥ ९ ॥
ननर्त नर्मदातीरे दक्षिणे पांडुनंदन ॥ तुष्टैर्मरुद्गणैः सर्वैः स्थापितः कामनाशनः ॥ १० ॥ आनंदेश्वरनामासौ यस्मादानंदमाग-
तः ॥ विख्यातस्त्रिषु लोकेषु भक्तानंदप्रदः शिवः ॥ ११ ॥ स्थापयित्वा महादेवं तस्मिन् स्थाने सुरोत्तमाः ॥ दिव्योपहारैः संपूज्य
जग्मुर्देवा यथागतं ॥ १२ ॥ अथ देवो महारुद्रो जगाम दिशमुत्तरां ॥ कैलासं पर्वतश्रेष्ठं स्वगणैः परिवारितः ॥ १३ ॥ अष्टम्यां
च चतुर्दश्यांपूर्णिमास्यां तथैव च ॥ स्थापयित्वा विधानेन पूजयेत्परमेश्वरं ॥ १४ ॥ सूक्तैश्च गीतवादित्रैस्तोषयेत् गिरिजाप-
तिं ॥ ब्राह्मणान् भोजयेत्तत्र यथाशक्त्या नृपोत्तम ॥ १५ ॥ धेनुं दद्यात्प्रसूतां च वस्त्रं छत्रं च काचनं ॥ वसंतस्य त्रयोदश्यां
श्राद्धं तत्रैव कारयेत् ॥ १६ ॥ इंगुदैर्बदरैर्बिल्वैरक्षतैर्वापि भारत ॥ स्नात्वा संतर्प्य च सुरान्तिलतोयेनपूर्वजान् ॥ १७ ॥ आनं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देश्वरतीर्थे तु श्राद्धं तत्रैव कारयेत् ॥ आनंदिता भवंतास्य पितरः स्वर्गसंस्थिताः ॥ १८ ॥ संततेर्नैव विच्छेदो जायते जन्मसप्तसु ॥
आनंदो जायते तेषां दर्शनादेव भारत ॥ १९ ॥ आनंदमयमाप्नोति देहांते मानवः पदं ॥ २० ॥ इति श्रीवायुक्तशिवसंहिता-
यां श्रीनर्मदामाहात्म्येदक्षिणे आनंदेश्वरतीर्थनाम षडशीतितमोऽध्यायः ॥ ८६ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र
मातृतीर्थमनुत्तमं ॥ संगमस्य समीपस्थं नर्मदादक्षिणे तटे ॥ १ ॥ मातरस्तत्र संप्राप्ता तुष्टुवुः परमेश्वरं ॥
उमार्द्धधारिणं देवं नागयज्ञोपवीतिनं ॥ २ ॥ मातरऊचुः ॥ जयतुल्य जयाजेय जयशंकर शाश्वत ॥ जयरुद्र ज-
गन्नाथ जगद्बीज जगत्प्रिय ॥ ३ ॥ विश्वसंतानकामस्त्वं विश्वनिर्मूलनक्षमः ॥ सृष्टिसंहारबीजस्त्वं दधस्यात्मनि धूर्जटे ॥ ४ ॥
अंतकः प्रलयो वन्हिर्विश्वरूपः शुचिःश्रवाः ॥ जगतस्त्वं परश्चासि विश्वं त्वज्जठरे स्थितं ॥ ५ ॥ गिरिजार्द्धवपुर्देव विभर्षि स्मरना-
शनः ॥ गुणं तामसयाश्रित्य ख्यातो रुद्रस्त्वमेव हि ॥ ६ ॥ गुणत्रयस्वरूपोसि तदवस्थासमाश्रयात् ॥ निर्गुणश्चासि भगवन्
त्वमेव प्रकृतेः परः ॥ ७ ॥ बिभर्षि रूपं भुवनांतकारि ददासि राज्यादिकमर्थिनस्त्वं ॥ सर्वज्ञमेकं भुवनाधिदेवं मन्यामहे त्वां
सुखदं शरण्यं ॥८॥ सर्वा देव च शक्तयोपि भगवान् प्राप्ता समभ्यर्चितुं ॥ प्राप्तां त्वत्सरिदग्र्यतीरविलसन्नीरे गभीरे स्थिताः ॥ त्वां
याचन् परिनाशनं पशुपते ब्राह्मी तथा वैष्णवी रौद्री शक्रकुमारशूकरवपुस्तेजोद्भवाः सप्तवै ॥ ९ ॥ तत्र तुष्टो महादेवः स्तोत्रेणा-
नेन भारत ॥ प्रसन्नश्चाभवत्तासां प्रददौ वरमुत्तमं ॥ १० ॥ याचध्वं वः प्रसन्नोस्मि किं कार्यं देवशक्तयः ॥ ११ ॥ मातर
ऊचुः ॥ अजेया सर्वशत्रूणां त्वत्प्रसान्महेश्वर ॥ असुराः संति सर्वत्र देवानां प्रति बाधकाः ॥ १२ ॥ स्पर्द्धमानाः सदा युद्धे नि-
ग्रह्यास्त्रिपुरांतक ॥ अस्माभिरेवयोद्धव्यं किमन्यैर्बहुदेवतैः ॥ १३ ॥ तदर्थे प्रार्थितोस्माभिरीश्वरांधकनाशन ॥ प्रसादात्तव देवेश
सिद्धिर्भवतु सर्वदा ॥ १४ ॥ अस्माकमभिधानेन तीर्थे मेतद्भवत्विह ॥ यो यं कामयते कामं सतं प्राप्नोतु शोभनं ॥ १५ ॥ ता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामेतद्वचः श्रुत्वा स देवः पार्वतीपतिः ॥ एवं भविष्यतीत्युक्त्वा पुनः प्रोवाच शाश्वतः ॥१६॥ मया तु स्थेयमत्रैव युष्मत्प्रीत्या तु भारत ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ १७ ॥ मातरस्तत्र तपसा गिरिकुटस्थिताः सदा ॥ स्वैस्स्वैरंशैश्च ससृक्षुः पुण्यां मातृतरंगिरी ॥ १८ ॥ स्वैरंशै स्तत्र तस्थु स्ताः सर्वं स्थाप्य सरित्तटे ॥ तत्र तीर्थे तु यो भक्त्य नवम्यां नियतेंद्रियः ॥ १९ ॥ उपोष्य तत्र च स्नात्वा पूजयेन्मातृसंचयं ॥ मातरस्तस्य सुप्रीता भवंति शिवसंयुताः ॥२०॥ वंध्या या मृतवत्सा या अपुत्रा या युधिष्ठिर ॥ स्नपनं कारयेत्तत्र दंपतोर्द्विजसत्तमः ॥ २१ ॥ सहिरण्येन कुंभेन स्नानमंत्रविधानतः ॥ स्नापयेत्पुत्रकामौ तौ कांस्यपात्रेण देशिकः ॥ २२ ॥ होमं च कारयेत्तत्र शैवं शाक्तं च भारत ॥ तुष्ट्यर्थं चैव मातॄणां स्वशक्त्या नियमस्थितः ॥ २३ ॥ चतुरः कलशान् स्थाप्य कलशं वा सुशोभनं ॥ पंचपल्लवसंयुक्तं फलपंचकगर्भितं ॥ २४ ॥ प्रक्षिप्यांतर्जले पंच मृत्स्ना सर्वौषधी स्तथा ॥ सितवस्त्रेण पुष्पैश्च सितचंदनचर्चितं ॥ २५ ॥ कांस्यपात्रेण सहितं सप्तधान्योपरि स्थितं ॥ सप्तध्यानैर्बीजमुख्यैः फलेन च समन्वितं ॥ २६ ॥ चतुर्वेदोक्तमंत्रांश्च जपंति ब्राह्मणास्ततः ॥ पुण्याहवाचनं कृत्वा दंपत्यं स्नापये द्विजः ॥ २७ ॥ पूर्वं स्नात्वा संगमे तु विधिमंत्रपुरःसरं ॥ एकवस्त्रेण सुस्नातस्तर्पयित्वा सुरान् पितॄन् ॥२८॥ भद्रासनोपविष्टौ तौ स्नानमंत्रैः सुमंगलैः ॥ भगतेवरुणोराजेत्यादिमंत्रैः सुशोभनैः ॥ २९ ॥ ततश्च पावमानीभिश्चतुर्वेदोदितैः पृथक् ॥ कांस्यपात्राणि देयानि सप्तवस्त्रावृतानि तु ॥ ३० ॥ सहिरण्यानि तत्रैव गां प्रदद्यात्पयस्विनीं ॥ दंपतीपरिधानं च भोजनं दीपयेत्ततः ॥ ३१ ॥ ब्राह्मणान् भोजयेत्तत्र गौरिणीश्च कुमारिकाः ॥ संतोषयेत्तत्र सर्वं संपूर्णमिति वाचयेत् ॥ ३२ ॥ आचार्यं पूजयेद्भक्त्या तत्र कल्याणवाचनं ॥ एवं कृत्वा महाराज विधिदृष्टेन कर्मणा ॥ ३३ ॥ सुपुत्रं लभते नारी वीर्यवंतं गुणान्वितं ॥ या यं काममतिध्याये त्सा च तं प्राप्नुयान्नृप ॥ ३४ ॥ मातृतीर्थात्परं तीर्थं न भूतं न भविष्यति ॥ श्रुत्वा वै यस्य माहात्म्यं प्रीतास्युर्मातरः सदा ॥ ३५ ॥ इति मातृती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थनाम ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदातीर्थमुत्तमं ॥ क्रोशार्द्धे मातृतीर्थात्तु रेवाया दक्षिणे तटे ॥ १ ॥ पुरा दशरथो राजा सूर्यवंशसमुद्भवः ॥ तस्य युद्धं समभवत् पुरा रिपुगणैःसह ॥ २ ॥ त्रिंशन्मासांस्तु रिपवस्तेतु सर्वे बलान्विताः ॥ बल कोशादिकं सर्वं क्षयंयांति च तस्य तु ॥ ३ ॥ कदाचिन्मध्यरात्रे वै बालपुत्रः सभार्यकः ॥ निर्गतो नगराद्राजा पलायनमतिर्नृप ॥ ४ ॥ निर्गच्छन् विधृतश्चापि दुर्गरोधकरैर्नरैः ॥ विहाय पुत्रं भार्यां च तमस्युग्रे पलायितः ॥ ५ ॥ विषादं परमं प्राप्तश्चरन्नेको वनाद्वनं ॥ चिंतया क्षुधितः श्रांतः क्रमाद्रेवामवासनात् ॥ ६ ॥ विमृश्य च क्षयं प्राप्तं बलकोशपरिछदं ॥ कुटुंबं पुत्रभृत्यादि सर्वनाशं विचिंत्य च ॥ ७ ॥ वियोगार्तः स रेवाया आगतो दक्षिणे तटे ॥ गाढं परिकरं बध्वा पतिष्यामीत्यचिंतयन् ॥ ८ ॥ दूरदेशादभिद्रुत्य ह्रदे तूर्णं पपात च ॥ ततस्तं पातितं मत्वा नर्मदा दोर्द्वयेन तं ॥ ९ ॥ दधारोच्चैर्भूषितेन पतमानं युधिष्ठिर ॥ प्रापयित्वा तटं देवी तिष्ठ तिष्ठेत्युवाच ह ॥ १० ॥ माकार्षीः साहसं वत्स इत्युक्त्वांतरधीयत ॥ ततः स्वस्थो भवद्राजा किमेतदिति चिंतयन् ॥ नान्यस्य कर्मैतदिति मुक्त्वा देवीं तु नर्मदां ॥ ११ ॥ कः समुद्धर्तुमीच्छेन्मां मुक्त्वेमां विश्वमातरं ॥ ततः प्रणम्य साष्टांगं उवाच च विसैनिकः ॥ १२ ॥ राजा उवाच ॥ नमस्ये नर्मदां देवीं रुद्रदेहसमुद्भवां ॥ त्रैलोक्यवंदितां पुण्यां नरकौघनिवारिणीं ॥ १३ ॥ या वैमल्यं श्रुता दत्ते तापार्तिघ्नी स्मृता च या ॥ स्तुता वांछितदात्री या कृपां धत्ते सनातनी ॥ १४ ॥ या सेविता त्वघौघघ्नी पुरे ग्रामे वने पिच ॥ या दत्ते शांकरं लोकं पूजिता पुण्यवर्धिनी ॥ १५ ॥ जननी लौकिकं बाह्यं केवलं क्षालयेन्मलं ॥ शुष्कार्द्रमखिलं रेवा सबाह्याभ्यंतरं मलं ॥ १६ ॥ जयदेवि जगन्मातः प्राकृतीं त्रायस्व मां ॥ त्वदंके पतितं भीतं विवर्द्धय स्वभूतिभिः ॥ १७ ॥ त्वं गंगा लोकशोकघ्नी त्वमेवासि सरस्वती ॥ विश्वस्य बीजभूतासि बहुकल्पानुगामिनि ॥ १८ ॥ यथा देवत्रये नास्ति भेदो भुवनपावनी ॥ नदीत्रये तथा नास्ति भेदो भुवनभा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनी ॥ १९ ॥ त्वं ब्राह्मी वैष्णवी रौद्री जगन्मंगलकारिणी ॥ त्वमेव परमासक्तिः पापसंतापहारिणी ॥ २० ॥ कथं भवेद्विश्व-
मिदं वराकं नवेद्भवेत्त्वं नभविष्यस्त्वघघ्नी ॥ मन्येधन्यं भारतं पुण्यवर्षं यत्रोद्गता लोकहिताय रेवा ॥ २१ ॥ योगीशायोगयुक्ता
त्वं योगिवंद्या वियोगिनी ॥ ईश्वरप्रभवा भूतिर्भवयोगविमोचनी ॥ २२ ॥ बहुदुःखाभिसंतप्तं जनं पावय पावनी ॥ त्वां विना
नर्मदे मातर्मललक्षमनाश्रयं ॥ २३ ॥ एवं स्तुतवतस्तस्य जलमध्याद्विनिर्गता ॥ स्त्रीरुपा नर्मदा देवी रणत्कनककंकणा ॥ २४ ॥
कणन्नूपुर शब्दायामेखलादामशोभिता ॥ इंद्रनीलनिभं वासो दधाना नीरजेक्षणा ॥ २५ ॥ बिभ्रती कलशं पूर्णमभयं च सरिद्व-
रा ॥ तुष्टास्मीति नृपं प्राह देवी मकरगामिनी ॥ २६ ॥ नर्मदा उवाच ॥ वरं वृणीष्व भो राजन् यत्ते मनसि वांछितं ॥ व-
त्स दास्यामि ते नूनं सर्वकामार्थसाधकं ॥ २७ ॥ राजा उवाच ॥ यदि तुष्टासि मे देवि रिपूणां संक्षयं कुरु ॥ शोकं नाशय
मे देवि कोशं संपादयांबिके ॥ २८ ॥ सैन्यं मे चतुरंगं हि क्षीणं देहि पुनर्मम ॥ भार्यापुत्रैः परिवृत्तो यथा त्वां प्रणमे पुनः
॥ २९ ॥ तथा कुरु प्रसन्ना चेदिह दक्षिणजान्हवी ॥ इति संप्रार्थिता रेवा नृपं दशरथं प्रति ॥ ३० ॥ ददौ शैलूषनामानं मणिं
यष्टिं च सूतिकां ॥ मणिनानेन संलेख्य यष्ट्या त्वं ताडयस्व तत् ॥ ३१ ॥ यद्यद्वांछसि राजेंद्र तत्तल्लिख धरातले ॥ तत्सर्वं भ-
विता सद्यो भार्यापुत्रादिकं तथा ॥ ३२ ॥ दंतिनां दशसाहस्रं दशलक्षास्तथाहयाः ॥ दशायुतानि रथिनां दशकोट्यःपदातयः
॥ ३३ ॥ अक्षयश्चापि कोशस्ते यावद्राज्यस्थितिस्तव ॥ मणी यष्टि ततो राजन् मत्प्रवाहे प्रयास्यतः ॥ ३४ ॥ प्रक्षेप्ता त्वं नचे-
द्राजन् इत्युक्त्वांतरधीयत ॥ राजा च तत्र तीर्थे वै नर्मदामूर्तिमादरात् ॥ ३५ ॥ कारइत्वा प्रतिष्ठाप्य पूजयित्वा जगामह ॥
विपुलं पुलिनं प्राप्य कृत्वा गजरथादिकं ॥ ३६ ॥ सजिवं कंबया कृत्वा उक्तं देव्या यथा तथा ॥ ततस्तानजयच्छत्रून् युधि दु-
र्मर्षणो नृपः ॥ ३७ ॥ भार्यापुत्रादिकं काले स्वराज्यं प्राप्तवान्पुनः ॥ इति ते कथितं पार्थ नर्मदातीर्थमुत्तमं ॥ ३८ ॥ अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे च यः स्नात्वा पूजयेन्नर्मदां नृप ॥ यथोक्तेन विधानेन यथाशक्त्या च भक्तितः ॥ ३९ ॥ न सप्तध्या वियुज्येत स पापै र्मुच्यते ध्रुवं ॥ तिलोदकेन दत्तेन मोदंते पितरो दिवि ॥ पठेच्च य इमं स्तोत्रं नर्मदाप्रीतिकारकं ॥ ४० ॥ सुविद्यो ब्राह्मणो भूत्वा क्षत्रियो विजयं लभेत् ॥ राजावा राजपुत्रो वा न राज्यभ्रंशमाप्नुयात् ॥ ४१ ॥ मर्त्यलोके सुखं स्थित्वा ततः स्वर्गे महीयते ॥ तुष्ट्यर्थं नर्मदायास्तु ब्राह्मणान् भोजयेत्सुधीः ॥ ४२ ॥ यथाशक्त्या च भक्त्या च गौरीणीश्च कुमारिकाः ॥ प्रतिजन्मभवे तुष्टा नर्मदा तस्य भारत ॥ ४३ ॥ इति श्रीनर्मदामहात्म्ये नर्मदातीर्थनाम सप्तशीतितमोध्यायः ॥ ८७ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र तीर्थमुंडेश्वरं परं ॥ मातृतीर्था क्रोशमात्रं सर्वपापक्षयं करं ॥ महादेवगणः पूर्वं मुंडोनाम नृपोत्तम ॥ पार्वत्या रक्षणे मुक्तः शिवेनान्यै र्गणैः सह ॥ एकदा कौतुकं द्रष्टुं गजयुद्धं जगाम सः ॥ तावत्कालं महादेवः प्राप्तोवै गिरिजांतिके ॥ न ददर्श गणं तत्र रक्षार्थे यं समा दिशत् ॥ ततः क्रुद्धः पशुपतिस्तं शशाप समागतं ॥ कौतुकं गजयुद्धस्य त्वं द्रष्टुं गतवानासि ॥ उमाया रक्षणं त्यक्त्का पत मूढ धरातलं ॥ मर्त्येषु मूढचेताः त्वं भविता जनकौतुकी ॥ मुंडो विगतसंस्कारो वाचा जल्पन् यथातथा ॥ एवं शप्तः स रुद्रेण लुठन्नग्रे गणोत्तमः ॥ पुनःपुनः सविलपन् प्रचरन् दीनमानसः ॥ उवाच देव मूढोस्मि पाहि मां शरणागतं ॥ त्वयि प्रकुपिते नाथ त्वमेव शरणं मम ॥ भूमौ स्वलितपादानां भूमिरेवावलंबनं ॥ त्वदीयोहं महादेव त्वामेव शरणंगतः ॥ तस्मात्कारुण्यमास्थाय रक्ष रक्ष महेश्वर ॥ त्वां मुक्त्का वद कोन्योस्ति योमहानभिगम्यते ॥ एकएव गतिर्मह्यं भवानीपतिरीश्वरः ॥ तमेवं वादिनं देवी लुठंतं वीक्ष्य चाब्रवीत् ॥ दयालो देव मुंडाय दीयतां चाप्यनुग्रहः ॥ क्रियते क्षणिकः कोपो भृत्यस्योपरि धूर्जटे ॥ ईश्वर उवाच ॥ शापोयं भविता मुंड भव जातिस्मरो भुवि ॥ ब्राह्मणस्य कुले भूत्वा यथोक्तं सर्वमाप्नुहि ॥ कालेन कियता प्राप्य रेवां मद्देहसंभवां ॥ तत्र तप्त्वा तपश्चोग्रं स्थापयित्वा च मां ततः ॥ पुनः प्राप्स्यसि मे पार्श्वं न वाच्यं बहुलं पुनः ॥ श्रीमार्कंडेय उवाच ॥ इ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्युक्तो देवदेवेन पपात धरणीतले ॥ मुंडः स प्राप्तवान् सर्वं यथोक्तं देवभाषितं ॥ जातिस्मरस्तु कालेन रेवाया दक्षिणे तटे ॥
तपश्चचार विपुलं स्थापयामास शंकरं ॥ शिवं मुंडेश्वरंनाम पूजयामास भक्तितः ॥ मंदारैः सिंदुवारैश्च कल्हारैः कुटजैस्तथा ॥
अरण्यैर्बिल्वपत्रैश्च मुंडो मुंडवनेचरः ॥ ततः प्रसन्नो भगवान् ददौ लोकं स्वकं पुनः ॥ साक्षाद्रूपो महादेव एह्येह्येह्यब्रवीच्च तं ॥
पार्वत्यासहितो रुद्रो गगने वृषवाहनः ॥ तवाहं तपसानेन प्रसन्नोस्मि गणो मम ॥ मुंड उवाच ॥ यदि प्रसन्नोसि भव प्रीत्या
मे तीर्थमाश्रय ॥ ममोपरि दयां कृत्वा तीर्थेस्मिन् सान्निधिं कुरु ॥ आचंद्रार्कमिदं तीर्थं न त्याज्यं गिरिजापते ॥ योयं कामयते
कामं तत्रतीर्थे महेश्वर ॥ स तं च लभतामाशु यद्यनुग्रहवान्मयि ॥ शंकर उवाच ॥ एवंभवतु यच्चोक्तं त्वया किंकरसत्तम ॥
सर्वं भविष्यतीत्युक्त्का तं च नीत्वा जगामह ॥ महादेवस्तु कैलासं तेन सार्द्धं युधिष्ठिर ॥ अत्र तीर्थे तु यः स्नात्वा तर्पयित्वा
सुरान् पितॄन् ॥ मुंडेशमभ्यर्चयति यथाशक्त्या तु भक्तितः ॥ पंचामृतेन संस्नाप्य ग्राम्यारण्यैश्च पुष्पकैः ॥ यथालब्धैर्धूपदीपैरर्चानी-
राजनादिभिः ॥ गीतवाद्यैश्च नृपते तोषयेत्परमेश्वरं ॥ अष्टम्यां च चतुर्दश्यां तस्य पुण्यफलं शृणु ॥ दशवर्षसहस्राणि तथा पंच-
शतानि च ॥ शिवलोकमनुप्राप्य पितृभिः सह मोदते ॥ कंबलं योगपट्टंच वस्त्रमन्नं मृगाजिनं ॥ योदद्याद्भरतश्रेष्ठ मुंडेश्वर हराह्वये
॥ कनकं काहल घंटां तस्य पुण्यफलं शृणु ॥ निरोगो रूपवान् वाग्मी विद्यावान् कुलसंमतः ॥ मिष्टाशी शीलवान्
दाता सप्तजन्मानि जायते ॥ इति ते कथितं पार्थ मुंडेशं तीर्थमुत्तमं ॥ श्रवणात्कीर्तनादस्य सर्वपापैः प्रमुच्यते
॥ इति मुंडेश्वरतीर्थनाम ॥ ततोगच्छेत राजेंद्र संगमं पापनाशनं ॥ अन्नड्वाही नदी यत्र रेवायासह संगता ॥
मुंडेश्वराक्रोशमेकं तत्र तीर्थं शृणुष्व मे ॥ पुरा दैत्यसमाक्रांतो रुद्रो रुद्रा च पांडव ॥ कृत्वा दैत्यनिषेधार्थं वृषभं द्वारतो विभुः ॥
पार्वत्यासह राजेंद्र यावदीशो भियाति वै ॥ तावतावृषभेनासौ दैत्यो युद्धाय रोधितः ॥ गर्जता पुच्छदंडेन दिवोल्लेखं प्रकुर्वता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदा तेनात्र दीर्घोयं गर्तः शृंगखुरैः कृतः॥ खुरखातेन गर्तेन बभूवात्र महानदी ॥ शांत्यर्थं शिवयानस्य वृष्टया मेघै प्रवर्तिता ॥ तदा पुण्यतमा जाता तत्स्वेदजलपूरिता ॥ हिताय सर्वलोकानां रेवयासह संगता विधिना संगमे स्नानं कर्तव्यं नृपसत्तम ॥ देवान् पितृंश्च संतर्प्य श्राद्धं कुर्यात्प्रयत्नतः ॥ मुच्यते पापसंघातापितृनुद्धरति स्वकान् ॥ वसेद्वर्षसहस्रं च शिवलोके युधिष्ठिर ॥ इति अनाड्वहसिंगमः ॥ श्रीमार्कंडेय उवाच ॥ तत्रैव पश्चिमे भागे भीमेशं चाभिपूजयेत् ॥ तव वंशे पुराह्यासीत्सेनाशतसमावृतः ॥ भीमसेन इति ख्यातः सोमवंशधरो महान् ॥ पृथिव्यां सागरांतायां तत्समः शत्रुतापनः ॥ यज्वा वदान्यो ब्रह्मण्यो यशस्वी नाभवत्परः ॥ भीमसेनास्त्रयोजातास्तववंशे युधिष्ठिर ॥ परीक्षितनयस्त्वाद्यो यन्नाम्ना तीर्थमुत्तमं ॥ द्वितीयो रक्ष नृपतेभीमसेनसुतोभवत् ॥ पांडोः पुत्रस्तृतीयश्च योयं पार्थ तवानुजः ॥ द्वौ रक्षौ तव वंशोस्मिन् द्वावेव तु परिक्षितौ ॥ भीमसेनास्त्रयो राजन् द्वावेव जनमेजयौ ॥ परिक्षितनयः पुर्व कथ्यते यो युधिष्ठिर ॥ स भीमसेनः सकलां विजीत्य पृथिवीं पुरा ॥ सचिवान् स्वपुरे न्यस्य ययौ स मृगयांप्रति ॥ विंध्यपार्श्वेषु विचरन् प्राप्तोसौ नर्मदातटं ॥ तत्र स्नात्वा च पीत्वा च स्वसैन्यं चापि पाययन् ॥ वनछायासु विश्रांते सैन्ये कुरुसुतात्मज॥ न्यग्रोघतलमाश्रित्य सुछायं दीव्यते यदा ॥ तदेयं नर्मदा देवी जलादुत्तीर्य चाययौ ॥ रूपयौवनसंपन्ना दिव्याभरणभूषिता ॥ दिव्यवस्त्रावृता देवी रणन्नूपुरमेखला ॥ मृगनेत्रा मृगांकास्या मृगराजोदरी शुभा ॥ मृगनाभिसुगंधा च भीमसेनाग्रतः स्थिता ॥ स तां दृष्ट्वा वरोराहां महल्लोलायतेक्षणां ॥ उवाच मधुरं वाक्यं कासि कस्यासि भामिनी ॥ देवी वा मानुषी वापि किन्नु वा वनदेवता ॥ देव्युवाच ॥ नर्मदाहं महाभाग रुद्रदेहसमुद्भवा ॥ न देवी मानुषि चान्या न चाहं वनदेवता ॥ त्वां वृणोमि विवाहार्थें ब्रह्मण्यां सत्यवादिनं ॥ ऐश्वर्यरूपसंपन्नं कांतंकामशरार्दिता ॥ राजाउवाच ॥ पूजनीयासि लोकानां देवादीनां सरिद्वरे ॥ आगता मानुषं मां त्वं भर्तृबुध्या नुकिं शुभे ॥ जननी चासि लोकनां चराचरगुरोः सुता ॥ सा किं मां पतिभावेन स्वै.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिणीवागता नरं ॥ देव्युवाच ॥ न विचार्यं महाराज कामकेलिकृतं क्वचित् ॥ तथापि कार्ययोगेन भवितव्यबलेन च ॥ स्वामि-
च्छतीह संप्राप्ता कियत्कालं नृपोत्तम ॥ ततोहं स्वेच्छया यास्येपुनः स्थानं स्वकंनृप ॥ राजाउवाच ॥ एवं त्वां न वृणोम्य-
द्य स्वेच्छया गंतुमिच्छति ॥ यद्यपि स्यात्कार्ययोगो भवीतव्यबलं नुवा ॥ देव्युवाच ॥ पुत्रैकं प्रसवं यावत् स्थास्ये
हं यदि मन्यसे ॥ त्वय्यहं रममाणा तु त्वं वा भूप किमिच्छसि ॥ राजा उवाच ॥ नियमस्थासि साचेत्त्वं यावज्जीवं सरिद्वरे ॥
स्वल्पकालस्य हेतोस्त्वां नवृणोमि भवोद्भवे ॥ देव्युवाच ॥ एवंचेदिच्छसि विभो वृणीहि समयेन मां ॥ किंचित्किंचित्कर्तुका-
मा न निषेध्या त्वया यदि ॥ ततस्तिष्ठामि राजेंद्र त्वयि सक्ता तवेच्छाया ॥ राजा उवाच ॥ एवं भवतु कल्याणि तिष्ठ मद्गृह-
वासिनी ॥ मार्कंडेय उवाच ॥ एवं तौ समयं कृत्वा परस्परमथादतौ ॥ राजा तदैव तां देवीं नर्मदातटउत्तमे ॥ विवाह्य
विप्रानाकार्य पुण्यमंत्रैः सुमंगलैः ॥ दत्वा गांहेमवासांसि वेदिमध्ये स्थितो नृपः ॥ किंचित्कालं स्थितस्तत्र रेवातीर-
वनोत्तमे ॥ प्रीत्या संस्थापयामास नाम्ना भीमेश्वरं शिवं ॥ तत्रैव देव्यावचनात्पूजयन् वृषभध्वजं ॥युधिष्ठिर उवाच॥ किंतद्भाव्यबलं
विप्र यत्त्वया पूर्वभाषितं ॥ कारणं चेन्ममाचक्ष्व येन रेवा तमाश्रिता ॥ मार्कंडेय उवाच ॥ साधुपृष्टं महाराज धर्मपुत्र युधि
ष्ठिर ॥ प्रश्नमेतन्न केनापि कृतं नोक्तं मया तथा ॥ तव वै कथयिष्येहं समाहितमना शृणु शृण्वंतु बांधवाः सर्वे ब्राह्मणैः सह
भारत ॥ येन रेवावृणोत्तिस्म भीमसेनं नृपं पुरा॥ दित्यां जातः कश्यपेन हिरण्यकशिपुर्हि यः ॥ दैत्यः स श्रीनृसिंहेन निहतो यो
रणाजिरे ॥ तस्य वंशे महान्दैत्यो नाम्ना तु गगनप्रियः ॥ हन्यमानेषु दैत्येषु नृसिंहेन महात्मना ॥ पतितेषु च नष्टेषु शन-
नाशमहासुरः ॥ पुरतो लोकपालानां लज्जयाधोमुखो व्रजन् ॥ सहितो लोकपालैश्च स सर्वैर्भास्करादिभिः ॥ तेन रोषेण गोकर्ण
गिरिमासाद्य चासुरः ॥ दिव्यं वर्षसहस्रं हि तपस्तेपे सुदुश्चरं ॥ शीर्णपर्णाम्बुवाताशी वामपादाग्रसंस्थितः ॥ तोषयन्पूर्वपुरुषं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माणं प्रपितामहं ॥ स तस्य तपसा तुष्टो ब्रह्मा लोकपितामहः ॥ दर्शयित्वा सचात्मानमुवाच गगनप्रियं ॥ ब्रह्मा उवाच ॥
वरं वरय भोवत्स क्लेशं त्यजत यः कृतं ॥ परितुष्टोस्मि दैत्येय तपसानेन ते सुत ॥ किमिच्छसि माहाबाहो राज्यंस्वर्गापवर्गिकिं
॥ दैत्य उवाच ॥ यदि तुष्टोसि मे देव यदि देयो वरो मम ॥ लोकपालान्विजेष्यामि तथा देहि पितामह ॥ रथंच देहि मे ब्रह्मन् दे-
वासूरनिबर्हणं ॥ अंतरिक्षचरं सिद्धं असंगगतिचारिणं ॥ दुर्निरीक्षं दुराधर्षं त्रिपुराररिथं यथा ॥ अवध्योहंच सर्वेषां देवासुरनराद-
षु ॥ भवामिह यथा ब्रह्मन् देहि मे त्वं वरत्रयं ॥ ब्रह्मा उवाच ॥ अमर त्वमवध्यत्वं विना सर्व भविष्यति ॥ विजेता त्वं ध्रुवं
सर्वान् लोकपालादिकान् सुरान् लिप्ससे त्वं रथश्रेष्ठमसंगं गतिचारिणं ॥ अमरत्वं विना वत्स यद्यदिच्छसि चास्तु तत् ॥ इदं
भामादितः कृत्वा अमरत्वं नविद्यते ॥ दैत्य उवाच ॥ नदेवासुरगंधर्वैर्न यक्षोरगराक्षसैः ॥ वधोमे स्यादिलापीठे तथाकुरु पितामह ॥
नमर्त्यं चिंतये ब्रह्मन् मनसापि कदाचन ॥ दुर्लभं कृपणं दीनं सर्वतः परिशंकिनं ॥ ब्रह्मा उवाच ॥ एवं ते प्रार्थितं सर्वं भ-
विष्यति न संशयः ॥ नरोयमवजानाति तस्मादस्य भयं भवेत् ॥ एवमुक्त्वा स भगवान् भावि कार्यं विचिंत्य च ॥ दत्तमेत-
न्मयातुभ्यमित्युक्त्वा तरधीयत ॥ युधिष्ठिर उवाच ॥ भाविकर्मभिदं प्रोक्तं यत्त्वया द्विजसत्तम ॥ तन्मे भाव्यं वदाशेषं परं
कौतुहलं हिमे ॥ मार्कंडेय उवाच ॥ शृणु पार्थ प्रवक्ष्यामि यथावृत्तं पुरातनं ॥ वसंतसमये चैत्रे मासि कैलासवासिनं ॥गौरीपतिं
नमस्कर्तुं स्तोतुं चाभ्यर्चितुं सुराः ॥ इंद्रादयस्तदा सर्वे लोकपालाः समागताः ॥ देवर्षयस्तथा चान्ये गंधर्वा यक्षकिन्नराः ॥ तथैवा-
प्सरसोनद्यस्तीर्थान्यब्धिमहोरगाः ॥ वेदाः सांगाश्च शास्त्राणि मूहुर्तानि युधिष्ठिर ॥ पुराणानि च सर्वाणि सेतिसाहानि तत्र तु
॥ एवं समागमे भूप कैलासेशिवसन्निधौ ॥ प्रणम्य च स्तुवंतिस्म गिरीशं विविधैस्तवैः ॥ समभ्यर्च्य सुरेशानं लोकपाल्लासवा-
सवाः ॥ तेषां मध्ये तदा वन्हिः दृष्ट्वा नारीं मनोरमां शिवपार्श्वे स्थितां चैकां दक्षिणे शुभलक्षणां ॥ दिव्यांबरधरां दिव्यभूषणै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपशोभितां ॥ पृथुश्रोणीं विशालाक्षीं पीनोन्नतपयोधरां ॥ हावभावविशेषैस्तु मोहयंतीं जगत्त्रयं ॥ तां दृष्ट्वा चारुसर्वांगीं हव्यवाहः सुरार्चितः ॥ वीक्ष्यमाणः सकुटिलं दृष्टः शर्वेणभारत ॥ शप्तश्च याहि मूढस्त्वं मर्त्येव तव मंदधीः ॥ यस्मान्मानुष्यभावस्त्वं तस्मान्मर्त्यत्वमाप्नुहि ॥ इति शप्तः स देवेन शंभुनाग्निरवाङ्मुखः ॥ दंडवत्प्रणिपत्याशु प्रार्थयामास लज्जितः ॥ मूढोहं मूढभावोहमस्यादर्शनतो विभो ॥ सत्यमेतन्महादेव कृपां कुरु मयि प्रभो ॥ किंकरोमि विमूढात्मा रेवया चाभिवीक्षितः ॥ शापानुग्रह सामर्थ्यं त्वयि देव सनातनः ॥ दीनस्य तव भक्तस्य शापांतं वद धूर्जटे ॥ कोपो महात्मनां देव ग्रहदासेषु कीदृशः ॥ नूनं विश्वमिदं देव तवादेशकरं विभो ॥ ईश्वर उवाच ॥ राजा महाप्रभावस्त्वं मर्त्यलोके भविष्यति ॥ भीमसेनइतिख्यातो भीमया सेनया वृतः ॥ इयं च कुटिला देवी त्वद्गृहायास्यति नर्मदा ॥ अस्यांच पुत्रमुत्पाद्य शूरं शत्रुप्रशामनं ॥ ततः प्राप्स्यसि वन्हे त्वं स्वस्थानं पुनरुत्तमं ॥ एवमुक्तः स रुद्रेण पपाताग्निशिलातले ॥ अवतीर्णः सचाख्यातो भीमसेनो नृपोत्तमः ॥ वंशे तव महाराज यथाप्रोक्तं मया पुरा ॥ श्रीमार्कंडेय उवाच ॥ स चलब्धवरो दैत्यो लब्ध्वाकाशचरं रथं ॥ देवानुद्वेजयामास यज्ञान् विध्वंसयन्नृप ॥ तपोवनेषु सर्वेषु ब्राह्मणान् पीडयत्यलं ॥ तेन संतापिताः सर्वे लोकपालाः सवासवाः ॥ ब्रह्माणं शरणं जग्मुः सिद्धर्षिगणसंयुताः मेरुपृष्ठस्थितं शांतं देवगंधर्वसेवितं ॥ विधिं प्रणम्य ते सर्वे देवाः प्रागर्दिताशयाः ॥ दर्शयंतः परं दैन्यं तुष्टुवुर्विविधैःस्तवैः ॥ स्वागतं वो लोकपालाः शक्राद्या ब्रूत कारणं ॥ किमागमनकृत्यं वः केन यूयंविमानिताः ॥ केन दैन्यं परं प्राप्ता को भवस्त्वपराध्यति ॥ इंद्र उवाच ॥ हिरण्यकशिपोर्वंशे नाम्ना तु गगनप्रियः ॥ त्वत्तः प्राप्तवरो ब्रह्मन् बाधेतस्मान्महोल्बणः ॥ तेन देवाः सगंधर्वाः ऋषयः सिद्धचारणाः ॥ प्रायशः पीडितास्तात पीडितं च जगत्त्रयं ॥ अजेयश्चाप्यवध्यश्च वरदानान्महासुरः ॥ स्वानि स्थानानि संत्यज्य प्रापिताः पशुचेष्टितं ॥ कुरु तस्य वधोपायं दैत्यस्यात्यंतदुर्मतेः ॥ गोविप्रदेवसाधूनां ब्रह्मन् स्वस्ति यथाभवेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्ते लोकपालैस्तु शक्रमुख्यैर्युधिष्ठिर ॥ प्रजापतिपतिर्देवः क्षणं ध्यात्वा ब्रवीदिदं ॥ ब्रह्मा उवाच ॥ शृण्वंतु लोकपाला मे-
शक्राद्याश्चिंतितं पुरा ॥ कल्पितोस्ति वधोपायस्तस्य दैत्यस्य वै मया ॥ पुरेदं प्रार्थितं तेन तप्यमानेन वै तपः ॥ देवादि-
भिरवध्यत्वं मानुष्यैः किंभवेन्मम ॥ मानुषान् सोवजानाति तस्मादस्यास्तितैर्वधः ॥ नमनुष्यसमलोकेत्रिषु लोकेषु विद्यते
॥ समानुषजनं प्राप्य यदि जानाति साधितुं ॥ देवत्वं ममरेशत्वं तत्पूज्यत्वं चमानवः ॥ प्रयांति वांछितं वान्यत्
हठं ये व्यवसायिनः ॥ यथा पुरा ध्रुवो ध्रौवं स्थानं प्रापमहामतिः ॥ उत्तानपादनृपतेः पुत्रःसन् भूमि गोचरः ॥ अचिरेणैव काले-
न पुष्करो वरुणात्मजः ॥ भीमसेनस्य नृपतेः सोमवंशोद्भवस्य तु ॥ तस्य दैत्यस्य नाशाय नर्मदायां भविष्यति ॥ स्वेषु स्थाने-
षु सुखिनो देवास्तिष्ठंतु निश्चिताः ॥ इत्युक्ता लोकपालास्ते ब्रह्मणा परमेष्ठिना ॥ प्रणम्य च विधातारं जग्मुः सर्वे यथागतं ॥-
युधिष्ठिर उवाच ॥ एकस्तावदयं विप्र संशयो मे महान् हृदि ॥ देवगंधर्वयक्षेषु सत्स्वन्येषु बहुष्वपि ॥ वरुणस्यात्मजः कस्मात्
पुष्करोवतरेदिह ॥ एतन्मे कारणं ब्रूहि संशयो हृदि मे महान् ॥ मार्कंडेय उवाच ॥ कथयामि परं गोप्यं ब्रह्मणा भाषितं पुरा
॥ पार्थ त्रैविक्रमे वृत्ते समरे देवदैत्यजे ॥ मृतामृतेवशिष्टे च दैत्यसैन्ये पलायिते ॥ क्रीडंतश्चापि गर्जंतो देवास्ते हर्षमागताः ॥
आस्फोटयंतो वाद्यानि वादयंतश्च सर्वशः ॥ वाचस्पति मुपागम्या प्रणम्योचुः पुरः स्थिताः ॥ देवदेवगुरोयुक्तं यजुयंति
हवाक्पते ॥ येषामाचार्यवर्यस्त्वं सदैवाभ्युदये रतः ॥ बृहस्पतिरुवाच ॥ साधु साधु सुरश्रेष्ठा भवंतः शूरतां ग-
ताः ॥ युष्माभिर्यज्जितं युद्धे तत्कृतं स्वकुलोचितं ॥ दानवा नाशिताः सर्वे निरुपायं जगत्कृतं ॥ एवं ब्रुवन् सुरगुरुर्ददर्श पु-
रतः स्थितान् ॥ लोकपालसुतान् तत्र जयंतप्रमुखान् नृप ॥ शिखीवन्हीसुताश्चैव दंडोयमसुतस्तथा ॥ वारुणाःपुष्करो नाम्नावेग
वाननिलात्मजः ॥ सुवर्चाश्चंद्रपुत्रोथ नासत्यौ सूर्यसंभवौ ॥ एवमन्यानपि तदा दृष्ट्वा देवसुतान् गुरुः ॥ हसन् पप्रच्छ विजयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जितं केनातिसर्वशः ॥ वदंतु देवतनयाः सर्वे वै पुरतः स्थिताः ॥ जितं केनात्र शूरेण कोजयत्वत्रसत्तमाः ॥ शिखि उवाच ॥ श
क्रो जयति नान्योत्र जितं शक्रेण वै गुरो ॥ दंड उवाच ॥ जितमिंद्रेण विप्रेंद्र सर्वैस्तेन जिते जितं ॥ वेगवानु उवाच॥ जितं तेन
द्विजश्रेष्ठ यन्मंत्री यद्गुरुर्भवान् ॥ सुवर्चा उवाच ॥ ऋते सर्वेश्वरं देवमन्यः कोजयवानितः ॥पुष्कर उवाच॥ असंगो छेद्यपाशो यो
जीवनीयपतिश्च यः ॥ मत्पित्रा वरुणेनेह जितं तेन महौजसा ॥ त्राणार्थी यं समभ्येति येन विश्वमिदं धृतं ॥ प्लावनः पावनो योसौ
जितं तेन प्रचेतसा ॥ जयंत उवाच ॥ सत्यमेतत्सुरगुरो भाषितं पुष्करेण यत् ॥ भृत्येनापि जिते सम्यक् जितं तत्स्वामिना
ध्रुवं ॥ विस्मयादंबरो यत्र यजुयेत्सुरनायकः ॥ धर्मो जयति नाधर्मः सत्वं जयति नानृतं ॥ क्षमा जयति न क्रोधो विष्णुर्जयति
नासुराः ॥ एको विश्वाधिपो विष्णुस्तद्भक्तो न पराजयेत् ॥ जितं भगवतातेन हरिणा लोकधारिणा ॥ तद्भृत्येनापि शक्रेण जिते वै
हरिरीश्वरः ॥श्रीमार्कंडे उवाच॥ इत्युक्तवति राजेंद्र शक्रपुत्रे तदैवहि ॥ साध्वित्युवाचांगिरसः पुष्पवृष्टी पपात खात्॥प्रशशंसुश्च तं
देवा जयंतं शुभवादिनं ॥ ततो बृहस्पतिर्वीक्ष्य पुष्करं क्रोधमूर्छितः॥शशाप सत्वरं भूप धिक् धिगित्यसकृत् ब्रुवन्॥बृहस्पतिरुवाच॥
पत मूढ सुरस्थानादहंकारो यतो भुवि ॥ प्रतीत्या नीच चपल दुर्बुद्धे मर्त्यतां भज ॥ बालोसि बालभावेन भाषसे त्वं यथातथा ॥
एतावानेषशापस्ते यन्मर्त्ये त्वं भविष्यसि ॥पुष्करउवाच॥ बालत्वेन मया हीनं यदुक्तमविचारितं ॥ न चेतसि त्वया धार्यं मम मूढ
स्य वाक्पते ॥ मत्तोन्मत्तैर्व्याधितैर्लिंगिभिर्यद्बालैरुक्तं यत्कुमारैरसुस्थैः ॥ मुढैर्विप्रैः क्षुधितैरंगनाभिश्चित्ते धीरा नानयंतिह किंचित् ॥
अतो दंडप्रमाणेन याचे त्वां सुरपूजित ॥ मूढे मयि सुराचार्य शापस्यांतो विधीयतां ॥ बृहस्पतिरुवाच ॥ मयोक्तं हि वृथा न
स्यात् शापांतश्च भविष्यति ॥ मुहुर्तार्द्धमिव ध्यात्वा पुनः प्रोवाच पुष्करं ॥ कर्ता त्वं देवकार्यस्य भविष्यसि नृपोभुवि ॥ तत्र त्वं
देवकार्यं हि कृत्वा स्थानमवाप्स्यसि ॥ इत्युक्तो गुरुणासद्यो भुवि भीमसुतो भवत् ॥मार्कंडेय उवाच॥ इति ते कथितो हेतुः पुष्करो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पत्तिलक्षणः ॥ राज्ञो वै रममाणस्य रेवातीरवनेषु च॥ कालेन महता पुत्रं नर्मदायामजीजनत् ॥ स पुष्करोभूत्तत्पुत्रो नाम्ना दुःशमनो
नृप ॥ जनषोडशवर्षः स विप्रं किमपि पृष्टवान् ॥ देवेशाराधनं ब्रूहि यथा शर्वः प्रसीदति ॥ तेनोक्तेन विधानेन तपस्तेपे शिवार्चकः॥
अमरंकटमासाद्य गिरिं गीर्वाणसेवितं ॥ प्रसन्नः शंकरो देवो वरं ब्रूहित्युवाच तं ॥ दुःशमन उवाच ॥ वरमेकं हि वरये वै-
रिवक्षोविदारणं ॥ विचित्रयुद्धकरणं युद्धेचाप्यपराजयं ॥ ईश्वर उवाच ॥ एवं तेभविता वत्स तथैवान्यद्ददामि ते ॥ इयं
हि विमला शक्तिः शूलिनी नाम नामतः ॥ मया दत्तां गृहाणेमाममोघां शत्रुनाशिनीं ॥ युद्धसंकटमासाद्य मोचनीया नचा-
न्यथा ॥ अस्त्राणि प्रतिभास्यंति शस्त्राण्यपि च सर्वशः ॥ सुरकार्यं महत्कार्यं तथेत्युक्त्वा महेश्वरः ॥ जगामादर्शनं शंभुर्वरं दत्वा-
स्य वांछितं ॥ तथैवांतर्हिते देवे राजा दुःशमनस्ततः ॥ युद्धाभियोगमासाद्य चक्रेदिग्वीजयं प्रति ॥ समंतात् स रिपून् जीत्वा ततो
द्वीपानि सर्वशः ॥ दुर्गाधिपान्विजित्येह गिरिद्रोणी गतानपि ॥ एवंबहूनि वर्षाणि राजादिग्विजये स्थितः ॥ अक्षौहिण्या दशा-
ष्टौ च प्रचकर्षारितापनः ॥ स कोपि मानुषे लोके नास्ति द्वीपेषु सप्तसु ॥ नृपो यस्तत्पुरस्तिष्ठेत् प्रतिमल्लस्तथा नृप ॥ ततः स्वर्ग-
जये बुद्धिं यदा राजा विधास्यति ॥ तदांतरिक्षादायांतं नारदं स ददर्शह॥ पुरः समागतं वीक्ष्य मुनिं ब्रह्मविदावरं ॥ ससंपूज्यार्घपाद्यैश्च
प्रणम्य च मुनिं नृपः ॥ उवाच स्वागतं तेस्तु मुने ब्रह्मसुतप्रभो ॥ विशेषं कथयस्वार्थं ममागमनजं तव ॥ धन्योस्म्यनुगृहीतोस्मि
दर्शनादद्य ते मुने ॥ नारद उवाच ॥ दिष्ट्या त्वं विजयि राजन् दिष्ट्या ते रिपवो जिताः ॥ दिष्ट्या दिग्मंडलानि त्वं क्रांत्वार्कइ-
वदीप्यसे ॥ दुःशमन उवाच ॥ भगवन् त्वत्प्रसादेन मया भूवलयं जितं ॥ जिताश्चारिनृपाः सर्वे गिरिदुर्गनिवासिनः शूराश्चा
तिबलाः सर्वे जिता द्वीपांतरे युधे ॥ यावन्न लोकपालानां पुर्यो मे विजिता मुने ॥ तावन्मया न विजितमपि किंचिदिहस्थितं ॥
ब्रूहि कः को विजेतव्यो यामित्वंप्रति नारद ॥ नारद उवाच ॥ किंजितैर्लोकपालैस्ते किंचिद्भूवलयं जितं ॥ यावत्वया न विजितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवारिर्गगनप्रिय: ॥ तस्मिन् जिते जितं सर्वमन्यथा विजयोनते ॥ एकएव महावीर: सदैत्यपतिरुग्रधीः ॥ नमन्यतेत्र पुरुषमपि
देवेषुकिंकरैः ॥ राजा उवाच ॥ को वंशस्तस्य दैत्यस्य क च स्थानं बलं च किं ॥ एतन्मे सर्वमाख्याहि तस्य दैत्यस्य नारद ॥
नारद उवाच ॥ हिरण्यकशिपोर्वंशे ह्लादपुत्रस्तु बाष्कलः ॥ तस्य पुत्रो महावीर्यो नाम्नातु गगनप्रियः ॥ सब्रह्म वरदानेन गर्वि-
तोतीव दु:सहः ॥ रथो गगनगस्तस्याप्यच्छेद्य: संगवर्जित: ॥ तमारुह्य जयत्येको देवासुरनरोरगान् ॥ हिमाद्रेस्तुहिनद्रोण्यां पुरात
ननिवासिनं ॥ नाम्ना तच्छोणितपुरं हिमेन परिवेष्टितं ॥ पुरेतस्मिन्निवसति सदैत्य: सानुगः सदा ॥ भवान् यदि रिपोर्जेता यदि
शक्तिश्चतज्जये ॥ मागास्त्वमन्यं राजेंद्र यत्नवान् भव तज्जये ॥ स्वति तेस्तु गमिष्यामि ध्रुवं जेष्यसि तं रिपुं ॥
इत्युक्त्वा स जगामाशुनारदो मुनिसत्तमः ॥ ततो दुःशमनो राजा स्वसैन्यपरिवारित: ॥ तस्मिन्नेव मूहूर्तोपे निर्ययौ तं रिपुं प्रति ॥
गत्वा कतिपयाहोभिस्तं गिरिं हिमसंज्ञितं ॥ अमेयमस्त्रं सौरं च मुमोच हिमनाशने ॥ ततस्तच्छोणितपुरं प्राप राजा यदा नृप ॥
तदा त्वासिनदैत्यस्य शिरसो मुकुटो पतत् ॥ प्राकंपच्चासनं तस्य ध्वजे गृध्रः पपातह ॥ स वीक्ष्य दुर्निमित्तानि यावत् चिंतान्वि-
तो सुर: ॥ तावद्राजा पुरद्वारि प्राप्तः संवेष्टयन्पुरं ॥ क्ष्वेडितास्फोटनाद्यैश्च बुंबारावैश्च धन्विनां ॥ तथैव चापनिर्घातै: प्रतिशब्दः पुरा यथा
सिंहनादेन महता नादयन्रोदसीं नृप॥ ततो युद्धं समभवत्सं कुलं नृपदैत्ययोः॥ अस्त्रैर्महद्भिश्च ततो मानुषैर्थराक्षसैः गांधर्वैरासुरैश्चै
वदिव्यैर्नृपमहोजसै:॥ अहोरात्राणि पंचाशद्युद्धं समभवत्तयोः ॥ पंचाशद्दिवसं तेच दैत्यतेजस्त्वहीयता ॥ हियमानबलस्तूर्णं
शक्तिं सस्मारचासुरिं ॥ मायाशतसमाकीर्णां मांसशोणितलेपनां ॥ गृहीत्वा तां मुमोचाशु वीरसेनाय दानव: ॥ आगच्छमानां
तां दृष्ट्वा कालजिव्होपमां नृप: ॥ ज्वालमालासमायुक्तां बहुनिर्घोषभीषणां ॥ आपतंतीं तदाकाशे वीक्ष्यभूपालसत्तमः नारा-
यणास्त्रमतुलं मुमोचारिविदारणं ॥ तेन सा शक्तिराकाशे निहता विकलीकृता ॥ चूर्णिता तिलशो भूमौ पपातांगारपुंजवत् ॥ १२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततो दैत्यपतिर्वेगादस्त्रं पाशुपतं स्मरन् ॥ यावत्तातं समुद्दिश्य गृहीष्यति युधिष्ठिर ॥ तावता नृपतिः शक्तिं वरलब्धां तु शांकरीं ॥
मुमोच पुरुषव्याघ्र दैत्यनाशाय सत्वरं ॥ सा तेन राज्ञा निर्मुक्ता कालांतकयमोपमा ॥ प्रलयाग्निसमाविष्टा दुर्निवार्या भयंकरी ॥
वेगेन महता तस्य बिभेद हृदयं नृप ॥ स तया भिन्नहृदयः पपात च ममार च ॥ ततस्तत्सैनकाः सर्वे तूर्णं चक्रुः पलायनं ॥
केचिच्च निहता राज्ञा केचिदर्णवमाविशन् ॥ देवदुंदुभयो नेदुः मुदं प्रापुः सुरोत्तमाः॥ साधुसाध्विति तं सर्वे ऋषयः सिद्धचारणाः॥
प्रशशंसुर्महीपालं दिविदुःशमनं नृप ॥ अभवत्पुष्पवृष्टिश्च तस्योपरि महीपते ॥ एवं स निहतो दैत्यस्तेन राज्ञा युधिष्ठिर ॥ दत्तो
हर्षस्तदा तेषां देवानां दिवि भारत ॥ इति ते कथितं सर्वं यत्त्वया परिपृच्छितं ॥ राज्ञो दुःशमनस्यैवं किमन्यत्परिपृच्छसि ॥ यु-
धिष्ठिर उवाच ॥ साधूक्तं ते मुनिश्रेष्ठ आख्यानं बहुविस्तरं ॥ बह्वाश्चर्यं च पुण्यं च चरित्रं देवनिर्मितं ॥ सुधास्वादइवास्माकं शृ-
ण्वतां त्वन्मुखोद्गतं ॥ रेवाचरितमाचक्ष्व सा किं कृतवती ततः ॥ कथं जगाम तं मुक्त्वा नृपतिं मुनिपुंगव ॥ श्रीमार्कंडेय उवाच ॥
शृणुतस्याश्चरित्रंमे वदतो राजसत्तम ॥ जाते पुत्रे ततो देवी नर्मदा नृपपुंगव ॥ बहुचिंतान्विता नित्यं गंतुकामा स्थले स्थिता ॥
एतावानेव संयोगो नृपतेश्च ममापि च ॥ देवकार्थं हि संजातमत्र स्थातुमसांप्रतं ॥ इतिचिंतापरा रेवा छलकालानुसारिणी ॥
ततःकतिपयाहोभिरेकदा मागधीसुतं ॥ श्रेष्ठं न्यूना त्रिवर्षंच ज्येष्ठपत्नीसमुद्भवं ॥ प्रियं राज्ञः कुलधरं ददर्शांकगतं नृप ॥ सातमं-
कगतं वीक्ष्य सपत्नीसुतचिंतया ॥ अदृष्टपूर्वं तत्संगे सहसामर्षमाविशत् ॥ प्रपच्छदेवीपार्श्वस्था राजानमरुणेक्षणा ॥ कोयं बालो
नृपश्रेष्ठ कस्य पुत्रः प्रियस्तव ॥ अदृष्टपूर्वः सहसा यस्तवांकमुपागतः ॥राजा उवाच ॥ मागधोसंभवः पुत्रो ममायं वै त्रिहायनः ॥
ज्येष्ठो वै तनयो देवि द्वितीयस्त्वयि यः सुतः॥ इत्युक्ता सा तदा तेन राज्ञा देवी रुषान्विता ॥ अंकाद्गृहीत्वा तं बालं स्वप्रवाहं जगा
म सा ॥ तोयरूपे स्ववपुषि प्रक्षेप्स्यति तदार्भकं ॥ किंचिकीर्षसि देवी त्वमिति राज्ञा नुयायिना ॥ तदा सा रभसा युक्ता पृष्टापृष्टा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वलंबिना ॥ सरिद्वारा उवाच ॥ सपत्नीतनयं किं च ज्येष्ठं वै मत्सुतादपि ॥ हृदंक्षेप्स्याम्यहं ह्येनं किमनेनासता तव ॥ ज्येष्ठः श्रेष्ठश्च
मे पुत्रो नायमंकं तवार्हति ॥ राजा उवाच ॥ नापराध्यति बालोयं माहींसीः पुत्रमन्यथा ॥ लप्स्यते कुटिलतां संज्ञां बालमारीति
शोभने ॥ हृदं मामा क्षिपैनं त्वं देहि मे दीनपुत्रकं ॥ इति ब्रुवन् सचैलांते नृपतिस्तामधारयन् ॥ देव्यु उवाच ॥ अर्पितोयं नृप-
श्रेष्ठ पुत्रस्ते योतिवल्लभः॥ तदुक्तं स्मर भूपाल समयो मे कृतो यथा ॥ समयेन स्थितो यस्माद्वीरत्वं यद्यधीरधीः॥ अतस्त्वं दृष्टएवा-
सि यास्यामि नृपसत्तम ॥ एतावानेव संबधस्तव मध्यनमावधीः ॥ इत्युक्त्वा नर्मदादेवी पुत्रं त्यक्त्वा स्वकं च तं ॥ पश्यतो भीम-
सेनस्य जलेस्वंतर्दधे नृप ॥ बहुशोकसमाविष्टो राजा च स्वपुरंययौ ॥ तेनसंस्थापितः पार्थ नाम्नाभीमेश्वरस्तदा ॥ रेवाया
दक्षिणे कूले भुक्तिमुक्तिफलप्रदः ॥ स्नात्वा तु संगमे तत्र भीमेशं पुजयेत्तु यः ॥ सवै पापविशुद्धात्मा शिवलोके महीयते ॥
पंचामृतेन संस्नाप्य गंधचंदनचर्चितं ॥ अर्कधत्तूरमंदारबिल्वीदूर्वाच मागधीः ॥ किंशुकैः कुशकाशैश्च पुष्पैश्चान्यैः सुशोभनैः ॥
महादेवं सुसंपूज्य भवेद्राजा महीतले ॥ एकेनापि सुपुष्पेण भावशुद्धेन पूजितः॥ रेवातटे महेशानः प्रददाति समीहितं ॥ किंपुनर्ब-
हुधा भक्त्या पूजितः परमेश्वरः ॥ तत्र तीर्थे तु यो दद्याद्भक्त्या गोमिथुनं नरः ॥ भूमिदेवाय शांताय सुव्रताय नृपोत्तम ॥ नंदंति
पितरस्तस्य स्वर्गे पार्थयुगायुतं ॥ दाता शिवपुरं प्राप्य शिवस्यानुचरो भवेत् ॥ श्राद्धं दद्यात्पितृणां च तत्र तीर्थे युधिष्ठिर ॥ ज-
नयत्वाक्षयां तृप्तिं पूर्णं मन्वंतरं शुभं ॥ कन्यादानं च योदद्याद्विवाहं तत्र शोभनं ॥ भवंति चाक्षयालोकास्तस्य पित्र्युपढौकिताः
॥ वृषोत्सर्गं नरः कृत्वासर्व पापैः प्रमुच्यते ॥ पितृणामनृणोभूत्वा सर्वदेवातिथिर्भवेत् ॥ एतत्ते सर्वमाख्यातं भीमेशोत्पत्तिलक्ष-
णं ॥ हेतुविस्तारसंयुक्तं किमन्यत्परिपृच्छसि ॥ १८७ ॥ इति श्रीरेवामहात्म्ये दक्षिणे भीमेश्वरतीर्थनाम अष्टाशीतितमोध्यायः
॥ ८८ ॥ श्रीमार्कंडेय उवाच ॥ तत्रैव पार्श्वे राजेंद्र अर्जुनेश्वरसंज्ञितं ॥ महादेवं ततो गच्छेत्सर्वदुःखापहं शिवं ॥ युधिष्ठिर उ-

CC-0. In Public Domain. Digitization by eGangotri

वाच ॥ मुनेकेनार्जुनेनात्र स्थापितः परमेश्वरः ॥ एकमेवार्जुनं मन्ये जातं कुंत्यां धनंजयं ॥ तमप्यर्जुनमाचक्ष्व जातं कस्य कुले
सदा ॥ किं वीर्यः किंप्रभावोसौ कस्य पुत्रः कदाभवत् ॥श्रीमार्कंडेय उवाच॥ हैहयेषु पुराख्यातो महिष्मत्यां युधिष्ठिर ॥ नर्मदायास्तटे
रम्ये कृतवीर्यो नराधिपः ॥ विख्यातस्तस्य पुत्रोभूदर्जुनोनाम विक्रमी ॥ जितं भूवलयं तेन पार्थिवाश्च वशे कृताः ॥ बाणासुर-
समस्पर्द्धी महेश्वरपरायणः ॥ बभूव परमामर्षी स्वराज्यमदमोहितः ॥ पौलस्त्यो दशमूर्धा यो राक्षसो देवकंटकः ॥ रावणो
निर्जितो येन बद्धः कारागृहे धृतः ॥ यस्या ज्ञया निबध्यंतेपक्षिणो यक्षराक्षसाः ॥ भूतवैतालकाद्यंगपिशाचप्रेतशाकिनी ॥ बाल-
ग्रहाश्चयेकेचित् कुष्मांडाद्या युधिष्ठिर ॥ विद्रवंति दिशः सर्वे दूरस्थाः पांडुनंदनउग्रेण तपसा पूर्वं समाराध्य महेश्वरं ॥ लेभे बाहुसह-
स्रं यस्तथान्यांश्च बहून्वरान् ॥ एकदा मृगयां रंतुमिच्छन् प्राप्य भवोद्भवां ॥ ददर्श वेदिकास्थान मिहोव्दाहकृतं नृपः ॥ किमेत-
दिति पप्रच्छ ब्राह्मणान् वृद्धतापसान् ॥ पूर्ववृत्तं च तैरुक्तं नर्मदोद्वदाहकारणं ॥ तत्तेषां वचनं श्रुत्वा बभूवामर्षसंयुतः ॥ जगादोच्चै-
र्महाबाहुः नर्मदे मां वृणुष्व वै ॥ केन मामिह संप्राप्तं न वृणोति नृपोत्तमं ॥ इत्युक्त्वा बाणमादाय यावन्नीत्वाधनुर्वरं ॥ प्रवाहं
भेत्स्यति नृपस्तदा प्रोक्तः पुरोधसा ॥ राजन्नुन्मत्तता सेयं लोके ख्याता भविष्यति ॥ बाणानां लक्षकोटिनां भिन्ने नु किंभवेत् ॥ तपसा
स्तुतियोगेन समाराधय शंकरं ॥ येनबाहुसहस्रं ते दत्तं तुष्टेन वैपुरा ॥ सएव भगवानीशस्तुष्टो दाताद्यतेपुनः ॥ तमेवशरणं याहि तमेवार्च-
यतस्तुहि ॥ महादेवेन तुष्टेन सैवांतः सर्वसंपदः ॥ पुरोधसैवमुक्तश्च राजासंत्यज्य कार्मुकं ॥ स्नात्वा रेवांभसि ततः स्थापयामास शंकरं
॥ पुरोधसा प्रतिष्ठाप्य दत्वा दानान्यनेकधा ॥ एकपादाग्रसंस्थानो निराहारो विमत्सरः ॥ संपूज्याभ्यर्च्य गिरिशं ततः स्तोतुं प्रचक्रमे ॥
अर्जुन उवाच॥ नमस्ते देवदेवाय शूलिने शाश्वताय च ॥ एकपंचदशास्याय शतास्याय सहस्रिणे ॥ कालकूटं कवलयन् यश्चकार जग-
द्धितं ॥ तस्मै नमोस्तु शर्वाय जगज्जीवनहेतवे ॥ प्राणिसंहारसंजातपापसंतापशांतये ॥ योविभर्ति विरूपाक्षः स मे शांतिं प्रयच्छतु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 आशीविषान् महाघोरान् फणामणिविराजितान् ॥ विभूषणार्थं वपुषि जगृहे यो नतोस्मि तं॥नमस्तेस्तु करालाय कालाय कलितात्मने
॥ कालवैराय रुपाय नमःकालगताय च ॥ भवानां भूतजातस्य भूषणं शशिनः कळां ॥ दयारालकमूले यः शंकरं प्रणतोस्म्यहं ॥
कल्पांतानलमूग्रं यो ललाटनयने हरः ॥ दत्ते धत्ते च शरणं स ददातु ममेप्सितं ॥ येनोत्तरीयितं व्याघ्रचर्मणा गजचर्मणा ॥
वासितं भूतपतिना तं नमामि दिगंबरं ॥ त्रासयन् दुरितौघांश्च विश्वमाश्वासयन् विभुः ॥ सौम्यासौम्यैरिमैर्भावैः पातु मां पार्वति
पतिः ॥ धत्ते भूतं भानुमंतं भवानीं भीमान् सर्पान् कालवन्हीविषं च ॥ धनुः शूलं जान्हवीं मुंडमालामेकः शर्वः सृष्टिसंहारकर्ता ॥
केनाप्यगम्यो भगवानादिकर्ता गौरिभर्त्ता भक्त संतापहर्ता ॥ शश्वच्चित्रं यश्चरित्रं विचित्रं रूपं चोग्रं नामधामश्मशानं ॥ दृग्गोचरे भव
भवाय कुरु प्रसादं वक्तुं नते गुणगणान् प्रभूतां दधामि ॥ नेष्टे स्वरूपमुपवर्णयितुं हि यस्यवाणी पराद्यपि वरा चतुराननस्य
स्रष्टुत्वमतुलं कर्म तत्र ते परमेश्वर ॥ तथैव विष्णुरुपत्वं यजूर्म्मयजगत्पते ॥ धत्से सत्वगुणं कर्म पालकत्वं त्वया हृतं ॥
तथासि रुद्ररुपत्वं देव साममयः पुरः ॥ तमोगुणमथाहृत्य कर्मसंहरणं च ते ॥ क्षितिर्जलं च पवनो वन्हिखं सोमभास्करौ ॥ य-
जमानश्च ते मूर्तिरष्टधा शांकरी विभो ॥ देवदेवाश्च सांगा वै रूपं यज्ञाश्च सर्वशः ॥ करणं कारणं कर्ता कर्म चासि फलात्मकः ॥
आधारः सर्वविद्यानां ज्ञानिनां प्रवरोह्यसि ॥ गुणदोषालयत्वाच्च तेन सर्वज्ञता तव ॥ सूर्यानलानिलेंद्रद्विपर्ज्न्यानंतसौरयः ॥
स्वदादेशकराः सर्वे पालयंति स्थितिं विभो ॥ देवाः सर्वे सर्व एवेश्वराद्या दिक्पाला ये लोकपालाश्च सर्वे ॥ महादेव त्वत्त एवासि
तत्वं महेश्वरस्त्वदृत्तेनान्यएव ॥ एवं स्तुतवतस्तस्य तेजसो राशिरग्रतः ॥ प्रादुर्बभूव तन्मध्ये ददृशे शर्वमीश्वरं ॥ राजेव केवलं
रुद्रं न पुरोधादयः परे ॥ ददृशुर्दैत्यहंतारं दक्षयज्ञांतकं शिवं ॥ दंडवत्पतितो राजा प्रणाममकरोत्ततः ॥ ईश्वर उवाच ॥ उत्ति-
ष्ठोत्तिष्ठ नृपते कार्तवीर्य महामते ॥ वरं वरय भूपाल यत्ते मनसि वांछितं ॥ तत उत्थाय नृपतिः वरं वव्रे युधिष्ठिर ॥ अर्जुन उ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच ॥ यदि तुष्टोसि मे देव वरं दातुमिहेछसि ॥ नर्मदां कुरुमे पत्नीं देही तस्या गृहाश्रमं ॥ एतदेव परं याचे बहुवांछितमेव
मे ॥ ईश्वर उवाच ॥ न मर्त्यस्य भवेत्पत्नी नर्मदा नरकांतक ॥ स्वेच्छया वा भवेत्कापि भार्यार्थे यस्य कस्यचित् ॥ न तत्र
बुद्धिः कर्तव्या भवता मूढवन्नृप ॥ राजा उवाच ॥ मामेवमादिश विभो कथं भीमस्य सा भवत् ॥ भार्या रेवा पुरा देव सा
श्रेष्ठा केन हेतुना ॥ ईश्वर उवाच ॥ कार्यकारणयोगेन भार्यार्थे तस्य साभवत् ॥ नर्मदा देवकायार्थे विस्मयं तत्र मा कृथाः ॥
स्वदेशकालजात्युक्तं शास्त्रे यत्कथितं पुरा ॥ तत्तत्समाचरेन्मर्त्यो न देवचरितं चरेत् ॥ अर्जुन उवाच ॥ वरं दास्यामि ते राजन्
यत्वयोक्तं महेश्वर ॥ पुरा मां प्रति सा तेस्यात्प्रतिज्ञा निःफला विभो ॥ एकएव भवान् दाता जगत्यस्मिन् नृपोह्यहं ॥ शिशो-
रत्याग्रहः पित्रा साफल्यं प्राप्यते न किं ॥ अथवा नर्मदाभार्या देहत्यागोऽस्तु वा मम ॥ महादेव उवाच ॥ भोवत्स शृणु
तत्वार्थं माग्रहं माकृथा वृथा ॥ यस्त्वमर्षं हि भीमस्य कुरुषे मानुषस्य यत् ॥ सपूर्वं मम शापेन पावकः पृथिवीतले ॥
भीमसंज्ञोवतीर्णोसौ देवकार्यार्थसिद्धये ॥ तेन सार्द्धं हिकास्पर्द्धा तव हैहयवंशज ॥ यद्यहंते पिता मान्यस्त्वं मे पुत्रोसि
निश्चितं ॥ सुता मे नर्मदादेवी कथं दंपत्यता तयोः ॥ भ्रातात्वं भगीनी चेयं पिताहमुभयोरपि ॥ तस्माल्लज्जाकरं
वाक्यं न वक्तव्यं त्वायापुनः ॥ त्यक्त्वैतदन्यं ब्रूहि त्वंवरं नरवरोत्तम ॥ लोकद्वयकरं पुण्यं आयुर्बलविवर्धनं ॥ मा-
र्कंडेय उवाच ॥ ईश्वरेणैवमुक्तः स कृतवीर्यात्मजोर्जुनः ॥ निरुत्तरमुखो भूत्वा चिरं चेतसि तस्थिवान् ॥ अब्रवी
त्समहादेवं मुहुर्तार्द्धेन लज्जितः ॥ राजा उवाच ॥ अयशस्यमनायुष्य मस्वर्ग्यं लोकगर्हितं ॥ कृतमेतदधर्म्यंस्याश्चेद्भवानेव-
मुक्तवान् ॥ किमेतेन कृतेनाद्य तस्मात्पातित्य कर्मणा ॥ प्रार्थयामिमहादेव परं दास्यसि चेद्वरं ॥ शांकरी विश्ववंद्या च रेवेयं विश्व-
तारिणी ॥ तत्तीरे स्थापितो देव मया त्वं भक्तियोगतः ॥ अत्रतीर्थे महेशान मत्प्रीत्या त्वं स्थिरो भव ॥ देवासुरमनुष्याणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोकानां हितकाम्यया ॥ स्तोत्रेणानेन च नरो यस्त्वां स्तौति महेश्वर ॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोतु मानवः ॥ भुक्तिं मुक्तिं च तस्यापि देहि त्वं सुरसत्तम ॥ यस्त्वामत्रार्चयेत् भक्त्यामम नाम्ना तु धुर्जटे ॥ दध्ना क्षीरेण मधुना शर्कराघृतवारिणा ॥ चंदनेन समालिप्य नानापुष्पैः सुशोभनैः ॥ कर्पूरागरुनैवेद्यैर्नीराजनफलैरपि ॥ अन्यैश्च विविधैर्भोगैर्भावपूतैरुमापते ॥ तस्यराज्यादिकाशावा वांछितं देहि शंकर ॥ ईश्वर उवाच ॥ एवमस्तु मया दत्तं यत्ते मनसिवांछितं ॥ त्वन्नाम्नाहं स्थितो ह्यत्र सततं कृतवीर्यज ॥ स्वभावेनापि रेवायास्तटं नत्यक्तुमुत्सहे ॥ रेवातीरद्वये नित्यं रेमे राजन्नुमासमं ॥ विशेषात्प्रार्थितो भक्त्या भक्तेनात्र तु किंपुनः ॥ इमं स्तोत्रं पठिष्यंति सायंप्रातः समाहिताः ॥ श्रोष्यंति च नरा येवै तेषां सिद्धिप्रदोस्म्यहं ॥ इत्युक्त्का देवदेवेशस्तत्रैवांतधीयत ॥ कार्तवीर्योथ संपूज्य स्थापयित्वा महेश्वरं ॥ तथालब्ध्वा वरः पार्थ ययौ स्वनगरंप्रति ॥ मार्कंडेय उवाच ॥ एवमेतन्मयाख्यातं तीर्थं चैवार्जुनेश्वरं ॥ अत्र तीर्थेतु यो भक्त्या स्नात्वा संतर्प्य देवताः ॥ दद्या च्छ्राद्धं पितृणां च दत्वा चापि तिलोदकं ॥ षष्टिवर्षसहस्राणि पितरस्तेन तर्पिताः ॥ तथा यः पूजयेद्देवमुपचारैः स्वशक्तितः ॥ अर्जुनेश्वरनामानं भक्त्या भूताष्टमीषु च ॥ शिवलोके चिरं स्थित्वा राजराजो भवेद्भुवि ॥ पुत्रपौत्रादि वृद्धिश्च दानी ज्ञानी सुखी धनी ॥ ब्राह्मण्यशतजीवी च संयुगे चापराजितः ॥ अत्र तीर्थेतु यो दद्यादश्वं वावशनानिच ॥ कांचनं चान्नदानं च तेन सर्वं कृतं भवेत् ॥ अस्य तीर्थस्य माहात्म्यं यः शृणोति चयुधिष्ठिर ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति निश्चितं ॥ महेशार्जुनसंवादं यो भक्त्या श्रावयेन्नरान् ॥ स तीर्थफलमाप्नोति विधियुक्तं युधिष्ठिर ॥ इतिश्रीरेवामहात्म्ये दक्षिणेअर्जुनेश्वरतीर्थनामनवशीतितमोध्यायः ॥ ८९ ॥ मार्कंडेय उवाच ॥ नर्मदादक्षिणे कूले धर्मेश्वरमनुत्तमं ॥ तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ युधिष्ठिर उवाच ॥ धर्मेश्वरमितिख्यातं कस्मात्तीर्थं महामुने ॥ को धर्मः केन देवेशः स्थापितोत्र कदा हरः ॥ श्रीमार्कंडेय उवाच ॥ शृणुपार्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवक्ष्यामि चरितं त्वादिभूपतेः ॥ रुक्मांगदस्य राज्यं हि कुर्वतो यदभून्नृप ॥ पुरा रुक्मांगदो राजा वैष्णवं धर्ममास्थितः ॥ प्रशा-
साश महीं सर्वां पालयन् पुत्रवत्प्रजाः ॥ नवर्णधर्मलोपोभून्नाश्रमोथ तदा नृप ॥ न च व्याधिभयं चासीन्न तथा मरणाद्भयं ॥
न चौरवन्हिजं क्वापि नचावृष्टिकृतं भयं ॥ लोकादीर्घायुषस्तत्र राज्ञीराज्यं प्रशासति ॥ मरणं च क्रमेणैव प्रजानां पांडुनंदन ॥ ध-
र्मार्थकाममोक्षांश्च नंदंति च परस्परं ॥ पितुः स्यादधिकःपुत्रो गुणैः पौत्रो विशेषतः ॥ मनोवाक्कर्मभिर्विष्णुं राजासततमाश्रितः ॥
यद्भूतं यच्च वै भावि यच्च विश्वे प्रवर्तते ॥ तत्सर्वं विष्णुरेवेह निश्चितं नृपते नृप ॥ जंगमाजंगमं सर्वमाब्रह्मस्तंबमंडितं ॥ रूप
मेतन्महाविष्णोरिति राजासदावदेत् ॥ वासुदेवाच्युतानंत राम गोविंद केशव ॥ कृष्ण विष्णो विश्वरुपेत्याह राजा सदैवहि ॥
निर्मथ्य सर्वशास्त्राणि मीमांसां च पुनःपुनः ॥ एतदेव सुनिष्पन्नं ध्येयो नारायणः सदा ॥ संपूज्यो वासुदेवेति स्तुत्यो गोविंद
इत्यपि ॥ कार्ययोगेषु तं देवं तद्रूपाह्वयमाश्रयेत् ॥ स्थानेषु तेषु तेष्वेव कार्योत्पत्तौ महामतिः ॥ युधिष्ठिर उवाच ॥ केषु कार्ये-
षु किं रूपं कोनामा स्मर्यते मुने ॥ एतन्मे परमं श्रेयः कीर्तयस्व महामुने ॥ मार्कंडेय उवाच ॥ शृणु वच्मि नृपश्रेष्ठ परं गोप्यं
च पापिनां ॥ नरेण कार्ययोगेषु यत्कृत्यं सततं शुभं ॥ कार्ययोगे यथोत्पन्ने बुधैर्ध्येयो यथा विभुः ॥ तत्तेहं संप्रवक्ष्यामि शृणुष्वैकमना
नृप ॥ औषधेचिंतयेद्विष्णुं भोजने विश्वरूपिणं ॥ शयने पद्मनाभं च संतानार्थे प्रजापतिं ॥ संग्रामे चक्रिणं ध्येयं स्थानभ्रंशे त्रि-
विक्रमं ॥ हृषिकेशं तथा चांते अनंतं रोगसंकटे ॥ जलमध्ये तु वाराहंपावके जलशायिनं ॥ संतापे नारसिंहं च गोष्टे च रघु
नंदनं ॥ दुःस्वप्ने चैवगोविंदं निद्रांते मधुसुदनं ॥ व्यामोहे वामनं देवं यात्रार्थे श्रीधरं तथा ॥ प्रद्युम्नं कामभोगेषु सभायां पुरुषोत्तमं ॥
उक्तिप्रयुक्ति समये श्रीकृष्णं चिंतयेद्बुधः ॥ जनार्दनं हि दानेषु वासुदेवं सुरार्चने ॥ पापहानौ हरिं देवं संकर्षणमार्जने ॥ तथामं-
गलकार्येषु स्मरेद्दामोदरं विभुं ॥ व्यवसाये चानिरुद्धं सर्वकार्येषु माधवं ॥ आदित्यं केशवं कृष्णं हरिं सत्यं जनार्दनं ॥ हंसं नारा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यणं चेति नामान्येतानि यः पठेत् ॥ तिष्ठन् व्रजन्नथासीनः शयानो भोजनं चरन् ॥ उद्यतेष्वपि शास्त्रेषु हंता तस्य न विद्यते ॥
अहोरात्रकृतं पापं स्मरणादेव नश्यति ॥ त्रिसंध्यं कीर्तयेद्यस्तु ध्यानं विष्णोरिदं नरः ॥ तत्कर्मफलयोगं च प्राप्नोति महतीं श्रियं ॥
एवं राजा समाश्रित्य वैष्णवं व्रतमुत्तमं ॥ पुरे देशे दशम्यांसघोषयेत्पटहं नृप ॥ पंचपर्षाधिको मर्त्यश्चाशीतेर्मध्यमास्थितः ॥
एकादश्यां तु यः कश्चित् भोक्षत्यातुरवर्जितः॥स मे दंड्यश्चवध्यश्च द्विजस्त्याज्यः स्वदेशतः॥इत्यादिबहुभेदं च चरितं तस्य भूपतेः॥
समासेन च ते वक्ष्ये किमुक्त्वाबहुविस्तरं ॥ तस्मिन् प्रशासति नृपे राज्यं प्राप्य विकंटकं ॥ मृतो विष्णुपुरं सर्वः प्रयाति परमा-
र्चितः ॥ वंशजैः पुत्रपौत्रैश्च वैष्णवत्वमथाश्रीतैः ॥ तारिताः पितरः सर्वे नरकेषु च ये स्थिताः ॥ एवं कतिपयाहोभिर्विष्णुलोकः
सुसंकुलः ॥ जाता यमपुरि शून्या रिक्ताश्च नरकाः कृताः ॥ या सा निःक्षीणकर्माभूच्चित्रगुप्तादयस्तथा ॥ विचिंतयंश्च विविधानुपा-
यान् तं नृपं प्रति ॥ वैरानुबंधान् नाविंदन् विष्णुशक्त्या युतस्य हि ॥ ब्रह्माणं शंकरं पश्चाद्ययौ जनकमेव च ॥ तेषां निवेद्य वृत्तं
च वृत्तांतं स्वपराभवं ॥ आश्वास्य च विसृष्टस्तैरुन्मनाः सूर्यनंदनः ॥ विहाय दंडं मुद्रां च व्यापारं च निजां पुरीं॥सर्वोपायपरिभ्र-
ष्टो नर्मदातीरमाश्रितः ॥ धर्मराजस्त्वेक एव तपश्चक्रे समाहितः ॥ यमोसौ पापजंतूनां साधूनां धर्मराट् स्थितः ॥ सधर्मोत्र तप-
स्तेपे चिरं रेवातटे नृप ॥ ध्यायन् देवं हरं रुद्रं शितिकंठं हि शंकरं ॥ ततस्तुष्टो महादेवस्तपसा तस्य तोषितः ॥ वरदानोद्यतो
देवः प्रत्यक्षः समजायत ॥ ईश्वरोवाच ॥ ब्रूहिब्रूहीति भो वत्स धर्मराज महामते ॥ तुष्टोहं तपसा तेन क्लिश्यसे किं स्थिरो
भव ॥ ततो वीक्ष्य महादेवं धर्मराजः कृतांजलिः ॥ प्रणम्य दंडवद्भूमौ ततः प्रोवाच भास्करी ॥ धर्म उवाच ॥ महादेव महेशान महा-
मूर्ते महोक्षग ॥ महाकोपप्रसादाढ्य महादैत्यविनाशन ॥ न्यायेन सर्वशास्त्रेषु महादेवेति कीर्त्यते ॥ यतोमहांति सर्वाणि दृश्यंते त्वयि
धूर्जटे ॥ महाधुनी महाववन्हिर्महाविषमहोरगौ ॥ अमृतांशुर्महामाला महादेवी महावृषः ॥ महाकोपप्रसादौ च नान्यत्रैतानि शंकर ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मात्प्रसादसुमुखं त्वां याचे जगदीश्वरं ॥ रुक्मांगदस्य नृपतेर्वैष्णवत्वेन मे पुरी ॥ शून्या भवन्महेशान व्यापारो यस्त्वयार्पितः ॥ वृथा बभूव सोप्यद्य केवलं दैन्यमाश्रितः ॥ किं करोमि क्व गच्छामि त्वमेव शरणं मम ॥ रुक्मांगदकृतं दैन्यं नाशयाशु जगत्पते ॥ ईश्वर उवाच ॥ शृणु सत्यं धर्मराज तस्यैतद्धिमहाव्रतं ॥ यो वैष्णवः स मद्भक्तः सत्यमेतद्वदाम्यहं ॥ तद्व्रतः करणाद्यापि मद्भक्तः प्रच्यवेत्कथं ॥ सर्वदेवमयो विष्णुर्यतो वेदेषु गीयते ॥ तस्मादभिनिवेशं त्वमेनंत्यक्त्वार्कनंदन ॥ मदुक्तं कुरु मे लोकान् प्राप्य तावच्चिरं वस ॥ यावद्रुक्मांगदो राजा यावद्धर्मांगदस्तथा ॥ विधिवद्वैष्णवत्वेन पालयत्यखिलां महीं ॥ ततः कालेन कियतास्वं लोकं समवाप्स्यसि ॥ व्यापारमुद्रां दंडं च तथैवाप्स्यसि भास्करे ॥ नामर्षश्चात्र कर्तव्यो वैष्णवेषु त्वया क्वचित् ॥ एह्येहि मम लोकं त्वं लोकपाल सुखं वस ॥ अत्र संस्थाप्य मां भक्त्या स्थिरं पदमवाप्स्यसि ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ धर्मराजोपि देवेशं धर्मेशमिति संज्ञकं ॥ महेश्वरं स्थापयित्वा भक्त्याभ्यर्च्य च भूपते ॥ शिवलोकं जगामाथ देवसिद्धर्षिसेवितं ॥ रुक्मांगदे विष्णुलोकं प्रयाते कालसत्ता तस्य पुत्रे चराजन् ॥ धर्मांगदे गणतां चापि विष्णोस्ततः काले हीयमानो यमोपि ॥ स्थानं मुद्रां पूर्ववच्चापि दंडं ददौ देवो गिरिशो व्याप्ततिंच ॥ मुद्रां दंडं गृहीत्वा च तत्काले सूर्यनंदनः ॥ स्वलोकं च समास्थाय स्वव्यापारं करोत्तथा ॥ श्रीमार्कंडेय उवाच ॥ इति ते कथितं राजन् तीर्थंधर्मेश्वरं परं ॥ तस्मिंस्तीर्थे नरः स्नात्वा धर्मेशं पूज्य भक्तितः ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ अष्टम्यां च चतुर्दश्यां स्नात्वा संपूज्य धूर्जटिं ॥ प्रदक्षिणशतं दत्वा वाजपेयफलं लभेत् ॥ दीपमुज्वालयेच्छ्रत्तया नरो धर्मेश्वरालये ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति भारत ॥ चक्षुष्मान् रूपसंपन्नो जायते भुविभूपतिः ॥ ब्राह्मणान् भोजयेद्भक्त्या तापसांश्च युधिष्ठिर ॥ अतिरात्रफलं मर्त्यः माप्नुयान्नात्र संशयः ॥ इति नर्मदामाहात्म्ये दक्षिणे धर्मेश्वरतीर्थनाम नवतितमोध्यायः ॥ ९० ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र लुंकेश्वरमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्मृतं ॥ धर्मेश्वरात्क्रोशमात्रे किंचिन्न्यूने व्यवस्थितं ॥ नर्मदादक्षिणेकूले जलमध्ये महेश्वरं ॥ विख्यातं त्रिषु लोकेषु सुरासुरनम-
स्कृतं ॥ इदं तीर्थं महापुण्यं महाश्चर्यं महीतले ॥ अस्य तीर्थस्य महात्म्यमुत्पत्तिं शृणु भारत ॥ आसीत्पुरा महावीर्यो दानवो
बलदर्पितः ॥ कालपृष्ठइति ख्यातः सुतो ब्रह्मसुतस्यच ॥ गंगातटं समासाद्य स चचार महातपः ॥ अधोमुखश्चोर्ध्वपादः पिबन्
धूममहर्निशं ॥ ततः कदाचित् खे शंभुर्विचरन्नुमयासह ॥ दृष्ट्वोमा तं तपस्युग्रे स्थितं शिवमथाब्रवीत् ॥ पश्य पश्य महादेव धू-
माशी तिष्ठते नरः ॥ प्रसादं कुरु देवेश देह्यस्मै वरमीप्सितं ॥ ईश्वर उवाच ॥ यदुक्तं वचनं देवी नतन्मे रोचते प्रिये ॥ स्व-
हितं चिंतयेद्धीमान्सर्वकार्येष्वयं विधिः ॥ परस्य चात्मनो यत्र नहितं तद्विवर्जयेत् ॥ मूर्खस्त्रीबालशत्रूणां यः छंदेनानुवर्तते ॥ पत-
ति व्यसने घोरे संकटे स न संशयः ॥ पार्वत्युवाच ॥ भार्ययाभ्यर्थितो भर्ता कारणं बहुचेद्ददेत् ॥ लघुत्वं याति सा नारी लो-
केष्विति विनिश्चितं ॥ किं तस्या जीवितेनेह किंभोगैः किं विभूषणैः ॥ प्रत्याख्याता च सा भार्या किं भर्त्रा सह वक्ष्यति ॥ प्राण-
त्यागं करिष्यामि यदि मां त्वं न मन्यसे ॥ एवमुक्तः शिवो देव्या मौनी चिंतासमन्वितः ॥ उद्विग्नः कंपितशिरा गतोसौ दानवं
प्रति ॥ महादेव उवाच ॥ भोभो पिबसिकस्मात्त्वं धूमं कस्माच्च तप्यसे ॥ किं दुःखं कस्य संतापो वद कार्यं किमीप्सितं ॥
युवात्वं दृश्यतेद्यापि किमर्थं क्लिश्यसे सुर ॥ तदाचक्ष्वेह मे सर्वं तपसः कारणं महत् ॥ दानव उवाच ॥ यदि तुष्टोसि देवेश
यदि देयो वरो मम ॥ अचला दीयतां भक्तिर्मम स्थैर्यं तथा त्वयि ॥ ईश्वर उवाच ॥ एवं भवतु याचस्व पुनस्तुष्टोस्मि सुव्रत
॥ मार्कंडेय उवाच ॥ देवस्य वचनात्प्रीतश्चिंतयामास दानवः ॥ किमूर्ध्वलोकराज्यं वा प्रार्थयाम्यखिलां महीं ॥ किंनु वा सर्व-
विजयं व्यापारं वार्कसोमयोः ॥ इति ब्रुवन्नंतरिक्षमूर्ध्वं पश्यति यावता ॥ तावता शिवपत्नीं तां गौरीं दृष्ट्वा विहायसि ॥ स्थितां
तु चाह सर्वांगीं कामबाणार्दितो ब्रवीत् ॥ चिंतयन्वै शिवस्याशु नाशमाशंकयोर्जितः ॥ दानव उवाच ॥ यदि तुष्टोसि मह्यं

CC-0. In Public Domain. Digitization by eGangotri

त्वं वरं दास्यसि चेप्सितं ॥ बहुनात्र किमुक्तेन संग्रामा बहवः कृताः ॥ तत्र तत्रातिखिन्नोहं क्लेशेन बहुनात्र किं ॥ बलेन शत्रुविजयो बलं नास्तीति चिंतये ॥ एतदेव ततो याचे सुखेन जयलक्षणं ॥ मूर्ध्न्यहं यस्य कस्यापि स्थापयामि करं मम ॥ देवासुरेष्वपि नृषु भस्मसात् यातु तत्क्षणात् ॥ महेश उवाच ॥ दानवप्रार्थितं यत्ते तद्दै तव भविष्यति उत्तिष्ठ गच्छ शीघ्रं त्वं भवनं प्रति दानव ॥ मार्कंडेय उवाच ॥ इत्याकर्ण्यवचः शंभोर्दानवः प्रत्युवाच तं ॥ स्थीयतां देवजिज्ञासा यावन्मे वर्तते हृदि ॥ प्रत्ययं वरदानस्य त्वत्तः सत्यं विलोकये ॥ तव मूर्ध्नि न्यसेत्पाणिं प्रत्ययो मे भवेद्यथा ॥ श्रीमार्कंडेय उवाच ॥ एवमुक्तः स तेनाशु चिंतयामास धूर्जटिः॥नब्रह्मा न हरिस्कंदो न गणेशो गणास्तथा॥दिक्पाला लोकपाला वा यः कोप्यत्र क्षमो भवेत् ॥ मत्वा चैवापदं प्राप्तां देवःसंप्रार्थयद्वृषं ॥ अनेन सह यानेन कुरु युद्धं महामते ॥ संकटे समनुप्राप्ते यस्तिष्ठति निजो हि सः ॥ करं प्रसारयन् दैत्यो यावन्मूर्ध्नि स्पृशेच्छिवं ॥ लांगूलताडितो तावद्वृषेण पातितो भुवि ॥ देवस्तु दक्षिणामाशां दुद्रावैवोमया सह ॥ भयभीतो निरीक्षन्वै पश्चाद्भागं पुनःपुनः ॥ गते चादर्शनं देवे दानवो वृषभेण च ॥ रुद्धो युद्धाश्रितमना हरं गच्छन् वृषं भजन् ॥ द्वावेतावपि कोपेन युयुधाते महाबलौ ॥ प्रहारैर्वज्रसदृशैर्यामार्द्धं कृतकोपकौ ॥ यावद्वृषशिरो दैत्यः पाणिना स्प्रष्टुमभ्ययात् ॥ तावल्लांगुलघातेन पातयित्वा सुरं भुवि ॥ पुनः पथि प्रयात्येव पार्वतीपतिरक्षकः ॥ पुनश्चाप्युत्थितो दैत्यो व्रजत्येव भवं प्रति ॥ ततोसौ वायुवेगेन प्राप्तो यत्र महेश्वरः ॥ आगतं दानवं दृष्ट्वा वृषो देवमथाब्रवीत् ॥ मम पृष्ठं समारुह्य कुरु शीघ्रं पलायनं ॥ ततो वृषं समारुह्य ययौ देवः शिवस्त्वरन् ॥ गत्वा नाकं ततो देवोगतःशक्रस्य मंदिरं ॥ नात्यजद्देवपृष्ठं च दानवो मदगर्वितः॥ शिवः सेंद्रोपि दुद्राव दृष्ट्वा दानवमागतं ॥ एवं गत्वा सर्वलोकान् ब्रह्मलोकं गतः शिवः ॥ नात्यजद्दानवः पृष्ठं प्रसारितकरः स्वयं ॥ यत्र यत्र व्रजेद्देवो भयात्सहदिवौकसैः ॥ अपश्यत्तत्र तत्रैवं पृष्ठलग्नं हि दानवं॥ सर्वान् लोकान् परिभ्रम्य देवो विस्मयमा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 गतः ॥ न स्थानं विद्यते तद्धि यत्र बिश्रम्य तेक्षणं ॥ एवं सति शिवं ज्ञात्वा व्यसनार्तं हि दानवात् ॥ ननर्तानंदितात्मा तु
नारदो ह्युपगम्य च ॥ धन्योहमद्य मे जन्म जीवितं सफलं मम ॥ महांतं च कलिं दृष्ट्वा संतोषं परमं व्रजे ॥ व्यसनार्तंशिवं द्र-
क्ष्ये किन्नलब्धमतः परं ॥ एवं विचिंतयन् हृष्टो नारदो विस्मयान्वितः ॥ आजगाम ततः शीघ्रंयत्र पेवो महेश्वरः ॥ दृष्ट्वागतं मुनिं
देवः परिष्वज्येदमब्रवीत् ॥ भोनारद मुनिश्रेष्ठ जानीषे केशवं क्वचित् ॥ त्वरितं तत्र गत्वैवं केशवाय निवेदय ॥ नारद उवाच ॥
देवदानवसिद्धानां गंधर्वोरगरक्षसां ॥ सर्वेषां देवदेवेश हरसि ध्रुवमापदं ॥ असंभाव्यं न वक्तव्यं मनसापि न चिंतयेत् ॥ न
मन्यते यदन्योपि तन्महेश किमुच्यते ॥ अहमेवं विजानामि आपदो न त्वयि प्रभो ॥ शिव उवाच ॥ अवध्यो दानवो ह्येष
मयासह मरुद्गणैः क्लेशघ्नं केशवं मुक्त्का तत्र गच्छाशु नारद ॥ नारद उवाच ॥ नैव गच्छाम्यहं देव सुप्तं क्षीरोदसागरे ॥ केशव-
प्रेरणेमस्य देह्यादेशं महेश्वर ॥ मातरं पितरं साधुं स्वसारं स्वमुतां तथा ॥ राजानं राजपुत्रं च ब्राह्मणं सर्पलिंगिनौ ॥ गुरुं तप-
स्विनं चैव शयानं न प्रबोधयेत् ॥ रुद्र उवाच ॥ यदि कश्चिदगारेषु वन्हिरुत्पद्यते महान् ॥ निधनं जायते तत्र तत्र बोध्या न
संशयः॥ एवं भवतु यास्यामि रक्षात्मानं तु तावता ॥ यावद्गच्छाम्यहं देव यत्र देवो जनार्दनः ॥ ततो देवगणान् शीघ्रं कैलासात्प्रे-
यन्मुनिः ॥ जगाम वैष्णवं धाम यत्रास्ते क्लेशहा हरिः ॥ ततो नंदीमहाकालैर्दंडहस्तैर्भयानकैः ॥ हन्यते दानवं प्राप्य मुद्गरैर्विवि-
धायुधैः ॥ त्रयोपि च महाकायाः शालवृक्षा इवोत्छिताः ॥ नशमो जायते तेषां युध्यतां वै परस्परं ॥ ततश्च नारदेनाशु गत्वा
क्षीराब्धिमंदिरं ॥ सुखं सुप्तः प्रभुर्दृष्टः शेषपर्यंकसंस्थितः ॥ लक्ष्म्या हि युगलं गृह्य स्वोरूपरि निवेशितं ॥ गंधर्वैर्गीयमानं तं भक्त्या
नत्वा स केशवं ॥ मातरं जगतां देवीं नमस्कृत्याग्रतः स्थितः ॥ नारद उवाच ॥ अद्य मे सफलं जन्म जीवितं मे सुजीवि-
तं ॥ यद्दृष्टो मे जगन्मूर्तिर्मातस्तातस्त्वया सह ॥ प्रबोधयाशु देवेशं लक्ष्मित्वमविशंकिता ॥ महात्कार्यं समुत्पन्नं विनिद्राति य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाविभुः ॥ नारदस्य वचः श्रुत्वा पादांगुष्ठव्यमर्दयत् ॥ विबुद्धस्तेन देवेशो विष्णुर्विमललोचनः ॥ श्रीरुवाच ॥ नारदस्तिष्ठति द्वारि कार्ययोगादिहागतः ॥ तं पुरः प्रणतं पश्य विबुध्यस्व जगत्पते ॥ देवोपि नारदं दृष्ट्वा परं हर्षमुपागतः ॥ स्वागतं ते मुनिश्रेष्ठ सुविबुद्धोस्मि सांप्रतं ॥ नारद उवाच ॥ अद्यमे सफलं जन्म प्रभातं तवदर्शनात् ॥ कुशलं नहि देवानां शीघ्रमुतिष्ठ गम्यते ॥विष्णुरुवाच ॥ किंजातं ब्रह्मरुद्रेंद्र सूर्यादि मरुतां मुने॥ आपदां कारणं सर्वं तन्ममाख्यातुमर्हसि॥ नारदउवाच ॥दानवेन महातीव्रं तपस्तप्तं सुरेश्वर ॥ रुद्रेण च वरो दत्तः तस्मै यो मनसि स्थितः ॥ वरदानबलेनैव स शिवं हंतुमिच्छति ॥ ईदृशं चेष्टितं दृष्ट्वा भीतो देवोमरैः सहः ॥ दक्षिणां दिशमाश्रित्य प्रदुद्राव किमुच्यते ॥ नारदस्य वचः श्रुत्वा विहस्य मधुसूदनः ॥ जगाम देवमीशानं ददर्श प्रद्रुतं पुरः ॥ दृष्ट्वा कृष्णं च तं शंभुर्दानवैरपराजितं ॥ हृष्टरोमा भवत्तत्र सष्वजे च पुनःपुनः ॥ नमस्कृत्य ततः शर्वमुवाच मधुसूदनः ॥ भयस्य कारणं देव कथ्यतां मे महेश्वर ॥ दैत्यं च दानवं यक्षं कं नयामि यमालयं ॥ ललाटेद्य कृतो घर्मबिंदुस्ते येन शंकर ॥ ईश्वर उवाच ॥ नास्ति सौख्यं हि मूर्खेषु नास्ति सौख्यं हि रोगिणां ॥ सुखं नास्ति पराधीने स्त्रीजितेषु विशेषतः ॥ स्त्रीजितेनेह देवेश मया तद्वशवर्तिना ॥ अदत्तपूर्वश्च वरः प्रदत्तो दनुसूनवे ॥ यस्य मूर्ध्नि न्यसेत्पाणिं सभवे द्भस्मपुंजवत् ॥ अजेयश्चामरश्चान्यैर्मया प्रोक्तः स केशव ॥ हंतुमिच्छति मां पापस्तस्योपायो न विद्यते ॥ विष्णु रुवाच ॥ सुखी भव भवाशोक नाशयिष्ये भयं तव ॥ उपायं विसृजाम्यत्र वधार्थं दानवस्य हि ॥ नर्मदायास्तटं चैतद्रम्यं पुण्यं च शंकर ॥ गम्यताममरैः सार्द्धं माविलंबेन चात्रतः॥यत्र दक्षिणगंगेयं नर्मदा शर्मदायिनी ॥ इहाग्रतः क्रोशमात्रे ह्नदः पुण्योस्तिवै महान्॥ गम्यतां तत्र देवेश त्वं हि तूर्णंलुकेश्वरं ॥ यत्र गंगा च यमुना सन्निधानं सरस्वती ॥ नद्यश्चान्याः करिष्यंति तीर्थान्यप्यखिलानि च ॥ देवैः सर्वैः समं यत्र लुकिष्यसि महेश्वर ॥ एतत्समं महातीर्थं नमर्त्ये भविता क्वचित् ॥ स्नानं यत्र करिष्यंति दानं दास्यंति भक्तितः ॥ सप्तजन्मकृतं पापं तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाशमुपैष्यति ॥ विष्णोश्च वचनाद्भृत्वा प्रविवेशह्रदं शिवः॥ रतिं स महतिं लेभे शिवो देवर्षिभिः सह ॥ पर्यावृत्य ततो विष्णुर्मायां चक्रेह्यनेकधा ॥ वसंततुं तदा सृष्ट्वा उद्यानतरुशोभितं ॥ अशोकैर्बकुलैश्चैव राजितं राजचंपकैः ॥ सहकारैर्मातुलिंगैः कपित्थैर्नालिकेरकैः ॥ पनसैः कदलैर्बिल्वखर्जुरकरणैस्तथा ॥ हिंतालतालपुन्नागपलाशैर्जंबुतिंदुकैः ॥ अश्वत्थोदुंबरप्लक्षैर्नानावृक्षैरनेकधा ॥ नानासुगंधपुष्पाद्यैर्भ्रमरैश्च निनादितं ॥ वनमध्ये महावृक्षो न्यग्रोधश्च सुशोभनः ॥ बहुपक्षिगणाकीर्णः कोकिलारवनादितः ॥ केशवेन कृतं तस्मिन् कन्यारूपं तु तत्क्षणात् ॥ न तस्याः सदृशी कन्या त्रैलोक्ये सचराचरे ॥ अन्याश्च कन्यकाः सप्त सुरूपाः शुभलोचनाः ॥ दिव्यरूपधराः सख्यः सर्वाभरणभूषिताः ॥ पुमांसमभिकांक्षंत्यो यद्येकां कामयेत् स्त्रियं ॥ रत्नमाणिक्यवैदुर्यवज्रमौक्तिकगुंठितैः ॥ कामहारैश्च वस्त्रैश्च नृत्यगीतादिलीलया ॥ वादनैर्वंशवेणूनां बध्वा चांदोलकं द्रुमे ॥ आरुह्य तं तदा कन्या गायंत्यः सुस्वरं मधु ॥ मारुते शीतले वाति वनं दृष्ट्वा सुपुष्पितं ॥ वातेन प्रेरिते गंधे दानवो गंधमोहितः ॥ ततः कुसुमगंधेन विस्मयं परमं गतः ॥ आघ्रातं नेदृशं पुष्पं न दृष्टं न श्रुतं कचित् ॥ वनं संपश्यतस्तस्य ध्वनिगीतस्य शोभनः ॥ वेणुवीणारवोन्मिश्रः श्रुतिमूलमुपागतः ॥ गीतस्य तं ध्वनीं श्रुत्वा मोहितो मायया हरेः ॥ व्याधस्येव यथा कूटे नियतेद्दै मृगो नृप ॥ कालपृष्टस्तदा कूटे निपपातासुरो हरेः ॥ दृष्ट्वा कन्यां सदैत्येंद्रो मूर्छितो पतितो भुवि ॥ पतितेन च दृष्टास्ताः कन्याविटपगा वटे ॥ हावभावविनोदै͘ता हसमाना मुहुर्मुहुः ॥ हासं दृष्ट्वा स नारीणां पुनः कामेन पीडितः ॥ गृहीत्वा हेमदंडं स तासां पातमियेष च ॥ कन्या उवाच ॥ मा मां संस्पृश भद्रं ते कुमारीं कुलसंभवां ॥ गच्छ गच्छ पराक् शीघ्रं मुंच मार्गं गृहं प्रति ॥ अहं यास्यामि पितरं हठं कन्यासु मा कुरु ॥ दानव उवाच ॥ अहमुद्वाहमिच्छामि त्वया सार्द्धं सुलोचने ॥ सर्वभूवलये राज्ञी भवित्री ं न संशयः ॥ कन्या उवाच ॥ पितारक्षति कौमारे भर्ता रक्षति यौवने ॥ पुत्रो रक्षति वृद्धत्वे न स्त्री स्वातंत्र्यमर्हति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ न स्वातंत्र्यं ममात्रास्ति जाताहं विपुले कुले ॥ याचितव्यः पिता माता भ्रातरो बांधवस्तथा ॥ दानव उवाच ॥ यदि मां नेच्छसि हि त्वं स्वातंत्र्येण वरानने ॥ देहं त्यक्ष्यामि नियतं हत्या तव भविष्यति ॥ कन्या उवाच ॥ विश्वासो नैव कर्तव्यो यादृशे तादृशे नरे ॥ नराः स्त्रीषु प्रसक्तास्युर्लंपटा काममोहिताः ॥ परिणीय च मां त्वं हिभुंक्ष्व भोगान्मया सह ॥ देहत्यागे मनस्तेस्ति यद्येवं नियतो हठः ॥ ब्राह्मणी क्षत्रिया वैश्या शूद्री चैव विवाहिताः ॥ एकएव भवेद्भर्ता द्वितीयो नेह जन्मनि ॥ प्रतितीं जनयाद्येह मम त्वां वरये यथा ॥ अन्यथा जन्मनाशः स्यान्नत्वं नान्योभवेन्मम ॥ दानव उवाच ॥ यत्त्वया व्याहृतं भद्रे तन्मया विधृतं हृदि ॥ प्रत्ययंजनयिष्ये ते यथा मनसि रोचते ॥ कन्या उवाच ॥ जानीहि गोपकन्यां मां क्रीडमानां सखीवृतां ॥ अस्मत्कुले तु यद्दिव्यं तत्कुरुष्व यथाविधि ॥ नतत्तुंदलतो याहि विषं कोषाग्निजं तुला ॥ गोपान्वये स्मदीये तुहस्तः शिरसि दीयते ॥ मार्कंडेय उवाच ॥ श्रुत्वैवमविचिंत्याथ मूढेनोत्सुकचेतसा ॥ कामांधेनैव राजेंद्र निक्षिप्तो मस्तके करः ॥ तत् क्षणादभवद्भस्म दग्धस्तृणचयो यथा ॥ केशवोपरि देवैस्तु पुष्पवृष्टिर्निपातिता ॥ साधु साध्विति भाषंतः किरंती कुसुमं बहु ॥ हृष्टाः सर्वे भवन्देवा ऋषयश्च तपोधनाः ॥ सिद्धचारणगंधर्वा स्वस्थाश्च विगतज्वराः ॥ कालपृष्ठे क्षयं याते शिवं संप्राप्य केशवः ॥ विष्णु रुवाच ॥ दानवोसौ क्षयं प्राप्तः प्रसादः क्रियतां मयि ॥ उत्तिष्ठोतिष्ठ देवेश कैलासभुवनं व्रज ॥ शिव उवाच ॥ न यास्ये हं रमाकांत सुखं रेवातटे स्थितः ॥ इह मे प्रीतिरतुला लुकितस्य सुरैःसह ॥ नद्यस्तीर्थानि पुण्यानि क्षेत्राणि सह संतु च ॥ तिष्ठ त्वमपि कृष्णात्र स्थाने मत्प्रीतिकाम्यया ॥ क्षीरोदधामचात्रापि तीर्थे सिद्धर्षिभिः सह ॥ एवमुक्तः स शर्वेण विष्णुर्विश्वमयो विभुः ॥ सन्निधानं ततश्चक्रे कृत्वा तीर्थे लुकेश्वरं ॥ य इदंश्रुणुद्भक्त्या चरितं शिवदैत्ययोः ॥ स जयी जायते नूनमुवाचेदं शिवस्तथा ॥ एतस्मात्कारणाद्राजन् तीर्थं नामलुकेश्वरं ॥ लुलुके यत्र शर्वोपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखं यः प्राप निर्भयः ॥ पापं यल्लुकितं देहे स्नानमात्रेण नश्यति ॥ त्वङ्मांसशोणितास्थ्यादि सप्तधातु गतं च यत् ॥ तत्पापं न-
श्यति क्षिप्रं देहस्थं बहुजन्मजं ॥ लुकेश्वरे महाराज भक्त्या तोयं तु यः पिबन् ॥ प्रसृतित्रयमात्रं वा पापं याति सहस्रधा अष्टम्यां
च चतुर्दश्यां पक्षयोरुभयोरपि ॥ उपोष्य यो नरो भक्त्या पितॄणां श्राद्धमाचरेत् ॥ तिलोदकं तथा दत्वा स्वशक्त्या द्विजभोजनं ॥
उध्दृताः पितरस्तेन नारकीया पितामहाः॥ काकिणीमपि यो दद्यात् ब्राह्मणाय महात्मने ॥ तेन दानफलं प्राप्तं कुरु क्षेत्रकृतं तथा
॥ निःफलं त्वन्यथा जन्म प्राहैवं शंकरो नृप ॥ स्पृश्य लिंगमिदं राजन् शंकरोयं स्वयंस्थितः ॥ स्पर्शमात्रे मनुष्याणां वासः शिव-
पुरे भवेत् ॥ एतस्मात्कारणाद्राजन् लोकपालास्तु रक्षकाः॥दुर्गा च रक्षणे स्पृष्टा चतुर्हस्ता चतुर्मुखा॥ धनदो लोकपालेशो रक्षणे चात्र
भारत ॥ विघ्नयंति सदा कालं गृहव्यापाररूपतः ॥ पुत्रक्षेत्रधनाद्यैश्च स्वामिसंबंधिरूपतः ॥ लुकेश्वरमिदं तीर्थं देवैर्नाद्यापि मुच्यते
॥ इति श्रीवायूक्तशिवसंहितायां रेवामहात्म्ये दक्षिणे लुकेश्वरतीर्थनाम एकनवतितमोध्यायः ॥ ९१ ॥ ततो धनुःशतं साग्रं
धनदेश्वरमुत्तमं ॥ धनदस्य तु तीर्थं च तत्र गच्छेन्नरोत्तम ॥ नर्मदादक्षिणे कूले सर्वपापक्षयं करं ॥ सर्वतीर्थफलं तत्र
प्राप्यते नात्र संशयः ॥ चैत्रशुक्लत्रयोदश्यां नरो राजन् जितेंद्रियः ॥ उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरं ॥
पंचामृतेन राजेंद्र स्नापयेद्धनदेश्वरं ॥ घृतेन दीपो दातव्यो गीतं वाद्यं च कारयेत् ॥ प्रभाते भोजयेत् विप्रान्नात्मनः श्रेयइच्छता ॥
प्रतिग्रहसमर्थांश्च वेदसिद्धांतवेदिनः ॥ श्रौतस्मार्तक्रियायुक्तान् परदारविवर्जकान् ॥ पूजयेद्गोहिरण्यैश्च वस्त्रोपानहभोजनैः ॥ छत्रश-
य्याप्रदानेन सर्वपापक्षयो भवेत् ॥धनदेश्वरसंस्पर्शात् नश्येत्पापं त्रिजन्मजं ॥ स्वर्गदं दुर्विनीतानां विभीतानां चमोक्षदं ॥ धनदं च
दरिद्राणां भवेज्जन्मनि जन्मनि ॥ कुलीनत्वं दुःखहानिः स्वभावाज्जायते नृणां॥व्याधिध्वंसो भवेदत्र नर्मदातोयसेवनात् ॥ यज्ञेश्वरः
पुराश्रुत्वा लुकितं चात्र शंकरं ॥ आगत्य स्वपुरात् शीघ्रं लीनं रेवाह्रदे विभुं ॥ दृष्ट्वा प्रणाममकरोत्पार्श्वस्थः पार्वतीपतेः स्वनाम्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च तथा तत्र पूजयामास धूर्जटीं ॥ धनदेश्वरनामानं तस्मादुत्तरतः स्वयं ॥ ग्रहैर्बालग्रहैश्चैव मातृभिः सहयक्षराट् ॥ समं रुद्रगणै-श्चापि स्वयं तत्र च तस्थिवान् ॥ धनदस्य च तीर्थे यो विद्यादानं प्रयच्छति ॥ स याति भास्करे लोके सर्वदुःखविवर्जिते ॥ देवद्रोणीं च तत्रैव स्वशक्त्या पांडुनंदन ॥ ये प्रकुर्वंति भूयिष्ठां नर्मदादक्षिणे तटे ॥ ते यांति शांकरं लोकं सर्व-दुःखविवर्जिताः ॥ इति धनदेवेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ जटेश्वरं च तत्रैव शिवं संपूजयेन्नृप ॥ कालपृष्टेन दैत्येम त-दाचाभिद्रुते हरे ॥ आधारतुंबं पतितं जटाजातविसंस्थिता ॥ इहापातेन शर्वेण स्विन्नगात्रेण भारत ॥ रुद्रं दृष्ट्वा गणैःसर्वैः स्थि-त्वा विश्रम्य च क्षणं ॥ जटासंवरणं चक्रे स्वेदश्वासौप्रशाम्यच ॥ जटाबंधः कृतो यस्मात् स्वेदमुन्मृज्यपाणिभिः ॥ जटेश्वरेति नाम्नासौ पार्वत्या स्थापितः शिवः ॥ तत उत्थाय जातास्ते पुनः सर्वे ह्रदं प्रति ॥ एवं जटेश्वरो जातस्तत्र तीर्थे नृपोत्तम ॥ जटे श्वरं पूजयित्वा दुःखशांतिं लभेन्नरः ॥ गलंतिकां च देवस्य शरद्ग्रीष्मे ददाति यः ॥ आधिव्याधिविनिर्मुक्तः स याति शिवसान्निधौ ॥ व्यजनं च वितानं च कलशं च स्वशक्तितः ॥ भक्त्यादेवस्य दद्याद्यो बहुस्वर्णफलं लभेत् ॥ इति जटेश्वरतीर्थनाम ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदाउत्तरे तटे ॥ केदारतीर्थाक्रोशांते रवितीर्थमनुत्तमं ॥रविणानिर्मितं पार्थ सर्वपापक्षयं करं ॥ स्वांशेनभास्करस्तत्र तस्थिवानुत्तरे तटे ॥ भानुर्भानुमतिं दृष्ट्वा पुरा पुत्रीं मनोरमां ॥ दर्शनादेव चाकस्मात्स्मरमोहेन चार्दितः ॥ पुनर्विचिंत्य पापं च तत्क्षणात्स्मरणोत्थितं तत्कल्मषविनाशाय रेवातीरमुपेत्यसुः ॥ दृष्ट्वा पुण्यं च तत्तीर्थं स्थापयामास शंकरं ॥ स्वयं चाप्यंशतःस्थित्वा तीर्थसाधकतां दधौ ॥ स्नात्वा शिवं च संस्थाप्य नष्टदोषो भवेद्रविः ॥ ततःप्रभृति राजेंद्र तत्तीर्थं ख्यातिमागतं ॥ तत्र तीर्थे नरो यस्तु स्नात्वा संतर्पयेत्पितृन् ॥ पितरस्तस्य तृप्तास्युर्यावद्वर्षशतं नृप ॥ षष्ठ्यां चापि चतुर्दश्यां अष्टम्यां च नृपोत्तम ॥ स्नानं यः कुरुते भक्त्या पितृणां श्राद्धदश्च यः ॥ सर्वैः पापक्षयं प्राप्य सूर्य लोके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महीयते ॥ ततः स्वर्गाच्च्युतः सोपि जायते विपुले कुले ॥ धन्यं यशस्यमायुष्यं आरोग्यं कल्मषापहं ॥ तीर्थमेतत्परं
पार्थ नरो यस्तु निषेवते ॥ धनाढयो व्याधिरहितो भवेजन्मनि जन्मनि ॥ इतिरवितीर्थनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत
राजेंद्र तीर्थं कामेश्वराह्वयं ॥ रेवाया उत्तरे कुले क्रोशांते रवितीर्थतः॥ कामेशो वै गणपतिस्तेन यस्मात्प्रतिष्ठितं ॥ कामेशेशं ततः
प्रोक्तं तीर्थं कामप्रदं परं ॥ यत्र सिद्धो गणाध्यक्षो गौरीपुत्रो महाबलः ॥ विघ्नानामिश्वरो जातो गणानां चापि सर्वशः॥ कामानां चैव
सर्वेषां दानशक्तिमवाप सः ॥ त्र्यंबकस्य प्रसादेन तपस्तप्त्वा सुदुश्चरं ॥ तत्र तीर्थे तु यो गत्वा भक्तियुक्तो जितेंद्रियः ॥ स्नात्वा दे-
वान् पितॄंश्चापि तर्पयित्वा तिलोदकैः ॥ पंचामृतेन देवेशं स्नापयित्वा विधानतः ॥ चंदनागरुकर्पुरैर्धूपदीपार्घपूजनैः ॥ नीराजनैश्च
नैवेद्यैः स्तुतिजाप्यप्रणामतः॥ प्रसाद्य जगतामीशं सर्वपापैः प्रमुच्यते ॥ अष्टम्यां मार्गशीर्षस्य तत्र गत्वा युधिष्ठिर ॥ यो येन यजते
रुद्रं स तं काममवाप्नुयात् ॥ कामेशेशं च कामेशं कामेशजननीं तथा ॥यजंते येन कामेन कामावाप्तिं सतांलभेत्॥ आयुरर्थं प्रजां
सौख्यं धान्यं विद्यां यशस्तथा ॥कार्यविघ्नं रिपोर्नाशं कामेशोर्चितो ददेत् ॥इति कामेश्वरतीर्थनाम ॥मार्कंडेय उवाच॥ ततो गच्छेत
राजेंद्र नर्मदादक्षिणे तटे मंगलेश्वरतीर्थं तु क्रोशार्द्धे धनदाह्वयात् ॥ स्थापितं भूमिपूत्रेण लोकानां हितकाम्यया ॥ स्नात्वा वै नर्म-
दातोये तपस्तप्त्वा शतं समाः ॥ तोषितः परया भक्त्या शंकरः शशिशेखरः ॥ चतुर्दश्यामभूच्छर्वः प्रत्यक्षो मंगलस्य च ॥
ईश्वर उवाच ॥ ब्रूहि पुत्र वरं कामं ददामि तव मंगल ॥ अदेयमपि दास्यामि यत्ते मनसि वांछितं ॥ मंगल उवाच ॥
प्रसन्नो यदि देवेश वरार्हो यद्यहं मतः ॥ प्रतिजन्म महेशान् त्वद्भक्तिरचलास्तु मे ॥ त्वदंगस्वेदसंभूतो ग्रहमध्ये वसाम्यहं
॥ त्वत्प्रसादादुमाकांत स्यामहं विश्वपूजितः ॥ कृतार्थोह्यद्यहं जातो भव दर्शनभाषणात् ॥ ईश्वर उवाच ॥ यत्वया प्रार्थितं स-
र्वं यत्ते मनसि संस्थितं ॥ सर्वं भवतु ते पुत्रेत्युक्त्वा चांतरधीयत ॥ मंगलोपि महात्मानं स्थापयित्वा महेश्वरं ॥ आत्मयोगबले-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैव शंकरस्य प्रसादतः ॥ सर्वदुःखहरं लिंगं नाम्ना वै मंगलेश्वरं ॥ ततः स्वस्थानमगमल्लब्ध्वेष्टमीश्वरार्पितं ॥ तत्र तीर्थेतु यो रा-
जन् भोजयेत् ब्राह्मणान् शुभान् ॥ सपत्नीकान् सदाचारांश्चतुर्थ्यांगारकव्रते ॥ अलाभे बहुविप्राणां विद्वांसं श्रोत्रियं द्विजं ॥
भार्यया सहितं शांतमप्येकं भोजयेद्यदि ॥ व्रतांते तत्र वै धेनुं शिवमुद्दिश्य यो ददेत् ॥ प्रियतां मे जगंनाथः सपत्नी कोवृषध्वजः
॥ लोहितं वस्त्रयुग्मं च दातव्यं पांडुनंदन ॥ धूर्वाहो रक्तवर्णश्च शुद्धं वै ताम्रभाजनं ॥ छत्रं शय्यां च विद्यां च रक्तमाल्यानुलेपनं
॥ दातव्यं पांडवश्रेष्ठ विशुद्धेनांतरात्मना ॥ चतुर्थ्यां वा चतुर्दश्यां पक्षयोरुभयोरपि ॥ श्राद्धं तत्र प्रकर्तव्यं वित्तशाठ्यं विवर्जयेत् ॥
भवंति पितरः प्रीता युगमेकं महीपते ॥ सपुत्रो जायते मर्त्यो भूयो भुवि धनीभवेत् ॥ तीर्थस्यास्य प्रभावेन सर्वांगरुचिरो भवे-
त् ॥ मंगलं जायते वंशे नाशुभं विद्यते क्वचित् ॥ भक्त्या यः शृणुयान्नित्यं तस्य पापं व्यपोहति ॥ इतिमंगलेश्वरतीर्थं ॥ मा-
र्कंडेय उवाच ॥ ततोगच्छेत्त राजेंद्र कपिलेश्वरमुत्तमं ॥ सार्द्धक्रोशं तु कामेशात् रेवाया उत्तरेतटे ॥ आसित्पुरा महर्षिर्वै कपिलः
कोपनो महान् ॥ सागरान् षष्टिसाहस्रान् दग्ध्वा कोपेन भारत ॥ उत्तरं तटमाश्रित्य रेवायाह्यचरत्तपः ॥ तेन वै स्थापितः शंभुः
कापिलेशः स्वनामतः ॥ पुनर्जगाम समुनिस्तीर्थात्तीर्थं वनाद्वनं ॥ ततःप्रभृति राजेंद्र विख्यातं तीर्थमुत्तमं ॥ कपिलेश्वरसंज्ञं तु सर्व-
पापक्षयं करं ॥ तत्र तीर्थे तु यः स्नात्वा पितॄणां श्राद्धमाचरेत् ॥ पितरस्तस्य तृप्यंति यावन्मन्वंतरं नृप ॥ नानाविधोपहारैश्च
वन्यैर्वाशक्तितोनृप ॥ यो भक्त्या पूजयेद्देवं कपिलेशं जितेंद्रियः ॥ देहांते तस्य पापानि तूलराशिरिवानलात् ॥ इति कपिलेश्वरतीर्थनाम॥
मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदादक्षिणे तटे ॥ गोपारेश्वरसंज्ञं तु तीर्थं परमशोभनं ॥ धनुःसहस्रं साग्रं च मंगलेश्वरतीर्थतः ॥
गोदेहान्निः सृतं लिंगं पुण्यं भूमितटे नृप ॥ स्वर्गमोक्षप्रदं सिद्धं ऋषिसंघैर्निषेवितं ॥ सर्वपापक्षयकरं सुखसंतानदं परं ॥ युधिष्ठिर उवाच ॥
गोदेहान्निःसृतं लिंगं कथं पापहरं मुने॥नर्मदादक्षिणे कूले पूज्यते यत्सुरैरपि॥गोपारेश्वरसंज्ञं तु संक्षेपादपि मे वद ॥श्रीमार्कंडेय उ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ श्रृणु पार्थ प्रवक्ष्यामि गोपारेश्वरसंभवं ॥ कामधेनुस्तपस्तत्र पुरा पार्थ चचारह ॥ ध्यायंती परया भक्त्या देवदेवमुमापतिं
॥ तुष्टस्तस्याः जगन्नाथः कपिलाया महेश्वरः ॥ क्षीरेणोधः पूरयित्वा नाभिरंध्राद्विनिर्गतः ॥ गोगर्भान्निःसृतो देवोक्षिति पीठ
मुपागतः ॥ ततः कामदुघा देवी कारयित्वा स्वकं व्रतं ॥ धारापीठस्थितं शर्वमोधसेनाभ्यषेचयन् ॥ ततः प्रदक्षणी कृत्य
प्रणम्य च महेश्वरं॥स्थिता सा पुरतो देवी प्रार्थयामास शंकरं॥वाग्मनः कायपुण्या च ध्यायमाना वृषाकपिं॥तुष्टः शंभूस्ततो देव्या
प्रोवाच मधुरं हरः॥तुष्टस्तेहं जगन्मातः कपिले पापनाशनी॥ देवर्षिपितृतीर्थानामाधारस्त्वं निगद्यते॥त्वदाधाराहिवर्तंते यज्ञाद्रिसरि-
दर्णवाः॥वद कामदुघे देवी किमासाराध्ययाचसे॥धेनु रुवाच॥लोकानामुपकाराय सृष्टाहं परमेष्ठिना॥लोककार्याणि सर्वाणि सिध्यंतां
त्वत्प्रसादतः यस्मात्कामदुघाख्याहं त्वया प्रोक्ता महेश्वर ॥ तस्मात्कामं प्रकामं हि लोकानांपूरयाम्यहं ॥ सत्यार्थं नाम ते प्रोक्तं
ममास्तु सुरसत्तम ॥ आरोग्यं च धनं धान्यं यशः संतानमाकृतिं ॥ वनं पुण्यं तथा स्वर्ग्यं योवा योयद्यदिच्छति ॥ तत्तत्सलभतां
देव त्वप्रसादान्मयेरितं ॥ तीर्थेस्मिन् तिष्ठते शंभो लोकानां हितकाम्यया ॥ ततस्तस्यै महादेवो वरान् दत्वा यथोदितान् ॥ एवम-
स्त्विति चोक्त्वा स स्थित्वा चांतर्दधे विभुः ॥ कामधेनुरिहायाति सदा पर्वणि पर्वणि ॥ संस्नापयति देवेशमौधस्यात्पूक्षणेन च ॥
मार्कंडेय उवाच ॥ तदा प्रभृति तत्तीर्थं विख्यातं वसुधातले ॥ स्नानमात्रेण तत्रैव पितॄणां तर्पणेन तु ॥ पापं प्रणाशमायाति तमः
सूर्योदये यथा ॥ गोपारेश्वरनामैतद्भवा तपसि पारिते ॥ धेनुं संवत्सां राजेंद्र तत्र तीर्थेतु यो ददेत् ॥ योग्ये द्विजोत्तमे वापि योग्यां
धेनुं सकांचनां ॥ सवस्त्रां तरुणींशुभ्रां क्षीरिणीं वस्त्रसंयुतां ॥ कृष्णपक्षे चतुर्दश्यामष्टम्यां वा युधिष्ठिर ॥ सर्वेष्वेव तु मासेषु कार्ति-
के च विशेषतः ॥ विधिना ये ददंतीह गृणंति विधिना च ये ॥ उभौ तौ शुभकर्माणौ प्रेक्षकःपुण्यभागपि ॥ पिंडदानं च ये कुर्युः
पितॄणां भक्तितो नृप पिंडदानेन चैकेन प्रेता यांति परां गतिं ॥भक्त्या प्रणामं देवस्य ये कुर्वंति दिनेदिने ॥ पापं प्रलीयते तेषां भि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नपात्रे जलं यथा ॥ तत्र तीर्थे तु यो राजन् वृषं चापि समुत्सृजेत् ॥ उध्दृत्य सपितॄन् सर्वान् शिवलोके महिपते ॥ युधिष्ठिर
उवाच ॥ वृषोत्सर्गे कृते विप्र यत्फलं जायते नृणां ॥ तन्मे कथय संक्षेपाच्छ्रोतुमिछाम्यहं मुने॥ श्रीमार्कंडेय उवाच ॥ सर्वलक्षणसं-
पूर्णे वृषे मुक्ते तु यत्फलं ॥ तदहं तं प्रवक्ष्यामि शृणुत्वं धर्मनंदन ॥ कार्तिके मासि माघे वा चैत्रे वा माधवे पिवा ॥ पूर्णिमा-
स्यां नृपश्रेष्ठ कर्तव्यो यं विधिर्द्विजैः ॥ रुद्रस्य सन्निधौ भूत्वा शुचिः स्नात्वा जितेंद्रियः ॥ वृषस्यैव समुत्सर्गं कारयेच्छिवतुष्टिदं ॥
कर्तव्याः सन्निधौ तत्र चतस्रौ वत्सिकाः शुभाः ॥ देयास्ता विप्रमुख्याय सर्व लक्षणसंयुताः ॥ प्रीयतां मम देवेशा ब्रह्मविष्णुमहे-
श्वराः ॥ इत्युच्चार्य प्रदेयास्ता वृषभं च समुत्सृजेत् ॥ वृषभे रोमसंख्या या सर्वांगेषु नराधिप ॥ तावद्वर्षप्रमाणं स शिवलोके
महीयते॥शिवलोके चिरं स्थित्वा पश्चान्मर्त्ये भिजायते ॥ कुले महति संभूतिर्धनधान्यसमन्विते ॥ निरुजो रूपवान्वाग्मी विताढ्यः
सत्यवाक् वशी ॥ गोपारेशमिदं पुण्यं मया ख्यातं युधिष्ठिर ॥ गोदेहान्निःसृतं लिंगं नर्मदादक्षिणे तटे ॥ इति श्रीवायुक्त शिवसं-
हितायां रेवामहात्म्ये दक्षिणे गोपारेश्वरतीर्थंनामद्वीनवतीतमोध्यायः ॥ ९२ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र
मणिनागेश्वरं परं ॥ क्रोशांतरे स्थितं तद्धि कपिलेश्वरतीर्थतः ॥ उत्तरे नर्मदाकूले सर्वपापक्षयं करं ॥ स्थापितं मणिनागेन लोकानां हि-
तकाम्यया ॥ युधिष्ठिर उवाच ॥ मणिनागेन सर्पेण शंकरस्तोषितः कथं ॥ क्षुद्रास्ते सर्वलोकस्य भयदा विषशालिनः ॥ कथ्यतां तात
मेंसर्वं पातकस्योपशांतिदं ॥ मम संतापजं दुःखं दुर्योधनकृतं महत् ॥ दुःखादुःखं द्वितीयं च पांचालीक्लेशसंभवं ॥ एकः कृष्णो
जगत्राता दुःखान्मां हि बलानुजः ॥ द्वितीयः स्त्वमिदानीं मां दुःखात्संत्रायसे द्विज ॥ श्रुता ते च मुखोद्गीता कथेयं पापनाशनी
॥ तत्त्ववाक्यजलौघेन प्लावितो निर्वृतिं गतः ॥ अयुक्तमिदमस्माकं द्विजक्लेशोपपादनं ॥ अथ प्राप्नोषि वै तात विद्यादान
स्य यत्फलं ॥मार्कंडेय उवाच॥ यथा यथा त्वं नृप भाससे मां तथा तथा मे सुखमेति चित्तं॥शैथिल्यभावाज्जरयान्वित्तस्य त्वत्सौहृदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 नश्यति नैव तात ॥ शृणुष्व तस्मात्सहबांधवैश्च कथामिमां पापहरां प्रशस्तां ॥ संकीर्तनाकर्णनदर्शनाद्यैः रेवा नरं कं न पुनाति
पापात् ॥ कथयामि यथावृत्तमितिहासं पुरातनं कथितं पूर्वतो वृद्धैः परंपर्येण भारत ॥ द्वे भार्ये कश्यपस्यास्तां सर्वलोकेष्व
नुत्तमे ॥ गरुत्मतोंबा विनता सर्पाणां कद्रुरेव च ॥ संतोषेणैव ते तात तिष्ठंत्यौ हि पितुर्गृहे ॥ क्रीडते विनतासार्द्धं कश्यपो
हि प्रजापतिः ॥ एकदाश्रमसंस्था सा विनता वीक्ष्यचाश्रमात् ॥ उच्चैःश्रवसमश्वं हि क्षीराब्धि तटचारिणं ॥ उवाच कद्रुं
पार्श्वस्थां विनोदादिव भारत ॥ विनता उवाच ॥ पश्य पश्येहि तन्वंगि हयं वै सर्वपाडुरं ॥ धावमानमविश्रांतं मनोवेग-
मनौपमं ॥ तं दृष्ट्वा सहसा कद्रू तुरगं रोषभाविता ॥ कद्रू उवाच ॥ सम्यक् नपश्यसे नेत्रे कृष्णं श्वेतं हि पश्यसि ॥
असत्यभाषणाद्भद्रे यमलोकं गमिष्यसि ॥ विनता उवाच ॥ सत्यानृते तु वचने पणस्तव ममापि च ॥ सहस्रं चैव
वर्षाणां सा तस्या दास्यमाचरेत् ॥असत्या यदि मे वाणी कृष्णश्चोच्चैःश्रवा यदि॥अहं वा त्वद्गृहे दासी त्वं वा मयि सुलोचने॥एवं
परस्परं द्वाभ्यां संवादोयं व्यवर्द्धत ॥ आश्रमेतु गता कद्रू रात्रौचिंतापरा स्थिता ॥ बंधुवर्गस्य कथितं समस्तं स्वं विचेष्टितं ॥
पुत्राणां कथितं पार्थ पणश्चैवं मया कृतः ॥ हाहाकारःकृतः सर्वैश्रुत्वा मातुः प्रतिक्रियां ॥ जाता दासी न संदेहः श्वेतो वाहस्तु
वारुणिः ॥ उच्चैःश्रवा कथं कृष्णः स्वतस्तु ख्यातिमागतः ॥ कद्रू उवाच ॥ नभवेयं यथा दासी कार्यं तदिह चिंत्यतां ॥ वि
शध्वं रोमकूपेषु तस्याश्वस्य सुपुत्रकाः ॥ एवं मुहूर्तमात्रं तु यावत्कृष्णः प्रदृश्यते ॥ मुहूर्तेनैव चैकेन दासी सा जायते मम ॥
दासीं कृत्वा तु तां शोच्यां विनतां सत्यगर्वितां ॥ सर्पाःस्वस्थानगाः सर्वे भविष्यथ यथासुखं ॥ सर्पाऊचुः ॥ यथा त्वं जन
नी मातः सर्वेषां भुवि भोगिनां ॥ तथा सापि विशेषेण वंचितव्या न मातरः ॥माता च पितृभार्या च मातृमाता पितामही ॥
कर्मणा मनसा वाचा हितं तस्याः समाचरेत ॥ ततः सा तेनवाक्येन क्रुद्धा कालानलोपमा ॥ शशाप पुत्रान् तन्वंगी मातृवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हव्यवाहमुखे सर्वे ते यास्यंत्यविचारितं ॥ मातुस्ते शापमाकर्ण्य
क्यपराङ्मुखान् ॥ ममवाक्यमकुर्वाणा येकेचिद्भुवि पन्नगाः ॥ हव्यवाहमुखे सर्वे ते यास्यंत्यविचारितं ॥ केचित् गंगाजले
सर्वएव भुजंगमाः ॥ केचिन्नीलीना वाहस्य रोमकुपेषु शंकिताः ॥नष्टाः केचिद्दिशो भेजुः कद्रूशायन्नयार्दिताः ॥ तपश्चचा
मग्नाः केचिद्याता सरस्वतीं ॥ केचिन्महोदधौ लीनाः केचित् वैवंध्यकंदरे ॥ रेवातोयं तदाश्रित्य मणिनागो नृपोत्तम ॥ समाः शतं
र विपुलं पवित्रे तटउत्तरे ॥ मातृशापभयात्पार्थ ध्यायन्मृत्युंजयं शिवं ॥ अनीहमप्रतर्क्यं च विनाशोत्पत्तिवर्जितं ॥ साधु साधु महाभाग
वायुभंक्षस्तदूर्ध्वे रविवीक्षकः ॥ एवं ध्यान परस्याभूत्प्रत्यक्षस्त्रिपुरांतकः ॥ शिव उवाच ॥ मणिनाग उवाच ॥
सत्ववांस्त्वं भुजंगम ॥ त्वया भक्तिगृहीतोहमागतः पन्नगोत्तम ॥ वरंयाचस्व मे क्षिप्रं यत्ते मनसि वांछितं ॥ जगत्पते ॥
मातृशापभयान्नाथ क्लिष्टोहं नर्मदातटे ॥ त्वत्प्रसादेन मे देव मातृशापोन्यथाव्रजेत् ॥ हव्यवाहमुखं यस्मान्न विशामि मणिनाग उवाच ॥
शिव उवाच ॥ हव्यवाह मुखं वत्स नप्राप्स्यसि ममाज्ञया ॥ ममदेहे निवासश्च तव पुत्र भविष्यते ॥ शतांशं वा सहस्रांशं स्थापयात्मानमी-
अत्रस्थानेमया देव स्थापितोसि सनातनः ॥ स्थीयतामंशभागेन तीर्थे सार्थकतास्तुमे ॥ शिव उवाच ॥ स्थापयस्वार्चयस्वेह
श्वर ॥ त्वद्देहसंभवातीरे मम नाम्नात्र शंकर ॥ लोकानामुपकाराय कृपां कृत्वा ममोपरि ॥ मातृशापभयान्नष्टः
स्थितोस्म्यंशेन पन्नग ॥ इत्युक्त्वादर्शनं देवो जगाम गिरिजासमं ॥ येन मार्गेण संप्राप्तो मणिनागस्तु नर्मदां ग्रामो मणी
स्विन्नगात्रस्तथा श्रमात् ॥ तेन मार्गेण संजाता नाम्ना मणिनदी शुभा ॥ संगता रेवयासार्द्धं तेन सा पापनाशनी ॥ पंच-
श्वरो यत्र देवश्चापि मणीश्वरः ॥ नदी मणिमती यत्र मृतस्तत्र न शोच्यते ॥ तत्र तीर्थे तु यो गत्वा शुचिः प्रयतमानसः ॥ स्नापयं-
म्यां वा चतुर्दश्यां अष्टम्यां पक्षयोर्द्वयोः॥ शिवमभ्यर्चयेत्पार्थ नोपसर्पति वै यमं ॥ दध्ना च मधुना चैव घृतक्षीरसितामृतैः॥ तेपि यांति
ति विरूपाक्षं गौरीदेहार्द्धधारिणं ॥ कामांगदहनं देवमंधासुरनिषूदनं ॥ स्नाप्यमानं च ये भक्त्या पश्यंति परमेश्वरं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परं स्थानं सर्वदोषविवर्जितं ॥ पितृश्राद्धं च येभक्त्या पंचम्यामष्टमीदिने ॥ ब्राह्मणैस्तु सदाचारैर्वेदविद्याविशारदैः ॥ स्वदारनिरतैः
शांतैः परदारविनर्जितैः ॥ आहारैस्तामसैर्यश्च दक्षिणाभिर्बहिः कृतं॥ नोपतिष्ठति तद्दत्तमंतरिक्षे विनश्यति ॥ तान् शृणुष्व महारा
ज वर्जितान् गदतो मम ॥ दुरोदरांश्च षढांश्च वार्द्धुषांश्च कृषीवलान् ॥ भिन्नाचारांस्तथा व्यंगान्न कदाचिन्नियोजयेत् ॥ वृषलीमंदि रे
यस्य यस्य माहिषिको द्विजः ॥ इत्याद्या दूरतस्त्याज्या विप्राः श्राद्धे नृपोत्तम ॥ काणाः कुंडाश्च मुंडाद्या वेदवर्तिबहिः कृताः ॥
न ते श्राद्धे नियोज्यास्तुः बधिराः कुब्जवामनाः॥ यदीच्छेदूर्ध्वगमनमात्मनः पितृभिःसह ॥ विद्यावृत्तकुलोपेतं तदेकमपि-
भोजयेत् ॥ सर्वांगरुचिरां धेनुं योदद्यादिह वाडवे ॥ सवसेच्छिवलोके वै यावदिंद्राश्चतुर्दश ॥ ततः स्वर्गात् च्युतः सोपि जायते
विपुले कुले ॥ शिवभक्तश्च तेजस्वी सुखी ज्ञानी गुणी धनी ॥ ये पश्यंति सदा भक्त्या मणिनागेश्वरं नृप ॥ न तेषां
जायतेवंशे पन्नगानां भयं क्वचित् ॥ पन्नगः शंकते येषां फणीशस्य प्रदर्शनात् ॥ न सर्पैः परिभूयंते सुपर्णसमदर्शनाः ॥
तीर्थेस्मिन् सर्वदानानां फलानि शृणु भूपते ॥ अन्नं संस्कारसंयुक्तं ये ददंति द्विजोत्तमे ॥ न तेषां पुनरावृतिः सप्तलोकादसंशयं ॥
वस्त्रं शय्या तथा छत्रं कन्या दासी जलं मही ॥ पात्रे देयानि युग्यं च यदीच्छेच्छ्रेय आत्मनः ॥ सुरभीणि च पुष्पाणि वस्त्रं गंधा
नुलेपनं ॥ दीपं धान्यं ग्रहं शुभ्रं सर्वोपस्करसंयुक्तं ॥ ददंति ये शिवे भक्त्या ते व्रजंति त्रिविष्टपं ॥ मणीश्वरे नृपश्रेष्ठ यत्र दानं
प्रदीयते ॥ तत्तदाममसंख्यातं स्वर्गे वासस्तथा भवेत् ॥पापानि च विलीयंते पात्रमामं यथा जले॥ रेवामणीनदीसंगे तोयसिद्धान्न
भुक् द्विजः ॥ तारयत्येव दातारं पितृभिः सममात्मनः ॥ ते वैपापविनिर्मुक्ता विहरंति सुरैःसह ॥ ततः स्वर्गात् च्युतानां
च लक्षणं प्रवदाम्यहं ॥ त्यागिनो भोगसंयुक्ता धर्माख्यानरताःसदा ॥ गुरुदेवद्विजातीनां भक्तास्तीर्थाश्रिताशयाः ॥ मातृपितृव
शाः नित्यं क्रोधद्रोहादिवर्जिताः ॥ एवमेतैर्गुणैर्युक्ता जायंतेस्वर्गतश्च्युताः ॥ तीर्थस्यास्य प्रभावेन पुनः स्वर्गं व्रजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति ते ॥ सर्वतीर्थवरं तीर्थं मणीश्वरमिदं नृप॥इति मणिनागेश्वरतीर्थनाम त्रिनवतितमोध्यायः ॥९३॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्रतिलकेश्वरमुत्तमं ॥ रेवाया उत्तरे कूले सार्द्ध क्रमशतत्रयं ॥ गौतमो नाम विप्रर्षिः पुरा ब्रह्मसुतः स्वयं ॥ शप्त्वा भार्यामहिल्यांतु शक्रजुष्टां युधिष्ठिर ॥ नर्मदातीरमाश्रित्य तपश्चक्रे समाहितः ॥ कृत्वाश्रमं सशिष्यश्च ब्रह्मध्यानरतो मुनिः ॥ ध्यायन् ब्रह्म जपन् ब्रह्म ब्रह्मवृंदसमावृतः ॥ ब्रह्मेव ब्रह्मतनयश्चचार तपउत्तमं ॥ पूर्णं वर्षसहस्रं सः तपस्तेपे समाहितः ॥ एवं कालेन महता विवस्वतकुलोद्भवः ॥ वैवस्वतमनोः पुत्रो विद्वान् सर्वगुणान्वितः ॥ तिलको नाम राजर्षिर्भूपानां तिलको यथा ॥ कदापि मृगयां राजा रममाणो मिषेणतु ॥ तपोवनानि संपश्यन् तीर्थात्तीर्थं वनाद्वनं ॥ रेवातीरं ततो दृष्ट्वा गंभीरं तीरमुत्तमं ॥ तथैवामलिनं वीक्ष्य पुलिनं नलिनेक्षणः ॥ गौतमस्य मुनेर्मत्वा चाश्रमं श्रमनाशनं ॥ आगम्य सहसा विप्रं नमः श्चक्रे नृपोत्तमः ॥ अर्घेण च तथा पाद्यविष्टरैः कुशलेन च ॥ गौतमेनार्चितो राजा बहुमानपुरः सरं ॥ अन्योन्यं कुशलं पृष्ट्वा राजा पप्रच्छ तं मुनिं ॥ राजा उवाच ॥ रेवातीरविशेषं च तपसः कारणं मुने ॥ अद्य मे सफलं जन्म अद्य प्राप्तं न किं मया ॥ धन्योस्म्यनुगृहीतोस्मि विधिना सुकृतेनच ॥ प्राप्तोद्य यत्प्रसंगेन रेवातीरचरं गुरुं ॥ तपंतं तीर्थनिलयं गौतमं गुणिनां वरं ॥ सद्भिराचरितं तीर्थं न स्वभावोद्भवं क्वचित् ॥ तपसः कारणं ब्रूहि किमर्थं तप्यसे मुने ॥ तथा ममापि सद्बुध्या योजयस्वातिथिं गृहे ॥ गौतम उवाच ॥ राजन्स्ववंशतिलकः तिलकाह्वयभूपते ॥ शृणु तत्कारणं येन तप्यतेत्र तपो मया ॥ सुरैश्वर्यश्रियं प्राप्य मदमत्तः पुरंदरः ॥ मायावी तामुपागम्य चाश्रमं मे वपुर्धरः ॥ अहिल्यां धर्षयामास पापः शापमवाप च ॥ शप्त्वा अहिल्यां राजेंद्र प्राप्तोहं शिवजां धुनीं ॥ तमाश्रमं विहायाशु तया हीनो निराश्रयः ॥ कालसार्थकतां कर्तुं पदं हर्तुं निरामयं ॥ तपामि पापदहनं स्मर्तुं स्मरहरं हरं ॥ अनादिनिधनो देवः शूलपाणिर्महेश्वरः ॥वसत्यत्रोत्तरे तीरे देशेस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजसत्तम ॥ सप्तमन्वंतराणीह देवस्यस्थितिधारिणः ॥ मन्वंतरादौ वृद्धं स्यात् प्रादुर्भवति शंकरः ॥ मन्वंतरांते च पुनर्भुवो मध्ये
विलीयते ॥ मन्वंतरस्य पूर्वार्धे यावल्लिंगं समुद्व्रजेत् ॥ तथोत्तरार्द्धे तस्यै व स्वल्पं चाल्पमधो व्रजेत् ॥ पुरा प्रियव्रतो राजा स्वायं
भुवमनोः सुतः ॥ श्रुता तेन महाभागा शिवदेहोद्भवा सरित् ॥ तपस्विनां मुखाद्राजन् सप्तकल्पातिवर्तिनी ॥ पुण्या शिवप्रिया
देवी तपतां पापहारिणी ॥ तस्यास्तीरे शिवो नित्यं सत्यवासमुपाश्रितः ॥ इत्याकर्ण्यादराद्राजा पुत्रं राज्ये निवेश्य च॥रेवासेवा-
मभिलषत् विप्रैः साकमुपागतः ॥ इहागत्योत्तरे तीरे मुदं प्राप्य परं नृप ॥ स्नात्वा दर्भासनासीनः सन्निवेश्य शिवे मनः ॥ तप
श्चचार शुद्धात्मा मनुपुत्रः प्रियव्रतः ॥ दिव्यं समाःसहस्रं तु द्रष्टुकामः सनातनं ॥ त्रिपुरांतकरं देवं मनोवागिंद्रियातिगं ॥ शतसं-
वत्सरं पूर्वं मनोवागिंद्रियातिगः ॥ शतमेकं तु वर्षाणां तिलाहारस्थितो नृप ॥ शतं द्वितीयं वर्षाणामिक्षुभक्षादतेक्षणः॥धात्रीफला-
शनस्तद्वत् तृतीये नृपसत्तम ॥ चतुर्थे बदराशश्च पंचमे श्रीफलाशनः ॥ षष्ठे शते चेंगुदैश्च स चक्रे प्राणधारणं ॥ सप्तमे पंचगव्यस्य
प्राशनं कृतवान् नृप ॥ अष्टमे चांबुभक्षः सन्नवमे मारुताशनः ॥ निराहारः प्राणरोधं दशमे कृतवान् यदा ॥ तदा स्वयं समुत्तस्थौ
पुरतः परमेश्वरः ॥ दीनार्तिहरणो देवो निश्चितार्थफलप्रदः ॥ भक्तानुकंपको भर्गो भवहा भयनाशनः ॥ लिंगरूपधरः शर्वो भित्वा
भूभागमादरात् ॥ कुर्वन् निर्घोष मतुलं घनगर्जनसन्निभं ॥ प्रादुर्बभूव सहसा तेजः पुंजश्च सर्वतः ॥ लिंगमध्याच्च सहसा साक्षाद्रूपः
शिवो ब्रवीत् ॥ शिव उवाच ॥ उत्तिष्ठोत्तिष्ठ भूपाल ब्रूहि यत्ते भिवांछितं ॥ किंक्लिश्यसे त्वं बहुधा भुवि भूत्वा नृपोग्रगीः ॥ मा-
र्कंडेय उवाच ॥ इत्याकर्ण्य ततो राजा सहसा वीक्ष्य तेजसि ॥ दृष्ट्वा देवं स्वयं सोमं दंडवत्पतितो भुवि ॥ प्रणम्य पार्वतीकांतं
बध्वा शिरसि चांजलिं ॥ स्तुतिं चक्रे महीपालःपुरतः प्रांजलिःस्थितः॥प्रियव्रत उवाच॥ नमस्ते देवदेवाय महादेवाय तेनमः॥नमोस्तु
शंभवे तुभ्यं नमस्तेस्तु स्वयंभुवे ॥ नमो मूर्ताय देवाय तथामूर्ताय ते नमः ॥ नमस्तेज्ञावगम्याय योगिनां शरणाय ते ॥ योगाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगगम्याय योगनाथाय ते नमः॥ गिरिशाय महेशाय गौरीशायास्तु ते नमः ॥ नमः पिनाकिने तुभ्यं शूलिने मुंडमालिने ॥ एकं सुत्का महेशानं दिग्भिः कस्यां शुकायितं ॥ मुक्त्वैकं धूर्जटिं कस्य विधुना शेखरायितं ॥ गंगोत्तमांगमारूढा कस्यान्यस्य शिवं विना ॥ कालकूटं कवलितुं कः शक्तस्त्वां विना विभो ॥ विश्वाधार जगद्धार माधार जठरे स्वयं ॥ त्वां विना कस्य कल्पांतवह्निना तिलकायितुं ॥ को वराकः सुरः सर्पभूषणं स्याच्छिवं विना ॥ एकं देवं शिवं मन्ये कारणत्रयकारणं ॥ तारणं सर्वदुर्गेभ्यो विश्वकारणकारणं ॥ धारणं सर्वमूर्तीनां पुरत्रितयदारणं ॥ मारणं पापसंघानां तापत्रयनिवारणं ॥ यं देवं विश्वरूपं हि सांख्ययोगविदो विदुः ॥ तमादिपुरुषं वंदे तत्वेभ्यः पंचविंशकं ॥ पुरुष यं च देवेशं सन्नमाम्यजरामरं ॥ विद्यानिधे गुणनिधे सर्वज्ञस्त्वं हि निर्गुणः ॥ सर्वस्य सर्वदः शर्वः निगर्वः सन् हि गर्वदः ॥ नदीयानसि गौरीश देवीयानसि वै भवान् ॥ क्षोदीयांस्त्वं महांश्चासि महासिद्धिनिषेवितः ॥ क्वाहं मशकमात्रश्च क्व च त्वं जगदीश्वर ॥ का बुद्धिः किं परिज्ञानं क्व च मे वाक्प्रगल्भता ॥ त्वां स्तोतुं मम काशक्तिर्न यं ब्रह्मादयो विदुः॥ त्वां द्रष्टुं च परिज्ञातुं रेवातीरचरं शिवं ॥ पुरा भून्मे मनः शंभो विप्रस्य वचनात् श्रुतं ॥ तदद्य कृपया प्राप्तं दर्शनं ते महेश्वर ॥ स्थिरो भवात्र गिरिश मम नाम्ना प्रसादतः ॥ तत्र तीर्थे तु यः स्नात्वा त्वां चैवाभ्यर्चयेन्नरः ॥ तस्य वांछितासिद्धिं त्वं देहि देव तथातथा ॥ ईश्वर उवाच ॥ एवमस्तु नृपश्रेष्ठ यद्यत्ते मनसि स्थितं ॥ परितुष्टोस्मि भद्रं ते यावन्मन्वंतरं त्विदं ॥ ऊर्ध्वया धरया गत्या लोकानां दृक्पथि स्थितः॥ दृश्यो भविष्यामि पुनरन्यस्मिन्नंतरे मनोः॥ स्तुतिमेतां त्वयोद्गीतां ये पठिष्यंति मानवाः ॥ इष्टयज्ञफलं प्राप्य ते यास्यंति परां गतिं ॥शिवमस्तु सुखं चास्तु लोकाः संतु निरामयाः ॥ लोकोपकारकं तीर्थं त्वयेदं स्थापितं यतः ॥ वंशवृद्धिं परं धर्मं शत्रूणां विजयं भज ॥ पितुस्त्वंतरं यावत् पुत्रपौत्राश्नरेशतां ॥ गौतम उवाच ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ तस्मिंल्लिंगे नृपश्रेष्ठ तस्य भूपस्य पश्यतः ॥ ततः संपूज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेशं स्वयं राजा प्रियव्रतः ॥ शिवालयं कारयित्वा पुरं स्वं प्रतिजग्मिवान् ॥ स राजा राज्यमकरोत् बहुवर्षसहस्रकं ॥ एवं प्रा
दुर्बभूवेशं तस्मिन् स्वायं भुवांतरे ॥ प्रियव्रतेश्वरो नाम तस्मिन्मन्वंतरे भवेत् ॥ पुनर्विलीनं तस्यांते तथा स्वारोचिषेंतरे ॥ स्वारो-
चितनयश्चैत्रः प्राप्यतीर्थमिदं नृपः ॥ तपश्चचार विपुलं प्रादुर्भूतस्तथा शिवः ॥ स्वनाम्ना च कृतं तीर्थं चैत्रेश्वरमिति श्रुतं ॥ तत-
स्त्वदृश्यमभवत्तस्यांते नृपसत्तम ॥ भुवोमध्ये निलीनं च पुनश्चैवोत्तमेंतरे ॥ उत्तमस्य मनोः पुत्रःअजस्रोनाम धार्मिकः ॥ तेनागत्य
तपस्तप्त्वा पुनर्लिंगं प्रकाशितं ॥ तथैव वांछितं प्राप्य स्वनाम्ना स्थाप्य धूर्जटिं ॥ चक्रे राज्यमविश्रांतं यथेंद्रेण सुरालये ॥ अज-
स्रेश्वरनामासीत्तस्मिन्मन्वंतरे नृप ॥ पुनश्चादर्शनं भेजे भूमध्ये लिंगवान् हरः ॥ तस्यांते च चतुर्थ्यादौ पुनः प्रादुर्बभूव ह ॥ ता-
मसस्य मनोः पुत्रः शांतिर्नाम नृपाग्रणीः ॥ तेन सद्भावयोगेन शिवसंप्रेरितेन च ॥ रेवातीरमिदं प्राप्य तप्यतेस्मेह वै तपः ॥
तपसा तोषितस्तद्वत्प्रादुर्भूतस्तदा शिवः ॥ लिंगरूपधरो देवः प्रसन्नश्च वरान् ददौ ॥ स्वनाम्ना तेन तीर्थेस्मिन् कृतः शांतीश्वरो वि-
भुः ॥ तद्दै मन्वंतरं रुद्रः स्थितः शांतीश्वराह्वयः ॥ तदंते चापि भूमध्यमितः शर्वः क्रमात्पुनः ॥ मन्वंतरं तथा प्राप्तं पंचमं रैवतस्य
च ॥ रैवतस्यान्वये जातः सत्यकोनाम पार्थिवः ॥ तेनापि च तपस्तप्त्वा प्रसादं प्राप्य शंकरात् ॥ प्रकाशितं च तल्लिंगं नाम्ना वै
सत्यकेश्वरं ॥ तस्मिन्मन्वंतरे भूप नाम्नासीत्सत्यकेश्वरः ॥ तस्यांते च क्रमाघातेपुनर्लीनेधरांतरा ॥ षष्ठे च चाक्षुषमनोरंतरे नृप-
सत्तम ॥ चाक्षुषस्य मनोः पुत्रः शतद्युम्नो महीपतिः ॥ स तु तीर्थप्रियः साधुः सात्विकः सत्यसंगरः ॥ स्वप्ने सोमं
समासाद्य प्रेरितस्तेन पार्थिवः ॥ तीर्थानुसरणं कुर्वन् प्राप्य दक्षिणजान्हवीं ॥ एतदेव परं स्थानमवाप्याशु तपश्चरन् ॥ जपन् पं-
चाक्षरीं विद्यां शतद्युम्नो महीपतिः ॥ प्राप दृग्गोचरे रुद्रं पूर्ववल्लिंगरूपिणं ॥ तेजोनिधिं महादेवं तुष्टाव च नरेश्वरः ॥ शतद्युम्न
उवाच ॥ नमोदेवाप्रमेयाय निरीहाय च ते नमः ॥ नमो विषमशीलाय नमस्तेंधकनाशिने ॥ उन्मत्तरुपाय नमस्तथोन्मत्तप्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याय च ॥ नमो गजासुरारातिप्राणनिर्यापहेतवे ॥ अर्केण बिल्वपत्रेण अर्कधत्तूरपुष्पकैः ॥ पूजितोभक्तियोगेन वन्यैर्मूलफलैरपि ॥ सूरीभिर्दुर्लभां लक्ष्मीं यो ददत्कल्पनातिगां ॥ तं नमामि सुरेशानमष्टमूर्तिं महेश्वरं ॥ किं नरस्य कृतैः पुण्यैर्यश्चित्ते न स्थिरो हरः ॥ तथा च किं कृतैः पुण्यैर्यदि चित्ते स्थिरो हरः ॥ किमर्चितैः सुरैरन्यैर्भाव्यते यदि शंकरः ॥ रेमूढाः साभिलाषाश्चेद्भुक्तिमुक्त्योःस्वयंवरे ॥ वांछिताभीष्टफलदः स किं न प्राप्यते हरः ॥ इत्येवमादि भिर्वाक्यैः स्तूयमानो महेश्वरः ॥ प्रत्यक्षोभूज्जगन्नाथ उवाच च नृपोत्तमं ॥ ईश्वर उवाच॥ तुष्टोस्मि भोनृपश्रेष्ठ वरं वरय सुव्रत ॥ किमत्र ते तपस्ततं किं प्रार्थयसि सत्तम ॥ इह यद्वांछसे भूप मया तद्देयमेवते ॥ राजा उवाच ॥ देवदेव जगन्नाथ प्राप्तं सर्वं मयाधुना ॥ यद्दिव्यमभवत्तेजो दृष्टं त्वद्रूपजं विभो ॥ तथापि चेत्प्रसन्नोसि मम शोच्यस्य शंकर ॥ मम नाम्ना महेशान तीर्थमेतत्समर्थय ॥ ते एव शोच्यास्ते दीनास्ते मूढाभाग्यवर्जिताः ॥ नत्वद्भक्तौ हि यच्चेतो येषु न प्रीतिमान् भवान् ॥ ईश्वर उवाच ॥ एवमस्तु नृपश्रेष्ठ यत्ते मनसि वाञ्छितं ॥ स्थितोहमत्र त्वन्नाम्ना यावन्मन्वंतरं त्विदं ॥ चाक्षुषं राजशार्दूल शतद्युम्नेश्वराह्वयं ॥ इत्युक्त्वा गिरिशः साक्षादंतर्द्धानमगाद्विभुः ॥ लिंगरुपस्थितश्चात्र समीहितफलप्रदः ॥ मन्वंतरांते चादृश्यमभवल्लिंगमैश्वरं ॥ शतद्युम्नोपि नृपतिः जगाम स्थानमात्मनः ॥ साम्राज्यं प्राप संतानं चाक्षयं च रिपोर्जयं ॥ गौतम उवाच ॥ तथैव सप्तमं प्राप्तमंतरं च नृपोत्तम ॥ वैवस्वतमिदं पुण्यं यत्र वैवस्वतो मनुः ॥ नरिष्यंतसुतश्च त्वं पौत्रो वैवस्वतस्य च ॥ नाम्ना त्वं तिलकः ख्यातिं प्राप्तोसि वसुधातले ॥ प्रसंगादिह संप्राप्तः शिवस्याराधनं कुरु ॥ यथाशक्तिर्यथाचेतो यथादत्तं यथाश्रुतं ॥ तन्नरेण प्रकर्तव्यं यथा तुष्यंति देवताः ॥ मार्कंडेय उवाच ॥ एवमाकर्ण्य नृपतिस्तिलकः पुण्यबाहुलः ॥ पप्रच्छ गौतममृषिं यद्दैवं कुशलोचितं ॥ तिलक उवाच ॥ साधु साधु मुनिश्रेष्ठ सुधातुल्या त्वदुक्तयः ॥ किं किं न प्राप्यते पुंभिः प्रसादादग्रजन्मनां ॥ ब्राह्मणैरिह संतुष्टैस्तुष्यं स्यात्सकलं जगत् ॥ त्वत्संगतिफलं किंचित् प्राप्तुमिच्छामि गौतम ॥ तपसः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साधनं ब्रूहि विधानं तपसश्च किं ॥ तपसो मे फलं ब्रूहि सद्वृत्तस्य च लक्षणं ॥ गौतम उवाच ॥ साधु पृष्टं महाराज
धन्यस्त्वं ज्ञानवानसि ॥ समपृच्छन् सदा सर्वं पांडित्यं लभते नरः ॥ धर्मः श्रुतोथ दृष्टश्च विहितः कारितोपि वा ॥ प्रोच्छाहितो वा
नृपते पुनात्यासप्तमं कुलं ॥ शृणु सर्वं प्रवक्ष्यामि तपसः साधनं फलं ॥ संत्यज्य ग्राम्यमाहारं चित्तद्वेषं च वर्जयन् ॥ मुन्यन्नै
र्विविधैर्मेध्यैः शाकमूलफलेन वा ॥ त्रिस्नायी जटिलो मुंडश्चीरवल्कलवान्नरः ॥ यद्भक्षः स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः ॥
दाता चसंयताहारः सर्वभूतानुकंपकः ॥ तपसः सिद्धिमाकांक्षन् यथालब्धाशनोभवेत् ॥ स्मरन्स्मरहरं देवं संसेवन् वस्तुयज्ञितं ॥
शांतो दांतस्तथा मैत्रः सर्वकालं समाहितः ॥ योगे युक्तः सदा भूयादर्पितात्मा कृतिः शिवे॥ध्यायं देवं जपन् देवं यजन् संकीर्तयन्
शिवं ॥ शनैः शनैः तनूकुर्वन् तनुं मनुजपुंगव ॥ प्राणधारणमात्रेण तिष्ठन् षष्ठाशनः सदा ॥ एवं युक्तो नरो भूप तपसः सि-
द्धिमाप्नुयात् ॥ यद्दूरीकुरुते मर्त्यस्तत्तत्पुष्णाति शंकरः ॥ न किंचिद्दीयते देवैः फललब्धिस्वसाधनात् ॥ यत् दुःखं यद्दूराराध्यं यच्च-
दूरे व्यवस्थितं ॥ तत्सर्वं तपसा साध्यं तपो हि दुरितक्रमं ॥ आदृत्यसर्वविघ्नानि मनस्कृत्वा चिरं स्थितं ॥ ईहानीहांतरे तिष्ठन्
योगीयोगफलं लभेत् ॥ कृच्छ्रातिकृच्छ्रैः पाराकैस्तथा संतपनैर्व्रतैः॥ ब्रह्मकूर्चैस्तथा चांद्रैः शोधयन् वपुरात्मनः॥ देहग्लानिं यदा पश्ये-
दात्मनो व्रतमाचरन् ॥ तदा मूलफलैः पुष्पैरौषधैः पयसा थवा ॥ धारयेदात्मनो देहं न दोषो जायते क्वचित् ॥ अष्टावेवाव्रतघ्नानि
आपोमूलं फलं पयः ॥ हविर्ब्राह्मणकाम्याच गुरोर्वचनमौषधं ॥ तपसाजायते स्वर्गस्तपसा मोक्षमाप्नुयात् ॥ तपसा सुखसंतानमै-
श्वर्यादि लभेन्नरः ॥ तपसा शत्रुनाशं च तपसा धनमुत्तमं ॥ सिद्धयस्तपसा साध्यास्तपसायुर्विवर्द्धते ॥ नासाध्यं तपसः
किंचित्कल्पवृक्षादिकं तपः ॥ सूर्यचंद्रादयः सर्वे देदीप्यंते दिविस्थितः ॥ ध्रुवो ध्रुवपदं प्राप्य तपसैव नराधिप ॥ पुरासृष्टिरियं
चक्रे ब्रह्मणा तपसैव हि ॥ तपसा दिवि देवेशः शक्रोभूच्च तथा नृपः ॥ तपसा विष्णुरजयन्बलिमुख्यांश्च दानवान् ॥ भवेद्देवा ति-

CC-0. In Public Domain. Digitization by eGangotri

थिर्नूनं तपस्वी सुरपूजितः ॥ तपोनामेंद्रियजयः तपोदेहदमः परं ॥ वश्यात्मता तपो मुख्यं तथा द्वंद्वसहिष्णुता शृणु सद्वृत्तयोगस्य लक्षणं नृपसत्तम ॥ येनेमं च परं चापि लोकं जयति मानवः ॥ वयसः कर्मणो र्थस्यश्रुतस्याभिजनस्य च ॥ वेषवाक्बुद्धिसारूप्य माचरन्विचरेदिह ॥ बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च ॥ नित्यं शास्त्राण्यवेक्षेत भजन् सद्वृत्तलक्षणं ॥ यथा यथा हि पुरुषः सच्छास्त्रमधिगच्छति ॥ तथा तथा विजानति विज्ञानं चापि विंदति ॥ न जीर्णं मलवद्वासो धारयेन्न वृथा भ्रमेत् ॥ नाक्रमेदंत्यजच्छाया मेतत्सद्वृत्तलक्षणं ॥ क्रुप्तकेशनखश्मश्रुर्दांतः शुक्लांबरः शुचिः ॥ परात्मचित्तो नित्यं स्यादेतत्सद्वृत्तलक्षणं ॥ नेक्षेतोद्यंतमादित्यं नास्तं यांतं न मध्यगं ॥ नोपसृष्टं नवारिस्थमेतत्सद्वृत्तलक्षणं ॥ उपवीतमलंकारं स्रजं कारकमेव च ॥ उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ॥ नमृल्लोष्टं विमृन्हीयान्न छिंयात्करजैस्तृणं ॥ नमर्कनिष्फलं कुर्यान्नायत्यामसुखोदयं ॥ नविग्रह्य कथां कुर्याद्बहिर्माल्यं न धारयेत् ॥ त्यजेद्गोपृष्ठगमनमेतत्सद्वृत्तलक्षणं ॥ अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः ॥ दानं दमो दया क्षांतिः सर्वेषां धर्मसाधनं ॥ न संशयं प्रपद्येत नाकस्मादप्रियं वदेत् ॥ नाहितं नानृतं राजन् एतत्सद्वृत्तलक्षणं ॥ कुर्यात्प्रदक्षिणं देवमृद्गोविप्रवनस्पतीन् ॥ नृपं तपस्विनं साध्वीमेतत्सद्वृत्तलक्षणं ॥ जलं पिबेन्नांजलिना नशयानं प्रबोधयेत् ॥ वृद्धोपसेवी जितवागेतत्सद्वृत्तलक्षणं ॥ शुचिं देवाश्च रक्षंति रक्षंति पितरः शुचिं ॥ शुचेर्बिभ्यति रक्षांसि ये चान्ये दुष्टचारिणः ॥ दानं ज्ञानं तपस्त्यागो मंत्रकर्मविधिः क्रिया ॥ मंगलाचारनियमाः शौचभ्रष्टस्य निःफलाः ॥ छेदनं भेदनं चैव मर्दनं स्फोटनं त्यजेत् ॥ कुलकुलं रहस्यर्थी न यायात्कारणं विना ॥ वृद्धान्नातिवदेज्जातु न च संप्रेषयेदपि ॥ नासीनः स्यात्स्थिते ष्वेव मायुरस्य नरिष्यति ॥ यज्वा मिष्टान्नदः सत्री शतायुर्द्धार्मिकः शुचिः ॥ ज्ञाननिष्ठस्तपोनिष्ठःसेव्याश्रेयोर्थिनां सदा॥अभिवादनशीलस्य नित्यं वृद्धोपसेवकः ॥ चत्वारि तात वर्द्धंते बलमायुर्यशः श्रियः ॥ श्मश्रुकर्मणि संप्राप्ते क्षुते स्नानेथ भोजने ॥ व्याधितानां च सर्वे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षामायुष्यमभिवंदनं ॥ क्षमा सत्यं दमः शौचं दानमिंद्रियनिग्रहः ॥ अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया ॥ आर्जवं लोभशू-
न्यत्वं देवब्राह्मणपूजनं ॥ अनभ्यसूया च तथा एतत्सद्वृत्तलक्षणं ॥ संध्ययोरुभयोर्जप्ये भोजने दंतधावने ॥ पितृकार्ये च
देवे च तथा मूत्रपूरीषयोः ॥ गुरूणां सन्निधौ दाने योगे चैव विशेषतः ॥ दशेष्वपि चरेन्मौनमिति सद्वृत्तलक्षणं ॥ संक्षेपेणैव ते
प्रोक्तं मया सर्वं न विस्तरात् ॥ एतदेव परिज्ञाय सर्वं संपद्यते नृणां ॥ श्रीमार्कंडेय उवाच ॥ एवमाकर्ण्य तत्सर्वं गौतमो नृ-
पसत्तमः ॥ सविस्मयः सतिलको मनस्तपसि दध्रिवान् ॥ गौतमानुज्ञया स्नात्वा वाङ्मनःकायशुद्धिवान् ॥ शिवध्यानरतः शांत-
स्तपस्तेपे समाहितः ॥ तपसा शूद्धदेहश्च निर्विकल्पो यदा नृपः ॥ पूर्ववत्पुरतः प्रादुर्भूतः स परमेश्वरः ॥ तदा लिंगात्मको रुद्रः
प्रणवेन पुरस्कृतः ॥ शैवं महस्तदा पश्यद्रोचयानं दिशो दश ॥ राजा उवाच ॥ अहो भाग्यमिदं मन्ये मामामानुष्यमीश्वर ॥
क्काहं मशकसद्भावः क्क त्वं विश्वेश्वरो हरः॥धन्योहं कृतकृत्योहं धूरीभाग्यवतामहं ॥ दृक्पथं मे यदा यातः साक्षात्शार्वः सनातनः ॥
इत्युक्त्वा दंडपातेन प्रणम्याशु नरेश्वरः ॥ बद्धांजलिपुटस्तस्थौ यावत्प्रोवाच शंकरः ॥ ईश्वर उवाच ॥ साधु भो वत्स नृपते
भाग्यवानसि निश्चितं ॥ तपसा तोषितस्तेहं वरं वरय सुव्रत ॥ राजा उवाच ॥ यदि तुष्टोसि मे देव वरार्होयद्यहं मतः॥अंतरं मे
पितुर्यावन्मम नाम्ना स्थिरो भव ॥ इह तीर्थे महेशान तिलकेश्वरसंज्ञितः ॥ तिलकं देहि मे वंशे स्वराज्यस्यधुरं धरं ॥ संतानम-
क्षयं चास्तु वंशे मे त्वपराजितं ॥ दानशक्तिः शिवे भक्तिः विभक्तिः फलसाधने ॥ रक्तिर्विशेषविज्ञाने मुक्तिरस्तु ततः परं ॥ महेश
उवाच ॥ एवं भवतु राजेंद्र प्रियोसि त्वमतीवमे ॥ सुभक्तस्य प्रियस्याद्य किमदेयंमया नृप ॥ यदन्यदपि ते चित्ते तत्सर्वं भविता
तव ॥ अद्यप्रभृति यत्किंचिदिह मर्त्यो विधास्यति ॥ यो वै त्वदाह्वये तीर्थे फलं तस्य निशामय ॥ शुभंवाप्यशुभं वापि कृतमत्रानु-
वासरं ॥ मत्प्रसादादसंदिग्धं भविष्यति तिलाधिकं ॥ प्रारंभे तपसो यस्मात्तिलप्राशः कृतस्त्वया ॥ तस्मात्तिलेश्वरो नाम त्वन्नाम्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिलकेश्वरः ॥ तिलाः पवित्रमतुलं तिलाः पापविशोधनाः ॥ तिलाः सर्वत्र शस्यंते दाने स्नाने च भोजने ॥ देवकार्ये तथा होमे मांगल्ये मनुजर्षभ ॥ पितॄणां तुष्टिदाः कृष्णा नान्यकार्येषु कर्हिचित् ॥ तिलामलकतांबूलान्यौषधं क्षारवर्जितं ॥ मार्गे जनसमाजे वा भक्षन्निक्षून्न दोषभाक् ॥ मामभ्यर्च्य तिलैः शुक्लैः तिलपिष्टेन वा नृप ॥ प्रणम्य गौतमं विप्रं ततः पुरमितो व्रज ॥ इत्युक्त्वांतर्दधे देवस्तेजोरुपः सनातनः ॥ लिंगरूपं ततो राजा स्नात्वा संपूजितं तिलैः ॥ प्रणम्य दत्वादानानि गोहेमान्नां वराणि च ॥ तिलादानानि बहुशः शिवः प्रीतो भवत्विति ॥ तथा प्रदक्षिणीकृत्य गौतमं मुनिसत्तमं ॥ मयासिद्धिरियं प्राप्ता तत्प्रसादादिति ब्रुवन् ॥ प्रणम्यापृच्छ्यलब्धाशीः स्वं जगाम् पुरं नृपः ॥ मार्कंडेय उवाच ॥ इति ते कथितं पार्थ तीर्थं वै तिलकेश्वरं ॥ यत् श्रुत्वा सर्वपापेभ्यो मुच्यते नात्रसंशयः ॥ अत्र तीर्थे नरःस्नात्वा विधिवच्च तिलोदकैः ॥ तर्पयेद्यःसुरान् पितॄन् श्राद्धं कुर्याच्च भक्तितः ॥ तस्य पुण्यफलं यत्स्यात्तच्छृणुष्व युधिष्ठिर ॥ तृप्ताःस्युः पितरस्तस्य यावमन्वंतरं नृप ॥ यच्च शुक्लतिलैः कुर्याच्छंभोर्वै लिंगपूरणं ॥ तिलपिष्टेन वा पार्थ पवित्रेण स्वशक्तितः ॥ तिले तिले तिलद्रोणपुण्यं प्राप्नोति वै नरः ॥ ॥ यावन्मन्वंतरं चेदं पुण्यवृद्धिस्तिलाधिका ॥ प्रत्यहं नरशार्दूल तथैवान्यत् शुभाशुभं ॥ वृद्धिमायाति सततं शिवेनोक्तं यथा पुरा ॥ तिलहेमान्नवासांसि योदद्यादिह भूपते ॥ शिवो मे प्रियतां देव इत्युक्त्वा सुद्विजाय तु ॥ शिवसंतोषणात्सोपि शिवलोके महीयते ॥ उपचारैश्चविविधैस्तथा पंचामृतेन च ॥ संस्नाप्य पूजयेद्यस्तु तिलकेश्वरमीश्वरं ॥ नानापुष्पैस्तथा धूपदीपनीराजनैरपी ॥ अर्घतांबूलवस्त्रैश्च तथानैवेद्यदानतः ॥ पूजितः परमेशानः प्रपद्याद्वांछितं फलं ॥ पुत्रपौत्रादि वृद्धिं च अयुरारोग्यतां तथा ॥ एतद्वै परमं तीर्थं भुक्तिमुक्तिफलप्रदं ॥ इष्टं दत्तमथोजप्तमेधते त्रानुवासरं ॥ इतिश्रीरेवामाहात्म्येतिलकेश्वर तीर्थनाम चतु र्नवतितमोध्यायः ॥ ९४ ॥ श्रीमार्कंडे उवाच ॥ तथैव गौतमेनात्र तपस्तप्त्वा महात्मना ॥ स्थापितं परमं तीर्थं नाम्नावै गौतमेश्वरं ॥ रेवाया उत्तरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कूले सर्वपापक्षयं करं ॥ न तीर्थतां जलस्याहुर्नस्थलस्य वनस्य वा ॥ यदध्यासितमर्हद्भिस्तद्वै तीर्थं विदुर्बुधाः ॥ गौतमेनाश्रितं तीर्थं लोकानां हितकाम्यया ॥ स्वर्गसोपानभूतं तु तीर्थं पुण्यं युधिष्ठिर ॥ तपसा तोषितः शर्वो विश्वात्मा प्रकटो भवान् ॥ उवाच च महात्मानं गौतमं तपतां वरं ॥ ॥ भोभो विप्र वर क्लेश मतीव कुरुषे कुतः ॥ वरं वरय भद्रं ते तपसा तोषितस्त्वया ॥ ददामि वांछितं ते य यद्वै मनसि संस्थितं ॥ गौतम उवाच ॥ जयदेव जगन्नाथ महारुद्र कृपानिधे ॥ यदि प्रसन्नो भगवन् वरं दातुमिहेच्छसि ॥ दाता त्वमेव जगति नान्योस्ति जगदीश्वर ॥ गार्हस्थ्यमथ याचेहं भ्रष्टभार्योस्मि शंकर ॥ नगार्हस्थ्यात्परो धर्मो यतो धर्मः पृथग्विधः ॥ भार्याहीनो व्रतभ्रष्टो वृषलीपतिरातुरः ॥ द्विजो न योग्यतामेति दैवे पित्रे च कर्मणि ॥ त्रिवर्गसाधनं भार्या भार्याहीने कुतः सुखं ॥ भार्याहीनं ग्रहं शून्यं पितरश्च पराङ्मुखाः ॥ तस्मात्त्वं देहि मे भार्यां शुद्धांता मेव शंकर ॥ स्थापितस्त्वं मया चात्र मम नाम्ना स्थिरो भव ॥ पवित्र तिर्थमासाद्य लोकानां वांछितप्रदः ॥ महेश्वर उवाच ॥ एवं भविष्यति मुने स्वल्पकाले न गौतम ॥ विष्णुपादरजः पूतांनिर्धूताखिलकल्मषां ॥ भार्या ते मातरः सर्वा सत्यरुपाः पुरातनाः ॥ आदायत्वामुपागम्य तव दास्यंति ते प्रियां ॥ तपः क्लिष्टां परां साध्वीं शापमुक्तामिहैव तां ॥ न तेस्त्यविदितं किंचित्तथापि त्वां नियोजये॥ तया रमस्व कल्पांतं साध्व्या ब्रह्मर्षिसत्तम ॥ दोषो योषासु नारोप्यो नापावित्र्यं बहिःक्रिया ॥ न पारुष्यं न चाधिक्यं नरैः स्वहितमीप्सुमीः॥ इह स्थेयं मया यावत् कल्पांतं मुनिसत्तम ॥ गौतमेश्वरनाम्ना वै लोकानां हितकाम्यया ॥ इत्युक्त्का देवदेवेशस्तत्रैवांतरधीयत ॥ स्थापयित्वा शिवं तत्रगौतमो मुनिसत्तमः पूजयन् विश्वपूज्यं तं नवरात्रमतंद्रितः ॥ वेदपारायणं चक्रे शिवस्य पुरतो नृप ॥ ततस्तृतीये दिवसे सर्वास्ता देवमातरः ॥ मुनिभार्यामहिल्यां तां शुद्धां विष्णवंघ्रिरेणुभिः ॥ गृहीत्वा तत्र संप्राप्ता गौतमस्य समीपतः ॥ ब्रह्माणी वैष्णवी रौद्री कौमारी शक्रसंभवा ॥ नारसिंही च वाराही सप्तैता लोकमातरः ॥ दृष्ट्वा समागतास्तत्र मुनिरभ्युत्थितस्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा ॥ प्रणम्य सर्वाः साष्टांगं बद्धांजलिपुटस्थितः ॥ जयशब्देन संपूज्य प्रोवाचैवं मुनीश्वरः ॥ गौतम उवाच ॥ हंसगारुग्मया देवी कमंडल्वक्षधारिणी ॥ वरदा विश्वजननीब्रह्माणी पातु मामघात् ॥ शंखचक्रगदाहस्ता गौरी गरुडवाहिनी ॥ यजुर्मया जगद्धात्री वैष्णवी पातुमामघात् ॥ त्रिशुलखड्वांगधरा देवी वृषभवाहना ॥ सामवेदमयी श्यामा सा रौद्री पातुमामघात् ॥ मयूरवाहना देवी शक्तिकुक्कुधारिणी ॥ धनुर्वेदमया धीरा कौमारी पातु० ॥ सहस्रनयना देवी गजगा वज्रधारिणी ॥ राजविद्यात्मिका रक्ता सा ऐंद्री-पातु० ॥ तीक्ष्णदंतोच्छ्रितकरा हहहारावधारिणी ॥ कराला दैत्यमथनी नृसिंही पातुमामघात् ॥ लंबोष्ठी घुर्घुरारावा सुश्वेता च-क्रधारिणी ॥ दीर्घदंष्ट्रोधृतमही वाराही पातु० ॥ विशाला लोकपालाश्च ब्रह्माद्याः सुरसत्तमाः ॥ यदाराधनतः सिद्धा विश्वरुपां नतोस्मि तां ॥ एतानेकस्वरुपा या महाशक्तिरनादिजा ॥ प्रधानतत्वरुपा या विश्वरुपां नतोस्मि तां ॥ सृष्टिपालनसंहारकारिणी विश्वधारिणी ॥ सर्वस्य बीजरुपा या विश्वरुपां ॥ स्वर्गमोक्षप्रदा देवी सुखसौभाग्यदायिनी ॥ वर्णाश्रमाणां या धात्री वि० ॥ या च बंधुरबंधूनां या वै चक्षुरचक्षुषां ॥ या च नाथा त्वनाथानां वि० ॥ पुरा पुरुषमाविश्य ससर्जाखिलमाशु या ॥ सृज्य-शक्तिर्महादेवी वि० ॥ एकैकसप्तरुपा या कृपया मामुपागता ॥ ज्ञानगम्या परा काचित् वि० ॥ इति संस्तूयमानास्ता गौतमेनाशु मातरः ॥ हृदि कारुण्यसंयुक्ता प्रोचुर्विप्रं पुरस्थितं ॥ गौतम उवाच ॥ भार्याहीनस्य दीनस्य प्रसन्ना यदि मातरः ॥ अत्र संस्था-पितो देवो मयादिपुरुषः शिवः ॥ मम नाम्ना तु तीर्थेस्मिन् तपस्तप्त्वा स्वशक्तितः ॥ भवत्यो यदि संप्राप्तामहादेवानुशासनात् ॥ यूयमत्र स्थितिं श्रेष्ठां कुर्वंतु कृपयान्विताः ॥ विश्वस्य मातरः सर्वाः सर्वलोकहिते रताः ॥ युष्मभ्यं पूजयिष्यंति ये नराश्चात्र भ-क्तितः ॥ बहुपूजोपहारैश्च तेभ्यो देयं हि वांछितं ॥ वंध्यादिदोषहरणं कर्तव्यं स्त्रीषु शक्तयः ॥ पुत्रपौत्राभिवृद्धिश्च दुःखदौर्भाग्य-नाशनं ॥ कर्तव्यं कृपया तेषु युष्मद्भक्तास्तु ये नराः ॥ न च त्याज्यमिदं तीर्थं माकल्पं जगदंबिकाः ॥ मातर उवाच ॥ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 भवतु विप्रर्षे स्थेयमस्माभिरत्र वै ॥ संन्निधौ गौतमेशस्य तव प्रीत्या यथोदितं ॥ महादेवनियोगाद्वै प्राप्ताःस्म द्विजसत्तम ॥ तव
भार्यामिमां नीत्वा निर्दोषां शापवर्जितां ॥ विष्णुपादरजःपूतां शिवदृष्ट्याविशोधितां ॥ इमामस्माभिरानीतां साध्वीं कन्यामिव
स्थितां ॥ गृहाण गौतम मुने न विचारोस्ति कश्चन ॥ ज्ञानवानासि नूनं त्वं वेत्सि सर्वं यथातथं॥ निषेधो नात्र कर्तव्यः संशयश्च
द्विजोत्तम ॥ तूर्णं ते कृपया प्राप्ताः शिवसंप्रेरिता वयं ॥ इत्युक्त्वा प्रददुस्तस्मै साध्वीं तां गौतमाय तु ॥ पत्नीमहिल्यां तपसा
शोषितां दोषवर्जितां ॥ स्वीचकार मुनिः प्रीत्या दत्तां मातृभिरुत्तमां ॥ लब्ध्वा शीर्मात्रृवृंदात्स ग्रहस्थाश्रममास्थितः ॥ पूजिता
मातरस्तेन तस्थुः तत्र युधिष्ठिर ॥ गौतमस्य मुनेः प्रीत्या लोकानां वांछितप्रदाः ॥ गौतमोपि पुनर्यातस्तीर्थात्तीर्थं वनाद्वनं ॥
पुनः पर्वणि चागत्य सदा पूजयतीश्वरं ॥ इति ते कथितं पार्थ तीर्थं वै गौतमेश्वरं ॥ गंतव्यं हि नरैस्तत्र यत्र देवो जग-
द्गुरुः ॥ पातकस्यविनाशार्थं स्वर्गसौख्यादि सिद्धये ॥ सौभाग्यजनसंतानजयदं दुःखनाशनं ॥ पिंडदानेन चैकेन कुलत्रितयमुद्धरेत् ॥
यत्किंचिद्दीयते भक्त्या स्वल्पं वा यदि वा बहु ॥ तदनंतफलं पार्थ अज्ञया गौतमस्य तु ॥ वस्त्रं मन्नं जलं छत्रमुपानत्करकादिकं ॥
विप्राणां भोजनं चापि दातव्यं नृपसत्तम ॥ देवाय दीपकं दद्यात् अहोरात्रमखंडितं ॥ घृतेन वाथ तैलेन आयुस्तेजोभिवर्द्धनं ॥
गौतमे च ऱ्हदे स्नात्वा मासमेकं युधिष्ठिर ॥ विधिवत्कांचनं दत्वा शुद्धोजन्मशतत्रयं ॥ तीर्थानां परमं तीर्थं स्वयं रुद्रेण भाषितं ॥
इति श्रीवायुक्तशिवसंहितायां रेवामहात्म्ये उत्तरे गौतमेश्वरतीर्थं नाम पंचनवतितमोध्यायः ॥ ९५ ॥ श्रीमार्कंडेय उवाच ॥ तथैव
मातृनिवहं पूजयेत्तत्र भक्तितः ॥ पशुपुष्पार्घधूपैश्च दीपगंधानिवेदनैः ॥ गौरीणीकन्यका विप्रभोजनैर्हवनैस्तथा ॥ नराजनैस्तथा
वाद्यैः स्नेहनैर्वस्त्रगुंठनैः ॥ अष्टम्यां च नवम्यां च चतुर्दश्यां युधिष्ठिर ॥ मातृतीर्थेनरः स्नात्वा कुर्याद्वै मातृपूजनं ॥ गीतवाद्यैश्च नृत्यैश्च
स्तुतिभिस्तोषितास्तु ताः ॥ इदं तीर्थं फलं सम्यग्यद्वै मनसि वांछितं ॥ इतिमातृतीर्थंनाम ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्थ गोपारेश्वरतीर्थतः ॥ नर्मदादक्षिणे कूले तीर्थं परमशोभनं ॥ शंखचूडस्य नागस्य प्रसिद्धं भूमिमंडले ॥ शंखचूडःस्थितस्तत्र स्वयं वै पांडुनंदन ॥ वैनतेयभयात्पूर्वमागतो नर्मदातटे ॥ तपस्तप्त्वा सु विपुलं स्थापयामास शंकरं ॥ शंखचूडेश्वरं नाम शिवं-सर्वभयापहं ॥ यत्र तीर्थे तु यो भक्त्या शुचिः स्नात्वा समाहितः ॥ स्नापयेच्छंखचूडेशं क्षीरक्षौद्रघृतादिना ॥ संपूज्य जागरं कुर्यान्निशि देवाग्रतो नृप ॥ दधिभक्तेन देवस्य कर्तव्यं लिंगपूरणं ॥ तथैव ब्राह्मणान् भोज्यादधिभुक्तं सुवासितं ॥ शंखचूडेश्वरप्रीत्यै गां च दद्यात्पयस्विनीं ॥ तत्र तीर्थे तु यो राजन् सर्पदष्टं प्रतर्पयेत् ॥ सर्वैसद्गतिमाप्नोति शंखचूडवचो यथा ॥ इति शंखचूडेश्वरतीर्थनाम॥ श्रीमार्कंडेय उवाच ॥ शंखचूडेश्वरात्पार्थ न्यूनक्रोशांतरे नृप ॥ तीर्थानामुत्तमंगच्छेत्केदारमिति विश्रुतं ॥ तत्र स्नात्वा तथा जप्त्वा हुत्वा संपूज्य शंकरं ॥ हिमाचलस्य यात्रायां यत्फलं तदवाप्नुयात् ॥ युधिष्ठिर उवाच ॥ विस्मयो मे महान्विप्र श्रुत्वा केदारमत्रगं ॥ पुराश्रितो हिमाद्रौ यः स केनेहागतो मुने ॥ मार्कंडेय उवाच ॥ ऋषिभिर्मुनिभिः पूर्वं ब्राह्मणैर्वृंदचारिभिः ॥ हिमाद्रिगमनक्लेशं श्रुत्वा बह्वद्रिलंघने ॥ तुहिनेन परां चार्तिं तथा व्यालकृतं भयं ॥ विचिंत्य सर्वैरेकत्र मिलित्वा नर्मदातटे ॥ लोकानामुपकाराय स्थापितं लिंगमुत्तमं ॥ शांडिल्यो गालवः कौत्सो वसुर्मेधातिथिर्यमः ॥ मांडव्यो भार्गवः कृष्णः कपिंजलविभांडकौ ॥ त्रिसौपर्णस्तथा शक्तिश्च्यवनो बाष्कलस्तथा ॥ जातूकर्ण्यःसुधामा च काश्यपो वन्हिशाद्वलौ ॥ इत्येवमादयः सर्वे मुनिसिद्धास्तपोधनाः ॥ रेवातीरं समाश्रित्य स्थित्वा तपसि पेशलाः ॥ चक्रुस्त्रिषवणं नित्यं नियमस्था समाहिताः ॥ स्तुवंतोन्ये जपंत्यन्ये यजंतोन्ये विधानतः ॥ तपंतोन्ये पठंतोन्ये ध्यायंतोन्ये महेश्वरं ॥ हिमाद्रिकूलनिलयं महापापहरं परं॥ एवंनियमयुक्तानां सद्भक्तानां द्विजन्मनां ॥ मासत्रयांतरे पार्थ दृग्गोचरमगाद्विभुः ॥ ततः प्रणम्य ते सर्वे प्रत्यक्षं शंकरं स्थितं ॥ तुष्टुवुर्वाग्भिरिष्टाभिः पृथक्पृथगनेकधा॥ततः प्रसंन्नो भगवान् उवाच द्विजसत्तमान्॥ ईश्वर उवाच ॥प्रार्थयध्वं द्विजवराः प्रसन्नो वः पुरस्थितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निःसंशयमहं दास्ये दुःप्राप्यमपि तोषितः ॥ब्राह्मणा ऊचुः॥ यदि प्रसन्नो भगवान् अनादिर्दुरितापहः ॥ यदि देयो वरोऽस्मभ्यं मानार्हायद्यमी द्विजाः ॥ हिमाद्रिनिलयोपीशः केदाराख्यस्त्रिलोचनः ॥ अत्रैव स्थापितोस्माभिः कृपया त्वं स्थिरो भव ॥ लोकानामुपकाराय लिंगरूपी महेश्वरः ॥ यत्फलं तत्र गत्वा वै हिमाद्रौ जायते नृणां॥इहतज्जायतां तेषां मुपेत्य त्वां वृषाकपे॥हिमाचल तटस्थं त्वां गत्वा क्लेशेन यत्फलं ॥प्राप्नोतिमर्त्यस्तदिह प्राप्नोतु सुखयात्रया॥ इश्वर उवाच ॥ एवं भवतु विप्रेंद्रा मुनयः सिद्धतापसाः॥ केदाराख्यो वसिष्यामि युष्मत्प्रीत्या घनाशनाः॥ इहापि सततं वासो भवतां च भविष्यति ॥ माघे वा मार्गशीर्षे वा कार्तिके वा द्विजोत्तमाः ॥ अष्टम्यां वा चतुर्दश्यामाश्विने मासि चादरात्॥स्नात्वारेवाजले पुण्ये पूजयिष्यंति मामिह ॥ विविधैरुपचारैश्च विधिवर्जितमानसाः॥ वेदपारायणं ये च पुराणानां विशेषतः॥करिष्यंतिहि ये विप्राःकारयिष्यंतियेनराः॥द्वादशाहस्य सत्रस्य फलं तेषां भविष्यति॥इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत ॥ मुनयश्चापि ते सर्वे संपूज्य वृषभध्वजं ॥ केदाराख्यं स्थापयित्वा महेशानं विधानतः ॥स्थिताः सर्वे यथाकालं तपोनिष्ठा समाहिताः ॥ इति ते कथितं पार्थ केदारं तीर्थमुत्तमं ॥ तत्र गत्वा नरो राजन् सर्वपापैः प्रमुच्यते ॥ गत्वा हिमाद्रिकेदारं यत्फलं तदवाप्नुयातापितृणां श्राद्धदानेन तृप्तिरत्राक्षया मता ॥ अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोरपि ॥ स्नात्वा ब्रह्महृदे पुण्ये यः पुजयति शंकरं ॥ उपोष्य परया भक्त्या दीपं दत्वाप्यखंडितं ॥ सर्वपापविनिर्मुक्तः शिवलोके चिरं वसेत् ॥ इति केदारतर्थिनाम ॥ मार्कंडेय उवाच ॥ पराशरेश्वरं नाम ततो गच्छेत् युधिष्ठिर ॥ केदारस्य समिपे तु तीर्थं पापप्रणाशनं॥ पुरा पराशरो राजन्अपुत्रो वृद्धएव च ॥ परं विषादमापन्नः किं कर्तव्यं मयेति च ॥ बहुवारं मया तप्तं जप्तं चैवेष्टयः कृताः ॥ न भवेत्पुत्रसंतानं किं कृत्वा सुकृतं भवेत् ॥ अपुत्रता महादुःखं इति संचिंत्य वै मुनिः ॥ बहुदुःखान्वितो गत्वा नर्मदायास्तटे शुभे तपश्चचार विपुलं पुत्रार्थे पांडुनंदन ॥ गौरीमहेश्वरो देवो तोषयन् शक्तिसंभवः ॥ हिमवत् दुहिता तेन गौरी नारायणी शुभा ॥ तोषिता परया भक्त्या तप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा च युधिष्ठिर ॥ तस्य तुष्टा महादेवी शिवदेहार्धधारिणी ॥देव्यु उवाच॥भोभोऋषिवरश्रेष्ठतुष्टाहं तव सुव्रत॥वरं वरय भद्रं ते पराशर महामते ॥ पराशर उवाच ॥ यदि तुष्टासि मे देवी यदि देयो वरो मम ॥ देहि पुत्रं सपुत्रं मे सत्यवंतं गुणान्वितं ॥ वेदाभ्यसनशीलं च सर्वशास्त्रविशारदं ॥ सन्निधानं तथा तीर्थे युवयोरस्तु पार्वती ॥ इह लोकोपकाराय स्थीयतां हिमवत्सुते ॥ महादेवेन सहिता मम नाम्ना सुरेश्वरी ॥ नर्मदादक्षिणे कूलेयावदाहूतसंप्लवं ॥ देव्यु उवाच ॥ अदेयं दृश्यते विप्र न ते पत्न्यां सुतोद्भवः ॥ तथापि शिववाक्येन यद्वक्ष्ये तच्छृणुष्व मे ॥ अयोनिसंभवां नारीं दिव्यांशजनितां हितां ॥ सत्यरूपां भगवतीं प्राप्यपुत्रमवाप्स्यासि ॥ नान्यथा भविता पुत्रस्त्वत्पत्न्यां ऋषिसत्तम ॥ इह तीर्थे च भविता सन्निधिर्नौ पराशर ॥ तथा ते वांछितं विप्रेत्युक्त्वाचांतरधीयत ॥ ऋषिः पराशरस्तत्र स्थापयामास शंकरं ॥ पराशरेश्वरं नाम्ना सुरासुरनमस्कृतं ॥ अवेद्यमप्यतर्क्यं च देवानामुत्तमंविभुं ॥ स्थापयित्वा तथा गौरीं विश्ववंद्यां शिवप्रियां ॥ पराशरो महात्मा वै कृतार्थः प्रययौ नृप ॥ तत्र तीर्थे तु यो भक्त्या शुचिः प्रयतमानसः ॥ माघे चैत्रे च वैशाखे श्रावणे नृपनंदन ॥ मासि मार्गशिरे वापिशुक्लपक्षे तु सर्वदा ॥ गच्छेद्वै पांडवश्रेष्ठ गिरिजाजन्मजा तिथौ ॥ नवम्यां वा चतुर्दश्यां सूर्यवारेथ संक्रमे ॥ चंद्रार्कयोश्च ग्रहणे व्यतिपाते चवैधृते ॥ नारी वा पुरुषो वापि कामक्रोधविवर्जितः ॥ पराशरेश्वरं प्राप्य नर्मदादक्षिणे तटे ॥ उपोष्य परया भक्त्या तत्र तीर्थे युधिष्ठिर ॥ रात्रौ जागरणं कुर्वन् दीपदानं च पूजनं ॥ गीतनृत्यकथाश्चापि कारयेद्देवसंन्निधौ ॥प्रभाते विमले प्राप्ते विप्राः पूज्याः स्वशक्तितः ॥ सपत्नीकाः सुरूपाश्च सुवृता लक्षणाद्द्विजाः ॥ तांश्चापि तोषयेद्दानैर्वस्त्रच्छत्रान्नकांचनैः ॥ शय्यामिष्टान्नतांबूलैः प्रीणयेच्छंसितव्रतान् ॥ श्राद्धं कुर्यान्नृपश्रेष्ठ आमान्नेन फलेन वा ॥ तीर्थे स्त्रीणां च शूद्राणा मामश्राद्धं प्रशस्यते ॥ आमं चतुर्गुणं देयं ब्राह्मणेभ्यो युधिष्ठिर ॥ विप्राउदङ्मुखाः कार्याः स्वयं वै दक्षिणामुखः ॥ आमं दर्भेषु निःक्षिप्य वदेदेवं द्विजाग्रतः ॥ प्रेता मे स्वर्गतिं यांतु तीर्थस्यास्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 प्रभावत: ॥ पापं मे प्रशमं यातु वृद्धिं यातु शुभं मम ॥ वर्द्धतां सततं वंशो ज्ञातिवर्गो द्विजोत्तमाः ॥ एवमुच्चार्य विप्राय दानं
देयं स्वशक्तितः ॥ गोभूतिलहिरण्यादि वस्त्रान्नशयनादिकं ॥ पराशरेश्वरप्रीत्यै देयं श्राद्धं विधायच ॥ तीर्थस्यास्य च महात्म्यं ये
शृण्वंति पठंति च ॥ तेपि वै पापसंघातात् मुच्यंते पार्थिवर्षभ ॥ इति श्री वायूक्त शिवसंहितायां रेवामाहात्म्ये दक्षिणे पराशरे-
श्वरतीर्थनाम षण्णवतितमोध्याय: ॥ ९६ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र धनुषां षट्शतांतरे ॥ तीर्थं भी-
मेश्वरं नाम सर्वपापक्षयं करं ॥ स्थापितं ऋषिसंघैश्च भीमव्रतचरैर्यतः ॥ भीमं रौद्रव्रतं यस्मादृषिभिर्धृतमादरात् ॥ तस्माद्भीमो
महादेवो नाम्ना प्रत्यक्षतां गतः ॥ स्तुतः संपूजितस्तैस्तु ततो लब्धवरैर्विभुः ॥ भीमव्रतस्य धरणादस्माभिस्तोषितो यतः ॥ तीर्थे-
स्मिन् कृपयाविष्टो भवभीमेश्वराह्वयः ॥ एवं संप्रार्थितः शंभुःऋषीभिर्मुद्गलादिभिः ॥ स्थास्येहं गिरिजासार्द्धमिह भीमेश्वराह्वयः ॥
भीमव्रतधरैर्यैश्च भवद्भिर्वांछितं द्विजाः ॥ सर्वं भविष्यतीत्युक्त्वा तत्रैवांतरधीयत ॥ तत्र तीर्थे तु यः स्नात्वा सोपवासो जितेंद्रियः॥
जपेदेकाक्षरं मंत्रमूर्द्ध्वबाहुर्धृतार्कदृक्॥तस्य जन्मार्जितं पापं तत्क्षणादेव नश्यति ॥ सप्तजन्मार्जितं पापं गायत्र्या नश्यति ध्रुवं॥ दश-
भि र्जन्मजनितं शतेन तु पुराकृतं ॥ त्रियुगं तु सहस्रेण गायत्रीहंति किल्बिषं ॥ वैदिकं चागमोक्तं वा जप्यं जप्यं नरेश्वर ॥ दह-
तीह क्षणात्पापं जातवेदातृणं यथा ॥ तदेव बलमाश्रित्य कदाचित्पापमाचरेत् ॥ अज्ञातं नश्यति क्षिप्रं नोत्तरं तु कदाचन ॥
भक्त्या भीमेशमभ्यर्च्य नानासंभारसंभृतैः ॥ भूतायां भानुवारे वा भवं तरति भीषणं ॥ मिष्टान्नभोजनं दत्वा विप्राणां तु स्व-
शक्तितः ॥ एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजिता ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ दीपदानं च यो दद्यात् घृ-
ततैलादिना नरः ॥ भवेद्विवेकिनां मुख्यो नचक्षुस्तस्य हीयते ॥ तत्रतीर्थे तु यो दानं भक्तिमाश्रित्य वै ददेत् ॥ तदक्षय फलं सर्वं
जायते नात्र संशय: ॥ इतिभीमेश्वरतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र रेवाया उत्तरे तटे ॥ तीर्थं चंद्रेश्वरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम सर्वकामफलप्रदं ॥ गौतमेश्वरतीर्थात्तु गत्वाक्रोशांतरे नृप ॥ राजयक्ष्मार्दितश्चंद्रः पुरा कृशतनुर्नृप ॥ अश्वारूढो द्विजैःसार्द्धं
तपस्तप्तुं महत्तदा ॥ इहोपविश्य विश्रम्य विमृशन् ऋषिभिःसह ॥ तपसः स्थानमतुलं निश्चिनोतिस्म भारत ॥ रेवोरिसंगमं
पुण्यं यत्र पापान्यनेकशः ॥ विमृशंत्याशु सर्वेषां स्वर्गप्राप्तिस्तथाक्षया ॥ तत्र सिद्धिर्भवेन्नूनंतपसास्त्विति निश्चयः ॥ त-
स्माल्लघुप्रयागोयं दक्षिणस्यां दिशि स्थितः ॥ रेवोरिसंगमःपुण्यो यत्र गुप्ता सरस्वती ॥ तस्माल्लुप्तप्रयागोयं गंगायमु-
नयोर्यथा॥भारते भरतश्रेष्ठ ब्रह्माद्यास्तत्वदर्शिनः ॥ महापातकनाशाय प्रयागद्वितयं विदुः ॥गंगायमुनयोरेकः संगो रेवोरिजोपरः॥इति
निर्णीय यातव्यं द्विजैस्तत्र विधानतः ॥ द्विजराजस्य विश्रामभूमौ संस्थापितः शिवः ॥ चंद्रवाटाह्वयो ग्रामो द्विजानां वसनाय
च ॥ शर्वश्चंद्रेश्वरो नामा ऋषिभिः स्थापितस्तदा ॥ पूजयित्वा शिवं चंद्रं स्वनाम्ना स्थापितं द्विजैः ॥ ग्रामे द्विजांश्च संस्थाप्य
प्रतस्थे संगमंप्राति ॥ ततः प्रभृतिराजेंद्र तीर्थं चंद्रेश्वरं स्मृतं ॥अत्र तीर्थे तु यो गत्वा स्नात्वा चंद्रेश्वरं यजेत् ॥ ग्रामं प्रदक्षिणीकृत्य
शक्त्याविप्रांश्च भोजयेत् ॥ सर्वपापविनिर्मुक्तश्चंद्रलोके चिरं वसेत् ॥ ततः शिवपुरं याति वृतः शिवगणैर्नृप ॥ इति चंद्रेश्वरतीर्थं-
नाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र धनुः पंचाशतांतरे ॥ अश्वपर्णी नदी यत्र रेवयासह संगता ॥ उच्चैश्रवः सुताः
ख्यताश्चत्वारः पुण्यलक्षणाः ॥ अश्वपर्णः सुपर्णश्च मधुपर्णो मरुद्गतिः ॥ चत्वारस्तुरगश्रेष्ठा चक्रवाहसुता नृप ॥ अश्वपर्णस्तु
शक्रेण दत्तश्चंद्राय वै पुरा ॥ प्रीत्याश्वरत्नं राजेंद्र सुपर्णः शंवराय वै ॥ मधुपर्णश्च गुरवे चतुर्थो बंदिने तथा ॥ एवं चंद्रस्तमारुह्य
तदा शक्रार्पितं हयं ॥ आगतो नर्मदातीरं संगमं पापनाशनं ॥ इहागतेन चंद्रेण अश्वपर्णो विसर्जितः ॥ चंद्र उवाच ॥ उच्चैः
श्रवः सुत ज्ञानिन् प्राप्स्येहं तपउत्तमं ॥ शरीरं शोषयिष्यामि नियमव्रतधारणैः ॥ तस्मान्मास्तु तव क्लेशं शीघ्रं याहि
सुरालयं ॥ पुनर्नवंसमाकर्ण्य पुनः प्राप्तपदं हय ॥ प्रत्यागच्छेः सुखं मत्वा त्वमुच्चैः श्रवसःसुत ॥ तुरग उवाच ॥ न यास्ये हंविधो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मात्पापं स्यादुज्झिते त्वयि ॥ संप्राप्तव्यसनः स्वामी न त्याज्यः सेवकैः क्वचित् ॥ व्यसने स्वामिसंत्यागात् सुखं नेह परत्रच ॥
तस्मात्तप्स्येहमपि च विषादं चंद्र मा कृथाः॥दतः शक्रेण ते प्रीत्या त्वमेव शरणं मम॥तथेत्युक्तः स चंद्रेण स्थितस्तत्रैव पार्थिव ॥
स्नात्वा त्रिसंध्यं रेवायां दूरं गत्वा स्थितो भवत् ॥ शीर्णपर्णाशनः शांतश्चापल्यगतिवर्जितः ॥ स्मरंनतंद्रश्चंद्रंच चंद्रशेखरमेव च ॥
श्रुत्वोग्रतपसं चंद्रं रुदन्मंदं तुरंगराट ॥ त्यक्त्वैवाहारसर्वस्वं स्वामिस्नेहाद्युधिष्ठिर ॥ खिन्नः खिनः परां ग्लानिं प्राप्य चैवापतद्भुवि ॥
तदा व्योमगतः शर्वस्तं दृष्ट्वा स्वामिवत्सलं॥ तपसा ग्लानिमापन्नमापन्नार्तिं हरो हरः॥प्रवाहरूपमकरोदार्द्रचित्तसमाश्रितः॥द्रवत्वं
प्रापयामास तस्याश्वस्य तनुं नृप ॥ शिवभावं ददौ तस्य प्रसन्नस्तुरगात्मनः॥ततः प्रभृति संजाता प्रवाहात्सरिदुत्तमा॥ अश्वावती
चाश्वपर्णीनामद्वयविभूषिता ॥ द्रवीभूताच्च देहात्तु पवित्रा पापनाशनी ॥ तस्याश्च पश्चिमे तीरे स्थितो बट्वीश्वरो हरः ॥ नारदेन समं
तत्रशंकरोबटुरूपधृक॥तदाश्वस्य तपो दृष्ट्वा परीक्षार्थं समागतः॥उवाचाश्वं हि तं देवो बटुरूपेण लीलया॥चापल्यमाचरन् भूप तथैवो-
द्वेजयन् हरिं॥बटु रुवाच॥ रेरे मूढ सुखं जीव वृथा क्लेशं हि माकृथाः॥त्यज मूढ तपः शीघ्रं पशुरूपश्च किं तपः॥क्वास्ति चंद्रस्य चंद्रत्वं किं
स्वाम्यं तस्य रोगिणः ॥ तपः फले वैसंदेहो मरणे नास्ति संशयः॥ इत्येवमादिभिर्वाक्यैस्तेन ॥निर्भर्त्सितो हयः नोवाच नात्यजद्धैर्यं
परं स्थाणुरिव स्थितः॥पश्यतो षटुरूपस्य नारदस्य च भारत ॥ यदानियमवान्विद्वान् निश्चयेनैक्यतां गतः॥तदा तस्यातुलं ज्ञात्वा
नियमं निश्चयं च तं ॥ निश्चयात्परमग्लानिं गच्छमानं विलोक्य च ॥ वैक्लव्यमतुलंप्राप्य सापराधइवेश्वरः ॥ सहसा तं द्रवीभूत-
मश्वं दृष्ट्वा महेश्वरः ॥ विमुच्य नारदं तद्वद्बटुलिंगात्मको भवत् ॥ नारदोपि शिवं वीक्ष्य बटुत्वात् लिंगतां गतं ॥ स्वयमुद्भूतपुलको
द्रविभूतश्च दर्शनात् ॥ जगौगाथाश्चैव मुनिर्विस्मयाविष्टचेतनः ॥ नारद उवाच ॥ अहो पश्यत माहात्म्यमेकाग्रतपसो जनाः ॥
पशुयोनेर्द्रवीभूतः शिवभावं गतोह्वयः ॥ न ज्ञाति र्न कुलं मन्ये न विद्याशुद्धिकारणं ॥ प्रकृष्टपदसंप्राप्तेस्तपोवृत्तं च साधनं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावन्मंत्रं यदुक्तं हि प्राप्तं यज्ञादिभिः किल ॥ धर्माभिधर्मनिपुणस्तपसा वांछितं लभेत् ॥ तपोगरीयः सर्वेषां कर्मणामिति नि-श्चयः ॥ पशुरप्याशु यत्प्राप वांछितादधिकं हयः ॥ इत्युक्त्वा नारदस्तत्र विस्मयाविष्टचेतनः ॥ बट्वीशमिति विख्यातं शिवं संपूज्य चागमत् ॥ ततः प्रयातो वृत्तांतं वक्तुं चंद्राय चाखिलं ॥ इति ते कथितं पार्थ अश्वावत्यास्तु कारणं ॥ बट्वीश्वरस्य चोत्पत्तिरखिला पांडुनंदन ॥ तस्या वै संगमे गत्वा श्राद्धं कुर्यात्तु यो नृप ॥ पितरस्तस्य मुच्यंते प्रेतत्वाच्छतसंख्यया ॥ न दुर्गतिः कुले तस्य प्रेता यांति परां गतिं ॥ बट्वीश्वरं विधानेन पूजयेद्यः समाहितः ॥ अष्टम्यां वा चतुर्दश्यां स्नापयित्वा स्वशक्तितः ॥ कलशाष्ट-शतेनादौ पुण्यसंगमवारिणा ॥ दीपनीराजनाद्यायैर्नैवेद्यस्तुतिचंदनैः ॥ तोषयेद्यः शिवं पार्थ स याति शिवसन्निधौ ॥ पापसंघ-विनिर्मुक्तः शिवलोके महीयते ॥ इति श्रीरेवामाहात्म्ये उत्तरे बट्वीश्वरतीर्थनामसप्तनवतितमोध्यायः ॥ ९७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नारदेश्वरमुत्तमं ॥ क्रोशार्द्धमात्रे बट्वीशात् पापसंतापहं परं ॥ तीर्थानां परमं तीर्थं निर्मितं नारदेन तु ॥ युधिष्ठिर उवाच ॥ नारदेन मुनिश्रेष्ठ कस्मात्तीर्थं विनिर्मितं ॥ कस्मात्तप्तं तपः किंचफलं प्राप्तं मुनीश्वर ॥ एतदाख्याहि मे सर्वं कथं तुष्टो वृषध्वजः ॥ मार्कंडेय उवाच ॥ परमेष्ठिसुतः पार्थ नारदो योगवित्तमः ॥ रेवाया उत्तरे कूले तपस्तेनाप्यत प्यत ॥ कामं मनसि संचिंत्य दृष्ट्वा सिद्धिप्रदां धुनीं ॥ नवनाडीविरोधेन काष्ठावस्थां गतेन च ॥ तोषितो गिरिशः शंभुर्नारदेन युधिष्ठिर ॥ स्नेहार्द्रहृदयः शर्वः साक्षान्नारदमागतः ॥ महेश उवाच ॥ तुष्टोहं तव विप्रेंद्र योगिश्रेष्ठ किमिच्छसि ॥ अयोनिज-वरं ब्रूहि यस्ते मनसि रोचते ॥ नारद उवाच ॥ धन्योस्मि कृतपुण्योस्मि तपस्तप्तं मयैव च ॥ भाग्यवानहमेवेह यन्मे तुष्टो महेश्वरः ॥ यदि प्रसन्नो भगवान् वरार्हो यद्यहं मतः ॥ त्वत्प्रसादेन देवेश योगसिद्धिरिहास्तु ते ॥ अचला भव भक्तिस्ते सर्व-कालं तथास्तु मे ॥ स्वेच्छाचारो भवेदेव वेदवेदांगपारगः ॥ त्रिकालज्ञो जगन्नाथ गीतज्ञोहं सदा भवे ॥ दिने दिने तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युद्धं देवदानवमानुषैः ॥ पाताले स्वर्गमर्त्ये वा पश्येहं त्वत्प्रसादतः ॥ इह तीर्थमिदं पुण्यं सोमेनाधिष्ठितं त्वया ॥ नाम्ना मे विस्तृतं शंभो जायतां जनताहितं ॥ प्रत्यहं पार्वतीकांत प्रणम्य पदपंकजं॥तव यामि विधेर्नाम सामप्रिय तथास्तुमे॥किल प्रियत्वे गीते च स्थानेष्वेतेष्वपि प्रभो ॥ मास्तु मे बाधको रोगो योगनाशश्च कर्हिचित् ॥ महेश्वर उवाच ॥ एवं नारद ते सर्वं भविष्यति न संशयः ॥ चिंतितं मत्प्रसादेन सिद्धं यास्यति ते ध्रुवं ॥ स्वेच्छाचारो भवत्वं हि त्रैलोक्ये सचराचरे ॥ निःसंगो निर्ममो योगी न केनापि निवार्यसे ॥ सप्तस्वरा त्रयो ग्रामा मूर्छनाश्चैकविंशतिः ॥ तानाश्चैकोनपंचाशत्प्रसादान्मे त्वयि ध्रुवं ॥ मम प्रियतरं दिव्यं गीतं नृत्यं च वेक्ष्यति॥कलिंद्रक्ष्यसि नित्यं च देवदानवकिंनरैः ॥ मनुष्यैर्वा कृतं यच्च पशुभिर्वा विधेः सुत॥नियमस्यास्य भंगस्ते भविता न कदाच न ॥ त्वत्तीर्थं भूतले पुण्यं मत्प्रसादाद्भविष्यति ॥ मया सन्निहितं नित्यं ख्यातिं लोकेषु यास्यति ॥ वेदवेदांगतत्वज्ञो ह्यशेषज्ञानकोविदः ॥ एकस्त्वं भव निःसंगो मत्प्रसादेन नारद ॥ इत्युक्त्वांतर्दधे देवो नारस्यापि शूलिनं ॥ स्थापयामास तत्राशु सर्वसत्वोपकारकं ॥ एतत् रेवातटे तीर्थमुत्तमं नारदेश्वरं ॥ तत्र तीर्थे नृपश्रेष्ठ यो गच्छेद्विजितेंद्रियः ॥ कृष्णभाद्रपदे पक्षे चतुर्दश्यां हिमानवः ॥ उपोष्य परया भक्त्या रात्रौ कुर्वीत जागरं ॥ वितानं व्यंजनं छत्रं घंटाधूपस्य पात्रकं ॥ नीराजनीं नृपश्रेष्ठ दद्याद्देवाय भक्तितः ॥ शस्त्रेण तु हता ये वै तेषां वै श्राद्धमाचरेत्॥ते यांति परमं लोकं पिंडदानप्रभावतः॥कपिला तत्र दातव्या पितॄनुद्दिश्य भारत ॥ इत्युच्चार्य द्विजे देया तद्वाक्यं शृणु सत्तम ॥ सच्छास्त्रवचनादद्य ब्राह्मणत्वत्प्रसादतः ॥ प्रभावान्नर्मदायाश्च न्यायागतधनस्य च ॥ कपिलायाः प्रदानेन प्रेता यांतु परां गतिं ॥ एत्युच्चार्य द्विजे देया दक्षिणा च स्वशक्तितः ॥ हविष्यान्नं च मिष्टान्नं भोजयेच्च द्विजोत्तमान् ॥ तदेव स्वयमश्नीयान्नैवेद्यं च शिवाय तत् ॥ भक्त्या दिपश्च दातव्यो विधिनाभ्यर्च शंकरं ॥ स्तुतिवादित्रनिर्घोषं गीतं नृत्यं च कारयेत् ॥ अवाप्तं तेन वै पार्थ प्राप्नुयाद्गतिमक्षयां ॥ शक्त्या धूर्वाहदानं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमिं सस्यवतीं ददेत् ॥ अत्र तीर्थं महाराज प्रीणयेज्जातवेदसं ॥ आज्येन तु प्रभूतेन होमद्रव्येण वै पृथक् ॥ ये यजंति सदा भक्त्या त्रिकालं वा सकृन्नृप ॥ नारदेश्वरतीर्थे वै रेवाया उत्तरे तटे ॥ चित्रभानुमुखान् देवान् सर्वदेवमयो हि सः ॥ प्रीणिते प्रीणिताः सर्वे तस्मात्पूज्यो हुताशनः ॥ पूजिते हव्यवाहे तु दारिद्र्यं नैव जायते ॥ धनेन विपुलाकीर्तिर्जायते नात्र संशयः ॥ कुलीनतासुवेशश्च वक्तृत्वं च प्रवीणता ॥ इंद्रादिभिर्लोकपालैः पार्थिवत्वमुपार्जितं ॥ दानशक्तिस्तथा शौर्यं पुत्रपौत्रान्वितं यशः ॥ देहांते लभते स्वर्गं नारदेश्वरसेवनात् ॥ पृथिव्यां सागरांतायां रेवायाश्चोत्तरे तटे ॥ सर्वतीर्थवरं त्वेतन्निर्मितं नारदेन हि ॥ तपः सिद्धिकरं पार्थ सर्वपातकनाशनं ॥ इति नारदेश्वरतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र रेवाया दक्षिणे तटे ॥ वैद्यनाथा ह्वयं तीर्थं सर्वक्लेशापहं शुभं ॥ युधिष्ठिर उवाच ॥ वैद्यनाथःकथं जातःको वैद्यस्तेन किं कृतं ॥ एतत्कथय मे ब्रह्मन् कदा तीर्थस्य संभवः ॥ मार्कंडेय उवाच ॥ साधु पृष्टं महाराज धर्मपुत्र युधिष्ठिर ॥ श्रृणु सर्वं यथावृत्तं कथयिष्यामि तेनघ ॥ रौद्रकल्पे पुरा पार्थ महादेवाच्छ्रुतं मया ॥ कैलास शिखरासीनं देवदेवं जगद्गुरुं ॥ उमासहायं वरदं स्कंदः पप्रच्छ शंकरं ॥ स्कंद उवाच ॥ भगवन् त्वत्प्रसादेन श्रुतो वै शास्त्रसंग्रहः ॥तथा तीर्थानि बहुशो व्रतानि विविधानि च ॥तव देहो द्भवा देवी स्वर्गमोक्षप्रदायिनी ॥ नर्मदा सरितां श्रेष्ठा तीर्थावलिविभूषिता ॥ तस्या दक्षिणकूलस्थं तीर्थमेकं वदस्व मे ॥ महादेव उवाच ॥ साधु वत्स त्वया पृष्टं भक्तोसि त्वं प्रियोसि मे ॥ महात्म्यं कथयिष्यामि वैद्यनाथस्य पुत्रक ॥ संक्षेपात्तस्य तीर्थस्य विस्तरान्नैवशक्यते ॥ सर्वपापहरं पुण्यं सर्वतीर्थेषु चोत्तमं ॥ सर्वरोगहरं चैतत्सर्वारिष्टविनाशनं ॥ विषादि दोषरहितं सर्वकामफलप्रदं ॥ द्वापरार्द्धावसाने वैविष्णोरंतर्गते विधौ ॥ शेषपर्यंकशयने पुरा सुप्ते जनार्दने ॥ एकार्णवे तदा जाते महाकल्पे महात्मनः ॥ नाभ्यां पद्मं समुत्पन्नं तत्र ब्रह्मा व्यजायत ॥ सृष्टिं सृजेति भो ब्रह्मन् वागुवाचाशरीरिणी ॥ विस्मयाविष्टचित्तस्य किमेतदिति पुत्रक ॥ पुरः पूज्यौ त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दा जातौ नरनारायणावृषी ॥ ब्रह्मा प्रोवाच भो वत्सौ सृष्टिं सृजत माश्चलं ॥ तावत् ब्रूतां ततो ब्रह्मन् सृष्ट्यादौ न प्रयोजनं ॥ इत्युक्त्वा मौनिनौ शांतावुत्तराशांगतावृषी ॥ ततः कोपः समुत्पन्नो ब्रह्मणः परमेष्ठिनः ॥ कोपात्प्रधावतः कृत्यं ललाटात्तेजउत्तमं ॥ निर्गतं सुमहद्रूपं नीलकंठं त्रिलोचनं ॥ स्वयमुत्पादितं वत्स मयैवात्मानमात्मना ॥ ददर्शांकगतं ब्रह्मा रोदमानं तु सुस्वरं ॥ ब्रह्मा उवाच ॥ रोदनाद्रुद्रनामासि शिवोसि शिवमावह ॥ भीमोसि भीमरुपत्वाद्भयं नाशय मेनघ ॥ मया चोक्तं ततो वत्स ब्रह्मन् किं ते करोम्यहं ॥ सृष्टिं सृजेति युगपद्ब्रह्मा प्रोवाच मां प्रति ॥ ततः सृष्टा मया वत्स शतशोथ सहस्रशः ॥ मद्रूपाः कोपनिलया जटिला भस्मधूसराः ॥ पंचाशत्कोटयः सृष्टा रुद्राभीमपराक्रमाः ॥ रौद्री सृष्टिस्तदाख्याता नाम्ना लोके हि सा गुह ॥ भयं जगामाशु तदा ब्रह्मा लोकपितामहः ॥ स्तुतिभिस्तोषयित्वा मामुवाचेदं प्रजापतिः ॥ उपसंहर भूतेश रुद्रसृष्टिमिमां लघु ॥ संहताश्च मया वत्स रुद्राः कोपपरायणाः ॥ तेजस्तेषां तदत्युग्रमेकत्वमुपगच्छतां सूर्यार्बुदप्रमाणं तत् दुर्निरीक्ष्यं च दुःसहं ॥ शोषयामास सहसा जलमेकार्णवं तदा ॥ दृष्टा च कन्यका तत्र क्रीडमाना मया शुभा ॥ पृष्टा कासि कुतो वा त्वं कथमेकाकिनी शुभा ॥ सा चोवाच तदा स्निग्धं ललितं मधुरं वचः ॥ तव देहोद्भवा देव रुद्रदेहेति विश्रुता ॥ तवप्रसादात् श्रीकंठ न मृताहं महार्णवे ॥ मयोक्ता सा तदा वत्स वरं वरय सुव्रते ॥ वरं वव्रे तदा सा च सर्वभूतहितैषिणी ॥ अनेन तेजसा देव मम तीरे सदा वस ॥ भवत्वेष वरो मह्यं यदि तुष्टोसि शंकर ॥ तेजोरूपमिदं प्राप्य तेजनाथइति श्रुतः ॥ मयोक्ता च तदा देवी भवत्वेवं हि शोभने ॥ त्वत्तीरे दक्षिणे पुत्री स्थास्येहं त्वत्समीपतः ॥ तेजोनाथ इति ख्यातः सर्वदुःखविनाशनः ॥ शुभे तीर्थे नरः स्नात्वा यः कुर्याद्दर्शनं मम ॥ दारिद्र्यरोगनिर्मुक्तः शिवलोके महीयते ॥ एवं दत्वा वरान् पुत्र ततश्चांतर्हितो ह्यहं ॥ ततः प्रभृति तत्तीरे तेजोनाथ इति स्थितं ॥ इति श्रीवायुक्तशिवसंहितायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेवामाहात्म्ये दक्षिणे तेजोनाथवैद्यनाथतीर्थनाम अष्टनवतितमोध्यायः ॥ ९८ ॥ ॥ श्रीरुद्र उवाच ॥ शृणु वत्स प्रवक्ष्यामि पुनराख्यानमुत्तमं ॥ तेजोनाथस्य माहात्म्यं मनसस्तुष्टिकारणं ॥ क्षीरसागरमध्ये तु श्वेतद्वीपपतिः प्रभुः ॥ आसीनः शेषपर्यंके देवदेवो जनार्दनः ॥ संवाह्यमानचरणो लक्ष्म्या कमललोचनः ॥ सनकाद्यैर्योगिवरैः स्तूयमानस्तथा प्रभुः ॥ सर्वस्तोत्रवरैश्चैव वेदैः सांगपदक्रमैः गरुत्मानपि तत्राभूत् गोविंदस्याग्रतो गुह ॥ पक्षी चकार संकल्पं मनसा गर्वमुद्वहन् ॥ अस्मिन्देवशरीरे तु ब्रह्मांडानां च कोटयः ॥ वसंति समहीदुर्गवनाद्रिभुवनार्णवाः ॥ मदधीनस्त्वसौ देवस्तं वहामि सदा विभुं ॥ मां विना पदमेकं तु कथं याति सलीलया ॥ कथं गुरुमिमं भारं मदन्यः सोढुमर्हति ॥ नास्ति विश्वसृजा सृष्टः पुरुषार्थैकसाधकः ॥ यो देवं पृष्ठमारोप्य चरेत्कामगतिः सदा॥इति चिंतयतस्तस्य गरुडस्य महात्मनः ॥ विज्ञाय मनसो गर्वं देवो वचनमब्रवीत् ॥ पक्षिराज महासत्व नलोके त्वत्समो बली॥समर्थः सर्वभूतेषु मद्भतिस्त्वं न संशयः॥एवं ब्रुवन् हृषीकेशो वामं स्वप्रपदं तदा ॥पृष्ठे वै पक्षिराजस्य ददौ गौरवसंयुतं॥न पादभारं जगदीश्वराहितं शशाक वोढुं गरुडोपि नांजसा॥हातात तातेति चक्रंदमानो मुखाद्वमन्नाथ स शोणितं बहु ॥ विशीर्णपक्षः स च भग्नपादः प्रभग्नदृक् मांसमयोरुपिंडः ॥ गात्रे च कंपोहृदये च दाहं कोहं खगश्चिंतयते विसंज्ञः ॥ ततः क्षणाल्लब्धसंज्ञो वराको दीनमानसः ॥ गर्वात् भ्रातृसमो जातः पंगुः पक्षविवर्जितः ॥ सलब्धसंज्ञो गरुडो मांसपिंडोपमस्तदा ॥ गंतुं शक्नोति नैवासौ पदात्पदमपि क्वचित् ॥ प्रणम्य शिरसा देवं वाक्यमेतदुवाच ह ॥ क्षंतुमर्हसि मे स्वामिन् यन्मौढ्यात्कलितं मया ॥ दासोस्मि तव वश्योस्मि त्वमेव शरणं मम ॥ श्रीभगवानुवाच ॥ न मां वोढुं समर्थस्त्वं वैनतेय कदाचन ॥ सुधा गर्वगतोसीह पक्षिणांच स्वभावतः ॥ यथानुज्ञातएवासि कुरुष्व तपसे मतिं ॥ ध्यायस्व मनसा देवं शंकरं लोकशंकरं ॥ शरीरारोग्यमैश्वर्यं स ते तुष्टः प्रदास्यति ॥ गरुड उवाच ॥ कस्मिन् तीर्थे मया देव ध्यातव्यो सौ वृषध्वजः ॥ गतिश्च वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्ति मे क्कापि गंतुं वियति वा क्षितौ ॥ एत्युक्त्का मौनमास्थाय वैनतेयः स्थितः श्वसन् ॥ योगमायाबलेनाथ प्रक्षिप्तो हरिणा खगः ॥ पपात नर्मदातीरे तेजोनाथसमीपतः ॥ तपश्चचार सुमहद्वैनतेयः खगोत्तमः ॥ शुष्कपर्णांबुवाताशी वातरोधपरायणः ॥ दिव्यवर्षसहस्राणि दशपंच च पुत्रक ॥ तपसाराधयामास देवदेवं वृषाकपिं ॥ तुष्टोहं तपसा तस्य देव्यासह भवान्यया ॥ ततो ददर्श मां तत्र देवीं च पुरतः स्थितां ॥ मयोक्तो वैनतेयश्च वरान् वरय सुव्रत ॥ दास्येहं ते वरान् तुष्टः सुप्रीता च वरांबिका ॥ अथोन्मील्याक्षिणी पक्षी गतो सौ सहसामहीं ॥स्तुतिं चक्रे ततो देव्या मयापि च स पक्षिराट् ॥गरुड उवाच॥कथं चंचुपुटेनाहं स्तौमी त्वां जगदीश्वर ॥ अंडजो ह्यल्पगीरीश कथमीडे त्रियंबक ॥ न शक्तिः पक्षिणां वक्तुं श्लक्ष्णाक्षरसमन्वितं ॥ स्वकार्यविभवेनाद्य करोमीश गिरार्चनं ॥ क्षंतव्यं धूर्जटे तत्र कुत्र पत्ररथे सुधीः ॥ नमामि देवं जगतामधीशं वाचा मवाच्यं नच वेदवेद्यं ॥ कालत्रयातीतमनादिरूपं गुणत्रयातीतमहं प्रपद्ये ॥ अजरममरमभेद्यं निर्मलं निष्कलंयत्सदसदमनवद्यं स्तुलमेवात्मवेद्यं ॥ मुनिवर सुरसिद्धैर्ध्येयमात्राप्रतर्क्यं निरयववमनीहं योगिगम्यं प्रपद्ये॥इति स्म वाक्यैर्बहुशो गरुत्मान् स्तुवंनशक्तस्तु मुहुर्मुमूर्छ ॥ ईश्वरोवाच ॥ तुष्टोहं तपसोग्रेण स्तोत्रेणानेन चानघ ॥ वरं वरय भो वत्स यस्तेमनसि वांछितः ॥गरुड उवाच॥ वरदो यदि वेवेश वरार्हो यद्यहं मतः ॥ शरीरं देहि मे नाथ बलवीर्यगुणान्वितं ॥ पक्षिनाथेति विख्यातं लिंगमेतद्भवत्विह ॥ अत्र तीर्थेनरःस्नात्वा यः कुर्याच्छिवदर्शनं ॥ शिवलोकमवाप्नोतु सर्वभोगसमन्वितः ॥ ईश्वरोवाच ॥ सर्वसौभाग्यसौंदर्यबलवीर्यसमन्वितं ॥ दुःखशोकादिरहितं वपुस्ते वै भविष्यति ॥ ये पक्षिनाथं पश्यंति स्नात्वा रेवाजलेमले ॥ अक्षयः शिवलोकश्च तेषां नूनं भविष्यति ॥ पक्षिनाथं स्मरिष्यंति प्रातरुत्थाय ये नराः ॥ व्याधिदारिद्र्यनाशो वै तेषामिह भविष्यति ॥ अस्मिन् क्षेत्रे च पक्षींद्र यः कुर्याच्छ्राद्ध मुत्तमं ॥ उद्धृताः पितरस्तेन कुलस्यैकोत्तरं शतं ॥ अत्र क्षेत्रे पवित्रे यः कन्यादानं ददाति वै ॥ यावद्रो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माणि विद्यंते कन्यादेहे खगोत्तम ॥ तावद्वर्षसहस्राणि रुद्रलोके महीयते ॥ त्रीण्याहुरतिदानानि पक्षिराज धरातले ॥ गावः
पृथ्वी तथा विद्या ददात्येतत्त्रयं हि यः ॥ रोममूलाक्षरैः संख्यां वसित्वा मम सन्निधौ ॥ वसिष्यति न संदेहो ह्यप्सरोगणसंवृतः ॥
हेम धान्यं जलं वस्त्रं वेश्म शय्यां च पादुके ॥ यो ददाति द्विजातिभ्यस्तस्य पुण्यफलं शृणु ॥ सप्तजन्मानि भूर्लोके चक्रवर्ती भवि-
ष्यती ॥ देहांते शिवलोकश्च यावदाहूतसंप्लवं ॥ गजाश्वाश्च रथं धेनुं नरयानाजिने घटं ॥ द्विमुखीं कालपुरुषं दत्वा भुवि न जायते
॥ दुर्भगापि च या वारी स्नात्वा दृष्ट्वा शिवं व्रजेत ॥ गौरितुल्यं च सौभाग्यं वर्द्धते नात्र संशयः ॥ अपुत्रा लभते पुत्रं कन्या वर-
मवाप्नुयात् ॥ सह भर्ता च या नारी स्नात्वा लिंगं समर्चयेत् ॥ न सा वैधव्यमाप्नोति दशजन्मानि सप्त च ॥ शिवालयं च यः
कुर्यात् प्रीतये वा द्विजालयं ॥ तृणकाष्ठेष्टकाभिर्वा शिलाधातुभिरेव वा ॥ दिनाष्टयुगकल्पानि महाकल्पानि चांडज॥स वसेच्छिवलो
कं हि सत्यं सत्यं मयोदितं ॥ दत्वा वरांस्तदैवाहं गतश्चादर्शनं गुह ॥ रूपं स्वं वैनतेयोपि बलवीर्यगुणान्वितं ॥ अवाप्योत्पत्य च
वियत् जगाम हरिसन्निधौ ॥ कालेन गच्छता तात उत्तमाधममध्यमा ॥ लोकालोकं व्रजंते च शैवलिंगस्य दर्शनात् ॥ अर्चनाद्द-
र्शनात् स्पर्शात् लिंगस्याख्याथ पुत्रक ॥ संकुलः शिवलोकोभूद्यमलोकस्तथोद्वसः ॥ दंडं मुद्रामथादाय सत्यलोकमगाद्यमः ॥नम-
स्कृत्य प्रजानाथमुवाचेदं स सत्वरः॥यम उवाच॥गृहाण देव दत्तां ते मुद्रां दंडं च कर्म च॥व्यापारे बहवो विघ्नास्त्वयादत्ते पितामह॥
बहुसंतापदं कर्म तस्मात्त्यक्तमिदं मया ॥ धर्मराजवचः श्रुत्वा ध्यात्वा ज्ञात्वा च तत्वतः ॥ लोकाः पक्षीशमाहात्म्यात् शिवलोकं
व्रजंति हि ॥ ज्ञात्वेति त्रिदशैः सार्द्धं ब्रह्मा लोकपितामहः ॥ शिवलोकं जगामाशु यत्र देवो महेश्वरः ॥ अनादिनिधनो देवः
सर्वव्यापि महेश्वरः ॥ तं प्रणम्य सुरेशानं प्रजापतिरुवाचह ॥ जयदेव महेशान नमो भूतेश धूर्जटे ॥ सृष्टिमार्गः समग्रोयमु-
पसंहारतां गतः ॥ भूर्लोके पक्षिनाथस्य तव दर्शनमात्रतः ॥ लोकमुच्चावचा सर्वे पूर्वदेहं च यांतिवै ॥ देह्यनुज्ञां महादेव यथासृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ष्टिपथः स्थितिः ॥ पुनः संजायते सर्वं यमः स्वास्थ्यं भजेदिति ॥ एवं श्रुत्वा वचस्तस्य ब्रह्मणः कृपया विभुः ॥ मेघगंभीरया
वाचा उवाच जगदीश्वरः ॥ महेश्वर उवाच ॥ ब्रह्मन् मद्वचनात्सत्यस्तव प्रियचिकीर्षया ॥ लिंगं यास्यति पाताले पूजयिष्यंति
पन्नगाः ॥ स्थानं नैतन्मया त्याज्यं कल्पकोटिशतैरपि ॥ पुनः स्तृतीयकल्पादौ भुवि भूयो भविष्यति ॥ इतिश्रीवायूक्तशिवसंहि-
तायांरेवामाहात्म्येदक्षिणे वैद्यनाथमाहात्म्यंपक्षिनाथतीर्थंनाम नवनवतितमोध्यायः ॥ ९९ ॥ ॥ स्कंद उवाच ॥ विचित्र-
मिदमाख्यातं तेजोनाथप्रभावजं ॥ पक्षिनाथस्य संभूतिस्त्वन्मुखाच्च श्रुता मया ॥ कथं भूयः समुद्भूतः स भवान् वद मे प्रभो ॥
कारुण्याद्वद देवेश परं कौतुहलं हि मे ॥ईश्वर उवाच॥ हंत ते कथयिष्यामि तदिहैकमनाः शृणु ॥ गुह्याद्गुह्यतरं तीर्थं महापातक-
नाशनं ॥ यच्छ्रुत्वा सर्वपापेभ्यो नरः सद्यो विमुच्यते ॥ दुःखदारिद्र्यशमनं सर्वकामफलप्रदं ॥ पुनश्च शौकरे कल्पे ब्रह्मा लोकपि-
तामहः ॥ सृष्ट्वा सृष्टिं च भगवान् तस्याः संचिंत्य जीवनं ॥ ससर्ज चाश्विनौ सूर्याद्रूपेणाप्रतिमौजसौ ॥ उवाचेदं विधिस्तौ च श्रू-
यतां वचनं सुतौ ॥ त्रिषु लोकेषु कर्तव्यं व्याधिदुःखविनाशनं ॥ केचिद्वै कर्मजा रोगाः केचिद्देवप्रकोपजाः ॥ केचिद्विप्रावमानाच्च
केचिद्वै भूतवैकृतात् ॥ अंगिकाः केचिदपरे केचिद्वातकफोद्भवाः ॥ तेषामुपशमः कार्यो भवद्भ्यां वचनान्मम ॥ इतिलब्ध्वा तदादेशं
मोहविक्लवमानसौ ॥ कैश्चिच्च दिवसैर्दीनौ चेरतुः पृथिवीमिमां ॥ आवाभ्यां तु कथं किंवा कार्यं व्याधिविनाशनं ॥
भ्रमंतौ त्विति चिंतार्तौ नारदेन समागतौ ॥ नारद उवाच ॥ कस्माद्विषिर्णवदनौ दीर्घनिश्वासधारिणौ ॥ चिंता-
प्रपन्नमनसौ लुंटः कश्चिद्यथावने ॥ अश्विनावूचतुः ॥ आदिष्टौ ब्रह्मणा ब्रह्मन् लोकव्याधिविनाशने ॥ तेन
चिंतान्वितौ मूढौ शाधितौ करवाव किं ॥ तयोरेवं वचःश्रुत्वा नारदो ज्ञानवान्मुनिः ॥ उवाच मधुरं वाक्यं तयोः प्रियचिकीर्ष-
या ॥ नारद उवाच ॥ तप्यते न तपोत्युग्रं यथा स्यान्मनसेप्सितं ॥ विनातपः कथं सिद्धिश्चिंतितार्थस्य भानुजौ ॥ पूर्वैरपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपस्तप्त्वा कार्ययोगाप्रसाधिताः ॥ अश्विनावूचतुः ॥ भगवंस्त्वं त्रिलोकज्ञो ना ज्ञातं विद्यते तव ॥ कस्मिंस्तीर्थे तु कर्तव्यमावाभ्यां तपउत्तमं ॥ तत्समाख्याहि कारुण्यात् ध्यातव्यः कतमः प्रभुः ॥ नारद उवाच ॥ रेवाया दक्षिणे तीरे सन्मुखं तु ममाश्रमात् ॥ सार्द्धं क्रोशद्वयं तत्र संगमाद्दक्षिणे तटे ॥ क्रोशत्रये लुकेशाच्च अनुलोमेन गच्छतां ॥ वनं गुल्मलताकीर्णं न्यग्रोधाश्वत्थपादपैः ॥ किंशुकैः कोविदारैश्च रसालैः शालतिंदुकैः ॥ तत्र वल्लीसमूहस्य मध्ये स्थानं हि शोभनं ॥ ईश्वराधिष्ठितं सिद्धसंघैश्च परिसेवितं ॥ परं नियममास्थाय गच्छतां तत्र माचिरं ॥ इत्युक्तौ नारदेनैव चेरतुस्तौ ततस्तपः ॥ पादांगुष्ठस्थितौ नित्यं निराहारौ जितेंद्रियौ ॥ पंचाग्निसाधकौ ग्रीष्मे वर्षासु स्थंडिलेशयौ ॥ सहमानौ महादुःखं हेमंते जलवासिनौ ॥ ध्यायमानौ परं देवमव्यक्तं दोषवर्जितं ॥ दिव्यवर्षसहस्रेण तुतोष जगदीश्वरः ॥ निर्गतं सुमहत्तेजो निर्भिद्यावनिमंडलं ॥ सूर्यकोटिप्रतीकाशं ज्वालाव्याप्तदिगंतरं ॥ तद्दृष्ट्वा सुमहत्तेजः क्षोभ्यमानावथोचतुः ॥ किमिदं वाकुतोस्माकं तपसोहानिकारकं ॥ चिंतयानौ महादेवमद्राष्टां लिंगमध्यगं ॥ सौम्यरूपं शिवं देवमनादिमुमयायुतं ॥ ईश्वर उवाच ॥ वरं प्रार्थयतां मत्तो वांछितं युवयोः सुतौ ॥ अदेयमपि दास्यामि यद्यपि स्यात्सुदुर्लभं ॥ अश्विनावूचतुः ॥ आदिष्टं ब्रह्मणा देव लोकव्याध्युपशांतिकं ॥ तत्र प्रसादं कुरुतौ सर्वभूतहितावहं ॥ ईश्वर उवाच ॥ विख्यातौ त्रिषु लोकेषु वैद्यराजौ भविष्यथः ॥ सर्वकामप्रदं पुण्यं लिंगमेतद्भविष्यति ॥ वैद्यनाथेति रोगघ्नं शिवं यास्यामि सर्वतः ॥ सर्वरोगप्रशांत्यर्थं प्रपंचज्ञौ भविष्यथः ॥ देवासुरमनुष्याणां रोगशांत्यै विपश्चितौ ॥ पंग्वंधबधिराणां च षंढानां कुष्ठिनां तथा ॥ महारोगाभिभूतानां कलौ प्रत्ययकारकं ॥ भविष्यति न संदेहो मोक्षदं मोक्षमिच्छतां ॥ शश्वत्पुत्रप्रदं भोगसुखसौभाग्यसिद्धिदं ॥ शरीरारोग्यदं शोकदुःखनिर्नाशनं गुह ॥ ददामि सर्वकामांश्च लिंगमेतत्सुपूजितं ॥ पुनर्देहांतमासाद्य शिवलोकप्रदं चिरं ॥ रविवारे तथाष्टम्यां चतुर्दश्यां च ये नराः ॥ रुद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मत्रार्चयिष्यंति भक्त्या शैवाश्च वैष्णवाः ॥ तेषां क्रतुशतं पुण्यं भविता राज्यपुत्रदं ॥ रविवारस्तु सप्तम्यां शुक्लपक्षे यदा भवेत् ॥
तदा रेवांभसि स्नात्वा वैद्यनाथस्य पूजनात् ॥ न कुले तस्य वै कुष्ठीन चांधो न च पंगुकः ॥ वैद्यनाथं समासाद्य दीपं प्रज्वा-
लयेत्सुधीः ॥ घृतेन वाथ तैलेन पुण्यसंख्या न विद्यते ॥ रात्रौ जागरणं कृत्वा पूजयेद्योजगद्गुरुं ॥ मालतीशतपत्रादि नानापु-
ष्पैर्ऋतूद्भवैः ॥ ग्राम्यैर्वन्यैर्यथालब्धैःस्नाप्य पंचामृतैः पुरा ॥ कोटिजन्मार्जितं पापमेकैकेन दहेन्नरः ॥ सूर्यग्रहे कुरुक्षेत्रे प्रभासे
सोमवासरे ॥ कार्तिक्यां पुष्करे स्नात्वा यत्फलं पुरुषोश्नुते ॥ तत्फलं समवाप्नोति वैद्यनाथस्य पूजनात् ॥ भूयो ममांशो भविता
विप्ररूपो महीतले ॥ धन्वंतरिरिति ख्यातो वैद्यराट् व्याधिनाशनः ॥ योस्य लिंगस्य माहात्म्यं विशेषाद्वर्द्धयिष्यति ॥ यदा य-
दास्य लिंगस्य प्रभावो वृद्धिमेष्यति ॥ तदा सूर्यात्मनौ भूयः छादयिष्यति मायया ॥ इत्युक्त्वा चाश्विनौ वाक्यमंतर्द्धानं गतो
ह्यहं ॥ ततः प्रभृति विख्यातौ नासत्यौ वैद्यनायकौ ॥ अहं च वैद्यनाथाख्यां प्राप्तो लिंगे तदादितः ॥ य इदं वाच्यमानं हि
श्रोष्यंति श्रद्धया नराः ॥ न तेषां दुःकृतं किंचित् दुःकृतो स्यानचापदः ॥ यत्र यत्र स्थितस्यापि पठतः शृण्वतोपि वा ॥
यात्रायां यत्फलं प्रोक्तं तत्तस्य स्यान्न संशयः ॥ इतिश्रीरेवामाहात्म्ये दक्षिणे वैद्यनाथेश्वरतीर्थनाम शततितमोध्यायः ॥ १०० ॥
श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र वानरेश्वरमुत्तमं ॥ क्रोशांतरे वैद्यनाथात् दुरितक्लेशनाशनं ॥ युधिष्ठिर उवाच ॥
वानरस्यात्र किं तीर्थं विख्यातं कथमुत्तमं ॥ एतदाश्चर्यमाख्याहि कोबभूव हि वानरः ॥ मार्कंडेय उवाच ॥ शृणु राजन् प्रव-
क्ष्यामि यथाभूद्वानराधिपः ॥ किंष्किंधाधिपतिः श्रीमान् सुग्रीवोनाम वानरः॥सखा श्रीरामचंद्रस्य वालेर्भ्राता रवेः सुतः ॥ श्रुतो
भविष्यति पुरा त्वयापि नृपसत्तम ॥ स राजा वानराणां तु ऋक्षाणां चापि कोटिशः॥स पुरा रामचंद्रस्य सहायमतुलं भुवि ॥करों-
तिस्मात्मशक्त्या वै मित्ररूत्यं युधिष्ठिर॥रामभार्या पुरा नीता सीता रावणमंदिरात्॥छद्मनापहृता तत्र यात्वा हत्वा च रावणं ॥ महा

मृधे महाराज महास्त्रैः समहाबलं॥देवदुंदुभिनिर्घोषैः पुष्पवृष्ट्याभि पूजितः॥रामो दाशरथिः श्रीमान् ससुग्रीवः किलानयत्॥विभीषणं स्थापयित्वा लंकाराज्ये युधिष्ठिर॥पुण्यं विमानमारुह्य सयूथपतिभिर्वृतः॥सुग्रीवो जांबुवान्नीलो हनुमान्नलएव च॥गजो गवाक्षो गवयः सुरभो गंधमादनः॥सुषेणः पनसस्तारो मैंदो द्विविदगोमुखौ ॥ अंगदीर्घास्तथा सर्वे कपयः कामरूपिणः ॥ पुरस्कृत्य नृपं रामं ससीतं च सलक्ष्मणं ॥ रेवातटमुपाजग्मुर्दक्षिणं शुभलक्षणाः ॥ इहागत्याथ सर्वेपि तपश्चक्रुः समाहिताः ॥ पृथक् भूभागमाश्रित्य रेवातटनिवासिनः ॥ संग्रामे क्रूरकदनावासकश्मलनाशने ॥ कृतोद्यमास्ततः पार्थ लिंगसंस्थापने रताः ॥ पृथक् तीर्थानि सर्वेषां वक्ष्याम्येकैकशो नृप ॥ सुग्रीवेण तपस्तप्त्वा तोषितः परमेश्वरः ॥ चिरमत्र महाराज वानराभिवृतेन तु ॥ प्रत्यक्षोभूच्छिवस्तत्र प्रोवाच कपिसत्तमं ॥ शिव उवाच ॥ वरं वरय भद्रं ते तपसा तोषितस्त्वया ॥ कपिसत्तम दास्येहं ब्रूहि वद्यत्तवेप्सितं ॥ सुग्रीव उवाच ॥ नमस्तेस्तु महादेव यदि तुष्टोसि शंकर ॥ अमी त्वां वानराः सर्वे किंनराः पर्युपासते ॥ रक्षःसंग्रामसंभूतमेतेषां कश्मलं हर ॥ नानाकदनबीभत्सभवं पापं प्रणाशय ॥ वानरैः स्थापितः सर्वैरिह शर्व स्थिरो भव ॥ वानरेश्वरनाम्ना त्वां पूजयंतु जना भुवि ॥ देहांते सद्गतिं देहि वानराणां महेश्वर ॥ एवमस्तु कपिश्रेष्ठ यत्ते मनसि वांछितं ॥ वानरेश्वरनाम्नाहं स्थास्यामीह तु पार्थिव ॥ वैमल्यं वानराः सर्वे प्राप्ता यास्यंति सद्गतिं ॥ उत्युक्त्वा वानरान् सर्वान् सुग्रीवं चकपीश्वरं ॥ तत्रैवादर्शनं यातः शिवः सैन्यस्य पश्यतः ॥ मार्कंडेय उवाच ॥ ततःप्रभृति विख्यातं तीर्थं वै वानरेश्वरं ॥ तत्र तीर्थे नरः स्नात्वा श्राद्धं कृत्वा विधानतः ॥ उद्धरेत्स पितॄनाशु दशपूर्वान् दशापरान् ॥ प्रेताश्च सद्गतिं यांति पिंडेनैकेन भारत ॥ यो भक्त्या पूजयेद्देवं स्वशक्त्या वानरेश्वरं ॥ सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥ दीपदानेन देवाय स्वशक्त्या वानरेश्वरं ॥ सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते ॥ दीपदानेन देवाय स्वशक्त्या नृपसत्तम ॥ आयुरारोग्यमैश्वर्यं प्राप्नोति भुवि मानवः ॥ ब्राह्मणान् भोजयेद्यस्तु

CC-0. In Public Domain. Digitization by eGangotri

 स्वशक्त्या तत्रपांडव ॥ सिक्त्थे सिक्त्थे भवेत्तृप्तिः पितॄणां युगसंख्यया ॥ इतिवानरेश्वरतीर्थनामएकाधिकशततितमोध्यायः ॥१०१॥
॥ मार्कंडेय उवाच ॥ अतःपरं महाराज शृणु तीर्थं पुरातनं ॥ पुराणे श्रूयते तद्वै धर्ममोक्षास्पदं परं ॥ यस्मिन् श्रुतेपि सर्वेषां क्षयो दुःकर्मणां भवेत् ॥ कैलासशिखरे पूर्वंदेवदेवं जगद्गुरुं ॥ स्कंदः प्रणम्य पप्रच्छ श्रद्धापूतमना नृप ॥ स्कंद उवाच ॥ पृथिव्यां यानि तीर्थानि मुख्यान्यायतनानि च ॥ क्षेत्राणि च वनानीहत्वत्प्रसादाच्छ्रुतानि मे ॥ पुनरन्यत्परं गोप्यं सुरर्षीणां तपस्विनां ॥ संपन्नं सर्वतीर्थेषु सर्वयज्ञेषु चोत्तमं ॥ यस्मिन् तीर्थे नरःस्नात्वा मुक्तिमाप्नोति शाश्वतीं ॥ तत्तीर्थं श्रोतुमिच्छामि कृपया मे वदप्रभो ॥ इत्येतत्पुत्रवचनं श्रुत्वा धर्म्य मुमापतिः ॥ प्राहप्रीतमनाः पुत्रं विश्वात्मा परयामुदा ॥ महादेव उवाच ॥ शृणु स्कंद परं गोप्यं विश्वस्यापितवप्रियं ॥ क्रोशामात्रं हि तत्तीर्थं रेवातटमुपाश्रितं ॥ क्रोशार्धे वानरेशात्तु नर्मदा दक्षिणेतटे ॥ स्वर्गमोक्षप्रदंतीर्थं सप्तकल्पस्मरं परं ॥ तस्मिन्तीर्थे नरः स्नात्वा कुलकोटिं समुद्धरेत् ॥ काशीवासेन वै पुण्यं यज्जन्मायुत संख्यया ॥ तत्पुण्यं प्राप्यते तत्र स्नान मात्रेण षण्मुख ॥ स्कंद उवाच ॥ तीर्थानामुत्तमं तीर्थं रेवातीरे स्थितं विभो ॥ कस्माज्जातं पृथिव्यां तत्कदा कथय मे प्रभो ॥ स्थानं च दैवतं मंत्रान् पूजनं दानजं फलं ॥ विस्ताराद्वद देवेश परं कौतुहलं हि मे ॥ काशीसमं यतः पुण्यं स्नानमात्रेण लभ्यते ॥ ईश्वर उवाच ॥ याजीमूतपुरी ख्याता तत्समीपे वनं महत् ॥ आम्रजंबूकदंबैश्च बिल्वपाटलकिंशुकैः ॥ अश्वत्थोदुंबरप्लक्षैर्दाडिमैर्बीजपूरकैः ॥ चिंचिणीबकुलैर्शस्तैः कुंभीवृक्षैश्च शोभितम् ॥ शमीन्यग्रोधजंबीरकोविदारकरंजकैः ॥ वृक्षमालाकूलं रम्यं रेवातीर मुपाश्रितं ॥ कुंभीवृक्षबहुत्वाच्च कुंभीवन मितिश्रुतं ॥ वनमध्ये च विख्यातः सुरेशोहं जगत्रये ॥ इहार्थे संप्रवक्ष्यामि वृत्तांतं पुत्रपौत्रिकं ॥ यस्यवैश्रवणादेव सर्वपापैः प्रमुच्यते ॥ आदौतत्रतपस्तेपे ब्रह्मा कल्पे पुरातने ॥ स्थापितं तेन तल्लिंगं प्राणिनां मुक्तिदायकं ॥ ब्रह्मेश्वर मितिख्यातं तदा तीर्थं जगत्रये ॥ नमिष्यंति सदा ये तु मुक्तिस्तेषां सुनिश्चिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयेवैततः कल्पे तत्र रेवा जलांतिके ॥ विष्णुना साधितं लिंगं तपः कृत्वा तु पुत्रक ॥ चक्रं दैत्य वधाज्जातं मलिनं क्षा-
लितं तदा ॥ तपस्यता पुरोमुक्तं तत्र लिंगं समुद्गतं ॥ चक्रेश्वर मितिख्यातं तीर्थं विश्वनमस्कृतं ॥ ऋषिभिः स्तूयते नित्यं सर्व
सौख्य प्रदायकं ॥ येनमस्यंति देवेशं मानवा गतमत्सराः ॥ न लभंते पुनर्जन्म संसारे दुःखसागरे ॥ कल्पे तृतीये शक्रेण तत्र
तप्त्वा तपो महत् ॥ प्रकाशितं पुनर्लिंगं तस्मिंस्थाने तदैव हि ॥ शक्रेश्वर मि ति ख्यातं तदाप्रभृति षण्मुख ॥ तत्र स्थाने स्नान-
पानान्न भूयो जठरे वसेत् ॥ ईश्वरं हृदि संस्थाप्य यः पुमान् पूजयेत्कलौ ॥ तस्य पुण्यं प्रशंसंति मुनयो मरुतां गणाः ॥ तदा
मेघाश्च शक्रेण समं तीर्थं समागताः ॥ तेपि तेपुस्तपस्तीव्रं रेवामलजलाप्लुताः ॥ मेघेशं स्थापयामासुर्दुःखदारिद्र्यनाशनं ॥ आ-
गच्छत्सु च मेघेष्वाजग्मुश्चैवाप्सरो गणाः ॥ जलक्रीडां ह्रदे चक्रुरप्सरोह्रदइत्यतः ॥ मेघेश्वरसमीपे तु कथितः पापनाशनः ॥
शक्रेश्वरसमीपे तु दिनमेकं वसेत्तु यः ॥ पुण्यं प्रयागयात्रायां तदवाप्नोति मानवः ॥ कल्पे चतुर्थे धर्मेण तीर्थमेतत्प्रकाशितं तप-
स्तप्त्वा तु दिव्याष्टसहस्रं नर्मदातटे ॥ शिवमाराध्य लिंगं स्वनाम्ना संस्थाप्य चार्चितं ॥ धर्मेश्वरइतिख्यातः पुत्राहं तत्र वै
तदा ॥ धर्मेश्वरमिदं लिंगं सिद्धदेवर्षिपूजितं ॥ ये नमस्यंति मां तत्र तेषां सिद्धिस्तु वांछिता ॥ पंचमे वरुणःकल्पे तपस्तेपे वने
शुभे ॥ महेश्वरं ध्यायमानो रेवाया दक्षिणे तटे ॥ तदैवोद्भेदमगमल्लिंगं वरुणपार्श्वतः ॥ जलेश्वरेण तल्लिंगं पूजितं परया मुदा ॥
वरुणेश्वरनाम्ना वै तदाख्यातं जगत्त्रये ॥ स्नात्वा पीत्वा शिवं दृष्ट्वा तत्र पुत्र कलौ युगे ॥ नरः सौख्यं ससंतानंप्राप्नोत्यंते
शिवांतिकं ॥ षष्ठो यज्ञेश्वरस्तत्र धनदो नर्मदातटे ॥ ध्यायमानो महेशं मां तपश्चक्रे महावने ॥ उग्रेण तपसा तस्य प्रत्यक्षोहं तदा
स्थितः ॥ लिंगरुपश्च धर्मात्मा धनदेनाहमर्चितः ॥ यक्षेण स्थापितो यस्मान्नाम्ना यक्षेश्वरस्ततः ॥ तत्र स्नात्वा च मां दृष्ट्वा सर्व-
पापैः प्रमुच्यते ॥ मार्कंडेय उवाच ॥ इति श्रुतं मया राजन्महेशाद्गुहसन्निधौ ॥ देवर्षिप्रमथानां तु कैलासे शृण्वतां तदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 प्राप्ते च सप्तमे कल्पे मया तत्र तपस्यता ॥ वेदपारायणं कृत्वा तद्वैलिंगं प्रकाशितं ॥ तस्मिन्नेव तदा कल्पे तथा पार्थ शनैश्वरः
 कश्यपस्य कुले जातः सूर्यपुत्रो महाबलः ॥ तीव्रकोपप्रसादः सः प्रोच्यते सकलैर्जनैः ॥ पादांबुजे संप्रगृह्य भक्तियुक्तेन चेतसा ॥
बृहस्पतिं देवगुरुं पर्यपृच्छच्छनैश्वरः ॥ शनिरुवाच ॥ कृत्वा गुरोः प्रसादं मे तीव्रकोपोपशांतये ॥ आख्याहि परमं तीर्थं तपोदानं
व्रतोत्तुवा ॥ उपायं परमं ब्रह्मन् वदकोपप्रशामनं ॥ त्वं गुरुः सर्वदेवानां वाचस्पतिरितीर्यसे ॥ ब्रह्मन्नंगिरसः पुत्र सर्वज्ञस्त्वं सदा
मतः ॥ गुरुरुवाच ॥ शृणु सौरे यथातत्वं प्रियं यन्मनसिच्छसि ॥ एवं कुंभेश्वरं नाम तीर्थं परमशोभनं ॥ छायासुतशुभं
दिव्यं श्रूयते भुवनत्रये ॥ कुंभेश्वराह्वयं तीर्थं सप्तकल्पस्मरं विदुः ॥ स्वर्गे मृत्यौ च पाताले विख्यातं पूजितं च तैः ॥ मयि सिंह-
स्थिते गोदां ये ये यांति सुरर्षयः ॥ ते सर्वे तत्र चायांति तीर्थे कुंभेश्वरे तदा ॥ शनैश्वर उवाच ॥ ऋषिपुत्रसुरश्रेष्ठ वद मे
नामनिर्णयं ॥ कुंभेश्वराह्वयं तीर्थं कस्मादुक्तं कथं हितत् ॥ संक्षेपादपि मे प्राज्ञ वद मे विस्मयो हृदि ॥ गुरुरुवाच ॥ शृणु
कोऽपरं गुह्यं यच्चविस्मयकारकं ॥ कथयिष्यामि तीर्थस्ययथावन्नामकारणं ॥ पुरा मृकंडतनयो मार्कंडो मुनिसत्तमः ॥ प्रपौत्रो
ब्रह्मणः पौत्रो भृगोरुग्रतपाः सुधीः ॥ रेवाया दक्षिणे कुले वेदपारायणेच्छया ॥ प्रदेशं रुचिरं मत्वा वनं पुण्यं च शोभनं ॥ क-
लशं स्थापयामास पुराणपुरुषं स्मरन् ॥ नित्यं त्रिषवणस्नायि वेदाध्यायी शिवार्चकः ॥ वासरे नवमे मंद विसर्जनपरो मुनिः ॥
अभिषेक्तुं शिवं दध्रे कलशोद्धरणे मतिं ॥ तदा भित्वा भुवं कुंभमुद्गतं लिंगमुत्तमं ॥ मुनिस्तुष्टाव तल्लिंगं प्रसन्नोभूत्तदा हरः ॥
उवाच च प्रसन्नोस्मि ब्रूहि यस्ते वरो हृदि ॥ मार्कंडेय उवाच ॥ भगवन् देवदेवेश तव तोषेण शंकर ॥ धन्योस्म्यनुगृहीतोस्मि
प्राप्तं मेद्याखिलंफलं ॥ यदि प्रसन्नो भगवान् वरमेकं प्रयच्छतु ॥ त्वया पुण्यमिदं देव स्थानं नत्याज्यएवहि ॥ कल्पे कल्पे
तु सततं कृपां कृत्वा मयि प्रभो ॥ यस्त्वामाराधयेत्कामात्तां तां सिद्धिं स विंदतु ॥ मया च भगवत्पार्श्वे भाव्यं भक्त्या तथा

CC-0. In Public Domain. Digitization by eGangotri

कुरु ॥ यं यं भावमिहाश्रित्य यस्त्वामर्चयतीश्वर ॥ सतासिद्धिमवाप्नोतु कुंभेश त्वत्प्रसादतः ॥ स्नानं श्राद्धं जपो होमो महा-
दानानि षोडश ॥ "गोवृषस्वर्णधान्यानि शय्याविद्यौषधाभये ॥ पृथ्वी वृक्षोऽथ वासांसि वेश्म कन्या सुखं जलं ॥ पुण्यं च षोडशे-
मानि सौम्यानिमनुरब्रवीत्" ॥ लक्षहोमादिकं कुर्यात् द्विजभोज्यादिकं तथा ॥ त्वदर्चनं च विश्वेश तत्पुण्यं वेत्ति वै भवान् ॥
गुरुरुवाच ॥ मुनेरेतद्वचः श्रुत्वा तथेत्याह शिवोऽर्कज ॥ ईश्वर उवाच ॥ यत्त्वया प्रार्थितं विप्र तथोक्तं तेभविष्यति ॥ अहं कुंभे समुत्पन्नः
तस्मात् कुंभेश्वराख्यया ॥ पूजितस्ते मुनिश्रेष्ठ ख्यातिं यास्ये जगत्रये ॥ एवमुक्त्का महादेवस्तत्रलिंगे लयं ययौ ॥ गुरुरुवाच ॥
एवं कुंभेश्वरं नाम तीर्थं लोके प्रकाशितं ॥ मार्कंडेयेन मुनिना एष तन्नामनिर्णयः ॥ कुंभेश्वरं महातीर्थं सर्वाशुभविनाशनं ॥
दूरं दूरतराणां च विशेषानंतपुण्यदं ॥ ये नरा गौतमीं गत्वा सिंहस्थे मयि पंगुक ॥ तिलोदकैः पिंडदानैस्तर्पयिष्यंति पूर्वजान् ॥
तेषांहि द्विगुणं पुण्यं भवेत् कुंभेशदर्शनात् ॥ आदौ ब्रह्मा तपस्तेपे द्वितीये च जनार्दनः ॥ शक्रस्तृतीयके कल्पे चतुर्थे धर्मएव च
॥ पंचमे वरुणः षष्ठे यक्षराजो धनेश्वरः ॥ मार्कंडः सप्तमे कल्पे कृतवान् प्रकटं शिवं ॥ लिंगरूपं रवेः पुत्र सांप्रतं पापनाशनं ॥
तथा त्वमपि गत्वा च पूजयस्व महेश्वरं ॥ तमेव लिंगरूपं तु स्तुतिध्याननिवेदनैः ॥ समाराधय शांतात्मा तपसा शोषितेंद्रियः ॥
एभिर्देवैर्यथा पूर्वं धूर्जटिः परितोषितः ॥ तथा त्वमपि शांत्यर्थं शिवमाराधयाशु तं ॥ सप्तकल्पं हि तल्लिंगं भुक्तिदं मुक्तिदं परं ॥
मोक्षदं मुक्तिकामानां सर्वेषां वांछितार्थदं ॥ मार्कंडेय उवाच ॥ गुरुणैवं समादिष्टः अपृच्छ्याशु ययौ शनिः ॥ तीर्थं कुंभेश्वरं
नाम सप्तकल्पस्मरं परं ॥ यत्रैवाहं स्थितो नित्यं पूजाकाले शिवांतिके॥ शनिः समाधिमास्थाय प्राणानायम्य यत्नतः॥ दिव्यं वर्ष
सहस्रं सः तपस्तेपे शिवं स्मरन् ॥ शनिनाऽऽराधितस्तत्र तपोभिर्विविधैर्नृप॥ प्रत्यक्षो धूर्जटिर्जातस्तस्य भक्त्या वशीकृतः॥ तुष्टोऽस्मि
ते वरं पुत्र प्रार्थयेत्यवदच्छनिं ॥ शनि रुवाच ॥ जय त्वं देव देवेश विभो विषमदर्शनात् ॥ विरूपाक्ष विषग्रीव व्योमकेश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृषाकपे ॥ अहो भाग्यमहं मन्ये मम मंदस्य वै महत् ॥ त्वं यद्दयाखिलाधार तुष्टोसेत्रिपुरांतक ॥ यदि तुष्टोसि भगवन्कोपं मे-
शमयेश्वर ॥ तीव्रकोपप्रसादं मां विदुर्लोका वृषध्वज ॥ प्रसादस्त्वत्कृतो मेऽस्तु कोपं तैक्ष्णं प्रशामय ॥ येनोद्वेगमघंयातिभव भूरि-
जनाः सदा ॥ तस्य शांतिमहं मन्ये श्रेयसीं सुरसत्तम ॥ जीवितेनेह यस्येश जनस्तूद्विजतेनघ ॥ न मन्ये जीवितं तद्वै तस्य तस्य
वृषध्वज ॥ हरापहर तस्मान्मे तस्य कोपस्य तीव्रतां ॥ मर्यादा श्रेयसी लोके सर्वेषां सर्ववस्तुषु ॥ तथैवान्यं वरं याचे मया सं-
पूजितो यथा ॥ समाः सहस्रमाराध्य सोमस्त्वं परितोषितः ॥ सुनीरे नर्मदातीरे स्थितो भव महेश्वर ॥ आकल्पं प्रवरे तीर्थे
मार्कंडेयकृताह्वये ॥ कुंभेश्वरइतिख्यात स्त्रिषु लोकेषु धूर्जटे ॥ कुंभीवने त्वां कुंभेश कुंभराशिगते मयि ॥ ये नराःपू-
जयिष्यंति स्नात्वा नानोपचारतः ॥ तेषां जन्मसहस्रोत्थं नाशमायातु पातकं ॥ मया च विषमस्थेन विषमस्थानजं
फलं ॥ न देयं तस्य गिरिश कदाचिद्भुवनत्रये ॥ यदा गोदावरीयात्रा सिंहस्थे च बृहस्पतौ ॥ तदा देवर्षिसि-
द्धाश्च मनुष्या यांति गौतमीं ॥ तथैवेह समायांतु ते सर्वे दर्शनायते ॥ यत्तु गोदावरीस्नातात् त्र्यंबकस्यार्चनात्फलं ॥ तदेव
द्विगुणं भूयादिह कुंभे शतेर्चनात् ॥ मार्कंडेय उवाच ॥ इति संप्रार्थिते पार्थ शनिना शांतचेतसा ॥ तस्मै दत्तं हि तत्सर्वं व-
ररूपं यदीप्सितं ॥ महादेव उवाच ॥ वत्स्येह साधु तत्सर्वं भविष्यति शनैश्चर ॥ ॥ पूजयिष्यंति ये लिंगं दूरान्निकटतोऽपि
वा ॥ शुद्धभक्त्या कृते तेषां पुण्यसंख्या न विद्यते ॥ कुंभराशिगतस्त्वं च सिंहस्थो वा बृहस्पतिः ॥ तदा कुंभेश्वरे यात्रा सदा
सौरे भविष्यति ॥ स्नानं श्राद्धं तथा दानं होमं देवार्चनं तथा ॥ यस्तु कुंभेश्वरे कुर्यात् तस्य पुण्यमनंतकं ॥ मार्कंडेय उवाच ॥
इति दत्वा वरान् तस्मै शर्वो लिंगे लयं गतः ॥ एवं ते कथितं राजन् तीर्थंकुंभेश्वरं मया ॥ कीर्तनाच्छ्रवणादस्य सर्वपापैः
प्रमुच्यते ॥ वेद्म्यहं न परो वेत्ति गोप्यमेतज्जगत्रये ॥ एतत् राजन् मया पूर्वं श्रुतं तत्र महेश्वरात् ॥ कार्तिकेयस्य संवादे तीर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञेश्वराह्वयं ॥ मया प्रकाशितं तद्वत्कल्पेऽस्मिन् भरतर्षभ ॥ कुंभेशं नाम वै कुंभात्किमन्यत्पावनं ततः ॥ तीर्थानां परमं तीर्थं मोक्षदं सार्वकामिकं ॥ तावद्गर्जंति तीर्थानि यावदेतन्न कीर्त्यते ॥ धेनुं स्वर्णं गृहं छत्रं वस्त्रोपानद्रथादिकं ॥ भोजनं च वृषं चाश्वं दद्याद्भूमिंतिलांस्तथा ॥ कुंभेश्वरस्य तुष्ट्यर्थं तथैव शनिशांतये ॥ कुंभेश्वरे पुमान् गत्वा शाकमूलफलैरपि ॥ अप्येकं भोजये-द्विप्रं कोटि भोज्यफलं भवेत् ॥ तस्मिन् तीर्थेपि ये वृक्षाः पतंति कालपर्यये ॥ नर्मदाजलसंस्पृष्टास्तेऽपि यांति परां गतिं ॥ अपि प्रमादिनो मर्त्या प्रसंगादपि ये गताः ॥ तेषां पापानि नश्यंति हिमं सूर्योदये यथा ॥ तं मार्गमाश्रयेन्मर्त्यो यदा तत्तीर्थ-वांछया ॥ नृत्यंति पितरस्तस्य मोक्षमार्गविचिंतकाः ॥ कुंभराशिस्थिते मंदे सिंहस्थे वा बृहस्पतौ ॥ शनेर्दिने सदा यात्रा रवावपि च शस्यते ॥ पुनस्ते कथयिष्यामि विशेषं पांडुनंदन ॥ यदा कदाऽपि मर्त्यस्य वसतो भाग्यतो गतः ॥ सिंहस्थिते गुरौ पार्थ कुंभराशिशनिर्भवेत् ॥ भद्रातिथौ शनेर्वारः सर्वयोगो विशेषतः॥ एकैकस्य यदाधिक्यं चतुर्णां प्राप्तवान्नरः॥ तदा तीर्थं समुद्दिश्य व्रजेद्यो भक्तिमान्नरः॥पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः॥स्नानात्सर्वेषु तीर्थेषु यत्फलं तदवाप्नुयात्॥ततो ग-च्छंति तीर्थानि तदा कुंभेश्वरं नृप ॥ आगमः सर्वदेवानामृषिणां सरितां तथा ॥ तदा योगे समायांति त्र्यंबकः सा च गौतमी ॥ तदा प्रयागजं तीर्थं यथा क्षेत्रं हि कौरवं ॥ सर्वतीर्थमयं तोयं सर्वदेवमया नगाः ॥ काशीवासाच्चयत्पुण्यं कुरुक्षेत्रे रविग्रहे ॥ सकृत्त्रिवेण्यां स्नातस्य तत् कुंभेश्वरदर्शनात् ॥ श्राद्धदाने न पितरस्तृप्तायुगशतत्रयं ॥ भवंति पूजिते लिंगे सर्वे देवाः सुपूजिताः ॥ तत्र तीर्थे च यद्दत्तं श्रद्धया भक्तितो नृप ॥ त्रयोदशदिनान्येव त्रयोदशगुणं भवेत् ॥ तस्मिन् योगे नरैः पार्थ पुराणेष्विति निश्चयः ॥ तिले तिले तिलद्रोणपुण्यं दत्ते हुतेपि च॥तस्मात्पार्थ विशेषेण तिलदानं प्रशस्य ते॥प्राप्य तं योगदिवसमेवं भक्त्या करोति यः॥ तत्सहस्त्रैर्मुखैः शेषः प्रवक्तुं न क्षमो भवेत् ॥ शतहोमं सहस्रं वा लक्षहोमादिकं नु वा ॥ अस्कन्नमव्ययं चैव प्रायश्चित्तै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रदूषितं ॥ अग्नेः सकाशाद्विप्राग्नौ हुतं श्रेष्ठमिहोच्यते ॥ शतभोज्यसहस्रादि द्विजवर्याशनादिकं ॥ सुवर्णं कपिलां शय्यां दानान्य
न्यानिशक्तितः ॥ यो दद्यात्तत्र राजेंद्र मही तेनात्र मंडिता ॥ देवांशं तं विजानीयादिति योगः प्रकीर्तितः ॥ एवं योगं समा-
साद्य तदा कृत्वार्चनादिकं ॥ गृहं प्रति प्रयातस्य पितृदेवर्षिमानवाः ॥ वर्द्धयंति तदाशीर्भिः पुण्याभिर्भरतर्षभ ॥ अपि नः स कुले
भूयादेकोप्येवंविधः सुतः ॥ वयंयुग सहस्राय योगेस्मिन् येन तारिताः ॥ धन्यं कुंभेश्वरं तीर्थं धन्यो योगो य उत्तमः ॥ सुवृत्तो यो
सुतो धन्यो यः प्रीणयति वै पितृन् ॥ किं सुतेन गयां गत्वा प्रभासं कुरुजांगलं ॥ तीर्थान्यन्यानि तीर्थानि योगेस्मिन् तारयेद्यदि ॥
मूढं पंगुं कृतालस्यमकृतार्थमजीविनं ॥ मन्ये तं योगयोगेस्मिन् कुंभेशं न व्रजेन्नृप ॥ शृण्वंत्यपि च ये धीराः संदिशंति च ये किल
॥ तेषां पापानि नश्यंति कीर्तनात् श्रवणादपि ॥ लिखित्वा ये प्रयच्छंति तीर्थाख्यानमिदं शुभं ॥ पाठयंति च ये विप्रान्
तेपि धन्या न संशयः ॥ यात्रा मत्र धराविभूषणमहातीर्थे च कुंभेश्वरे योगेस्मिन् शतसूर्यपर्वतुलिते कुर्वंति ये तत्फलं
॥ विष्णुर्नैव चतुर्मुखोथ गिरिशः स्कंदः षडास्योपि सन् शेषोपि स्वमुखैः सहस्रगुणितैर्वक्तुं न शक्तो भवेत्
॥ २०५ ॥ इति श्रीवायूक्तशिवसंहितायां रेवामहात्म्ये दक्षिणे कुंभेश्वरतीर्थनाम द्वीशततितमोध्यायः ॥ १०२ ॥
श्रीमार्कंडेय उवाच ॥ ततः प्रभृति राजेंद्र प्रसंन्ने गिरिजापतौ ॥ स्थितोहं तत्र पुरतः प्रीत्या कुंभेश्वरस्य हि ॥ १ ॥
विधिवत्पूजितो देवैर्मनुजैर्मनुजर्षभ ॥ पूर्वोक्तं ते मया पार्थ मम संतोषभावतः ॥ वेदपरायणालीनःतदा तत्रैव तस्थिवान् ॥
इति संपूजितः सर्वैं देवैः शिवमयो यथा ॥ शिवेति मम नाम्नाहं कृत ईश्वरसंमितः ॥ इतिमार्कंडेश्वरतीर्थनाम ॥ मार्कंडेय उवा-
च ॥ ततो गच्छेत राजेंद्र रामेश्वरमनुत्तमं ॥ धनुःशतानि चत्वारि तद्वै कुंभेशतः स्थितं ॥ उत्तमं सर्वतीर्थेषु तीर्थं पापप्रणा
शनं ॥ अत्रदाशरथीरामो हत्वा लंकेश्वरंपुरा ॥ विमुक्तो ब्रह्महत्याया दोषादाराध्य शंकरं ॥ चरितं रामचंद्रस्य पुराणे बहुविस्तरं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न तद्वर्णयितुं शक्यमिह तीर्थानुसंततौ ॥ इह वानरसैन्येन सह रामः समागतः ॥ सीतया सह राजेंद्र निहत्य युधि रावणं ॥ तपश्चचार विधिवद्रेवाया दक्षिणे तटे ॥ फलमूलाशनो नित्यमुपोषणपरस्तथा ॥ एकरात्रं त्रिरात्रं च कृच्छ्रचांद्रायणानि च ॥ पक्षमासोपवासांश्च रामः सौमित्रिणा सह ॥ ततः कालेन महता प्रसन्नो भून्महेश्वरः॥ददौ वरानीप्सितांश्च राघवस्य महात्मनः॥रामेण स्थापितं लिंगं पावनं लक्ष्मणेन च ॥ रामेश्वरमिति ख्यातं तथो वै लक्ष्मणेश्वरं ॥ रामः प्राप्य वरान् सर्वान् तीर्थे कृत्वा स्वनामतः अंतर्धानगते देवे प्रययौ स्वपुरीं प्रति ॥ पावनानिबहून्यत्रभारते संति भारत ॥ परं पापहरं नास्तिरेवातुल्यं जगत्त्रये ॥ त्रिधा पापैस्तथा तापै:प्रतिजन्मकदर्थितैः ॥ हा किं न मर्त्यैः क्रियते रेवासेवा कलौ युगे ॥ ते मूढा दुर्भगास्ते च तेषां जन्म निरर्थकं ॥ लिंगं शैवं जलं रैवं भविनो न भजंति ये ॥ रामनामगुणग्रामकीर्तनं कलिनाशनं॥तेनापि स्थापितं धाम शैवं लिंगात्मकं नृप॥तन्नमस्यंति ये देवं रामेशं राजसत्तम॥तेषां पापानि नश्यंत नमः सूर्योदये यथो॥रामेश्वरे नरः पार्थ स्नात्वा चैव विधानतः ॥ पितॄन् देवांश्च संतर्प्य श्राद्धं कुर्यात्प्रयत्नतः॥ तृप्यंति पितरस्तस्य संवत्सरशतानि च॥ स्नानमात्रेण राजेंद्र पापं याति सहस्रधा ॥ भोजयेद्ब्राह्मणान् श्राद्धे सर्वदोषविवर्जितान् ॥ एकस्मिन् भोजिते विप्रे कोटिभोज्यसमं विदुः ॥ अन्नं वस्त्रं रथं शय्यां अश्वहेमधनादिकं ॥ भोगांश्च विविधान् दत्वा प्राप्नुयात्परमं पदं ॥ तिलोदकैः पितॄणां च जायते तृप्तिरक्षया ॥ एवं कृत्वा महाराज नरः पापात्प्रमुच्यते ॥ त्रिरात्रमेकरात्रं वास्थातव्यं भक्तितत्परैः ॥ रामेशं लक्ष्मणेशं च संपुज्य विधिपूर्वकं ॥ घृतेन वाथ तैलेन दीपं दद्यादहर्निशं ॥ आयुर्लक्ष्मीयशःसौख्यतेजोवृद्धिकरं परं ॥ इति ते कथितं पार्थ तीर्थं रामेश्वरं परं ॥ कीर्तनाच्छ्रवणादस्य सर्वपापैः प्रमुच्यते ॥ इति रामेश्वरतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र मेघेश्वरमनुत्तमं ॥ पुरस्य पश्चिमे भागे जीमुताख्यस्य भारत॥यथा ते कथितं पूर्वं मेघैः संस्थापितं पुरा ॥ जीमूताख्योनृपश्रेष्टस्तपस्तप्त्वा तथा शिवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 स्थापितः परया भक्त्या वस्त्रोपानकमंडलून् ॥ अन्नोदकं च दत्वा वै न शोच्योत्र नरो नृप ॥तत्रैव मत्स्यको नाम सिद्धः कोप्यभव-
त्पुरा ॥ तेनात्र स्थापितः शर्वो नाम्ना वै मत्स्यकेश्वरः ॥ पुजयित्वा स देवेशं शिवलोकं जगामह॥तत्र मेघेश्वरे तीर्थे श्राद्धं कृत्वा नृपोत्तम ॥ चतुर्युगं पितृणां हि जनयेत् तृप्तिमक्षयां ॥ इति मेघेश्वरतीर्थनाम॥मार्कंडेय उ०॥ तथैवाप्सरसां तत्र ऱ्हदं पुण्यं विनिर्दिशेत् ॥ पूर्ववत् ततो गछेत राजेंद्र उत्तरे नर्मदातटे ॥ क्रमात्प्राप्तं नारदेशात् धनुः पंचशतांतरे ॥ दधिस्कंदं मधुस्कंदं पुण्यं तीर्थद्वयं स्थितं ॥ यत्र स्नात्वा च पीत्वा च पुजयित्वा शिवं नृप ॥ शिवलोकमवाप्नोति पुज्यते शिवकिंकरैः ॥ युधिष्ठिर उवाच ॥ त्वया प्रोक्तं मुनिश्रेष्ठ तीर्थं द्वयमनुत्तमं ॥ तस्मात्तद्धिमध्वाख्यं केनात्र स्थापितं मुने ॥ तदहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥मार्कंडेय उ०॥ साधु पृष्टं महाराज शृणु वक्ष्यामि तेनघ ॥ पुरा द्वौगोपवणिजौ पत्रीवनविनिर्गतौ ॥ प्राप्तौ रेवातटं पुण्यं विक्रेतुं तु रसद्वयं ॥ दध्ना च मधुना चैव पूर्णौ मूर्ध्नि घटावुभौ॥आरोप्य तीरनिकटे सह सा वै भयंकरं ॥ व्याघ्रं पार्श्वे प्रचलितं ददृशाते सघुर्घुरं ॥ गोपश्चैव वणिक् तत्र भयभीतौ प्रविद्रुतौ ॥ द्रवमाणौ च पतितौ तयोर्भग्नं घटद्वयं ॥ दध्नश्च मधुनो चैव तीरे रेवासमुद्भवे ॥ स्मृतस्तु शंकरस्ताभ्यां तच्छिवायनिवेदितं ॥ घटभंगस्य निर्घोषात्त्रस्तो व्याघ्रो युधिष्ठिर ॥ घटभंग प्रदेशे च जातं लिंगद्वयं ततः ॥ दृष्टं ताभ्यां महाराज पूजितं च स्वभक्तितः ॥ हृष्टतुष्टौ गतौ तौ च स्वं स्वं स्थानं युधिष्ठिर ॥ स च गोपवणिक्चापि कृत्वा तीर्थे च तावुभौ ॥ दधिस्कंदेश्वरं चापि मधुस्कंदेश्वरं तथा ॥ गोपस्य वणिजस्यापि शिवलोकोऽभवत्तयोः ॥ तावद्यापि स्थितौ लोके शिवस्य भरतर्षभ ॥ इति ते कथितं पार्थ कारणं तीर्थसंभवं ॥ दधिस्कंदं मधुस्कंदं सर्वपापक्षयं करं ॥ दधिस्कंदे नरः स्नात्वा यः प्रदद्यात् द्विजे दधि ॥ गुणवृतप्रयुक्ताय दक्षिणासहितं नृप ॥ उपतिष्ठेत्तुतत्तस्य सप्तजन्मनि भारत ॥ दध्ना च स्थापयेदेवं कुर्याद्वा लिंगपूरणं ॥ न व्याधिर्न जरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य न शोको नैव मत्सरः ॥ सहस्रचंद्रजीवो च जायते विपुले कुले ॥ मधुस्कंदे तु मधुना मिश्रितान् यस्तिलान् ददेत् ॥
नासौ वैवस्वतं देवं पश्येद्वै जन्मसप्ततिं ॥ मधुना स्नापयेद्देवं मधुस्कंदेश्वरं हि यः ॥ न तस्य यातना पार्थ नारकी स्यात् कदा
च न ॥ मधुना मिश्रितांश्चापि तिलान् यस्तत्र होमयेत् ॥ शैवैर्मंत्रैस्तु विधिवत् कुर्याद्वा लिंगपूरणं ॥ अष्टम्यां वा चतुर्दश्यां
पक्षयोरुभयोरपि ॥ न तस्य पुत्रपौत्रेभ्यो दारिद्रं न वियोजनं ॥ यो दद्यादिह तीर्थे वै पिंडान् दधिमधुयुतान् ॥ यस्य नाम स-
मुच्चार्य तृप्तिस्तस्याक्षया मता ॥ द्वादशाब्दानि राजेंद्र नात्र कार्या विचारणा ॥ इति श्रीरेवामहात्म्ये उत्तरे दधिस्कंमधुस्कंदेश्वरं
तीर्थं नाम त्रिशततितमोध्यायः ॥ १०३ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र तीर्थंवै नंदिकेश्वरं ॥ किं-
चिन्मुने क्रोशमात्रे दधिस्कंदाद्युधिष्ठिर ॥ यत्र नंदीगणः सिद्धस्तत्ते सर्वं वदाम्यहं ॥ भक्तभक्त्या पुराकृष्टः पृष्टमारुह्य
नंदिनः ॥ कैलासादाशु निर्गत्य ययौ भक्तं तु तं प्रति ॥ सम्यगाराधना तस्य शिवः तस्थौ हि यावता ॥ तावत्कै-
लासमागत्य कश्चिद्वै दानवाधमः ॥ देवीं गौरीं त्वरन् पार्थ प्राप्य हर्तुं प्रचक्रमे ॥ शिवपार्श्वे स्थितेनाशु तद्विज्ञातं हि नंदीना ॥
अनावृष्ट्वैव देवेशं तत्र तूर्णं जगामह ॥ततः किं बहुना तेन युद्धे वै दानवो हतः ॥ भवानी रक्षिता देवी विश्वांबा वरदा तदा ॥
पुनरगात्तत्र नंदी विभुं वोढुं हि वेगतः॥शप्तश्च स शिवेनाशु मूढ यस्माद्गतः क्वचित् ॥ मां विहाय सहायः सन् आनापृच्छ्य स्व
लीलया ॥ मयानर्हं परित्यक्तस्तस्माद्गच्छ महीं चर ॥ पशोरिवयतो बुद्धिस्तदस्तु पशुतैव ते ॥ इति शप्तो महेशेन नंदी प्राह
यथातथं ॥ सर्वं दा नववृतांतं कैलासे गिरिजाकृते ॥ देवदेव महेशान शापस्यानुग्रहं वद ॥ न वृथा गमनं मह्यं ज्ञेयं ज्ञानवतां वर
॥ ईश्वर उवाच॥ दत्तः शापो वृथनस्यान्न मदुक्तं वृथा भवेत्॥सिद्धिर्भविष्यति पुनस्तव नंदिन् महीं व्रज ॥ नर्मदां पुरतः कृत्वा मां
त्वमाराधयाशुग ॥ मार्कंडेय उवाच ॥ इति शर्वसमादिष्टो नंदी ध्यात्वा महेश्वरं॥पिबन् रेवाजलं पुण्यं तप्तुं जप्तुं प्रचक्रमे॥ प्रारभ्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नर्मदोद्भेदं तीर्थात्तीर्थं जगाम ह॥दधिस्कंदमधुस्कंदं यावत्त्यक्त्वा स गच्छति॥तावत्तुष्टो महादेवस्तं नंदिनमुवाचह॥ भो भो नंदिन् प्रस
न्नोस्मि वरं वर यथेप्सितं ॥तपसानेन तुष्टोहं तीर्थयात्रा कृतेन ते ॥ नंद्युवाच ॥ चराचर गुरुर्देवः प्रसन्नो यदि मे शिवः ॥ दास्या
नुदासदासस्य तस्य मे न्यूनतास्तिका ॥नाहं प्रकामये वित्तं न चाहं कुलसंततिं ॥ मुक्त न कामये चान्यत्तवेश चरणांबुजं ॥
कृमिकीटपतंगेषु तिर्यग्योनिशतेष्वपि॥ भवं भवं मे तस्यापि तव भक्तिस्थिरास्तुमे ॥ त्वयि पूर्वस्थितिं देहि नाधिकं किंचिदेव हि
॥ तथेति चोक्तः शर्वेण नदीं स्नात्वा मले जले ॥शिवं स्वनाम्ना संस्थाप्प पूजयित्वा प्रणम्य च ॥ साक्षाच्छिवं ततो गत्वा ववंदे
वरदं भुवि ॥ गतः प्रीत्या महादेव करुणानिधिरादरात् ॥गृहीत्वा तं करे सिद्धं जगाम निलयं हरः ॥ तास्मिंस्तीर्थे तु यः स्नात्वा
भक्त्या त्र्यक्षं प्रपूजयेत् ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ श्राद्धं दत्वा पितृणां च यथा लब्धेन भारत ॥ पिंडेन
द्विजभोज्येन तृप्तिः स्याच्छतवार्षिकी ॥ नंदितीर्थे महापुण्ये प्राणत्यागं हि यो लभेत् ॥ शिवस्यानुचरो भूत्वा मोदते कालमक्षयं
॥ ततः कालेन महता जायते विपुले कुले ॥ वेदवेदांगतत्वज्ञोजीवेच्च शरदां शतं ॥ एतत्ते कथितं पार्थ तीर्थाख्यानमुत्तमं ॥ दु-
र्लभं भाग्यहीनस्य पापक्षयकरं महत् ॥ इति नंदितीर्थं नाम ॥ मार्कंडेय उवाच ॥ वरुणेशं ततो गच्छेत्सर्वपापहरं नृप ॥ स्मृतं
क्रमसहस्राद्धं नंदिकेश्वरतःशुभं ॥ यत्र सिद्धो महाराज वरुणो जलनायकः ॥ पिण्याकशाकपर्णैश्च कृच्छ्रचांद्रायणादिभिः ॥
समाराध्य महेशानं ततः सिद्धिं परां गतः ॥ प्राप्तवान् लोकपालत्वं प्रसादाच्छूलपाणिनः ॥ तथैवाकस्मिकाच्छापात्पापिनां
बंधनाय च ॥ रिपूणां च महाराज सहसा बंधनप्रदात् ॥ स्थापितं परमं लिंगं स्वनाम्ना तेन तत्र तु ॥ स्नात्वा रेवाजले
पुण्ये पूजयित्वा महेश्वरं ॥ ततः स्वलोकमगमत् यादोगणनिषेवितः ॥ तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ पूजयेच्छं-
करं भक्त्या सलभेद्वांछितं फलं ॥ कुंडिकां वर्द्धनीं वापि महद्वा जलभाजनं ॥ अन्नेन सहितं दद्यात्तस्य पुण्यफलं शृणु ॥ यत्फलं

CC-0. In Public Domain. Digitization by eGangotri

लभते मर्त्यः सत्रे द्वादशवार्षिके ॥ प्राप्नोति तत्फलं तेन नात्र कार्या विचारणा ॥ सर्वेषामेव दानानामग्र्यमन्नोदकं स्मृतं ॥
सद्यः प्रीतिकरं तोयं तत्रापि नृपसत्तम ॥ गलंतिकां प्रपां वापि ग्रीष्मे यः पूरयेत्सुधीः ॥ प्रत्यहं वर्धते पुण्यं नराणां भावितात्म-
नां ॥ वरुणस्य पुरे वासो यावदाहूतसंप्लवं ॥ ततः कालेन महता मर्त्यलोके भिजायते ॥ अन्नपानप्रदो नित्यं जीवेच्च शरदांशतं
॥ इतिवरुणेश्वरतीर्थं नाम॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र पावकेश्वरमुत्तमं ॥ स्मृतं क्रमसहस्रांते वरुणेशाद्युधिष्ठिर
॥ यत्र सिद्धो महातेजा तपस्तप्त्वा हुताशनः ॥ स्थानभ्रष्टः सर्वभक्षी दंडके मुनिना कृतः ॥ भृगुणा स पुरा शप्त्वा ततश्च
तदनुग्रहात् ॥ नर्मदातटमाश्रित्य प्रचचार तपः परं ॥ ततः कतिपयाहोभिर्भर्गो दृग्गोचरो भवेत् ॥ प्रसादात्तस्य
देवस्य जातः पूतो हुताशनः ॥ पुनः स्थानं निजं प्राप्य निर्दोषः सर्वभक्षणे ॥ स्थापयित्वा महेशानं पूजयित्वा
स्वनामतः ॥ शिवाल्लब्धवरो वह्निः स जगामेप्सितां गतिं ॥ तत्र तीर्थे नरः स्नात्वा पूजयित्वा महेश्वरं ॥ सयज्ञफलमाप्नो-
ति अग्निष्टोमातिरात्रयोः ॥ अग्निप्रवेशं यः कुर्यात्सगच्छेदग्निसाम्यतां ॥ तत्र स्नात्वा च यः कुर्यात् श्राद्धं संतर्प्य
पूर्वजान् ॥ पितृणामनृणो भूत्वा स याति परमं पदं ॥ वह्निसूक्तं जपेद्यस्तु तत्र स्नात्वा समाहितः ॥ कृत्वा तिलाज्यहो
मं च स्वशक्त्या भरतर्षभ ॥ नभ वेत्तस्य दारिद्रं गच्छेद्वह्निसलोभतां ॥ इति श्रीवायूक्तशिवसंहितायां नर्मदा० आग्नितीर्थं नाम चतुर
धिकशततमोध्यायः॥ १०४ ॥ श्रीमार्कंडेय उवाच॥ तस्यैवानंतरं पार्थ कोबेटं तीर्थमुत्तमं॥ धनुःशतत्रये प्राहुरंतरे वन्हितीर्थतः॥ कु
बेरो यत्र संसिद्धो यक्षाणामधिपः पुरा ॥ परिभ्रमन्वने पार्थ तेजस्वी रुपवान् धनी ॥ शून्याश्रमे क्वचिद्दृष्ट्वा मुनि
पत्नीं रहोगतां॥ साध्वीं तां तु परिष्वज्य तया शप्तः स दुष्टवान्॥ मूढः सयौवनमदाद्दोषं प्राप्य कुबेरजं॥ कुबेरइति संज्ञां च लब्ध-
वान् लघुतां तथा॥सा संप्रसादिता तेन ऋषिपत्नी तपस्विनी॥ तया च तपसा सिद्धिरित्युक्तो नरवाहनः॥ व्रीडितः प्राप तत्काला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. न्नर्मदातीरमुत्तमं ॥ तपश्चचार विपुलं यक्षेशः संगमांतिके॥कालेन महता तस्य तपसा तोषितस्ततः ॥ रेवोपकंठे श्रीकंठः प्रत्यक्षः अध्या.
१०५ प्राह गुह्यकं ॥ ईश्वर उवाच ॥ ब्रूहि यक्ष प्रसन्नोस्मि तपसा तव सुव्रत ॥ वरं ब्रूहि महाभाग यस्ते मनसि वर्तते ॥ कुबेर उवाच ॥ १०५
१०६ जयरुद्र जगन्नाथ सर्वपापक्षयंकर॥वरं ददासि चेन्मह्यं वरार्हो यद्यहं मतः॥ तारुण्यमिह संप्राप्तं शरीरं कुत्सितं त्विदं॥तं दोषं नाश- १०६
यित्वा मे सुरूपं कुरु मां पुनः॥त्वया सखित्वमिच्छेयमाधिपत्यं निधिष्वपि ॥प्रतिजन्म तथा देव त्वयि भक्तिः स्थिरास्तु मे॥ यत्र मे
तपसः सिद्धिस्तत्र सन्निहितो भव॥मम नाम्ना महेशान लोकानां वांछितप्रदः॥इति संप्रार्थितो देवः कुबेरेण नृपोत्तम ॥एवं भविष्यती-
त्युक्त्वा तत्रैवांतरधीयत ॥ स्थापयित्वा शिवं तत्र कुबेरेण स्वनामतः॥वरान् प्राप्य महेशाच्च ययौ पार्थ यथागतं॥तदाप्रभृति विख्यातं
कौबेरं तीर्थमुत्तमं ॥ तत्र तीर्थे नरः स्नात्वा समभ्यर्च्य जगद्गुरुं॥उमया सहितं भक्त्या सर्वपापैः प्रमुच्यते॥ तत्र तीर्थे च यः शांतः प्र-
दद्यात्कांचनं नृप ॥ विप्राय जलमध्यस्थः स लभेदक्षयं धनं ॥ दधिस्कंदे मधुस्कंदे नंदीशे वारुणे तथा॥ अन्नेये यत्फलं पार्थ स्नात्वा
तत्फलऽमाप्नुयात् ॥ नंदिकेश्वरतः पार्थ यावत्कौबेरमुत्तमं ॥ क्रोशत्रयांत्तरे प्रोक्तं मया ते तीर्थपंचकं ॥ ते वंद्या मानुषे लोके ध
न्या पूर्णमनोरथाः ॥ यैस्तु दृष्टं महापुण्यमेतद्वै तीर्थपंचकं ॥ तेचनारं न पश्यंति न तेषां यमयातनाः ॥ यांति ते परमं लोकं
भास्करस्य सुखो ज्वलं॥ भास्करादेश्वरं प्राप्य यावदिंद्राश्चतुर्दश॥ ततः स्वर्गाच्च्युतः सोपि राजा भवति धार्मिकः॥ रोगदुःखविनिर्मुक्तो
भुनक्ति सकलां महीं ॥ कुले तस्य भवेत्पार्थ शिवो विष्णुश्च दैवतं ॥ अखंडितप्रतापस्यान्नर्मदातीरसेवनात् ॥ गंगा कनख-
ले पुण्या कुरुक्षेत्रे सरस्वती ॥ ग्रामे-वा यदि वारण्ये पुण्या सर्वत्र नर्मदा ॥ रेवातीरे वसेन्नित्यं रेवातोयं सदा पिबेत् ॥ स स्नातः
सर्वतीर्थेषु सोमपानं दिने दिने ॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ कल्पांते संक्षयं यांति नर्मदेयं सदाक्षया ॥ इति
रेवामहात्म्ये कुवेरतीर्थ नाम पंचाधिकशततमोध्यायः ॥ १०५ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदादक्षिणे १५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तटे ॥ मेघेश्वरात्क्रोशमात्रे कपितीर्थमनुत्तमं ॥ हनुमंतेश्वरं नाम यात्रात्रयविनाशनं ॥ ब्रह्महत्याहरं पुण्यमगण्यगुणगुंफितं ॥ युधिष्ठिर उवाच ॥ हनुमंतेश्वरं विप्र कथं जातं वदस्व मे ॥ ब्रह्महत्याहरं तीर्थं रेवाया दक्षिणे तटे ॥ श्रीमार्कंडेय उवाच ॥ साधु पृष्टं महाभाग सोमवंशविभूषण ॥ गुह्याद्गुह्यतरं तीर्थं नख्यातं कस्यचिन्मया ॥ तवस्नेहात्प्रवक्ष्यामि श्लिष्टोपि जरया भृशं ॥ पुलस्त्यो ब्रह्मणः पुत्रो विश्रवास्तस्य चात्मजः ॥ रावणस्तस्य पुत्रोभूद्दशास्यो ब्रह्मराक्षसः ॥ त्रैलोक्यविजयी जातः प्रसादा- द्ब्रह्मणः पुरा ॥ गीर्वाणा विजिताः सर्वे त्रैलोक्यं परपिडितं ॥ नारदादार्तिमत् श्रुत्वा जगत् विप्रान्विशेषतः ॥ सूर्यवंशे स्वयं जातो विष्णुर्दशरथात्मजः ॥ रामलक्ष्मणरूपेण सकलाघविनाशनः ॥ सीतां नामोपयेमे स पत्न्यर्थे जानकीं नृप ॥ स वै सभ्रातृभार्यस्तु पितुर्वाक्याद्वने वसत् ॥ चतुर्दशसहस्राणि रक्षसामहनत् क्षणात् ॥ रक्षसा रावणेनाथ लंकाद्वीपनिवासिनः ॥ तेन वैरेण तु वनाद्रामस्य गृहणीहृता ॥ विभीषणेन सभ्रात्रा कुंभकर्णेन रावणः ॥ प्रत्यहं वार्यते पत्न्या मंदोदर्या च भारत ॥ तर्जितो ब्रह्मवंशस्ते मूर्ख रक्षःकुलांतक ॥ परभार्यां तथा साध्वीं मुंच मुंचाशु जानकीं ॥ त्वं जितः कार्तवीर्येणण स च रामेण निर्जितः ॥ रामोपि रामचंद्रेण सोवतीर्णो वधाय ते ॥ त्वत्तो दशगुणं शूरा हता येन खरादयः ॥ क्षणात्तु बहुसाहस्रा तस्य संख्ये कथं जयः ॥ एवं तैः संनिषिद्धोपि नमुमोचाहृतां सतीं ॥ ततो भूद्रामचंद्रस्य वानरैःसह संगतां ॥ ये तदर्थेवतीर्णास्तु सु- ग्रीवादिभिराहिताः ॥ सुग्रीवो हनुमांश्चैव जांबुवान् कुमुदांगदौ ॥ नलनीलसुषेणाद्याः सर्वे रामेण संगताः ॥ तैर्वानरैस्त- था ऋक्षैः कोटिभिर्बहुभिर्वृतः ॥ रामः सलक्ष्मणस्तूर्णं गत्वा लंकां महापुरीं ॥ युद्धं कृत्वा बहुदिनं हत्वा रक्षांसि भूरिशः ॥ छित्वा दशशिरांस्यादौ हतवान् रावणंयुधि ॥ संबंधे तस्यरामस्यकृतं वैरं हनूमता ॥ जानकी पश्यता भग्नं वनं रक्षो गणा हताः ॥ लंका सर्वा विनिर्दग्धा गंधवाहसुतेन वै ॥ रावणस्य सुतः संख्ये हतश्चाक्षकुमारकः ॥ पार्थ किंबहुनोक्तेन रामायणकरः कपिः ॥ ह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नुमानेन वीरेण न तुल्यस्तस्य कश्चन ॥ क्वाभूद्रामस्य रामत्वं जीवितं लक्ष्मणस्य च ॥ क्व सुग्रीवभवाशक्तिरर्णवस्य च लंघनं ॥ क्व सीता च परिज्ञानं रावणस्य वधः क्व च ॥ जीविते कपिसंघानां क्वचासीन्मारुतिं विना ॥ एवं रामायणे वृत्ते शीतामोक्षे कृतेसांति ॥ अयोध्यामगमद्रामो हनूमत्प्रमुखैर्वृतः ॥ तदा रेवातटे प्राप्य दक्षिणं पुण्यलक्षणं ॥ तपस्तेपे यथापूर्वं मयोक्तं तत्र भारत अशुमान्य तदा रामं हनुमान्वानरोत्तमः ॥ ज्ञापयन्कापिचापल्यं तपसा किं ममेति च ॥ कैलासमगमच्छैलं नमस्कर्तुं महेश्वरं ॥ तिष्ठ तिष्ठेति तत्रोक्तो नंदिना वानरर्षभः॥ब्रह्महत्यायुतस्त्वं हि ब्रह्मरक्षोवधे कृते॥महेश्वरसभा पुण्या न गम्या त्वद्विधैः कपे ॥ हनुमानु उवाच॥स्वामिकार्यप्रवृत्तानामा दिष्टानां बलीयसां ॥ भृत्यानां स्यात्कथं दोषः किं नंदि भाषसे वचः ॥नंद्युवाच॥ भृत्यो नदोषभागीस्यादित्युक्तं यत्त्वया कपे ॥ तद्वृतेति त्वया ज्ञेयं नैष शास्त्रस्य निर्णयः ॥ निजोदरदरीं नूनं सदसत्कर्मणा नरैः ॥ भृत्यनामसमाश्रित्यै भर्तव्येति चाशयः ॥ नैवमुक्तं निरुक्तं ते कपेन प्रलपे बहु ॥ लोकद्वय हरं कर्म न कर्तव्यं विपिश्चिता ॥ भृत्यारोपितकार्योपि कर्मणः फलभाक् प्रभुः ॥ अंशभागी भवेभ्दृत्यस्तत्रापि कपिसत्तम॥ हनुमानुवाच ॥ नंदिन् कमप्युपायं मे वद पापोपशांतिदं पापोहं प्लवगो यस्मात्संजातः प्रमथोत्तम ॥ तत्रापि भृत्यभावेन विशेषं भावमर्जितं॥ नंद्यूवाच ॥ शीघ्रं पापोपशांत्यर्थं उपायं शृणु वानर ॥ रुद्रदेहोभ्दवा पुण्या न श्रुता भूतले त्वया॥श्रवणाज्जन्मजनितं कीर्तनच्चद्विजन्मजं ॥ त्रिजन्मसंभवं पापं नश्येद्रेवावगाहनात् ॥ तस्मात्त्वं नर्मदातीरं गत्वा च विपुलं तपः ॥कुरुष्व तीर्थसेवां च शिवभक्तिपरायणः ॥ श्रीमार्कंडेय उवाच ॥ जगत्प्राणसुतश्चेदं नंदिनोक्तं निशम्य च ॥ आयातो नर्मदातीरं यत्र रामो व्यवस्थितः ॥ रामाक्रोशांतरे स्थित्वा चकार पुरवास्थितिं ॥ कपिस्थितिपुरं नाम ततः प्रभृतिभारत ॥ तत्र तेपे तपस्तीव्रं हनुमानंजनीसुतः ॥ ध्यायमानो विरूपाक्षं त्रिशूलधरमीश्वरं ॥ व्यालबद्धजटाजूटं नागयज्ञोपवीतिनं ॥ भस्मोपचितसर्वांगं डमरुध्वनिमंडितं ॥ सोमं सोमौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वलं सोमशेखरं शंकरं शिवं ॥ वत्सरान् सुबहुनन्यान् ध्यायन्वेतद्व्रतः कपिः ॥ ततस्तुष्टो महादेवः पार्वत्यासहितो हरः ॥
उवाच तं हनूमंतं मेघगंभीरया गिरा ॥साधु साधु कपे ब्रूहि कष्टं वत्स त्वया कृतं ॥न वानर त्वया पापं कृतं राक्षससंक्षये ॥ स्वा-
मि कार्यरतस्त्वं च शुद्धोसि मम दर्शनात् ॥ हनुमांश्च हरं दृष्ट्वा सोमं वरदमागतं ॥ साष्टांगं प्रणतो भूत्वा तुष्टाव वृषकेतनं ॥
हनुमाउवाच ॥ जयशंभो जयाजेय जयांधकनिषूदन ॥ जयभूततपोनाम जय भैरवशासन ॥ जय कामारिपो वंद्य त्रिपुरघ्न
गणप्रिय ॥ जय गंगाधराशेष त्रिशूलधर शंकर ॥ जयागण्यगुणाक्रांत भुवनैकसुराव्यय ॥ गोनसोरगदेहार्ध शेषार्ध गिरिजाधर ॥
सद्विद्योपनिषद्रूप मुंडमालाविभूषण ॥ नमः पितृवनावास भक्तानां मंगलप्रद ॥ नमो विधूतचित्ताशावसानशाखिळालय ॥
नमः कैलासनिलय नैकैकपुरनिष्कल ॥ नमो कैतवरूपाद्रिशत्रुपुत्रप्रियंकर ॥ महीरथाणिमाघष्टसिद्धिनाथ विषापह ॥ नमः परम-
निर्वाणकारणाग्निविलोचन ॥ विधिवद्रावणानेकवैद्योपनिषदाहिते ॥ नमः कर्पुरगौरांग सांगवेदवपुर्धर ॥ विष्णुचित्ताहितैकात्मन् गु-
णातीत नमोस्तु ते ॥ अहं नवेद्मि ते चित्तं चरित्रं चलचेतसा ॥ कथं स्तौमि कपित्वाद्यं वेत्तुं ब्रह्मापि न क्षमः ॥ क्व धैर्यं क्व च मे
बुद्धिः क्व वाणिः शास्त्रसंभृता ॥ क्व च मे तद्गुणग्रामं परिज्ञानं महेश्वर ॥ किंतु यादृक विसृष्टोहं त्वया रूपं च मे यथा ॥ तेन
भक्त्यानुसारेण केवलं प्रणमामिते ॥ एवं स्तुतो महादेवो वानरेणाब्रवद्वचः ॥ वरं प्रार्थय मे पुत्र जगत्प्राणसुतेप्सितं ॥ मत्प्राण-
सुतपुत्रस्तु तुष्टस्तोत्रेण तेनघ ॥हनुमानुवाच ॥ ब्रह्मत्वे सृजते विश्वं विष्णुत्वे पासि लीलया ॥ रुद्रत्वे संहरस्येश त्वमे-
वान्यो नं कश्चन ॥ एकस्त्वमखिलाधारो जगत्कर्ताखिलांतिक ॥ अहोभाग्यमिदं मन्ये यन्मे तुष्टः सनातनः॥यदि तुष्टोसि मे देव
भवेयं मां तथा कुरु ॥ त्वमत्र तिष्ठ मन्नाम्ना रेवातीरे वरप्रद ॥ आकल्पं कल्पिताशेषतीर्थं तीर्थमिदंश्रय ॥ महेश उवाच ॥ भो
वत्स स्वच्छभावेन तोषितोहं त्वया नघ स्तुत्या प्रणत्या भक्त्या च प्रीतः कपिकुलोत्तम ॥ नर्मदातीर्थमाहात्म्याध्द्यानयोगप्रभावतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ मन्मुर्तैरर्चनाच्चापि निःपापस्त्वं न संशयः ॥ अन्यच्च ते प्रयच्छामि वरं वानरपुंगव ॥ उपकाराय लोकानां त्वं शृणुष्व समा-
हितः ॥ नामानि तव लोकेस्मिन् यो नरः कीर्तयिष्यति ॥ निर्विघ्नश्चापि निरोगः सर्वं प्राप्स्यति वांछितं ॥ हनुमानंजनिसुतो
वायुपुत्रो महाबलः ॥ रामेष्टः फल्गुणेजातः पिंगाक्षो मितविक्रमः ॥ उदधिक्रमणे श्रेष्ठो दशग्रीवस्य दर्पहा ॥ लक्ष्म
णप्राणदाता च सीताशोकविनाशनः ॥ तेजस्वी सूर्यशिष्यश्च सुग्रीवस्य सखाग्रणीः ॥ जविनः कपिवंशानां श्री
मान् रक्षःकुलांतकः ॥ नामाष्टादशकं चैतत्सायंप्रातश्चयः पठेत् ॥ सर्वत्र सर्वकार्येषु सकदाचिन्न हीयते ॥ ईश्वर उवाच
॥ यथा त्वया कृतं स्तोत्रं ये पठिष्यंति मानवाः ॥ श्रोष्यंति च महापुण्यं मम प्रीतिविवर्द्धनं ॥ मत्प्रसादात्सदा तेषां न भयं
भविता क्वचित् ॥ आरोग्यं धन संपत्तिः संतानं चाक्षयं तथा ॥ सुखं सौभाग्यमतुलं तस्यावश्यं भविष्यति ॥ अत्र तीर्थे
तव प्रीत्या स्थास्येहं चाप्यनातुल ॥ कपे कामप्रदो नित्यं यावदाहूतसंप्लवं ॥ इत्युक्त्वांतर्दधे देव उमयासह शंकरः ॥ हनुमां-
श्च हरं तत्र स्थापयामास भक्तितः ॥ आत्मयोगबले नैव ब्रह्मचर्यप्रभावतः ॥ ईश्वरानुग्रहाच्चापि स्थापितः कामदः शिवः ॥
अच्छेद्यो ह्यप्रतर्क्यश्च विश्वोत्पत्तिविवर्जितः ॥ मार्कंडेय उवाच ॥ हनुमंतेश्वरे राजन् प्रत्यक्षं प्रत्ययं शृणु ॥ तद्वृतं द्वापरस्या-
दौ त्रेतायां तु नराधिप ॥ सुपर्वानाम राजा वै बभूव वसुधातले ॥ तस्य राज्ये सदा सौख्यं नरा दीर्घायुषस्तथा ॥ सुपुत्रा
धनयुक्ताश्चसर्वोपद्रवर्जिताः ॥ सुपर्णस्यसुतः शूरः शतबाहुरभून्नृप॥आसक्तो सौ सदाकालं समृद्धिविषये नृप ॥ क्रीडते पृथिवीं सर्वां
पर्वताश्च वनानिच ॥ वधार्थं मृगयूथानां आगतो वंध्यपर्वते ॥ नानातरुसमाकीर्णे गजयूथसमावृते ॥ सिंहचित्रकशोभाढये मृगशूक-
रसंकुले॥भ्रमित्वा पर्वते राजा रेवायामागतस्तदा॥समारुते वने प्राप्तः सार्द्धक्रोशप्रमाणके॥न्यग्रोधचिंचिणीविल्वकदंबबकुलान्विते ॥
पलाशलिंबीरकरजखंदिरैस्तथा ॥ कर्कंधुपाटलाम्रैश्च शमी तिंदुकशोभितं ॥ हंससारसचक्रैश्च समंतात्परिशोभितं ॥ शरत्काले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रमद्राजा कृष्णपक्षेश्विनस्य तु ॥ वनमध्ये तदा पश्यद्भ्रमंतं पिंगलं द्विजं ॥ तं पुस्तककरं राजा चापल्यादवदद्विजं ॥शतबाहु रुवाच॥ एकाकी त्वं वने कस्मात् भ्रमसे करपुस्तकः॥इतश्चेतो निरीक्षन्वै वद सत्यं द्विजोत्तम ॥विप्र उवाच॥ कन्यकुब्जात्समायतः प्रेषितो राजकन्यया ॥ अस्थिक्षेपाय वै राजन् हनुमंतेश्वरे जले ॥ राजा उवाच ॥ अस्थिक्षेपो जले कस्य हनुमंतेश्वरे द्विज ॥ क्रियते केन कार्येण कौतुकं कथ्यतां मम ॥ इत्युक्त्का त्वरितो यानं त्यक्त्का भूमौ प्रणम्य च ॥ कृतांजलिपुटो भूत्वा ब्राह्मणाग्रे नरेश्वर ॥ समाहित स्थितः साधु श्रोतुं विप्रमुखोद्गतं ॥ विप्रः प्रोवाच तत्सर्वं यद्वृतांतं पुरातनं ॥ ब्राह्मण उवाच ॥ शिखंडी नाम राजा वै कन्यकुब्जेश्वरे नृप ॥ तस्य पुत्रस्य भूपाल कन्याजातोपयाचितैः ॥ जातिस्मरायुता सा च नर्मदाया प्रभावतः ॥ पित्रा च सैकदा कन्या विवाहाय प्रजल्पिता ॥ पुत्र्यपुत्र्यस्य मे त्वं हि जाता रूपगुणान्विता ॥ अस्मिन्नसारे संसारे कन्यादानं करोम्यहं ॥ श्वःकृत्यमद्य कुर्वीत पूर्वान्हे चापरान्हिकं ॥ नहि प्रतीक्षते कालं कृतं वास्य न वा कृतं ॥ ब्राह्मण उवाच ॥ सुता वाक्यादसौ राजा विस्मयाविष्टचेतनः ॥ पुत्री किंकर्तुकामेयमिति चिंतामवाप सः ॥ शिखंडयुवाच ॥ कथ्यंतां मे महाभागे किं त्वयोक्तममीदृशं ॥ पितृवाक्येन सा बाला विहस्य प्रणता भुवि ॥ कथयामास तद्वृतं हनुमंते पुरास्थिते ॥ कन्या उवाच ॥ कलापिनाह्यहं तात युता भर्त्रा वसे सदा ॥ उरिसंगमतः पूर्वे रेवाया दक्षिणे तटे ॥ हनुमतो वने पुण्ये विहरामि यदृछया ॥ भर्त्रा सह हि संयुक्ता रजन्यां सजले नगे ॥ आगता लुब्धकास्तत्र क्षुधार्ता वनमुत्तमं ॥ भर्तृपार्श्वगता दृष्ट्वा पापैस्तैरहमाहगा ॥ पाश बंधं समादाय विवृद्धा पतिना सह ॥ ग्रीवाभंगं च ते दुष्टा चक्रुः पिच्छावलुंठनं ॥ वन्हौ तपावयो मांसं परिपच्याऽशनं व्यधुः ॥ तत्र रात्रौ सुखं सुप्त्वा गतास्ते शर्वरीक्षये ॥ प्रभाते मांसशेषं तज्जंबुकैर्गृध्रवायसैः ॥ मत्शरीरोद्भवं चास्थिस्नायुमांसेन संयुतं ॥ गृहीत्वा शकुनिः कोपि गगने चोत्पपातह ॥ मिथो विवादे तेषां तदस्थिखंडं पपातह ॥ विहंगानां समस्तानां धावतां चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्यत ॥ पतितं नर्मदातोये हनुमंतेश्वरे नृप ॥ मदीयमस्थिखंडंतदद्यापि हृदमध्यगं ॥ प्रभावात्तस्य तीर्थस्य जाताहं तव पुत्रिका ॥ कन्या भूपगृहे दक्षा शरच्चंद्रसुनिर्मला ॥ जातिस्मरा धर्मपरा तीर्थस्यास्य प्रभावतः ॥ तस्माद्विवाहं नेच्छामि स मे भर्त्ता यतो नृप ॥ विशमे वर्तते थापि शकुंतमृगजातिशु ॥ तस्यास्थिशेषं राजेंद्र तस्मिन् तीर्थेहि वर्तते ॥ तत्क्षेपणार्थं तत्राद्य प्रेषयस्व द्विजोत्तमं ॥ कथयिष्यामि ज्ञानं येन तस्य च गतिर्भवेत् ॥ अद्य प्रस्थाप्यतां कोपि नर्मदातटमादरात् ॥ तस्याहं कथयिष्यामि स्थानं चिन्हैसुलक्षितं ॥ विप्र उवाच ॥ शिखंडिना च साश्चर्यं श्रुत्वा पुत्रीवचस्तदा ॥ प्रेषितो नर्मदातीरे हनुमंतेश्वरे नृप ॥ ग्रामान्विंशतिदास्यामि रेवातीरं व्रज द्विज ॥ इति राजा प्रलुब्धोहं संदिष्टः कन्यया तथा ॥ कन्या उवाच ॥ गच्छ त्वं नर्मदां पुण्यां विप्र सर्वाघनाशनीं ॥ आग्नेय्यां सोमनाथस्य हनुमंतेश्वरं परं ॥ अर्द्धकोशे तु रेवायां वीस्तीर्णो वटपादपः ॥ करंजः कहुडश्चैव सन्निधाने वटस्य च ॥ न्यग्रोधमूलसानिध्ये लक्ष्मणयस्थीनि द्रक्ष्यसि ॥ मृत्स्नया सह संगृह्य व्रज रेवाजलं द्विज ॥ आश्विनस्यासिते पक्षे त्रिपुरारेस्तिथौ तथा ॥ स्नापयित्वा शिवे भक्त्या रात्रौ त्वं कुरु जागरं ॥ प्रागेव प्रक्षिप शीघ्रं नाभिमात्रे जले स्थितः ॥ इत्युच्चार्य द्विजश्रेष्ठं विमुक्तिस्तस्य जायता ॥ क्षिप्त्वा स्थीनि पुनः स्नानं कर्तव्यमघनाशनं ॥ एवं हि सुगतिस्तस्य द्विजवर्य भविष्यति ॥ कथितं कन्यया यद्यत्तत्सर्वं पुस्तके कृतं ॥ आगतोहं ततो भूप तीर्थेस्मिन् मलनाशने ॥ मार्कंडेय उवाच ॥ इत्युक्त्वा तेन राजाचसमं विप्रे व्यलोकयत् ॥ अभिज्ञानं च तदृष्ट्वा वीक्ष्यास्थिनि प्रगृह्य च॥पूर्वोक्तेन विधानेन प्राक्षिपन्नर्मदाजले ॥ पुष्पवृष्टिः पपाताशु साधु साध्वब्रुवन्सुराः ॥ विमानं च ततो दिव्यमागतं शिखिनं प्रति ॥ स च दिव्यतनुर्भूत्वा गतः स्वर्गं नृपोत्तम ॥ एवं प्रत्ययं दृष्ट्वा हनुमंतेश्वरे नृप ॥ अनाशकरुचिर्जातः शतबाहुः सुनिश्चितः ॥ मासार्धेनात्यजद्देहं नर्मदांभास्सि भूपतिः॥तस्याप्सरोगणैर्युक्तं विमानं चागतं तदा ॥ ताभिरुक्तं महाराज विमानारोहणं कुरु ॥ शतबाहुरुवाच ॥ नया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भि स्वर्गमार्गेण विप्रो यावदवस्थितः ॥ उपदेशप्रदो मह्यं गुरुरेष द्विजोत्तमः ॥ अप्सरस ऊचुः ॥ लोभः प्रतिष्ठा पापस्य प्रसूति-र्लोभ एव च॥लोभावृत्तो ह्ययं विप्रो लोभात्पापस्य संचयः॥हनुमंतेश्वरे राजन् ये मृताः सत्वमाश्रिताः ॥ ते प्रयांतीश्वरे लोके सर्व-पापक्षयं करं ॥ नैव पाप क्षयो ह्यस्य ब्राह्मणस्य नरेश्वर ॥ गृहं च गृहिणी ग्रामा वर्तते ब्राह्मणाशये ॥ शतबाहुस्ततो विप्र-मुवाच प्रहसन्निव ॥ त्यज मूलमधर्मस्य लोके तृष्णां द्विजोत्तम ॥ इत्युक्त्वा प्रययौ राजा स्वर्गं ताभिः समावृतः ॥ दिनैः कैश्चि-द्गतो विप्रः स्वर्गं वैतलिकैर्वृतः॥स बर्ही काशिराजस्य पुत्रस्तीर्थप्रभावतः ॥ पूर्वजन्मपतित्वेन ह्यात्मानं प्रददौ चसा ॥ मार्कंडेय उवाच ॥ एतद्वृतांतमभवत्तस्मिन्तीर्थे नृपोत्तम ॥ एतस्मात्कारणात्पुण्यं तीर्थमेतत्सदा नृप ॥ वरदानान्महेशस्य प्रभावाच्च ह-नूमतः ॥ महात्म्यान्नर्मदायाश्च सर्वतीर्थोत्तमोत्तमं ॥ अष्टम्यां च चतुर्दश्यां सर्वकालं युधिष्ठिर ॥ विशेषश्चाश्विने मासि कृष्णे भूतदिने नृप ॥ स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्पिषा॥दध्ना शर्करया पार्थ कुंभैस्तीर्थांभसा वृतैः ॥ श्रीखंडेन तुशुभ्रेण विले-प्य परमेश्वरं ॥ सुगंधैर्विविधैः पुष्पैः बिल्वपत्रैश्च पूजयेत् ॥ कुंदेन मुचकुंदेन कुसुमैः कुशकाशजैः ॥ अर्कोन्मत्तमुनिब्रह्मतरुपुष्पैरु-तूद्भवैः ॥ पूजयेत्परया भक्त्या हनुमंतेश्वरं नृप ॥ घृतेन बोधयेद्दीपं तिलतैलेन वा पुनः ॥ रात्रौ जागरणं कृत्वा गीतवाद्यक-थानकैः ॥ स्नात्वा प्रभाते विमले श्राद्धं कुर्यात्प्रयत्नतः ॥ पितॄनुद्धर्तुकामस्तु ब्राह्मणैः वेदपारगैः ॥ ब्रह्मलक्षणसंपूर्णैः कुलजैर्गृह शालिभिः ॥ यावते ग्रसते ग्रासान् हव्यकव्येष्टमंत्रवित् ॥ तावते ग्रसते प्रेत्य दीप्तान् स्थूलानयोयुजन् ॥ तांश्चैव पूजयेद्भक्त्या वस्त्रान्नकनकैरपि ॥ उपानच्छत्रिकादडं तांबूलैश्चंदनादिभिः ॥ नरकस्था दिवं यांति पितरस्त्वित्युदीरयेत् ॥ स्वर्गस्थाः परमं लोकमित्युक्त्वा प्रणमेद्द्विजान् ॥ पतितान् वर्जयेत्पार्थ वृषलीपतितानपि ॥ स्वं वृषं यापरित्यज्य वृषैरन्यैर्वृषायते ॥ वृषलीं तां विदुर्देवा न शूद्री वृषली स्मृता ॥ ब्रह्महत्यादि पापानि मित्रद्रोहादिकानि च॥हनुमंतेश्वरे पार्थ नश्यंतीत्यब्रवीच्छिवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 वाक्प्रलापेन किं पार्थ बहूनोक्तेन सांप्रतं ॥ सर्वपापयुतो वापिदद्याद्दानं द्विजोत्तमे ॥ गोदानं च प्रकर्तव्यमस्मिंतीर्थे विशेषत: ॥
गोदानं हि यतः पार्थ सर्वदानाधिकं स्मृतं ॥ व्रततीर्थादि पुण्यानां सर्वसंपूर्णताकरं ॥ कृछ्रादि नियमानां च सिद्धिसंपादकं
परं ॥ सर्वदेवमया गावः सर्वेदेवास्तदात्मकाः ॥ समासात्कथ्यते पार्थ गवामंगाधिदैवतं ॥ शृंगाग्रयोर्महीपाल सिद्धो वसति नि-
त्यशः ॥ उरस्कंदः शिरो ब्रह्मा ललाटं वृषवाहनः ॥ चंद्रार्कौ लोचने देवौ जिव्हा देवी सरस्वती ॥ मरुद्गणस्तथा साध्या
दंतानाश्रित्य वै स्थिताः ॥ हुंकारं चतुरो वेदाः सषडंगपदक्रमाः ॥ ऋषयो रोमकूपस्था शुभाशुभनिरीक्षकाः ॥
चत्वारः सागराः पुण्या यस्यौधसिचसंस्थिताः॥विष्णुः पुच्छं च तीर्थानि योनौ मूत्राश्रितानि च ॥ अश्विनौ च तथा कर्णौ शृंगम
ध्ये प्रजापतिः ॥ पृथिव्यां सागरांतयां यानि तीर्थानि पांडव ॥ तानि तीर्थानि जानीयाद्गवां गव्येषु नित्यशः ॥ युधिष्ठिर उवाच ॥
सर्वतीर्थमया धेनुः गीर्वाणैः समलंकृता ॥ एतत्कथय मेतात कस्माद्भावः श्रिताश्च तैः ॥ मार्कंडेयउवाच ॥ सर्वदेवमयो विष्णुर्गावो वि-
ष्णुशरीरजाः ॥ देवास्तदुद्भवास्तमात्कल्पिता बहूधा जनैः॥गवां हि बहुधोत्पत्तिस्तां शृणुष्व नराधिप ॥ श्वेताविष्णुसमीपे तु क्षी-
राब्धिमथनोद्भवा ॥ रक्ता सूर्यसमुद्भूता पाटला वन्हिसंभवा॥कपिला सर्वदेवैश्च विष्णुविष्णवर्कपातकैः॥दिक्पालैर्लोकपालैश्च ऋषि-
भिर्ब्राह्मणैः सह ॥ सर्वैः संभूय यागार्थे वान्हेरुत्पादिता पुरा॥तस्मात्पवित्रा पुज्या च कपिला वै विशेषतः ॥ यथैवैकादशी पुण्या
सिता वा प्यसितापिवा ॥ तथा गावः सदा पुण्या नानावर्णाश्च सर्वशः ॥ श्वेता वा कपिला वापि क्षीरिणी पांडुनंदन ॥ सवस्त्रा
च सुशीला च सितवस्त्रावगुंठिता ॥ सकांस्यदोहना देया स्वर्णशृंगादिभूषिता ॥ हनुमंतेश्वरस्याग्रे भक्त्या विप्राय भारत ॥ निय-
मस्थेन सा देया आत्मनः श्रेयईच्छता ॥ नसमर्थो यमस्तेषां विष्णुरुद्रवयायिनां ॥ पुण्यलोकाच्च्युतः सोपि जायते शिवमानसः ॥
विप्रोत्तमजले पुण्यो विद्वान् विभवसंयुतः ॥ धर्मभिज्ञस्तथा दाता शतं वर्षाणि जीवती ॥ सर्वपापहरं तीर्थं हनुमंतेश्वरं नृप ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृण्वन् विमुच्यते पापाद्वर्णसंकर संभवात्॥दूरस्थश्चिंतय न्यस्तु सोपि सद्गतिभाग्भवेत्॥इति श्रीवायु०शिवसंहितायां नर्मदा० दक्षि-
णे हनुमंतेश्वरतीर्थनाम षष्ठशततितमोऽध्यायः ॥ १०६ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र पूतिकेश्वरमुत्तमं ॥ क्रोशां-
तरे स्थितं पार्थ हनुमंतेश्वराच्छुभं ॥ नर्मदादक्षिणे कूले सर्वपापक्षयंकरं ॥ यत्स्थापितं जांबुवत्याल्लोकानां हितकाम्यया ॥ लंकायां
वै पुरा वृत्ते युद्धे वानररक्षसां॥रामसीतानिमित्तेषु रक्षाणां च युधिष्ठिर ॥ तदा सीतायुतो युद्धे दिव्यास्त्रे क्षतवक्षसः॥जांबुवद्धृदये जा-
तो ह्यस्त्रव्रणकदंबकः॥संरूढोप्योषधीभिर्यः पैनाकास्त्रकृतोव्रणः॥स एकःपक्षपक्षादौ जायते रुह्यते पिच॥दुर्गंधपूतिमान्पार्थवृद्धत्वाच्च वि
शेषतः ॥ तेनाक्रांत इहायातो जांबुवान्नर्मदातटं ॥ सहितो रामसैन्येनऋक्षराट्व्रणपूतिमान् ॥ तत्र रेवांभसि स्नात्वा शिवं त-
द्वन्निवेश्यच ॥ सुषेण नीलसहितस्तपस्तेपे समाहितः ॥ लिंगद्वयं तदा ताभ्यां स्थापितं तस्य सन्निधौ ॥ सायं प्रातः प्रति दि-
नं स्नात्वा पूजयतीश्वरं ॥ ततः कश्चिदहोभिःससंप्रतुष्टः शिवः शिवः ॥ वरं ददौ जांबुवतो व्रणनाशं शिवां गतिं ॥ आजन्मसं-
चितात्पापाद्विशुद्धिं च महेश्वर ॥ पूतिनाशेच्छया यस्मात्पूजितः परमेश्वरः ॥ पूतिकेश्वरनाम्ना सौ कृता वानरपुंगवे ॥ पूत्या
दुर्गंधया यस्मात्परिक्षिप्तः स जांबुवान् ॥ तदा सुवानरैः सर्वैरुक्तं पूतिकसंज्ञया ॥ ततश्चारुशरीरश्च व्रणनाशाद्बभूव ह ॥ तत्र
तीर्थे नरः स्नात्वा निर्व्रणो जायते सदा ॥ जांबुवत्स्थापितं लिंगं पूतिकेश्वरसंज्ञकं ॥ भक्त्या यः पूजयेद्भूप सप्तजन्मानि
निर्व्रणं ॥ यस्तत्र मनुजो भक्त्या संस्नायात्पांडुनंदन ॥ सर्वान्कामानवाप्नोति न ते यांति यमालयं ॥ इति पूतिकेश्वरतीर्थ-
नाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र सर्वत्तीर्थोत्तमोत्तमं ॥ रेवाया उत्तरे कुले सोमेश्वरमिति श्रुतं ॥ आश्चर्यभूतं
लोकेस्मिन् नर्मदायापुरातनं ॥ ब्रह्महत्याहरं तीर्थं प्रयागे न समं हि तत् ॥ युधिष्ठिर उवाच ॥ आश्चर्यं कथ्यतां तातयद्वृत्तं
नर्मदातटे ॥ प्रयागेन समं कस्मादेतत्कथय मे प्रभो ॥ निमग्नो दुःखसंसारे हृतराज्यो महामुने ॥ युष्मद्वाक्जलस्नातो लप्स्येसौ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वयं सबांधवः ॥ श्रीमार्कंडेय उवाच ॥ साधु साधु महाबाहो सोमवंशविभूषण ॥ पृष्टोतिदुर्लभं तीर्थंगुह्याद्गुह्यतरं नृप ॥ सो-
मनाथमिदं तीर्थं कथयिष्यामि विस्तरात् ॥ आदौ पितामहस्तावत् सर्वस्य जगतः प्रभुः ॥ मानसा स्तस्य संजाता दशैव मुनि-
पुंगवाः ॥ मरीचिमैत्र्यंगिवस्यैपुलस्त्यःपुलहः क्रतुः ॥ प्रचेतश्च वशिष्टश्च भृगुर्नारद एव च ॥ जज्ञेप्रचेत्तसो दक्षो महातेजाः प्रजाप-
तिः ॥ दक्षस्यापि तथा जाताः पंचाशत्पुत्रिकाः किल ॥ ददौ स दशधर्माय कश्यपाय त्रयोदश ॥ तथैव स महाभागःसप्तविं-
शतिमिदवे ॥ रोहिणीनाम यातासामभिष्टा शशिना सदा ॥ अन्ये षांपुत्रिकास्नेहात् शप्तो दक्षेण चंद्रमा ॥ त्यक्त्का सर्वासुता-
स्यत्वं राहिणीं यन्निषेवसे ॥ भविर्ष्यसि क्षयी तस्माद्वपुषा मूढसत्वरं ॥ इति दक्षेणशप्तः सलज्जितः शापपीडितः ॥ क्षयरोग-
भवश्चंद्रो वचनांते प्रजापतेः ॥ दक्षः शापप्रभावेन निस्तेजाः शर्वरीपतिः ॥ गतः पितामहं सोमो वेपमानो नृपोत्तम
॥ पद्मयोने नमस्तुभ्यं वेदगर्भ पितामह ॥ त्राहि मां तात देवेश शरणार्थिनमागतं ॥ ब्रह्मा उवाच ॥ तेजसां
च रसानां च पतिस्त्वं मृगलांछन ॥ त्वमुद्विग्नमनास्तात संजातः केन हेतुना ॥ सोम उवाच ॥ दक्षशाप
प्रभावेन पीडितोहं जगत्पते ॥ निस्तारस्तस्य शापस्य कथ्यतां मे पितामह ॥ ब्रह्मा उवाच ॥ देहि दक्षस्य
चंद्रस्य दत्ते शापेप्यनुग्रहं ॥ यो वै शापसमर्थः स्यात्तेनैवानुग्रहो भवेत् ॥ दक्ष उवाच ॥ त्वमेव जगतां नाथो मर्यादा-
स्थापकः पुरा ॥ त्वमेव गुरुरस्माकं यथा साधु तथा कुरु ॥ ब्रह्मा उवाच ॥ वत्स सोम स्वयंसर्वा भार्या यत्र निषेवसि ॥ दक्ष-
शापकृतं चिन्हं शरीरात्तेन यास्यति ॥ सत्वैवं त्वं पुरा प्राप्तपापतापापहं तपः॥कुरुष्व नर्मदातीरे यजन्योगीश्वरं शिवं ॥तिस्रो गंगाः
परिख्याताः पृथिव्यां पापनाशनः ॥ ब्राह्मी च वैष्णवी रौद्री न भेदस्तासुपुत्रक ॥ ब्राह्मी मत्संभवा देवी साक्षादृग्वेदजो रसः ॥
सरस्वती जगद्वंद्या विश्वपापौघनाशनी ॥ भारते मध्यगंगेति प्रोक्ता संगमचारिणी ॥ ऋग्वेदोयं द्रवी भूतो भारते यन्मुखाद्विधा ॥

CC-0. In Public Domain. Digitization by eGangotri

तथा दिव्यसरित्पुण्या वैष्णवी पापनाशनी ॥ विष्णुपादसमुद्भूता रहस्यंयजुषांपरं ॥ त्रैलोक्यचारिणी शक्तिः साक्षाद्धर्मद्रवोविधो ॥ ख्याता सोत्तरगंगेति देवी दैत्यविनाशनी ॥ शृंगारहारः सरितां भाति भारत भूमिपु ॥ पापाब्धिमग्नजंतूनामवलंबनवल्लिका ॥ तथा रुद्रो द्भवा राजन् राजते सरिदुत्तमा ॥ सामवेदरसोद्भूतामिलातलामिळन्महं ॥ चिरं बहुचरित्रा सा देवी दुखौघनाशनी ॥ ख्याता दक्षिणगंगेति नर्मदाश्रितशर्मदा ॥ नाना विधानि पापानि नाना भेदभवानि च ॥ आर्द्रा शुष्कलघुस्थूलचतुर्धा संस्थितानि च ॥ देशकालवयोवस्था देहाज्ञान ततानि च ॥ लोकानां तु सशोकानां निभृतान्यपि भानुमत् ॥ संस्मतां संश्रिता दृष्टा पृष्टा स्नाता च कीर्तिता ॥ रेवावखंडयेत्तानि षड्भिर्भावैर्द्विजाधिप ॥ नरकाब्धेर्ययं येषां त्रासो येषां यमादपि ॥ ये भवादुद्विजंतीह ते भजंतु सरिद्वरां ॥ यथा हि पुरुषो देव स्त्रित्वमाप सलीलया ॥ त्रिभागोप्यभवद्देदः सरिदेषा त्रिवर्गता ॥ त्रिकेपि नर्मदादेवी नरकद्वेषिणी नृणां ॥ कलौ रेवा सितासेवा त्यलंवक्तुं न पार्यते ॥ सर्वत्र दुर्लभा रेवा त्रिषु स्थाने विशेषतः ॥ ॐकारे च भृगुक्षेत्रे नर्मदा उरिसंगमे ॥ तत्र गच्छ ग्रहश्रेष्ठ रेवाया उत्तरे तटे ॥ स्मृतो गुप्तप्रयागेसौ यत्र रेवोरिसंगमः ॥ वाष्टावस्थां गतः सोमो ध्यायन्वै कामनाशनं ॥ नित्यं संगमतोयाशी स्नात्वा पूजयतीश्वरं॥यावत्खट्वांधरो मुंडमालाविभूषणः॥ द्वीपिचर्मपरिधानो गजचर्मोत्तरीयकः ॥ सर्पाहितेजटाजभारे वृषारूढस्त्रिलोचनः ॥ उमार्द्धांगधरो देवो भक्तालीकाभयप्रदः ॥ श्रीमार्कंडेय उवाच ॥ दृष्ट्वा तमीश्वरं देवं चंद्रार्बुदसमुज्वलं ॥ साष्टांगं च ततो भूत्वा स्तुतिं चक्रे समाहितः ॥ चंद्र उवाच ॥ जयशंकर सर्वेश जयपापहराव्यय ॥ जयेश्वर जगन्नाथ जयवासुकिभूषण ॥ जयशूलकपालाढ्य मुंडमालाविभूषण ॥ जयदैत्याटवीदाव जयांधकविनाशन ॥ जयकालस्वरुपाद्य कालकंठजलोजिन ॥ मंगलामंगलैर्भावैर्भूषितांग सनातन ॥ जयत्वं व्रतिनामीश जययोगीश दुःसह ॥ अणिमाद्यष्टसिद्धिनामीश श्रीश प्रियोद्वत ॥ निरंजन निराकार निर्वाणामेयभूतिद ॥ विश्वादिस्त्वमनादिस्त्वं निगमसेव्यमेवच ॥ हरस्त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 शंकरस्त्वं च त्वमेव जगतां गुरुः ॥ ज्ञानदो ज्ञानगम्यस्त्वं ज्ञानी ज्ञानवतां पतिः ॥ वेदो न वेत्ति यं साक्षात्तमनिंद्रियगोचरं ॥
 किं ब्रवीमि कथं स्तौमि का शक्तिः काप्रजल्पता ॥ यत्र ब्रह्मादयो मूढाः परिज्ञाने भवाखिल ॥ नमस्ते केवलं तत्र नमस्तेस्तु
नमोनमः ॥ श्रीमार्कंडेय उवाच ॥ एवं स्तुतो महादेवस्तत्रसोमेन पांडव ॥ तुष्टः प्रोवाच तं शंभुरुमयासह भारत ॥ महेश उवाच ॥
वरं प्रार्थय मे चंद्र यस्ते मनसि रोचते ॥ साधु प्रीतः स्तवं स्तुत्या तपसा तोषितश्च ते ॥ सोम उवाच ॥ दक्षशापेन दग्धोहं
क्षीण शंभो महेश्वर ॥ शापस्योपक्षमं देव कुरु सर्वं मयि प्रभो ॥ ईश्वर उवाच ॥ तव भक्तिगृहितोस्मि तुष्टोहमुमया सह ॥ निः
पापः शापनिर्मुक्तः संजातः तीर्थसेवनात् ॥ मत्प्रसादाच्च त्वं सोम वर्द्धते क्षियते पुनः ॥ दिनमेकक्षयो जातः स्वयंभूर्वचनंयथा ॥
चंद्र उवाच ॥ स्थापितस्त्वं मया भक्त्या संगमे पापनाशने॥आकल्पं मम नाम्ना त्वं स्थिरो भवतुहेतवे ॥ महेश उवाच ॥ सोमेश्वरेति
ते नाम्ना ख्यातिं यास्ये जगत्रये ॥ येस्थितोस्मिह कल्पांतं लोकानां वांछितप्रदः ॥ रमाम्यत्र सदा सोम संगमे सरितो सुखं ॥ सा-
र्धंगिरिजया राजविशेषात्प्रार्थितस्त्वया ॥ संगमा बहवः संति सरितां रेवयासह ॥ रेवोरिसंगमस्ते मनास्ति संगमजत्वया
॥ जान्हवीयमुनायोगे प्रयागे वै यथोत्तरं ॥ रेवोरिसंगमसोमनास्तिसंगमजत्वया ॥ जान्हवीयमुनायोगे प्रयागो वै यथोत्तरे ॥
रेवोरिसंगमस्तद्वत्प्रयागो दक्षिणः स्मृतः ॥ इह ब्रह्मा तपस्तेपे लोकसृष्ट्यर्थ माहितः ॥ ईजे सबहुभिर्यज्ञैः सिध्यर्थं
सृष्टिकर्मणः ॥ तथोत्तरे प्रयागे वै तपोयज्ञादिकं व्यधात् ॥ लोकोपद्रवशांत्यर्थं प्रजासर्गचिकीर्षया ॥ सवाहनायुधगणोनि-
वसामी नदीतटे ॥ स्तुतिमेतां त्वयो द्गीतां ममप्रीतिविवर्धनीं॥ ये पठिष्यंति मनुजास्तेषां सिद्धिर्भविष्यति ॥ इत्युक्त्वांतर्दधे
देवस्तत्रैव नृपसत्तम ॥ क्षणं विधुरपिध्यात्वा तल्लिंगे लीनमीश्वरं ॥ सोमेन स्थापितं लिंगं प्राणिनां सिद्धिदं भुवि ॥ सर्वदुःखहरं
शश्वद्ब्रह्महत्याविनाशनं ॥युधिष्ठिर उवाच॥सोमनाथप्रभावोयं संक्षेपात्कथितस्त्वया ॥ दुःखार्णवनिमग्नानापोतभूमहार्णवे ॥ श्रीमार्कं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डेय उवाच ॥ पुनस्तीर्थप्रभावं ते संक्षेपाद्वच्मि तं शृणु ॥ यद्वृत्तमुत्तरे कूले पार्थरेवोरिसंगमे ॥ शंवरो नाम राजासीत् सूर्यवंशसमुद्भवः ॥ मनोर्द्वादशमः श्रीमान् प्रतिशास्तासमुद्भवः ॥ उत्तार रवितो वीरस्तस्य पुत्रस्त्रिलोचनः ॥ त्रिलोचनसुतः कण्वः पापर्द्धिं सनिषेवते ॥ वने सविचरन्वीरो मृगयूथं ददर्शह ॥ हतं च तेन तद्यूथं त्रिलोचनसूतेन वै ॥ ब्रह्मर्षिर्मृगरुपेण तन्मध्ये चरतींदुजः ॥ हाहतस्तेन संगेन कण्वेन नृपपुंगव ॥ ब्रह्महत्या युतकण्वो निस्तेजाः क्रूरजः सुख ॥ योभिदुर्गंधो विमूढो व्यचरत्समहीतले ॥ त्यक्तभृत्यमृगव्याधएवत्यक्तपारिछदः ॥ सर्वतो विचरन् प्राप्तो नर्मदातीरमुत्तमं ॥ वीक्षन्वनानि वन्यांश्च वीरो मृगविहंगमान् ॥ तीर्थं सोमेश्वरं प्राप्तो राजा रेवोरिसंगमे ॥ किंशुकाशोकबहुले जंवीरपनसाकुले ॥ कदंबपाटलातिंदुबिल्वनारंगशोभिते ॥ चिंचिणीपंचकोपेते बकुलाम्रवटान्विते ॥ मुनिकेसरकर्कंधुमधुकाश्वत्थसंकुले ॥ आम्रातककपित्थादि तरुखेडाभिमंडिते ॥ तुष्टपुष्टमृगाकीर्णं वनं सर्वत्रशोभितं ॥ चित्रकैर्मृगमार्जारैः सिंहैःशबरशूकरैः ॥ गोधाशशकसंयुक्तं कोकिलाबर्हिनादितं ॥ प्रविवेश वनं कण्वः तृषार्त्तः श्रमवर्जितः ॥ अन्वितः किंकरैः कैश्चिदेको राजा जलं ययौ ॥ स्नातो रेवाजले पुण्ये संगमे पापनाशने ॥ तेनार्चितस्तथा भक्त्या सोमनाथो युधिष्ठिर ॥ पीत्वा विमिश्रितं तोयं सर्वपापक्षयं करं॥ फलानि च विचित्राणि भक्षयामास पार्थिवः ॥ सुप्तछायां तरोः प्राप्य श्रांतो मृगवधेन तु ॥ तावत्तीर्थवरे प्राप्तः स्नानार्थं संगमे द्विजः मार्गस्छं ब्राह्मणं दृष्ट्वा श्रद्धालुं तं वनांतगाः ॥ अबला तमुवाचाह तिष्ठ तिष्ठ द्विजोत्तम ॥ त्रस्तो निरीक्षते यावद्दिशः सर्वा द्विजोत्तमः॥ ताव द्वृक्षसमारुढां स्त्रियं रक्तांबरावृतां ॥ रक्तमाल्यां च रक्ताक्षां रक्तचंदनचर्चितां ॥ रक्ताभरणशोभाढ्यां पाशहस्तां ददर्श तां ॥ संदेशः श्रूयतां विप्र यदि गच्छसि संगमे ॥ सा त्वं प्रतीक्षते नूनमित्याहूयाततं वद ॥ इत्याकर्ण्य वचो विप्रः संगमे सुरदुर्लभे ॥ योषिद्वाक्यात्समागम्य यावत्पश्यति सर्वतः ॥ वृक्षच्छायाश्रितः कण्वो दृष्टो विप्रेण तावता ॥ ब्राह्मण उवाच ॥ नान्यं पश्यामि तीर्थेस्मिन् त्वत्ततः पुरुषसत्तम ॥ वक्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रृणु मे शिघ्रं यदि जानासि किंचन ॥ वनांते नैवमा दृष्ट्वा बाला रुधिरलोचना ॥ रक्तांबरधरा क्षामा रक्तचंदनचर्चिता ॥
रक्तमाल्यसुशोभाढ्या पाशहस्ता मृगेक्षणा ॥ वृक्षारूढा वदद्वाक्यं भर्ता मे प्रेष्यतामिति ॥ कण्व उवाच ॥ कस्मिन्स्थाने स्थिता
विप्र किंस्थिता नागतानु किं ॥ कस्य साकेन कार्येण वद सर्वमिदं द्विज ॥ ब्राह्मण उवाच ॥ आर्द्धक्रोशे संगमात्सा वनांते
पश्चिमे स्थिता ॥ संदेहः कथितस्तस्या मया ते नरसत्तम ॥ मार्कंडेय उवाच ॥ वचनाद्ब्राह्मणस्यैव कण्वेनालोच्य तत्वतः ॥
भृत्येकः प्रेषितस्तत्र संदिश्य वनमध्यतः ॥ कण्व उवाच ॥ गच्छ त्वं ब्रूहि तां नारीं कुतस्त्वं क्व गमीष्यसि ॥ तेनैव प्रेषितो दूतो
गतःस्त्रीपार्श्वमाशुगः ॥ वृक्षस्थां च स तां दृष्ट्वा उवाच नृपसत्तम ॥ दूत उवाच ॥ मत्स्वामी पृच्छते भीरु कुतस्त्वं क्व गमिष्य-
सि ॥ ब्रह्महत्या उवाच ॥ गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनां ॥ इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः॥ मृगरूप
स्य तु मुनेर्वधादहमिमां श्रिता ॥ ब्रह्महत्याभिधानां मां किं न जानात्यसौ पतिः॥ अर्धक्रोशे तु मां मुक्त्वा निःस्नेहात्किं बिलंबसे॥
प्रवेशं नलभाम्यत्र दूतवर्य करोमि किं ॥ अर्धक्रोशमिदं क्षेत्रं समंताद्दूतसत्तम ॥ ब्रह्महत्यादि पापानि प्रवेष्टुं न भवंति हि ॥
ख्यातःशिवप्रदातोयं शिवगंगोत्तरे तटे ॥ सोमनाथः शिवो यत्र यत्र दक्षिण जान्हवी ॥ उदग्प्रवाहसंश्रिष्टा गुप्ता यत्र सरस्वती ॥
चिरं तेन स्थितिः कार्या सोमतीर्थे नराधिप ॥ गच्छेवं ब्रूहि राजानं शीघ्रं प्रेषय मां प्रति ॥ श्री मार्कंडेय उवाच ॥ गतो दूत
स्ततः शीघ्रं श्रावयामास तं नृप ॥ समस्तं विस्तरात्तस्या यद्वृत्तांतं पुरातनं ॥ तस्यवाक्यादसौ राजा मूर्छितः पतितो भुवि ॥ त
तो भृत्यस्तमाश्वस्य पुनरुत्थाय चाब्रवीत् ॥ भृत्य उवाच ॥ कस्मात्त्वं शोचसे नाथ पूर्वोपात्तं शुभाशुभं ॥ यथार्जितं हि भोक्त
व्यं उपायं वा विचिंतय ॥ ॥ श्री मार्कंडेय उवाच ॥ इत्याकर्ण्य वचस्तस्य कण्वो वाक्यमथाब्रवीत् ॥ प्राणत्यागं करिष्यामि
सोमनाथसमीपतः॥ शीघ्रमानीयतां वन्हिरिंधनं च तथाबहु ॥ तेनानीतं ततः सर्वं नृपवाक्यात्क्षणादिव ॥ स्नात्वा कण्वेन कौंतेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संगमे पापनाशने ॥ पूजितः परया भक्त्या देवः सोमेश्वरो नृप ॥ प्रदक्षिणं ततः कृत्वा ज्वलंतं जातवेदसं ॥ प्रक्षिप्तमात्मनात्मा
नं वन्हौ ध्यात्वा जनार्दनं ॥ पीतांबरधरं देवं किरीटांगदभूषितं ॥ श्रिया युक्तं सुवर्णस्थं शंखचक्रगदाधरं ॥ सुरारिसूदनं सौम्यं सद्ग-
तिर्मे भवेदिति ॥ ॥ वासुदेव जयानंत विश्वात्मन् पापनाशन ॥ नारायणारविंदाक्ष विश्वरूपाच्यूतेश्वर ॥ ब्रह्मरुपस्त्वमेवासि त्व-
मेव शिवरूपधृक् ॥ त्वयैतव्द्याप्तं कृत्स्नं तत्त्वां याचे प्रसीद मे ॥ पुरेदं श्रूयते लोके दत्तो मोक्षमधोक्षज ॥ हरन्नघं हरिन्नृणां
तत्वां याचे प्रसीदमे ॥ जन्मप्रभृति पापानि यावदद्यादिनं विभो ॥ आर्द्रशुष्कलघुस्थूलज्ञानाज्ञानततानि च ॥ ब्रह्महत्यादि
मुख्यानि तृणच्छेदांतकानि च ॥ वाङ्मनःकायजानिस्थुर्विहितानि मया किल ॥ तेभ्यो मे सर्वपापेभ्यो देहि मोक्षमधो
क्षज ॥ इत्युक्त्का भूपतिर्वन्हौ प्रविवेश समाहितः ॥ स्वामिधर्माश्रिताः सर्वे पेतुस्तदतु किंकराः ॥ ज्वलमानस्ततो
वन्हौ पुष्पवृष्टिः पपात खात् ॥ साधु साध्विति ते देवाः प्रशसंसुर्नृपं मुदा ॥ ऋषयः सिद्धगंधर्वाश्चारणा दिवि
संस्थिताः ॥ प्रशशंसुश्च तं कण्वं प्रविष्टं जातवेदसं ॥ आगतानि विमानानि समारुह्यार्कसप्रभाः ॥ निः पापास्ते
दिवं याता तीर्थस्यास्य प्रभावतः ॥ स च विप्रस्तदाश्चर्यं दृष्ट्वावाप चमत्कृतिं ॥ कृतनित्यक्रियस्तीर्थात् ययौ ध्याय-
न्वृषध्वजं ॥ श्रीमार्कंडेय उवाच ॥ संगमे सोमनाथस्य प्रभावोयं युधिष्ठिर ॥ महात्म्यं च विधानं च शृणुध्वेकाग्रकं नृप ॥
अष्टम्यां च चतुर्दश्यां दिने चरविसोमयोः ॥ विशेषात्शुक्लसप्तम्यां रविवारोयदा भवेत् ॥ तदोपोष्य नरो भक्त्या रवौ कुर्वीत
जागरं ॥ पंचामृतेन गव्येन स्नापयेत्परमेश्वरं ॥ श्रीखंडेन सुगंधैश्च पुष्प धुपादिभिर्यजेत् ॥ घृतेनबोधयेद्दीपं गीतं नृत्यं च कारये-
त् ॥ प्रभाते च पुनः पार्थ स्नात्वा श्राद्धं समाचरेत् ॥ तत्र संपूजयेद्विप्रानात्मज्ञान् जितमत्सरान् ॥ शुचीनानिंद्यानव्यंगान् वि-
द्यावृत्तविभूषितान् ॥ सत्यशीलगुणग्राह्यान्स्वदारपरिपालकान् ॥ गायत्रीसारतत्वज्ञान् विकर्मविरतान्सदा ॥ अंत्या पुनर्भू वृषली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्वेदस्य मंदिरे ॥ दूरतः स द्विजस्त्याज्यो यदीच्छेच्छ्रेय आत्मनः ॥ पितुर्गृहे या कन्या रजः पश्यत्यसंस्तुता ॥ सा कन्या वृषली ज्ञेया ॥ हीनांगानतिरिक्तांगान् येषां पूर्वापरं नहि ॥ व्रते श्राद्धे तथा दाने ते वर्ज्या ब्राह्मणा बुधैः ॥ अयःपिंडसमा विप्रा वृत्तस्वाध्यायवर्जिताः ॥ दातारमात्मना सार्द्धं तारयंति सुखेन हि ॥ श्राद्धं सोमेश्वरे तीर्थे यः कुर्याद्गतमत्सरः ॥ आकल्पं पितरस्तस्य लभंते तृप्तिमक्षयां ॥ अन्नं वस्त्रं हिरण्यं च यो दद्यादग्र्यजन्मने ॥ स याति शांकरं लोकमिति मे निश्चितं वचः ॥ हयं ददाति यस्तत्रसंपूर्णं तरुणं सितं ॥ रक्तं वासितवर्णं वा सर्वलक्षणसंयुतं ॥ सदक्षिणोपस्करं तु विधिना सद्विजे नृप ॥ कुंकुमेन विलिप्तांगावग्र्यजन्मदयो तथा ॥ स्रग्दामभूषितौ कुर्यात्सितवस्त्रावगुंठितौ ॥ प्रक्षाल्य पादौ विप्रस्य दद्यादुदकपूर्वकं ॥ स्कंधे मे चरणं दत्वा द्विजेंद्र हयमारुह ॥ आरूढे ब्राह्मणे ब्रूयाच्छिवः संप्रीयतामिति ॥ श्रीमार्कंडेय उवाच ॥ स प्रयातीश्वरे लोके सर्वाशुभविवर्जिते ॥ शिवलोकाच्च्युतः सोपि राजा भवति धार्मिकः ॥ तस्य वंशे सदा राज्यं न नश्यति कदाचन ॥ दीर्घायुर्जायते पुत्रो भार्या च वशवर्तिनी ॥ जीवेद्वर्षशतं साग्रं सर्वदुःखविवर्जितः ॥ न रोगो न च दौर्भाग्यं न च शत्रुभयं क्वचित् ॥ चंद्रोपरागे तीर्थेस्मिन्यो गच्छेद्विजितेंद्रियः ॥ सोपवासो जितक्रोधो धेनुं दद्या द्विजोत्तमे ॥ सवत्सां क्षीरणीश्वेतां सशीलां विधिवत् नृप ॥ शामलां पीतवर्णां वा धूम्रांगीं सवस्त्रकां ॥ श्वेतया वर्द्धते वंशो रक्ता सौभाग्यवर्द्धनी ॥ पीतवर्णा च दुःखघ्नी शबला संततिप्रदा ॥ पापघ्नी श्वैव धूपांगी नीला दुर्गतिनाशनी ॥ कपिला नाशयेत्पापं जन्मक्षित्रीकृतं क्रमात् ॥ सत्यलोकमवाप्नो गोप्रदायी नरेश्वर ॥ पक्षांते च व्यतीपाते वैधृते रविसंक्रमे ॥ दिनक्षये रविछाया ग्रहणे चंद्रसूर्ययोः ॥ ये व्रजंति शुभे तीर्थे संगमे सुरदुर्लभे ॥ मृदावगुंठ्यं चात्मानं संगमे यो नरो विशेत् ॥ जपन् जलांतद्रुपदां प्राणायामरूथापिवा ॥ गायत्रीं वैष्णवीं सौरीं शैविं चापि यदृच्छया ॥ येपि पापैः प्रमुक्ताः स्युरिति शंभुः स्वयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदा ॥इतिश्रीवायुपुराणे नर्मदा० उत्तरेरेवोरीसंगमोपाख्यानेनंदातीर्थोनामअष्टशततितमोध्यायः ॥ १०८ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र स्थापितं तीर्थमुत्तमंतँ ॥ संगमस्य समीपस्थं रेवाया उत्तरेतटे ॥ हव्यवाहेन राजेंद्र स्थापितः पिंगलेश्वरः ॥ युधिष्ठिर उवाच ॥ हव्यवाहेन देवेश स्थापितः शंकरः कथं॥तदाख्याहि मुने सर्वं प्रसादा द्विजपुंगव ॥मार्कंडेय उ०॥ रममाणे पुरा देवी प्राप्तसौख्ये महेश्वरे॥निर्विचेष्टं जगत्सर्वं शून्यभूतं तदाभवत् ॥ निःक्रियं निर्विकल्पं च निःस्वाध्यायं विमूढवत् ॥ तदा संप्रेरितो देवैः क्षोभार्थे पावकः शिवे ॥ वन्हिः कपोतरूपेण जालांतर गतिर्गतः ॥ दृष्टः कपोतः शर्वेण संप्राप्तः शयनांतिके ॥ तदा स्वरेतसा राजन् तर्पितो हव्यवाहनः ॥ रेतो वन्हिमुखे क्षिप्तं रुद्रेणा मिततेजसा ॥ रुद्ररेतः प्रदग्धोग्निः प्रत्यहं पिंगलोभवत् ॥ सागरांश्च नदीः सर्वास्तीर्थयात्राक्रमाद्गतः ॥ चकार परया भक्त्या ध्यायन्नुग्रं हुताशनः ॥ तावत्तुष्टो महादेवो वरदो वाक्य मब्रवीत् ॥ महेश्वर उवाच ॥ हव्यवाह वरं ब्रूहि यस्ते मनसि वर्तते ॥ प्रीतोस्मि तवरौद्रेण तपसा वरदःस्थितः ॥ वन्हिरुवाच ॥ नमस्ते सर्वलोकेश उग्रमुर्ते सनातन ॥ रेतसा तव संदग्धः कुष्टी जातो महेश्वर ॥ शरीरार्थमहं क्लिश्ये संश्रीतो नर्मदातटं ॥ ईश्वर उवाच ॥ स्थापयित्वेह मां वन्हे निरोगस्त्वं भविष्यसि ॥ तव तीर्थे च मां भक्त्या पूजयिष्यंति ये नराः ॥ नीरोगास्ते भविष्यंति स्नानान्निःपापतां गताः ॥ इत्युक्त्वांतर्दधे देवस्तत्रैव नृपसत्तम ॥ हुताशनेन राजेंद्र स्थपितः पिंगलेश्वरः॥ पिंगकृत्वे शरीरस्य तेनासौ पिंगलेश्वरः॥ पूजयित्वा च तं भक्त्या निजं स्थानमुपागतः॥नरो यत्तेंद्रियस्तत्र उपावसं समाचरेत् ॥ अतिरात्रफलं तस्यदेहांते रुद्रलोकभाक् ॥ गुणान्विताय विप्राय कपिलां यः प्रयच्छाति ॥ अलंकृत्य सवत्सां तु सुशीलां रूपसंयूताम् ॥ सर्वपापविनिर्मुक्तः सगच्छेत्परमां गतिं ॥ इतिपिंगलेश्वरतीर्थनाम ॥ श्रीमार्कंडेय उवाच ॥ तस्यैवानंतरं पार्थ क्रमपंचाशतांतरे ॥ ऋणमोचनसंज्ञं तु गंतव्यं तीर्थमुत्तमं ॥ १ ॥ स्थापितं ऋषिसंघैस्तद्ब्रह्मवंशोद्भवैर्नृप ॥ ऋणमोचननाम्नावै रेवाया उत्तरे तटे ॥ षण्मासं यो नरो भक्त्या

CC-0. In Public Domain. Digitization by eGangotri

 तर्पयेत्पितृदेवताः ॥ विष्णुतर्पणमुख्येन श्राद्धं कुर्यात्त्वसंयतः॥ऋणत्रयविनिर्मुक्तो जायते स नसंशयः॥पितृदेवमनुष्याणां ऋणैरारम्-
 कृतैश्च यः ॥ बद्धः स मुच्यते स्नात्वा तत्क्षणान्नर्मदाजले ॥ तत्र तीर्थे च यो राजन् एकचित्तो जितेंद्रियः ॥ स्नानं श्राद्धं विधायादौ
 धेनुं दद्यात् ऋणांतकां ॥ सर्वोपस्करसंयुक्तां ब्रुवन्नेवं द्विजाय्यतः ॥ यद्दैविकं पैतृकं मे मानुष्यं यदृणं मयि ॥ तस्मादृणत्रयान्मो-
क्षं देहि देहि द्विजार्पिता ॥ इति दत्त्वा द्विजे धेनुं शक्त्या संतोषयेद्द्विजान् ॥ ऋणत्रयविनिर्मुक्तो स नाके मोदते चिरं ॥ प्रत्यक्षं
पातकं तत्र दृश्यते फलरूपतः॥ऋणमोचनतीर्थे वै तस्मादेतत्समाश्रयेत्॥इतिरेवामाहात्म्ये उत्तरे ऋणमोचनतीर्थनाम॥ श्रीमार्कंडेय
उवाच॥तथैवानंतरं पार्थ कपिलं तीर्थमाश्रयेत्॥धनुःशतत्रयं त तु ऋणमोचनतीर्थतः॥१॥कश्यपस्य सुतः पार्थ देवर्षिः कपिलः पुरा॥
तीर्थयात्राप्रसंगेन रेवातटमुपागतः॥दृष्ट्वा सितप्रदं स्थानमत्र पत्राशनस्थितः॥तपश्चचार सुमहत्तद्वत्तीर्थजलाशनः॥स्थापितं तेनतल्लिंगं
नाम्ना वै कपिलेश्वरं॥कपिलेन तदा तत्र सर्वपापविनाशनं॥अष्टम्यां च सिते पक्षे चतुर्दश्यां नरेश्वर ॥स्नापयेत्परया भक्त्या कपिला-
क्षीर सर्पिषा ॥ मधुना खंडयुक्तेन दध्ना रेवाजलेन च ॥कपिलेशं नृपश्रेष्ठ नरः संस्नाप्य भक्तितः॥चंदनेन सुगंधेन लेपयेत्परमेश्वरं ॥
भक्त्या वस्त्रैः सुगंधैश्च सितपुष्पैर्युधिष्ठिर ॥ येर्चयंतिजितक्रोधा न ते यांति यमालयं ॥ असिपत्रेवने घोरे यममार्गे सुदारुणं ॥ मुंचं-
ति दूरतस्ते वै कपिलेश्वरपूजनात् ॥ स्नात्वा रेवाजले पुण्ये ब्राह्मणान्पूजयेच्छुभान् ॥ गोहेमातिलवस्त्रान्नछत्रोपानहदानतः ॥
तत्र शय्याप्रदानेन राजा भवति धार्मिकः ॥ प्रतापवानरोगश्च जीवपुत्रप्रियंवदः ॥ न शत्रुः तस्य दौस्थ्यं वा जायते पांडुनंदन ॥
इति श्रीनर्मदामाहत्म्ये उत्तरेकपिलेश्वरतीर्थनामनवशततितमोध्यायः ॥ १०९ ॥ श्रीमार्कंडेय उवाच ॥ पार्थ सार्थकतां कर्तुं ज-
न्मतो यत्र गच्छति ॥ नरस्तच्छृणु मे पुण्यं वदतस्तीर्थमुत्तमं ॥ उत्तरे नर्मदाकूले वैष्णवंपापनाशनं ॥जलशायीति विख्यातं तीर्थं-
नारायणाह्वयं ॥ दानवानां वधं कृत्वासुप्तस्तत्र जनार्दनः ॥ चक्रं प्रक्षालितं तत्र देवदेवेन चक्रिणा ॥ सुदर्शनं वैविमलं रेवातो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदेत् ॥ सोमनाथस्य जगतीं यस्तु कुर्यात्प्रदक्षिणं प्रदक्षिणीकृतानेन सप्तद्वीपा वसुंधरा ॥ ब्रह्महत्या सुरापानं गुरुदारानिषेवणं ॥ स्वर्णस्तेयं भ्रूणहत्या तत्क्षणादेव नश्यति ॥ तीर्थाख्यानमिदं पुण्यं यः शृणोति जितेंद्रियः ॥ रोगार्तो मुच्यते रोगादरोगः श्रिय-माप्नुयात् ॥ यत्ते संदह्यते चेतः प्रभावं प्रति तच्छृणु ॥ एकापि नृपलोकेस्मिन्भ्रुणहत्या सुदुस्त्यजा ॥ किंतु षड्विंशतितास्तुताभि र्युक्तः शिशिनृप ॥ श्रूयते नृप पौराणी गाथा गीता महर्षिभिः ॥ लिंगं प्रतिष्ठितं ह्येतद्द्रशनूणघ्नपावनं॥अतो लिंगजयं सोम प्रभासे च तृतीयकं ॥ इति ते कथितं पार्थ तीर्थमाहात्म्यमुत्तमं ॥ धर्म्यं यशस्यमायुष्यं श्रुत्वा तीर्थफलं नृप ॥ एतत्ते सर्वमाख्यातं सोम-नाथस्य यत्फलं ॥ माहात्म्यं संगमस्यापि किमन्यच्छ्रोतुमिच्छसि ॥ इति श्रीवायुपुराणे चतुर्विंशतिसाहस्र्यां संहितायां शिवसूक्ते नर्मदामहात्म्ये उत्तरे सोमनाथतीर्थे रेवोरिसंगममाहत्म्यंनाम सप्तशततितमोध्यायः ॥ १०७ ॥ श्रीमार्कंडे उवाच ॥ ततो गच्छेत राजेंद्र नंदाऽन्हदमनुत्तमं ॥ क्रमविशांतरे पुण्यं नंदीतीर्थमिति स्मृतं॥ यदाप्रभृति सोमेशस्थापितो विधुना नृप ॥ तदाप्रभृति देवाश्च यक्षविद्याधरोरगाः ॥ अत्रागत्य तपस्तेपुर्विजयार्थं युधिष्ठिर॥लेभिरे ते च तां सिद्धिं वांछितां विजयादिकं ॥ मनुष्याश्च तपस्तप्त्वा दे-वत्वं प्रापुरीप्सितं॥इति ज्ञात्वा ततो दैत्यैर्दानवैरिह संगतैः ॥ सोमनाथाश्रितं क्षेत्रं प्राप्य पापैरुपद्रुतं ॥ देवैश्च विद्रुतं पूर्वं मनुजैश्च पलायितं ॥ शून्यं वै तत्कृतं तीर्थं तदा भारत दानवैः॥तस्मिन्नवसरे रुद्रः संतापमगमत्परं ॥ शक्तिमाद्यां ससस्मार देवीं देवारि-र्नाशिनीं॥स्मरणाद्देवदेवस्य साशक्तिरभवत्पुरः ॥ नानायुधधरा वंद्या वरदा सिंहवाहनी ॥ गणैश्च बहुभिः सार्द्धं तथा मातृगणान्वि-ता ॥ सवाहनायुधगणा ब्राह्मी मुख्यास्तथापराः ॥ क्ष्वेडनैः खेलनैश्चैव बुंबाचीस्कारहूंकृतैः ॥ धनुर्घोषैस्तथा स्फोटैर्हाकारैश्च सत्तम ॥ विहरंस्यः समायाता सुरारेः पुरतो नृप ॥ अचिंत्या परमा शक्तिर्वानीशजननी परा॥सा चोवाच महेशानं शिवं सुमधुराक्षरं ॥ शक्तिरुवाच ॥ ब्रूहि देव महारुद्र केनाहं चिंतिता त्वया ॥ किं ते ददाम्यिकं हन्मि मयि कं संगमाश्रितं ॥ दैत्यैश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानवैश्चैव मुछादितमुपाद्रुतं ॥ तस्मात्त्वं संस्मृता देवी दैत्यदानवनाशिनि ॥ तीर्थमेतन्महापुण्यं कृतंस्यादनुपद्रुतं ॥
देवर्षिपितृमर्त्यानां क्षेमं कुरु सनातनि ॥ महाशक्तिस्त्वमाख्याता आद्या क्षेमंकरीति च ॥ तस्मात्त्वां प्रार्थये तीर्थं
निर्विघ्नंस्यान्नृपोत्तम ॥ शक्तिर्मातृगणोपेता युयुधे दैत्यदानवैः ॥ यक्षरक्षपिशाचौघैस्तांश्च निन्ये यमक्षयं ॥ तीर्थं कृत्वा च
निर्विघ्नं नंदितो धूर्जटिस्तथा ॥ ऋषयः सिद्धसंघाश्चोतत्तीर्थमुपागताः॥महादेवश्च समागम्य तमूचुश्च परस्परं ॥ ऊचुस्तां विश्वजननीं
गणमातृगणान्वितां ॥ महादेव उवाच ॥ नमस्ते विश्वजननी विबुधारिविनाशनी ॥ देवि कल्याणि विर्याढ्ये कल्याणे वपुषि ध्रुवे ॥
कृतं साधु महाभागे तीर्थोपद्रवनाशनं॥यतस्ते नंदिताः सर्वे देवाः सर्वपुरोगमाः॥ऋषयः सिद्धसंघाश्च तस्मात्त्वं नंदिनी स्मृता॥नंदा
नाम्ना तु विख्याता भव देवि जगत्त्रये॥यावद्देवा भुवि ख्याता यावत्तीर्थमिदं स्थिरं॥तावत्त्वमिह तीर्थस्य रक्षणार्थं स्थिरा भव॥देहि वां-
छितसिद्धिं च लोकानामुपयाचितैः॥प्रकारैः ॥ पापविध्वंसिनी रूढा भक्तानां अभयंकरी ॥ स च विश्वेश्वरो देवः सर्वव्यापि महेश्वरः
॥ देवर्षिपितृसिद्धैश्च साकं तत्र सुखं स्थितः ॥ ततः प्रभृति विख्याता नंदा देवी युधिष्ठिर ॥ तत्र गत्वा शुचिस्नात्वा नरोनंदाह्रदे
नृप ॥ सर्वपापक्षयं प्राप्य सर्वकामानवाप्नुयात् ॥ तत्राष्टम्यां नवम्यां वा चतुर्दश्यां रवेर्दिने ॥ नरो नंदाह्रदे स्नात्वा श्राद्धं कृत्वा
विधानतः ॥ नंदिनीं पूजयेद्देवीं तथा मातृगणं नृप ॥ नरः स्वशक्तिमुद्दिश्य वस्त्रचंदनकुंकुमैः॥सिंदूरेण सुगंधैश्च पुष्पधूपार्घदीपकैः ॥
नैवेद्यैर्विविधैः पार्थ यद्यद्यस्योपयुज्यते ॥ अखंडदीपकं दद्याद्वांछितार्थस्य सिद्धये ॥ सुवर्णाभरणैःकेचित्पूजयंतीश्वरं नराः
॥ विभवे सति राजेंद्र स्वर्णपुष्पैःसुवस्त्रकैः ॥ तेभ्यो दद्यान्मार्हशक्तिर्वांछितं यस्यय नृप ॥ इति कण्वो मुनिः पार्थ पुरा रेवोरि
संगमे ॥ कृतालयो वर्षशतं सिद्धिकामैः सुरेश्वरीं ॥ नंदां देवीं समाराध्य प्राप सिद्धिपदं परं ॥ बहवश्चापि राजानो ऋषयश्च युधि
ष्ठिर ॥ तां देवीं पूजयित्वादौ सिद्धिं प्रापुरभीप्सितां ॥ किंगतैंशक्यपादैस्तैः कोलापुरमुखैर्नृणां ॥ नंदाक्षेत्रे नरैर्नंदा यदि संसेव्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यप्रभावतः ॥ युधिष्ठिर उवाच ॥ चक्रतीर्थं ममाचक्ष्व मुनिसंघनिषेवितं ॥ कथं विष्णुः पुरा सुप्तस्तत्र किंचविशेषतां ॥ मार्कंडेय उवाच ॥ साधु साधु महाप्राज्ञ शुभःप्रश्नस्त्वया कृतः ॥ गोप्याद्गोप्यतरं तीर्थं निर्मितं चाक्रिणा स्वयं ॥ तत्तेहं संप्रवक्ष्यामि चरितं पापनाशनं ॥ आसीत्पुरा महादैत्यस्तलमेघइति स्मृतः ॥ तेन देवा जिताःसर्वे कृतं राज्यविनाशनं ॥ यज्ञभागान्स्वयं भुंक्ते ब्रूते च विषमं वचः ॥ अहं विष्णुरहं ब्रह्मा रुद्रोहं चंद्रभास्करौ ॥ धनदस्य हृतं वित्तं हृतः शक्रस्य वारणः ॥ इंद्राणीमिच्छाति बलादाहरत्भं रवेरपि ॥ तलमेघभयात्पार्थ सर्वे देवाः सवासवाः ॥ दिक्पाला लोकपालाश्च गताः सर्वे पितामहं ॥ नष्टचित्ताः सत्यलोके देवासुरनमस्कृतं ॥ स्तुवंति विविधैस्तोत्रैर्वाक्पतिप्रमुखाः सुराः ॥ नमोखिलजगधात्रे विश्ववंद्याय वेधसे ॥ व्यक्ताव्यक्तस्वरूपाय मूर्तित्रयधराय च ॥ केवलात्मस्वरुपाय गुणत्रयमयाय च॥कृत्वादिकर्मकांडस्य समुद्धर्षण हेतवे॥वेदादिकासु विद्यासु तत्वज्ञाय नमोस्तु ते ॥ नमो नित्यस्वरूपाय कर्ममार्गप्रदर्शिने ॥ नमोहिरण्यगर्भाय शांताय परमेष्ठिने ॥ मार्कंडेय उवाच ॥ एवं दृष्ट्वा विधिर्देवान्वंदमाना न्विवर्णितः ॥ उवाच जगतां नाथः किमेतदिति सत्वरं ॥ ब्रह्मा उवाच ॥ स्वागतं वः सुरगणाः किमागमनकारणं ॥ किंक्लिष्टाः किं विवर्णाश्च हेतुशंसत माचिरं ॥ ततो वाचस्पतिं शक्रः प्रेरयामास शंसितुं ॥ बृहस्पतिरुवाच ॥ तव वंशोद्भवो देव तलमेघाह्वयोऽसुरः ॥ तेन विध्वंसिताः सर्वे हतराज्या विवासिताः ॥ सर्वदेवात्मशक्त्या च सर्वोहमिति भाषते ॥ इत्याकर्ण्य वचो ब्रह्मा विचिंत्योवाच तान्प्रति ॥ ब्रह्मा उवाच ॥ तलमेघवधे शक्तिर्नयुष्माकं न वा मम ॥ विना चक्रधरं विष्णुं साध्यस्तेनैव दानवः ॥ तद्गच्छध्वं मया सार्धं क्षीरोदं यत्र माधवः ॥ ततस्ते प्रस्थिताः सर्वे कृष्णसंदर्शनोत्सुकाः ॥ क्षीरोदशयनं प्राप्य स्तुतिं चक्रुः समाहिताः ॥ देवाऊचुः ॥ यो योगिभिर्जगतिजीवनतद्विचिंत्यो यश्चक्रवर्तिवदुपेत्य सुरैर्निषेव्यः ॥ यः कालकूटसमतामाहितेषु धत्ते दीनेष्वभयमत्र नमोस्तु तस्मै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. जयादि पुरुषः श्रीमन्ननादिरपि गीयसे ॥ अंतकारिरनंतस्त्वमंतकश्च निगद्यसे ॥ मूर्तामूर्तस्वरूपेण सदसद्रूप ते नमः ॥ नमः अध्या.
११७ क्षीरोदसुताय लक्ष्मीसंकलिताय च ॥ दैत्यांतक नमस्तेस्तु देवकीनंदनाय च॥ शंखचक्रगदापाणे नमस्ते दुरितापह ॥मात्स्य मूर्ते ११०
नमस्तुभ्यं वेदोद्धरणकारिणे ॥ नमस्तेस्तु नृसिंहाय दैत्यवक्षोविदारिणे ॥ नमो वामनरूपाय बलिछलनशीलिने ॥ नमोस्तु र
मरूपाय सर्वक्षत्रांतकाय च ॥ नमस्ते रामचंद्राय रावणांतकराय च॥नमःकृष्णस्वरूपाय कंसाद्यासुरनाशिने॥नमोबुद्धस्वरूपाय लो-
कानां हितकारिणे ॥ भविष्यत्कल्किरूपाय कलावहितनाशिने ॥ नमस्तेस्तु जगद्वंद्य विश्वमूर्ते जयाव्यय ॥ इति वेदस्तवं श्रुत्वा
प्रबुद्धो गरुडध्वजः ॥ उवाचदेवानखिलान्मेघगंभीरया गिरा ॥ किमर्थं बोधितो ब्रह्मन्समस्तैस्त्रिदशैःसह ॥ ब्रह्मा उवाच ॥
तलमेघभयात्कृष्ण संप्राप्तास्तव मंदिरं ॥ नावध्यते ह्यसौ पापस्तलमेघोजनार्दन ॥ साध्योसौ भवदुष्टात्मा त्वत्तो वधमवाप्स्यति
॥ कृष्ण उवाच ॥ स्वस्थानं यांतु गिर्वाणाः ज्ञातमेतन्मयाखिलं ॥ दुष्टात्मानं हनिष्यामि तलमेघं महाबलं ॥ क्व तिष्ठति च दु-
ष्टात्मा किंवीर्यः किंपरिच्छदः ॥ देवाऊचुः ॥ हिमाद्रिकंदरे कृष्ण तिष्ठति प्राप्तपौरुषः॥चतुर्विंशतिसाहस्त्रैः कन्याभिः परिवारितः
॥ तुरगस्यंदनानां च कृष्ण संख्या न विद्यते ॥ द्विरदाः पर्वताकारा हयाश्च द्विरदोपमाः ॥ महाबलः स तत्रास्ते गीर्वाणभयदा-
यकः ॥ श्रुत्वा देवो वचस्तेषां देवानामातुरात्मनां ॥ अचिंतयद्गरुत्मंतं शत्रुसंघविनाशनं ॥ चक्रं करेण संगृह्य गदां शंखं ततः प्र-
भुः ॥ शार्ङ्गंच मुशलं शीरं करैर्गृह्य जनार्दनः ॥ अरूढः पक्षिराजानं वधार्थं दानवस्य तु ॥ प्रययौ स यदा देवः शंखमापुरय-
न्विभुः ॥ दानवस्य पुरे पार्थ तदोत्पाता बभूविरे ॥ समंताद्दारुणास्तत्र दानवानां भयावहाः ॥ गोमायवो गृहद्वारि कपोतः प्रवि-
शंतिच ॥ विना वातेन तस्याशु ध्वजदंडः पपात च ॥ सर्पमूषकयोर्युद्धं तथा केसरिनागयोः ॥ उन्मार्गं सरितस्तत्र वहंति
रुधिराविलाः ॥ अकाले तरुपुष्पाणि दृश्यंते तत्र कानने ॥ इति प्राप्तो जगन्नाथो हिमवंतं नगाधिपं ॥ पांचजन्यश्च १६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णेन पूरितःपुरसन्निधौ ॥ तेन सृष्टेन महताचुक्षुभे दा-नवेश्वरः ॥ अहो मृत्युमुखं प्राप्तः कोयं मूढत्वमाश्रितः ॥ तलमेघ उवाच ॥ धुंधुमाराशुगच्छ त्वं स्वसैन्यपरिवारितः ॥ बलादानय तं बध्वा मूढप्रज्ञं ममाग्रतः ॥ धुंधुमार उवाच ॥ आनयामि न संदेहः सुरान् यक्षोरगानपि ॥ स्यंदनैश्च समायुक्तो गजवाजिभटैः सह ॥ दृष्टस्तेनागतो विष्णुः सुपर्णस्थो महाबलः ॥ ततो बुंबारवं चक्रे गृह्यतां बध्यतामिति ॥ इत्युक्तास्तेन ते सर्वे किंकरा विविधायुधाः ॥ चक्रुर्दिक्षुप्रधावंत इतश्चेतश्च भारत ॥ सुपर्णे नाग्निरूपेण दग्धास्ते शलभा यथा ॥ धुंधुमारोपि कृष्णेन शस्त्रातेन ताडितः ॥ सकृद्वक्षस्थले पापः पपात च ममार च ॥ हाहाकारं ततः सर्वे चक्रु र्दानव पुंगवाः ॥ तलमेघस्ततः क्रुद्धो रथारूढो विनिर्गतः ॥ ददृशे पुरतः कृष्णं शंखचक्रगदाधरं ॥ तलमेघ उवाच ॥ अन्ये ते दानवाः कृष्ण ये हताः समरे त्वया ॥ हिरण्याक्षमुखास्ते वै नपुमांसो जनार्दन ॥ इत्युक्त्वा दानवः पार्थ ववर्ष शरवृष्टिभिः ॥ दानवस्य शरान् कृष्णश्चिच्छेदामितविक्रमः ॥गुरुत्मांश्च हनत्सैन्यमयोध्यं यत्सुरैरपि॥कृष्णोपि द्विगुणास्तस्य प्रचिक्षेप शीरीमुखान्॥द्विगुणान् द्विगुणी कृत्य प्रेषयामास दानवः॥ तांश्च बाणसमुहेन कृष्णश्चिच्छेद सायकान् ॥ ततः क्रुद्धेन दैत्येन ज्वलनास्त्रमुदीरितं ॥ ज्वालामालाकुलं कृष्णः पावकास्त्रमुदीक्ष्य च॥वारुणं प्रेषयामास तेनाग्नेयं शमं ययौ ॥ वारुणे चापि वायव्यं तलमेघो व्यसर्जयत् ॥ सार्पं चैव हृषीकेशो वायव्यास्त्रप्रशांतये ॥ चिक्षेप नारसिंहोपि प्रेषयामास पांडव ॥ नारसिंहं ततो दृष्ट्वातलमेघो महाबलः ॥ उत्तीर्य स्यंदनात् शीघ्रं खड्गं चर्म प्रगृह्य च ॥ आद्याहं प्रेषयिष्यामि कृष्णं यमपुरं प्रति ॥ इत्युक्त्वा प्रययौ पार्थ दानवः केशवं तदा ॥ खड्गेन ताडयद्दैत्यो गदापाणिं जनार्दनं ॥ मंडलाग्रं ततो गृह्य केशवो हृष्टमानसः ॥ जघ्ने वक्षस्थले दैत्यं तलमेघं तु लीलया ॥ दैत्यो जनार्दनं तद्वदसिना ताडयत्भृशं ॥ चतुर्भुजस्ततः क्रुद्धस्तलमेघाय पांडव ॥ अमोघं चक्रमादाय मुमोचाशु रिपुं प्रति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तलमेघस्ततस्तो वेगादुत्पपाताम्बरं नृप ॥ क्रोशार्द्धमात्रवपुषा छादयन्नसुरांतकं ॥ जगर्ज घनवद्भूप स्वसेनोपूरयं नभः ॥
तावता विष्णुमुक्तं त च्चक्रं चिच्छेदितं शिरः ॥ पतिते तेन शिरसा चूर्णीता शतशोसुराः ॥ विद्रुमा मृगसंघाश्च पर्वताश्च चकंपिरे ॥
चुक्षुभुः सागराः सर्वे प्रचचाल वसुंधरा ॥ पुष्पवर्षं ततो देवा ववर्षुः केशवोपरि ॥ अवध्यः सुरसंघानां तलमेघानिषूदितः ॥ स्वास्थ्यं
जग्मुस्ततो देवा गंधर्वा ऋषय स्तथा ॥ ब्रह्मवंशोद्भवे दैत्ये तलमेघे निपातिते॥ केशवश्चिंतयाविष्टः कश्मलं परमं गतः॥एकस्तच्चक्रमादाय
नर्मदातटमाश्रितः ॥ क्षीरोदधिं कल्पयित्वा नर्मदांलोकशर्मदां ॥ सुष्वापानंतशयने ह्रदमाश्रित्य माधवः॥लक्ष्म्यासमन्वितस्तत्र शेष
शय्योपरि प्रभुः ॥ निलीनस्तूत्तरे कूले सुरर्षिगणसेवितः ॥ चक्रं प्रक्षालितं तत्र ज्वालामालाविभीषणं ॥ निक्षिप्तं नर्मदातोये
समीपे जलशायिना ॥ सुरारिशोणितालिप्तं निर्धौतं नर्मदाजले ॥ तलमेघवधोत्पन्नं यत्पापं पांडुनंदन ॥ तत्सर्वंक्षालितं सद्यो
भवजांभसि भारत ॥ तदाप्रभृति लोकेस्मिन् जलशायी महीपते ॥ विख्यातं भारते वर्षे नर्मदायां नरेश्वर ॥ तत्तीर्थस्य प्रभावं
त्वं शृणुष्वेकमना नृप ॥ यथानंतो हि नागानां देवानां च जनार्दनः ॥ मासानां मार्गशीर्षो वै नदीनां भूप नर्मदा ॥ तीर्थाना-
मुत्तमं तद्वज्जलशायी नृपोत्तम ॥ एकभुक्तं च नक्तं वाप्यथवा याचितं नृप ॥ उपवासं तथा दानं द्विजभोजनसंयुतं ॥ ये ददंति
कुरुश्रेष्ठ न ते यांति यमालयं ॥ यममार्गभयाद्भीता ये लोकाः पांडुनंदन ॥ ते पश्यंति श्रियःकांतं नागपर्यंकशायिनं ॥ जगद्योनि
मजं विष्णुं पुंडरीक निभेक्षणं ॥ विश्वोपद्रवहंतारं संसारभयनाशनं ॥ स्नापयेत्परया भक्त्या क्षौद्रक्षीरेण सर्पिषा खंडयातीर्थतोये-
न तापत्रयहरं हरिंस्नाप्यमानं च पश्यंति ये नरा गतमत्सराः ॥ तेषां वैकुंठभुवने वासःस्यात्सुरदुर्लभे ॥ घृतेन बोधयेद्दीपमहर्नि-
शमखंडितं ॥ तिलतैलेन वा पार्थ सार्थकं तस्यजीवितं ॥ रात्रौ जागरणं कृत्वा देवस्याग्रे विमत्सरः ॥ कथां च वैष्णवीं भ-
क्त्या ये शृण्वंति युधिष्ठिर ॥ महापापोपपाती च तस्य नश्यत्यसंशयं ॥ प्रदक्षिणं प्रकुर्वंति ये नरा जलशायिनं ॥ प्रदक्षिणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतं तेन ससमुद्रमिलातलं ॥ ततः प्रभाते संजाते स्नात्वा संतर्प्य पूर्वजान् ॥ श्राद्धं कृत्वा द्विजैर्योग्यैर्ब्रह्मलक्षणलक्षितैः ॥ स्वदार-
निरतैः शांतैः परदारविवर्जकैः ॥ वेदाभ्यसनशीलैश्च स्वकर्मनिरतैः शुभैः ॥ पंचयज्ञक्रियादक्षैस्त्रिसंध्यापरिपालकैः ॥ तादृशैः कार-
येच्छ्राद्धं यदीच्छेच्छ्रेयआत्मनः॥ ते वंद्या मानुषे लोके ते धन्या च द्विजर्षभाः ॥ ये वसंति सदा पार्थ पदपद्माश्रये हरेः ॥ प्रत्यक्षं ये
प्रपश्यंति चक्रिणं जलशायिनं ॥ रेवाया उत्तरे तीरे ते न शोच्या युधिष्ठिर ॥ कृच्छ्रातिकृच्छ्रपाराकैर्व्रतैश्चांद्रायणादिभिः ॥ पक्षमासो-
पवासैश्च षट्पंचअहभोजनैः ॥आत्मानं शोधयेद्यस्तु तत्र तीर्थे युधिष्ठिर ॥ स्मरन् भजन् यजन् विष्णुं सभवेद्वैष्णवो गणः ॥ तत्र
तीर्थे च गां दत्वा वसेद्वैकुंठसन्निधौ ॥ ॥ पादुकोपानहच्छत्र वस्त्रान्नांबुमहीमुखं ॥ दानं दत्वा विमानेन विचरेत्स्वर्गतिं नृप ॥ ति-
लधेनुश्च यो दद्यात्तत्र तीर्थे नराधिप ॥ सर्वपापविनिर्मुक्तः सयाति परमां गतिं ॥ लभेत्तथेप्सितं कामं यत्र यत्रवसेन्नृप ॥ युधिष्ठिर
उवाच ॥ कथं सा दीयते धेनुः केन सा तिलसंज्ञिता ॥ एवं मे पृच्छतो ब्रूहि कृपया मुनिसत्तम ॥ मार्कंडेय उवाच ॥ शृणु
राजन्प्रवक्ष्यामि तिलधेनुषु यत्फलं ॥ यथा तस्मै यथा देया दाने तस्याश्नुते फलं ॥ एतत्कथांतरं पुण्यमूचे द्वैपायनः पुरा ॥ श्रुतं
हि नैमिषारण्ये दानं वै नारदादिभिः ॥इदं परममायुष्यं मंगलं कीर्तिवर्धनं ॥ विप्राणां श्रावयेद्विद्वान् फलमानंत्यमश्नुते ॥ बहुभ्यो
न प्रदेयानि गौः गृहं शयनं स्त्रियः ॥ विभक्तदक्षिणाह्येषा दातारं पातयेदिह ॥ एकाएकस्य दातव्या बहुभ्यो न युधिष्ठिर ॥ सा च
विक्रयमापन्ना दहात्यासप्तमं कुलं ॥ तिलान् यस्तु प्रयच्छेत पितृतुष्ट्यै नराधिप ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
धर्मराजाय च तिलान् दत्वा चैवं हि मानवाः॥यमलोकं न पश्यंति ब्रह्मलोकं व्रजंति ते ॥ तिलाः पवित्रमतुलं प्रवदंति महर्षयः॥
सर्वेषामेव दानानां तिलदानं परं स्मृतं ॥ सर्वपापहरं तद्धि पवित्रं स्वर्ग्यमेव च ॥ विष्णोर्देहसमुद्भूता पुज्याः कृष्णतिलास्तथा ॥
धर्मस्य रक्षणायालमेतत्प्राहुर्दिवौकसः॥पितॄणां परमां प्रीतिं जनयत्यसितास्तिलाः ॥ तिलाः कृष्णाः तिलाः श्वेतास्तिला गोमुत्रस-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्निभाः ॥ महर्षेः कश्यपस्यै ते गात्रेभ्यः प्रसृतास्तिलाः ॥ ते च दिव्यं गता भावं प्रदानेषु सितास्मृताः ॥ दैविके पितृके कार्ये मंग-
लाभ्युदयेषु च ॥ सितास्तिला सदा शस्ता भक्ष्यकार्ये तु सर्वतः ॥ तिलाभक्षयितव्याश्च होतव्याश्च विधानतः ॥ विप्रेभ्यश्च प्रदा-
तव्या श्रेयस्कामैर्नरैरिह ॥ तांबुलामलकेक्षूंश्च तिलांश्च भरतर्षभ ॥ बहिर्जनसमाजेवा पार्थ भक्षन्नदुष्यति ॥ नित्ये नैमित्तिके का-
म्ये तिलान्दत्वा स्वशक्तितः ॥ प्रजावान् पुत्रवांन्नित्यं धनवान् जायते नरः ॥ ददतो जुह्वतश्चैव हरतः प्रतिगृह्वतः ॥ तिले तिले
तिलद्रोणफलं प्राप्नोतिमानवः॥उत्तमानां सौवर्णानांधेनुंवत्सं च कारयेत् ॥ यथालाभं तु सर्वेषां चतुर्द्रोणाहि गौस्मृता ॥ द्रोणेन
वत्सकं कुर्याद्बहूनां चापि कामतः ॥ यद्वा देशस्य यन्मानं विषये वापि चारितं॥तेन मानेन सा कार्या फलमक्षयमिच्छता ॥ शुद्ध-
भूमौ समायां तु कृत्वा कृष्णाजिनोपरि ॥ कर्णयोश्च शुभेरत्ने प्रदीपौ नेत्रयोर्द्वयोः ॥ नासायां सर्वगंधाश्च जिव्हायां शारदं घृतं ॥
मुक्ताफलानि दंतेषु पादेष्विक्षून्नियोजयेत् ॥ उत्तरे चंदनं देयं नाभ्यां पद्मं सकांचनं॥ दुग्धस्थाने मधुघृतं रोमकूपेषु सर्षपान् ॥ कं-
बलं कंबले दद्यात् ललाटे ताम्रभाजनं ॥ स्कंधेतु शर्करा देया लोहदंडं तु वंशके ॥ गुदे वापि गुडं दद्यात् श्रोण्यां वै धान्यसप्तकं
॥ स्वर्णश्रृंगी रौप्यखुरा रुक्मलांगुलभूषिता ॥ तांम्रपृष्ठां कांस्यदोहांवस्त्रगंधादिशोभितां॥ पुष्पधूपादिना पुज्या दातव्या ब्राह्मणायतु
॥ विप्रमभ्यर्च्य गोपार्श्वे ततः संप्रार्थयेदिदं ॥ यन्मे बाल्ये कृतं पापं कृतं यत्तदजानता ॥ वाचाकृतं कर्मकृतं मनसा यद्विचिंतितं
॥ यज्जले मे गुरुत्सर्गान्मंथामुशललंघनात् ॥ वृषलीलंघनाद्यच्च गुरुदारनिषेवणात् ॥ कन्यकागमनाद्यच्च स्वर्णस्तेयाच्च पा-
तकं ॥ सुरापानादिसंभूतं यन्मे पापं प्रणश्यतु ॥ तीर्थे विप्राय दत्तेयं तिलधेनुः पुनातु मां अहोरात्रोपवासे-
न विधिवत्समयोजिता ॥ तीर्थयात्रासमायोगात्तिलधेनुः पुनातु मां ॥ यासा यमपुरे घोरे नदी वैतरणी स्मृता ॥
वालुकानिकरे तप्ते पच्यंते तत्र दुःकृती ॥ अवाचीनरके यत्र उभौ यमलपर्वतौ ॥ यत्र लोहमुखाः काका यत्र १६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वानोभयावहः ॥ असिपत्रवनं यत्र यत्र सा कूटशाल्मली ॥ सुखं तत्र व्यतिक्रम्य धर्मराजालयं व्रजेत् ॥ धर्मराज-
श्च तं दृष्ट्वा ब्रूते वाक्यं च सूनृतं ॥ विमानविततं योग्यं मणिरत्नविभूषितं ॥ अन्वारुह्य नरश्रेष्ठ प्रयाहि परमां
गतिं ॥ मा त्वं चाटभटे दद्याश्मा च दद्यात्पुरोहिते ॥ माचुकारे विरूपे च न व्यंगे माच देवले ॥ अवेदविदुषे चैव ब्राह्मणक्रयवि-
क्रये ॥ ये मित्रघ्ने च कृतघ्ने च नेत्रहीने तथैव च ॥ वेदांगताय दातव्या श्रोत्रियाय कुटुंबिने ॥ सर्वांगरुचिरे विप्रे सद्वृते च प्रि-
यंवदे ॥ पूर्णिमायां तुमाघस्य कार्तिक्यां चैव भारत ॥ वैशाख्यां मार्गशीर्ष्यां च ग्रहणे चंद्रसूर्ययोः ॥ अयने विषुवे चैव व्य-
तिपाते हरेर्दिने ॥ षडशीतिमुखे चैव गजच्छायासु चैव हि ॥ एवं ते कथितः कालस्तिलधेनु प्रदानिकः ॥ एवं विधानतो ये
वै चक्रतीर्थे युधिष्ठिर ॥ तिलधेनुं ददंतीह तेन शोच्याः कदाचन ॥ व्रजंति विष्णुलोकं ते वैष्णवा नात्र संशयः ॥ भित्वा तु
भास्करं लोकं सत्यलोके च सत्कृताः ॥ एतत्ते सर्वमाख्यातं चक्रतीर्थफलं नृप ॥ रेवाया उत्तरे कूले किमन्यत्परिपृच्छसि ॥ इति
श्रीरेवामहात्म्ये जलशायीचक्रतीर्थनाम दशशततितमोध्यायः ॥ ११० ॥ श्रीमार्कंडेय उवाच ॥ तत्रैव चक्रतीर्थे वै स्ना-
त्वा पार्थ विधानतः ॥ तर्पयित्वा पितॄन् देवान् श्राद्धं कुर्याद्विधानतः ॥ सकृच्छ्राद्धेन दत्तेन चक्रतीर्थे नराधिप ॥ पितरस्तृप्तिमा-
यांति यावद्वर्षसहस्रकं ॥ चक्रपाणिं समभ्यर्च्य यथाशक्त्युपहारतः ॥ यावन्मन्वंतरं पूर्णं वैकूंठभुवने वसेत् ॥ तथा मिष्टान्नदानेन
एकस्मिन् तर्पिते द्विजे ॥ विप्राणामयुतं पार्थ भोजितं स्यान्न संशयः ॥ पादुकोपानहौ वस्त्रछत्रतांबूलदानतः ॥ प्रीतः स्यात्पुंड-
रीकाक्षः परमात्मा जनार्दनः ॥ इतिचक्रतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र तीर्थं परमशोभनं ॥ स्थापितं
चंडमुंडाभ्यां चंडादित्यं नृपोत्तम ॥ आस्तां पुरा महाराज चंडमुंडौ महासुरौ ॥ स्पर्द्धमानौ च शक्रेण संग्रामे विजितौ किल ॥
तावदिंद्रेण पराभूतौ लज्जमानौ रुषान्वितौ ॥ कर्तव्यं ध्यायमानौ च व्योम्नि चंद्रं ददर्शतुः ॥ प्रत्यक्षमिति संचिंत्य आराध्यं स्यान्मह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्महः ॥ देवा रेवातटे तप्यन् पुरा कामाग्निमिप्सवः ॥ तस्मादावामिदं तेजः सूर्याख्यं बलवर्द्धनं ॥ रेवातीरं समाराध्य प्राप्स्यावो
वांछितं फलं ॥ मार्कंडेय उवाच ॥ दानवौ तौ विसृज्यैवं निश्चित्य च यथेप्सितं ॥ चेरतुश्च तपस्तीव्रं नर्मदायां युधि
ष्ठिर ॥ ध्यायंतौ भास्करं देवं तमोनाशनमव्ययं ॥ रविंतौतुष्टुवुस्तत्र भक्तिनम्रौ समाहितौ ॥ चंडमुंडवूचतुः ॥ ॐ नमो
विश्ववंद्याय लोकपालाय वेधसे ॥ नमो विश्वप्रकाशाय नमो विश्वैकचक्षुषे ॥ नमस्ते विश्वरूपाय विश्वदृग्गोचराय
ते ॥ नेत्रगम्याय रम्याय दुर्निरीक्षाय तेजसे ॥ नमः कपिलरूपाय त्रयीतेजोमयाय च ॥ नमः प्रत्यक्षरूपाय तेजसां
पतये नमः ॥ नमस्तेरुद्ररूपाय विष्णुरूपाय ते नमः ॥ नमो ब्रह्मस्वरूपाय नमो वेदमयाय च ॥ नमो गुणनिबध्दाय
नमो गुणमयाय ते ॥ नमस्ते धर्मरूपाय धर्मसंस्थापकाय च ॥ धर्मिकैकनिवार्सय धर्मद्वाराय ते नमः ॥ नमस्ते मोक्षरूपाय मोक्ष-
द्वाराय धीमतां ॥ ज्ञानकर्ता तथा कर्म विधिवाक्याप्रकाशन ॥ त्वत्तएव महत्तेजः कर्मसिद्धिफलप्रदं ॥ नमो नमः पवित्राणां पवि-
त्रत्वैकदायकः ॥ नमः कनकवर्णाय ज्ञानरूपाय ते नमः॥ नमस्ते ज्ञानगम्याय वेदविद्याय तापिने ॥ नमो नंतस्वरूपाय कालत्रय
मयाय च॥ नमोविद्वद्विधिग्राह्यबाह्याबाह्यप्रकाशनं ॥ उद्धतैकतमोध्वंसविधानविदुषे नमः॥ उदयो यस्य देवस्य प्रारंभः सर्वकर्मणां॥
नमस्तस्मै वरेण्याय महसे भास्कराय च ॥ नमः स्त्रिलोकनाथाय परिमाणप्रदर्शिने ॥ कलाक.ष्ठादिरूपेण माननिर्बंधहेतवे ॥ त्वां-
विना जगतां नाम कथं विश्वमिदं भवेत् ॥ क्व च स्यात्कर्मणां कालः क्रत्वादिनां क्रियात्मकः॥ मासर्त्वयनमर्यादा संवत्सरयुगात्मि-
का ॥ यस्मिन्प्रतिष्ठिता देवैस्तस्मै कालात्मने नमः॥ रूपसौख्यप्रदो देवो बलपुष्टिप्रदो रविः॥रोगनाशकरो भानुरीप्सितं नो ददा-
त्विह ॥ मार्कंडेय उवाच ॥ एवं देवःस्तुतस्ताभ्यां तपसा च प्रतोषितः ॥ तत्रैत्य भास्करो भक्त्या भानुभिर्भासयन् भुवं ॥
स्तुत्या च तपसा तुष्टः प्रत्युवाचासुरौ नृप ॥ साधु साध्विति तौ पार्थ नर्मदायास्तटे शुभे ॥ वरं प्रार्थयतां वीरौ यथेष्टं मनसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितं ॥ चंडमुंडावूचतुः ॥ आवामजेयौ स्यावार्कदेह्यनें वरमुत्तमं ॥ तथारोगपरित्यक्तो सर्वकालं दिवाकर ॥ एवमस्त्विति तौ प्राह
भास्करो वारितस्करः ॥ अजेयौ चापि नीरोगौ सदाकालं भविष्यथः ॥ ब्रह्मध्वंसं विधिध्वंसं मत्तौ चेन्न करिष्यथः ॥ ब्रह्मद्वेषिणि
नोत्कर्षो वरजो दितिजो भवेत् ॥ इति मत्वा समाराध्य मामजेयौ भविष्यथः ॥ विधिशीलक्रियोपेते वरसाफल्य प्राप्नुयात् ॥ इत्यु-
क्त्वांतर्दधे भानुः तत्रैव नृपसत्तम ॥ तथैव चंडमुंडाभ्यां स्थापितस्तत्र भास्करः ॥ पूजितः परया भक्त्या स्वनाम्ना वांछितार्थदः ॥
चंडादित्यइति ख्यातस्त्रिषु लोकेषु भारत ॥ तत्र गत्वा महाराज यस्तं पश्येज्जितेंद्रियः ॥ आधिव्याधिविनिर्मुक्तः स भा-
नुभुवनं व्रजेत् ॥ तत्र गत्वा नृपश्रेष्ठ तीर्थे स्नात्वा समाहितः ॥ देवान्मनुष्यांश्च पितॄन् तर्पयेद्विधिना ततः ॥ चंडादित्यं
पूजयित्वा यथाप्राप्तोपहारतः ॥ घृतेन बोधयेद्दीपं षष्ठ्यां वापि रवेर्दिने ॥ स मुक्तः सर्वपापैस्तु देहांते रविलोकभाक् ॥
वसेद्वै भास्करे लोके विरंचीदिवसं नृप ॥ गां सुवर्णं तथा वस्त्रं दद्यादन्नोर्कं नृप ॥ विषमोपी भवेत्सौम्यस्तस्य सूर्यो ग्रहैःसह ॥
चंडादित्यस्य चोत्पत्तिं शृणुयाद्यः समाहितः ॥ विजयी स सदा पार्थ अजेयो जायते ध्रुवं ॥ इति श्रीनर्मदामाहात्म्ये चंडादित्य-
तीर्थनामएकादशशततितमोध्यायः ॥ १११ ॥ श्रीमार्कंडेय उवाच ॥ तथैव चंडिका देवी पराशक्तिर्युधिष्ठिर ॥ ज्ञात्वा
लब्धवरौ सूर्यात् चंडमुंडौ हि दानवौ ॥ वध्यो ममेति मत्वा तौ स्वयमागत्य भास्करं ॥ स्तुत्या संप्रार्थयामास वध्यौ स्यातां
ममेति तौ ॥ चंडादित्य उवाच ॥ त्वं देवी परमाशक्तिर्ब्रह्मविष्णुशिवात्मिका ॥ विश्वांबिका महामाया महोत्साहा महाबला
॥ सुरर्षिभिः प्रार्थिता त्वं विश्ववंद्या जगन्मयी ॥ त्वामनाराध्य कः शक्तः सर्वार्थफलसाधकः ॥ नरसत्यार्थतां कर्तुं प्राप्ता मे
परमेश्वरी ॥ गौरवं दातुकामा मे तस्माच्छृणु समाहिता ॥ ब्रह्मद्वेषो नृणामायुर्निःश्रीकत्वाय कल्पते ॥ आयुःक्षतिकरी निंदा
जिघांसा सर्वनाशिनी ॥ ब्रह्मस्वं कुलनाशाय विरोधः कीर्तिनाशनः ॥ यदा तौ दानवौ भद्रे द्विजानुद्वेजयिष्यतः ॥ धर्मध्वंसकरौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्टौ यज्ञे तीर्थे सुरालये ॥ तदा तेजो बलं हित्वा शीघ्रं नाशमवाप्सतः ॥ तमवध्याविमौ नूनं देवि दैत्यांतकारिणी ॥ दुरितध्वंसनीदे-
वीत्रिपुरे सुरसेविते ॥ नमस्तेस्तु जयस्तेस्तु मत्पार्श्वे त्वं स्थिराभव ॥ तीर्थसार्थकतां देवी चंडिखंडयदुःकृतं ॥ इत्युक्त्वार्को महादेवीं
तत्रैवांतर्दधे नृप ॥ चंडिकापि पराशक्तिरसुरघ्नी सुरेश्वरी ॥ स्थिता तत्र महाराज प्रीत्या भानोर्भयापहा ॥ अष्टम्यां च नवम्यां च
चतुर्दश्यां च भारत ॥ रविवारे थवा पूज्या विविधैर्बलिपूजनैः ॥ ददाति वांछितं नृणां नियतं दुरितांतिका ॥ इतिश्रीचंडिकातीर्थ
महात्म्यंनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र यमहास्यमनुत्तमं ॥ चंडादित्याक्रोशमात्रं स्थितं मर्त्यस्य दुर्लभं ॥
सर्वपापहरं पुण्यं रेवातटसमाश्रितं ॥ युधिष्ठिर उवाच ॥ किं हास्यं को यमस्तत्र पृथिव्यां मुनिपुंगव ॥ तत्सर्वं मे समाख्याहि
तीर्थस्यास्य तु विस्मयः ॥ मार्कंडेय उवाच ॥ साधु पृष्टं महाभाग न पृष्टं केनचित्पुरा ॥ यदा वृत्रं ज-
घानादौ शक्रश्चक्रधराज्ञया दिक्पाला लोकपालाश्च तस्मिन्युद्धे समागताः ॥ तदेंद्रेण जये प्राप्ते स्वस्थानमगमन्
सुराः ॥ विसर्जिताः सुरेशेन प्रीत्या परबलार्दनाः ॥ तदागच्छन् यमस्तीरं रेवायाः प्राप्त वान्किल ॥ स्नानार्थं
रणसंमर्दकश्मलक्षालनाय च ॥ स्नातः स शुशुभे पार्थ विमलो गतकश्मलः ॥ रजकेन यथा धौतमंशुकं निर्मलं
भवेत् ॥ तथा नैर्मल्यमापन्नो भानुपुत्रो युधिष्ठिर ॥ सपश्यन्निर्मलं देहं हसन्प्रोवाच विस्मितः ॥ अहो बत महच्चित्रं भवजाती-
रनीरजं ॥ ईदक वैमल्यमतुलं मयि जातमनातिगं ॥ स्नानमात्रेण तन्नूनं प्राप्यते वांछितं पदं ॥ पुनर्विहस्य चोवाच समंताद्वै वि-
लोक्यच ॥ यम उवाच ॥ समर्था ये न पश्यंति रेवां पुण्यसरिद्वरां ॥जात्यंधास्ते समाज्ञेया मृतैः पंगुभिरेववा ॥ अहो बतमहत्क-
ष्टं मर्त्ये मर्त्यत्वमागताः ॥ ये समर्था न मज्जंति गत्वा हरतरंगिणीं ॥ तथैव च क्षणं ध्यात्वा प्रोवाचेदं हस न्यमः ॥ किं
जंतोर्जनयेत्पापं का वरा कींच दुर्गतिः ॥ रुष्टोहं किंकरस्तस्य यस्य रेवा पदप्रदा ॥ भारते भूमिवलये भूत्वा नरवपुर्यदि ॥ रेवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेवां न यो वेत्ति दृषत्तस्याग्रतो वरः ॥ ये मूढा रे दूरात्मानः क्रियते जन्म किं वृथा ॥ सेव्यते शिवसिंधुः सा किं न स्वर्गाधिरोहिणी ॥ अर्थव्ययो न यत्रास्ति नबहुक्लेशसंभवः ॥ सुसुखं प्राप्य सिंधुर्नी कल्मषघ्नींनिषेव्यतां ॥ किमत्र बहुनोक्तेन नरकाणां भयं यदि ॥ भयं हृदि मदियं चेन्नर्मदांत न्निषेव्यतां ॥ किंवहूक्तेन जंतुनां रेवासेवासमं नहि ॥ भवभावभवाभावौ युगपद्या प्रयच्छाति ॥ मार्कंडेय उवाच ॥ एतस्मात्कारणाद्राजन् हसितो लोकशासनः ॥ स्थापयित्वा शिवं तत्र यमः स्वर्गं जगाम ह ॥ यमहासेश्वरं नाम पूजयित्वा च पांडव ॥ लोकपालैः समं तत्र स्वयमायाति पर्वणि ॥ सदा पर्वसु यो गच्छेद्यमहास्ये जितेंद्रियः ॥ कृष्णपक्षे चतुर्दश्यां अश्विने च विशेषतः ॥ उपोष्य पूजयन् भक्त्या सर्वपापैः प्रमुच्यते ॥ रात्रौ जागरणं कृत्वा दीपं देवस्य बोधयेत् ॥ घृतेन वाथ तैलेन शृणु तस्याद्भुतंफलं ॥ मुच्यते पातकैर्घोरैरगम्यागमनोद्भवैः ॥ अभक्षभक्षजैः पापैरपेयापानसंभवैः ॥ अवाह्यवाहनोत्थैश्च अदोह्यदोहनोद्भवैः ॥ स्नानार्चनेन राजेंद्र यांति पापान्यनेकशः ॥ यमलोकं न पश्यंति ते मर्त्याः पांडुनंदन ॥ पितृणां परमं गुह्यं तीर्थं भुवे नृपात्मज ॥ यद्यत्प्रदीयते पार्थ तीर्थेस्मिन् भक्तितो नरैः ॥ तदक्षयफलं तेषां यमहास्ये प्रदायिनां ॥ अमावास्यादिने यस्तु विप्रान् संपूजयेदिह ॥ गोभूमितिलदानेन हिरण्येन च भारत ॥ कृष्णाजिनप्रदानेन तिलधेनुप्रदानतः ॥ हयं वा कुंजरं वापि धूर्वाहौ शिरसंयुतौ ॥ कन्यां वा लक्षणोपेतां महिषीं च स्वशक्तितः ॥ पयस्विनीं सुशीलां च सर्वोपस्करसंयुतां ॥ ये ददंति नृपश्रेष्ठ नोपसर्पति तेयम ॥ यमो भवति सुप्रीतो युधिष्ठिर भवेभवे ॥ यमस्य वाहो महिषो महिष्यस्तस्य मातरः ॥ तासां दानप्रभावेन यमः स्यात्परितोषवान् ॥ यमलोके न यात्येष यदि पापैः समावृतः ॥ एतस्मात्कारणात्तत्र महिषीदानमुत्तमं ॥ शृंगतस्योदकं कार्यं धूम्रवस्त्रानुवेष्टनं ॥ आयसाश्च खुराः कार्या ताम्रपृष्ठं विभूषणं ॥ लवणाद्रिं पूर्वतोस्यादाग्नेयां गुडपर्वतं ॥ कार्पासं याम्यभागे तु नवनीतं च निर्ऋते ॥ पश्चिमे सप्तधान्यानि वायव्ये च तिलास्मृताः ॥ सौम्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च कांचनं स्थाप्यमैशान्यां च घृतं न्यसेत् ॥ दापयेद्द्विजवर्याय प्रीयतामीत्युदीरयन् ॥ अनेनैव विधानेन यमः प्रीतोस्तु मे सदा ॥
दानेनानेन मे भक्त्या यमः प्रीणातु शंकरं॥दानार्चनादि विधिना तीर्थे स्मिन् द्विजसत्तम॥सुखसंतानसौभाग्ये शिवःपुष्णातु मांसदा ॥
इत्युच्चार्य द्विजे दत्वा न शोच्यस्याद्भवेभवे॥तस्यनस्याद्भयं पार्थ नरकं वै कदाचन ॥असिपत्रवनं घो रंयमचुल्लश्च सुदारुणा॥रौद्रा वैतरणी
चापि कुंभिपाकः सुदारुणः॥कालसूत्रो महाभीमस्तथा यमलपर्वतौ॥क्रकचं तैलयंत्रं च श्वानौ गृध्राश्च वायसाः॥निरुच्छ्वासो महानादो
शीतो भीतश्च भैरवः॥इत्याद्या यमलोके ये श्रूयंते नृपसत्तम ॥ सौम्यास्युस्तस्य ते सर्वे तीर्थस्यास्य प्रभावतः ॥ यमश्चसौम्यो भवति
सत्करोति च तं सदा ॥ स न पश्येच्च नरकान् नृप जन्मनि जन्मनि ॥ यस्तत्र पिंडदानेन तर्पणेन पितॄन् यजेत् ॥ तस्य तृप्ताश्च
पितरो यावदाहूतसंप्लवं ॥ यमहासस्य चाख्यानं ये शृण्वंति नृपोत्तम ॥ तेपि पापविनिर्मुक्ता न बिभत्स्यंति यमादपि ॥ इति
श्री रेवामहात्म्ये उत्तरे यमहासतीर्थंनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र तीर्थंकल्होडिकाह्वयं ॥ यमहासाददूरस्थं
प्राणिनां शुद्धिकारकं ॥ विख्यातं भारते वर्षे गंगायां पापनाशनं ॥ दुर्लभं मर्त्यजंतूनां रेवातीरे स्थितं नृप ॥ प्राणिनां पाप-
नाशाय प्रयागं पुष्करं यथा ॥ तद्वत्तीर्थमिदं पुण्यं इत्युवाच पुरा हरः ॥ युधिष्ठिर उवाच ॥ का सा कल्होडिका ब्रह्मन्
कथं तीर्थमिदं कृतं ॥ कल्होडिका ह्वयं कस्मात्पवित्रमतुलं मुने ॥ एतन्मे विस्तराद्ब्रूहि मुने मे विस्मयो महान् ॥ मार्कंडेय उ-
वाच ॥ श्रणु राजन् प्रवक्ष्यामि तीर्थोत्पत्तेस्तु कारणं ॥ जान्हवी वत्सिकारूपा पुरा स्नानार्थमागता ॥ युक्ता सा पंचभिः पा-
पैः सा युक्ता ह्यत्र भारत ॥ ब्रह्महत्यादि पापानि नाशयेदपि जान्हवी ॥ एभ्यो बिभेति पंचेभ्य आगतेभ्यो निजं तटे ॥ मित्र-
द्रोहि कृतघ्नश्च यश्च विश्वासघातकः ॥ स्वामिद्रोहि गुरुद्रोहि दुःसहाः पंच पांडव ॥ भीता प्रकंपते गंगा मा निमज्जंत्विमे मयि ॥
ग्लानिं गमिष्ये शोषं च स्पृष्ट्वा पातकिपंचकं ॥ एवं विधैश्च सा पापैः समाक्रांता सरिद्वरा ॥ उग्रादुग्रतरं ध्यात्वा प्रतिमल्लं यु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिष्ठिर ॥ उग्रजामागता सिंधुमुग्रपापापहारिणी ॥ जनेष्वविदिताप्राप्ता सितकल्होडिकावपुः ॥ अतस्तद्विश्रुतं भूम्यां कल्होडीती-र्थमुत्तमं ॥ तीर्थे दृष्ट्वा जनैरुक्ता कल्होडीति यतो नृप ॥ सा च स्नात्वा तपस्तप्त्वा स्थाप्य गंगेश्वरं शिवं ॥ रेवाप्रभावात्पापेभ्य-स्तेभ्यो मुक्ता तदैव हि ॥ विहाय वत्सिकारूपं पूजयित्वा शिवं च सा ॥ ततः शंभुप्रसादेन स्थानं प्राप्तवती स्वकं ॥ मार्कंडेय उवाच ॥ तत्र तीर्थे महाराज नरोगत्वाजितेंद्रियः ॥ रजस्तमस्तथा क्रोधं दंभं मात्सर्यमेव च ॥ पैशून्यं लोभसहितं सप्तचिन्हानि यस्त्यजेत् ॥ नियमैतानि पापानि प्राप्तं वै जन्मतः फलं ॥ तत्र शुल्बमये पात्रे रौप्ये वा नृपसत्तम ॥ नीत्वा क्षीरं ससर्पिष्कं दधिक्षौद्रसितान्वितं ॥ विधिवत् स्नापयेद्देवं त्रिसंध्यं च त्र्यहं तथा ॥ नमः शिवाय मंत्रेण स्नापयेच्छंकरं नृप ॥ स याति परमं स्थानं निःपापः पितृभिः सह ॥ पयोगसंभवं सेव्यं शुक्लयास्तत्र भारत ॥ दधिसर्पिःसमायुक्तं गोमूत्रं गोमयं तथा ॥ पंचगव्यमिदं पार्थ पापनाशापहं परं ॥ सदैव सेवितं सद्भिः स्तीर्थे चास्मिन्विशेषतः ॥ स्नात्वा तत्रविधानेन पितॄन् श्राद्धैश्च तोषयेत् ॥ शुक्लांगां दापयेत्तत्र प्रीयंतां पितरो मम ॥ इत्युच्चार्य द्विजे दद्यात् श्रुत्वा वृत्तसम-न्विते ॥ सुशीले श्रोत्रिये ॥ भूप स्वदारनिरते शुभे ॥ सवत्सां वस्त्रसंयुक्तां सुवर्णरजतान्वितां ॥ सत्वयुक्ते ददेद्यस्तु स याति शि-वमंदिरं ॥ गंगा च परितुष्टा स्यात्तस्य राजन्य सत्तम ॥ जान्हवी सर्वतीर्थाढ्या तत्र तीर्थे युधिष्ठिर ॥ सान्निधानं स्वयं धत्ते सदा पर्वणि पर्वणि ॥ कल्होडीतीर्थमाहात्म्यं शृणुयाद्यः समाहितः ॥ स वै पापविनिर्मुक्तो गंगास्नानफलं लभेत् ॥ इति श्रीनर्मदाम-हात्म्ये उत्तरे कल्होडीगंगेश्वरतीर्थनामद्वाशशततितमोध्यायः ॥ ११२ ॥ श्रीमार्कंडेय उवाच ॥ तस्यैवानंतरं पार्थ नंदितीर्थं व्रजेत् शुभं ॥ सर्वपापहरं पुण्यं निर्मितं नंदिना पुरा ॥ नंदीगणः पुरा पार्थ दधानो गणमुख्यतां॥शिवसेवाभिमानेन गौरीं न प्रणमेत्क-चित् ॥ शिवं जानाति सततं शिवां शिवगणाग्रणीः ॥ उमया स ततः शप्तः पदभ्रष्टो भव नृप ॥ पुनः प्रसादयामास तां गौरीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 गणसत्तमः ॥ अनुज्ञातस्तया देव्या नंदी नरवरोत्तम ॥ देवं नंदीशनामानं नंदीतीर्थे युधिष्ठिर ॥ ततः प्रभृति विख्यातं नंदीतीर्थम-
नुत्तमं ॥ पापोपहनं जंतूनां मोक्षदं नर्मदातटे ॥ अहोरात्रोषितो भूत्वा नंदिनाथे नृपोत्तम ॥ स्नात्वा नानोपचारैश्च पूजयेत्रिदशेश्वरं
॥ अन्नं वस्त्रं च हेमादि यो दद्याद्विजपुंगवे ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ सुखसौभाग्यसंयुक्तः क्रीडते त्रिदशैः सह
॥ प्रीतो नंदीगणस्तस्य ददाति शिवसंनिधिं ॥ इति श्रीरेवा० नंदिकेश्वरतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र
बदर्याश्रममुत्तमं॥क्रोशांतरे नंदितीर्थात्तीर्थं वै तदवस्थितं ॥ सर्वतीर्थवरं तीर्थं कथितं शंभुना पुरा॥भूरिभारहरणादेवः संप्रार्थितो सुरैः
॥ तपसोर्थे विनिर्यातौ नरनारायणावृषी ॥ बदर्याश्रमतः पूर्वं तीर्थात्तीर्थं विचेरतुः ॥ भारते भारतश्रेष्ठ रेवातीरमुपागतौ ॥ जगतः
पावनी देवी दृष्ट्वा दक्षिणजान्हवी॥दर्शनादेवसंतुष्टौ चेरतुस्तौ ततस्तपः ॥ परं धराभरं हर्तुं कर्तुं कार्यं सुरेरितं॥स्थापयित्वा तु गिरिशं
तौ बदर्याश्रमं च तं ॥ ततः प्रसन्नो भगवान् साक्षान्मूर्त्तिः सनातनः ॥ ताभ्यां दत्वा वरं शंभुर्वांछितं सिद्धिकारकं ॥ अंतर्द्धानम-
गाद्रुद्रस्तत्रैव भरतर्षभ ॥ तपोसिद्धिरभूत्तत्र तपसाराधिते हरे ॥ भूभारहरणार्थं वाऽवत्तीर्णौ महितले ॥ भ्राता ते फाल्गुनो योयं
विद्धि तं नरदैवतं ॥ कृष्णो नारायणः साक्षान्मंतव्यो यंबलानुजः ॥ ततः प्रभृति तत्तीर्थं नरनारायणेश्वरं ॥ रेवाया
उत्तरे कूले ज्ञानमोक्षप्रदं नृप ॥ तत्र गत्वा तथा स्नात्वा यः पूजयति शंकरं ॥ पापनाशं तथा ज्ञानं बंधात्तत्र जनार्दनः ॥
समं पश्यति सर्वेषु स्थावरेषु चरेषु च ॥ ब्राह्मणे श्वपचे चैव विष्णुमेकं स पश्यति ॥ नरनारायणाभ्यां वै तत्र कृत्वाश्रमं निजं
॥ स्थापितं परमं लिंगं देवत्रयमयं हि यं ॥ नरो भक्त्या निजशक्त्या पूजयेत्परमेश्वरं ॥ सुखसंतानसौभाग्यैस्तृप्तो याति शिवां-
तिकं ॥ तत्र गत्वा शुचिर्भूत्वा सोपवासो जितेंद्रियः ॥ रजस्तमस्तथामुक्त्का सात्विकं भावमास्थितः ॥ मधुमासिसिताष्टम्यां रात्रौ
कुर्वीत जागरं ॥ पक्षयोरुभयोर्वापि चतुर्दश्यां च कारयेत् ॥ अश्विनस्य विशेषेण भूताष्टम्यां युधिष्ठिर ॥ स्नापयेत् क्षीरमध्वाज्याद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिभिःशर्करान्वितैः ॥ तेषां वासः शिवपुरे ह्याचतुर्युगसप्ततिं ॥ साष्टांगेन नमस्कारः प्रयुक्तस्तत्र यैः शिवे॥संसारबंधविछेदस्तैः कृतः
कृतकृत्यकैः ॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं ॥ ॐनमः शिवायेति मंत्राभ्यासस्थिरीकृतः ॥ पंचामृतेन संस्नाप्य पूजइ-
त्वा च भक्तितः ॥ रात्रौ जागरणं कृत्वा यामे यामे तथार्चनं ॥ समाहितमना भूत्वा संगचापल्यवर्जितः ॥ नरो यत्फलमाप्नोति
तद्वक्षे शेलतस्तव ॥ वार्द्धक्यपीडितो वापि तव भक्त्या वदाम्यहं ॥ ये त्वेवमुपचारैस्तु पूजयंति महेश्वरं ॥ ते यांति परमं स्थानं
भित्वा वै सूर्यमंडलं ॥ सततं सर्वसौख्यानां निलयास्ते भवंति च ॥ आश्रया ज्ञातिवर्गाणा धर्माणां मालयास्तथा ॥ संपन्नाः स-
र्वकामैश्च जायंते भुवि भारत ॥ श्राद्धं तत्रैव यः कुर्यान्नर्मदोदकमिश्रितं ॥ सुवृत्तैर्ब्राह्मणैस्तत्र कुलीनैश्च सुपाठकैः ॥ कारयेत्पिंड-
दानं च भास्करे तुतपस्थिते ॥ पितॄणां परमं लोकं यदीच्छेच्छ्रेयआत्मनः ॥ तस्मात्सर्वप्रयत्नेन योग्यं विप्रं तु कारयेत् ॥ नरका-
न्मोचयेद्वंशान् कुंभीपाकादिकान्नृप ॥ हेमरूप्यं द्विजे दद्यात्प्रीयंतां पितरस्त्विति ॥ अन्नं वस्त्रं जलं गां च भूमिछत्रमुपानहौ ॥
द्विजे दत्वा महाराज न च शोचेत्कृताकृते ॥ स पुमान्सर्वमाप्नोतीत्येवं प्राह महेश्वरः ॥ देहं त्यजेच्च यस्तत्र शिखिना वा जलेन
वा ॥ अन्नाशकेन वा राजन्सगच्छेच्छंकरं पुरं ॥ वसेच्छिवगणैः सार्द्धं यावदिंद्राश्चतुर्दश ॥ पुनः स्वर्गाच्चयुतः सोपि राजा भवति
धार्मिकः ॥ शीलौदार्यगुणैर्युक्तः प्रजापालनतत्परः ॥ ततः स्मरति तत्तीर्थं पुनः स्वर्गं पुनर्नृपः ॥ इति श्रीरेवाम-
हात्म्ये उत्तरे नारायणबदरिकाश्रमतीर्थनाम त्रयोदशशततितमोध्यायः ॥ ११३ ॥ श्रीमार्कंडेय उवाच ॥ ततो
गच्छेत् राजेंद्र नर्मदादक्षिणे तटे ॥ नलेश्वरं नाम तीर्थं सर्व काम फलप्रदं ॥ पूतिकेश्वरतीर्थाद्वै क्रोशमात्रे स्थि-
तं शुभं ॥ लंकेश्वरं पुरा हत्वा कपिसैन्यं समागतं ॥ रामलक्ष्मणसंयुक्तं रेवातीरे ह्यवस्थितं ॥ तन्मध्ये नलनामं
वै कपिर्यः सेतुबंधकृत् ॥ तेनाप्यत्र तपस्त प्त्वा स्थापितं लिंगमुत्तमं ॥ नलेश्वराभिधानं हि पापकर्मप्रणाशनं ॥ पुण्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११४ नलसदस्तत्र ऋषिसिद्धनिषेवितं ॥ सेवितं कपिवृद्धैश्च नलेनाधिष्ठितं पुरा ॥ नलस्य तपसा पूतं संपूतं सिद्धिलक्षणैः ॥
११५ तत्र यो निवसेत्पार्थ षण्मासं वत्सरं तु वा ॥ स भवेत्पूतकायो वै यदि सत्यं वदेत्सदा ॥ तत्र तीर्थे नरः स्नात्वा योर्चयेद्वै नलेश्वरं ११४
॥ स याति परमं स्थानं यत्र गत्वा न शोचति ॥ तथैव माघमासस्य पूर्णिमायां युधिष्ठिर ॥ घृतेन पूरयेल्लिंगं तिलपृष्ठेन वा शुचिः ११५
॥ न दुःखं दुर्गतिं सोपि लभते वै क्वचिन्नरः ॥ नलेश्वरे च यस्तीर्थे कुरुते श्राद्धमादरात् ॥ विधिना भोजिते नेकसहस्रं भोजितं
भवेत् ॥ भवंति पितरस्तृप्ता यावदाद्दशताष्टकं ॥ घृतेन दीपकं दद्यादायुः कांतिबलप्रदं ॥ अष्टम्यां वा चतुर्दश्यां पूजयेद्यो नलेश्वरं
॥ यथालब्धोपहारैस्तु स लभेद्वांछितं फलं ॥ नलेश्वरस्य तीर्थस्य कारणं कथितं मया ॥ श्रवणात्कीर्तनादस्य नरो यज्ञफलं लभेत्
॥ इति श्रीरेवा० दक्षिणेनलेश्वरतीर्थं॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ मम तीर्थं सुशोभनं॥ पुराद्वैपायनंव्यासं द्रष्टुं वै गत-
वानहं ॥ द्वीपस्थितं महात्मानं वेदव्यासं तपो निधिं ॥ मूर्तिंनारयणं साक्षात्क्ष्मागतं क्षमिणांवरं ॥ सार्द्धं द्वैपायनेनाहं कियत्का-
लमवस्थितं ॥ तपोनियमयोगैश्च तीर्थं तत्र मया कृतं ॥ स्थापितंःपरमं लिंगं मम नाम्ना तदा नृप ॥ मार्कंडेश्वरसंज्ञं वै भुक्तिमुक्ति
फलप्रदं ॥ तत्र स्नात्वा नरो राजन् श्राद्धं कुर्याद्विधानतः ॥ पिंडदानेन चैकेन पितॄणां तृप्तिरक्षया ॥ मम तीर्थं समासाद्य शाकमू-
लफलैरपि ॥ एकस्मिन् भोजिते विप्रेकोटिर्भवति भोजनं ॥ तत्र तीर्थे नरस्नात्वा गिरिशं विधिनार्चयेत् ॥ स वै पापविनिर्मुक्तः
शिवलोके महीयते ॥ सर्वकालं जपेद्रुद्रं स्नात्वा तत्र नृपोत्तम ॥ विशेषेणं सिताष्टम्यां कार्तिके च विशेषतः ॥ दीपमुज्वालये द्भ-
क्त्या देवस्याग्रे युधिष्ठिर ॥ अहोरात्रकृते दीपे कुलानां तारयेच्छतं ॥ अन्नोदकप्रदानेन तृप्तः स्यात्प्रतिजन्मनि ॥ इति रेवामहा-
त्म्येदक्षिणे मार्कंडेश्वरतीर्थंनाम चतुर्दशशततितमोध्यायः ॥ ११४ ॥ ततो गच्छेत राजेंद्र व्यासतीर्थमनुत्तमं ॥ दुर्लभं त-
न्मनुष्याणामंतराले व्यवस्थितं ॥ १ ॥ युधिष्ठिर उवाच ॥ कस्मान्मुने व्यासतीर्थं मंतरालस्थितं महत् ॥ वेदव्यासकृतं चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरितं ब्रूहि मे मुने ॥ समासादपि साधूनां श्रुतं सर्वार्थसाधनं ॥ मार्कंडेय उवाच ॥ साधु साधु महाबाहो धन्योधर्मात्मजध्रुवं ॥ धर्मस्य पृच्छको धर्मी त्वमतो धर्मवत्सलः ॥ स्वधर्मनिरतः पार्थ तीर्थयात्रा कृतादरात् ॥ त्वत्समो नास्ति नैवाभून्न भविष्यो नरेश्वरः ॥ दुर्लभं हि मनुष्याणां व्यासतीर्थं युधिष्ठिर ॥ पीडितो वृद्धभावेन न कल्पोहं नृपात्मज ॥ चित्ते च दुर्बलस्तद्वत्संजातः स्मृतिवर्जितः ॥ गुह्याद्गुह्यतरं तीर्थं नाख्यातं कस्यचिन्मया ॥ तत्र तीर्थे कलिः पार्थ नविशेव्द्यासवाक्यतः ॥अंतर्द्वीपे तु संजातं रेवाया वेष्टनेन तु ॥ वक्तुं विधिर्न शक्तो वै रेवाया गुणविस्तरं ॥ अहं तव कथंज्ञास्ये रेवाया गुणसंयुतिः ॥ व्यासतीर्थविशेषं तु लेशमात्रं ब्रवाम्यहं ॥ प्रत्यक्षः प्रत्ययो यस्य दृश्यतेत्र कलौ युगे ॥ विहंगो याति नो यस्य हित्वा मूलं कृतादरः ॥ (सुदारुण इतिद्वितीयःपाठः) ॥ तस्योत्पत्तिं समासेन कथयिष्ये नृपात्मज ॥ आस्ते तपोधनो ज्ञानी ऋषिर्नाम्ना पराशरः ॥ तेनात्युग्रं तपश्चिर्णं गंगांभसि पुरानघ ॥ स्थितोसौ धारणायोगात्प्रतिष्ठो जान्हवीह्रदे ॥ पूर्णे द्वादशमे वर्षे निःक्रांतो जलमध्यतः ॥ पारणं कर्तुकामोसौ दृष्ट्वा संबपरेतटे ॥ भिक्षार्थी क्रमणेच्छुस्तं ग्रामं गंतुमुपागतः ॥ तत्र तेन परा दृष्टा बालातीव मनोहरा ॥ तां दृष्ट्वा कामबाणार्तः प्रोवाच मधुरं तदा ॥ पराशर उवाच ॥ मानयस्व परं पारं कासि त्वं मृगलोचने ॥ नावारुढा नदीतीरे मम चित्तप्रमाथिनी ॥ एव मुक्ताथ सा तेन प्रणम्य ऋषिपुंगवं ॥ कथयामास चात्मानं दृष्ट्वार्तं काममोहितं ॥ कैवर्तानामहं पुत्री कुमारी द्विजसत्तम ॥ बेडासंरक्षणायाहमाज्ञप्ता स्वामिनो विभो ॥ मया निवेदितं शेषं ज्ञातुमर्हति वैभवान् ॥ एवमुक्तस्तया सोथ क्षणं ध्यात्वा ब्रवीदिदं ॥ पराशर उवाच ॥ अहंज्ञानबलाद्भद्रे विद्मि वृत्तं तवाखिलं ॥ कैवर्तपुत्री कामं त्वं राजकन्यासि सुंदरि ॥ प्रादुर्भावश्च ते दिव्यो ब्रवीम्यहमतः शुभे ॥ कन्या उवाच ॥ कः पिता कथ्यतां ब्रह्मन् कस्याहमुदरोद्भवा ॥ कस्मिन्वंशे प्रजाताहं कैवर्ततनया कथं ॥ ऋषि रुवाच ॥ कथयामि समस्तं ते तत्पृष्टोहं त्वया शुभे ॥ वसुनामा पुरा राजा सोमवंशे प्रतापवान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जंबुद्वीपाधिपो भद्रे शत्रुसंतापकः सदा॥शतानि सप्त भार्याणां पुत्राणां च तथा दश॥तस्यासन् भरतश्रेष्ठ धनं सैन्यं त्वसंख्यकं॥धर्मेण
पालयेल्लोकानीश्वरः सर्वपूजितः ॥ म्लेंछास्तस्य विधेयाश्च क्षीरद्वीपनिवासिनः ॥ तेषां च साधनार्थाय गतोल्लंघ्य महोदधिं ॥ सं-
युक्तः पुत्रभृत्यैश्च पौरुषे महति स्थितः॥ संग्रामस्तैः समारब्धश्चार्वंगि वसुना सह ॥ जिताम्लेंछाश्च ते सर्वे तेन राज्ञा सुलोचने ॥
करदास्ते कृतास्तद्वत्सपुत्रबलवाहनाः॥ वसोः प्रधानेन राज्ञा तव माता मृगेक्षणे॥ नृपे पतौ प्रवासस्थे संजाता सा रजस्वला॥ ना-
रीणां च सदाकालं मन्मथोह्याधिको भवेत् ॥ विशेषेण ऋतौ प्राप्ते भिद्यते कामसायकैः ॥ मन्मथेन तु सा क्लिष्टा किं कार्यमित्य-
चिंतयत् ॥ दूतं वै प्रेषयामास वसुराज्ञः समीपतः ॥ आहूतः सत्वरो दूतो गच्छ भो नृपसन्निधौ ॥ दूत उवा-
च ॥ परतीरगतो देवी राजा रिपुकुलांतकृत् ॥ नशक्यते तत्र गंतुं विनाप्रवहणं शुभे ॥ यानान्यपि च नीतानि
तान्यब्धे हि परे तटे ॥ दूतवाक्येन सा राज्ञी विषण्णा कामपीडिता ॥ सखी प्रोवाच तां राज्ञीं देवी किं परितप्यसे ॥
राज्ञी च गतिमान्वीरस्तव पार्श्वे वरानने ॥ सवै प्रस्थापतेलेखं गले बध्वा नृपांतिके ॥ देवी जात्याशकुंतानां द्वीपे
द्वीपांतरे दिवि ॥ दुर्गोदरेऽथ पतता मगतिर्वै न विद्यते ॥ समुद्रं लंघयित्वापि शकुंतो याति सुंदरि ॥ सख्यैवमुक्तया राज्ञा स्वस्थी-
भूय शुभानने॥आहूतो लेखकस्तत्र लिख लेखं ममाज्ञया ॥ लिख विज्ञाप्तिकां भर्तुर्मदीयामितियं नृप ॥ भार्या ते सत्यभामाद्य वसोरा
जन् ऋतुं वहेत् ॥ ऋतुकालो हि संजातस्तस्येति लिख लेखक ॥ भार्या ऋतुमती राजन् तव जीवति मानवा ॥ लिखितो लेख-
केनैवं लेखो भूर्जस्य वल्कले ॥ पंजराच्छुकमानीय कीरकंठे नियोजिता ॥ तदा देव्या स्वहस्तेन बध्वा कीरो विसर्जितः ॥ गच्छ
लेखं गृहीत्वेमं शुक शीघ्रं नृपांतिकं ॥ इत्युक्तः स तया यातः शकुंतो लेखवाहकः ॥ व्योम शीघ्रमतिक्रम्य समीपं वसुभूपतेः ॥
शुके सलेखे संप्राप्ते सत्यभामाविसर्जिते ॥ उपलक्ष्य करे कृत्वा राज्ञा लेखोवधारितः ॥ लेखार्थं चिंतयित्वा च वीर्यं पर्णपुढे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यधात् ॥ अमोघां पुटिकां कृत्वा प्रतिलेखसमन्वितां ॥ कीरकंठे समारोप्य शार्ङ्गी गच्छेत्यनोदयत् ॥ विसर्जितः शुको राज्ञा तत्प्रगृह्योत्पपातह ॥ समुद्रोपरि संप्राप्तः शुकोगच्छन्यदृच्छया ॥ शुकं च सामिषं गत्वा श्येनस्तत्राभ्यधावत ॥ हतश्चंचुनखाघातैः शुकः श्येनेन भारत ॥ मूर्छापन्नस्य तद्बीजं पतितं जलमध्यतः मत्स्येन गिलितं तद्वत्तद्बीजं पार्थिवस्य हि ॥ कन्या मत्स्योदरी जाता तेन बीजेन सुंदरि ॥ लब्धवोसौ लुब्धकैर्मत्स्यआनीतः स्वगृहं ततः ॥ यावत्तंपाटयामासुः तावत्त्वां ते ददर्शतुः ॥ शशिमंडलसंकाशां सूर्यतेजसमप्रभं ॥ दृष्ट्वा तां हर्षिताः सर्वे कैवर्ता जान्हवीतटे ॥ ततस्ते त्वरितं गत्वा मुख्यपुंसस्तु मंदिरे ॥ स्वरितं कथयामासुर्गृहाणेति च तं प्रति ॥ अपुत्रेणाथ तेन त्वं गृहीता वरवर्णिनि ॥ स भार्यायै ददौ सोथ पालयेति सुतामिमां ॥ मार्कंडेय उवाच ॥ ततः सा चिंतयामास पराशरवचस्तदा ॥ उवाच भगवत्सत्यं तवाधीनास्म्यहं प्रभो ॥ जानिहि साधु मे ब्रह्मन् मत्स्यंगंधोनुवर्तते ॥ नतस्तेन सा बाला दिव्यगंधाधिवासिता ॥ कृता योगवलेनैव ज्वालयित्वा विभावसुं ॥ कृत्वा प्रदक्षिणं वन्हेरूढा वै तेन सा तदा ॥ जलयानस्य मध्ये स कामस्थानान्यथास्पृशत् ॥ दृष्ट्वा कामोत्सुकं विप्रं भीता सा धर्मनंदन ॥ उवाच साहसं बाला न धर्मोयं दिवा कृतः ॥ लोकस्य पश्यतः स्वामिन् न युक्तं प्रतिभाति मे ॥ मार्कंडेय उवाच ॥ ततस्तेन क्षणं ध्यात्वा संस्मृता धूष्टितामसि ॥ आगता तत्क्षणादेव माया सा तामसी नृप ॥ अंधकारंप्रकुर्वंत्यनया व्यासं समंततः ॥ ततः सा विस्मिता तेन कर्मणैव तु रंजिता ॥ ब्रह्मचर्याभितस्तेन स्त्रीसौख्यं क्रीडितं तदा ॥ ततः सा तन्मूहूर्तेन गर्भभारेण भारिता ॥ प्रसूता बालकं तत्रः जटिनं दंडधारिणं ॥ कमंडलुधरं शांतं मेखलाकटिभूषितं ॥ साक्षसूत्रोत्तरीयं च विष्णुमायाविवर्जितं ॥ मातापि शंकिता पार्थ दृष्ट्वा तं पुत्रमद्भुतं ॥ वेपमाना ततो बाला गतासा शरणं मुनिं ॥ दिव्यगंधा उवाच ॥ रक्ष रक्ष मुनिश्रेष्ठ पराशर महामते ॥ पश्य जातेद्भुते पुत्रे किंकर्तव्यं मया द्विज ॥ कौपिनमेखलादंडजटाजूटाक्षपाणिनं ॥ उत्तरियाजिनधरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कमंडलुविभुषितं ॥ पश्य पश्य मुने पुत्रं किंकरिष्याम्यथो सती ॥ पाराशर उवाच ॥ माभैषी त्वं सुते जाते कुमार्यवभ-
 विष्यसि ॥ नाम्ना सत्यवती भद्रे दिव्यगंधा पराख्यया ॥ तथा योजनगंधेति मत्स्यगंधेति पूर्ववत् ॥ शंतनुर्नाम राजा यः स ते
भर्ता भविष्यति ॥ गच्छ त्वं स्वगृहं भद्रे पूर्ववत्सुस्वरूपिणी ॥ मा विषादं कुरुष्वेमं दृष्ट्वा ज्ञानस्य मे बलं ॥ मार्कंडेय उवाच ॥
इत्युक्त्वा प्रययौ विप्रः सा बाला पुत्रमाश्रिता ॥ बालोपि जननीं दृष्ट्वा साष्टांगं प्रणिपत्य तां ॥ क्षम्यतामित्युवाचांब पीडयं यच्च
दुःकृतं ॥ इश्वराराधने यत्नं करिष्याम्यहमंबिके ॥ ततः सा पुत्रवाक्येन विषण्णा पांडुनंदन ॥ योजनगंधा उवाच ॥ त्वद्वियोगेन
मे पुत्र पंचत्वं वै भविष्यति ॥ नास्ति पुत्रसमस्नेहो नास्ति पुत्रसमं बलं ॥ नास्ति सत्यसमो धर्मो नानृतात्पातकं परं बालभा-
वमयाज्ञातआधारः किलजायसे ॥ न मे भर्ता न मे पुत्रः पश्य कर्मविडंबनं ॥ द्वैपायन उवाच ॥ मा विषादं कृथा मातः स-
त्यमेतत्सुभाषितं ॥ अपत्काले ह्यहं मातः स्मर्तव्यः कार्यसिद्धये ॥ आपदं वारयिष्यामि क्षम्यतां मम चांबिके ॥ इत्युक्त्वा प्रययौ
व्यासः कन्या सा च गृहं ययौ ॥ पराशरसुतस्तत्र निषण्णो वनमध्यतः ॥ त्रेतायुगावसाने च द्वापरादौ युधिष्ठिर ॥ एवं सति
सुराः सेंद्रा व्यासार्थे चितयान्विताः॥ नारदं परिपप्रछुरन्हि त्रैलोक्यचारिणं ॥ आख्यातं नारदेनाथ पुत्रः पाराशरस्तदा ॥ कैवर्त-
पुत्रिका पुत्रो ज्ञानिना जान्हवीतटे ॥ वाक्येन नारदस्याशु ध्यात्वा तत्वं विचार्यच ॥ ज्ञात्वा तद्दिव्यचरितमागताः सुरसत्तमाः ॥
वन्हिः पितामहः शक्रःसोमार्कांबुपमारुताः॥ ब्रह्मपुत्राश्च सर्वेपि ऋषिसंघैःसमावृताः॥ आशीर्दत्वा पृथक्सर्वे साधुसाध्वित्यथोचिरे ॥
विधिना संस्कृतो बालो गर्भाद्यैः कर्मभिर्नृप॥द्वैपायनाख्यां सगतो द्वीपे जन्म यतोस्यहि ॥ कृताश्रमस्तथा द्वेपे पाराशर्यः पराशकृ-
त् ॥ कृष्णांशात्कृष्णवर्णाच्च कृष्णनामा ऋषिर्मतः ॥ वेदव्यासो भवन्नाम्ना यतो वेदान् व्यसिष्यति ॥ विचारं नाभिषिक्तोसौ ॥
ऋषिसंघैः पुनःपुनः ॥ व्यासस्त्वं सर्वलोकानां इत्युक्त्वा प्रययौ ततः ॥ तीर्थयात्रा समारब्धा कृष्णद्वैपायनेन च ॥ गंगावगाहिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेन केदारं पुष्करं गया ॥ काशी च नैमिषं तीर्थं कुरुक्षेत्रं सरस्वती ॥ उज्जयिन्यां महाकाले प्रभासे सोमनाथजे ॥ नद्यः क्षेत्राणि सर्वाणि तथैवायतनानि च ॥ पृथिव्यां सागरांतायां विचचार महामुनिः ॥ स्नात्वार्चनादि विधिना कुर्वन् तीर्थावगाहनं ॥ ध्यानेन विमृशं तीर्थं कतरं स्यादनश्वरं॥ चतस्रस्तु महानद्यो दृष्ट्वा तेना विनश्वराः। कल्पांतेपि हि महाराज ताः शृणु त्वमघापहाः॥ सरस्वती जया गंगा नर्मदा तपनोद्भवा ॥ तापी तापियसां शुद्धिमावहंत्यपि च स्मृताः ॥ तत्रापि परमा शक्तिर्नर्मदाया नलेश्वर॥ यज्जलप्लुत पाषाणः पूपूजितो वांछितार्थदः ॥ प्रोस्फुरीति महः शैवं शिलायां यज्जलाश्रयात् ॥ सा किं न सेविता दद्यादीश्वरत्वं हि मानुषे ॥ नदीष्वस्मासु रेवाया विशेषो यं विभाति मे ॥ दृषदप्यर्चितो यस्या ददाति खलु वांछितं ॥ लक्षकल्पसमा ह्येता यदि स्युःसरितो नृप ॥ तथापि नर्मदासाम्यं न भजंतीति मे मतिः॥ सर्वाः संभूय सरितस्तत्पदं न ददंति हि॥ यथा तथा भ्यर्चितोपि रेवाश्मा यत्पदप्रदः॥ त्रिपापसंघहरा नूनं नृणामेताः सरिद्वराः ॥ भुक्तिमुक्तिप्रदा त्वेकारेवा देवादिदुर्लभा ॥ यदि संसारदुःपारपदवीभंगमिछति ॥ त्रिनेत्रतटिनानीरं नियमात्तं निषेवतु ॥ एताह्यनश्वरा नद्यो दृष्ट्वा द्वैपायनो मुनिः ॥ स्वर्धुनी द्वीपजातोपि विशेषं वै विचारयन् ॥ अमृतां नर्मदां प्राप्तो रुद्रदेहोद्भवां शुभां ॥ साल्हादो नर्मदां दृष्ट्वा विश्रांतं चेतसो गमत् ॥ रेवातीरे ततःस्थित्वा चचाल विपुलंतपः ॥ ग्रीष्मे पंचाग्निमध्यस्थो वार्षासु स्थंडिलेशयः ॥ हेमंते जलमध्यस्थो ध्यायन्वै परमेश्वरं ॥ सृष्टिपालनसंहारकारणं परमं शिवं ॥ लिंगं सिद्धिप्रदं स्थाप्य पूजयन्ननिशं मुनिः ॥ पूजनात्सिद्धिलिंगस्य ध्यायन् योगप्रभावतः ॥ प्रत्यक्षः शंकरो जातः कृष्णद्वैपायनस्य वै ॥ प्रोवाचमधुरंवाचं साक्षान्मूर्तिर्महेश्वरः ॥ ईश्वरोवाच ॥ तोषितोहं त्वया वत्स वरं प्रार्थय वांछितं ॥ अदेयमपि दास्यामि तपसा तोषितस्तव ॥ व्यास उवाच ॥ यदि तुष्टोसि मे देव यदी देयो वरो मम ॥ यन्मया त्वं सदाध्यातो भवेथा दर्शने मम ॥ यदाह त्वामिहागत्य सदा पर्वणि पर्वणि ॥ पूजयामि तदात्मानं दर्शानियं महेश्वर ॥ त्वं च सिद्धेश्वरो नाम्ना ध्रुवस्तिष्ठेह शंकर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ प्रथमं सिद्धिदो यस्मात्तपसो मे जगत्पते ॥ त्वयि भक्तिस्थिरां देहि योगसिद्धिं च निर्मलां ॥ व्यासं करिष्ये वेदानां देहि भक्तिं
च तत्र मे ॥ महेश्वर उवाच ॥ एवं भवतु मे सर्वं मत्प्रसादादसंशयं ॥ त्वया यद्वांछितं सर्वं त्वदुक्तं च भविष्यति
॥ त्वया भक्तिग्रहीतोहं प्रत्यक्षो नर्मदातटे ॥ मुनेसिद्धिश्वरो नाम निवासिष्यामि सर्वदा ॥ स्थापयस्व द्वितीयं मे लिंगं व्यासे-
श्वराह्वयं ॥ भुक्तिभुक्तिप्रदं नृणां स्मर्तृणां सिद्धिसाधनं ॥ इत्युत्त्का देवदेवेशस्तत्रैवांतरधीयत ॥ व्यासोपि वचनात्तस्य स्थाप-
यित्वा सनातनं ॥ पत्निसंग्रहणं चक्रे ब्रह्मणो वचनात्ततः ॥ शास्त्रेक्तेन विधानेन पत्नीपालयतःकिल ॥ पुत्रो जज्ञे ह्यपुत्रस्य
पराशरसुतस्य च ॥ पुष्पवृष्टिरभूत्तत्र द्वीपे द्वैपायनोपरि ॥ देवैर्वर्द्धापितौ तौ हि पितापुत्रौ स्वजिष्णुभिः ॥ पुत्रजन्म ततः श्रुत्वा
आगता ऋषिसत्तमाः ॥ तीर्थयात्राप्रसंगेन पराशरपुरोगमाः ॥ मन्वत्रिविष्णुहारीतयाज्ञवल्कोशनोंगिराः ॥ यमापस्तंबसंवर्त्ताः
कात्यायनबृहस्पतीः ॥ गर्गौ कौत्सब्रहद्विष्णुः पुलहासितदेवलौ ॥ मरींचिः क्रतुएवौच वसिष्ठभृगुगौतमाः ॥ एवमादिसहस्राणि पं-
चाशल्लक्षसप्तकं ॥ सशिष्यास्ते महाभागा रेवातीरमुपागताः ॥ व्यसाश्रमे शुभे पुण्ये संतोषार्थं द्विजोत्तमाः ॥ दृष्ट्वा व्यासोपि
विप्रेंद्रानभ्युत्थानकृतादरः ॥ पितृपूर्वं प्रणम्यादौ सर्वेषां तु यथाविधिः ॥ आसनानि ददौ भक्त्या दारुदर्भाश्मजानि तु ॥ मृद्भवा-
नि तृणोत्थानि तेभ्यश्चार्घं प्रदाय च ॥ कृतांजलिपूटो भूत्वा वाक्यमेतदुदीरयत् ॥ आद्याहमुद्धृतो नूनं युष्मत्संभाषदर्शनात् ॥
धन्योहं कृतपुण्येहं धन्यश्चायं ममाश्रमः ॥ वन्यानि फलमूलानि कृपया भुज्यतामिह ॥ पुण्यं तीर्थोदकं चैतच्छाकान्यारण्यकानि
च ॥ तानि दास्यामि युष्मभ्यं पितृपूर्वं मुदान्विताः ॥एवं न्यमंत्रयत्सर्वान्प्रत्येकं तान्प्रणम्य तु॥ततस्ते प्रणतं दृष्ट्वा कृष्ण द्वैपायनं
मुनिं ॥ वर्द्धयित्वा जयाशीर्भिर्वीक्ष्य चक्रुः परस्परं ॥ पाराशरसमस्तैश्च वीक्षितो मुनिपुंगवैः ॥ उत्तरं दीयतां तात कृष्णद्वैपायनस्य
तु ॥ एवमुक्तस्तु तैः सर्वैं र्मुनिर्मुख्यः पराशरः ॥ उवाच पुत्रं तं कृष्णमृषीणां यच्चकीर्षितं ॥ पराशर उवाच ॥ नेच्छेति द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षिणे कुले व्रतभंगभयादिमे ॥ भोजनं भो कुकामाहि श्राद्धे चैव विशेषतः ॥ तीर्थे वायतने क्षेत्रे सर्वत्रोत्तरचारिणः ॥ दक्षिणे दिक्पितॄणां हि वल्लभानसुरेप्सिताः ॥ व्यास उवाच ॥ करोमि भवतामुक्तं अत्रैव स्थीयतां क्षणं ॥ यावत्प्रसाद्य सरितं करोम्यद्य भवद्धितं ॥ एवमुक्त्वा शुचिर्भूत्वा नर्मदातटमाश्रितः ॥ प्राणायामपरो भूत्वा मूहूर्तं ध्यानमास्थितः ॥ स्तोत्रं जगाद स मुनिस्तं निबोध नरेश्वर ॥ जयभगवति देवी नमो वरदे जयपापविनाशिनि बहुफलदे ॥ जयशुंभनिशुंभकपालकरे प्रणतासि सुरासुरआर्तिहरे ॥ जयचंद्रदिवाकरनेत्रधरे जयपावकभूषितमुखकुहरे ॥ जयमहिर्निवेदनशूलकरे जयभैरवदेहनिवासकरे ॥ जयल्लोकविशोककराप्तिधरे जयविश्वपितामहशंभुनते ॥ जयलोकपालसुरमुनिनमिते जयषण्मुखगणपतिशर्वनते ॥ जयसुरकिन्नरतनुनिभृते जयसागरगामिनिभर्गसुते ॥ जयल्लोकविशोधनशीलयुते जयविविधदरिद्रविनाशकरे ॥ जयसेवकवंशविवृद्धिकरे जयनाकविदर्शिनिनिरयहरे जयभवभयनाशिनिमुक्तिकरे ॥ मयि देहि दयाचक्षुर्देवि दैन्यार्तिनाशिनि ॥ दत्तेऽअंतफलं नोषस्तव रोषः कुलक्षयं ॥ यं यं कामयते कामं नरो हरतरंगिणि ॥ कामं काममवाप्नोति तां भजन् तं तमुत्तमं ॥ एतव्यासकृतं स्तोत्रं यः पठेच्छिवसन्निधौ ॥ गृहे वा शुद्धभावेन कामक्रोधविवर्जितः ॥ अहं तस्य सदा प्रीतो रेवा च वृषभध्वजः ॥ विशेषात्तुष्यते रेवा सर्वपापक्षयंकरी ॥ यमलोकं न ते यांति यैस्तुता भुवि नर्मदा ॥ पितामहोऽशुतुष्येत रेवाया गुणकीर्तने ॥ वाक्पतिर्नैव जानाति चरित्रं नार्मदं किल ॥ कथं गुणानहं देवि त्वदीयान् ज्ञातुमुत्सहे ॥ यथा मया रुजुबुध्या स्तुता त्वं श्रीनर्मदे विश्वप्रतिप्रसूते ॥ तथा प्रसन्ना भव शुद्धशीले मय्यंबमानंदधतःसरित्सु ॥ बालो यथोत्संगगतो हि लाल्यो मात्रा च गर्भो हि यथा प्रपाल्यः ॥ देहस्थितो नृत्यइवानुपाल्यस्तथाहमंबे तव चाभिपाल्यः ॥ हर्षप्रदं हि पित्रोः प्रलपितमंबे यथैव बालस्य ॥ स्तुत्या तद्वत्प्रलपितमधुना रेवे मम त्वया मान्यं ॥ एवं वदति वै व्यासे रेवा गिरिशनंदिनी ॥ वाङ्मनःकायशुद्धं तं मुनिं ज्ञात्वा नृपोत्तम ॥ प्रसन्ना नर्मदादेवी ततो वच-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमब्रवीत्॥रेवा उवाच॥ भोभोव्यास ऋषिश्रेष्ठ तुष्टाहं सत्यशीलतः ॥यद्यदिच्छासि चित्ते त्वं ब्रूहितत्ते ददाम्यहं॥लभस्व परमं कामं मत्तः
सत्यवतीसुत॥व्यास उवाच ॥ यदि तुष्टोसि मे देवि यदि देयो वरो मम॥आतिथ्यमुत्तरे कुले ऋषीणां दातुमुत्सहे ॥ नर्मदा उवाच ॥
अयुक्तं याचितं व्यास अमार्गो यत्प्रवर्त्तनं ॥ अन्यं वरय मे पुत्र यत्किंचिद्भुवि दुर्लभं ॥ एतदाकर्ण्य रेवाया व्यासो मूर्छां तदागमत् ॥
क्षणमेकं विचिंत्याथ पतितो धरणीतले ॥ पतमानेन व्यासेन सशैलवनकाननं ॥ पृथिवी चलिता सर्वा रविश्चंद्रं समेभवत् ॥
मूर्छापन्नं तदाव्यासं दृष्ट्वा शक्रादयः सुराः ॥ आयातास्तत्र ते सर्वे सिद्धा हाहेति वादिनः ॥ व्यासमुत्थापयामासुर्वेदव्यासंनत-
मरं ॥ ब्राह्मणाउचुः ॥ जयदेवि महासिंधो महातोये सरिद्वरे ॥ सर्वज्ञांगसमुद्भुते सर्वभूतो पहारिणि ॥ देवाउचुः ॥ किंवदाम न-
जानीमो महसस्तेमितिंधुनि॥मुनिवर्यमिमं किंतु कृपया त्वं विभावय॥ब्राह्मणार्थे ह्यसंक्लिष्टे नात्महेतोः सरिद्वरे॥ततः कृपाकटाक्षेण
शीघ्रमेनं व्यवर्द्धय ॥ इत्यपि श्रूयते देवि सुराणोधर्मनिर्णये ॥ ब्राह्मणार्थे गवार्थे वाविवाहे स्वामिसंकटे ॥ सुरायतनभंगे च प्राण-
क्लेशोभिभूयते ॥ मार्कंडेय उवाच ॥ एवं सा नर्मदा प्रोक्ता ब्राह्माणाद्यैः सुरैरिह ॥ सस्मार चानिलं तत्र स्वकीयजलशीतलं ॥
तेनाभिषिक्तः समुनिर्वीजितश्च तयाततः॥ सचेतनः सत्यवत्याः सुतस्तां स्तांश्च दृष्टवान् ॥प्रणम्य नर्मदां देवीं नत्वा देवांश्च तान्मुनी-
न्॥ प्रहर्षमतुलं लेभे कृतांजालिरुवाचह ॥ व्यास उवाच ॥ तीर्थैः समस्तैः ससरिद्भिरादौ रुपाक्रमेर्जगतोंब मह्यं ॥ त्वं देवि मप्यद्य
नचेत्प्रसंन्नारेवे वरं मेमरणं हि तस्मात॥नर्मदा उवाच ॥ येन येन हि मां वत्स नेतुमिच्छाहित ते भुवि ॥ तेन मार्गेण यास्यामि
तवपृष्ठानुगामिनी ॥ नयस्व वोर्ध्वंविध्यस्व पातालं वापि यन्मुने॥पृष्ठौ दंडधरस्याहं लगिष्ये तवानिश्चितं॥एवमुक्तस्तया शीघ्रंव्यासः
सत्यवतीसुतः ॥ दक्षिणाशाविभागे तां चालयामास चाश्रमात् ॥ ततश्चांतर्दधे रेवा तत्रवैनृपसत्तम ॥यदादार्शितमार्गोपि प्रवाहो न
चले नृप ॥ दंडहस्तस्तदा व्यासो हुंकुर्वन्पुरतो ययौ ॥ व्यासहुंकारचाकिता चालिता रुद्रनंदिनी ॥ दडलैखिलमार्गेणपार्ष्णिस्पर्शपरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृप ॥ व्यासमार्गानुगां देवीं दृष्ट्वा सेंद्राः सुरोत्तमाः ॥ प्रववर्षुः पुष्पवृष्टि र्व्यासोपरिसुविस्मिताः ॥प्रोत्फुल्लनयनाप्रोचुः पराशरपुरोगमाः ॥ ऋषयऊचुः ॥ भोवत्स ब्रूहि किं कर्म कमर्णा तेतिरंजिताः ॥ किंचित्प्रार्थयसत्पुण्यं पराशरसुतप्रियं ॥ व्यास उवाच ॥ तपः कृत्वातिविपुलं दानं दत्वा महाफलं ॥ एतदेव नरैः कार्यं देवर्षिपरितोषणं ॥ यदि तुष्टा महाभागा अनुग्राह्योह्यहं यदि ॥ तस्मान्मदाश्रमे सर्वैः स्थातव्यं सुचिरं मुदा ॥ आतिथ्यं शाकपत्रैश्च तथामूलफलैरिह ॥ तथा तीर्थोदकैश्चापि मया कार्यं सुरर्षयः ॥ एवं निमंत्रितास्तेन व्यासेनामिततेजसा ॥ अंगीकृतं समस्तैस्तैः पराशरमुखैर्द्विजैः ॥ स्थातव्यमाश्रमे सर्वैः परितो नर्मदातटे ॥ उत्तरे व्यासवाक्यातौ कृतकृत्य क्रियैर्द्विजैः ॥ तस्य चैवाग्निशालायां वन्हेराराधनं कृतं ॥ बदरैःश्रीफलैश्चापि हुत्वा वै जातवेदासि ॥ आसीनाः स्वस्थचित्तास्ते ब्रह्मयज्ञं व्यधुस्ततः ॥ गौतमो भृगुमांडव्यो नारदासितदेवलौ ॥ पराशरो लोमशश्च पुलस्त्यः पुलहो यमः ॥ विश्वामित्रस्तथागस्त्यः कृष्णोद्दालकसंयुताः ॥ शांडिल्यो जिभिनिः कण्वो याज्ञवल्क्योशनांशुमान् ॥ शातस्तपस्तथा कुत्सः कपिलो गालवस्तथा ॥ वाच्छायनो दीर्घतपाः संवर्तः शक्तिरेव च ॥ जंतुकर्यो भरद्वाजो वालखिल्यादयस्तथा ॥ एवमादिसहस्त्राणि लक्षाणि च मुनीश्वराः॥अक्षमालाकराः सर्वे ध्यानयोगपरायणाः॥सर्वे समाहिताश्चक्रुर्जपहोमादिकाः क्रियाः॥आसीनानां च सर्वेषां मुनिनां वै महात्मनां॥शिवलिंगं समुत्पन्नं भूमिं भित्वा नृपोत्तम ॥ऋषीणामंतराश्चर्यकारणं कामदं महत्॥तदाश्रमे विश्वबंधं मोक्षदं व्याधिनाशनं ॥ अप्रतर्क्यपरं देवं दृष्ट्वा व्यासस्तुतोष वै ॥ पुष्पवृष्टिं सुराश्चक्रुर्ददुराशीर्द्विजोत्तमाः ॥ व्यासं प्रणम्य साष्टांगं दृष्ट्वा देवं च शंकरं ॥ तान्मुनीन्पूजयामास शाकमूलफलांबुभिः ॥ भोजिता ब्राह्मणाः सर्वे पितृमुख्या युधिष्ठिर ॥ अवर्जितानुव्राजिता यथायोग्यंमहात्मना ॥ आशिषः परमा पुण्या विप्रा दत्वा पुनर्ययुः ॥ पाराशरं तदा दृष्ट्वा मुनयो मुनिपुंगवं ॥ मार्कंडेय उवाच ॥ तदाप्रभृति तत्तीर्थं व्यासाख्यं प्रोच्यते बुधैः ॥ सर्वपापहरं पार्थ पापघ्नं भुक्तिमुक्तिदं ॥ युधिष्ठिर उवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यासतीर्थविधिं पुण्यं कथयस्व ममानघ ॥ यस्मिन् काले हि यत्कार्यं स्नानदानार्चनादिकं ॥ मार्कंडेय उवाच ॥ तीर्थस्यास्य विधानं हि पृच्छतस्तव भारत ॥ कथयामि समस्तं वै शृणु भ्रातृसमन्वितः ॥ कार्तिकस्य सिते पक्षे चतुर्दश्यां जितेंद्रियः ॥ उपोष्य मानवो भक्त्या रात्रौ कुर्वीत जागरं ॥ स्नापयेदीश्वरं भक्त्या क्षौद्रक्षीरेण सर्पिषा ॥ दध्ना च खंडयुक्तेन कुशतोयेन चाप्यथ ॥ चंदनेन सुगंधेन महेशमनुलेपयेत् ॥ ततः सुगंधपुष्पैश्च बिल्वपत्रैश्च पूजयेत् ॥ अर्कमंदारकोन्मत्तकुसुमैः कुशकाशजैः ॥ मुचुकुंदैश्च जात्याच मुनिपुष्पैर्जलोद्भवैः ॥ अन्यैश्च यज्ञतरुजैः पुष्पैः पार्थऋतूद्भवैः ॥ अर्चयेत्परया भक्त्या देवं द्वीपेश्वरं सुधीः ॥ इह गंडूकदानेन पातकं दिवसार्जितं ॥ देवस्य सार्पयेनस्ये दृष्टिभिः पक्षसंभवं ॥ मासार्जितं च नश्येद्वै गंडूकाष्टशतेन च ॥ षण्मासिकं सहस्रेण आह्निकं द्विगुणैस्तथा ॥ आजन्मजनितं पाप मयुतेन प्रणश्यति ॥ द्विगुणैर्नश्यति व्याधिस्त्रिगुणैश्च धनागमः ॥ षड्गुणैर्जायते वाग्मी सिद्धिस्तद्विगुणैस्तथा ॥ सुरेशत्वमसंख्यातैर्जायते पांडुनंदन ॥ पूर्णमास्यां नृपश्रेष्ठ स्नानं कुर्वीतभक्तितः ॥ मंत्रोक्तेन विधानेन स्नानं पापक्षयं करं ॥ वारुणं पार्थिवं ब्राम्ह्यं कृत्वा पापक्षयं करं ॥ देवान् पितॄन्मनुष्यांश्च आब्रह्मसकलं जगत् ॥ तर्पयित्वा महाराज विधिवज्जाप्यमाचरेत् ॥ ऋचमेकं जपेत्साम्नः सामवेदफलं लभेत् ॥ यजुषां च यजुर्वेदफलंरुग्वेदजं ऋचा ॥ सामवेदयजुर्वेदाऋग्वेदाद्यैश्चयत्फलं ॥ मंत्राणां च यथान्येषां गायत्र्या सर्वमाप्नुयात् ॥ जपेद्वा प्रणवं धीमान् त्र्यक्षरं पापनाशनं ॥ सौरं वा शिवदैवं वा मंत्रं पंचाक्षरं नरः ॥ अष्टाक्षरं वैष्णवं वा द्वादशाक्षरमुत्तमं ॥ श्राद्धं कुर्यात्प्रयत्नेन पितॄणां तृप्तिकारकं ॥ पूजयेद्ब्राह्मणान्॥ भक्त्या सर्वलक्षणलक्षितान्॥ स्वदारनिरता न्योग्यान् दंभलोभ विवार्जितान् ॥ भिन्नवृतिकरान् पापान् पातितान् शूद्रसेवकान् ॥ शूद्रीग्रहणसंयुक्तान् वृषलि यस्य मंदिरे ॥ परोक्षवादिनो दुष्टा गुरुदेवविनिंदकाः ॥ वेदनिंदापरास्तद्धेतुका बकवृत्तयः ॥ ईदृशान्वर्जयेच्छ्राद्धे दानेचापि व्रते तथा ॥ गायत्री सारमात्रोपि वरं विप्रः सुमंत्रितः ॥ नामंत्रितश्च तुर्वे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दी सर्वाशी सर्वविक्रयी ॥ इदृशान्पुजयेद्विप्रान् अन्नैर्दक्षिणया तथा ॥ उपानहौ च वस्त्रं च शय्यां छत्रं तथासनं ॥योददेद्ब्राह्मणाग्रेभ्यः सोपि स्वर्गे महीयते ॥ प्रत्यक्षा सुरभीदेया मुख्याश्च दश धेनवः ॥ गुडाधेनुमुखाः पार्थ दातव्या द्विजपुंगवे ॥ कृष्णाजिनप्रदानं च तथा धूर्वाहसीरयोः दत्वैवं तत्र शक्त्या वा अक्षयं स्वर्ग माप्नुयात् ॥ धूर्वाहौ शीरसंयुक्तो धान्योपस्करसंयुतो ॥ अक्षयस्वर्गकालस्तु दद्यादिति मतिर्मम ॥ भूतानां प्राणिनः श्रेष्ठा प्राणिभ्यो बुद्धिजीविनः ॥ बुद्धिमत्सुनरा श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥ ब्राह्मणेष्वपि विद्वांसो विद्वत्सुकृतबुद्धयः ॥ कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः ॥ तेष्वपि ज्ञाननिष्ठाश्च तस्मात्पात्रं हिते स्मृताः ॥ किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयं ॥ लभ्यते क्वापि तत्पात्रं दातारं तारयिष्यति ॥ प्रोच्यते त्रितयं पात्रं यद्वाशस्तं चतुर्मयं ॥ विद्यातपश्च वृत्तं च त्रिमयं तद्विदुर्बुधाः ॥ कुलं च त्रितयं वै तत् पात्रं प्रोक्तं चतुर्मयं ॥ केचित्पंचमयं प्राहुः केचित्प्राहुश्च षण्मयं ॥ धन्यं पंचमयं पात्रं वयसा चैभिरन्वितं ॥ शण्मयं पंचभिश्चैभिस्तथारूपेणसंयुतं ॥ षट्लक्षणानि पात्रस्य सप्तमं नोपपद्यते ॥ प्राप्य चैवं विधं पात्रं दद्याद्दानं स्वशक्तितः ॥ सूत्रेण वेष्टयेद्वीपमथवा जगतीं शुभां ॥ मंदरं वा सुरेशस्य तत्र वा पर मेश्वरं ॥ प्रदक्षिणाविधानेन यः सूत्रेणाभिवेष्टयेत् ॥ सप्तद्वीपाब्धिपर्यंता वेष्टिता तेन मेदिनी ॥ सप्तद्विपानि राजेंद्र जंबूप्लक्षोथ शाल्मलिः ॥ कुचक्रौंचस्तथा शाकः पुष्करश्चैव सप्तमः ॥ द्वीपेश्वरे च यः कुर्याद्वृषोत्सर्गं समाहितः ॥ अरुणेन वृषेणासावैश्वरं लोकमाप्नुयात् ॥ यस्तु वै पांडुरो वक्रे ललाटे चारुणस्तथा ॥ बभ्रुः खुरविषाणाभ्यां स वै नाकस्य दर्शनः ॥ नीलोयमीदृशः प्रोक्तो उत्सृज्यो द्वीपमध्यतः ॥ स समा रोमसंख्यानां स्वर्गलोके महीयते ॥ ससौरमैश्वरं लोकं वैरं च वैष्णवं तथा ॥ विचरेदिच्छया पार्थ व्यासतीर्थप्रभावतः ॥ भोजयित्वा प्रणम्याथ वदेदेवं कृतांजलिः ॥ अनेनात्र विधानेन प्रियतां मे जगद्गुरुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्ति विप्रसमो बंधुरिह लोके परत्र च ॥ यमलोके महाघोरे पीड्यंते याभिरक्षति ॥ द्वीपेश्वरं च ये भक्त्या संस्मरंति गृहे
स्थिताः ॥ न तेषां जायते शोको नहानिर्न च दुःकृतं ॥ प्रथमं पूजयेत्तत्र लिंगं सिद्धेश्वरं नृप ॥ यत्र सिद्धो महाभाग
ऋषिः सत्यवतीसुतः॥असौवाभ्यर्चनात्सिद्धःपाराशर्यो महामतिः॥अत्र तीर्थे तु यो राजन् प्राणत्यागं प्रकुर्वते॥जप्ते वानशने नाथवन्हौ
वा तत्फलं शृणु॥समाः सहस्राणि च सप्त वै जलैदशैकमग्नौ पतने च षोडश॥महाहवे षष्टिरशीति गोग्रहे अनाशने भारत चाक्षयाग
तिः ॥ गृहीत्वा नशनं तत्र प्राप्य ह्यक्षया गतिः ॥ शिवलोकं व्रजेत्पार्थ भित्वा वै भानुमंडलं ॥ पितरश्च तदा सर्वे पितृलो
के च येदिवि ॥ वायुभूता निरीक्षंते आगछंतं स्वगोत्रजं ॥ पुत्रेच्छां कुर्वते कोपि केचिज्जल्पंति वै मिथः ॥ कोप्य-
स्त्यस्य कुले गोत्रे योत्र दद्यात्तिलोदकं ॥ कार्तिक्यां व्यासतीर्थे तु वैशाख्यां वा समाहितः ॥ अस्माकमक्षया तुष्टिः स्वर्गति-
श्च तथाक्षया ॥ भवेत् पुत्रप्रसादेन पिंडैकस्यापि पातनात् ॥ एतत्ते कथितं सर्वं द्वीपेश्वरफलं शुभं ॥ विधानं तीर्थयात्राया सि-
द्धेश्वरसमन्वितं ॥ यः पठेच्छृणुयाद्वापि भक्त्या तद्गतमानसः ॥ सोपि पापैर्विनिमुक्तो मोदते शिवमंदिरे ॥ उषरं सर्व-
तीर्थानां निर्मितं ऋषिपुंगवैः ॥ कामदं च नृपश्रेष्ठ व्यासतीर्थं न संशयः ॥ इति श्रीवायुक्तशिवसंहितायां श्रीरेवामहात्म्ये दक्षिणे
व्यासतीर्थनामपंचदशशततितमोऽध्यायः ॥ ११५ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदाउत्तरे तटे
॥ किंचिन्यूने क्रोशमात्रे बदर्याश्रमतीर्थतः ॥ १ ॥ तीर्थं कोटिश्वरं नाम ऋषिकोटिविनिर्मितं ॥ ऋषिकोटी समायाता तत्रया
कुरुनंदन ॥ कृष्णद्वैपायनस्यादौ क्षोभार्थं मुनिपुंगवाः ॥ मंत्रयित्वा द्विजैः सर्वे वेदवेदांगपारगैः ॥ स्थित्वा पुण्यप्रदेशे तु रेवाया
उत्तरे तटे ॥ स्थापितस्तत्र वै शंभुः कारणं भवनाशने ॥ ज्ञानमोक्षप्रदो विप्रः कोट्या कोटीश्वराह्वयः ॥ स्नात्वा प्रतिष्ठितं लिंगं
पूजितं च तथाविधिः॥ कोटीश्वरमिति प्रोक्तं पृथिव्यां नृपनंदन ॥ संसारछेदकरणं तीर्थं सर्वाघनाशनं ॥ स्नापयेत्तत्र यो भक्त्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्णिमास्यां सुरेश्वरं ॥ विशोको जायते मर्त्यो मधुक्षीरादि पंचभिः ॥ गंधचंदनलेपेन आधिव्याधिविनाशनं ॥ पुष्पैर्नानाविधैः पूज्य भोगान्सर्वानवाप्नुयात् ॥ पितृणां तर्पणं कृत्वाश्राद्धं दद्याद्यथाविधिः ॥ श्रावणस्य विशेषेण पूर्णिमास्यां युधिष्ठिर ॥ प्राप्यते अक्षया तृप्ति र्यावदाहूतसंप्लवं ॥ पितृभिः कोटितीर्थे तु श्रद्धया नृपसत्तम ॥ पितृणापरमं कामंरेवातटसमाश्रितं ॥ मोक्षदं सर्वजंतूनां स्थापितं ऋषिपुंगवैः ॥ कोटितीर्थे महाराज यथासंपन्नभोजनैः ॥ एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजिता ॥ इति श्रीनर्मदा महात्म्ये उत्तरेकोटितीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र प्रभातीर्थमनुत्तमं ॥ क्रोशांतरे कोटितीर्थात्प्रभेश्वरमिति स्मृतं ॥ विख्यातं त्रिषु लोकेषु स्वर्गसोपानमुत्तमं ॥ युधिष्ठिर उवाच ॥ प्रभासं मे मुने ब्रूहि कथं जातं महाफलं ॥ स्वर्गसोपानमतुलं संक्षेपादपि मे वद ॥ मार्कंडेय उवाच ॥ दुर्भगा रविभार्या तु प्रभा नाम परिश्रुता ॥ तयाह्याराधितः शंभुरुग्रेण तपसा पुरा ॥ वाय्वाहारा स्थिता वर्षे शिवध्यानपरायणा ॥ ततस्तुष्टो महादेवः प्रभायाः पांडुनंदन ॥ ईश्वरोवाच ॥ कस्मात्त्वं क्लिश्यसे भद्रेवरं वरय वांछितं ॥ तुष्टोस्मि तपसानेन सूर्यभार्येहमत्र ते ॥ ममांशो भास्करो देशे नांतरं तत्र विद्यते ॥ ततः प्रणम्य साष्टांगं प्रभा विनयभूषिता ॥ व्यजिज्ञपन्महेशानं बध्वांजलिपुटा पुरः ॥ प्रभा उवाच ॥ नान्या देवस्त्रियः शंभो विना भर्त्रा कदापि हि ॥ सगुणो निर्गुणो वापि तत्राहंसखिमध्ये महेश्वर ॥ भर्तुरप्राप्तसौख्याहं तेनक्लिष्यामि कामद ॥ महेश्वर उवाच ॥ अप्रमाणं यदा वाक्यं भावतो भास्करे भवेत् ॥ तदा क्लेशो महान्देव प्रभाया जायते ध्रुवं॥असहंती महत्तेजो भास्करस्येयमागता ॥ उपसंहर तत्तेजस्तस्मात्किंचिन्महेश्वर ॥ ततो देव्या वचः श्रुत्वा ध्यातस्त्वष्टाशिवेनही ॥ तत्रागत्यस्वयं त्वष्टा शिवं प्रणमतुर्मुदा ॥ ययाचे सरविं पुर्वं तेजोसंवरणेऽसकृत् ॥ ततश्चाद्वाषसिमौसत्वष्टारं देववार्द्धुकिं ॥ शनैर्यंत्रे समारोप्य रवितेजः प्रशांतय ॥ श्रीमार्कंडेय उवाच ॥ ततः शिवाज्ञया त्वष्टा रवितेजःप्रशांतितं ॥ प्रसाभे तु रविं नीत्वा स्तुत्वा स्तुत्वा शनैः शनैः ॥ किंचि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 दुच्चारितं तेजस्ततः सौम्यो भवद्रविः ॥ आगतश्च तथा भर्तुर्नर्मदाउत्तरे तटे ॥ भानुरुवाच ॥ ममादिश जगंनाथ अंधकासुरसूदन ॥
नमोस्तु विश्वरूपाय सर्वतीर्थमयाय च ॥ महेश्वर उवाच ॥ प्रजापालयसे भानो संतोषेण परेण हि ॥ संतुष्टः सन्निधं देहि प्रभाया
भानुमान्तथा ॥ गौरी उवाच ॥ प्रभाया मंदिरे नित्यं स्थियतां हिमनाशन ॥अग्रपत्नी समस्तानां भार्याणां क्रियतां रवे ॥ भार्व्य
दुष्टेन पुष्टाया मदुष्टाया हि कर्हिचित् ॥ भार्त्रा पत्न्यां ध्रुवं भास्वन्नदुष्टेयमतामम ॥ त्वत्तेजो दुःसहं मत्वा तपस्तत्पुमिहागता ॥ तप-
सा तोषयित्वा नौ वरं प्राप्ता महेश्वरात् ॥ त्वयि कल्याणमिछंति सुभगेयं यथा भवेत् ॥ तथा कुरु वरं सत्यं प्रमाणं हरभाषितं ॥
भानु रुवाच॥ एवं देवी करिष्यामि तिथ्यं वै भवतो वचः ॥ एवमुक्तारविर्गौरीं स्वभार्यां स्वीचकारह ॥ करावलंबनेनाशु तां प्रभां
सौम्यमूर्तिमान् ॥ ततो वीक्ष्य प्रभा सोमं वरदं शूलपाणिनं ॥ अनुमान्यवतं भानुं शिवसंस्थापनेरता ॥ प्रतिष्ठाप्य परं लिंगं
कृतांजलिरभाषत ॥ प्रभा उवाच ॥ प्रसन्नो यदि मे देव कुरुषेऽनुग्रहं मयि ॥ स्वांशेन स्थीयतामत्र स्थापितो यत्र धूर्जटे ॥ तीर्थ-
सार्थकतां कर्तुं लोकानां हितकाम्यया ॥ प्रभेश्वरेति विख्यातो मन्नाम्ना नीललोहित ॥ महेश्वर उवाच ॥ एवं वदसि यत्पुत्रि तद्वै
सर्वं भविष्यति ॥ स्थितोहमत्र ते नाम्ना ख्यातो लोकेषु च प्रभे ॥ एव मुक्त्का देवदेवस्तत्रैवांतरधायित ॥ मार्कंडेय उवाच ॥ ए-
वं पार्थ तपस्तप्तं प्रभया सूर्यभार्यया ॥ सर्वदेवमयं लिंगं स्थापितं तत्र पांडव ॥ प्रभेश्वरमिति ख्यातं सर्वलोकोपकारकं ॥ अ-
न्यानि यानि तीर्थानि काले तानि फलंतिहि ॥ प्रभेश्वरं महाराज सद्यः पुण्यफलप्रदं ॥ माघे मासि सिते पक्षे सप्तम्यां पांडव-
र्षभ ॥ स्नानं यः कुरुते भक्त्या मृद्गोमयतिलादिभिः ॥ तिलोदकं पितॄणां च दत्वा संपूज्य शंकरं ॥ उषित्वा सूर्यभुवने स या-
ति शिवमंदिरं ॥ कालं मन्वंतरमितं शिवस्यानुचरो भवेत् ॥ अश्वं ददाति यस्तत्र सर्वलक्षणसंयुतं ॥ शक्रातिथ्यमवाप्नोति नि-
वसित्वा हरेःपुरे ॥ श्राद्धं पिंडप्रदानं च तत्र कृत्वा विधानतः ॥ प्रेतान् पितॄन्प्रीणयेद्वै यावद्वर्षायुतं नरः ॥ गोप्रदानाल्लभेत्स्वर्गं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यलोकं न संशयः ॥ सर्वांगसुंदरीं शुभ्रां क्षीरिणीं तरुणीं शुभां ॥ सवस्त्रां च सवत्सां च घंटादोहनसंयुतां ॥ ये ददंतीह भूपाल न ते यांति यमालयं ॥ अथवा परया भक्त्या कन्यादानं प्रयच्छति ॥ ब्राह्मेनैव विवाहेन दापयेत्पांडुनंदन ॥ समानवयसे देया कुलशीलदयान्विते ॥ ये ददंति महाराज अपि पातकसंयुतः ॥ तेषां पापानि नश्यंति लवणं तु जले यथा॥ स्वामिद्रोहोद्भवं पापं निक्षिपे स्वापहारजं ॥ मित्रघ्ने च सुरापे च कूटसाक्षिसमुद्भवं ॥ मानकूटोद्भवं यच्च परभार्यासमीहने ॥ तदा गोघातभदोत्थं परदारनिषेवणात् ॥ वार्द्धुष्ये चैव यत्पापं यच्च स्तेयसमुद्भवं ॥ ब्रह्मस्वहरणे यच्च देवस्वस्य च भक्षणे ॥ ग्रामकूटोद्भवं यच्च सर्वशूद्रोद्भवं च यत्॥ भ्रूणहंतरि यत्पापं यत्पापं भूमिहारिणि॥ माददस्वेति वदतो गोवन्हिब्राह्मणेषु यत्॥ तत्पापं विलयं याति कन्यादानेन भारत ॥ स भित्वा भास्करं लोकं रुद्रलोके व्रजेन्नरः ॥ क्रीडते रुद्रलोकस्थो यावदिंद्राश्चतुर्दश ॥ पृथिव्यामवतीर्णस्य भवे भवति भावना ॥ तथा व्रजति तत्तीर्थे प्रभेशं तु पुनःपुनः ॥ य एवं विधिना पार्थ कुरुते तीर्थसेवनं ॥ सोऽह्यमोघं फलं प्राप्य स्वर्गलोके महीयते ॥ इति श्रीरेवामहात्म्ये उत्तरे प्रभातीर्थनामषोडशशततितमोऽध्यायः ॥ ११६ ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदादक्षिणे तटे ॥ तीर्थंशुकेश्वरं नाम मार्कंडेश्वरसन्निधौ ॥ सार्द्धक्रोशांतरे तीर्थं तन्नलेश्वरतीर्थतः ॥ कृष्णद्वैपायनसुतो वर्षाष्टकवयाः पुरा ॥ शुकदेव इति ख्यातो वैष्णवो विष्णुवल्लभः ॥ गर्भेमेवस्थितो ज्ञानी योगीशो योगिवल्लभः ॥ पित्रा त्वध्यापितो गर्भे स्थितो द्वादशवत्सरान् ॥ संतोषः परमो जातः सुरर्षीणां चतद्दिने ॥ विष्णोर्वैकुंठभुवने तद्दिने वै कृतोत्सवः ॥ प्रल्हाद प्रमुखाः प्रापुः प्रहर्षं वैष्णवाजनाः ॥ ननर्त नारदश्चापि विविधं गानमाश्रितः ॥ एवं विधः शुको योगी द्वैपायनसुतो नृप ॥ तपस्येवाष्टवर्षीयः स्वयं चित्तंदधार सः ॥ पितुराश्रमपार्श्वे वै रेवातीरे तु दक्षिणे ॥ नित्यं त्रिषवणस्नायी शिवध्यायी जलाशनः ॥ स्थापयित्वा परं लिंगं प्रतिष्ठाप्य च पूजयन् ॥ यथाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्वोपहारैः स कुशाकाशशमीदलैः ॥ बिल्वपत्रैश्च मंदारैः सिंदुवारैः सदायजन् ॥ तिष्ठत्येत्वं कियत्कालमूर्द्धएव शुको मुनिः ॥ आ-
सीनश्च कियत्कालमेवं यजति शंकरं ॥ तस्यैवं तप्यमानस्य पूर्णवर्षशतं गतं ॥ जलाशनस्यानुदिनं ततस्तुष्टो महेश्वरः ॥ ब्रुवन्वै
साधुवत्सेति साक्षान्मूर्तिः सनातनः ॥ इश्वरोवाच ॥ वरं वरय भो वत्स द्वैपायनसुत प्रियं ॥ अदेयमपि दास्यामि तोषितो तपस-
स्तव ॥ अलं क्लेशैः कुमारोसि साहसं वत्समाकृथा ॥ शुकदेवोपि तत्स्थैवं वीक्ष्य देवस्य धूर्जटं ॥ तुष्टाव परया भक्त्या स्वभक्ता-
र्तिहरं हरं ॥शुकदेव उवाच॥ ॐनमो ज्ञानगम्याय नमः सर्वज्ञमूतये॥नमः सोमाय सोम्याय नमः सोमार्धमौलिने॥तापत्रयविना-
शायत्वं मेकोभिषजां वरः ॥ त्वत्सेवाभिषजं भव्यं भववैद्याय ते नमः ॥ नकेवलं वेद्मि समस्तवैकं गुणत्रयातीतमजन्मनाशं ॥ त-
दाख्यमष्टादशदोषमुक्तं तत्वातिगं त्वां विदुरेवधन्याः॥अपित्वदीयं च विराट्स्वरूपं ज्ञातुं न शक्तो स्मिशिनप्रसीद॥ श्रोतुं च वक्तुं च
गुणाग् गिरीश तवाखिलान् त्वां शरणं प्रपद्ये ॥ भुवोरधस्तानि तलानि पादौ शेषा हि शीर्षे किल संनिविष्टौ ॥ श्रोणीतटं भूरखि
ला च नाभी मेरोः शिरस्ते प्रवदंति पूर्वे ॥ आधारपीठं तव भूः प्रदिष्टा भुवश्च नाभि र्जठरं स्वरेव ॥ महस्तवोरः किलकंठपीठं
जनस्तपस्ते वदनं प्रदिष्टं ॥ सत्यं शिरस्ते सकलेश शंभो श्रुतिः श्रुती स्मरणं ते स्मृतिश्च॥ चंद्रार्कौ लोचने देवौ जिव्हा वाग्देवता
मता ॥ तत्तीर्थं लोचनं वन्हिर्विष्णुर्वक्षसि ते स्थितः॥वेदांगानि च तेंगानि पुराणानि च संधयः॥मेषोन्मेषावहोरात्री विज्ञानं ज्ञान-
संभवं ॥ ललाटे ते स्थितो ब्रह्मा वायुः सर्वशरीरगः ॥ सप्रपंचं वदंत्येके निःप्रपंचमथापरे ॥ प्रवृतिश्च निवृत्तिश्च द्वौ भावौ भवतो
मतौ ॥ तवेशकर्मत्रितयं प्रवदंति मनीषिणः ॥ सृष्टिपालनसंहारलक्षणात्रिगुणात्मनः ॥ केचित्त्वामाहुराचार्या एकमेव सनातनं ॥
मूर्तामूर्तिं तथैवैके वदंति स्वां बुधाद्विधा ॥ केपि त्रिमूर्तिं च तथा अष्टमूर्ति सनातनं ॥ कैश्चिच्छतसहस्राख्यमूर्तयस्ते प्रकीर्तिताः ॥
केचिदेकपदं प्राहुर्द्विपदं त्रिपदं परे ॥ चतुः पंचादिभेदैश्च केचित्केचित्प्रचक्षते ॥ तथैव मूर्द्धभेदास्ते कैश्चिदुक्ता महेश्वर ॥ सहस्रशी १७९

CC-0. In Public Domain. Digitization by eGangotri

र्षा पुरुषः सहस्रनयनो विभुः ॥ सहस्रांघ्रिधरः शंभुः सर्ववेदेषु गीयसे ॥ परंब्रह्म परंधाम वासुदेवाख्ययं ॥ त्वमेव जगतां नाथ
भेदोरूपस्य नान्यथा ॥ कर्मणा धार्यते रूपं संज्ञाचापि तथाविधा ॥ नैवादिपुरुषस्येह तव भेदोस्ति कश्चन॥त्वमेववासुदेवोसि त्वमे-
वासि महेश्वरः ॥ त्वयैव मूर्तयो देव जगव्द्यापारधारकाः॥ सृष्टिपालनसंहारभेदेषु निखिलेष्वपि॥इंद्रचंद्रार्कवरुणयमवन्ह्यनिलादिकाः
॥ मखस्त्वं मखकृद्देव मखभुक् मखपालकः ॥ मखघ्नो मखशृंगश्च मखज्ञः मखारूपिसत् ॥ यद्यद्वै भवमद्वस्तु तत्तद्वै भवमद्विदुः ॥
पुराणा मुनयः शंभो नवेद्मि त्वामतः परं ॥ शिवं वा केशवं वापि त्वामभेदेन ये श्रिताः॥ते वै स्वर्गापवर्गाख्यं सुखं यांति परं पदं
॥ तवचरणांबुजशरणं संहतमरणं भवाब्धिसंतरणं ॥ मुक्तिवसायावरणं करणातिगवस्तुसात्कारणं ॥ श्रीमार्कंडेय उवाच ॥ एवं
संस्तुतयस्तस्य मुनेर्माहेश्वरंमहः ॥ प्रोवाच भगवानीशः स्तुत्या संतोषितस्तया ॥ महेश्वर उवाच ॥ अलं श्रमेण ते वत्स स्तु-
त्याहं तोषितस्तव ॥ शुकसंसारिकं शोकं संत्यज्य वरयेप्सितं ॥ शुक उवाच ॥ यदि तुष्टो महेशानो मम मंदमतेविभो ॥ नान्य-
त्प्रार्थयितव्यं मे मुक्तासंसारनाशनं ॥ माभून्मम पुनर्जन्म द्वंद्वदुखाविलं शिव॥योगयुक्तिः परा मेस्तुः त्वयि भक्तिश्च निश्चला॥यो-
गिनामपि योगं हि बुद्धिराविष्करोतु मे ॥ कृतं कामरिपोः कर्म स्वल्पं वा यदिवा बहु ॥ महेश बाधकं मास्तु प्रार्थितं चेद्ददासि मे
॥ दया ते मयि देवेश यदि सत्या सुराधीप ॥ अस्मिन् लिंगे त्वया स्थेयमाकल्पं करुणाकर ॥ यश्च त्वमनया स्तुत्या स्तौति ता-
पत्रयापहं ॥ स प्राप्नोतु परं कामंवांछितं विविधं विभो ॥ सदालिंगमिदं चास्तु ब्रह्मविष्णुशिवात्मकं ॥ वांछितार्थप्रदं नृणां स्व-
र्गं मोक्षप्रसाधनं ॥ इत्येवमादि संप्रार्थ्यसाष्टांगं प्रणतोभवत् ॥ प्रसादस्ते प्रसन्नात्मान्निति संकीर्तयन् शुकः ॥ ततः करावलंबेन
तमुत्थाप्याशु योगिनं ॥एवंभविष्यतीत्युक्त्का तत्रैवांतरधीयत॥ ततः शुकोपितं देवं पूजयित्वा वृषध्वजं॥आपृच्छ्य पितरं व्यासं ती-
र्थानि विचचारह ॥ ततः प्रभृति तत्तीर्थं शुकेश्वरमिति स्मृतं ॥ सर्वपापक्षयकरं भुक्तिमुक्तिप्रदं परं ॥ संगमस्य च मध्यस्थं यज्ञादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलसाधनं ॥ उत्तमं सर्वतीर्थेभ्यः कर्मसिद्धिप्रदं नृप ॥ करजा नर्मदा मध्ये पुण्यं तीर्थं शुकेश्वरं ॥ ये वगाह्यार्चयंतीशं न ते शोच्या युधिष्ठिर ॥ लक्षहोमादि कर्माणि कोटिहोमादि कानि च ॥ यज्ञो दानं तपः पूजा सर्वं लक्षगुणं भवेत् ॥ तत्र तीर्थे च यः स्नात्वा तर्पयेद्देवपूर्वजान् ॥ स धन्यः पुरुषो लोके पितरस्तेन तोषिताः ॥ शास्त्रोक्तेन विधानेन पूजयेद्यः शुकेश्वरं ॥ पंचामृतेन संस्नाप्य तीर्थतोयैः शुभैरपि ॥ अर्घैर्नीराजनाद्यैश्च स्तुतिजाप्यैश्च पांडव ॥ पुत्रपौत्रादिकं प्राप्य स वसेच्छिवसंन्निधौ ॥ प्रथमैः पुज्यमानस्तु यावदिंद्राश्चतुर्दश ॥ ततोवतीर्ण कालेन राजराज्योभवद्भुवि ॥ समग्रैश्वर्यसंयुक्तश्चिरायान्दानवान्गुणी ॥ पुत्रपौत्रैः परिवृतो रूपवान् रिपुवर्जितः ॥ अत्र तीर्थे तु यो राजन् विधिवच्छ्राद्धमाचरेत् ॥ पितृणामक्षया तृप्तिं यावद्युगशतं नृप ॥ विशेषं चात्र ते वच्मि दाने तपसि भोजने ॥ तच्छृणुष्व परं गुह्यं श्रुत्वा पापक्षयोपि यत् ॥ वैष्णवं वापि शैवं वा तापसं यस्तु भोजयेत् ॥ व्रते श्राद्धे तथा पार्थ तत्पुण्यं वेत्ति वै शिवः ॥ नाकालमरणं तस्य पुत्रभार्यादिकस्य च ॥ न व्याधिजं भयं तस्य न च शत्रुकृतं भयं ॥ शुकतीर्थे महाराज शाकमूलफलैरपि ॥ तपस्विनं भोजयन्वै कुलानां तारयेच्छतं ॥ ब्रह्मचारिणमप्येकं योगीनां वा युधिष्ठिर ॥ तीर्थेस्मिन् भोजयन्शक्त्या भवेद्राग्यवतां वरः ॥ ब्रह्मचर्येण संपूज्य भक्त्या देवं शुकेश्वरं ॥ अर्कमंदारधत्तुरबिल्वपत्रादिकेन वा ॥ समाहितमना मौनी सत्याशौचसमन्वितः ॥ गणमुख्यो भवेन्नूनं शिवस्याकल्पमंतिके ॥ कृच्छ्रातिकृच्छ्रपाराकवृतैश्चांद्रायणादिकैः ॥ तोषयन् परमेशानं प्राप्नोति महतीं श्रियं ॥ एकांतरोपवासैश्च त्रिचतुःपंचषट्कृतैः ॥ पक्षमासोपवासैश्च चातुर्मास्यव्रतैरपि ॥ तोषयन् शंकरं भक्त्या सर्वपापक्षयं भवेत् ॥ अंते शिवपुरं याति लभेच्छैवं महस्ततः ॥ केचित्फलाशनाः पूर्वमिह केचिद्दलाशनाः ॥ केचिज्जलानिलाहारा इह सिद्धिं परां गताः ॥ योगपट्टाजिनं वासः कंबलं च कमंडलुं ॥ दत्वेह श्रद्धया पार्थ स्वर्गलोके महीयते ॥ पादुकोपानहौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

छत्रं फलानि विविधानि च ॥ शुकेश्वरे नरो दत्वा स भवेद्वै शिवप्रियः ॥ अन्नोदकप्रदानाच्च ब्राह्मणादिषु भारत ॥ माघे
मासि चतुर्दश्यां कार्तिके वा नृपोत्तम ॥ तथाष्टम्यां विशेषेण नरस्तरति दुर्गतिं ॥ विद्यादानं च यः कुर्यादिह तीर्थे युधिष्ठिर ॥
श्रुतिस्मृतिपुराणादि विधिवद्द्विजपुंगवे ॥ विद्यावृत्तवयः शीलगुणाढ्यायविशेषतः ॥ स वाग्मी रुपवान् ज्ञानी दीर्घायुरचलाश-
यः ॥ भवे भवे भवेत्सोत्र विद्यावान् विपुले कुले ॥ न पराभवमाप्नोति विवेकी कुत्रचिन्नरः ॥ विद्यादानसमं किंचिन्न पश्या-
मि युधिष्ठिर ॥ सर्वेषामन्यदानानां द्वित्रिजन्मैकगं फलं ॥ सरस्वतीप्रदानस्य सप्तजन्मानुगं फलं ॥ एकद्वित्रीचतुर्द्धा वा लभेद्दान-
फलं नरः ॥ धनधर्मायुषारोग्ययशः स्वर्गांश्च विद्यया ॥ वाचकाय नरो दत्वा वर्षाशनफलं लभेत् ॥ अतो दानं प्रशंसंति विद्य-
या भरतर्षभ ॥ तृणैः काष्ठैश्च पाषाणैः कारयेद्यः सुरालयं ॥ शिवलोके वसेत्सोपि तृणाद्यब्दप्रमाणतः ॥ तापसानां यतीनां
च कारयेदाश्रमान्मठान् ॥ अत्र तीर्थे स्वशक्त्या यः स स्वर्गेषु महीयते ॥ इति ते कथितं पार्थ तीर्थं तापत्रयापहं ॥ शु
केश्वरं तीर्थवरं किमन्यत् श्रोतुमिच्छसि ॥ अस्य तीर्थस्य महात्म्यं यः पठेद्वै समाहितः ॥ शृणोति श्रद्धया यश्च सोग्निष्टोमफलं ल-
भेत् ॥ गृहे वापिस्थितो धीमान् संस्मारेयःशुकेश्वरं ॥ सोपि सद्गतिमाप्नोति विमुक्तः पापसंचयात् ॥ इति श्रीवायूक्तशिवसंहि-
तायां श्रीनर्मदामाहात्म्ये दक्षिणे शुकेश्वरतीर्थनामसप्तदशशततितमोध्यायः ॥ ११७ ॥ ॥ श्रीमार्कंडेय उवाच ॥ ततो
गच्छेन्महाराज क्रोशार्धे नर्मदातटे ॥ किंचिन्न्यूनं नृपश्रेष्ठ तीर्थं तत्र सुशोभनं ॥ ॥ १ ॥ नागेन स्थापितं पुण्यं
सर्वभूतोपकारकं ॥ संगमे सर्वदेवादि दुर्लभे शिववल्लभे ॥ २ ॥ युधिष्ठिर उवाच ॥ कोसौ नागस्त्वयाख्यातः
संगमे तीर्थकारकः ॥ कस्माच्च निर्मितं तीर्थं रेवाया दक्षिणे तटे ॥ एतत्सर्वं समाख्याहि विशेषं धर्मवित्तम ॥ सर्वेपि संगमाः पु-
ण्या विशेष श्चात्र कोत्तमः ॥ मार्कंडेय उवाच ॥ साधु पृष्ठ महाभाग नपृष्टं केनचित्कचित् ॥ चरितं चास्य वक्ष्यामि शृणुष्वे-

कमना नृप ॥ पुरा हिमाद्रि तनये गंगागौरी च विश्रुते ॥ गंगासंप्रार्थिता देवैः शक्राद्यैः किल कार्यतः ॥ स्वर्गाल्लोकं समानीता भ-
विष्ये तारके रिपौ ॥ उद्वाहिता तथा गौरी गिरीशेन विधानतः॥ कपिलेन यदादग्धा सर्वे तु सगरात्मजाः । पितॄनुध्दर्तुकामश्च तथा
गंगां भगीरथः ॥ स्वर्गतामानयामास तमुवाचाथ जान्हवी ॥ गामागछाम्यहं मूध्र्दा गौरीभर्ता बिभर्ति चेत् ॥ नोचेत्प्रवाहः पातालं
प्रयाति पतितो दिवः ॥ भुवं भित्वा महाराज नान्यः शक्तोस्ति मध्दृतौ ॥ मार्कंडेय उवाच ॥ एवमाकर्ण्य नृपतिस्तपस्तप्त्वा
भगीरथः॥ आराध्य शंकरं प्राह गंगांसिरसि धारय ॥ पतमानां दिवः पुण्यां दयां कृत्वा मयि प्रभो ॥ ईश्वर उवाच ॥ एवं
भवतु राजेंद्र सा सदा मां वृणोति चेत्॥ ततस्तां परया प्रीत्या शिरसा धारयाम्यहं॥ शंकरेणैवमुक्तः स तपसाराध्य तां पुनः॥भगीर-
थमुवाचेदं गछ ब्रुहि महेश्वरं ॥ उमया विदिता मह्यं स्थितिमूध्र्येव चत्तेव ॥ ततोहं सततं देव त्वां न मुंचामि वै प्रियं॥ भगीरथो-
पि तत्सर्वं शर्वस्याग्रे न्यवेदयत् ॥ तदूरीकृत्य शर्वोपि पतमानां दधार तां ॥ ततः प्रभृति राजेंद्र सा गंगा शिवमूर्द्धगा॥ उमा चैवां
कमारुढा क्वचिद्देहार्द्धधारिणी ॥ कालेन गच्छता तावत्तयोः सापत्न्यमुद्गतं ॥ संक्षेपेणैव ते वाच्मि चरित्रं बहुविस्तरं ॥ गंधर्वविधि
ना गंगा शिरो गौरीपतेः श्रिता ॥ असहंती च तद्गौरी बहुशः कलहायते ॥ बहुनात्र विमुक्तेन गौरीप्राहैकदा शिवं ॥ शूभा
भूमिरीयं देव नृत्ययोग्या मता मम ॥ नृत्यं तव महादेव द्रष्टुकामास्मि सांप्रतं ॥ यदिस्नेहो मयि विभो मदुक्तं क्रियते यदि ॥
चारीकरणभेदेन तांडवं ते विलोकये ॥ नद्योनाघरसो देव त्वयि भाति सदैवाहि ॥ मार्कंडेय उवाच ॥ एवमुक्तः तया देव्या शर्वः
पर्वतमूर्धनि ॥ वाद्यैर्डमरुवंशाद्यैस्तलस्तालल्यान्वितं ॥ भैरवं रूपमास्थाय नृत्यं शंभूरथारभत् ॥ अथातिनर्ततस्तस्य गौरीव-
श्यतयान्नृप ॥ भ्रमरीवेगमारूढे देवेशं कुलदर्शने ॥ भूषणानि तदा देहात्पेतुर्व्यालमुखानि वै ॥ दूरंचाप्यमतन्सर्पाः शंखस्य
वलयानि च ॥ मुंडमाला च विक्षिप्ता वासुकिश्चापतन्पराक् ॥ विक्षिप्ताश्च जटाः सर्वा द्वीपिचर्म च भारत । अमोघैवाभवत्सेदो

CC-0. In Public Domain. Digitization by eGangotri

नीलकंठस्य नृत्यतः ॥ गंगातोयं च शिरसः प्रवाहैरपतद्भुवि ॥ मूर्द्धभ्रमणविक्षेपैर्वारंवारमनारतं ॥ ततो गौरीजहासोच्चैः विक्षिप्तं वीक्ष्य जान्हवीं ॥ पार्श्वस्थं वासुकिं प्राह गिरीजापन्नगोत्तमं ॥ वासुके जलमेतस्याः सत्वरं ग्रस सर्वशः ॥ ततस्तद्वचनात्तूर्णं विनोदाज्जान्हवीजलं ॥ पतंतमुरगोश्नाति हरमौलिविनिसृतं ॥ मंदाकिनी ततः क्रुद्धाव्यालं प्रति युधिष्ठिर ॥ गंगा उवाच ॥ पत शीघ्रं माहापाप स्वामिद्रोग्धासि निश्चितं ॥ परित्यक्षति शंभुस्त्वांदुर्वृत्तं श्व पचं यथा ॥ खादकं क्षुउद्रजंतूनां स्वामिभक्तिपराङ्मुखं ॥ व्याल त्वां त्यक्षति शिवः संसर्गात् पतितं यथा ॥ इत्युक्तः पन्नगः प्राह लुठित्वाग्रे प्रणम्य च ॥ वासुकि रुवाच॥पापमूर्तिहरं देवि पापकर्मा दुराशयः॥जिह्मस्व बालबुद्धे त्वं प्रसीद हरवल्लभे ॥ अनुग्राह्यो ह्यहं भृत्यो यद्वास्खलितसेवनः ॥ पापोहं खलु जिह्मश्च तथापि त्वं प्रसीद मे ॥ सापराधेप्यपत्येतु न माता स्या दुराशया ॥ अतस्त्वमेव शरणं ममांते विश्वपावनि ॥ अनोदितं नोदितं वा शुभं वाय दि वाशुभं ॥ कार्यं नकार्यं सहसा मम रीत्या विचक्षणैः ॥ त्रैलोक्य पावनी पुण्या सरित्श्रेष्ठा गरीयसि ॥ संसारोच्छेदकरणी आर्तानामार्तिनाशनी ॥ याचे त्रिपथगे त्वाहं दयां कुरु मामोपरि ॥ गुरूणां च सतां कोपः शारदाभ्रवदीरितः॥ गंगा उवाच ॥ दीनोसि बुद्धिहिनोसि निलीनोसि पदांतिके ॥ शृणु मे वचनं सर्प यदि शापांतमिच्छसि ॥ विंध्यपादतटं गत्वा किंचित्पुण्यं मनःप्रियं ॥ शंकराराधनं कुर्वन्तपश्चर समाहितः ॥ त्वया विमोचनं कार्यं जलस्यैतस्य पन्नग॥ तपःशुद्धेन तत्रेशं दृष्ट्वा चरितस्थितं॥ ततस्त्वं प्राप्स्यसि स्थानं वासुके त्वं ममाज्ञया ॥ मार्कंडेय उवाच ॥ इत्युक्तस्तु तया देव्या वासुकिस्तां प्रणम्य च ॥ ततः स त्वरितो विंध्यपादं गिरिमगाच्छुभं ॥ विंध्याद्रिपर्वतप्रस्थे स्थापयित्वा शिवोपलं ॥ हृदिमत्वा शिवं तं च नागेशं नागभूषणं ॥ तपस्तेन समारब्धमीश्वराराधनेच्छया ॥ ध्यायमानेन तं देवं गंगातोयभृतेन तु ॥ यथाजलभृताभस्त्रा समंतात्पूरिता भवेत ॥ तथास्यस्तंभृतो भोगो भोगिनः स्वर्धुनीजलैः ॥ एवं पूर्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपः सोक्तो ध्यायते स शिवं यदा ॥ एवं सति महादेवी गौरी ज्ञात्वास्य निश्चयं ॥ मोक्ष्यत्त्येष तपः कुर्वन् दृष्ट्वेशं
जान्हवीजलं ॥ इति मत्वा ततस्तूर्णं पन्नगं सासमावदत् ॥ यावता ह्याव्रजेच्छंभुस्तस्य दृग्गोचरे नृप ॥ कन्यका शबरीवे-
षा सासाखिद्रयसंयुता ॥ कृत्वा मनोहरं रूपं विघ्नार्थं वासुकेस्तदा ॥ तेजसाभिवृता कन्या सलीलगतिगामिनी ॥ वीणावा
द्यरता बाला तमुवाचाथ पन्नगं ॥ कन्यका उवाच ॥ भोपन्नगवर क्लेशः किमर्थं क्रियते वृथा ॥ दर्शनीयः कुलीनोसि श्रुतोसि त्वं
मया पुरा ॥ अहं च पर्वताज्जाता मेनकायां मनोहर ॥ विचरंति वने प्राप्ता श्रुत्वा त्वां तपसि स्थितं ॥ तपसा किं तवानेन
क्लेशं त्यज सुखापहं ॥ मम तातेन चाप्युक्तं तपसः कारणं तव ॥ अत्यंबुपानादुदरं त्वयि वृद्धिमुपागतं ॥ तदप्यहं शोषयि-
ष्ये माभैस्त्वं मातयाश्रमं ॥ पन्नग उवाच ॥ कन्यके न त्वया कार्यं सिध्यर्थं मे तपस्यतः ॥ जलं मुखेन मोक्ष्येहं शिव दृष्ट्वा
सनातनं ॥ गच्छ त्वं यत अयाता वर यानं सुशोभनं ॥ नकार्यस्ते ममोद्वेगो गच्छतीत्वासखीद्वयं ॥ देव्युवाच ॥ नमां वृणो-
षि चेन्मूढ मद्वचो न करिष्यसि॥ ततोहमभिश्वरी भूत्वा शप्स्ये त्वां पन्नगाधम ॥ कः शिवः क्वास्ति कं दृष्ट्वा मूढ किं जलमोक्षणं ॥
ममावज्ञाय मूचानं शप्स्ये त्वाम य वैजलं ॥ मार्कंडेय उवाच ॥ एवमुक्तस्तया पार्थ वासुकिः कोपमाहरत् ॥ महाशैवं स्मरन्नाशु
क्रोधदीप्तेक्षणस्ततः ॥ वीक्ष्यतां कुटिलां कन्यां सम्बद्धप्रलापिनीं ॥ कृत्वा फूत्कार मतुलं फलघातं च दुःसहं ॥ वेगाद्विद्रावयामा-
स तां कन्यां पंचयोजनं॥ विषोल्वणेन नागेन देवी प्रोत्सारिता नृप ॥ तत्रैवांतर्दधे गत्वा दूरे लज्जाकुलेशया ॥ अष्टादशा
युधभुजा गौरीनेत्रत्रयांचिता ॥ ध्यात्वैवं सा नरैः पूज्या वरदा सिंहवाहना ॥ मूर्तौ सा पूजिता देवी न तुष्येल्लजते यतः ॥
अतएवात्र तां ध्यात्वा पूजयेद्भक्तिसंयुतः ॥ मार्कंडेय उवाच ॥ एवं प्रोत्सार्य तां देवीं निराहारः स वासुकिः ॥ पुनः स्वस्थ-
मना भूत्वा तपस्तेपे शिवं स्मरन् ॥ क्रोधेन हानि तपसो मन्यमानः समाहितः ॥ ततो वर्षशते पूर्णे तपसाकर्षितः शि- १८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वः ॥ आगतस्तत्समीपे तु श्लक्ष्णं वाणीमुदाहरत् ॥ ईश्वरोवाच ॥ वरं वरय भद्रं ते पन्नगेंद्र यमिच्छसि ॥ अदेयमपि दास्यामि तपसा तोषितस्तव ॥ इत्युक्तः पन्नगः पार्थ शिवं दृष्ट्वा सुविव्हलः ॥ विलुंठन् वसुधापीठे मुमोचास्येन तज्जलं ॥ समस्तं यत्पुरा ग्रस्तं स्वऽसिंधोश्रुतमौकसात् ॥ वासुकिरुवाच ॥ यदी तुष्टोसि मे देव यदि देयो वरो मम ॥ एतद्गंगाजलं पुण्यं पुनः शिरसि धारय ॥ तथैव देहि मे देव पुनः पूर्वस्थितिं तु तां ॥ एवं वदति तस्मिन्वै याचमाने वरद्वयं ॥ एतस्मिनंतरे प्राप्ता गौरी गिर्वाणवंदिता ॥ गिरीशतनया तुर्णं गर्जन् मेघस्वनस्वना॥ श्रीदेव्युवाच॥ अयुक्तमुक्तं मूढैतत्त्वया गर्वेणगोनस॥ तपस्विने च शांताय शिवायैवं हि नोच्यते ॥ सेवकेन त्वया वांतमप्येतदमलं जलं ॥ गांगमारोढुमुचितं किं शिरः शार्वमंचितं ॥ एवमुक्ते तया चंड्या महेशो मौनमास्थितः ॥ जलेन प्लावितं पार्श्वं तत्र भूमंडलं महत्॥ गोर्या गलोत्तरं जातं यावदंभश्च वृद्धिमत् ॥ तावज्जहास भगवान् अट्टहासेन धूर्जटिः ॥ काली च कालवदना क्लिन्नवस्त्रा च भासते ॥ दृष्ट्वा कालमुखीं देवीं शिवः प्राहाथ पन्नगं ॥ वासुके जलमेतत्वं तूर्णं प्रापय नर्मदां ॥ लयं यास्यति चात्रैव करंजतरुकोटरे ॥ अतस्तुर्णं महाभोगि रेवां गच्छसमुद्भवां ॥ प्रापयित्वा च तामेतज्जलं स्नात्वा तथा स्वयं ॥ ततः शुद्धिस्त्वमुरग लप्स्यसे पौर्वीकं पदं ॥ इत्युक्त्वांतर्दधे शंभुरुमयासह भारत ॥ ततस्तेनवै रूपेण प्रचचाल स पन्नगः ॥ मंदगत्या, च पुरुतस्तुतांन्देवीं च जान्हवीं ॥ करंजतरुपार्श्वस्थ सौम्याशां प्रति निर्गत्तः ॥ चारणैर्दे-वसंघैश्च वीक्षममाणः शिवेन खे ॥ वासुकि रुवाच ॥ आगच्छ वरदे देवि करंजतरुकोटरात् ॥ त्रिनेत्रनंदिनी गंगे प्रापयिष्ये प्रसीद मे॥नमः शर्व शिरःसंस्थे महौदकनिवासिनि॥विष्णोः पदाब्जानिलये नमस्ते दुःखहारिणि॥पद्मनाथपदांभोजपूजने पद्मयोनिना॥ पुरा स्मृता पयः पात्रे यात्वं तां नौमि जान्हवि ॥ त्वमेवादौ जगद्बीजं ततः सर्वं चराचरं ॥ ब्राह्मीहं वैष्णवी रौद्रीजगद्वंदे न मोस्तुते ॥ पुरारुद्रकराज्जाता घातिते वैगजासुरे ॥ उक्तत्स्कतेर्वरदे करंजातेन सोच्यसे ॥ इदानीं जठरान्मह्यं निर्गताहरवल्लभे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्तयिष्यंति तेन त्वां वासुकीमिति मानवाः ॥ यत्र त्वमागमा पुण्या तत्र कादुर्गतिर्नृणां ॥ न दुर्भिक्षभयं तत्र कः कलिस्त-
त्र जान्हवि ॥ मार्कंडेय उवाच ॥ एवमादिस्तुवन्पुण्यैर्वचोभिर्वासुकि र्नृप ॥ प्राप्तवान्नर्मदां देवीं दुरितौघविनाशिनीं ॥ यत्र य-
त्र च विश्रांतस्तपः क्लिष्टो हिपन्नगः ॥ पुण्यापगा प्रवाहं तं प्रतीक्षन्पृष्ठगामिनं ॥ भक्तितस्तत्र तत्रासौ स्थापयामास वै शिवं ॥ ना-
गः स्वनाम्ना नवसु स्थाने ष्वेवं चकारह ॥ स्थापित्वा नवसंख्याका नागेशा नर्मदशगाः ॥ दशमस्तत्र नागेन प्रारब्धं यत्र वै त
पः ॥ सार्द्ध कोशं महाराज कन्याक्षेत्रमुदाहृतं ॥या गौरी कन्यका भूत्वा छलार्थं तस्य चागता ॥ कन्यास्थानं च तद्द्रष्टुं यदा रुद्रोभ्य
गान्नृप ॥ प्रावाहं रुचिरं दृष्ट्वा मिषेण न्हदमागता ॥ जलक्रीडां च कृतवान् देव्या यद्वारितं पुरा ॥ नोचितं वासुकेर्वातं जलं धर्तुं
हि मूर्द्धनि ॥ इति तन्मिषयाश्रित्य जलके लिभवं भवः ॥ दधार शिरसा तोयं भूतैश्च प्रमथैर्वृतः ॥ क्रीडितो यत्र वै रुद्रे रुद्रकुंडं
तत् स्मृतं ॥ पावनं सर्वजंतूनां दौर्मनस्यविनाशनं ॥ मार्कंडेय उवाच ॥ येन मार्गेण यातोसौ वासुकिः फणिनां वरः ॥ मार्गे
ण तेन तेयातं जान्हाव्याः श्रोतउत्तमं ॥ करजानर्मदासंगे कृतस्नानो हि पन्नगः ॥ निर्द्धूतकल्मषः सद्यः संजातो वैधृ
तव्रतः॥स्थापयामास नवमं शकरं पांडुनंदन संगमे सर्वलोकानां भक्त्या भक्त्या च सेवितः॥अष्टम्यां च चतुर्दश्यां मधुना स्नापयेच्छि-
वं ॥ क्षीरेण सर्पिषा दध्ना खंडयुक्तेन भारत ॥ विमुक्तकल्मषः सद्यो जायते नियतं नरः ॥ अपुत्रा ये नराः पार्थ स्नानं कुर्वंति
संगमे ॥ सभार्या स्नापयंतीह शिवं पंचामृतैरपि ॥ तेलभंते सुतान् श्रेष्ठान् कार्तवीर्योपमांन्नृप ॥ संगमे लक्षहोमादि यज्ञदाना-
दि सत्कृतं ॥ आकल्पं ॥ वर्द्धते नित्यं शतधाच सहस्रधा ॥ तीर्थे नागेश्वरे राजन्कन्यादानं ददंति ये ॥सुखसौभाग्यसंतानस-
मृद्धास्युः सदैव ते ॥ कन्यादेहे च रोमाणि यावत्संख्यानि भारत ॥ तावद्वर्षसहस्राणि स्वर्गे वासः सुनिश्चितः ॥ रथमश्वं
महीं गांच स्वर्णमत्रजलादिकं ॥ पादुकोपानहछत्रं वासांसि विविधानि च ॥ यदि द्यात्संगमे पार्थ दत्तमस्याक्षयंभवेत् ॥ उ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पोष्य परया भक्त्या तत्र तीर्थे युधिष्ठिर ॥ श्राद्धं पितॄणां ये कुर्युर्विधिना पिंडपातनं ॥ तुष्यंति पितरस्तेषां यावदाभूतसंप्लवं ॥ वंशे गोत्रे कुले नॄणां यो मृतःप्रेततां गतः ॥एकादश्यां चतुर्दश्यां पक्षयोरुभयोरपि ॥कार्तिके मार्गशीर्षे वा माघे वा पांडुनंदन ॥ तिलपिंडप्रदानेन प्रेता यांति परां गतिं ॥ यः पूजयति नागेशं चंदनैः कुसुमैः शुभैः ॥ विविधैर्गंधवस्त्रैश्च निवेद्यार्घप्रदानतः ॥ कुसुमे कुसुमे तस्य फलं जानाति शंकरः ॥ तावद्वर्ष सहस्राणि नरः शिवपुरे वसेत् ॥ रात्रौ जागरणं कृत्वा दीपं दत्वा त्वखंडितं ॥ चिरायुर्धनवान् भोगी यशस्वी जायते भुवि ॥ एवंविधानकृद्यस्तु तीर्थे नागेश्वरे नरः ॥ स वै प्रमोचयेत् प्रेतान्नरकान्नरपुंगव ॥ शतं कुलानि चोद्धृत्य स पुमानात्मना सह ॥ वसेच्छिवपुरे पार्थ यावदिंद्राश्चतुर्दश ॥ तत्र तीर्थे महाराज योदद्याद्द्विजभोजनं ॥ शाकपाकादिनाशक्त्या सर्वपापक्षयं भवेत् ॥ तुष्यंति पितरो देवाः स्वर्गे वासस्तथाक्षयः॥ सर्पाणां न भयस्तस्य वासुकेर्वरदानतः॥ एतत्ते सर्वमाख्यातं तीर्थं नागेश्वरं नृप ॥ महात्म्यं संगमस्यापि करनद्याश्च संभवं॥ ततः प्रभृति विख्याता गंगेयं वासुकी शुभा ॥ करजा करजावापि नागेश्वरगणान्विताः ॥ पार्थ तीर्थमिदं पुण्यं सर्वलोकेषु विश्रुतं ॥ श्रवणात्कीर्तनाद्यस्य सर्वपापैः प्रमुच्यते ॥ इति श्रीवायुक्तशिवसंहितायां श्रीस्वामा० दक्षिणे नागेश्वरकरनदीसंगमतीर्थमाहात्म्यंनाम अष्टादशशततितमोध्यायः ॥११८॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेन्महाराज मार्कंडेश्वरमुत्तमं ॥ तन्मया स्थापितं तीर्थंनर्मदादक्षिणे तटे ॥ न्यूनं क्रोशद्वयं तद्वै तीर्थं नागेश्वरान्नृप ॥ गीर्वाणवंदितं पुण्यं स्वर्गमोक्षप्रदं नृप ॥ गोप्याद्गोप्यतरं पार्थ नाख्यातं कस्यचिन्मया ॥ मृगरूपं द्विजं हत्वा कश्चिदज्ञानतो नृपः ॥ तथा ममाध्यविज्ञानआश्रमं प्राप्तवान् पुरा ॥ अर्घपाद्यैर्मया राजा सत्कृतश्चासने न च ॥ फलमूलैः शुभैर्वाक्यैः पूजितो स दिनाष्टकं ॥ गच्छता ज्ञापितं तेन मम वृत्तांतमादितः ॥ गते च भूपतौ तस्मिन् विषादोमे महानभूत् ॥ नष्टस्मृतिरहं जातः सातंको ज्ञानवर्जितः ॥ उद्विग्नचेता निर्यातश्चाश्रमात्केशवं स्मरन् ॥ नारायणं हृषीकेशं कृष्णं विष्णुं जगद्गुरुं ॥ विश्वरूपमजं

हंसं तापत्रयहरं परं ॥ गोविंदमच्युतं पार्थ स्मरन् तीर्थांतरं गतः ॥ एवं तथान्यनुस्मरन् तीरद्वयगतिश्वसन् ॥ हाहाकारं च कुर्वे
न्मे कथं ज्ञातं भवेदिति ॥ न मुंचामि महादेवीं योगीनीं जगतोगतिं ॥ बहुकल्पसखीं पुण्यां नर्मदां श्रितशर्मदां ॥
नबध्नाति रतिं चेतस्तीर्थेष्वन्येषुभारत ॥ मुक्त्वा महाधुनीमंबामिमाममरसेविता ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म
कर्तुमिहार्हसि ॥ नायं लोकेस्ति न परो न सुखसंशयात्मनः ॥ आश्रद्धया हुतं दत्तं जप्तं तप्तं कृतं तु यत् ॥
असदित्युच्यते पार्थ न च तत्प्रेत्य नेह च ॥ प्राप्तोहं दक्षिणं तीरं रेवाया संगमादनु ॥ अतिक्रांतमिदं तीर्थं
यदा नगेश्वरं मया ॥ अकस्माच्चेतसः शुद्धिस्तदासीन्मे युधिष्ठिर ॥ स्मृतिश्च वेदशास्त्राणामुतन्ना मे क्रमेण च ॥ म-
त्वा सर्वोत्तमं तत्र भूभागं भरतर्षभ ॥ मासमेकं स्थितस्तत्र रेवातीरे कृताश्रमः ॥ स्थापयित्वा शिवं देवं मम नाम्ना
प्रपूजयन् ॥ त्रिस्नायी नियताहारः पारायणकरः श्रुतेः ॥ज्ञानं तत्रैव मे जातं प्रसादाच्छूलपाणिनः॥प्रत्यक्षो मे शिवस्तत्र दत्वाज्ञानं
च दुर्लभं ॥ सर्वकल्मषनाशं च तत्रैवांतरधीयत ॥ पार्थैवंस्थापितं तीर्थं मार्कंडेश्वरसंनितं ॥ यो द्विजस्तत्र ग-
त्वा च जह्वानो त्रिपदां जपेत् ॥ सपातकैरशेषैश्च मुच्यते धर्म नंदन ॥ तत्र तीर्थे नरः स्नात्वा स्मृतिं ज्ञानं च विंदति ॥ मार्कंडे-
श्वरमभ्यर्च्य सर्व पापैः प्रमुच्यते ॥ पितॄणां श्राद्धदानेन कुरुते तृप्तिमक्षयां ॥ शिवलिंगमवष्टभ्य याम्याशायां स्थितो
नरः ॥ देहपाते शिवं गच्छेदिति मे निश्चयो नृप ॥ आज्येन बोधयेद्दीपमष्टम्यां निशि पूजयन् ॥ स्वर्गमक्षयमाप्नोति पितृभिः
सह भारत ॥ शुभैः पाकविशेषैर्वा शाकमूलफलैरपि ॥ इंगुदैर्बदरैर्बिल्वैरक्षतैर्वा जलेन वा ॥ पितॄन्संतर्पयेद्यस्तु संप्राप्तं जन्मत-
ष्फलं ॥ इतिश्रिरेवामहात्म्ये मार्कंडेयतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र कोटीश्वरमनुत्तमं ॥ क्रोशांतरे प्रभे-
शात्तु तीर्थात्तीर्थं हि तत् स्मृतं ॥ कोढिनारं पुरं यत्र नरकोटिविनिर्मितं ॥युधिष्ठिर उवाच ॥ कथं तत्र नरैस्तीर्थं पुरं चात्र

CC-0. In Public Domain. Digitization by eGangotri

विनिर्मितं ॥ के नराः कुत आयाताः कदा च मुनिसत्तम ॥ एतद्वद समासेन विस्मयो मे महान् हृदि ॥ मार्कंडेय उवाच॥ शृ-
णु पार्थ प्रवक्ष्यामि वृत्तांतं कोटिनारजं ॥ अनावृष्टिः पुराजाता मध्यदेशे दशाब्दिकी ॥ अन्ये च परितो देशास्तया संपीडिता-
नृप ॥ लोकाश्च, पीडितास्ते वै क्षुत् क्षामाश्रमकर्षिताः ॥ निर्गतामध्यदेशात्तु त्रेतायुगमुखे पुरा ॥ वर्णावर्णतराश्चैव तपसाश्च
पृथग्विधाः ॥ विश्रमंतश्च पृच्छंतः सुभिक्षं क्षेमपुष्कलं ॥ देशाद्देशांतरं प्राप्य रेवातीरमुपागताः ॥ अनेककोटयो
लोका मध्यदेशनिवासिनः ॥ श्रुत्वा रेवोपकंठं हि युगानेकविनश्वरं ॥ अनावृष्टिभयं यत्र न क्वचिद्दस्युसं-
भवं ॥ नभयं नारकं यत्र वसतां व्याधिजं तथा ॥ इत्याकर्ण्य नरास्ते वै वासं तत्राप्यरोचयन् ॥ पिबंतो गाहयंतश्च
नार्मदं विमलं जलं ॥ प्राप्तनानाविधाहाराः सुखं प्रापुर्मनोनुगं ॥ तैस्तदैकत्र संभूय हर्षोनिद्रानतांबुजैः ॥ तपस्विभि
र्ब्राह्मणैश्च स्थापितस्तत्र शंकरः ॥ पूजितश्च स्तुतश्चैव गीतवाद्यैश्च तोषितः ॥ नृत्यैस्तांडवमुख्यैश्च प्रणामैरुत्सवैस्तथा ॥
तुतोष परया भक्त्या शंभुस्तेषां युधिष्ठिर॥प्रतिष्ठितः कोटिभिस्तैः ततः कोटीश्वरो भवत् ॥ पार्थिवं हि सुखं तेषां ददौ देवस्तदार्चि-
तः ॥ देहांते च निजं स्थानं शैवं तु निरुपद्रवं ॥ ततः प्रभृति तत्तीर्थं नाम्ना कोटीश्वरं स्मृतं ॥ तत्र तीर्थे महाराज स्नात्वा यः
पूजयेच्छिवं ॥ स याति परमं स्थानं यावन्मन्वंतरं सुखं ॥ तर्पयित्वा पितॄन् भक्त्या श्राद्धं कुर्याच्च यः शुचिः ॥ पितॄणां जायते
तृप्तिश्चतुर्युगशतं पुरा ॥ तावत्कालं वसेत्स्वर्गे पितृभिः सह भारत ॥ शिवाग्रे दीपक दद्यादहर्निशमखंडितं ॥ सततं वा चतुर्द-
श्यामष्टम्यां शक्तितो नृप ॥ घृतेन वाथ तैलेन नीराजनंसमन्वितं ॥ स स्वर्गे सुचिरं स्थित्वा पृथिव्यां जायते नृप ॥ रूपवान्दी-
र्घमायुश्च लभते च यशस्तथा ॥ अन्नोदकप्रदानेन तीर्थे कोटीश्वरे नृप ॥ सर्वपापक्षयं प्राप्य सुखमाप्नोति शाश्वतं ॥ इति श्री०
उ॰रे॰कोटीश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेन्महाराज तीर्थं संकर्षणाह्वयं ॥ उत्तरे नर्मदाकूले सर्वपापक्षयंकरं ॥ न्यून-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्रोशांतरे तत्तुतीर्थात्कोटीश्वरान्नृप ॥ तद्विख्यातं परं तीर्थं यज्ञवाटस्यमध्यतः ॥ तीर्थं संकर्षणं श्रेष्ठं पृथिव्यां नृपसत्तम ॥ युधि-
ष्ठिर उवाच ॥ यज्ञवाटस्त्वया प्रोक्तो यश्चात्र मुनिसत्तम ॥ को यज्ञः केन च कृतः कदा तन्मे वंदिखाल ॥ यश्च संकर्षणो
नाम कथं तीर्थमिदं कृतं ॥ एतत्सर्वं मयाख्याहि कृपया मुनिपुंगव ॥ मार्कंडेय उवाच ॥ शृणुपार्थ प्रवक्ष्यामि यज्ञवाटस्य
संभवं॥पुरा ययातिपुत्रेण यदुनाधर्म शालिना ॥ पित्रा जरार्थं शप्तेन श्रुतं तत्ते भविष्यति ॥ पितृवाक्यमकृत्वा वै प्राप्तदोषोपशांतये ॥
बहुतीर्थानि संभ्रम्य दूयमानेन चेतसा॥ यदुना नर्मदाकूले त्वयुत्तरे चात्र भारत॥ पुण्यदेशे कृतो यज्ञो नाम्ना बहुसुवर्णकः॥ यज्ञवाटं
शुभं कृत्वा तत्रैवावसथन् बहून्॥ कुंडवेदीविभागांश्च तथाहूय द्विजान् शुभान्॥ वेदविद्याविशारदान् ****** ॥धर्मशास्त्रार्थकुशलान्
कुलशीलसमन्वितान् ॥ आहूयैवं विधान्विप्रान् यदुर्यज्ञमकारयत् ॥ संतर्प्य च सुवर्णेन ब्राह्मणान् दीनदुःखितान् ॥ पंग्वंधब-
धिरान्वृद्धान् अनाथांश्चापि कृत्स्नशः ॥ शुद्धो वै कर्मणा तेन प्राप्य चारभृथंनृप ॥ यदुर्ययुर्निजं स्थानं प्राप्तवान् राज्य-
मुत्तमं ॥ नर्मदायाः प्रसादेन द्विजाशीर्भिरनेकशः ॥ ततः कालाच्च महता समये सांप्रतीनके ॥ तद्वंशसंभवः श्रीमान् शेषो वि-
श्वविशेषवित् ॥ शूराघोषो महाशूरो रोहिणीवसुदेवजः ॥ संकर्षणो महावीर्यस्तीर्थयात्रा प्रसंगतः ॥ रेवातटमनुप्राप्त
उत्तमं स्वघ्ननाशनं ॥ यज्ञवाटमिह श्रुत्वा निर्मितं पूर्वण्योरुपं ॥ मासमेकं स्थितस्तत्र त्रिस्नायी शिवपूजकः ॥ तप-
श्चरण रूपेण कर्मणा नियमस्थितः ॥ कृच्छ्रव्रतधरो मासं द्वितीयं नर्मदातटे ॥ गीर्वाणगीतचरितं उमया सह शंकरः ॥
सेवितः सिद्धगंधर्वैस्तिष्ठतीत्यत्र संततं ॥ इति मत्वा ततोरामः सर्वजंतूपकारकं ॥ स्थापयामास परया भक्त्या भवमहोदधीः ॥
प्रतिष्ठाप्य च विप्रैस्तं वेदोक्तविधिना नृप ॥ आगमोक्तविधानेन पूजयित्वा परं शिवं ॥ दत्वा दानानि बहुशो विविधानि विधा-
नतः ॥ तथागतमगात्पार्श्वं बलदेवः स्वकं गृहं ॥ ततः प्रभृति राजेंद्र विख्यातं तीर्थमुत्तमं ॥ संकर्षणाह्वयं पुण्यं भुक्तिमुक्तिफलप्रदं

CC-0. In Public Domain. Digitization by eGangotri

॥ यस्तत्र विधिवत्स्नात्वा जितक्रोधो जितेंद्रियः ॥ एकादश्यां सिते पक्षे मधुना स्नापयेच्छिवं सर्वैः पापक्षयं कृत्वा पुत्रपौत्रांश्च विं-
दति ॥ पितॄणां श्राद्धदानेन श्रद्धया विधिवन्नृप ॥ तृप्तिर्युगशतं पूर्णमिति शंकरभाषितं ॥ संकर्षणेश्वरं पार्थ पूजयित्वा तु भक्तित
॥ स याति परमं स्थानं यत्र शर्वः सनातनं ॥ ब्राह्मणान् भोजयेद्यश्च स्वशक्त्या भरतर्षभ ॥ संकर्षणेश्वरे तीर्थे पितरस्तेन
तारिताः ॥ इति श्रीरेवामहात्म्येउत्तरे संकर्षणेश्वरतीर्थनाम नवदशशतितमोध्यायः ॥ ११९ ॥ श्रीमार्कंडेय उवाच ॥ त-
तस्तत्रैव गंतव्यं पार्थ क्रमशतांतरे ॥ जनकेश्वरतीर्थं वै सर्वकामफलप्रदा ॥ ततः प्रभृति साभूमिर्यज्ञवाटकृताह्वया ॥ जनकेन
ततस्तत्र यज्ञमारंभता पुरा॥रेवाया उत्तरे कूले स्थापितः पार्वतीपतिः॥पूजया तपसा स्तुत्या प्रसन्नस्तस्य शंकरः ॥प्रत्यक्षः प्राह भोरा-
जन्वरं वरय वांछितं ॥ अदेयमपि दास्यामि भक्त्या संतोषितस्तव ॥ जनक उवाच ॥ देवदेव नमस्तेस्तु विश्वनाथ
त्रियंबक ॥यदि तुष्टोसि मेत्शर्व वरार्हो यद्यहं मतः ॥ यज्ञं यष्टुमिहेच्छामि तत्र संनिहितो भव ॥ प्रारब्धोयं मया यज्ञो निर्वि-
घ्नेन समाप्यतां ॥ कर्मकांडकृतो लेशःअपि कश्चिन्ममास्तुवै ॥ ब्राह्मण्याविष्टचित्तेन यन्मया क्रियते विभो ॥ ब्रह्मार्पणधिया तन्मे
मास्तु बंधाय धूर्जटे ॥ अपि राज्यं प्रकुर्वाणि निर्ममेनियतेंद्रियः ॥ मय्यस्तु मा कर्मलेपो जलवन्नलिनीजले ॥
ईश्वर उवाच ॥ साधुतत्प्रार्थितं भूप सर्वं त्वयि भविष्यति ॥ स्थितः स्थिरोहमत्रैव त्वन्नाम्ना जनकेश्वर ॥ इत्युक्त्वांर्द-
धे देवस्तत्रैव वृषभध्वजः ॥ जनकेन ततो राज्ञा इष्टो यज्ञः सुदक्षिणः ॥ विधिना ब्राह्मणैः सार्द्धं ऋषिभिस्तत्वदर्शिभिः ॥ प्राप्य
चावभृतं राजा सर्वं संतोष्य तत्रतः ॥ पुण्याशिषैःपुण्यवाद्यैः पूजितः प्रययौ पुरिं ॥ जनकेश्वरनामानं सर्वलोकोपकारकं ॥
तत्र स्नात्वा तु विधिवत्तर्पयित्वा पितॄन्सुरान् ॥ श्राद्धं यः कुरुते पार्थ तेनाप्तं जन्मतः फलं ॥ पितरस्तर्पितास्तेन
यावद्वर्षायुतं नृप ॥ आयुः श्रियं यशो धर्मं धनंसंतानसद्गतीः ॥ ददांति पितरस्तस्य विधिवत्तत्र तर्पिताः ॥ ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नकेश्वरमभ्यर्च्य उपहारैः पृथग्विधैः ॥ निर्ममो निरहंकारो न पुनर्जठरे वसेत् ॥ मोक्षमार्गमवाप्नोति व्रजेच्छैवं महस्ततः ॥ दीप-
दानेन दीर्घायुः मेधावी जायते नृप ॥ इति श्रीरेवामाहात्म्येजनकेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र मन्म
थेश्वरमुत्तमं ॥ रेवाया उत्तरे कूले सर्वदेवनमस्कृतं ॥ स्थितं क्रोशार्द्धमात्रे तज्जनकेश्वरतीर्थतः ॥ शिवकोपाग्निना दग्धः पुरा
कामः सुरेरितः ॥ छायारूपं समास्थाय शिवसिंधुं तदाश्रितः ॥ तपश्चचार विपुलं स्थापयित्वा तु शंकरं ॥ शिवप्रसादादस्य पुनः
शक्तिं संप्राप्य पौर्विकां ॥ इष्ट्वा इष्टेन रूपेण जगाज्जैत्रत्वमाप्तवान् ॥ संभूतिर्मानसि चास्य स्मरणात्स्मरसंज्ञितः ॥ मत्तं कृत्वा
जगदिदं मनोमूर्मनसि स्थितः ॥ मश्नाति वै मधुसखस्तेन मन्मथसंज्ञितः ॥ तेनात्र मन्मथेनादौ स्थापितो मन्मथेश्वरः ॥ का-
मेन स्थापितो यस्मादेतस्मात्कामदो विभुः॥ततः प्रभृति विख्यातं तीर्थमेतज्जगत्त्रये॥ स्नानमात्रान्नरो यत्र यमलोकं न पश्यति॥अनप
त्या च या नारी स्नाप्यते तत्र पांडव ॥ पुत्रं सा लभते नूनं सत्यसंधं दृढव्रतं ॥ तत्र स्नात्वा नरो राजन् शुचिः प्रयतमानसः ॥
उपोष्यरजनीमेकां गोसहस्रफलं लभेत् ॥ प्रसिद्धं कामिकं तीर्थमिदमन्यन्नविद्यते ॥ उपोष्य यस्त्रिरात्रं पूजयेन्मन्मथेश्वरं ॥
संस्नातः संयतमनाः स गोलक्षफलं लभेत् ॥ गीतैर्वाद्यैश्च नृत्यैश्च तोषयेन्ममथेश्वरं ॥ कथाविनोदैर्विविधै रात्रौ जागरणे न च ॥
एरंडीसंगमे स्नानं दृष्टो मे मन्मथेश्वरः ॥ किं करोति यमो रुष्टो भद्रो भद्राणि पश्यति ॥ वेलान्वेदेदिदं धीमान् नरो नृत्यंस्तथा
नृप ॥ एरंडीनर्मदासंगे स्नानेनाभ्यर्चितः शिवः॥ निषिद्धानरकः सर्वे शिवाज्ञामुद्रितो यमः ॥स्वर्गमार्गस्य सोपानं पृथिव्यां मन्मथे-
श्वरः ॥ विशेषतः पात्रमुख्ये श्राद्धे दाने च भारत ॥ अन्नोपानच्छत्रवस्त्रफलपुष्पप्रदानतः ॥ गंधतांबूलदानेन प्राप्यते वांछितं-
फलं ॥ कुलमुज्वलमाप्नोति दीपं तत्र ददाति यः ॥ दीपदो दीप्तिमान् लोके दाघ यायुश्च विंदति ॥ एतत्ते कथितं पार्थ कामिकं
तीर्थमुत्तमं ॥ पृथिव्यां सागरांतायां प्रख्यातं मन्मथेश्वरं ॥ दोग्ध्रीं गां पांडवश्रेष्ठ त्रयोदश्यां ददाति यः ॥ चैत्रे मासि सिते पक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र स्नात्वा जितेंद्रियः ॥ रात्रौ जागरणं कृत्वा प्रभाते देवसन्निधौ ॥ नारी वा पुरुषो वापि संगमे तत्फलं लभेत् ॥इति रेवा० मन्मथेश्वरतीर्थं ॥ मार्कंडेय उ०॥ ततो गच्छेन् महाराज एरंडीसंगमं परं ॥ यन्मयाकर्णितं पूर्वं महादेवमुखात् शुभं॥एवमेव पुराप्रश्ने गौर्या पृष्टो महेश्वरः॥प्रोवाच नृपशार्दुल गुह्याद्गुह्यतरं तदा ॥ महेश्वर उवाच ॥ शृणु देवि परं गुह्यं नाख्यातं कस्यचिन्मया॥रेवाया उत्तरे कूले तीर्थं परमशोभनं॥भ्रूणहत्याहरं देवि कामदं पूत्रवर्द्धनं ॥अत्रिर्नाम महादेवि ब्रह्मणो मानसः सुतः॥अग्निहोत्ररतो नित्यं देवतातिथि पूजकः ॥ सोमसंस्था हविःसंस्थाः पाकसंस्थाश्चकार सः ॥ अनुसूयेति विख्याता भार्या तस्य गुणान्विता ॥ पतिव्रता पतिप्राणा पत्युः कार्यहिते रता ॥ आदावपि पुनस्तस्य न्यूनमेकं महन्नृप ॥ बहुनापि च कालेन न पुत्रो न च पुत्रिका ॥ एकदा त्वपरान्हेतौ सुखासीनौ निजाश्रमे ॥ वदंतौ सुखदुःखानि पूर्ववृत्तानि यानि तु ॥ अत्रिरुवाच ॥ शुभे सौम्ये प्रिये कांते स्निग्धे सर्वांगसुंदरि ॥ पूर्णचंद्रानने साध्वि सुश्रोणि प्रियवादिनि ॥ न त्वया सदृशी नारी त्रैलोक्ये सचराचरे ॥ रतिपुत्रफला नारी पच्यते वेदवादिभिः ॥ पुत्रहीनस्य यत्सौख्यं तत्सौख्यं मम सुंदरि ॥ यथाहं न तथा पुत्रः समर्थः सर्वकर्मसु ॥ पुंनामनरकाद्भद्रे जातमात्रस्तु पुत्रकः ॥ पतंतं पितरं त्राति महापातकिनं यदि ॥ महाघोरं गतान्वापि दुःकर्मस्थान्पितामहान् ॥ उद्धरंति सुपुत्रास्तु वैतरण्यां गतानपि ॥ पुत्रेण लोकान् जयति पौत्रेण परमां गतिं ॥ नास्ति पुत्रसमो बंधुरिह लोके परे तथा ॥ असिपत्रवने घोरे पततं योभिरक्षति ॥ दुर्भिक्षेणाभिभूतैर्हि वृद्धभावेन वा पुनः ॥ पुत्रहीनैः कथं भद्रे जीव्यते सधनैरपि ॥ अपुत्रं हि ग्रहं शून्यं दिशः शून्यास्त्वबांधवाः ॥ असद्वृत्तं च कुलं शून्यं सर्वशून्यं दरिद्रता ॥ व्याधिभिः परि भूतानां निर्धनोपि यदा सुतः ॥ लोकलज्जाभयत्रस्तः करित्राणां करोति हि ॥ निर्गुणो गुणवान्वापि यदि पुत्रः प्रजायते ॥ ऋणत्रयविमुक्तःस्यात्परत्र च सुखागतिः॥अपुत्रस्य कुतः सौख्यमिहामुत्र च मे शुभे॥अहर्निशं सनिःश्वासं चिंतयानस्य सर्वदा॥इहातिवर्तते कालो मम मध्यान्ह पांथवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ शुष्यंति मम गात्राणि ग्रीष्मे नद्यूदकं यथा॥ अनुसूया उवाच॥ यत्त्वं शोचसि नाथाद्य तत् शोचाम्यहमत्यलं॥ तवोद्वेगकरं यच्च तन्मे दहति
मानसं॥ अत्रिरुवाच॥ येन पुत्रा भवंती ह आयुष्मंतो गुणान्विताः॥ चित्ते चिंतय तत्कार्यं येन तुष्येत्प्रजापतिः ॥ तपस्तप्तं मया भद्रे
जातमात्रेण दुष्करं ॥ व्रतोपवासनियमैः शाकाहारैश्च सुंदरि ॥ क्षीणदेहश्च तिष्ठामि अशक्तश्च महामते ॥ अनुसूया उवाच ॥ भ-
र्तुः पतिव्रतानारी रतिपुत्रविवर्धनी ॥ त्रिवर्ग साधनी श्लाघ्या विदुषामपिसात्क्षये ॥ जपस्तपस्तीर्थयात्रा प्रव्रज्यामंत्रसाधनं ॥ देव-
ताराधनं चैव स्त्रीशूद्रपतनानि षट् ॥ ईदृग्विधं महादोषं स्त्रीणामेतैस्तु कर्मभिः॥ वदंति मुनयः सर्वे यथा वेदेषु भाषितं॥ अनुज्ञाता
त्वया ब्रह्मन् तपस्तप्स्यामि दुष्करं ॥ पुत्रप्राप्तिं समुद्दिश्य तोषयिष्ये सुरोत्तमान् ॥ अत्रिरुवाच ॥ साधु साधु महाप्राज्ञे मम
संतोषकारिणि ॥ अज्ञानात्त्वं मया भद्रे पुत्रार्थं तपआश्रय ॥ देवानां च मनुष्याणां पितॄणामनृणं कुरु ॥ न भार्या सदृशोबंधुस्त्रि-
षु लोकेषु विद्यते ॥ तेन देवाःप्रशंसंति न भार्यासदृशं सुखं ॥ यत्र भर्ता च भार्या च परस्परवशानुगौ ॥ तत्र धर्मार्थकामानां
त्रयाणामपि संगतं ॥ पितॄन्देवान्मनुष्यांश्च गृहे चाभ्यागतातिथीन् ॥ गुरुस्वजनबंधूंश्च साध्वी भार्यार्चति प्रिये ॥ आर्ते आर्तामुदिते
हृष्टा प्रोषिते मलिना कृशा ॥ मृते म्रियेत या पत्यौ सा स्त्री साध्वी निगद्यते ॥ महाव्रते महाप्राज्ञे सत्यशीले शुभेक्षणे ॥ तपः
साधय शीघ्रं त्वं पुत्रार्थं तु ममाज्ञया ॥ श्रीमार्कंडेय उवाच ॥ एतद्वाक्यामृतं पित्वा अनुसूया शुभव्रता ॥ स्मृत्वा देवान् ऋषीं-
श्चापि साष्टांगं प्रणताब्रवीत् ॥ त्वत्प्रसादेन विप्रेंद्र सर्वं प्राप्स्याम्यहं ध्रुवं ॥ तवादेशः प्रमाणं मे स्त्रीणां भर्ता पराग
तिः ॥ सद्वृत्तो वाप्यसद्वृत्तः सुरूपोवाकुरूपवान् ॥ धनवान्वा दरिद्रोवा स्त्रीणां भर्तापरागतिः ॥ नान्यद्दैवत मत्रास्ति न व्रतं
नाभिसाधनं ॥ भर्तृशुश्रूषणं मुक्त्वा सद्वृत्तानां तु योषितां ॥ पुत्रः पित्रोःप्रसादाद्वै भार्या भर्तुः प्रसादतः ॥ वांछितं
फलमाप्नोति भक्त्या येन निसंचरेत् ॥ एवमुक्त्वा सानुसूया हंसलीलागतिः शुभा॥साध्वाचारा समुत्थाय समाराधयितुं सुरान् ॥ गृ-

CC-0. In Public Domain. Digitization by eGangotri

हित्वा नियमं साध्वी संप्राप्ता नर्मदां नदी ॥ शिवस्वेदोद्भवां देवीं सर्वपापप्रणाशिनीं ॥ यस्या दर्शनमात्रेग नश्यते पापसंचयः ॥ स्नानमात्रेण वै यस्याः फलं स्यादाश्वमेधिकं ॥ ये पश्यंति सदा रैवं वारि वारितपातकं॥सोमपानेन तत्तुल्यं नात्र कार्या विचारणा॥ ये स्मरंति दिवा रात्रौ योजनानां शतैरपि ॥ नर्मदां पापमुक्तास्ते रुद्रलोकं व्रजंति हि ॥ रेवातीरे शुभे नीरे ये मृता मनुजर्षभ ॥ न पश्यंति यमं ते वै न च ता यमयातनाः ॥ततस्तादुत्तरे कूले एरंडयाः संगमे शुभे ॥ नियमस्था विशालाक्षी शाकाहारेण सुंदरि ॥ देवत्रयं तोषयंती नातिनुत्यर्चनव्रतैः ॥ ग्रीष्मे पंचाग्निमध्यस्था वर्षासु स्थंडिलेशया ॥ हेमंते जलमध्यस्था चरेच्चांद्रायणानि सा ॥ प्रातस्स्नानं तु सा स्नात्वा कुरुते जलतर्पणं ॥ देवतानां पितॄणां च विधिना भरतर्षभ ॥ देवानामर्चनं कृत्वा करोति हवनं स्वयं ॥ यजते ब्रह्मविष्ण्वीशान्स्नानदानजाप्यहुतेन च ॥ एवं वर्षशते याते ब्रह्मा विष्णुः शिवः स्वयं ॥ संप्राप्ता द्विजरूपेण संगमे तत्र पांडव ॥ पुरतः संस्थितास्तस्या वेदानभ्युद्धरंति च ॥ अनुसूया जपं त्यक्त्वा निरीक्ष्यैतान्मुहुर्मुहुः ॥ समुत्थाय विशालाक्षी ददावर्घं यथाविधिः ॥ बद्धांजलिपुटा साध्वी प्रशशंस च तान्द्विजान् ॥ अद्य मे सफलं जन्म तथाद्य सफलं तपः ॥ दर्शनेन तु विप्राणां सर्वपापैः प्रमुच्यते ॥ प्रदक्षिणं ततः कृत्वा साष्टांगप्रणताब्रवीत् ॥ कंदमूलफलानीह शाकनीवारकान् शुभान ॥ अद्याहं वः प्रयच्छामि मुनीनां भावितात्मनां ॥ ब्राह्मणाऊचुः ॥ तपसा ते विचित्रेण तव सत्येन सुव्रते ॥ सुतृप्ताः सर्वकामैस्तु सुप्रितास्तव दर्शनात् ॥ यतो नः कौतुकं जातं तप्यते दुष्करं त्वया॥स्वर्गमोक्षसुखार्थे वा तपस्तपसि दुस्तपं ॥ अनुसूया उवाच ॥ तपसा सिध्यते स्वर्गस्तपसा गुणवान्सुतः ॥ तपसा मोक्षमाप्नोति तपसा विंदते महत् ॥ तपसा सुखमैश्वर्यं तपसा सर्व संपदः ॥ तपसारातिविजयस्तपसा च जगद्वशे ॥ आयुः करं तपो विप्राः साध्वीभार्याप्रदं परं ॥ तपो नामेति याद्विप्राः सर्वकामफलप्रदं ॥ विप्राऊचुः ॥ तन्वी श्यामा विशालाक्षिस्निग्धांगि रूपसंयुते ॥ हंसलीलागति सुभ्रु सौम्ये सर्वांगसुंदरि ॥ ऋषिपत्नीमहाभागे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाक्षायिणिपतिव्रते ॥ किंनु ते तपसा कार्यं क्लिश्यते किं तनुस्त्वया ॥ साध्वी उवाच ॥ यौवने हि तपः साध्यं यौवने धनवर्जयेत् ॥ यौवने च सुतोत्पतिर्वृद्धत्वं सर्वमप्रियं ॥ विप्राऊचुः ॥ साधु साध्वि महाप्राज्ञे वरं वरय वांछितं ॥ तपःसक्ता यदर्थं त्वां तत्सर्वं कथयस्वनः ॥ स्वरूपाणी समाश्रित्य ततस्तामब्रूवन्सुराः ॥ अहं ब्रह्मा ह्यहं विष्णु रहं रुद्रो मुनिप्रिये ॥ त्वत्कार्यार्थे त्रयो देवा मर्त्यलोकमुपागताः ॥ आस्मान्वीक्ष्ये वरं ब्रूहि यस्ते मनसि वर्तते ॥ अनुसूया उवाच ॥ यदि विष्णुश्च रुद्रश्च स्वयं साक्षात्पितामहः ॥ गूढरूपधरालक्ष्याः किं चिन्हं कस्य विद्यते ॥ केन चिन्हेन किं देवं संप्राप्तमुपलक्षये ॥ अयुधं वाहनं वस्त्रं रुपं मे दर्शयंत्विह ॥ मार्कंडेय उवाच ॥ तस्या वाक्यावसाने तैः स्वं स्वं चिन्हं प्रदर्शितं ॥स्वचिन्हानाश्रिता देवाः सूर्यकोटिसमप्रभाः ॥ चतुर्भुजोह्यहं विष्णुः शंखचक्रगदाधरः ॥ सतोयजलदःश्यामः पीतवासा गरुत्मगः ॥ एष ब्रह्मा चतुर्वक्रश्चतुर्बाहुः शुभाशयः ॥ हंसस्कंधसमारुढः स्त्रक्स्रुचाक्षधरो विभुः ॥ कषायांबरधृद्देवि पश्यैतत्सृष्टिकारकं ॥असौ सितवृषारुढोस्त्रनेत्रः शशिशेखरः ॥ पंचवक्रो दशभुजः शूली भस्मानुलेपनः ॥ जटामुकुटसंयुक्तो गजकृत्तिकृतांबरः ॥ व्याघ्रचर्मोत्तरीयश्च मुंडमालाविभूषितः ॥ पाणौडमरुखट्वांगी सर्वजीवगतः शिवः ॥ एतद्रूपधरो देवः पश्यैनं साध्वी चिन्हतः ॥ अशेषलक्षणैर्युक्ता दर्शयानाः परस्परं ॥ देवास्ते दर्शने तस्थुर्वरदा विश्वसेविताः ॥ अनुसूया ततोदृष्ट्वा देवांस्तान् रूपलक्षणैः ॥ वेपमानवपुः साध्वी सुरान्वीक्ष्य मुहुर्मुहुः॥अयं ब्रह्मा ह्ययं विष्णुरयं रुद्र स्त्वसंशयं॥आनंदिता तु सा देवी दुःप्राप्यान्वीक्ष्य सुव्रत ॥अनुसुया उवाच॥ किंव्यापारस्वरूपास्य विष्णुरुद्रपितामहाः॥एतद्वै श्रोतुमिच्छामि तत्सर्वं कथयंतु मे ॥ब्रह्मा उवाच॥ प्रावृट्कालो ह्यहं ब्रह्मा आपोजीवः प्रकीर्तितः॥ मेघमूर्त्या महीक्षेत्रे सृष्ट्या विश्वं सृजामि वै॥अहं सृजामि भूतानि स्थावराणि चराणि च॥अहं सर्वाणि बिजानि प्राक्संख्याधृक्रजोगुणी ॥ यतद्वै कारणंसर्वं रहस्यं कथितं तव ॥ विष्णु रुवाच ॥ हेमंतोहं स्मृतो बिष्णुर्विश्वरूपं चराचरं ॥ पालयामि जगत्सर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सायं संध्यायजुर्मयः ॥ सत्वं गुण त्वमास्थाय मुरारिबलसूदनः ॥ इति ते कथितं देवि विष्णुर्व्यापारकारणं ॥ रुद्र उवाच ॥ ग्री-
ष्मकालो ह्यहं प्रोक्तः सर्वभूतक्षयं करः ॥ कर्षयामि जगत्सर्वं रौद्ररूपेण किं पुनः ॥ तमोगुणं समाश्रित्य मध्यान्हार्कप्रनोदि
तः ॥ सामधामाश्रितासाध्वि व्यपारसंहतिःपरा ॥ एवं ब्रह्मा च विष्णुश्च रुद्रश्चैव महाव्रते ॥ तिस्रसंध्यास्त्रयो देवास्त्रयः काला-
स्त्रयोग्नयः ॥ तथा ब्रह्मा च विष्णुश्च रुद्रश्चैकत्वमागताः ॥ वरं ददाति ते भद्रे यस्त्वया मनसीप्सितं ॥ अनसूया उवाच ॥ ध
न्याहं कृतपुण्या च लोकेश्लाघ्या च वंदिता ॥ यद्ब्रह्मविष्णुरुद्रा ये प्रसन्नवदना स्थिताः ॥ यदि तुष्टास्त्रयो देवा उद्धर्षाश्च ममो-
परि ॥ अस्मिंस्तीर्थे तु सानिध्याद्वरदाः संतु मे सदा ॥ देवाऊचुः ॥ एवं भवतु ते वाक्यं यत्त्वया प्रार्थितं शुभे ॥ प्रत्यक्षा
वैष्णवी माया एरंडी वीष्णु निर्मिता ॥ यस्या दर्शनमात्रेण पापनाशो भवेन्नृणां ॥ तत्र संनिहिता नित्यं दास्यामो लोकावांछि
तं ॥ अनुसूया उवाच ॥ यदि तुष्टास्त्रयो देवा मम भक्तिप्रनोदिताः ॥ ममपुत्राभवंत्वेव ब्रह्माविष्णुशिवाः शिवाः ॥ विष्णु
रुवाच ॥ पूज्यायत्पुत्रतां याति न कश्चिन्न श्रुतं मया ॥ अन्ये ददाति पुत्रांस्ते देवतुल्यपराक्रमान् ॥ सुरूपान्सद्गुणि पेतान्यजेयू-
कान्बहुश्रुतान् ॥ अनुसूया उवाच ॥ अलं बहुविधैर्वाक्यैर्देव विष्णो रमाप्रिय ॥ इप्सितं ताद्धि दातव्यं यन्मया प्रार्थितंहरे ॥
भवाद्भिर्नान्यथा कार्यं मम पुत्रैषिणा हिया ॥ श्रीविष्णु रुवाच ॥ एवं भवतु भाव्येन भवान्या यदुदीरितं ॥ पूर्वं हि भृगुसंवा-
दे गर्भवासउपार्जितः ॥ तस्यै च हं भजत्पारं नैव पश्यामि शोभने ॥ स्मरमाणः पुरा वृत्तं खेदं यामि पुनः पुनः ॥ एवंगते पितुवयं हरिः
शर्वः पितमहः ॥ अयोनिजा भविष्यामस्तव पुत्राः शुभानने॥योनिवासेन मर्त्यानां क्वचिद्देवाभवंति हि॥वयं चात्र भविष्यामस्तीर्थसंनि
हितास्तव ॥ वरं दास्यामहे देवी लोकानामत्र वांछितं ॥ एवं दत्वा वरान्देवास्तत्रैवांतर्हिताऽभवन् ॥ वरान्प्राप्य च सा साध्वी
माहेंद्र हि गता गिरिं ॥ क्षीणांगी शुष्कदेहा च रूक्षकेशा कृशानना ॥ धृतोत्तरीया मृदुगा तपःक्लिष्टा मृदुस्वरा ॥ गौर्यादिमातृम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यस्था शस्तलीला सुतार्थिनी ॥ साध्वीत्वे वर्ण्यमाना सा देवताभिः शुभावृता ॥ ततो मातृगणं साध्वी विसर्ज्यैव मुवाच-
ह ॥ ब्रह्माणि वैष्णवी मुख्या भवत्यो लोकमातरः ॥ मया पदप्रणामेन प्रार्थिताः संतु पुत्रदाः ॥ निर्विघ्नं संतु मे पुत्रा
भवतीभिः सुरक्षिताः ॥ भवत्यो मे तपः स्थाने तिष्ठंतु वरदा नृणां ॥ मयासार्द्धं महादेव्यो मातरो लोकपूजिताः ॥ इत्यु-
क्त्वा ता विसर्ज्याथ सत्यशीला महाव्रता ॥ अनसूया भर्तृमूलं जगाम गजगामिनी ॥ शिलातलनिविष्टोसौ पश्यन्कांतां
महाप्रभां ॥ हृष्टचित्तो भवत्तस्यै स्वागतं मुहुरालपत् ॥ अत्रिरुवाच ॥ साधु साधु महाप्राज्ञे स्वागतं ते महाव्रते ॥ अ-
चिंत्यं गालवादीनां वरं प्राप्तासि दुर्लभं ॥ अनुसूया उवाच ॥ त्वत्प्रसादेन देवर्षे वरः प्राप्तः सुदुर्लभः ॥ त्वां हि देवाः
प्रशंसंति ऋषयः सिद्धचारणाः ॥ एवमुक्त्वा च सा देवी निषण्णा भर्तुरंतिके ॥ तोषयंति प्रियालापैर्महोत्साहसमन्विता॥आलो-
कयत्ततः कांतं तेनाप्यालोकिता शुभा ॥ इक्षणाच्चैव संजातं दृग्भूमध्ये सुमंडलं ॥ मुनिवीर्यसमुद्भूतं दिव्यं तदमलं नृप ॥
वर्धमानं वियत्प्राप्तं शुभ्रमूर्द्धोद्वगं तदा ॥ नवयोजनसाहस्रं ललाटात् दीप्तिमत्पृथु ॥ कदंबगोलकाकारमाल्हादजननं नृणां ॥
तस्यांतःसंनिविष्टांश्च देवेशो दिव्यमूर्तिमान् ॥ हेमवर्णोमृतमयः सूर्यकोटिसमप्रभः ॥ अनुसूयादिजः पुत्रःस्वयं साक्षात्पितामहः
॥ दीप्त्याल्हादकरो येनचंद्रमाइति विश्रुतः ॥ उत्कृष्टलक्ष्मीसहितः सोमस्तेन निगद्यते ॥ यतोनुरज्यते लोकास्तस्मिन्देवे युधि-
ष्ठिर ॥ तस्माद्राजेतिनामास्य ख्यातं लोकत्रयेपि च ॥ इष्टापूर्तमयः श्रीमान्कलाषोडषकावृतः॥तिथयः प्रतिपन्मुख्या कलास्तस्य म-
हात्मनः ॥ पूर्णिमापंचदशमी अमावास्या च षोडशी ॥ चतुर्विधं भूतजातं सूक्ष्मो भूत्वा नृपोत्तम ॥ आप्याययेद्विश्वमिदं सुधया
सोममाश्रिता ॥ सुरासुराः सगंधर्वा यक्षराक्षसपन्नगाः ॥ दैत्याः पिशाचाः पितरः सिद्धकिन्नरगुह्यकाः ॥ सर्वे तत्रोपजीवंति हुतं द-
त्तं शशिस्थितं ॥ वनस्पतिगते सोमे परान्नं यस्तु भुंजति ॥ तस्यमासकृतं पुण्यं यस्यान्नं तस्य तत्फलं ॥ वनस्पतिगते सोमे धनवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपि यो नरः ॥ भुंजन्परगृहे मूढो दद्याद्दत्कृतंशुभं ॥ वनस्पतिगते सोमे यस्तुछिंद्याद्वनस्पतीन् ॥ तेन पापेन पापात्मा नरकं याति दारुणं ॥ वनस्पतिगते सोमे मैथुनं यो निषेवते ॥ ब्रह्महत्यासमं पापं स लभेन्नात्र संशयः ॥ वनस्पतिगते सोमे यः कुर्याद्दंतधावनं ॥ चंद्रमा भक्षितस्तेन पितृवंशश्च घातितः॥ वनस्पति गते सोमे यः पिंडान्हि न निर्वपेत्॥क्षुधिताः पितरो रुष्टा संतानं नाशयंति हि ॥अमावास्यां समासाद्य श्राद्धं यो विधिनाचरेत् ॥ अद्बमेकं भवंतीह तृप्तास्तत्पितरो ध्रुवं ॥ हिरंण्यं रजतं वस्त्रं छत्रोयानकमंडलु ॥ जलं शय्यासनं वापि यो ददाति द्विजादिषु ॥ सर्वं लक्षगुणं पार्थ लभते नात्र संशयः ॥ पितृणां जनयेत्प्रीतिं वर्द्धते यशसा श्रिया ॥ अमानाम कला रश्मिर्यदा चंद्रं निषेवते ॥ तदा लक्षगुणं दानं पितृणां तुष्टिमावहेत् ॥ एवं गुणविशिष्टोसौ सोमरूपः प्रजापतिः॥ संजातः प्रथमः पुत्रो ह्यनुसुयासुनंदनः ॥ द्वितीयश्च तदा जातोदुर्वासा नाम नामतः ॥ सृष्टिसंहारशक्तो हि स्वयं साक्षान्महेश्वरः॥ऋषिमध्यगतः सोपि तपस्तप्यति दुष्करं ॥सोपि वै रुद्रतां याति संजाते भूतविप्लवे॥शप्तश्च शक्रस्तेनादौ वने दुर्वाससा नृप ॥ द्वितीयश्च तु पुत्रस्य संभवः कथितो मया ॥ तृतीयं शृणु भूपाल विष्णोरंशं मुनेःसुतं ॥दत्तात्रेयस्वरूपेण भगवान् मधुसूदनः॥जगव्द्यापि जंगनाथः स्वयं साक्षाज्जनार्दनः॥ अत्रेः पुत्रः स अत्रेयो नाम्ना दत्त इति श्रुतः॥अवधूतचरित्रेण योगी विचरते महीं॥ एते देवास्त्रयः पुत्रा आनुसुया युधिष्ठिर ॥ वरान्दत्वा तु तस्यैते अवतीर्णा महीतले ॥ पुत्रप्राप्तिपदं तीर्थं रेवाया उत्तरे तटे अनुसूयाकृतं पार्थ सर्वपापक्षयंकरं ॥ संश्रितं मातृवर्गेणविख्यातं भुवनत्रये ॥ तत्र स्नात्वा तु यो राजन् अनुसूयां प्रपूजयेत् ॥ कुंकुमैः कज्जलैर्वस्त्रै र्ग्रीवासूत्रैः स्वशक्तितः ॥ विविधैरुपचारैश्च पूजयेन्मातृसंचयं ॥ सपुत्रपौत्रान्संप्राप्य मोदते कालमक्षयं ॥ गौरिणी भोजयेत्तत्र दंपत्यं चापि यो नरः ॥ मातरस्तत्सुप्रीताः सानुसूया भवंति हि ॥ इति श्रीरेवामहात्म्येउत्तरे अनुसूयातीर्थंनाम विंशशतितमोध्यायः ॥ १२० ॥ श्रीमार्कंडेय उवाच ॥ ततः क्रमान्महाराज शृणुतीर्थमनुत्तमं आश्चर्यभूतं लोकेस्मिन् नर्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दातटउत्तरे ॥ भ्रूणहत्यागता यत्र ब्राह्मणस्य युधिष्ठिर ॥ अत्रैवोदाहरंतीममितिहासं नृपोत्तम ॥ सर्वपापहरं श्रेष्ठं दुःखार्त्तं दुःखना-
शनं ॥ सुवर्णशिलके ग्रामे गौतमान्वयजो द्विजः ॥ कृषीवलो महोत्साहो भार्यापुत्रसमन्वितः ॥ गोविंदस्तत्र वसति संजातो
विपुले कुले ॥ बालपुत्रः सभार्यश्च गृहकर्मरतः सदा ॥ एकदा वनमध्यात्स संचार्येंधनसंचयं ॥ शकटं पूरयित्वा च काष्ठानामगमद्गृहं ॥
गृहपाश्चात्यभागे तु वृतेरुपरि पांडव ॥ प्रचिक्षेप च काष्ठानि एकाकि क्षुधयार्दितः ॥ इत्यंतरे रिंगमाणो गृहपृष्ठे सपुत्रकः ॥
काष्ठेषु क्षिप्यमाणेषु पितृशब्दात्समागतः ॥ नष्टश्चयस्तेन पुत्रोसौ काष्ठैः संछादितोभृशं ॥ आगतोसौ गृहद्वारे पिपासार्तो द्विजस्त-
तः ॥ स वृषं मोचयन्वाहशकटं रज्जुसंयुतं ॥ भार्या तस्यैव या इष्टा चित्तज्ञा वशवर्तिनी ॥ दृष्ट्वा निपतितं पुत्रं काष्ठैर्निर्भिन्नमस्त
कं ॥ अजल्पमानाकरुणंपर्यंके शाययच्छिशुं ॥ शुश्रूषणे रता साध्वी स्वभर्तुः सा नराधिप ॥ ततः संस्नापितो भर्ता भोजितः
शायितस्तथा ॥ पश्चात्पुत्रं च पर्यंकादुत्थापयति सा यदा ॥ तदा न चेष्टते पुत्रः किमेतदिति संभ्रमात् ॥ पुनरुत्थापितोप्येवं
नष्टचेष्टो ध्रुवं मृतः ॥ तदा सा दीनवदना रुरोदार्ता मुमोह च ॥ तत्श्रुत्वा रुदितं तस्या गोविंदस्त्रस्तमानसः ॥ किमेतदिति
चोत्काथ पपात धरणीतले ॥ तावुभौ मुक्तकेशौ तु भूमौ निपतितौ तदा ॥ विलपंतौ नृपश्रेष्ठ सनिःश्वासौ सुविव्हलौ ॥ ऊचतुः
पुत्रचरितं वियोगस्य च लक्षणं ॥ कमत्र प्रांगणे पुत्रं दृष्ट्वा क्रीडंतमातुरं ॥ संधारयिष्ये हृदयं स्फुटमानं मृते त्वयि॥त्वयिकीर्ति-
र्यशःसौख्यमक्षयाकुलसंततिः ॥ दृष्ट्वाकममृणाद्याहं यास्यामि परमां गतिं ॥ ममानाथस्य वृद्धस्य गतिस्त्वं किल जायसे ॥ मनो-
रथाः ममाद्यैते सर्वे विफलतां गताः इमां सुविव्हलां दीनां विहीनां सुतबांधवैः ॥ त्रायस्व मातरं तेद्य रुदंतीं शोककर्शितां ॥
पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ॥ तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ अपुत्रस्य गृहं शुन्यं दिशः शून्यास्त्वबां-
धवाः ॥ मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रता ॥ मिथ्या वदति लोकोयं चंदनं किल शितलं ॥ पुत्रगात्रपरिष्वंगश्चंदनादपि १९०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीतलः ॥ वीणावाद्यस्वनो लोके मधुरश्रूयते किल ॥ बालालापश्च रुदितं ततोप्याल्हादनं नृणां ॥ मृगपक्षिपतंगेषु श्वशूकरख-
रादिषु॥ पुत्रस्तेषु समस्तेषु वल्लभः पांडुनंदन ॥ गजाश्वमात्स्य मकराः कूर्माहिग्राहभूलयाः ॥ पुत्रोत्पत्तौ प्रहृष्यंति विपत्तौ दुःख-
पीडिताः ॥ देवगंधर्वयक्षाश्च हृष्यंते पुत्रजन्मनि ॥ मरणे तेपि शोचंते ब्रुवाणा मंदभाग्यतां ॥ ऋषिमेलापकं चक्रे पुत्रार्थे राधवः
पुरा ॥ शक्रस्थानोचितस्यास्य प्रोक्ष्यते ह्यासनंयतः ॥ विनापुत्रं कथं भूयात् स्वर्गे वासः शुभागतिः ॥ राजा दशरथस्तस्मात्पुत्रार्थं
यज्ञर्माजिवान् ॥ रामो लक्ष्मणशत्रुघ्नौ भरतश्चाभवन्सुताः ॥ कार्तवीर्यो जितो येन रामेणामिततेजसा ॥ स रामो रामचंद्रेण
अष्टवर्षेण वै जितः ॥ एकाकिना हतो वालिः प्लवगः शत्रुदुर्जयः ॥ रावणो ब्रह्मपुत्रश्च त्रैलोक्यं यस्य शंकते ॥ हतः स रामचंद्रेण
सपुत्रः सहबांधवः ॥ एवं पुत्रंविना सौख्यं मृत्युलोके न विद्यते ॥ वंशार्थे मैथुनं यस्य वर्गार्थे यस्य भारती ॥ मीष्टान्नं ब्राह्मण-
स्यार्थे स्वर्गार्थे तस्य जीवितं ॥ ब्रह्महत्याश्वमेधाभ्यां न परं पापपुण्ययोः॥ पुत्रोत्पत्तिविपत्तिभ्यां न परं सुखदुःखयोः॥किं ब्रवामीति
भोवत्स नतु सौख्यं सुखं विना ॥ एवं बहुविधं दुःखं प्रलपित्वा पुनःपुनः ॥ जनैश्चाश्वासितो विप्रोबालं गृह्य विनिर्गतः ॥ ततः
संस्कृत्य तं बालं विधिनोक्तेन कर्मणा ॥ समवेतौ च दुःखार्ता वागतौ स्वगृहं पुनः ॥ एवं गृहागते विप्रेदिनैः कतिपयैर्नृप ॥ एक-
दा शोचमानस्तु रात्रिं प्राप्य सुविह्वलः ॥ भूमौ प्रसुप्तो गोविंदः पुत्रशोकेन पीडितः ॥ यावन्निरीक्षते भार्या निशिथे दुःखितं पतिं
॥ कृमिराश्यंतरगतं ददर्शातीवकुत्सितं ॥ दुःखादुःखांतरे मग्ना दृष्ट्वा पापफलांकितं ॥ एतदुःखनिमग्नाया व्यतीता शर्वरी तदा ॥
प्रत्यूषे पशुपालेन गोविंदो ब्राह्मणस्तदा ॥ यावद्रोक्ष्याम्यहं स्वामिन् तावद्यत्रामिहाश्रय ॥ महिषीरक्षणे विप्र मास्तु तासांविपर्ययः
॥ ततोसौ त्वरितो विप्रो महिषीस्त्रातुमागतः ॥ ततः प्रधाविते विप्रे एरंडीसंगमे गता ॥ प्रद्रुता तोयपानार्थं जलमध्ये विवेश सा
॥ततः सा संगमजले विप्रोपिप्रविवेश ह॥ एरंडी नर्मदासंगे नाभिदघ्ने प्रविश्य च॥निवर्तयामास स तां महिषीं पुनरेवहि॥अकामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सलिलं पीत्वा प्रक्षाल्य नयने ततः ॥ आजगाम द्विजः सोपि भवनं दिवसक्षये ॥ भुक्का दुःखान्वितो रात्रौ गोविंदः शयने ययौ ॥ निद्राभिभूतः शोकेन खिन्नश्चापि श्रमेण तु ॥ पुनस्तं चार्द्धरात्रे तु तस्य भार्या वलोकयत् ॥ कृमिभिर्वेष्टितं गात्रमर्द्धं पश्यत्य-वेष्टितं ॥ ततः सा विस्मयाविष्टा तस्य भार्या गुणान्विता ॥ उवाच दुष्कृतं तस्य साध्वसाविष्टमानसा ॥ भार्या उवाच ॥ अतीते पंचविंशेन्हि काष्टानिक्षिपतस्तव ॥ गृहपृष्ठगतो बालस्त्वज्ञानाद्धातितस्त्वया ॥ मया तत्पातकं घोरं रहस्यं न प्रकाशितं ॥ तेन प्रच्छन्नपापेन दह्यमाना दिवानिशं ॥ न सुखं तव देहस्य पश्यामि नहि चात्मनः ॥ निद्रा ममान्वहं याता रतिश्चापि त्वया सह॥ श्रूयते धर्मशास्त्रे वै वाक्यमुक्तं महर्षिभिः॥ तस्य स्वाहर्निशं चित्ते परिततापो न शाम्यति॥ कीर्तनान्नश्यते धर्मो वर्द्धते सोवगूहनात्॥ इहलोके परेचैव पापं स्यादेवमेव हि॥ एवं चिंतान्विता नित्यं विनिद्रा निशि चातुरा॥ पश्यामि ते कृमीन् गात्रे किं कस्य कथयाम्यहं॥ पुनस्त्वं चाद्य दृष्टो मे भ्रूणघ्नः कृमिभिर्युतः॥ क्वचिद्भिंदंति ते गात्रं क्वचिन्नष्टाश्च सर्वतः॥ इति संस्मृत्य संदिग्धं विमृशामि पुनःपुनः॥ न जाने कारणं तत्र पृच्छामि कथयस्व मे ॥ तडागं वा नदीतीर्थं सिद्धं क्षेत्रं तु देवतां ॥ यं गतोसि प्रभावोयं तस्य नान्यस्य चिंतये ॥ सर्वं गात्रं प्रतिदिनं दृष्ट्वा ते कृमिभिर्वृतं ॥ अद्यैवार्धशरीरस्य पश्यामि कृमिवर्जितं ॥ न कारणं विनैतद्वै भवेदिति मतिर्मम ॥ मार्कंडेय उवाच ॥ एवमुक्तोथ विप्रो वै कथयामास विस्मितः ॥ स्मृत्वा तद्यदिवावृत्तं शंकमानो नृपोत्तम ॥ गोविंदविप्र उवाच ॥ अद्याहं महिषीसाकमेरंडीसंगमं गतः ॥ नाभिमात्रे जले गत्वा पीतवान् सलिलं शुभं ॥ नान्यत्तीर्थं विजानामि सरिद्वा सर एव वा ॥ न गतोन्यत्र वै सत्यं कथितं तव सुंदरि ॥ एवं ज्ञात्वा च सा सर्वमुपवास सकृत्तदा ॥ सहभर्त्रा गता तत्र संगमे वरवर्णिनी ॥ स्नात्वा तत्र जले रम्ये नत्वा देवं च भास्करं ॥ स्नापयामास देवेशं शंकरं लोकशंकरं ॥ पंचगव्यं घृतक्षीरमधुदध्यंबुखंडिभिः ॥ गंधमाल्यार्घनैवेद्यैर्नीराजनविशेषितैः ॥ पूजितं त्रिमयं लिंगं देवी कात्यायिनी तथा ॥ रात्रौ जागरणं कृत्वा पत्यासह पातिव्रता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः प्रभाते सुस्नात्वा विप्रान्संपूज्य यत्नतः ॥ गोदानेन हिरण्येन वस्त्रदानेन भारत ॥ गोविंदः पूजयामास स्वशक्त्या ब्राह्मणान् शुभान् ॥ मुक्तः पापो गृहान् यातः स्वभार्यासहितो नृप ॥ मार्कंडेय उवाच ॥ एवं यः शृणुयाद्भक्त्या गोविंदाख्यानमुत्तमं ॥ पठेद्वा पार्थ तस्यापि भ्रूणहत्या प्रणश्यति ॥ शांकरे क्रीडते लोके यावदाहूतसंप्लवं ॥ यश्चैवाश्वयुजे मासि चैत्रे वाथ नृपोत्तम ॥ सप्तम्यां तु सिते पक्षे सोपवासो जितेंद्रियः ॥ सात्विकीं वासनां कृत्वा यो वसेच्छिवमंदिरे ॥ ध्यायमानो विरूपाक्षं शूलिनं शशिशेखरं ॥ सुरारिसंघहंतारं शंखचक्रगदाधरं ॥ पक्षिराजसमारूढं विश्वैकपरिपालकं ॥ पितामहं ततो ध्यायेद्धंसस्थं चतुराननं ॥ चतुर्बाहुं च वरं जपमालाधरं विभुं ॥ स्रुवं कमंडलुं चैव दधानं स्वर्गकारणं ॥ स्वर्गदं सर्वभक्तानां कमलासनशोभितं ॥ योऽप्येवं निवसेत्तत्र त्रियमे स्थानमुत्तमे ॥ स पापक्षयमाप्नोति वांछितं च लभेत्फलं ॥ ततः प्रभाते स्नात्वाष्टम्यां च युधिष्ठिर॥ ब्राह्मणान्पूजयेद्भक्त्या सर्वदोषविवर्जितान् ॥ सर्वावयवसंपूर्णान् सर्वशास्त्रविशारदान् ॥ वेदाभ्यसननिष्ठांश्च स्वदारनिरतान्सदा ॥ श्राद्धे दाने व्रते योग्यान् ब्राह्मणान्पांडुनंदन ॥ पितॄणां पूजनं तत्र देवपूर्वं समाचरेत् ॥ प्रेतत्वान्मुच्यते शीघ्रमेरंड्यांपितृतर्पणे ॥ दानानि तत्र देयानि ह्यन्नमुख्यानि भारत ॥ हिरण्यभूमिकन्यांश्च धूर्वाहौ शुभतर्पणौ ॥ शिरेण सहितौ पार्थ ध्यानमूटकसंयुतौ ॥ अलंकृत्य सवत्सां च क्षीरिणीं तरुणीं शुभां ॥ रक्तश्वेतादिवर्णां वा कपिलां गामथापि वा॥ कांस्यदोहनसंयुक्तां रुक्मरुप्यादिभूषितां ॥ शास्त्रोक्तविधिना पार्थ ब्राह्मणाय प्रदापयेत् ॥ प्रीयंतां मे जगन्नाथा हरकृष्णपितामहाः ॥ सर्वतः पावनी देवी सुरभी पातुमामघात् ॥ पुत्रार्थं वा स्त्रियः पार्थ एरंड्यासंगमे द्विजैः ॥ स्नाप्यंते रुद्रसूक्तैश्च चतुर्वेदोद्भवैस्तथा ॥ चतुर्भिर्ब्राह्मणैः शस्तं द्वाभ्यां योग्यैस्तु कारयेत् ॥ एकेनाप्यथ कुंभेन चतुर्वेदाभिमंत्रितं ॥ आचार्यो विधिना पार्थ दंपत्यमभिषेचयेत् ॥ दैवज्ञेनैव चैकेनाप्यथवा सागमेन तु ॥ सप्तधान्योपरि कृतं कुंभं सर्वांगशोभितं ॥ पंचरत्नसमायुक्तं छिन्नास्यं पंचपल्लवैः ॥ पूरितं गंधतोयेन सर्वौषधिविमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रितं वेष्टितं सितवस्त्रेण सितचंदनचर्चितं ॥ शितपुष्पसमाछिन्नं सिद्धार्थकृतमध्यगं ॥ कांस्यपात्रेण पिहितं पंचामृतसमन्वितं ॥
मृत्पंचकांतरकृतं शुभ्रं बीजफलान्वितं ॥ तत्पात्रे पंचगव्यं च तथा बीजफलानि च ॥ एवं कुंभं तु संस्थाप्य पुत्रार्थी देशकोत्तमं
॥नत्वा दंडप्रणामेन प्रार्थयेत्पुरतस्थित:॥ब्राह्मणा जंगमं तीर्थं निर्जलं सर्वकामिकं ॥तेषां वाक्योदके नैव शुध्यंति मलिनो जनाः ॥
अपुत्रस्य द्विजश्रेष्ठमम सत्पुत्रमिच्छतः ॥ कृपया शास्त्रविधिना सभार्यस्याभिषेचय ॥ प्रसन्नो ब्राह्मणैर्नूनं प्राप्यंते सर्वसंपदः ॥ तै-
रेवरुष्टैर्मनुजः सक्षयं याति सर्वतः ॥ तस्मात्प्रसन्नो भूत्वा मां पूरयस्वामिवांछितैः ॥ आचार्यत्वमिहासाद्य विधिमंत्रपुरस्कृतं ॥ ततः
कुंभं समादाय स्वस्तिवाचनपूर्वकं ॥ कांस्यपात्रे कलशाद्धारयन्स्नापयेद्विजः ॥ दंपत्यं पावमानीभिर्मंत्रैश्च स्नानसंभवैः ॥ चतुर्वेदो-
दितैः पार्थ वारुणैः शांतिसंभवैः ॥ यत्ते केशेषु दौर्भाग्यमित्यादिभिरभिक्रमात् ॥ स्नापितोयजमानश्च मंगलालभते कृते ॥ अंग-
लग्नं तु यद्वस्त्रं कटकाभरणं तथा ॥ त्यजेत्तन्मंडलसर्वं सिद्धिमिच्छन्निहात्मनः ॥ प्रणम्य भास्करं पश्चादाचार्यं रुद्ररूपिणं ॥ धृतान्य-
वस्त्रसंहारो देवानभ्यर्चयेत्ततः ॥ दद्यात्समफलीं विप्रे छत्रं तांबूलमेवच ॥ उपानहौ च यानं च दंपतीपरिधानकं ॥ अन्नं
दद्याद्बहुविधं सभवेदुःखवर्जितः ॥ एकवस्त्रेण वै स्नातौ दंपतीसंगमे पुरा ॥ पश्चाद्वेदविधानेन प्राप्नुतः पुत्रमीप्सितं ॥
क्रीडते भास्करे लोके यावदाहूतसंप्लवं ॥ दानं कोटिगुणं सर्वं तत्र तीर्थे तु यत्कृतं ॥ तथा नदी नदाः सर्वे प्रलये यांति संक्षयं ॥
एवं पापानि नश्यंति एरंडीसंगमे नृणां ॥ समंताच्छरपातं हि एरंडीसंगमे नृप ॥ भ्रूणहत्यासमं पापं नश्येदेवं वदेच्छिवः ॥ प्राण-
त्यागं च यो भक्त्याजातवेदासि कारयेत् ॥ अनासकेन तोयेन तस्य यत्फलंशृणु ॥ पंचसाहस्त्रिकं मानं वर्षाणां वन्हिसाधनात्
॥ त्रिसाहस्त्रं जले नोक्तं षष्टिश्चानशनेन तु ॥ मर्त्यस्याष्टसहास्राणां पूर्वमेवं श्रुतं मया ॥ बकाकाकाः कपोताश्च उलूकाः पशवो
परे ॥ संगमोदकसंस्पृष्टास्तेप्यंते यांति सद्गतिं ॥ वृक्षाश्च तत्पदं यांति यत्पदं यांति योगिनः ॥ एरंडिका मया दृष्टा १९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिसाहस्रं जले नोक्तं षष्टिश्चानशनेन तु ॥ मर्त्यस्याष्टसहस्राणां पूर्वमेवं श्रुतं मया ॥ बकाकाकाः कपोताश्च उलूकाः पशवो परे ॥ संगमोदकसंस्पृष्टास्तेष्यंते यांति सद्गतिं ॥ वृक्षाश्च तत्पदं यांति यत्पदं यांति योगिनः ॥ एरंडिका मया दृष्टा दृष्टो मे मन्मथेश्वरः ॥ किंकरोति यमो रुष्टो भद्रो भद्राणि पश्यति ॥ इत्युक्त्वा संगमोद्भुतसृदां योगात्रकुंठकः ॥ भ्रूणहत्यादि पापानि तस्य नश्यंत्यसंशयः ॥ एरंडिसंगमं मर्त्यआश्रमस्थोपि कीर्तयन् ॥ जायते मुक्तपापोसौ इति शंकरभाषितं ॥ एरंडीसंगमभवैः पादपाग्रैश्च दूरतः ॥ दृश्यै नश्यंति पापानि देहस्थानि युधिष्ठिर ॥ तीर्थाख्यानमिदं पुण्यं ये पठंति द्विजोत्तमाः ॥ शृण्वंति च तथा भक्त्या मुक्तपापा भवंति ते ॥ एतत्ते सर्वमाख्यातमेरंडीसंगमं नृप ॥ भूयश्चान्यत्प्रवक्ष्यामि श्रद्दधानाय भारत ॥ इति श्रीवायूक्त रेवामहात्म्ये उत्तरे एरंडीसंगमतीर्थनाम एकविंशतितमोध्यायः ॥ १२१ ॥ श्रीमार्कंडेय उवाच ॥ ततः परं नृपश्रेष्ठ सुवर्णशिलमुत्तमं ॥ प्रख्यातमुत्तरे कूले सर्वपापक्षयं करं ॥समंताच्छरपातेन मुनिसंघैः पुराकृतं ॥ रेवायां दुर्लभं स्नानं संगमस्य समीपतः ॥ इत्यालोच्याथ मुनिभिर्निवासकृतनिश्चयैः ॥ निस्पृहैर्निरहंकारैः समलोष्टाश्मकांचनैः ॥ मुमुक्षुभिर्महाभागैस्तपोनिर्धूकल्मषैः ॥ संगमात्पश्चिमे भागे विमृश्यानुक्रमेण तु ॥ विभक्तं हस्तमात्रं तु पुण्यं क्षेत्रं नराधिप ॥ विभागं तत्र कुर्वद्भिः क्रमेण पुरतोगतैः॥ शिलास्वर्णमयी दृष्टा अकस्मात्कृतका भुवि ॥ हस्तद्वयप्रमाणा तु सुतेजस्का मनोहरा ॥दृष्ट्वा तां मुनयः सर्वे विस्मयं परमं ययुः॥ किमेतदिति चाकस्मात्किमुवोत्पातलक्षणं ॥ इति स्थितेषु क्षुब्धेषु संशयानेषु भारत ॥ विप्रेषु तत्र सपदि वागुवाचाशरीरिणी ॥ विभज्यगृह्यतोमषा भवद्भि र्मुनिपुंगवाः॥तपसो फलमेतद्वः शिलेयं कांचनी शुभा॥नोत्पातो विकृतिर्नात्र न संदिग्धं क्वकिंचन॥ ततस्तद्वचनाद्विप्रैर्विचिंत्य कृतनिश्चयैः ॥ वितृष्णैर्निर्ममैरुक्तं परस्परमतेन तु ॥ वयमेनां न गृह्णामो तिष्ठत्वेषा यथास्थिता ॥ यातु वा तत्र यत्रेमां कामं गृण्हंति मानवाः॥मुमुक्षा नः परा भद्रे दिव्यभारति मावद ॥ वागुवाच ॥ रेवया प्रेरितेनेयं दत्ता शर्वेण वो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्विजाः ॥इयं स्वर्णशिला ग्राह्या विभज्य द्विजसत्तमाः॥शंकरस्य प्रसादोयं रेवाया शल्यकारितः ॥सर्वैरपि सदाग्राह्यो भवद्भिश्च विशेषतः॥ अप्रमाणीकृते सर्वैःशप्ता भस्मीभविष्यथ॥मुनयऊचुः॥वाणि किंबहुनोक्तेन सकृजल्पंति वाडवाः॥यद्भवेज्जायतां तन्न किंतु हेम्नोहि दूरगा॥ मार्कंडेय उवाच॥ततस्तं निश्चयं ज्ञात्वा मुनीनां नृपसत्तम॥तत्र शर्वः समुत्तस्थौ शिलाचांतर्हिताऽभवत्॥उवाच च विभुः साक्षाल्लिंगरूपो महेश्वरः॥साधु साधु महाभागा वितृष्णा मुनयो ध्रुवं॥युष्मत्परीक्षणायैषा मया स्वर्णशिला कृता॥प्रसन्नोस्म्यद्य वो विप्रा वरं वरयतानघाः ॥ मुनयऊचुः ॥ यदि तुष्टोसि नो देव वरं दातुमिहेच्छसि ॥ तिष्ठात्र तीर्थे सुचिरं स्थाणो स्थणुरिवाचलः ॥ नाम्ना लोकहितार्थाय त्वं सुवर्णशिलेश्वर ॥ मोक्षंनस्तप्यमानानां देहि देव सनातन ॥ ईश्वर उवाच ॥ एवमस्तु द्विजश्रेष्ठाः सुचिरं स्थास्यते मया ॥ इह लोकोपकाराय तीर्थे स्वर्मोक्षदे शुभे ॥ इह स्थितोस्मि सततं संगमे पार्श्वतोऽपि च ॥ कदापि क्वापि तिष्ठामि सर्वकालमिहानघाः ॥ युष्मत्प्रीत्या विशेषेण नाम्ना स्वर्णशिलेश्वरः ॥ भवद्भिश्च तपश्चर्या कर्तव्या मोक्षमिच्छुभिः॥ कालेनाल्पेन मां ध्यात्वा लयं मयि गमिष्यथ ॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत ॥ श्रीमार्कंडेय उवाच ॥ ततः प्रभृति विख्यातं सुवर्णशिलकेश्वरं ॥ यस्सुवर्णशिलास्थाने पिंडीभूतो महेश्वरः ॥ सुवर्णशिलतीर्थे यःस्नात्वा संपूजयच्छिवं ॥ प्रणम्य भास्करं भक्त्या जुहुयाज्जातवेदसि ॥ तिलाज्यं बिल्वपत्राणि सिद्धार्थाः श्रीफलानि च ॥ प्रियतां मे महादेवो व्याधिहा मृत्युनाशनः ॥ विप्राय कांचनं दत्वा तच्छृणुष्व फलं नृप ॥ फलं बहुसुवर्णस्य यज्ञस्योक्तं तुयन्नृप ॥ नरस्तल्लभते सर्वं कांचनं यः प्रयच्छति ॥ तेन दानेन पूतात्मा मृतः स्वर्गमवाप्नुयात् ॥ रुद्रस्यानुचरस्तावद्यावत्पार्थ चतुर्युगं ॥ ततः स्वर्गावतीर्णः स जायते विपुले कुले ॥ धनं धान्यं यशः सौख्यमायुश्चापि चिरं लभेत् ॥ सुवर्णशिलकेतीर्थे ब्राह्मणान् यश्च भोजयेत् ॥ एकस्मिन् भोजिते विप्रे सहस्रं भोजितं भवेत् ॥ इति श्रीरेवामाहत्म्ये उत्तरे सुवर्णशीलेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ ततः शृणु शुभं तीर्थमंबिकेश्वरसं- १९३

CC-0. In Public Domain. Digitization by eGangotri

ज्ञितं ॥ क्रोशांतरे संगमाद्वै पुण्यं वांछितसिद्धिदं ॥ अंबिकानाम विख्याता काशीश्वरसुता पुरा ॥ तया तत्र तप-
स्तप्तं भर्तुरर्थे युधिष्ठिर ॥ स्थापितः परमेशानः स्वनाम्नाराधितस्तथा ॥ कालेनाबहुधा तस्याः प्रसन्ने शंकरे नृप ॥ वां
छितास्याभवत्सिद्धिस्तीर्थस्यास्य प्रभावतः ॥ ततः प्रभृति विख्यातं तीर्थं चैवांबिकेश्वरं ॥ तत्र स्नात्वा तथादद्यात्पि-
तृणां यस्तिलोदकं ॥ ईप्सितां सिद्धिमाप्नोति स्वर्गलोके महीयते ॥ अंबिकेश्वरमभ्यर्च्य यथालब्धोपहारतः ॥ स्तुति-
प्रणतिभावैश्च नैवेद्यैर्गीतनर्तनैः ॥ चतुर्युगशतं पार्थ शिवलोके महीयते ॥ सकृच्छ्राद्धप्रदानेन पितॄणां तृप्तिरक्ष-
या ॥ जायते मनुजश्रेष्ठ तीर्थस्यास्यप्रभावतः ॥ इति श्रीरेवायां अंबिकेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच॥ततो गछेन्महाराज
करंजेश्वरसंज्ञितं ॥ क्रोशार्धे तु स्थितं तद्वै अंबिकेश्वरतीर्थतः ॥ करंजमुनिना तत्र स्थापितं लिंगमुत्तमं ॥ स्वनाम्ना भरतश्रेष्ठ लो-
कानां हितकाम्यया ॥ अद्यापि श्रूयते गाथा यस्य विप्रस्य पांडव ॥ बाल्याद्व्रतं ब्रह्मचर्यं यो धृत्वा स्वेच्छया चरन् ॥ परीक्षितो
लोकपालैर्दिव्यस्त्रीलोभनादिभिः ॥ सखित्वं वसुभिर्यस्य मित्रत्वं जनकेन च॥सर्वमित्रश्च विख्यातो जातश्चांगिरसान्वये ॥ युधिष्ठि-
र उवाच ॥ तस्य गाथा त्वयोक्ता यास्तेन चान्येन भाषिताः॥ता मे वदमुनिश्रेष्ठ श्रोतुं मे त्वरते मनः ॥ मार्कंडेय उवा
च ॥ सपूर्वं भार्गलो नाम ऋषिर्मेधातिथिःसुतः ॥ जितः करो यतस्तेन करंजस्तेनशाद्धितः ॥ तस्य गाथा नृपश्रेष्ठश्रोतव्याः
शृणु सांप्रति ॥ कीर्तिं स्वर्गप्रदंनृणां करेण सुकृतं कृतं ॥ कृतं च दुष्कृतं तेन पातयत्यखिलं कुलं ॥करः करोति सत्कर्मान्नरस्तर-
ति दुष्कृतं ॥ कृतं कदापि सत्कर्म भवेत्पापफलावहं ॥ करः करोति कर्माणि मनः संप्रेरयत्यपि ॥ कर्मणां स्यान्न चेत्कर्ताकथं प्रे-
रयितुं स्थितिः ॥ कर्म बंधाय भवति कृतं वै सदसन्नृणां ॥ तस्मात्समीक्ष्यकारी स्याज्जयेच्चकरणान्युत ॥ करणेषु करः श्रेयान् तं
वैजयति यो द्विजः ॥ स द्विजोहीह्ममंतछो दैवस्यान्येतु कारवः ॥ प्रतिग्रहात्सदसतः कर्मणश्चापि दुष्कृतान् ॥ करं जयति यो वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 प्रः स करंजोऽस्ति नापरः ॥ इति गाथा महाराज लोके यस्य प्रवर्तिताः ॥ तेनैवात्र करंजेन मुनिना वै कृतं तपः ॥ स्थापितं लिं-
गमतुलं करंजेश्वरसंज्ञितं ॥ सर्वपापक्षयकरं दंभलोभमलापहं ॥ तत्रगत्वामहाराज सोपवासो जितेंद्रियः ॥ स्नात्वा संत-
र्प्य वै पितॄन् सर्वपापैः प्रमुच्यते ॥ पूजयित्वा करंजेशं दत्वा दानं स्वशक्तितः ॥ सुवर्णं रजतं वापि मणिमौक्ति-
कविद्रुमं ॥ पादुकोपानहौ छत्रं शय्या प्रावरणानि च ॥ दत्तकोटिगुणं सर्वं जायते नात्र संशयः ॥ संपूज्य च करंजेशं ती-
र्थस्यास्य प्रभावतः ॥ पूर्णं चतुर्युगं पार्थ मोदते शिवसन्निधौ ॥ इति श्रीरेवायां करंजेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ त-
तो गच्छेन्महाराज भरतेश्वरमुत्तमं ॥ धनुःशतांतरे तद्वै करंजेश्वरतीर्थतः ॥ शकुंतलायां संभूतो दुष्यंततनयो नृपः ॥
तत्र तेन तपस्तप्तमीश्वराराधनेच्छया ॥ स्थापयित्वा महेशानं समाराध्य यथाविधिः ॥ परितुष्टे महादेवे चक्रवर्तित्वमाप्त-
वान् ॥ चिरमायुस्तथा सौख्यं संतानं वंशवर्द्धनं ॥ दानेन विविधेनासौ ब्राह्मणांश्चाप्यतोषयत् ॥ ईजे सविविधैर्यज्ञैः प्र-
सादाच्छंकरस्य तु ॥ ततःप्रभृति विख्यातं भरतेश्वरसंज्ञितं ॥ तत्र गत्वा महाराज स्नात्वा संतर्प्य यो पितॄन् ॥
भरतेश्वरमभ्यर्च्य सर्वपापैः प्रमुच्यते ॥ द्विजाय कांचनं दत्वा प्राप्नुयाद्वांछितं फलं ॥ इति ते कथितं पार्थ भरतेश्वरसंज्ञितं ॥ इति
रेवायां भरतेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ नागेश्वरं व्रजेद्राजन् तत्रैव तदनंतरं ॥ पुंडरीकेण नागेन स्थापितं नर्मदातटे ॥ आनिं-
दं लोकमिच्छंतं त्वष्टुः पुत्रं पुरानृप ॥ पुंडरीको न दशति शक्रशप्तो ह्युनंयदा ॥ शक्रशापाद्दंष्ट्राहस्यस्तदा भूमिविषश्च सः ॥ ततः
सलज्जितः खिन्नः प्रायात्तूर्णं तु नर्मदां ॥ रेवाया उत्तरेकूले शापांताय स कुंडली ॥ तपसाराधयन् शर्वं स्थापयित्वा स्वनामतः ॥
प्रसादाद्देवदेवस्य दंष्ट्रित्वं पुनराप्तवान् ॥ वांछितां वातुलां सिद्धिं प्राप शंभोः प्रसादतः ॥ आशिवीषः समभवत्सविशेषबलः किल
॥ पूजयित्वा महादेवं नागेशं नागसत्तमः ॥ ततो जगाम स्वं धाम पुंडरिको युधिष्ठिर ॥ततः प्रभृति विख्यातो नागेशो नर्मदातटे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ तत्र तीर्थे नरः स्नात्वा पूजयेद्वृषभध्वजं ॥ नागेश्वरं स्वशक्त्या तु भक्त्या भूतादिने नृप ॥ भानुवारे तथाष्टम्यां यथा संपन्नपूजया ॥ शिवलोके वसेत्सोपि यावद्वर्षशतायुतं ॥ तत्कुलं च नृपश्रेष्ठ न सर्पैः परिभूयते ॥ स्नात्वा संतर्प्य च पितॄन् श्राद्धं कुर्याद्यथा विधि ॥ न दुःखं तस्य दौर्भाग्यं सप्तजन्मनि जायते ॥ शक्त्या विप्रान् भोजयित्वा दक्षिणाभिश्च तोषयेत् ॥ पितृभिः सह राजेंद्रः शिवलोके महीयते ॥ इति श्रीरेवामहात्म्ये नागेश्वरतीर्थनाम द्वाविंशशततितमोध्यायः ॥ १२२ ॥ मार्कंडेय उवाच ॥ ततो गच्छेन्महाराज नर्मदादक्षिणे तटे ॥ मुकुटेश्वरतीर्थं हि सर्वकामप्रदं शुभं ॥ मार्कंडेशात् क्रोशमात्रे स्वयमेव समुत्थितं ॥ यज्ञविध्वंसने काले दक्षस्यादौ प्रजापतेः ॥ ज्ञात्वा सतीं त्यक्तदेहां शंभोः कोपात्प्रधावतः ॥ पिनाकपाणेः प्रमथैर्वृतस्य वसुधाधिप ॥ कोपेन कंपमानस्य शीर्षात्तु मुकुटोपतत् ॥ आगतस्यात्र रेवायास्तीरे रयबलेन च ॥ तदैव मुकुटो यावद्गणैरुत्तीर्यचोद्धृतः ॥ तावत्सपदि वैदग्ध्यं शिवलिंगं समुद्गतं ॥ ततस्तत्पूजितं सर्वैर्मुकुटेश्वरसंज्ञया ॥ तालिकानृत्यगीतैश्च तमभ्यर्च्य ययुर्विभुं ॥ पिनाकिणिगणैः सार्द्धं प्रयतैः पांडवर्षभ ॥ विख्यातमभवल्लोके तीर्थं तन्मकुटेश्वरं ॥ तत्र गत्वा महाराज स्नात्वा यः पूजयेच्छिवं ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ इति रेवाया मुकुटेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेन्महाराज करंजेश्वरतीर्थतः ॥ धनुः शतद्वयं पूर्णं रेवाया उत्तरे तटे ॥ सौभाग्यसुंदरीतीर्थं सर्वसौभाग्यदं शुभं ॥ पुरा दक्षसुताख्यातिर्भृगुपत्न्यभवन्नृप ॥ अरुंधत्युपदेशेन तयाचीर्णं व्रतं त्विह ॥ दौर्भाग्यनाशनं पुण्यं पुत्रपुत्राभिवृद्धिदं ॥ नर्मदातटमासाद्य भर्तुर्वाक्याद्युधिष्ठिर ॥ सखिभिः सहिता ख्यातिरपुत्रादोषनाशनी ॥ सौभाग्यसुंदरीनाम गौरीगिरिशवल्लभा ॥ पुजयामास विधिना यथाप्राप्तोपदेशतः ॥ उपहारैश्च शास्त्रोक्तैर्यावत्संवत्सरं नृप ॥ तत-

१ (गृहितः)

स्तुष्टा च सा तस्या देवी सौभाग्यसुंदरी ॥ सुतांन्सुताश्च प्रददौ सौभाग्यमतुलं तथा॥भृगोः ख्यात्यासमुत्पन्ना लक्ष्मी वीष्णोः परी-
ग्रहः ॥ जयाच विजया चैव गौर्याः सख्यौ च ते नृप ॥ भर्तुश्च वल्लभाख्यातिर्बभूवातीव सुंदरी ॥ ततस्तां प्रार्थया
मास ख्यातिः सौभाग्यसुंदरी ॥ प्रसन्ना यदि मे देहिसंतानं देहि सुंदरं॥ पूर्वापत्यं तु यन्मेस्यात्तद्दास्येहं सवैवहि ॥
सौभाग्यमक्षयं देहि भर्तुर्वल्लभतां मम ॥ रूपं देहि यशो देहि भाग्यं भगवतिदेहि मे ॥ पुत्रां देहि धनं देहि सर्वान्कामांश्च देहिमे ॥
तीर्थेचात्र त्वया स्थेयं यत्र त्वाराधितामया ॥ लोकानामुपकाराय मुनीनां मुक्तिहेतवे ॥ कामदं तीर्थमेतद्वै भवत्वखिलकामदं ॥
मार्कंडेय उवाच ॥ तयैवं प्रार्थिता देवी तथेत्युक्त्वा युधिष्ठिर ॥वरदा सर्व लोकानां तत्रैवांतरधीयत ॥ ततः प्रभृति विख्यातं तीर्थं
परमशोभनं॥सौभाग्यकरणं दिव्यं नरनारी मनोरमं ॥ तत्र या दुर्भगा नारी नरो वा नृपसत्तम ॥ स्नात्वार्चयेदुमेशानं सौभाग्यं तस्य
जायते ॥ तृतीयायामहोरात्रं सोपवासो जितेंद्रियः ॥ निमंत्रयेद्द्विजान् भक्त्या सपत्नीकान्सुरूपिणः ॥ गंधमाल्यैरलं कृत्य
पुष्पधूपादिसंयुतं भोजयेत्पायसान्नेन खंडुमिश्रेण भक्तितः ॥ भोजयित्वा यथान्यायं प्रणिपत्येदमुच्चरेत् ॥ सौ-
भाग्यसुंदरी देवी सुखसंतानदायिनी ॥ संपूजिता प्रीयतां मे महेश्वरसमन्विता ॥ यथा ते देवि देवेन न वियोगो कदाचन ॥
ममापि करुणां कृत्वा तथा त्वमपि चिंतय॥एवं प्रसाद्य तस्याथ यत्पुण्यं समुदाहृतं ॥ तत्तेहंसंप्रवक्ष्यामि यथा देवेन भाषितं ॥
दौर्भाग्यं दुर्गतिश्चैव दारिद्र्यं शोकबंधनं ॥ वंध्यत्वं सप्तजन्मानि जायते न युधिष्ठिर ॥ जेष्ठमासि सिते पक्षे तृतीयायां विशेषतः ॥
तत्र गत्वा तु यो भक्त्या पंचाग्नीन् साधयेन्नरः ॥ सोपि पापैरशेषैश्च मुच्यते नात्र संशयः॥तत्रागत्य मुमुर्षोश्च चक्रांतिर्जायते नृप ॥
देहपाते व्रजेत्स्वर्गमित्येवं शंकरोब्रवीत् ॥ नानावर्णैस्तथा वस्त्रैर्दंपत्यं परिधापयेत् ॥ पुष्पैर्नानाविधैश्चैव गंधपुष्पैः सुशोभनैः ॥
कंठसूत्रकसिंदुरैः कुंकुमेन विलेपयेत् ॥ कल्पयेत्तु स्त्रियं गौरीं ब्राह्मणं शंकरं तथा ॥ तद्रूपौ तावुभौ धृत्वा दानमुत्सृज्यते ततः ॥

CC-0. In Public Domain. Digitization by eGangotri

कंकणं कर्णावष्टं च कज्जलं कंचिकातथा ॥ सप्तधान्यं च जोज्यं च दानान्यन्यानि दापयेत् ॥ सहस्रगुणितं सर्वं दत्तं भवति भारत॥ क्रीडते शांकरे लोके शिवेन सह निश्चितं ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ मुमुक्षुर्मुक्तिमाप्नोति निर्बलो बलमुत्तमं ॥ कामदं तीर्थमेतद्वै नर्मदायां व्यवस्थितं ॥ इति श्रीरेवामहात्म्ये कामदं सौभाग्यसुंदरीतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र धनदेश्वरमुत्तमं ॥ भांडागारिकतीर्थं तद्विश्रुतं लोकभाषया ॥ सौभाग्यसुंदरीतीर्थाद्गत्वा क्रमशतानि षट् ॥ दरिद्रछेदकरणं युगान्येकोनविंशति ॥ धनदेन तपस्तप्त्वा प्रसन्ने पद्मसंभवे ॥ विमानं पुष्पकं प्राप्तं वित्तपालत्वमव्ययं ॥ अलकापुरराज्यं च प्राप्तवान् धनदस्तदा ॥ तत्र गत्वा च यो राजन्स्नातश्चैवार्द्रवाससा ॥ सुवर्णं रजतं चान्यत् शक्त्या विप्रं प्रयेच्छति ॥ स वसेच्छांकरपुरे धनी वै चेह जयये ॥ तस्य वित्तपरिच्छेदो न कदाचिद्भवेदिह ॥ धनदेश्वरमभ्यर्च्य भुवि राजा भवेन्नरः ॥ संतर्प्य च पितृनन्नैस्तिलतोयैश्च भारत ॥ उषित्वा शांकर पुरे पितृलोकं व्रजेत्ततः ॥ इति श्रीधनदेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र तीर्थं तद्रौहणेश्वरं ॥ प्रख्यातं त्रिषु लोकेषु सर्वपापहरं परं ॥ नर्मदाउत्तरे तीरे धनदेश्वरतः परं ॥ युधिष्ठिर उवाच ॥ का रोहीणी मुनिश्रेष्ठ कस्मात्तीर्थे समागता ॥ किंच तीर्थस्य माहात्म्यं तत्सर्वं वद मे विभो ॥ मार्कंडेय उवाच ॥ तत्सर्वं कथयिष्यामि शृणुष्वेकमना नृप॥प्रजापतेर्दक्षपुत्र्यः सप्तविंशतियाः पुरा ॥ चंद्रपत्न्योनिगद्यंने तासां मध्ये तु रोहीणी ॥ शीलवृत्तगुणोपेता रूपयौवनसंयुता ॥ अभिमानवती पार्थ तासां तिक्ताक्षिवीक्षिता ॥ साभिमानीवतां चंद्रश्चित्ते वहतिनक्कचित् ॥ कदाचिन्नारदं प्राप्य सापप्रच्छ शुभेक्षणा ॥ मुने नारद वंद्योसि विश्वस्य ज्ञानवानसि ॥ कमप्युपायं वद मे तीर्थदानव्रतादिकं ॥ सर्वासामपि मुख्या स्यां येन भर्त्राविंतुष्यति ॥ नारद उवाच ॥ दाक्षायणि महाभागे साधु पृच्छासि रोहिणि ॥ एतमेवार्थमुद्दिश्य मयेहावश्यमागतं ॥ यथाहं कथयिष्यामि तच्छृणुष्वशुभव्रते ॥ नारद उवाच ॥ गच्छाशु मानिनि त्वं शरणं शिवदेह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रे. खं. संभवां सिधुं ॥ यथाभियोगिमनास्तवांछितसिद्धेः ध्रुवपदं प्राप्तुं ॥ अपि विस्मापयत्यस्मानश्मा यस्येशतां भजन् ॥ न लभे- अध्या.
१२३ दीशतां हिकथं भक्त्या भजन्नरः ॥ तत्रोत्तरतटं गत्वा रेवाया शशिवल्लभे ॥ भक्त्या भजभवानीं त्वं यज गौरीं हर- १२३
१२४ प्रियां ॥ तपश्चरंती त्वचिरात्ततः प्राप्स्यसि वांछितं ॥ स्वस्ति तेऽस्तुगमिष्यामी स्मर्तव्यः समये पुनः ॥ इत्यापृछ्य १२४
मुनिश्रेष्ठो यायोगगतमाश्रितः ॥ मार्कंडेय उवाच ॥ ततः सा परमं प्राप्य वैराग्यं नृपपुंगव ॥ आगत्य नर्मदातीरे चकार विपुलं
तपः॥एकांतरैस्त्रिरात्रैश्च षट् नव द्वादशाह्वयैः ॥ पक्षमासोपवासैश्च शोषयंती निजंवपुः॥ कृछ्रचांद्रायणाद्यैश्च स्नानशीला यतेंद्रिया ॥
आराधयंती सततं सोमंसर्वार्थदं शिवं ॥ गुरुवृत्तैस्तथा गौरीं सुरारिबल्लमर्दनीं ॥ देवीं भगवतीं पार्थ सर्वस्यार्तिविनाशिनीं ॥ स्था
पयित्वा शिवां गौरीं त्रिसंध्यं सार्चयेन्नृप ॥ ततस्तुष्टा महाभागा देवी दैत्यहरा शिवा॥साशिवोवाच सा साक्षाद्रोहिणीं पुरतः स्थि-
ता ॥ गौरी उवाच ॥ प्रसंनास्मि महाभागे सेश्वरा नियमेन ते ॥ दास्यामि तव यच्चित्ते वरं वृणु यथेप्सितं ॥ एतछ्रुत्वा वच-
स्तस्या रोहिणी शशिनः प्रिया॥प्रत्युवाच तदायद्वै तच्छृणुष्व युधिष्ठिर ॥ रोहिणी उवाच ॥ सर्वासां सोमपत्नीनां मुख्या च श-
शिवल्लभा ॥ यथा भवामि नचिरात्तथा भवतु पार्वति॥चंद्रेण सह पूज्या च स्याता स्यां सहचारिणी ॥ मार्कंडेय उवाच ॥ एवम-
स्त्विति सा चोक्ता भवानी भक्तवत्सला ॥ स्तूयमाना मुनिगणैस्तत्रैवांतरधीयत ॥ रोहिणी च महाराज वरान्प्राप्य प्रहर्षिता भवं
भवानीं संपूज्य सोत्साहाद्यगमद्गृहान् ॥ तदाप्रभृति तत्तीर्थं विश्रुतं नर्मदातटे ॥ तत्र तीर्थे च यो राजन् कन्यादानं करोतियः ॥
सप्तजन्मानि तस्येष्ट वियोगो नभवेत्कचित् ॥ तत्र दद्याच्च यः पार्थ भोजयेत्पूज्य गौरिणीः ॥नं दुःखं न चै दौर्भाग्यं न वियोगमपुत्रतां
॥ न लभेत्स कदाचिद्वै नृप गौरीप्रसादतः श्राद्धं कृत्वा नृपश्रेष्ठ भोजयेद्ब्राह्मणान् शुभान् ॥ पितृणामक्षया तृप्तिस्तस्य स्वर्गश्च शा-
श्वतः ॥ इति श्रीरेवामाहात्म्ये रोहिणेश्वरतीर्थंनाम त्रिद्विंशतातितमोऽध्यायः ॥ १२३ ॥ मार्कंडेय उ०॥ ततो गच्छेन्महाराज १९६

चक्रतीर्थमनुत्तमं ॥ रोहिणेश्वरतीर्थात्तु स्थितं क्रमशतत्रये ॥ शेनापुरमिति ख्यातं सर्वपापक्षयंकरं ॥ सेनापतिं चाभिषे-
कं देवदेवेन चक्रिणा ॥ आनीतः स महासेनो देवैः शक्रादिभिः सह ॥ दानवानां वधार्थाय जयाय चदिवौकसां ॥ नानादानैश्च
विप्रर्षीन्पूजयित्वा यथाविधि ॥ शंखभेरीनिनादैश्च पटहानीकनिःस्वनैः ॥ वीणावेणुनिनादैश्च मृदंगपणवैस्तथा ॥ उल्लरीतालघंटा-
भिर्जयशब्दैः सुमंगलैः ॥ एवं सति महानादो दानवो बलदर्पितः ॥ रुरुनाम विघ्नार्थमभिषेकस्य चागतः ॥ हस्त्यश्वरथ
पादातैः पूरयन्सर्वतो दिशः ॥ तत्र तेन महायुद्धं प्रवृत्तं सह भारत ॥ गदा शक्त्यृष्टिमुशलैः खड्गतोमरकंपनैः ॥
भल्लैश्च कर्णिनाराचैः वत्सदंतैः क्षुरप्रकैः ॥ ततस्तुतो मत्तसुरारिवाहिनीं क्षणेन चापच्युतबाणपातैः ॥ प्रमथ्य हस्त्यश्वरथान्म-
हात्मा जग्राहचक्रं रिपुनाशनाय ॥ श्रीकृष्णचक्रं निशितं भयंकरं दैत्येषु देवेषु सुदर्शनंरणे ॥ पपात दैत्येंद्रपतेः पुरे महत्करात्प्रमु-
क्तं मधुसूदनस्य ॥ तं दृष्ट्वा सहसा विघ्नमाभिषिक्तः षडाननः ॥ संत्यज्य तत्र संस्थानं चचार विपुलं तपः ॥ मुक्तं चक्रं विनाशा-
य रिपोः कृष्णेन पांडव ॥ द्विदलं दानवं कृत्वा पपात्तात्रामले जले ॥ तदाप्रभृति तत्तीर्थं चक्रतीर्थमिति स्मृतं ॥ सर्वपापविना-
शाय निर्मितं विश्वमूर्तिना ॥ तत्र तीर्थे नृप स्नात्वा पूजयेद्देवमच्युतं ॥ पुंडरीकस्य यज्ञस्य फलं सोत्र लभेन्नरः ॥ तत्र तीर्थे
यः स्नात्वा पूजयेद्ब्राह्मणान् शुचिः ॥ क्षांतान्दांतान् जितक्रोधान् कोटिभोज्यफलं लभेत् ॥ तत्र तीर्थे मुमूर्षुर्यः प्राणान् भक्त्या परी-
त्यजेत् ॥ विष्णुलोकं मृतो याति जयशब्दादिपूजितः ॥ क्रीडते स यथाकामं देवगंधर्वपूजितः ॥ इह चागत्य भूयोपि जायते वि-
पुले कुले ॥ एतत्पुण्यं पापहरं धन्यं दुःस्वप्ननाशनं ॥ कथितं ते महाभाग भूयश्चान्यच्छृणुष्व मे ॥ इति श्रीरेवायां सेनांपुरे चक्र
तीर्थं ॥ मार्कंडेय उवाच॥ ततो गच्छेन्महाराज तीर्थं वाप्युत्तरेश्वरं ॥ चक्रतीर्थात्क्रमशते पुण्यं कामफलप्रदं ॥ स्थापितं तच्च कृष्णेन

१ (शीणोर) २ (दैत्य)

CC-0. In Public Domain. Digitization by eGangotri

कार्यारंभे गुहस्य वै ॥ अभिषिच्य तदा स्कंदं स्थापयित्वा पुरः शिवं ॥ महासेनमुवाचाथ विष्णुर्विश्वैकपालकः ॥ विष्णुरुवाच ॥ इदं लिंगं समभ्यर्च्य कार्यसिध्दिप्रदं गुह ॥ उत्तरे ष्वथकार्येषु समाहितमना भव ॥ वर्द्धितः सिद्धमुनिभिः सुरसंघैः समावृतः ॥ इत्युक्तोतरकार्यार्थे कृष्णमुख्यैः सुरैस्ततः ॥ उत्तरेश्वरनामानं लिंगमभ्यर्चितं पृथक् ॥ ततस्ते दैत्यनाशाय कार्यारंभमुपाश्रिताः ॥ गुहमुख्यान्नृपश्रेष्ठ विष्णुशक्त्युपबृंहिताः ॥ ततः प्रभृति तत्तीर्थं उत्तरेश्वरसंज्ञितं ॥ तस्य संपूजनात्पार्थ कार्यारंभस्तु सिद्धिदः ॥ तत्रस्नात्वा तु विधिना संतर्प्य चसुरान्पितॄन् ॥ पूजयेद्विप्रवर्यांश्च श्राद्धशक्त्या युधिष्ठिर ॥ पितॄणामक्षया तृप्तिर्यावद्वर्षायुतं नृप ॥ इति श्रीरेवायां उत्तरेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो भोगेश्वरं नाम सर्वैर्देवैः प्रतिष्ठितं ॥ उत्तरेश्वरतीर्थात्तु स्थितं क्रमशतत्रये ॥ साधिके सर्वतः श्रेष्ठं सर्वभोगप्रदं परं ॥ सेनापत्यं गुहे दत्वा सर्वभोगा निवेदिताः॥ दैत्यास्ते देवसंघैस्तु पूर्वं शर्वाय योजिताः ॥ भोगेश्वराह्वयं देवैस्तदा संपूजितं नृप ॥ ततः स्कंदाय नाद्दिव्यान् ददुर्भोगान् युधिष्ठिर ॥ स्वयं दधुश्च तान्देवा शृंगारांश्च पृथग्विधान् ॥ ततः प्रभृति तत्तीर्थं नाम्ना भोगेश्वरं नृप ॥ तत्र स्नात्वा शिवं पूज्य श्राद्धं दत्वा यथाविधिः ॥ दिव्यलोकेषु सर्वेषु लभेद्भोगाननुत्तमान् ॥ दीपदानेन राजेंद्र दिव्यतेजो भवेन्नरः॥ इति भोगेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः केदारसंज्ञं तु तीपुण्यं युधिष्ठिर ॥ भोगेश्वराद्वै तीर्थाच्चत् चत्वारिंशत्क्रमांतरे ॥ पुरा माहिषरुपेण दैत्यो देवमभिद्रुतः॥ हरं सदारं केदारं हिमाद्रितटमासिनं॥ ततः पलायितो देवस्तमवध्यं विचार्य च ॥ रेवातीरमिह प्राप्तं सुरैस्तत्सगुहैः श्रितं ॥ चकार स्थितिमत्रैव केदारः कलिनाशनः तावत्सनिहतो दैत्यः स्कंदेनामंदबुद्धिना ॥ ततः प्रभृति विख्यातं तीर्थं केदारसंज्ञितं ॥ तत्र स्नात्वा शिवं नाम्ना केदारं पूजयेत्त यः ॥ हिमाद्रौ स्थितकेदारयात्राफलमवाप्नुयात्॥ श्राद्धं दत्वा पितॄणां च भवेत्तृप्तिर्हि शाश्वती॥ दीपदानेन च नरः शिवलोके महीयते ॥ इति श्रीकेदारतीर्थं ॥ मार्कंडेय उ०॥ ततो गच्छेन्महाराज निः कलंकं महेश्वरं॥स्थितं क्रमशते पार्थ तद्वै केदार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्थितः ॥ निःकलंको भवच्चात्र रामः क्षत्रवधान्नृप ॥ त्रिः सप्तकृत्वा पृथिवीं कृत्वा निःक्षत्रियां पुनः॥ पितुर्वैरमनुस्मृत्य पितृणां वचनादिह ॥ रेवाया उत्तरे तीरे तपस्तप्तुं समागतः ॥ उत्तरे यकलंकं त्वं ब्राह्मणानुविचार्जितं ॥ पितृभिर्भाषितस्त्वेवं तपस्तिव्रं चकारह: ॥ स्थापयित्वा महेशानं त्रिः स्नायी शिवपूजकः॥ नतिस्तुतिविशेषैश्च ध्यानजप्यैर्युधिष्ठिर ॥ कृत्वापि विश्वकदनं निःकलंकां यथाभवेत् ॥ कपालिं मामपि तथा कलंकरहितं कुरु ॥ त्रिकालमिति मंत्रेण नत्वा संप्रार्थ्ययत्पदः ॥ ततः प्रसन्नो भगवान् जामदग्न्यस्य भारत ॥ ददौ सनिष्कलंकत्वं सिद्धिंचैवास्य शंकरः॥ ततः प्राप्य वरं रामो निष्कलंको भवन्नृप ॥ निष्कलंकं ततो नाम्ना शिवं संपूज्य भारत ॥ यथागतं जगामाथ पितृभिश्चानुमोदितः ॥ ततः प्रभृति विख्यातं निष्कलंकेश्वरं नृप ॥ तत्र स्नात्वा पूजयित्वा महेशं चतुर्दश्यां निष्कलंकं नरेश ॥ कलंकं यन्मानुषं दैवकं वा तन्निःशेषं याति तूर्णं नरस्य॥ स्नात्वा यस्तत्र राजेंद्र निष्कलंकं समर्चयेत्॥सवै कलंकरहिता शिवलोके चिरंवसेत्॥निःकलंके नर स्तीर्थे ब्राह्मणान् भोजयेच्च यः॥दुःखदौर्भाग्यरहितः कोटिभोज्यफलं लभेत्॥इति श्रीनिष्कलंकेश्वरतीर्थंनाम॥मार्कंडेय उ०॥ततः परं व्रजेत्पार्थ ममतीर्थमनुत्तमं॥ निष्कलंकात्परं तीर्थात्तदशीतिक्रमांतरे॥ मार्कंडेश्वर संज्ञं वै रेवाया उत्तरे तटे॥ स्कंदं सेनापतिं द्रष्टुं ऋषिकोटी समागता॥ऋषयो मुनयः सिद्धास्तापसा भरतर्षभ॥ अभिषिक्तं सुरैस्कंदमभिषेक्तुं च ते गताः ॥ तदाहमपि राजेंद्र स्नेहबद्धश्च रेवया ॥ अभिषिक्ते तदा स्कंदे जयार्थं वै सुरर्षिभिः ॥ यया च स्थापितः शर्वस्थित्वा मासचतुष्टयं ॥ मम नाम्ना महाराज देवो भवभयापहः ॥ तत्र तीर्थे नरस्नात्वा जलांतस्त्रिपदां जपन् ॥ मुच्यतेसर्वपापैस्तु ज्ञाताज्ञातकृतैरपि ॥ तत्र यः पूजयेदीशं जपन्मृत्युंजयं नृप ॥ अपमृत्युविनाशश्च तस्यावश्यं प्रजायते ॥ इति श्रीमार्कंडेश्वरतीर्थं ॥ धूतपापं ततोगच्छे दशर्वं पापप्रणाशनं॥ समीपे चक्रतीर्थस्य विष्णुना निर्मितं पुरा॥ निहतै र्दानवैर्घोरैः ब्रह्मवंशसमुद्भवैः ॥ काश्यपैश्च तदा पार्थ देवदेवो जनार्दनः ॥ तत्पापस्य प्रणाशार्थं गतवांस्तत्र भारत॥ यत्र सेनापति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्कंदः कृतस्तेन महात्मना ॥ तत्र तीर्थे यतक्रोधश्चचार विपुलं तपः ॥ दुश्चरं मौनमास्थाय यन्नशक्यं सुरासुरैः ॥
स्नात्वा शिवं प्रतिष्ठाप्य पूजयित्वा विधानतः ॥ तत्र प्रदाद्द्विजातिभ्यो दानानि विविधानिच ॥ तत्क्षणान्मुक्तपापस्तु
धूतपापो भवद्विभुः ॥ धूतपापेश्वरं नत्वा गतवान् स्वपदं हरिः ॥ विष्णवं विगतद्वेषं तापत्रय विवर्जितं ॥
सर्वदोषविनिर्मुक्तं सुरसिद्धनिषेवितं ॥ ततः प्रभृति विख्यातं धूतपापेश्वरं नृप ॥ नरोगच्छेच्च यस्तत्र पापंकृ-
त्वापि दारुणं ॥ स्नात्वा संपूजयेद्देवं धूतपापं महेश्वरं ॥ शक्त्या जप्त्वा विधानेन मुच्यते सर्वपातकैः ॥ पितॄणां श्राद्धदा
नेन तत्र तीर्थे युधिष्ठिर ॥ भवेच्चैवाक्षया तृप्तिर्यावदाहूतसंप्लुवं ॥ दीपं दद्याच्च देवाय शक्त्या यस्तत्र भारत ॥ तस्य वंशे कुले वा
पि कालुष्यं न प्रजायते ॥ दीर्घमायुरवाप्नोति दीप्तिमांश्च भवेन्नरः ॥ दोग्ध्रीं दद्याच्च यो धेनुं देवमुद्दिश्य पाडवे ॥ सर्वोपस्करसंयुक्तां
सहिरण्यां सदक्षिणां ॥ सभागुणगरिष्ठाय सशैवं पदयाप्नुयात् ॥ पूजितः सुरगंधर्वैर्यावदाहूतसंप्लवं ॥ ततोवतीर्णः कालेन राजराजोभवे
द्भुवि ॥ पापधूतेश्वरे पार्थ ब्राह्मणान् यस्तु भोजयेत् ॥ एकस्मिन् भोजिते विप्रे कोटिभोज्यफलं लभेत् ॥ भूमिमश्वंच महिषीं रथं
कांचनवाससी ॥ पादुकोपानहौ छत्रं दद्याद्भक्त्यातुयोनरः ॥ स सर्वपापनिर्मुक्तः शिवस्य गणतां लभेत् ॥ नृत्यगीतं तथा वाद्यं द-
त्वा देवाय भक्तितः ॥ गांधर्वंलोकमाप्नोति सर्वसौख्यसमन्वितं ॥ स्तुतिजाप्यादिकं कृत्वा लभेत्संतानमक्षयं ॥ इति ते कथितं
पार्थ धूतपापेश्वरं मया॥कीर्तना च्छ्रवणादस्य लभेद्यज्ञफलं नरः॥इति श्रीरेवामहात्म्येधूतपापेश्वरतीर्थनाम चतुर्विंशशततितमोध्यायः
॥ १२४ ॥ मार्कंडेय उवाच ॥ ततो गच्छेन्महाभाग तीर्थमांगिरसं शुभं ॥ स्थितं क्रमसहस्रांते धूतपापात्पुरातनं ॥ उत्तरे नर्म-
दाकूले पुत्रपौत्रा भिवर्द्धनं ॥ पुरा चैवांगिरानाम ब्रह्मणो मानसः सुतः ॥ स्वयं ससर्ज संतानं पुत्ररूपं पृथग्विधं ॥ सृष्टं च विल-
यं याति पुनश्चापि स सृष्टवान् ॥ बहुकृत्वो यदा सृष्टं सिद्धिंना याति भारत ॥ तदा चिंतान्वितो विप्रः किं कार्यमिति दुर्मनाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततः पप्रच्छ धातारं पुत्रार्थं किं न सिध्यति ॥ ततो ध्यात्वा मुहुर्तं स वेधा प्राहस्वपुत्रकं ॥ ब्रह्मा उवाच ॥ दोषेर्य मृतवत्साख्यो यदा मय्यपि जायते ॥ तदहमपि चात्मानं तपसा शोधयामि वै ॥ तथा त्व मपि गच्छाशु नर्मदां शिवजां धुनीं ॥ तत्र गत्वोत्तरे कूले तपसांगं विशोधय॥सर्वदोषहरं शंभुं श्रद्धयाराधयन्सुत॥लप्स्यसे वांछितं सर्वं ततः शंभोः प्रसादतः ॥मार्कंडेय उवाच॥ इत्याकर्ण्यांगिरा वाक्यं पितुराप्टच्छ सत्वरं ॥ अगाम्य नर्मदातीरं सुनीरं सुरसेवितं ॥ पुत्रहतो युगस्यादो चचार विपुलं तपः॥ नित्यं त्रिषवणस्नायी जपन्देवं सनातनं ॥ पूजयंश्च महादेवं कृच्छ्रादि व्रतधारकः ॥द्वादशाद्वे ततः पूर्णे तुतोष परमेश्वरः॥ वरेण छंदयामास द्विजमंगिरसं विभुः ॥ सोवृणोच्च महादेवं पुत्रं पुत्रवरं मुनिः ॥ वेदविद्याव्रतस्नातं सर्वशास्त्रविशारदं ॥ राजविद्याविशेषज्ञं उपायप्रतिपादकं ॥ देवानां मंत्रिणं श्रेष्ठंआचार्यं विधिपारगं ॥ पूज्यं सुरगुरुं राजन्सर्वलोकनमस्कृतं ॥ ब्रह्मलक्ष्मीसमावासं ब्रह्मण्यं ब्राह्मणाधिपं ॥ अक्षयं चाव्ययं मह्यं पुत्रं देहि महेश्वर ॥ ईश्वरोवाच ॥यथाभिलषितः पुत्रो वेदवेदांगपारगः ॥ भविष्यत्येव तेविप्र इत्युक्त्वांतरधीयत ॥ ततस्तत्रांगिरा पार्थ प्रातिष्ठाप्य महेश्वरं ॥ स्वनाम्ना पुत्रसंतानसिद्धिदं पापनाशनं ॥ पुजयित्वा निजं धाम स जगाम द्विजाग्रणीः ॥ वरेण तेनांगिरसो बृहस्पतिरजायत ॥ यथाभिलषितः पूर्वं वेदवेदांगपारगः ॥ जाते पुत्रेंगिरा पार्थ संतर्प्य पितृदेवताः॥ हृष्टतुष्टमना भूत्वा जगामोत्तरपर्वतं ॥ ततः प्रभृति विख्यातं तीर्थमांगिरसेश्वरं ॥ अत्रैवांगिरसस्तीर्थे यः स्नात्वा पूजयेच्छिवं ॥ सर्वपापविनिर्मुक्तो रुद्रलोकं सगच्छति ॥ अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् ॥ कन्या प्राप्नोति भार्तारं सौभाग्यं च पतिव्रता ॥ य इच्छेत्तत्र यं कामं निश्चितं तं लभेन्नरः॥ श्राद्धं कृत्वा विधानेन पितृणां तृप्तिमावहेत् ॥ मार्गशीर्षेथवा चैत्रे यो दद्याद्विजभोजनं ॥ अष्टम्यां वा चतुर्दश्यां छत्रोपानप्रदो हि यः ॥ वस्त्रयुग्मप्रदाता च स्वर्गलोके महीयते ॥इति आंगिरेश्वरतीर्थं॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र तीर्थं कोटीश्वरं परं ॥ स्थितमांगिरसात्तीर्थात्पूर्णे क्रमशतत्रये ॥ स्कंदाभिषेकसमये पुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरसमागमे ॥ कोटीशो मुनयस्तत्र प्राप्तो द्रष्टुं महोत्सवं ॥ निवृत्ते चाभिषेके तु ऋषयस्ते युधिष्ठिर ॥ निर्वृतिं परमां प्रापुर्वीक्ष्य-
माणाः सरिद्वरां ॥ मृत्युंजयसुतां पुण्यां पापतापप्रणाशिनीं ॥ रेवां देवादिसंसेव्यां दृष्ट्वा दृष्ट्वा मुदं दधुः ॥ ऋषिकोटी ततस्तत्र
स्थापयित्वा महेश्वरं ॥ चातुर्मास्यस्थितिं चक्रुः स्नानजाप्यर्चने रताः॥ नदीमावाहयामासुः कोटिव्यां नाम नामतः ॥ विधाय संगमं
तत्र वेदपारायणं व्यधुः ॥ ध्यानयोगरताश्चान्ये स्तुतिजाप्यपराः परे ॥ कोटीश्वरंनाम शिवं प्रतिष्ठाप्य द्विजोत्तमाः ॥ महेशात्सिद्धि-
मासाद्य ययुः सर्वे यथागतं ॥ ततः प्रभृति विख्यातं कोटितीर्थं युधिष्ठिर ॥ स्थापितं मुनिकोटीभिः सुरसंघनिषेवितं ॥
सर्वत्र संगमा पुण्या नद्योर्नृपतिसत्तम ॥ स चापि संगमः श्रेयान्नर्मदाकोटिवीभवः ॥ तत्र तीर्थे नरः स्नात्वा पुजयित्वा महेश्वरं
सर्वपापक्षयं प्राप्य धर्मसिद्धिपरां लभेत् ॥ कोटीश्वरं समभ्यर्च्य यथासंख्युपचारतः ॥ यावन्मन्वंतरं पार्थ शिवलोके महीयते ॥ पि-
तॄणां श्राद्धदानेन तृप्तिर्भवति चाक्षया ॥ इति कोटीश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ अयोनिजं ततो गच्छेत्तीर्थं तापत्रयापहं ॥
तीर्थात्कोटीश्वरात्पार्थ स्थितं क्रोशद्वयांतरे ॥ असितो देवलः पूर्वं स्वयाप्याकर्णितो यदि ॥ भवेद्दृष्टोथवा पार्थ तत्कुले मुनिसत्तम ॥
विद्यानंदइतिख्यातः सर्वविद्यासु पारगः॥सानुस्वारं पठन्सोपि नासिक्या परसंगतिं॥केनापि योगिनादत्तं फलमेकं सुपुत्रदं ॥ददात्वेष स्व-
भार्यायै फलं मंत्राभिमंत्रितं॥इत्याशयादभुक्त्वापि स्नेहात्तस्य फलं ददौ॥सखेसुपुत्रदामिदं गृहीत्वा स्वगृहं व्रज॥एवं विसर्जितेनाथ तेन
मार्गेसरित्तटे॥सुच्छायतरुमूले तत्समानेन भक्षितं ॥तदैव भक्षणात्तस्य भव्यं गर्भ मवाप सः॥दिव्यमंत्रप्रभावो यमिति गत्वाकदापिसः॥
विद्यानंदो मुनिर्ज्ञात्वा मित्रे सर्वं न्यवेदयत्॥ततो योगबलाद्योगी सखा तस्य युधिष्ठिर॥धिक्कारधूसरं मित्रं भवितव्यमिति ब्रुवन्॥दंडेनापाद्य
तन्मध्यं गर्भं निःक्रमयच्छनैः ॥सुर्यबिंबप्रतीकाशंब्राह्मलक्ष्म्या समावृतं॥पितरं जीवयामास पुनर्बालस्य तस्य तं ॥संस्कारैः योजया-
मास तिद्यानंदो मुनीसुतं ॥ अयोनिजेति नामास्य तत्समक्षं चकार च ॥ व्रतबंधं च वेदांश्च सषडंगपदक्रमान् ॥ विद्याश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विविधाः प्राप सञ्छिष्य विधिना सुतः ॥ पितुः कालेन वाल्पेन ततस्तीर्थानि जग्मिवान् ॥ क्रमादिहागतः सोथ ब्रह्मचारिरयोनि
जः ॥ रेवातीरे तपस्तेपे प्रतिष्ठाप्य त्रियंबकं ॥ ततस्तुष्टोस्य भगवानददद्वांछितं नृप ॥ गृहाश्रमं पुत्रपौत्रान् शिवलोकं च शाश्व-
तं ॥ ततः प्रभृति विख्यातं तत्तीर्थं भरतर्षभ ॥ अयोनिजेश्वरं नाम सर्वकामफलप्रदं॥आयोनिजे नरस्तीर्थे स्नात्वा संपूज्य शंकरं ॥ पुत्र
पौत्रानवाप्नोति देहांते च शिवं व्रजेत् ॥ अयोनिजेशमभ्यर्च्य विधिना भरतर्षभ ॥ रुद्राध्यायं जपेद्यस्तु सर्वपापैः
प्रमुच्यते ॥ स्नात्वा चांतर्जले जप्त्वात्रिपदां चाघमर्षणं ॥ लभेद्भुक्तिं मुक्तिं च दुःखं चापिनश्यति ॥ देवपित्र्यर्चनं कृत्वा
श्राद्धं दत्वा यथाविधिः ॥ परं पदमवाप्नोति प्रीणयेच्च चिरं पितॄन् ॥ उपानहौ तथा छत्रं कोपीनं च कमंडलुं
॥ ददतः श्रद्धया तत्र संतोषयति शंकरं ॥ यस्तत्र तीर्थे विधिना प्राणत्यागमवाप्नुयात् ॥ सनातनं पदं प्राप्य
गर्भवासं न पश्यति ॥ स्नानं च तर्पणं श्राद्धं द्विजभोज्यं सुरार्चनं ॥ अनुक्तमपि कर्तव्यं सर्वतीर्थेषु भारत ॥ इति श्रीरेवा०
अयोनिजेश्वरतीर्थनाम पंचविंशतितमो ध्यायः ॥ १२५ ॥ ॥ मार्कंडेय उवाच ॥ ततो गच्छेन्नृपश्रेष्ठ तीर्थमंगारकेश्वरं ॥
अयोनिजेश्वरात्पुण्यं स्थितं क्रमशतत्रये ॥ रूपं सौभाग्यदं लोके विश्रुतं तूत्तरे तटे ॥ अंगारकेन तत्रादौ पार्थ तप्तं तपः किल ॥
वर्षाणामयुतान्यष्टौ नानोपायैः सुदुस्तपं ॥ ग्राहेश्वर्यं रवेर्दृष्ट्वा शनेर्वाचस्पतेस्तथा ॥ गृहाणां पूजनं लोकाः कुर्वंतीति विमृश्य सः
॥ ग्रहपंक्तिमभिप्रेप्सुर्महेशाराधने रतः ॥ ततस्तुष्टो महादेवस्तस्मै करुणया नृप ॥ प्रत्यक्षो भगवान् प्राह स्वसुतं क्षितिसंभवं ॥
वरदोस्मीह ते वत्स वरं वरय सुव्रत ॥ लभस्व वांछितं मत्तो दुर्लभं त्रिदशैरपि ॥ अंगारक उवाच ॥ प्रसन्नोयदि मे देवेश कृ-
पया लोकशंकर ॥ प्रणमाम्यन्वहं त्वाहं कर्मणा मनसा गिरा ॥ भवत्प्रसादाद्याचेहमेकमेव महेश्वरं ॥ ग्रहपंक्तिगतो नित्यं

१ (मंगलेन)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचरामि नभस्तले ॥ यथा सूर्यादयो नित्यं ग्रहा जगति पूजिताः ॥ दीप्यंते देवदेवेश तथा तन्मध्यगोप्यहं ॥ यावन्मेरुस्थि-
रो लोके यावद्भूभूधराश्च यः ॥ यावच्चंद्रार्कयोश्चरेत्तावन्मे चाक्षयागतिः ॥ मार्कंडेय उवाच ॥ एवमस्त्विति देवेशो दत्वा तस्मै
वरं शुभं ॥ जगामाकाशमाविश्य वंद्यमानः सुरासुरैः ॥ ततो भूमिसुतस्तत्र प्रतिष्ठाप्य महेश्वरं ॥ गतः सुरालयं श्रीमान् हृष्ट-
तुष्टः शिवाज्ञया ॥ नीत्वा सुरगणैः सर्वैर्ग्रहपंक्तौ निवेशितः ॥ ततःप्रभृति विख्यातं तीर्थमंगारकेश्वरं ॥ सर्वकामप्रदं पुण्यं धन्यं दुः
स्वप्ननाशनं ॥ तत्र तीर्थे तु यो स्नात्वा पूजयेत्परमेश्वरं ॥ हुतहोमो जितक्रोधः सोऽश्वमेधफलं लभेत् ॥ चतुर्थ्यंगारके योगे यः
स्नात्वा पूजयेच्छिवं ॥ अंगारकं च विधिना समाहितमना नृप ॥ स जन्मसप्तकं रूपसौभाग्यधनपुत्रवान् ॥ दशयोजनविस्तीर्णे
मंडलेश्वरतां लभेत् ॥ अकामतः कामतो वा तत्र तीर्थे मृतो नरः ॥ रुद्रस्यानुचरो भूत्वा तेनैव सह मो-
दते ॥ पितृणां श्राद्धपिंडादि तत्र दद्याच्च यो नृप ॥ उद्धरेदात्मना सार्द्धं दशपुर्वान्दशापरान् ॥ पूजयित्वा
महादेवं दीपं दद्याच्च यो नृप ॥ विमलं कुलमाप्नोति तेजसा च न हीयते ॥ रक्तानडुहसागो वस्त्रशालीड्वज्यगुडादिके ॥
दत्ते तुष्येन्महेशानः सभौमः सर्वकामदः ॥ इति ते कथितं पार्थ तीर्थमंगारकेश्वरं ॥ श्रवणात्कीर्त्तनाद्यस्य सानुकूलः कुजोभवेत् ॥
इति श्रीरेवामहात्म्ये अंगारकेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो यायान्महाराज धर्मपुत्र युधिष्ठिर ॥ नर्मदादाक्षिणे कूले तीर्थं
परमशोभनं ॥ मुकुटेश्वरतीर्थाद्वै स्थितं क्रोशांतरे नृप ॥ स्कंदेन निर्मितं पूर्वं तपः कृत्वा सुदुष्करं ॥ युधिष्ठिर उवाच ॥ श्रमे
वै भविता विप्र तथाप्येतद्ब्रवीहि मे ॥ स्कंदोसौ षण्मुखः शूरः कस्य पुत्रः कदाभवत्॥ स्कंदस्य चरितं सर्वमाजन्म द्विजसत्तम ॥
तीर्थस्य च विपुण्यं कथयस्व यथार्थतः ॥ मार्कंडेय उवाच ॥ तपस्यता पुरा राजन् देवदेवेन शूलिना ॥ विज्ञप्तेनार्थतो देवैरुमागौरी
विवाहिता ॥ देवा ऊचुः ॥ नास्ति सेनापतिः कश्चिद्देवानां सुरसत्तम ॥ विध्वस्ता दानवैर्लोका जिता देवाः सवासवाः ॥ यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशाविना चंद्रः दिवसो भास्करंविना ॥ नारीपतिविना यद्वत्तथा सैन्यमनायकं ॥ एवं ज्ञात्वा महादेवतपया परया विभो ॥ से-
नानीदीयतां कश्चिद्यः शूरेलोकविश्रुतः ॥ एतत् श्रुत्वा परं वाक्यं देवानां परमेश्वरः ॥ कामथान उमादेवीं सस्मार परमीश्वरः ॥
तेन मूर्छितसर्वांगः कामरुपो जगद्गुरुः ॥ कामयामास शर्वाणीं दिव्यं वर्षशतं किल ॥ देवराजस्ततो ज्ञात्वा महामैथुनकं हरं ॥
संमंत्र्य च सुरैः सार्द्धंप्रेषयज्जातवेदसं ॥ तेन गत्वा महादेवः परमानंदसंस्थितः ॥ क्षोभितः पक्षिरूपेण कैलासभवनांतरा॥ शर्वस्तं
सहसा दृष्ट्वा हाहेत्युक्त्वा समुत्थितः ॥ ततः क्रुद्धा महादेवी त्यक्तलज्जा ब्रविदिदं॥ वेपमाना महाराज महेशं प्रतिमानिनी॥ पार्वत्यु
वाच ॥ यस्मादहं सुरैः शूलिन् व्याहता पुत्रजन्मनि ॥ स्वभार्या संभवैः पुत्रैस्तस्माद्धीना भवं तु ते ॥ हरेणोक्तस्ततो वन्हिर-
स्मद्वीर्यंसमुद्वह ॥ अस्तुस्वस्तीति लोकानां तथा त्वं कर्तुमर्हसि ॥ मत्तेज एवं वक्रेण ददस्वाग्ने सुरानन ॥ कृत्वानो पापसंतापं
नचेच्छापमवाप्स्यासि ॥ त्वत्तः सुभाविता पुत्रः सेनानीः सुरपूजितः ॥ सिध्यर्थं देवकार्यस्य नान्यः शक्तो जगत्रये
॥ अग्निरुवाच ॥ तव वीर्यस्य मे देव का शक्तिर्धरणे विभो ॥ करोति भस्मसात्तद्वै त्रैलोक्यं सचराचरं ॥
महेश्वरोवाच ॥ उदरस्थेन बीजेन यदि ते जायते रुजा ॥ तदा क्षिपेथास्तत्तेजो गंगातोये हुताशन ॥
मार्कंडेय उवाच ॥ एवमुक्त्वा ततः शंभुरमोघं वीर्यमात्मनः ॥ हव्यवाह मुखे कृत्स्नं प्राक्षिप्यांतरधीयत ॥ गते चादर्शनं दे
वे दह्यमानो हुताशनः ॥ गंगांभसि विनिक्षिप्य जगाम स्वं निवेशनं ॥ असहंती च तत्तेजो गंगापि सरितांवरा ॥ तत्प्रक्षिप्य शर
स्तंबे जगामाशु यथागतं ॥ तत्र जातं शिशुं दृष्ट्वा सर्वे देवाः सवासवाः ॥ कृत्तिकां प्रेषयामासुस्तन्यपानाय भारत ॥ दृष्ट्वा स
मागता स्ताः स गांगेयो गौरवं भजन् ॥ भूत्वा षण्मुखषड्भिश्चमुखैस्तासां स्तनान्पपौ ॥ जातकर्मादिसंस्कारान्वेदोक्तान्पद्मसंभ
वः ॥ चकार तस्य राजेंद्र विधिदृष्टेन कर्मणा ॥ कृतिकान्यः कार्तिकेयः षण्मुखैः षण्मुखस्मृतः॥ कुमारः स्वकुमारत्वात् गांगेयो गंग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

या धृतः ॥ ऊढस्तथाग्निना यस्मादग्निभूः प्रोच्यते ततः ॥ बहुलोदरसंस्पर्शाद्बाहुलेयः प्रकीर्तितः॥रतस्कंतमतस्कंदस्वाम्युक्तो देवसेनया ॥ एवं सुतंभवो बालो पालितो देवतागणैः ॥ वेदारण्येषु गिरिषु नदीषु च नदेषु च ॥पृथिव्यां सर्वतीर्थेषु समुद्राद्येषु भारत ॥ ततः पर्याययोगेन नर्मदातटमास्थितः ॥ विंध्याचलमभिक्रम्यरेवादक्षिणतीरभाक्॥नित्यं त्रिषवणस्नायी चचार विपुलं तपः॥ ऋक्यजुः सामविहितं जपं जाप्यमहर्निशं ॥ ध्यायमानो महादेवंजटामुकुटमंडितं ॥ अक्षं त्रिशूलीनं चंद्रचूलिनं नागहारिणं ॥ वृषस्थं विश्वनाथं त्वं पार्वतीपतिमव्ययं ॥ महाहिवलयं ध्यायन्सशोधमानिसंततः ततो वर्षसहस्रांते पूर्णे देवो महेश्वरः ॥ उमया सहितः ॥ साक्षान्महासेनमुवाच ह ॥ ईश्वरोवाच॥अहं तेवरदो वत्स गौरियुत ममात्मज ॥ वरं वृणीष्व यच्छ्रेष्ठं त्रिषु लोकेषु दुर्लभं ॥ अलं क्लेशेन ते वत्स कुमारोसि ममात्मज ॥ क्लेशितो बहुधात्मा ते सर्वत्र भ्रमता चिरं ॥किमिच्छासि महाबुद्धे शीघ्रं वरय वांछितं स्कंदउवाच ॥ नमस्ते जगतां नाथ कालात्मन्कलनातिग ॥ कालशत्रो करालाक्ष कलिताशेषवैभव॥ नमः कालाग्निनेत्राय-कालकूटधराय च॥नमः कामकृतांताय करालाय कपर्दिने॥गिरिशाय गरिष्ठाय गौरीशाय गुणात्मने॥गुणातिगाय गौराय गोनसालंकृताय च नमस्तेस्तु महेशाय मृडाया मितमूर्तये ॥ महोक्षगाय मोक्षाय मुमुक्षो मुंडमालिने ॥ सत्यायसत्यरूपाय सर्वेशाय सदात्मने ॥ सनातनाय शांताय सर्वसंहरणाय च ॥ नमो वामांगवामाय वामदेवाय वेधसे॥वरदाय वरेण्याय व्योमकेशायवेधसे ॥ अजरामररूपाय अघोरायामलाय च ॥ नमोस्त्वतिचरित्राय अनंतायाखिलाय च ॥ नमस्तमस्तनुभृते तापत्रयहराय च॥ तनूभृतां च तीर्थाय तत्पुरुषाय ते नमः॥नमो स्त्वीशानरूपाय ईषदूर्ध्वीकृतालिणे॥ईडयाखिलगुणौघाय ईप्सितार्थप्रदाय च॥यमष्टसिद्धयः शश्वत्संसेवंते सुरेश्वर ॥ तमादिपुरुषं शर्वं नीलकंठं नमाम्यहं ॥ मार्कंडेय उवाच इति संस्तुवतस्तस्य षण्मुखस्य महेश्वरः ॥ प्रसन्नः प्राह भगवानुच्चकैः साधुसाध्विति ॥ ईश्वरोवाच ॥ साधु भोवत्स साध्वेतत्स्तोत्रमुच्चरितं त्वया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ सुप्रीतोस्म्यनया स्तुत्या ब्रूहि किं ते ददाम्यहं ॥ स्कंद उवाच ॥ यदि तुष्टोसि मे देव उमयासह शंकर ॥ वृणोमि
मातृपितृतो यथानान्या गतिर्मम ॥ पित्रोः पुरः प्रार्थयेद्दै पुत्रः प्रियसिहेप्सितं ॥ नो वा किं प्रार्थितेनेह तावेव स्वयामिष्टदौ ॥ पुत्र-
स्य तीर्थरूपौ तौ तयोः पुत्रात्परं नहि॥एतत् श्रुत्वा शुभं वाक्यं पुत्रेण समुपादीरितं॥तथेत्युक्त्वा तु तत्स्नेहात्प्रेम्णा च परिषस्वजे ॥
ततो मूर्द्धन्युपाघ्राय प्राह तं सशिवः शिवः ॥ ईश्वर उवाच ॥ पराजयो नते पुत्र कुत्रापि भवितानघ ॥ अक्षयश्चाव्ययश्चैव सेना-
नीस्त्वं भविष्यसि ॥ शिखी च ते वाहनं दिव्यरूपो दत्तो मया शक्ति रियं त्वमेघा ॥ दत्ता मया दानवानां वधाय गृहाणेमां
सकृदेव प्रमोच्यां ॥ सुरासुरार्दीश्च जयेति चोक्त्का जगामकैलासगिरिं महात्मा ॥ मार्कंडेय उवाच ॥ गते चादर्शनं देवे ततः स
शिखिवाहनः ॥ स्थापयित्वा महादेवं स्वनाम्ना परिपूज्य च ॥ सवाहनायुधस्तुष्टो जगाम सुरसन्निधौ ॥ तदा प्रभृति तत्तीर्थं स्कं-
देश्वरमिति स्मृतं॥सर्वपापहरं पुण्यं मर्त्यानां भुवि दुर्लभं॥तत्र तीर्थे तु यो राजन्भक्त्या स्नात्वा चर्येच्छिवं ॥ स्नाप्य पंचामृतैः पुण्यैः
स्तथा तीर्थोदकैरपिगंधमाल्यविशेषैश्च वस्त्रनीराजनार्चतः ॥ विवैधैर्विविधैः पुष्पैः फलैरपियुधिष्ठिर ॥ ध्वजधुपोपधानैश्च घंटामधूरवा
दनैः ॥ वीणावेणुनिनादैश्च शंखभेरीस्वनैरपि ॥ गीतनृत्यकथाभिश्च स्तुतिजाप्यप्रणामतः॥सलभेदिष्टयज्ञस्य बहुस्वर्णस्य यत्फलं ॥
स्कंदेश्वरे च यः स्नात्वा तर्पयन् पितृदेवताः ॥ तिलमिश्रेण तोयेन पिंडदानेन भारत ॥ शास्त्रदृष्टेन विधिना तस्य पुण्यफलं शृणु ॥
संवत्सरशतं पूण कुलत्रयसमुद्भवाः ॥ तृप्यंति पितरः पार्थ सार्थकश्च भवेद्भवः॥तत्र तीर्थे नृपश्रेष्ठ ब्राह्मणन् यश्च भोजयेत् ॥ सिक्थे
सिक्थे भवेतृप्तिः पितृणां वर्षसंख्यया ।शिवश्च परमानंदं प्राप्नोति परमेश्वरः॥तत्र तीर्थे च यो दद्याद्दोग्ध्रीं गां द्विजपुंगवे॥सवौं पस्क-
रसंयुक्तां विधिवत्पूजिताय वै ॥ संवत्सरसहस्त्रे द्वे स वसेच्छिवसंनिधौ ॥ कार्तिक्यां कृत्तिकायोगे यत्फलं स्वामिशात्रया ॥ फलं
तदिहलोकानां कार्तिक्यां शिवदर्शनात् ॥ ताम्रपात्रं तिलैः पूर्णं शुक्लैर्दत्वासदक्षिणं ॥ तत्र स्कंदं समुद्दिश्य नलभेदुःखदुर्गती ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरो हिरण्यं दत्वा च तत्र शक्त्या युधिष्ठिर ॥ शक्रलोकमवाप्नोति दीर्घमायुश्च विंदति ॥ छत्रोपानहदानेन सुखं स्वर्गे महीयते ॥
कुरुते तत्र यो राजन् शुभं वा यदि वाऽशुभं॥इह लोके परे वापि तत्तस्यैवाक्षयं भवेत् ॥तत्र तीर्थे नरः कश्चित्प्राणत्यागं करोति यः॥
शास्त्रोक्तेनैव विधिना सगच्छेत्परमं पदं ॥ रुद्रलोकमवाप्नोति यावदाहूतसंप्लवं ॥ तत्रोषित्वा कल्पमेकं सिद्धदेवर्षिपूजितः ॥ अत्रैव
भारते वर्षे जायते विपुले कुले ॥ वेदवेदांगतत्वज्ञः सर्व व्याधिविवर्जितः ॥ जीवेद्वर्षशतं साग्रं पुत्रपौत्रसमन्वितः॥अयं ते कथितो
राजन् स्कंदतीर्थस्य संभवः ॥ चरित्रं कार्तिकेयस्य चमत्कृतिकरं परं ॥ धन्यं यशस्यमायुष्यं दुःखदौर्भाग्यनाशनं ॥ जयपुत्रप्रदं
पुण्यं महादेवेन भाषितं ॥ तीर्थाख्यानमिदं श्रुत्वा सर्वपापैः प्रमुच्यते ॥ इति श्रीरेवामहात्म्ये स्कंदेश्वरतीर्थनाम षष्ठीद्विशततित-
मोध्यायः ॥ १२६ ॥ मार्कंडेय उवाच ॥ नर्मदेश्वरतीर्थं च ततो गच्छेद्युधिष्ठिर ॥ कार्तिकेयस्य तीर्थात्तु तत्रैव कियदंतरं ॥
सर्वपापहरं पार्थ भुक्तिमुक्तिफलप्रदं ॥ वेधसो यज्ञसमये देवैस्तत्र समागतैः ॥ सिद्धकिन्नरगंधर्वविद्याधरमहोरगैः ॥
नदीनदैः सतीर्थैश्च मिलितैर्मूर्त्तिमतजिभिः ॥ तथा मुनिगणैः सर्वैस्तपोनिष्ठैर्नराधिप ॥ तत्राहं च गतो भूवं शृणु मे-
तत्र कारणं ॥ तत्प्रज्ञस्य स्वकीयत्वात् ब्रह्मा मे प्रपितामहः ॥ तेन यातं मया पार्थ तत्रैवामंत्रितेन च ॥ महत्सामतिको हेतुस्तत्रै-
वान्यो नराधिप॥महतां मिलिनं यत्र तत्र यायादिति श्रुतिः॥विनाप्यामंत्रणं धर्मः श्रोतव्यस्तैरुदीरितः॥तृतीयं यज्ञविहितं धर्मकर्मकृतं
नृप ॥ इष्टव्यो धर्म इति यत्पुरा प्रोक्तं मनीषिभिः ॥ धर्मः श्रुतोथ दृष्टोथ विहितः कारितोपि वा ॥ नृपानुमोदितो वापि पुनात्या
सप्तमं कुलं ॥तेन तत्र मया यातं समाजे यज्ञसंभवे॥देवैश्च विस्मितै स्तत्र मुनयः सिद्धतापसाः॥ऋषयो वेदशास्त्रज्ञाः कारणं पार-
पृच्छिताः॥ वेधा विष्णुपदीं पुण्यां जान्हवीं सुरसेवितां ॥ विहाय यज्ञनिष्पत्तिमिह कर्तुमसौ रतः ॥ ऋषयः कारणं किंतद्विचारः
क्रियतामिह ॥ इत्याकर्ण्याथ मुनयः सुरैः पृष्टं विमृश्य च ॥ज्ञानिनोपि महाभागा न ददु किंचिदुत्तरं॥नदीः किंवा ह्वयामासुर्गंगाद्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरसंनिधौ ॥ पप्रच्छुः पापनाशाय सामर्थ्यं तासु भारत ॥ ताऊचुः क्रमशः सर्वाः कालं षाण्मासिकादिकं ॥ सर्वपापप्रणाशाय दिनार्द्धदिनमूनितं ॥ असमुद्रंगमा यास्तु तीर्थैर्विरहितास्तथा ॥ नद्यः सद्यः सकृत्स्नानात् त्रिरात्रफलदा स्मृताः ॥ समुद्रगाश्च पक्षस्य यास्त्वतीर्थायुधिष्ठिर ॥ सतीर्थामासफलदा याः पृथक् न निरुपिताः ॥ तत्समानफलं दत्ते समुद्रोपि तथाविधः ॥ षण्मासफलदा गोदा[1] गोमती च युधिष्ठिर ॥ संवत्सरफलं दत्ते स्नानेनैकेन जान्हवी ॥ मासत्रयोदशफलं दत्तेपुण्या सरस्वती ॥ तापीतीर्थे सकृत्स्नात्वा मासाष्टकफलप्रदा ॥ सप्तमासफलं चापि सरयू सेविता सकृत् ॥नवमासकृतं सिंधुर्यमुना च युधिष्ठिर ॥ क्षिप्रा चर्मन्वती वेत्रा पंचमासकृतं फलं ॥ गंडकी सप्तमासोत्थं सकृत्स्नाता सदैवहि ॥ इत्येवमाहि बहुधा जल्पितं ताभिरादरात् ॥ देवर्षीणां पुरः पार्थ विशेषादुत्तरोत्तरं ॥ नाकिंचिन्नर्मदा ब्रूते ततः पृष्टा सुरर्षिभिः ॥ त्वया नाकिमपि प्रोक्तं को हेतुस्तत्र नर्मदे ॥ ब्रूहि ते ाक तु सामर्थ्यं पावनायेहि देहिनां ॥ इति पृष्टा यदा रेवा तत्र पार्थ सुरर्षिभिः ॥ वीक्ष्यमन् संमुखं देवी हसिता हरनंदिनी ॥ ततो वीक्ष्याधरं किंचिन्नब्रूते नर्मदा यदा ॥ तदा मयैव पुरतो देवर्षीणां निवेदितं ॥ त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनं ॥ सद्यः पुनाति गांगेयं दर्शनादेव नार्मदं ॥ स्मरणाज्जन्मजं पापं दर्शनाच्च त्रिजन्मजं ॥ स्नानाज्जन्मसहस्रोत्थं हंति रेवा कलौ युगे ॥ मार्कंडेय उवाच ॥ ततः स्पर्धान्विता तापी समुत्थायाह भारत ॥ स्मरणादहमप्याशु यत्र तत्र स्थितं नरं ॥ पुनामि ह मुनिश्रेष्ठ पापपंकाकुलं सदा ॥ मार्कंडेय उवाच ॥ सप्तकल्पस्मरा रेवा पुण्या मे सहचारिणी ॥ स्मृता संकीर्तिता दृष्टा स्नाता पापं प्रणाशिनी ॥ तापी उवाच ॥ स्मराम्यह मुने तद्वत् कल्पान्सार्द्धैकविंशतिं ॥ स्मृता संकीर्तिता दृष्टा स्पृष्टा स्नाता चपावये ॥ ततः सरस्वती प्राह प्रोत्थाय स्पर्द्धया नृप ॥एवं वेदसि

१ गोदावरी.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 विप्रर्षे ततः शृणु वदाम्यहं ॥ चतुर्भिराधिकान्यष्टि कल्पानीह स्मराम्यहं ॥ स्नात्वा समुत्तरेघोनां द्विगुणं सलभेत्फलं ॥ मार्कंडेय
उवाच ॥ एवं किमुच्यते देव्यः किं कल्पस्मरणेन वः ॥ एवं चेज्जान्हवीं देवीं विलोकयतवैष्णवीं॥अष्टादशसहस्राणि कल्पान् स्मर-
ति जान्हवी ॥ साधिकान्सरितस्तत्र किंवक्तव्यमिहास्ति वः ॥ देवा रक्षांसि ऋषयः सरितो यक्षपन्नगाः ॥ भवंति चिरकालीना वि-
शेषस्तत्रको मतः ॥ तत्र का पात्रता पुण्या वृद्धत्वे वः सरिद्वराः ब्रह्मा जगत्पिता वृद्धो विष्णुः सर्वत्र पूज्यते ॥प्रारब्धे सुरकार्येपि
गणेशो मोदकाशनः ॥ तस्मात्स्वमानमासाद्य वक्तव्यं हि विचक्षणैः ॥ मौलौ गंगा शिखी नेत्रे सुधा चंद्रे विषं गले ॥ भूषा दृष्टि-
विषाः सर्पास्तारहारश्च वासुकिः ॥ विश्वकायोप्रमेयात्मा स्वदेहे भूषणछलात्॥सृष्टिसंहारबीजानि धत्ते देवो महेश्वरः॥तदीशतनयातु-
ल्याः किं भवंत्यो भविष्यथ ॥ नो वा किं क्रियते पित्रा संतानं यदि निर्गुणं ॥ नास्ति मे तत्र वक्तव्यं यदा स्यादगुणा सरीत् ॥
पुनः सा निम्नगा नैषा स्वयं या वै विकत्थते ॥ शृणु तस्या प्रभावं हि देवर्षे सरितास्थिताः॥ स्वभावेनैव वो वच्मि यथाज्ञानं मया
किल ॥ सर्वेषां नाकिनां रेवा देवादीनामपष्टिदा ॥ यातानां किं पुनर्दूरात्स्नातानामन्वहं नृणां ॥ सरितः संति शतशः स्नानादुक्तफ-
लप्रदाः ॥ निरवद्यं पदं रूढ दत्ते दृष्ट्वैव नर्मदा॥ गत्वा किमन्यासु सरित्सु सर्वतीर्थेपु वा क्षेत्रवनादिकेषु ॥ एकापि किं कामरिपोर्न
दृष्टा धुनी धुनीते विविधाघसंघान् ॥दिपं मया भ्रमता भूरिशोग्रे श्रुता दृष्टाः सेविताः सिंधुसंघाः ॥ चेतस्ताहृक् तासु तुष्टिं न धत्ते
यद्रेवायां कीर्तितालोकितायां ॥ यज्ञादि पुण्यफलदा नद्यः सर्वास्तु सेविताः ॥ तामेव सरितं मन्ये तुष्येदश्मायदार्चितः ॥ सरि
तः संति वाद्यापि सर्वतः सागरं गमाः ॥ किंताभिर्यत्र नाश्मानः शंकरा विश्वपूजिताः॥भवधुनिभवभयहरणं कुरुते शरणं यतस्त्वमे
वासि॥का रक्षितुं समर्था त्वत्तो न्या पापपीडितं जंतुं॥भूभागान् भूरिशो यातु नदीः स्नातु सहस्रशः ॥नदी न दीनार्तिहरा वाम्रृते
कापि शांकरि॥भ्रांतं भारतभूतलं तु सकलं द्रष्टुं विशेषं पुरा॥पापघ्नयः शतशोतिपुण्यफलदाः स्नाता मया सिंधवः॥किंत्वेकापि न सा महेश्वर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुते या दैन्यविध्वंसिनी दृष्टैवाथ यदाश्रिताश्मनिवहास्ते सर्वएवेश्वराः ॥ इति ब्रुवाणे मयि राजसिंह सुरर्षयस्ते मुमुदुः समस्ताः ॥ नद्यश्च मां ताः प्रशशंसुरेवं पपात खात्तत्र च पुष्पवृष्टिः ॥ मामाशीर्भिर्वर्द्धयित्वा ततः सर्वेसुरर्षयः ॥ स्तुत्वा च नर्मदां देवीं स्नातुं प्रविविशुर्मुदा ॥ स्नातेषु तेषु देवेषु नर्मदा लोकपावनी ॥ मामुवाच महाभागा विनोदादुच्चया गिरा ॥ मज्जंति मुनयः सर्वेत्वमेकः किं न मज्जसि ॥ तथैव च मयोक्तेयं विनोदात्सत्यमेव तु ॥ मुक्तिस्त्वद्दर्शनादेव न जाने स्नानजं फलं ॥ स्नात्वोत्तीर्णास्ततो देवान् ऋषीन् सिद्धांस्तथा धुनीः ॥ तीर्थानि च तदा रेवा प्रोवाच विनयान्विता ॥ रेवा उवाच ॥ एकं याचे महाभागा व्राते श्रेष्ठसमागमे ॥ सतां समागमो नूनंइहामूत्र फलप्रदः ॥ इह तिष्ठंतु सुचिरं कृपां कृत्वा मयि स्थिरां ॥ प्रतिष्ठाप्य महादेवं तेन सार्द्धं महात्मना ॥मार्कंडेय उवाच ॥ ततस्तुष्टैर्हितैर्देवैर्मुनिभिः सिद्धसिंधुभिः॥तथेत्युक्त्का महाराज स्थापितस्तत्र चेश्वरः ॥ गौरवं तत्र रेवायाः ददुः सर्वे मुदान्विताः॥नर्मदेश्वरनामानं चक्रुस्तं चाभ्यपूजयन् ॥ततस्ते ऋषयः सिद्धा वेधसो यज्ञकारणं ॥ महिमानं चरेवयाः पूजयंतश्च नर्मदां ॥ फलानि शयजं सर्वं गीर्वाणेषु न्यवेदयन् ॥ ऋषयऊचुः ॥ कुत्रापि निर्गुणस्यापि कस्यापि सुरसत्तमाः ॥ कियंतः कुर्वते संतो महिमारोपणं सदा ॥ उपचारवचः किंतु नर्मदायां न दृशते ॥ श्रुते क्षमीक्षते वापि वर्षपूगाननेकशः ॥ महिमानं वदंतो वा वारंवारं विशारदाः ॥ पारं न जग्मुरद्यापि ब्रह्माद्यास्तद्धि कारणं ॥ सितासितासमायोगे प्रयागेपि तु वेधसाः ॥ पुरा कृतेपि यज्ञे वै न तुष्टिर्नर्मदां विना ॥ सत्यं सत्यं पुनः सत्यं भुजमुद्धृत्य वोच्यते ॥ नदी न नर्मदातुल्या न लिंगं नार्मदं विना ॥ मार्कंडेय उवाच ॥ इत्युक्ते तैस्तु मुनिभिस्ततस्ते सुरसत्तमाः ॥ साधुसाध्विति भाषंतः परस्परमथादृताः ॥ नर्मदेश्वरमभ्यर्च्य सर्वेजग्मुर्यथागतं ॥ ततः प्रभृति राजेंद्र विख्यातं नर्मदश्वरं ॥ तत्र स्नात्वा महाराज पौषकृष्णाष्टमीदिने ॥ वैशाखे वाथ विधिवत्सर्वपापैः प्रमुच्यते ॥ तत्रैव पितृदेवानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यश्च दद्यात्तिलोदकं ॥ श्राद्धपिंडादि वादत्वा पितॄणामनृणो भवेत् ॥ अष्टम्यां च चतुर्दश्यां पूजयेन्नर्मदेश्वरं ॥ पक्षयोरुभयोः पार्थ भक्तिध्यानरतो हिसः ॥ सर्वतीर्थफलं प्राप्य सर्व देवार्चने चयत् ॥ शिवलोकमवाप्नोति यावदाहूतसंप्लवं ॥ दीपं दद्याच्च देवाय स्वशक्त्या भरतर्षभ ॥ गां च सोपस्करां दद्याद्विप्राय विधिवन्नृप ॥ विप्राणां भोजनं दद्याच्छत्रोपानकमंडलुं ॥ इति कृत्वा महाराज कृतकृत्यो भवेन्नरः॥इति श्रीरेवामहात्म्ये नर्मदेश्वरतीर्थं ॥ मार्कंडेय उवाच॥ ततो गछेत राजेंद्र तीर्थं त्रैलोक्यविश्रुतं ॥ ब्रह्मतीर्थं सुविख्यातं यत्र ब्रह्मशिला शुभा ॥ युधिष्ठिर उवाच॥ ब्रह्मन्सर्वज्ञ पृच्छामि विस्मयात्तीर्थविस्तरं ॥ किं ब्रह्मतीर्थं केनादौ कृतं तत्र शिला च का॥एतदिच्छाम्यहं श्रोतुं विस्तरान्मुनिसत्तम ॥ मार्कंडेय उवाच ॥ शृणु सर्वं महाराज विस्तराद्धर्मनंदन ॥ उत्तानपादनृपतेः संवादं सहशूलिना ॥ यथाश्रुतं मया तात तथा ते कथयाम्यहं ॥ महादेवं महात्मानं प्रसन्नं मुनिभिस्तुतं ॥ उत्तानपादो नृपतिः पुरा पप्रच्छ शंकरं ॥ उत्तानपाद उवाच ॥ देवदेवमहेशान नर्मदातीरसंस्थितं ॥ ब्रह्मतीर्थं त्वयोक्तं यत्तीर्थं ब्रह्मशीलाह्वयं॥तस्य तीर्थस्य महात्म्यं विस्तराद्वद मे विभो॥महेश्वर उवाच॥ शृणु राजन्महाभाग ब्रह्मतीर्थं वदामि ते॥सवनस्यात्मजौ वीरौ महावित्तश्च धातकी॥नामाभ्यां प्रथितौ लोके राजन्यगणमूर्द्धगौ॥महावित्तस्य पुत्राणां सहस्रमभवत् किल॥महौजसा महाभाग समहोद्यमशालिनां॥तेषां वंशोभि विस्तारं जगाम भुवि कोटिधा॥महावितस्य पुत्राणां संतत्याभूः प्रपूरिता॥ते वै विख्यातयशसो महावीर्या महाबलाः॥याज्वानो दाननिरताः क्रियावंतो बहुश्रुताः॥तैरियं पृथवी व्याप्ता सर्वद्वीपेषु पार्थिव॥ दानैर्जितैर्द्विषैः शूरैः क्षत्रियैर्लोकविश्रुतैः ॥ धातकिश्च महाभाग पुत्रसंतानवर्जितः ॥ संततेः सपरिछेदं दृष्ट्वासौ पुष्कराधिपः ॥ महावित्तानुजो राजन् धातकी दुःखमाप्तवान् ॥ कथं पुत्राश्च पौत्राश्च कर्मणा केन मे शुभाः ॥ भवेयुर्दुःखितस्याशु पितॄणामनृणो भवेत् ॥ इति सस्मार सुचिरं महादुःखान्वितो नृप ॥ कथं तरिष्ये जन्माब्धिं पुत्रपुत्रैर्विनाऽनृणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपुत्रस्य गृहं शून्यं अपुत्रस्य कुलं ततः ॥ परं पारं हि पुत्रेण भवाब्धेर्याति पुत्रवान् ॥ यज्ञदानानि तीर्थानि मंत्रवृत्तकलाक्रियाः ॥ सत्पुत्रप्रभवस्यापि कलां नार्हंति षोडशीं ॥ तस्मात् गमिष्ये पुत्रार्थं कर्मभूमौ महामनाः ॥ नर्मदायां तु नियतो देवतीर्थात्तु पश्चिमे॥ईश्वरोवाच॥इति निश्चित्य नृपतिर्धातकिर्नर्मदां ययौ॥दक्षिणं कूलमासाद्य तपस्तेपे सुदारुणं॥तस्य वैतप्यमानस्य यजतश्च मखान्क्रतून्॥अष्टाशीति सहस्राणि वर्षाणामगमन्नृप॥एतस्मिन्नंतरे तत्र महादेवैः पितामहः॥आजगाम महाभाग स्रष्टुकामःप्रजापतिः॥तत्र दृष्ट्वा तपस्तप्तं सवनस्य सुतं नृप॥तुतोष भक्त्या तस्याथ नियमेन च स प्रभुः ॥ ब्रह्मा उवाच ॥ धातके ब्रूहिराजर्षे किमहं करवाणि ते ॥ तपसा वै सुतप्तेन तोषिताः सर्वदेवताः ॥ वरं वरय राजेंद्र यत्ते मनसि वांछितः ॥ इति श्रुत्वा स राजर्षिः प्रणम्य विधिपूर्वकं ॥ ब्रह्माणं नृपशार्दूल तुष्टाव नतकंधरः ॥ धातकिरुवाच ॥ नमे विश्वसृजे तुभ्यं सदसत्सर्वकारिणे ॥ ऋग्यजुः सामनूताय नमस्ते वेदमूर्तये ॥ नमः पालकरूपाय भवाय भवहारिणे ॥ रुद्राय रौद्ररूपाय तमसे प्रलयात्मने ॥ सर्वदेवमयायाहं नमामि सजनोचितः ॥ गुणागुणस्वरूपाय नमस्ते केवलात्मने ॥ पूर्वकांडप्रसक्ताय नमः कर्मक्रियात्मने ॥ नैष्कर्मकार्यसिद्धाय महानंदात्मने नमः ॥ कापि ते परमा शक्तिः कर्मत्रयविधारिणी ॥ तत्तवित्राय महसे नमस्तुभ्यं त्रिधात्मने ॥ यस्मात्स्वयंभुवो वेदाः प्रादुर्भूताश्चतुर्मुखात् ॥ तमहं त्वां कथं स्तौमि ब्रह्मन्नद्य जगत्पते ॥ ईश्वर उवाच ॥ एवं तुष्टुवतस्तस्य परितुष्टो जगद्गुरुः॥ ज्ञात्वा प्रोवाच भगवान् सर्वज्ञो ज्ञानिनां वरः ॥ ब्रह्मा उवाच ॥ ज्ञातं नृप मया सर्वं पुत्रार्थं तप्यते त्वया ॥ लप्स्यामि पुत्रपौत्रांश्च तस्मादाशुत्वमुत्तमान् ॥ शूरान् गुणगणोपेतान् दानयज्ञविशारदान् ॥ एवं पुत्रान्प्रपौत्रांश्च ददौ तस्मै नृपोत्तम ॥ ईश्वर उवाच ॥ एवं तद्वंशसंभूतैराजपुत्रैः सहस्रधा ॥ पूरिता पृथिवी सर्वा धातकीवंशसंभवैः ॥ तदा काले महाराज धातकीतीर्थसंज्ञितं ॥ नासख्योभिगतं भूमौ पवित्रं पापनाशनं ॥ कामिकं सर्वलोकानां तीर्थानामुत्तमं नृप ॥ अस्मिन्दत्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हुतं जप्तं यत्किंचित्सुकृतं कृतं ॥ तत्सर्वमक्षयं तस्य जायते नृपसत्तम ॥ अफलाकांक्षिभिर्यत्तु कृतं तद्ब्रह्मसाद्भवेत् ॥ फलेप्सुभिर्य-
था कामं प्राप्यते परमं फल ॥ उत्तानपाद उवाच ॥ यदि देव महातीर्थं धातकीतीर्थमुच्यते ॥ ब्रह्मतीर्थं कदा सिद्धं तद्ब्रूहि मम धू
र्जटे ॥ महादेव उवाच ॥ पुरा कल्पे महाराज सृष्टिकामः प्रजापतिः ॥ इष्टिं चकार पुत्रीयामस्मिन् तीर्थे समाहितः ॥ ऋषयो
देवता नागाः सिद्धा विद्याधरास्तथा॥समागतास्तत्र सर्वे ब्रह्मणो यज्ञसिद्धये॥ शतानि पंच दंडानां देवतीर्थात्तु पश्चिमे ॥ तत्र ब्रह्मशिला
पुण्या विरंचिमखवेदिका॥ब्रह्मणोग्निविजिस्त्यत्रविष्णो रुद्रस्य चैव हि॥देवानां मरुतां पूर्वमधिष्ठांनं च साशिला॥विशाखायां तु वैशाखे तां
शिलां पूजयेत्तु यः॥अश्वमेधस्य फलं प्राप्नोति च मानवः॥नर्मदादक्षिणे कूले शिवायतनवांछया ॥वेधाः संस्थापयामास शिवलिंग-
मनुत्तमं ॥ तत्र ब्रह्मेश्वरं नाम्ना विश्वाधीशं कपर्दिनं ॥ संपूज्य च महादेवं तपस्तेपे तपोमहत् ॥ तस्य वर्ष सहस्राणि समतीता-
नि षोडश ॥ दिव्यमानेन राजेंद्र ध्यानस्थस्य तपस्यतः ॥ इच्छतः सृष्टिमतुलां तुतोषानंतरं शिवः ॥साक्षाद्रूपउवाचेदं ब्रह्मसिद्धिर्भ-
विष्यति ॥ ततोंतरिक्षवागासीदुच्चैर्विश्वप्रघोषिणी ॥ सृज सृष्टिं शतानंद यथा वेदानुशासनं ॥ भविष्यति पराशक्तिः सर्प्यसंस्मरत
स्तव॥प्रसन्ने त्वादिपुरुषे शिवे शिवगुणोत्तरा॥ततः स विस्मितो ब्रह्मा नमस्कृत्य महेश्वरं॥ध्यायमानस्तु देवेषु तपसा सिद्धिमाप्तवान्
॥ चकार सृष्टिमतुलां जपन्वेदांश्चतुर्मुखैः ॥ पूर्वं ससर्ज भगवान् दक्षादीन्नृपसत्तम ॥ तेभ्यो जाता इमे लोका ससुरा स्थाणुजंगमाः
॥ मया संपूजितेनास्य प्रसन्नेन च पार्थिव ॥ सर्गसिद्धिर्विधेरेवं यागादनुबभूवह ॥ तत्र ब्रह्मा च विष्णुश्च तथाहमपि भूपते ॥
सहदेवैस्तु गच्छामः सदा पर्वणि पर्वणि ॥ एतद्ब्रह्मेश्वरं तीर्थं पवित्रं पुण्यवर्द्धनं ॥ तत्र स्नात्वा च पीत्वा च दृष्ट्वा पापं व्यपोह-
ति ॥ दर्शे तत्र कृतं श्राद्धं पितृणामक्षयं भवेत् ॥ वैशाखे च विशेषेण गयाश्राद्धसमं फलं ॥ वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करे
नृप ॥ भक्त्या यद्वसतां वर्षात्फलं प्राप्नोति मानवः॥ दिनेनैकेन तत्पुण्यं ब्रह्मेश्वरसपर्यया॥दर्शे वैशाखमासस्य कृत्वा स्नानं जितेंद्रि-

CC-0. In Public Domain. Digitization by eGangotri

यः ॥ श्राद्धं दत्वा पितॄणां च दत्वा दानानि शक्तितः ॥ सफलं जन्म कुरुते पितॄणामनृणो भवेत् ॥ तीर्थोपवासं कुर्वीत रात्रौ जागरणं तथा ॥ ब्रह्मेश्वरं समभ्यर्च्य ब्रह्महत्यां व्यपोहति ॥ तत्र ब्रह्मेश्वरे तीर्थे गां दद्याद्यो नरो नृप ॥ ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा ॥ अश्वदानाद्रवेर्लोके यावन्मन्वंतरं वसेत् ॥ नानावस्त्रप्रदो याति वाचस्पति सलोकतां ॥ सुवर्णं रजतं ताम्रं नानाधातूंश्च यो ददेत् ॥ स शक्रलोकमाप्नोति तथा भूमिप्रदो नरः ॥विद्यादानाद्ब्रह्मलोकं सारस्वतमथापि वा ॥ नरश्चंद्रेंद्रभुवनं याति यज्वा जनाधिप ॥ प्रातर्मध्यान्हसवनी पूजयेद्यः सुरेश्वरं ॥ नरः शिवपुरं याति यावदाहतसंप्लवं॥रात्रौ जागरणं कृत्वाशिवस्याग्रे तु भक्तितः ॥ वैकुंठादिषु लोकेषु सुचिरं स महीयते॥अन्नोदकप्रदानेन मुक्तिमायाति शाश्वतीं ॥अन्नं ब्रह्मेति कवयः पुराणाः प्राहुरैश्वरं ॥अन्नोदकप्रदानेन सर्वदानफलं लभेत् ॥सकामः स्वर्गमाप्नोति निष्कामो ब्रह्मसाद्भवेत् ॥पुत्रपौत्रानवाप्नोति तीर्थयात्राविधानतः॥तीर्थयात्राफलं राजन् सर्वदा दक्षिणे तटे ॥ ब्रह्मेश्वरं ब्रह्मशिलां ब्रह्मकुंडानि पार्थिव ॥ दृष्ट्वा स्पृष्ट्वार्चयित्वा च नरोमुक्तिपदं लभेत् ॥ तत्र विष्णुपदं भूप मम चानुत्तमं पदं ॥ ब्राह्मंपदं शिलायां तु दर्शयोगे हिदृश्यते ॥ माधवे मासि राजेंद्र श्राद्धं कुर्यात्ततस्ततः ॥ स याति सर्वलोकेषु विमानेनार्कवर्चसा ॥ मार्कंडेय उवाच ॥ एवं शिवस्य वदतः पुरा ह्येतन्मया श्रुतं ॥ उत्तानपादं नृपतिं प्रति पार्थ सुराचले ॥ एतद्ब्राह्मेश्वरं नाम तीर्थं त्रैलोक्यविश्रुतं ॥ ततः प्रभृति राजेंद्र धातकीश्वरमादितः ॥ कीर्तनाच्छ्रवणादस्य सर्वपापैः प्रमुच्यते ॥ लिखित्वापि ग्रहे स्थाप्यं नोवा विप्राय दीयते ॥ ब्रह्मा विष्णुश्च रुद्रश्च तस्य तुष्यंति देवताः ॥ इति श्रीरेवामहात्म्येब्रह्मेश्वरब्रह्मशीलातीर्थनाम सप्तद्विशततितमोध्यायः ॥ १२७ ॥ मार्कंडेय उवाच ॥ ततो गच्छेन् महाराज वाल्मीकेश्वरमुत्तमं ॥ क्रोशद्वयांतरे पुण्यं ब्रह्मतीर्थाद्युधिष्ठिर ॥ पुरा महर्षिर्वाल्मीको भृगुवंशसमुद्भवः ॥ तेन तत्र तपस्तप्तं सिद्धिःप्राप्ता निरत्यया ॥ युधिष्ठिर उवाच ॥ कस्य पुत्रः कथं जातः कस्मात्तेपे तपो मुने ॥ एतदाख्याहि मे सर्वं कृपा यदी परा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयि ॥ मार्कंडेय उवाच श्रृणु पार्थ प्रवक्ष्यामि स्नेहात्ते यच्छ्रुतं मया ॥ तपश्चरन्वने पार्थ भृगोः पौत्रः पुराकविः ॥ पुरूरवसमायांतींद्रष्टुमूर्वशिमप्सरां ॥ तां दृष्ट्वा रूपसंपन्नां कामोद्रेको भवन्मुनेः ॥ पपात वीर्यं वल्मीके तत्र जातो महामुनिः ॥ सर्वावयसंपूर्णः परमाकृतिपूजितः ॥ उपवीताक्षवलयः मेखलाजिनसंयुतः ॥ वेदानुदीरयन्नुच्चैर्जटामुकुटमंडितः ॥ उवास द्वादशाब्दानि वल्मीके किल भारत॥कदाचित्पितरं प्राप्तं ज्ञात्वा तत्र महामुनिः॥नीत्वावल्मीकराशिं तं ववंदे पितरं मुदा॥कविः समाधिमास्थाय विस्मितस्तस्य दर्शनात् ॥तत्सर्वं पूर्ववृत्तांतं ज्ञानवान् चिंतयन्मुनिः॥मत्त्वा पुत्रं निजं सिद्धमयोनिजमकल्मषं ॥ वाल्मीकीतिचनामास्य चकार मुदितः पिता॥संस्कारानखिलांस्तस्य विधिना चाप्ययोजयत्॥ततः प्रणम्य पितरं वाल्मीको मुनिसत्तमः॥ऋषीनन्यांश्च सर्वत्र ततस्तीर्थानि जग्मिवान् ॥ क्रमेण नर्मदातरिमासाद्य विमलं ततः ॥ तत्र तेपे तपस्तीव्रं स्थापयित्वा परं शिवं ॥ नित्यं त्रिषवणस्नायी शिवध्यायि शिवार्चकः ॥ ज्ञानसिद्धिं परां प्राप्तो नैष्कर्मपदपेशलं ॥ शंकरस्य प्रसादेन सर्वपूज्यो भवन्मुनिः ॥ कल्पस्थायि जगच्छायी त्रैलोक्यस्याभिवंदितः ॥ ततः प्रभृति राजेंद्र वाल्मीकेश्वरसंज्ञितं तीर्थं सर्वत्र विख्यातं सिद्धिदं पापनाशनं ॥ पापीनां पापनाशाय पुण्यानां मुक्तिदं परं ॥ तत्र तीर्थे तु यः पार्थ स्नात्वा संपूजयेच्छिवं ॥ चिरमायुरवाप्नोति देहांते शिवलोकभाक् ॥ दीपदानं च देवाय गांमन्नं वाससी ददेत् ॥ श्राद्धं दत्वा पितृणा च तत्र तीर्थे युधिष्ठिर ॥ संवत्सरशतं साग्रं पितृणां तृप्तिरक्षया ॥ स्तुतिध्यानप्रधानैश्च जायते सर्वपूजितः॥इति श्रीरेवामाहत्म्ये वाल्मीकेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ कोटितीर्थमनुत्तमं ॥ पुरा कापालिकं वेषं समास्थाय जगत्पतिः ॥ नीत्वा करे कपालं च भिक्षार्थं विचचार ह ॥ रेवाया दक्षिणे तीरे वेगाद्वविदितः शिवः॥ भिक्षार्थं भ्रमत स्तत्र कपालं च पतद्भुवि ॥ स्विन्नामचात्मनस्तस्य तत्र लोकायतस्तदा ॥ स्वयं नाटयतः पार्थ पात्रं लो-

१ कविनामाऋषिः. २ राकडो.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कैः समुद्धृतं॥भिक्षान्नेनापि विक्षिप्ते कपालं यावदुद्धृतं ॥ न शक्यते समुद्धर्तुं तैर्यदा भरतर्षभ ॥ तदा लिंगं महच्चद्रुमुत्थितं तत्र शोभनं ॥ विशेषात्सहतैस्तत्र निषसाद कपालिकः ॥ प्राणांस्त्यक्ष्यामि तपसा लोकान्संश्रावयन्निति ॥ लोकैरुक्तो बहुतरं नानावाक्यैः प्रलोभनैः॥न प्रकारेण केनापि मन्यते लिंगिनां वरः ॥ एवं कालो महांस्तस्य व्यतिक्रांतो युधिष्ठिर ॥ विद्वद्भि र्ब्राह्मणैः शूरैः भूपैरपि सबोधितः॥देशदेशांतरायातै र्लोकैश्च प्रतिबोधितः॥एतास्मिन्नंतरे पार्थ नरा नभसि गच्छता॥नारदेन तदा दृष्टास्ते संघमिलिता नृप॥ कौतुकं द्रष्टुमायातो नारदः कौतुकप्रियः ॥ आगतो वीक्षतेयावत्तं ददर्शमहेश्वरं ॥ महेशेनापि दृष्टोसौ प्राप्तस्तत्र कलिप्रियः॥ तौ परस्परसंकेतादभिवीक्ष्य युधिष्ठिर ॥ मिलितौ तत्र लोकानां पश्यतां नारदोब्रवीत् ॥ अट्टहासं विहस्याशु जनयन्विस्मयं जने ॥ वारितोपि तदात्यंतं मामेति स कपालिना ॥ नारद उवाच ॥ परित्यज्याद्य कैलासं लिंगलिलामुपाश्रितः ॥ कस्मात् खेदयसे लोकान् वराकान् धूर्त धूर्जटे ॥ अपराधः क एतेषां त्वया तूद्वेजिता मही ॥ त्वया किं कर्तुमारब्धं वद सत्यं महेश्वर ॥ लोकान्मुंच गिरिं गच्छ बहुरूप कृपां कुरु ॥ धूर्तोयं धूर्जटिर्लोकाः खेदेनालं व्रजंतु च ॥किं तपः किं कपालं हि सहसास्यात्तु लिंगिता ॥ मार्कंडेय उवाच ॥ इत्युक्तवति तत्रालं नारदे नृपसत्तम ॥ अंतर्द्धानमगाच्छर्वस्तत्रैवाखिलसंवृतः ॥ गते चादर्शनं देवे नारदः प्राह तान्जनान् ॥ कोटिशो मिलितायार्थ यथातत्त्वं शिवाज्ञया ॥ शृण्वंतु लोकाः सर्वे च चतुर्वर्णसमान्विताः ॥ अनुग्रहोस्य भवतां यद्दोदृग्गोचरं गतः॥कपालं यत्र पतितं तत्र लिंगं समुत्थितं ॥ तं चाप्यनुग्रहं मन्ये पूजयंतु स्वभक्तितः ॥ कपालेश्वरनामानं भुक्तिमुक्तिफलप्रदं ॥ इदं तीर्थं महापुण्यं लोकानां पापनाशनं ॥ अत्र स्नात्वा च संतर्प्य श्राद्धं कृत्वा विधानतः ॥ कपालेश्वरमभ्यर्च्य यथाशक्त्या तुभक्तितः ॥ नरो न नरकं याति यावन्मनुचतुष्टयं ॥ शिवस्यानुचरो भूत्वा शिवलोके महीयते ॥ इत्युक्त्का नारदस्तत्र जगामादर्शनं नृप ॥ लोकाश्च विस्मिताः सर्वे स्नात्वा तत्र विधानतः ॥ पूजयांचक्रिरे देवं कपालेश्वरसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञितं ॥ स्थित्वा त्रिरात्रं ते तत्र मिलिताः कोटिशोपरे ॥ परस्परमुपामंत्र्यब्राह्मणाद्या युधिष्ठिर ॥ ईश्वरं स्थापयामासुः पृथक्कोटी-
श्वराह्वयं ॥ कोटिशो मिलितैर्लोकैः प्रतिष्ठापितमादरात् ॥ लिंगं प्रपूजितं लोकैः स्नात्वा विधिवदैश्वरं ॥ केचिन्नृत्यंति गायंति
स्तुवंति च यजंति च ॥ केचिध्यायंति विश्वेशं पूजयंति तथापरे ॥ एवं ते विविधैर्भेदैः शिवस्याराधने रताः ॥ कोटीश्वरमिति
स्थाप्य ततो जग्मुर्यथाक्रमं ॥ कालेन गच्छता तेपि मुक्ता भावानुसारतः ॥ पापसंघान्महाराज स्वर्गं प्रापुः पृथग्विधं ॥ ततः प्र-
भृति विख्यातं तीर्थं कोटिश्वराह्वयं ॥ पापक्षयकरं पार्थ स्वर्गमोक्षप्रदं शुभं ॥ तत्र स्नात्वा तु विधिना संतर्प्य पितृदेवताः ॥
श्राद्धं दत्वा पितॄणां च पूजयेच्छंकरं नृप ॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते॥दीपदानं च देवाय ब्राह्मणांश्चापि
भोजयेत् ॥ कपालेश्वरमभ्यर्च्य ततः कोटीश्वरं व्रजेत् ॥ इति ते कथितं तीर्थं कपालेश्वर संज्ञितं ॥ तथा कोटीश्वरं
तीर्थं तवभक्त्या युधिष्ठिर ॥ इति श्रीरेवामहात्म्ये कपालेश्वरतीर्थं तथाकोटीश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत रा
जेंद्र नर्मदाउत्तरे तटे ॥ पांडुतीर्थमिति ख्यातं भ्रूणहत्याविनाशनं ॥ अंगारिकेश्वरात्तीर्थात् स्थितं क्रमशतत्रये ॥ न्यूनाधिके नृप-
श्रेष्ठ तव पित्रानिषेवितं॥विचित्रवीर्यनृपतेः पुत्रः पांडुः पिता तव ॥ मृगयामटमानस्तु पुरा निघ्नन्मृगान्बहून ॥ जघान किल बा-
णेन ब्राह्मणं मृगरूपिणं ॥ स तं दोषमनुप्राप्तस्तेन शप्तश्च भूपतिः ॥ कामावस्थं हि मां निघ्नन् त्वमप्येवं भविष्यसि ॥ एवमुक्त्वा
स तत्याज प्राणान्विप्रो युधिष्ठिर ॥ ततउद्विग्नचितः स प्राणान् त्यक्तुमना निजान् ॥ विहाय सर्वं नृपतिर्नर्मदातीरमाप्तवान् ॥
निराहारस्तपस्तेपे ततस्तुष्टो महेश्वरः॥प्रत्यक्षः प्राह राजानं व्यतीते वत्सरत्रये ॥ ईश्वर उवाच ॥ किंतप्यते त्वया भूप तपः
परमदारुणं ॥ को हेतुः काभिवांछा ते मम सर्वं निवेदय ॥ पांडु रुवाच ॥ देवदेव जगन्नाथ लोकानुग्रहकारक ॥ अस्थिचर्मा-

१ (पांगेयु.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयि प्रसन्नोहि कृपया पार्वतीपते ॥ अज्ञानाद्ब्राह्मणं हत्वा यो मां दोषः समाश्रितः ॥ तं नाशय महेशान ब्रह्मशापं च दारुणं ॥
अनपत्योस्मि विश्वेश ततस्त्वां प्रार्थयेविभो ॥ ईश्वरो उवाच ॥ ब्रह्महत्या प्रनष्टा ते तपसा कृपया च मे ॥ शुद्धस्त्वं नृपते दो-
षा द्ब्रह्मघातसमुद्भवात् ॥ किं ते शापो ब्रह्मकृतो न भवेदन्यथा मया ॥ ब्रह्मशापं विना राजन् प्रार्थयस्वाखिलं ध्रुवं ॥ राजोवाच
॥ अपुत्रता महद्दुःखं गतिशुद्धा च नो भवेत् ॥ ऋणत्रयापकरणमपुत्रस्य कथं विभो ॥ तस्मात्पुत्रानिहेछामि ते कथं सुरतं विना ॥
ईश्वर उवाच ॥ पुत्रास्तव भविष्यंति देवांशा लोकपूजिताः ॥ पृथिवीपालकाः सर्वे मंत्रशक्त्या नृपोत्तम ॥ ममप्रसादात्पृथया
समाकृष्टास्तु भार्यया ॥ हत्यादोषाद्विरूपस्ते देहोभवतु रूपवान् ॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत ॥ पांडुश्च परमेशानं प्र-
तिष्ठाप्य युधिष्ठिर ॥ स्नात्वा संपूज्य च विभुं विधिना निजलंज्ञया ॥ प्रयातः स्वपुरं पार्थ परमानंदपूरितः ॥ ततः प्रभृति विख्यातं
पांडुतीर्थमनुत्तमं ॥ सर्वदोषप्रशमनं भ्रूणहत्याविनाशनं ॥ तत्र स्नात्वा नरो राजन् भ्रूणहत्यां व्यपोहति ॥ तोषयेच्च पितॄन्
भक्त्या तत्र दत्वा तिलोदकं ॥ श्राद्धेन पितर स्तृप्ता भवंति हि युगान्दश ॥ तत्र तीर्थे च यः स्नात्वा प्रदद्यात्कांचनं शुचिः ॥
अपि सर्वाणि पापानि भ्रूणहत्याच नश्यति ॥ यस्तत्र पूजयेद्भक्त्या पांडुसंस्थापितं शिवं ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोति
मानवः ॥ पितॄनुद्दिश्य यो भक्त्या ब्राह्मणांस्तत्र भोजयेत् ॥ पितरस्तस्य तृप्यंति प्रहर्षायुगविंशतिः ॥ इति श्रीरेवोत्तरतीरे पांडु-
तीर्थनाम अष्टद्विशततितमोध्यायः ॥ १२८ ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र पुण्यतीर्थं त्रिलोचनं ॥ क्रोशार्धे
पांडुतीर्थात्तु सर्वपापप्रणाशनं ॥ यत्र सिद्धो महाराज पुराराजा त्रिलोचनः ॥ त्रेतायुगस्य पूर्वार्धे सूर्यवंशसमुद्भवः ॥ पुंडरीकस्य नृपतेः
पुत्रो नाम्ना त्रिलोचनः ॥ संसारानित्यतां ज्ञात्वा त्रिविधा कर्मबंधनात् ॥ आत्मनो मुक्तिमन्विच्छन्सर्वतीर्थेषु पर्यटन् ॥ रेवाती-
रमनुप्राप्तो विमलं वांछितार्थदं ॥ तीरं गंभीरनीरं दृष्ट्वा शांतमना भवत् ॥ पप्रच्छ स मुनीन्सर्वान् तत्रस्थान्नृपसत्तम ॥ प्रणम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विधिना पार्थ मोक्षोपायं सुखावहं ॥त्रिलोचन उ०॥ गर्भवासैरहं खिन्नः कर्मपाशैश्च पीडितः॥इच्छे मोचयितुं तेभ्य आत्मानं मुनि-
सत्तमाः ॥ ब्रूत किंचित्सुखोपायं कर्तव्यं मोक्षदं मम ॥ भवतां कृपया येन न भवामि पुनर्भवे ॥ ऋषयऊचुः ॥ साधु पृष्टं
मुनिश्रेष्ठ यदि ते बुद्धिरीदृशी ॥ तच्छृणुष्व प्रवक्ष्यामो यत्कृत्यं मोक्षदं तव ॥ स्थिता मोक्षलता यत्र नर्मदा नृपशर्मदा ॥ यत्र
कर्माटवीछेदपरशुर्धूर्जटिः स्थितः ॥ तत्र किं बंधनं जंतोर्यदि जानाति सेवितुं ॥ उपला नीलकंठत्वं भजंते यज्जलाहतः ॥ क्रि-
यते किंनतद्देवा सेवा देवादि मोक्षदा ॥ भवं भवानीं भवजां धुनींच भज त्वमादौ भवभीतचेताः ॥ ततः क्रमेण प्रशमाय चेतो
दधस्व संत्यज्य षडूर्मिवेगान् ॥ जप पंचाक्षरीं विद्यां तप तीव्रं तपोऽव्ययं ॥ क्षप रेवातटे कालं लय सर्वं सनातनं ॥ भजे शंभुं
यजेशानं व्रज दूरं जनौघतः ॥ त्यज कामादिकान् शत्रून्मुक्तिं कांतां परिष्वज ॥ शिवं भज शिवं ध्येहि शिवं यज शिवं जप
॥ शिवं स्तुहि शिवं ब्रूहि शिवं पश्याखिलं नृप ॥ त्रिस्नायी तीर्थयायी च शिवध्यायी जिताशनः ॥ नैकस्थायी तथा
मायी ध्रुवं मोक्षमवाप्स्यसि ॥स्वानि स्वानि वशे कृत्वा कर्म कुर्वन्शिवार्पितं ॥वदन्वाक्यं कृतमितं हितं जंतोर्नयांकितं ॥ निस्तरंगी
च निःसंगी दत्तरंगी परात्मनि ॥ जपन्नेकाक्षरं शर्वं ध्रुवं मोक्षमवाप्स्यसि॥मार्कंडेय उवाच॥इत्यादिवाक्यैर्नृपति यदा स प्रतिबोधितः॥
ततस्त्रिलोचनस्स्नात्वा प्रतिष्ठाप्य महेश्वरं ॥ मुनीनामुपदेशेन क्रमात्सर्वं चकार ह ॥ प्राणधारणमाकांक्षन्पत्रपुष्पफलादिभिः ॥ य-
थालब्धेन तु यदा कदाप्याहारवर्जितः ॥ एवं वर्षाणि तस्याशु द्वादशाक्रांतचेतसः ॥ निर्ममो निरहंकारो यदा ज्ञातः पिनाकिना
॥ प्रदग्धाखिलकर्मा च योगिज्ञानाग्निना ध्रुवं ॥ तदादिपुरुषः प्राप्तो भर्गो सर्गलयेश्वरः ॥ त्रिलोचनस्तमाभाष्य शुद्धमुच्चैस्त्रिलोचनं
॥ शूलाग्रेण विबोध्यैनं सारूप्यै संनियोजयत् ॥ तथा स्वरूपं नीत्वा तं सहसाभिपरिप्लुतं ॥ शिवः स्वभुवनं प्राप्य सारूप्यां मु-
क्तिमादिशत् ॥ मार्कंडेय उवाच ॥ ततः प्रभृति विख्यातं तीर्थं नाम्ना त्रिलोचनं ॥ कर्मबंधक्षयकरं मुनीनां विस्मयावहं ॥ तत-

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तेनैव देहेन सिद्धो राजा त्रिलोचनः ॥ तत्र तीर्थे नरः स्नात्वा मुच्यते पापबंधनात् ॥ देवान्पितॄंश्च संतर्प्य तत्र पुण्यैस्तिलोदकैः ॥ श्राद्धैश्च भरतश्रेष्ठ पितॄणामनृणो भवेत् ॥ त्रिलोचनेश्वरं भक्त्या पूजयेद्यो युधिष्ठिर ॥ शक्त्या दीपान्नवस्त्रादिपुष्पधूपार्घचंदनैः ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ योगिनस्तापसान्विप्रान्यतीन् तत्र च भोजनैः ॥ पूजनैर्विविधैश्चापि तोषयेद्भक्तिसंयुतः ॥ सुतोषं याति तेनाशु महादेवः सनातनः ॥ अक्षयं तद्भवेत्सर्वं यत्कृतं तत्र भारत ॥ विद्यादानं च यः कुर्यात्तत्र तीर्थे विधानतः ॥ अध्यात्मशास्त्रमथवा सगच्छेत्परमं पदं ॥ सप्तजन्मनि राजेंद्र शिवभक्तो भवेन्नरः ॥ ततो मोक्षमवाप्नोति योगशास्त्रप्रदानतः ॥ मयैतत्परमं तीर्थं कथितं ते युधिष्ठिर ॥ कीर्तनाच्छ्रवणादस्य सर्वपापैः प्रमुच्यते ॥ इति श्रीरेवामाहात्म्ये त्रिलोचनेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे गच्छेत्तीर्थं वै कपिलेश्वरं ॥ हितार्थं सर्वलोकानां ऋषिभिः स्थापितं पुरा ॥ यज्ञाग्निहोत्रसिध्द्यर्थं कपिलाह्वानतत्पराः ॥ नर्मदातीरसंस्थास्ते परस्परमते रताः ॥ प्रविश्य नर्मदातीरं गंभीरं ह्रदप्रमाणतः ॥ मंत्रैरावाहयामासुर्देवीं कामदुघां द्विजाः ॥ नृपो बलात्समुद्धृत्य नर्मदाया महांभसः॥ दोग्ध्रीं सवत्सां कपिलां तरुणीं शीलसंयुतां॥ततः संपूजयामासुः शिवाग्रे सिवसंयुतां॥कपिलेश्वरनामानं स्थापयित्वा शिवं द्विजाः॥ततः प्रभृति राजेंद्र विख्यातं तीर्थमुत्तमं॥सर्वकामप्रदं पुण्यं कपिलेश्वरसंज्ञितं॥मार्कंडेय उवाच॥ तथैव शृणु भूपाल पुरा विप्रविचेष्टितं॥मुनिपुत्रस्तु कपिलः पुरा पारायणे रतः॥स्नात्वा रेवाजले नित्यं त्रिस्नायी विजितेंद्रियः॥स्थित्वा शुचिस्थले शुद्धे सति विद्यासु पारगः॥दृष्ट्वा तत्र शिवं शांतं शुद्धं बुद्धं सनातनं ॥ सर्वज्ञं सर्वभूतेशं सर्वकामफलप्रदं ॥ उमासहायं गिरिशं सर्वबाधहरं हरं ॥ रेवातोयेन संस्नाप्य पूजयित्वा विधानतः ॥ वेदादिसर्वशास्त्राणां पारायणमचीकरत् ॥ नवावर्तविधानेन शुद्धपावनपेशलं॥यजन् जपन्पठन्नेवं सिद्धः सर्वत्रगो मुनिः॥ कालेनाल्पेन राजेंद्र महादेवगणोभवत् ॥ ततः प्रभृति विख्यातं तीर्थमेतद्विशेषतः ॥ कपिलेश्वरसंज्ञं हि सर्वसिद्धिफलप्रदं ॥ तत्र तीर्थे नरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नात्वा कपिलां यः प्रयच्छति॥विप्राय वेदविदुषे शृणु स्यात्तस्य यत्फलं ॥ सर्वेषामेव दानानां कापिलादानमुत्तमं ॥ ब्रह्मणा भाषितं पूर्वं सर्वदेवसमागमे ॥ सद्यः प्रसूतां तरुणीं कपिलां यः प्रयच्छति ॥ मृतो विष्णुपुरं याति गीयमानोप्सरोगणैः ॥ यावंति तस्यारोमाणि सवत्सायास्तु भारत ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ततोवतीर्णः कालेन इह मानुष्यतां गतः ॥ धनधान्यसमायुक्तो जायते विपुले कुले ॥ वेदविद्याव्रतस्नातः सर्वशास्त्रविचक्षणः ॥ व्याधिशोकविनिर्मुक्तो जीवेच्च शरदां शतं ॥ तत्र तीर्थे च यो विप्रः स्नात्वा पारायणं पठेत् ॥ अंतर्जले वा त्रिपदां जपन् शुद्धिमवाप्नुयात् ॥ गायत्रीमंत्रजाप्येन सर्वपापक्षयो भवेत् ॥ पूजयित्वा महादेवं कपिलेश्वरमादरात् ॥ रुद्राध्यायं जपेद्यस्तु नियमेन समन्वितः॥ दीपं दत्वा च देवाय स याति शिवमंदिरं॥ इतिश्रीरेवामहात्म्ये कपिलेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ कंबुकेश्वरमुत्तमं ॥ यस्य दर्शनमात्रेण जायते पापसंक्षयः ॥ हिरण्यकशिपुर्दैत्यो बभूव बलवान्पुरा ॥ अवध्यः सर्वलोकानां त्रिषु लोकेषु विश्रुतः ॥ तस्य पुत्रो महातेजाः प्रल्हादो नाम वैष्णवः ॥ विष्णुभक्तिप्रसादेन तस्य राज्ये प्रतिष्ठितः॥ विरोचनस्तस्य तनयस्तस्माज्जातो बलिर्नृप ॥ बलिपुत्रस्तु बाणोभूत्तस्माजातस्तु शंबरः ॥ शंबरस्यान्वये जातः कंबुनामा महासुरः ॥ ज्ञात्वासौ केशवाद्घोरं महद्भयमुपस्थितं ॥ दानवानां विनाशाय नान्यो हेतुर्मतो मम॥इति मत्वा कुटुंबं स्वंत्यक्त्वा बंधुपरिग्रहं॥ स धूर्जटिधुनीं प्राप्य सन्मतिः संयतेंद्रियः॥चचार मौनमास्थाय तपः कंबुर्महामतिः ॥ अक्षसूत्रधरो ध्यानी दंडी मुंडी च मेखली ॥ स शाकपावकाहारो वल्कलाजिनसंवृतः ॥ स्नात्वा धृतिपरो नित्यं नर्मदातोयमाश्रितः ॥ अपूजयन्महादेवं वर्षाणामर्बुदं नृप ॥ ततस्तुतोष भगवान् देवदेवो महेश्वरः ॥ उवाच दानवं साक्षान्मेघगंभीरया गिरा ॥ भोकंबुक महाभाग तुष्टोहं तव सुव्रत ॥ इष्टं व्रतानां परमं मौनं सर्वार्थसाधनं ॥ चरितं तत्वया लोके वद दानवपुंगवं ॥ वरं वृणीष्व भद्रंते यत्ते मनसि रोचते ॥ कंबुरुवाच ॥ यदि प्रसन्नो देवेश यदि देयो वरो मम ॥ अक्षयश्चाव्ययो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूत्वा स्वेच्छया विचराम्यहं ॥ दैत्यदानवदेवानां संयुगेष्वपलायिनां ॥ भयं चान्यत्र विद्येतमुक्त्का देवं गदाधरं ॥ तस्यैव संयुगे वध्यो यथाहं नैव धूर्जटे ॥ भवामि नान्यस्य विभो ददस्व मम तं वरं ॥ महादेव उवाच ॥ मम संनिहितो यत्र त्वं भविष्यसि दानव ॥ तत्र विष्णुभयं नास्ति वसात्र विगतज्वरः ॥ तस्य देवाधिदेवस्य वेदगर्भस्य संयुगे ॥ शंखचक्रभृतः श्रेष्ठो नाहं सर्वे न वै सुराः ॥ किं पुनर्योद्धिषत्येनं लोकालोकप्रभुं हरिं ॥ स सुखी वर्तते कालं न निमेषमपीति वै ॥ तस्मात्सत्यपरो भूत्वा सर्वलोकहिते रतः ॥ द्रोहद्वेषोज्झितो दैत्य सर्वमैत्रोनुकंपकः ॥ वसिष्यसि चिरं कालमित्युक्त्कांतरधीयत ॥ गते चादर्शनं देवे तत्र तीर्थे स कंबुकः ॥ स्थापयामास देवेशं शिवं शांतमनामयं ॥ पूजयित्वा च विधिना शांतः शिवपुरं गतः ॥ तदा प्रभृति तत्पार्थ कंबुतीर्थं हि विश्रुतं ॥ सर्वलोकेषु राजेंद्र महापातकनाशनं ॥ कालेन कियता पार्थ लोके पापपरिप्लुते ॥ प्रछन्नमभवल्लिंगं तत्रैवेश्वरलीलया ॥ मार्कंडेय उवाच ॥ ततःकालेन बहुना मध्यदेशे नृपोत्तम ॥ दुर्भिक्षपीडिते लोके सौम्यकाष्ठानि वासिनि ॥ धर्मधीधैर्यवंतोपि पुरा केचिन्महर्षयः ॥ सपुत्रशिष्या भार्याभिःसहिता बहवः किल ॥ तीर्थात्तीर्थं प्रसर्पंतो दुष्कालपरिपीडिताः ॥ श्रुत्वा रेवातटे पुण्यमदुर्भिक्षमकश्मलं ॥ आगतास्तत्र राजेंद्र सकुटुंबाः सरिद्वरां ॥ स्नानध्यानजपार्च्याभिस्तेषां कालो न्यवर्तत ॥ एकदा बालकैस्तेषां क्रीडद्भिश्च कुमारकैः ॥ नर्मदापुलिने पुण्ये कंबुकान् शुक्तयस्तथा ॥ इतस्ततोपि संचीय द्रोणराशिः कृतस्तटे ॥ सतु देवालयाकारः पूजितश्चापि पल्लवैः ॥ केचिद्गायंति नृत्यंति रममाणास्तदाग्रतः ॥ततो निजाश्रमान्गंतुं कुमारास्ते प्रचक्रमुः ॥ विभज्य यावद्गृण्हंति तावद्ददृशुरद्भुतं॥तत्र शैवं महाल्लिंगमुद्गतं कंबुराशितः॥ततः स्वस्वपितॄणां ते ऋषीणां तन्न्यवेदयत् ॥ दृष्ट्वा च ऋषयो लिंगं कंबुमध्यगतं तदा॥परं विस्मयमापन्नाः पूजयामासुरादरात्॥स ऐव भगवान् रुद्रः सर्वव्यापी सनातनः॥प्रच्छन्नो यः पुरा काले स एवा विरभूत्तदा॥विश्वरूपेण भगवान् सवाहन गणायुधः॥यस्मादिह लयं यातस्तेन लिंगं निगद्यते॥कंबुराशिगतं यस्मादेतद्दै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिंगमुत्थितं॥कंबुकेश्वरसंज्ञं हि तदा काले चतैः कृतं॥कंबुकेश्वरमामंत्र्य पूजयिष्यंति ये शिवं॥अत्र तीर्थे फलं तेषां कंबुसंख्यं भविष्यति ॥अथ ते पूजयित्वा तं भक्त्या देवं महर्षयः॥श्रुत्वा सुभिक्षं स्वस्थाने प्रजग्मुर्दिशमुत्तरां॥एवं पार्थ परिख्यातं तीर्थं वै कंबुकेश्वरं॥ रेवाया उत्तरे कूले लोकानां वांछितार्थदं॥तत्र तीर्थे नरः स्नात्वा पूजयेत्कंबुकेश्वरं॥सर्वपापक्षयं प्राप्य लभते वांछितं फलं॥तर्पयित्वा पितॄन् भक्त्या श्राद्धं दत्वा यथाविधि कुरुते ह्यक्षयां तृप्तिं पितॄणां युगसंख्यया॥शंखेन स्नापयेद्देवं तत्र भक्त्या विशेषतः॥शंखं रेवाजलैः पूर्णं हेमदक्षणयान्वितं॥भक्त्या दद्याच्चदेवाय शिवाय द्विजहस्तकं॥द्विजभोजनसंयुक्तं दत्वा स्वर्गे महीयते॥कंबुतीर्थे द्विजः स्नात्वा विधिनाभ्यर्च्य शंकरं॥ऋग्यजुः सामविहितं पारायणमुदाहरेत्॥ सत्यलोकप्रदं पुण्यं तस्य प्राहुर्मनीषिणः॥ ऋग्युजुःसामवेदेषु सांगोपांगेषु यत्फलं तत्फलं समवाप्नोति गायत्रीमात्रमंत्रवित् ॥तत्र तीर्थे च यः स्नात्वा रुद्राध्यायं पठन् द्विजः ॥पूजयेद्देवमीशानं सोऽग्निष्टोमफलं लभेत्॥ अकामो वा सकामो वा तत्र तीर्थे निजं वपुः ॥ यस्त्यजेन्नात्र संदेहः स रुद्रपदमृच्छाति ॥ इति श्रीरेवामहात्म्ये कंबुकेश्वरतीर्थं नाम नवद्विशततमो ध्यायः ॥ १२९ ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ तीर्थं द्वि कंबुकेश्वरात् ॥ चंद्रप्रभासं विख्यातं पूजितं सर्वदैवतैः ॥ यत्र चंद्रेश्वरो देवः सर्वदैत्यहरो हरः ॥ युधिष्ठिर उवाच ॥ चंद्रेण किं कृतं तत्र प्रभासं केन चाभवत् ॥ एतदाख्याहि मे सर्वं तीर्थसंभवकारणं ॥ मार्कंडेय उवाच ॥ शृणु पार्थ पुरा वृत्तं कल्पादौ वै यथाभवत् ॥चंद्रोत्पत्तिस्त्रिधा पार्थ तां शृणुष्वा भवद्यथा ॥ आदौ बभूव वितते ब्रह्मणो यज्ञसाधने ॥ उत्पत्तिस्तत्र सोमस्य सोमाभिषवकर्मणि [१]॥ द्वितीये क्षीरजलधेश्चंद्रोभूदमृता ग्रजः॥स हि वृक्षौषधीनाथः ससोमः ससितांशुमान् ॥ अस्मिन्कल्पे समुत्पन्नस्तृतीये चंद्रमा नृप ॥ अत्रिनेत्रांतरे पार्थ स्वयं साक्षात्पितामहः ॥ अंशेन पांडवश्रेष्ठ कल्पे वाराहसंज्ञिके ॥

१ रणापूर.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा पूर्वस्तथैवासौ वपुषा महसा श्रिया ॥ सोपि चंद्रपदं प्राप्तः स्थाने पूर्वस्य पूज्यते ॥ आद्यश्चंद्रपदभ्रष्टः परिदीनस्त्रपान्वितः ॥
ओजस्तेजोद्वितीयेन कृतं चंद्रेण तस्य तु ॥ परिक्षीणकलः प्राप महीं मानुषवद्गतिः ॥ अवंतिपुरमासाद्य ततस्तेपे तपो महत् ॥
कालेन महता पार्थ महीं कालो महेश्वरः ॥ प्रसन्नः प्राह राजानं प्रसन्नोस्मि विधो वद ॥ किमिच्छसि महाभाग ब्रूहि तत्ते व-
दाम्यहं ॥ चंद्र उवाच ॥ विधुनानेन मे स्थानं समाक्रांतं महेश्वर ॥ क्षीणतेजाः पदभ्रष्टः पदमिच्छामि शाश्वतं ॥ स्थानोत्तम-
प्रदानेन दैन्यं हर सुरेश्वर ॥ ईश्वर उवाच ॥ यदीच्छसि पदं प्राप्तुं शाश्वतं पूर्वतोधिकं ॥ ततो नदीं मदीयां त्वं गच्छ वत्साशु
नर्मदां ॥ तत्र कोहनतीर्थस्य पार्श्वे तप्यस्व साधुधीः ॥ ध्रुवं धौतात्ममूर्तिश्चं शीघ्रं सिद्धिमवाप्स्यसि इत्युक्त्वा देवदेवेशस्तत्रैवांतर-
धीयत ॥ चंद्रोपि तद्वचो गृह्य शीघ्रमागान्महानदीं ॥ रेवां देवादिभिर्जुष्टां दैन्यविध्वंसनीं नृप ॥ कोहनेश्वरपूर्वेण तपस्तेपे स्थितो
विधुः ॥ दिव्यं संवत्सरं पार्थ ततस्तुष्टो महेश्वरः ॥ प्रत्यक्षः प्राह भगवान् प्रेमगर्भं तु पांडव ॥ ईश्वर उवाच ॥ परेण स्पर्द्ध-
मानस्य तव यत्पापमाश्रितं ॥ तस्य पापस्य नाशाय शन्या सरिदियं शुभा ॥ नर्मदा खलु पापानां चर्मदा साधुशर्मदा ॥ वि-
धो शुद्धोसि नियतं त्वमस्यादर्शनादपि ॥ पापनाशाय जंतूनां नद्यस्तीर्थानि सर्वतः ॥ प्राप्नुवंत्युत्तमं स्थानं रेवासेवापरा नराः ॥
स्थानमिच्छसि विद्धिंदो ध्रुवं चोत्तममंजसा ॥ कलाकलितकायस्त्वं प्रभापूरितसद्वपुः ॥ भव मे भूषणं भव्यं भाले बालेंदुसंस्थि-
तिः ॥ इत्युक्तः शंकरेणाशु चंद्रः स्नात्वा विधानतः ॥ स्थापयित्वा स गिरिशं प्रभापूरितमंडलः ॥ पूजयित्वा ततो भक्त्या स्वनाम्ना
धूर्जटिं विधुः ॥ पिनाकिनं तं प्रत्यक्षं ववंदे दंडवन्नुति ॥ चंद्र उवाच ॥ नमस्ते महादेव कृपया मे वचः कुरु ॥ यथामितिष्टि
तो विभो चिरमत्र स्थिरो भव ॥ लोकानामुपकाराय प्रसीद परमेश्वर ॥ मार्कंडेय उवाच ॥ एवमस्त्वित्यथोक्त्वा तं परिष्व-
ज्या वपीडितं ॥ ततो गृहीत्वा तं चंद्रं भर्गः स्वर्ग सुखप्रदः ॥ विशालभाले शिरसि जटामूले न्यवेशयत् ॥ विशालमपि तं बालं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधाय वपुषा भवः ॥ दंतिदंतनिभं पार्थ विशदद्विपदं विधुं ॥ एवं स्थानं स्थिरं दत्वा स्वशिरः शर्वरीपतेः ॥ गिरिं कैलासमगम-
ज्जरद्गवगतिः शिवः ॥ इत्यद्भुतं समभवत्ततःप्रभृति भारत ॥ तीर्थं तीर्थवरं यत्र प्रभाचंद्रस्य पूरिता ॥ चंद्रप्रभाससंज्ञं तु चंद्रेश्वर
शिवाश्रितं ॥ चंद्रदैन्यापहरणं स्थानोत्तमविधायकं ॥ मार्कंडेय उवाच ॥ कालांतरे तथैवायमत्रिनेत्रसमुद्भवः ॥ तत्र सिद्धिं पुरा
प्राप्तस्तच्छृणुष्व युधिष्ठिर ॥ पुरा शप्तस्तु दक्षेण यथाते कथितं मया ॥ असेवनाद्धिदाराणां क्षयरोगी भविष्यसि ॥ उद्वाहितानां
पत्नीनां येन कुर्वंति सेवनं ॥ या निष्ठा जायते तेषां तान् शृणुष्व नराधिप ॥ ऋतावृतौ हि नारीणां सेवनाज्जायते सुत: ॥
सुतात्स्वर्गश्च मोक्षश्च इत्येवं श्रुतिभाषितं ॥ ये न सेवंति तां मर्त्यास्तत्कालोक्तविधानतः ॥ तेषां ब्रह्महणं पापं जायते पापकर्म-
णां ॥ तेन पापेन रौद्रेण वेष्टितो रौरवं व्रजेत् ॥ तस्यास्तद्रुधिरं पापः पिबत्येव न संशयः ॥ ततोवतीर्णः कालेन यां यां योनिं
प्रयाति सः ॥ तस्यां तस्यां स दुष्टात्मा दुर्भगो जायते ध्रुवं ॥ परिभूता हि सा तत्र ध्यायतेन्यपतिं यदि ॥ स्वर्गस्था ये तु पि-
तर: पूर्वजास्तत्पितामहा: ॥ पतंति जातमात्रेण कुलहा तेन चोच्यते ॥ तत्पापेन च शापेन क्षयरोग्यभवच्छशी ॥ ततस्तीर्थान्यने-
कानि पुण्यान्यायतनानि च ॥ भ्रमन्वै नर्मदां प्राप्तः सर्वपापक्षयंकरीं ॥ क्रमादिहोत्तरे तीरे श्रुत्वा तीर्थमिदं शुभं ॥ तत्रोपवासान्दा-
नानि व्रतानि नियमांस्तथा ॥ चकार द्वादशाब्दानि पूजयन्वै महेश्वरं ॥ सर्वपापक्षयं प्राप्य प्रभासं स ततो ययौ ॥ यच्चैवार्क-
स्थलं नाम्ना प्रोच्यते परमार्थदं ॥ मार्कंडेय उवाच ॥ एवं विशेषविख्यातं ततः प्रभाति भारत ॥ तीर्थं चंद्रप्रभासाख्यं चंद्र-
भागाक्षयं तथा ॥ तथैव सोमतीर्थाख्यं सर्वसिद्धिप्रदं नृप ॥ चंद्रो लिंगत्रयं पार्थ स्नापयित्वा दिवं ततः ॥ जगाम प्रभया पूर्णः
पापशापोज्झितः स्वयं ॥ रेवोरिसंगमे मुख्यं भृगुक्षेत्रे तथा परं ॥ प्रभासे च तृतीयं वै वांछितार्थप्रदं परं ॥ एवं पार्थ मया ख्या-
तं तीर्थं पापप्रणाशनं ॥ सोमतीर्थे तु यः स्नात्वा पूजयेद्देवमीश्वरं ॥ भ्राजते स नरो लोके सोमवत्प्रियदर्शनः ॥ चंद्रभागे तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो गत्वा ग्रहणे चंद्रसूर्ययोः ॥ स्नानं समाचरेद्भक्त्या मुच्यते सर्वकिल्बिषैः ॥ तत्र स्नात्वा परं तिष्ठन् पश्यति ग्रहणं हि यः ॥ वाचिकं मानसं पापं कर्मजं यत्तु राजसं ॥ स्नानमात्रेण राजेंद्र तत्र तीर्थे प्रणश्यति ॥ वहवस्तन्न जानंति महामोहविमोहिताः ॥ देहस्थमिव देवेशं परमानंदरूपिणं ॥ पश्चिमे सागरे स्नात्वा सोमतीर्थे हि यत्फलं ॥ तत्फलं समवाप्नोति चंद्रभागे न संशयः ॥ संक्रांतौ च व्यतीपाते अयने विषुवे तथा ॥ चंद्रप्रभासे स्नात्वा हि सर्वपापैः प्रमुच्यते ॥ ते मूढास्ते दुराचारास्तेषां जन्म निरर्थकं ॥ चंद्रतीर्थं न जानंति रेवायां ये व्यवस्थितं ॥ चंद्रभागे नरो यस्तु संन्यासं कुरुते नृप ॥ अनिवर्तिका गतिस्तस्य सोमलोकान्न संशयः ॥ श्राद्धं दत्वा च यस्तत्र पितॄणां च तिलोदकं ॥ उद्धरेत्सपितॄन्पार्थ आत्मना सैकविंशकान् ॥ दीपं दद्याच्च देवाय स्वशक्त्या द्विजभोजनं ॥ इति ते कथितं पार्थ मया पापप्रणाशनं ॥ तीर्थं चंद्रप्रभं सौख्यं दैन्यदुर्गतिनाशनं ॥ इति रेवामहात्म्ये चंद्रप्रभासतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र तीर्थं वै कोहनेश्वरं ॥ चंद्रप्रभासतीर्थात्तु स्थितं क्रोशांतरे शुभं ॥ सर्वपापहरं पुण्यं तीर्थं मृत्युविनाशनं ॥ पुरा तत्र द्विजः कश्चिद्वेदवेदांगपारगः ॥ पत्नीपुत्रसुहृद्युक्तः स्वकर्मनिरतो भवत् ॥ युधिष्ठिर उवाच ॥ वर्णोत्पत्तिं वर्णधर्मान् श्रोतुमिच्छाम्यहं मुने ॥ ब्राह्मणस्य तु यत्कर्म उत्पत्तिः क्षत्रियस्य च ॥ वैश्यानां चापि शूद्राणां तत्सर्वं कथयस्व मे ॥ निखिलं ज्ञातुमिच्छामि स विप्रो भ्रातृभिः सह ॥ मुखात्तव मुनिश्रेष्ठ नान्यो वेत्ता मतिर्मम ॥ मार्कंडेय उवाच ॥ उत्पत्तिकारणं ब्रह्मा देवो देवादिरुच्यते ॥ प्रथमं सर्वभूतानां चराचरजगद्गुरुः ॥ ब्राह्मणास्तन्मुखाज्जाताः क्षत्रियास्तस्य बाहुतः ॥ तस्योरुदेशाद्वैश्याश्च पद्भ्यांशूद्राश्च जज्ञिरे ॥ ततस्त्वन्ये पृथग्वर्णाः पृथक्धर्माश्च भारत ॥ पर्यायेन समुत्पन्ना अनुलोमविलोमतः ॥ तेषां धर्मं प्रवक्ष्यामि श्रुतिस्मृत्यर्थनोदितं ॥ येन सम्यक् कृतेनेह सर्वे यांति परांगतिं ॥

१ तुलामेषौतेपि २ कांहांणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्यानं विनापि तन्निष्ठैर्ब्राह्मणैः प्राप्यते नृप ॥ गतिरध्ययनाद्दानात्ज्ञानादाचरतोन्वहं ॥ अधीत्य वेदान्छेदंवा सांगं प्रोक्तविधानतः ॥
कुलजां रूपसंपन्नां सर्वलक्षणलक्षितां ॥ उद्वाहयेत्ततः पत्नीं प्राप्यानुज्ञां गुरोर्नृप ॥ ततः स्मार्तं विवाहाग्निं श्रौतं वा पूजयेत्क्रमात् ॥
प्रतिग्रहधनो भूत्वा दंभलोभविवर्जितः ॥ पंचयज्ञविधानेन कुर्यान्नित्यमतंद्रितः ॥ वनंगच्छेत्ततः पश्चाद्द्वितीयाश्रमसेवनात् ॥ पुत्रेषु
भार्यां निक्षिप्य सर्वसंगविवर्जितः ॥ इष्टांल्लोकानवाप्नोति नचेहा जायते पुनः ॥ क्षत्रियः प्रस्थितो राज्ये पालयित्वा वसुंधरां॥ साधूं
न्रक्षन्निगृण्हंश्च दुष्टानाप्नोति सद्गतिं ॥ कृषिर्गोरक्षणं वैश्ये वाणिज्यं धर्मजीवनं ॥ सत्यशौचान्वितस्तद्वत्स्वर्गं गच्छत्यसंशयं ॥ न शू
द्रस्य पृथक्धर्मो विहितः परमेष्ठिना॥न मंत्रो न च संस्कारो न सद्विद्यानिषेवणं॥न शब्दविद्याश्रवणं न दीक्षा देवतार्चनं॥यथाजातेन
सततं वर्तितव्यमहर्निशं ॥ वर्णत्रयस्य सुश्रूषा तदादिष्टेनजीवनं॥ तथैवमितरेषां च प्रतिलोमानुलोमतः ॥ मंत्रैसंस्कारसंपन्नास्त्र-
योवर्णाः द्विजातय ॥ यः स्वधर्ममनादृत्य वर्तते कामचारतः॥ स मृतो जायतेऽस्याद्वै गतिमूर्द्ध्वां न गच्छति ॥ स्वधर्मान् चिंतय
न्नित्यं तेषां शास्त्रं विलोकयन् ॥ यशोभागी स्वधर्मस्य स्वर्गभागी च जायते ॥ एवं गुणसमायुक्तो वसन्विप्रः स भारत ॥ सद्वृतः
शास्त्रसंपन्नः श्रोत्रियः सर्वसंमतः ॥ जपध्यानरतो नित्यं देवतातिथिपूजकः ॥ स्वगृहे वै सुखासीनः शिवाराधनतत्परः ॥ एकदा
प्रथमे यामे निशायां तस्य भारत ॥ जातं शरीरे वैषम्यं अकस्मादंबरे ततः ॥ हनस्वेत्यसकृत्तेन श्रुता वागशरीरिणी ॥ ततो
निरीक्षते यावदधश्चोर्द्ध्वं दीशोदश ॥ वेपमानः स भीतात्मा तावद्दुराद्ददर्शह ॥ शृंखलापाशहस्तैश्च शूलहस्तैः सुदारुणैः ॥ वेष्टितं
महिषारुढं नरं सन्मुखमागतं ॥ कृष्णांजनचयप्रख्यं नीलांबरविभूषितं ॥ रक्ताक्षमायतभुजं यमलक्षणलक्षितं ॥ दृष्ट्वा तमेव
मायांतमातन्यात्मानमात्मना ॥ जजाप परमं जाप्यं शतरुद्रीयसंभवं ॥ ततः प्रोवाच पुरतो यमः संयमनो महान् ॥ शृणु
वाक्यमिह ब्रह्मन्यमोहं सर्वजंतुषु ॥ संहरस्व महाभाग रुद्रजाप्यं सुदुर्लभं ॥ वेत्तिनास्य विधानं हि विदुषामपि कश्चन ॥ अपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वागीशमुख्यानां त्वद्विधानं तु किं पुनः ॥ अस्मादुपरमं क्षिप्रं कालाक्रांतोसि पांडव ॥ येनाहं कालपाशैस्त्वां संयमामि गतव्यथः
॥ तच्छ्रुत्वा निष्ठुरं वाक्यं यमतुंडविनिर्गतं ॥ महाभयसमाक्रांतो ब्राह्मणः प्रपलायितः ॥ मृत्युंजयंजपन्नेव सिद्धमंत्रमुदारगीः ॥
तेनास्प्रष्टुं न शक्तास्ते तं विप्रं क्षिप्रगामिनं ॥ तस्य मार्गं गताः सर्वे यमेन सहकिंकराः ॥ तिष्ठतिष्ठेति विप्रं च ब्रुवाणा यज्वनांवरं
॥ एवं स विव्हलो विप्रो ददर्श पुरतो महत् ॥ उद्गतं शिवलिंगं तु भुवं भित्वाशु भारत ॥ त्वरमाणः परिश्रांतो हाहतोहमिति
ब्रुवन् ॥ ब्राह्मण उवाच ॥ रक्षरक्षमहादेव शरणागतवत्सल ॥ मृत्युंजयस्त्वमेवासि मृत्योर्मेनियमाग्रतः ॥ एवमुक्त्वा पतद्भूमौ लिं-
गमालिंग्य भारत ॥ गतसत्वः स विप्रेंद्रः संस्मरन्सुरसत्तमं ॥ दृष्ट्वालिंगितलिंगंतं भूमौ भक्तार्तिनाशनः ॥ कोहंतीति ब्रुवन् माभै
हुंकारमकरोत्तदा ॥ तेन ते किंकराः सर्वैयमेनसह भारत ॥ हुंकारेण गताः शीघ्रं मेघावातहता इव ॥ ततउत्थाप्य विप्रं तं शिवः
साक्षादुवाच ह ॥ महेश्वर उवाच ॥ जपतस्ते महामंत्रं गतं मृत्युकृतं भयं ॥ स्वधर्मनिरता दांताः कामक्रोधादिवर्जिताः ॥ विप्राःस्व
दारसंतुष्टास्ते न मृत्युवशाःक्वचित् ॥ अनभ्यासाद्धि वेदानां निषिद्धस्य च सेवनात् ॥ आलस्याज्जातदोषाच्च मृत्युर्विप्रान् जिघांसति ॥
एतानि यः परित्यज्य स्वधर्मनिरतो द्विजः ॥ रुद्राध्यायं जपेद्यस्तुतन्न मृत्युर्जिघांसति ॥ यदा त्वां मृत्युरागच्छेत्तदा मृत्युंजयं
जप ॥ दूरे मृत्युर्यमो वापि स्यान्मृत्युंजयजापि नः ॥ ब्राह्मण उवाच ॥ यस्य ब्रह्मकपालानि गतपिठे लुठंति हि ॥ तमा-
दिदेवं पुरुषं वंदे मृत्युंजयं शिवं ॥ चंद्रार्कौ यस्य नेत्रे च वन्हिर्भाल विलोचनं ॥ स्थिता यस्यादरे लोका वंदे मृत्युंजयं
शिवं ॥ उत्तमांगे स्थिता गंगा यज्जटामौलिमध्यतः॥ अनघं विश्वबीजं तं वंदे मृत्युंजयं शिवं ॥ अनादिनिधनं शांतमप्रतर्क्यमगोचरं
॥ सदसच्छाश्वतं वेद्यं वंदे मृत्युंजयं शिवं ॥ गुणातिगं च गुणिनं कर्मलेपविवर्जितं ॥ सौम्यासौम्यस्वरूपं तं वंदे मृत्युंजयं शिवं ॥
कालांतकयमादिनां कारणं क्रांतदर्शनं॥दशाष्टदोषमुक्तं तं वंदे मृत्युंजयं शिवं॥सर्वातिगं सर्वमयं सर्वेशं सर्वनाशनं॥सर्वाधारं विधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तारं वंदे मृत्युंजयं शिवं ॥ महीजलमरुद्वह्निवियत्सोमार्कदीक्षितैः ॥ रूपैरेभिरिहा लक्ष्यं वंदे मृत्युंजयं शिवं ॥ किंचिद्याचे जगन्नाथ यदि दासाय दीयते ॥ मृत्युंजयाष्टकेनेह मया त्वं देव संस्तुतः ॥ यस्त्वामनेन संस्तौति भक्त्या मृत्युभयापह ॥ तस्यापमृत्युर्दुःस्वप्नं दुर्निमित्तं च नश्यति॥ आकल्पं च त्वया स्थेयमिह लिंगेमहेश्वर ॥ कोहनेश्वरनाम्ना तु लोकानां हितकाम्यया ॥ ईश्वर उवाच ॥ एवं भवतु ते विप्र यथाभिलषितं शुभं ॥ पुत्रपौत्राभिवृद्धिश्च भविष्यति तवानघ ॥ अंते शिवपुरं प्राप्य गणस्त्वं मे भविष्यसि ॥ स्तोत्रेणानेन यो भक्त्या स्तोष्यते मां समाहितः ॥ तस्यापमृत्युर्दुःस्वप्नं दुरिष्टं नाशमेष्यति ॥ मार्कंडेय उवाच॥ इत्युक्ता देवदेवेशस्तत्रैवांतरधीयत ॥ ब्राह्मणश्च यथाकामं पूजयित्वा तु विस्मितः ॥ चरित्रं कोहनेशस्य ब्रुवन् लोके गृहं ययौ ॥ तदाप्रभृति तत्तीर्थं कोहनेशाभिशब्दितं ॥ सर्वपापहरं पुण्यं सर्वतीर्थेष्वनुत्तमं ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं ॥ अग्निष्टोमस्य यज्ञस्य स लभेत्पुण्यमुत्तमं ॥ तत्र तीर्थे तु यो राजन् प्राणत्यागं लभेत्क्वचित् ॥ न पश्यति यमं क्रूरमिति शंकरभाषितं ॥ अग्निप्रवेशं यः कुर्याज्जलेवा नृपसत्तम ॥ आग्नेयं वारुणं वापि लोकं प्राप्य महीयते ॥ इह लोकेवतीर्णः स महाधनपतिर्भवेत् ॥ तत्र तीर्थे द्विजः स्नात्वा पूजयित्वा महेश्वरं ॥ रुद्राध्यायं जपेद्यस्तु शतरुद्रियमित्यपि ॥ रुद्रसूक्तमथान्यद्वा मंत्रं वापि त्रियंबकं ॥ गायत्रीं वा नृपश्रेष्ठ समाहितमनाः शुचिः ॥ सचापमृत्युं जयति अंते रुद्रं च गच्छति ॥ तर्पयेद्यः पितॄंस्तत्र तिलमिश्रेण चांभसा ॥ तथा श्राद्धप्रदानेन जनयेत्तृप्तिमक्षयां ॥ पंचामृतेन संस्नाप्य गंधतोयैश्च शंकरं ॥ पुण्यैस्तीर्थजलैर्भक्त्या विधिपूर्वं युधिष्ठिर ॥ यथासंपन्नपुष्पैश्च पवित्रैः पूजयेच्छिवं ॥ घंटावादित्रनैवेद्यनीराजनफलार्घतः ॥ धूपदीपं नमस्कारस्तुतिभिर्गीतनर्तनैः ॥ एवमाराधयेद्यस्तु स्वभक्त्या कोहनेश्वरं ॥ यं यं काममभिध्यायेत्स तमाप्नोति निश्चितं ॥ अंते च मरणं प्राप्य शिवस्यानुचरो भवेत् ॥ इतिश्रीरेवामहात्म्ये कोहनेश्वरतीर्थनामत्रिंशच्छ ततमोध्यायः ॥ १३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्कंडेय उवाच ॥ ततः क्रोशांतरे गच्छेत्तीर्थमिंद्रेश्वरं शुभं ॥ नर्मदादक्षिणे कूले कपालेश्वरतीर्थतः ॥ युधिष्ठिर उवाच ॥ क
स्मादिंद्रस्तपस्तेपे नर्मदायां महामुने ॥ सर्वामराधिपो भूत्वा एतदिच्छामि वेदितुं ॥ एतच्छ्रुत्वा तु वचनं धर्मपुत्रस्य धीमतः ॥
कथयामास यद्वृत्तमितिहासं पुरातनं ॥ मार्कंडेय उवाच ॥ विश्वेशयित्वा सुचिरं धर्मसक्तं महाबलं ॥ वृत्रं हत्वा यथायातं ग-
च्छमानं शचीपतिं ॥ क्रममाणमथाग्रेण ब्रह्महत्या दुरासदा ॥ अहोरात्रमविश्रांता जगाम भुवनत्रयं ॥ वृत्रहाथ यतो याति दिव्ये
यानेन भारत ॥ दिशाभागं सुरैः सार्द्धं ततो हत्या न मुंचति ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ एतेशां निष्कृतिर्दृष्टा
न तु विश्वासघातिनां ॥ एतेषां तु मुखं दृष्ट्वा स्नानदानैर्विशुध्यति ॥ स्त्रियो वा पुरुषस्यापि न तु विश्वासघातिनां ॥ एवमादी-
नि वाक्यानि श्रुत्वा चान्यानि देवराट् ॥ अंतर्हितानां भूतानां विषादमगमत्परं ॥ त्यक्त्वा राज्यं सुरैः सार्धं निर्जगाम वनंप्रति ॥
पुत्रदारगृहं राज्यं वसूनि विविधानि च ॥ फलान्येतानि धर्मस्य शोभयंति नरेश्वरं ॥ फलं धर्मस्य भुंजंति सुहृत्स्वजनबांधवाः
॥ पश्यतां सर्वमेतेषां पापमेकेन भुज्यते ॥ एवं शक्रः सुखं त्यक्त्वा कर्षयन्स्वं कलेवरं ॥ एकाकी स जगामाशु तीर्थान्यायतनानि
च॥गंगादि सर्वतीर्थेषु समुद्रेषु सरित्सु च ॥ ह्रदेषु देवखातेषु तडागेषु सरित्सु च ॥ पापान्न मुच्यते यस्मात्ततो रेवामुपागतः ॥
रेवाप्रभवतीर्थेषु कूलयोरुभयोरपि ॥ प्रपूजयन्महादेवं स्कंदतीर्थं व्यतिक्रमत् ॥ तत्र स्थितोपवासैश्च कृच्छ्रचांद्रायणादिभिः ॥ कर्ष-
यन्वै स्वकं देहं न किंचिच्छर्म लब्धवान् ॥ ग्रीष्मे पंचाग्निमध्यस्थो वर्षासु स्थंडिलेशयः॥आर्द्रवासास्तु हेमंते चचार विपुलं तपः
॥ एवं तपस्यतस्तस्य शक्रस्य विदितात्मनः ॥ वत्सराणां सहस्राणि गतानि दश भारत ॥ ततस्त्वेकादशे प्राप्ते वर्षाणां नृपस-
तम ॥ सहस्रे भगवान् रुद्रस्तुतोष परमेश्वरः ॥ तथा ब्रह्मर्षयः सिद्धा ब्रह्मविष्णुपुरोगमाः ॥ तत्र जग्मुः सुराः सर्वे यत्र देवः
शतक्रतुः ॥ दृष्ट्वा समागतान्देवानृषींश्चैव महामतिः ॥ उवाच प्रणतो भूत्वा सर्वदेवपुरोहितः ॥ बृहस्पति रुवाच ॥ सर्वेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदितं तद्वो यथावृत्रवधः कृतः ॥ युष्माकं चाज्ञया ब्रह्मन् शिव विष्णो यथा पुरा ॥ तथाप्येनं वृत्रहणं मत्वा पापस्य कारणं ॥
भ्रमंतं सर्वतीर्थेषु ब्रह्महत्या न मुंचति ॥ न नंदति विना ह्येनं त्रैलोक्यं सचराचरं ॥ अचंद्रार्कं यथा विश्वं तथा राज्यमनायकं
॥ तस्मात्सर्वे सुरश्रेष्ठा विज्ञप्तमवधार्य मे ॥ कुर्वंतु शक्रं निर्दोषं तथा सर्वे महर्षयः ॥ बृहस्पतिमुखोद्गीतं श्रुत्वा तद्वचनं शुभं ॥
ततः प्रोवाच भगवान् ब्रह्मलोकपितामहः ॥ ब्रह्मो उवाच ॥ एतत्पापं महाघोरं ब्रह्महत्यासमुद्भवं ॥ संविभज्याथ भूतेषु चतु-
र्द्धा विक्षिपाम्यहं ॥ भवतां वचनात् श्रेष्ठाः संप्रत्येव सुरर्षयः ॥ एवमुक्त्वाक्षिपच्चैकं भागं ब्रह्मा जलोपरि ॥ अवगाह्य ततः पेया
आपो वै नान्यथा बुधैः ॥ भागं चाप्यक्षिपद्भूम्यां द्वितीयं पद्मसंभवः ॥ ततोभ्युक्ष्यानुलेप्या च सदा पार्थ वसुंधरा ॥ भागं तृती-
यं नारीणां रजस्याहितवान्विभुः ॥ अस्पृश्या चाप्यसंभाष्या तेन जाता रजस्वला ॥ चतुर्दिनानि सा प्राज्ञैः पापस्य महतो
भयात् ॥ द्विदिनं चाप्यसंभाष्या अस्पृश्या त्रिदिनं तथा ॥ पितृदेवादिकार्येषु वर्जयंतां चतुर्दिनं ॥ पंचमो पितृदेवानां सर्वका-
र्याणि चार्हति ॥ चतुर्थं स ततो भागं विभज्य परमेश्वरः ॥ कृषिवाणिज्यगोरक्ष शूद्रसेवाकरे द्विजे ॥ ततो विना पदं श्राद्धैस्तत्क-
र्मावर्जितो द्विजः ॥ एवं विभक्तभागं तं विमुक्तं ब्रह्महत्यया ॥ ततोभिनंदयामासुः सर्वे देवा महर्षयः ॥ देवेंद्रं वाग्भिरिष्टाभिर्न-
र्मदातीरमध्यगं ॥ वरेण छंदयामास ततस्तुष्टो महेश्वरः ॥ दास्यामि तव देवेंद्र वरं वृणु यथेप्सितं ॥ शक्र उवाच ॥ यदि तु-
ष्टोसि देवेश यदि देयो वरो मम ॥ अत्र त्वां स्थापयिष्यामि सदा संनिहितो भव ॥ पापं मे प्रशमं यातु जयोस्तु मम सर्वदा ॥
महाख्यया महादेव लोकानां वरदो भव ॥ मार्कंडेय उवाच ॥ एवमस्त्विति तं चोक्त्वा ब्रह्मविष्णुमहेश्वराः ॥ सेंद्रास्ते जग्मुरा-
काशे स्तुयमाना महर्षिभिः ॥ एवं तत्र तदापार्थदेवराजः शतक्रतुः ॥ स्थापयित्वा महेशानं जगाम त्रिदशालयं ॥ ततः प्रभृति
विख्यातं तीर्थमिंद्रेश्वरं शुभं ॥ ब्रह्महत्याहरं पार्थ सर्वदेवैस्तु पूजितं ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ महापा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तकयुक्तोपि मुच्यते सर्वं किल्बिषैः ॥ श्राद्धं कुर्याच्च यस्तत्र पितृणां भक्तिसंयुतः ॥ यावदिंद्रांतरं राजन् पितृणां तृप्तिरक्षया ॥
ब्राह्मणान् भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणां ॥ पादुकोपानहौ छत्रं वस्त्रं दद्याच्च कांचनं ॥ एतत्ते कथितं पार्थ यत्पृष्टोहं त्व-
या पुरा ॥ तीर्थमहात्म्यमतुलं श्रुत्वा पापैः प्रमुच्यते ॥ इति श्रीनर्मदामहात्म्ये इंद्रेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छे-
त राजेंद्र वालुकेश्वरमुत्तमं ॥ तीर्थादिंद्रेश्वरात्तद्वै स्थितं क्रोशत्रयांतरे ॥ गत्वा गोदावरीयात्रां पुनराव्रजता किल ॥ द्वितीयं स्था-
पितं लिंग ह्येतद्वै वालुकामयं ॥ स्थित्वा मासद्वयं तत्र जिताहारेण भारत ॥ एकं मया पुरा यत्तो प्रोक्तं लिंगं प्रतिष्ठितं ॥ द्वि-
तीयमेतत्तेनात्र निर्मितं वालुकाद्वयं ॥ विनोदादिव राजेंद्र तपसा पापनाशनं ॥ स्थित्वा मासद्वयं तत्र प्रतिष्ठाप्य महेश्वरं ॥
वालुकेश्वरसंज्ञं तं प्रस्थाप्याभ्यर्च्य शंकरं ॥ ततो जगाम स मुनिः सशिष्यः स्वं तपोवनं ॥ ततः प्रभृति विख्यातं तीर्थं वै वा-
लुकेश्वरं ॥ लिंगं प्रतिष्ठितं यस्मादंजसा वालुकामयं ॥ वाल्मीकिस्थापितं पुण्यं सर्वपापहरं नृप ॥ तत्र स्नात्वा च संतर्प्य पि-
तॄन्देवांस्तिलोदकैः ॥ श्राद्धं कुर्यान्महाराज पितृणां तृप्तिकाम्यया ॥ संपूजयेत्ततो देवं विधिना वालुकेश्वरं ॥ रात्रौ जागरणं कृ-
त्वा उपवासपरो नरः ॥ धूपदीपार्चनैर्नैवेद्यैस्तुतिनीराजनादिभिः ॥ गीतनृत्यविनोदैश्च तोषयेद्यो महेश्वरं ॥ स वसेच्छांकरपुरे वर्षा-
णामयुतं नृप ॥ अष्टम्यां च चतुर्दश्यां भानुवारेथ भारत ॥ तत्र तीर्थेनरो यस्तु ब्राह्मणान् भोजयेन्नृप ॥ एकेन भोजितेनात्र
भोजितं त्वयुतं भवेत् ॥ इति श्रीरेवामहात्म्ये वालुकेश्वरतीर्थं ॥ मार्कंडेय उ० ॥ ततः क्रोशांतरे पार्थ देवतीर्थमनुत्तमं ॥ यत्र केशवमु-
ख्यैस्तु देवैः संस्थापितः शिवः ॥ दिक्पालैर्लोकपालैश्च पुराशक्रे सकिल्बिषे ॥ जयार्थमिंद्रस्य तदा तत्र संस्थाप्य शंकरं ॥ पू-
जयामासुरव्यग्राः सर्वे देवाः सकेशवाः ॥ ततः शुद्धे तदा चेंद्रे अभिषिक्ते सुरर्षिभिः ॥ प्रजग्मुः शक्रसहिताः शक्रलोकं त मो-

१ बेलुगांम २ वढवणुगांम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसवाः ॥ ततः प्रभृति विख्यातं तीर्थं देवेश्वरं नृप ॥ देवैः प्रतिष्ठितं यस्माद्भुक्तिमुक्तिप्रदं परं ॥ तत्र स्नात्वा तथा दत्वा पितॄणां च तिलोदकं ॥ श्राद्धं दत्वा विधानेन पितृणां तृप्तिरक्षया ॥ जायते युगमेकं हि पुरा देवैरुदीरितं ॥ पूजयेद्देवमीशानं भक्त्या शक्त्या च भारत ॥ स वसेच्छिवलोके वै दिव्यं वर्षशतं नृप ॥ दीपदानं च देवाय दद्यादुरितनाशनं ॥ ब्राह्मणान् भोजयेच्छक्त्या सर्वपापैः प्रमुच्यते ॥ इति श्रीनर्मदामहात्म्ये देवेशतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे राजन् शक्रतीर्थं व्रजेच्छुभं ॥ शक्रेण स्थापितं पुण्यं पुरा जंभवधेच्छया ॥ युधिष्ठिर उवाच ॥ कोसौ जंभइति ख्यातो यस्त्वयोक्तो महामुने ॥ कस्य वंशे स समुत्पन्नो दैत्यो वा दानवो सुरः ॥ विस्मयात् ज्ञातुमिच्छामि यस्य यद्वै विचेष्टितं ॥ मार्कंडेय उवाच ॥ ब्रह्मवंशसमुद्भूतः कश्यपस्य कुले महान् ॥ जंभो नाम महादैत्यस्तपस्तेपे पुरा महत् ॥ षष्टिवर्षसहस्राणि दिव्यानि किल भारत ॥ ततः प्रसन्नो भगवान् ब्रह्मा लोकपितामहः ॥ प्रददौ वांछितं तस्य तच्छृणुष्व नराधिप ॥ विजयं सर्वदेवानां दैत्यदानवरक्षसां ॥ बलं तथा तु तं शौर्यं गतेरस्खलनं तथा ॥ एवमादीन्वरान्प्राप बहूनब्जाच्च वेधसः ॥ ततः सर्वत्र विजयं कृतवानुल्बणोसुरः ॥ समासेनैव ते वच्मि किं तस्य बहुविस्तरैः ॥ देवलोकांश्च बहुशो जित्वा शक्रपुरं गतः ॥ शक्रेण सह सप्ताहं संग्रामो वैबभूवह ॥ दिव्यं नृपतिशार्दूल ततः शक्रः पराजितः ॥ जंभेन तेन शक्रस्य राज्यांगं सर्वमाहृतं ॥ शची करिवरं छत्रं हयरत्नं तथासनं ॥ एवं तेनासुरेणादौ जिता दैत्याश्च दानवाः ॥ यक्षरक्षांसि राजेंद्र मर्त्यभूपेषु किं पुनः ॥ तदा शक्रः स्वयं प्राप्य रेवां विदितवैभवां ॥ तपश्चचार विपुलं जंभदैत्यक्षयाय तु ॥ कालेन महता तस्य प्रसन्नः प्राह शंकरः ॥ प्रसन्नस्तपसा शक्र ब्रूहि यत्तेभिवांछितं ॥ शक्र उवाच ॥ नमस्तेस्तु महादेव पराभूतोस्मि वैरिणा ॥ जंभदैत्येन मे राज्यं हृतं सर्वांगसंयुतं ॥ जगदुद्वेजितं तेन सदेवासुरमानुषं ॥ यदि तुष्टोसि मे देव यदि देयो वरो मम ॥ जंभासुरवधार्थाय वरं देहि महेश्वर ॥ ईश्वर उवाच ॥ एवमस्तु सुरश्रेष्ठ य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

था वै प्रार्थितं त्वया ॥ अदीर्घेनैव कालेन जंभदैत्यं वधिष्यसि ॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत ॥ ततः शक्रोपि संस्थाप्य महेश्वरमुदारधीः ॥ स्वनाम्ना पूजयित्वा च निजं धाम जगाम सः ॥ जंभासुरवधे यत्नं चकाराथ सुरैर्वृतः ॥ एवं तीर्थं परिख्यातं तदा प्रभृति भारत ॥ शक्रेश्वराह्वयं पुण्यं पापघ्नं विजयावहं ॥ तत्र स्नात्वा नरो भक्त्या श्राद्धं कुर्याद्विधानतः ॥ पितरस्तृप्तिमायांति प्रददंति समीहितं ॥ स्नात्वा यः पूजयेद्देवं विधिना नृपसत्तम ॥ तस्य भर्गपुरे वासः संवत्सरशतानि षट् ॥ दीपं दत्वा च देवाय द्वियोगं नाप्नुयात्कचित् ॥ सन्मार्जनीं धूपपात्रं ध्वजं घंटां च भारत ॥ कलशं चापि देवाय दद्याच्च द्विजभोजनं ॥ इति श्रीरेवामहात्म्ये शक्रेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो क्रोशांतरे पार्थ नागतीर्थमनुत्तमं ॥ शक्रेश्वराद्यत्र सिद्धानागाः शापात्तु मातृजात् ॥ युधिष्ठिर उवाच ॥ महाभयानां लोकस्य नागानां मुनिसत्तम ॥ किं भयं कुत आयातं येन ते तपसि स्थिताः ॥ मम संतापजं दुःखं दुर्योधनसमुद्भवं ॥ तव वाक्यामृतैः स्नातः प्लावितं निर्वृतिं गतं ॥ श्रुता तव मुखोद्गीर्णा कथेयं पापनाशनी ॥ भूयो भूयस्मृतिर्जाता श्रवणे मम सुव्रत ॥ न क्लेशितुं मुनिं युक्तं अजात् न ज्ञायते फलं ॥ विद्यादानस्य महतः श्रावितस्य श्रुतस्य च ॥ फलमीशो विजानाति भवान्वा मुनिसत्तम ॥ एवं ज्ञात्वा यथान्यायं यः प्रश्नः पृच्छितो मया ॥ तं मे वद द्विजश्रेष्ठ दयां कृत्वा ममोपरि ॥ मार्कंडेय उवाच ॥ यथा यथा त्वं नृपराज भाषसे तथा तथा मे सुखमेति भारती ॥ वैकल्यभावाज्जरयान्वितस्य त्वत्सौहृदं नश्यति नैव तात ॥ कथयामि यथावृत्तमितिहासं पुरातनं ॥ यथापूर्वतरं वैरं पारंपर्येण भारत ॥ द्वे भार्ये कश्यपस्यास्तां सर्वलोकेष्वनुत्तमं ॥ गरुत्ममाता विनता सर्पाणां कद्रुरुत्तमा ॥ अश्वस्य दर्शनं तासां कतिरूपं व्यवस्थितं ॥ प्रभातकाले राजेंद्र भास्कराकारवर्चसं ॥ तद्रूपं विनतादृष्ट्वा तुरगं सर्वपांडुरं ॥ उवाच कद्रुं सापत्न्यात् पश्येमं पश्य शोभने ॥ उच्चैश्रवसमन्यं वा तुरगं सर्वपांडुरं ॥ तं दृष्ट्वा श्वेतवर्णं तु सापत्न्यात्क्रोधमूर्छिता ॥ कृष्णवर्णं प्रजल्पाशु कद्रुर्विनतया सह ॥ क-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

द्रुरुवाच ॥ विमते चानृता लोके नृशंसा कुलपांसनि ॥ कृष्णवर्णंवृथाब्रूषे ध्रुवं नरकगामिनी ॥ विनता उवाच ॥ सत्यानृते
तु वचने पणोयंम भामिनि ॥ सहस्त्रं वत्सरान्दासी भवेयं तव वेश्मनि ॥ तथेति ते प्रतिज्ञाय गते रात्रौ स्वकं गृहं ॥ कद्रुर्विः
नतया सार्द्धं यद्वृतं प्रमदालये ॥ बंधुवर्गस्य गत्वा सा कथयामास तं पणं ॥ तत् श्रुत्वा बांधवाः सेर्वे कद्रुपुत्रास्तथैव च ॥ न
मन्यंते हित कार्यकृतं मातर्विगर्हितं ॥ अकृष्णः कृष्णतां याति कथं श्वेतो हयोत्तमः ॥ सर्वोप्येनं विजानाति शक्राश्वं वर्णतः
सितं ॥ दासत्वं प्राप्स्यसे त्वं हि पणेनानेन सुव्रते ॥ कद्रुरुवाच ॥ न भवेयं यथा दासी तथा नीतिर्विधीयतां ॥ विशध्वं रो-
मकूपेषु तस्याश्वस्येति मे मतिः ॥ क्षणमात्रं कृते कार्ये सा दासी जायते समा ॥ स्वस्थास्तथोरगाः सर्वे रमिष्यथ यथासुखं ॥
सर्पाऊचुः ॥ यथा त्वं जननि मातः पन्नगानां मता भुवि ॥ तथा साप्यविशेषेण वंचितव्या न कर्हिचित् ॥ कद्रुरुवाच ॥ म-
म वाक्यमकुर्वाणा ये केचिद्भुवि पन्नगाः ॥ हव्यवाहमुखे सर्वे ते यास्यंत्यविचारितं ॥ एतच्छ्रुत्वा तु वचनं घोरं मातृमुखो द्गतं ॥
केचित्प्रविष्टा रोमेषु तथान्ये तपसि स्थिताः ॥ देशं दुद्रुवुः केचित्केचिज्जलधिमाश्रिताः ॥ गिरिकंदरगाः केचित्तरुकोटरगाः परे ॥
मातृशापप्रदग्धास्ते हव्यवाहेन वै ततः ॥ नर्मदांभसि संस्नाता तपस्तेपुश्च तत्रये ॥ तेषां वर्ष सहस्रांते तुतोष परमेश्वरः ॥ महा-
देवो जगद्धाता प्रोवाच परया गिरा ॥ ईश्वरोवाच ॥ भोपन्नगा निर्वर्त्तध्वं तपसोस्य महाफलं ॥ यदिच्छथ ददाम्यद्य नात्र कार्या
विचारगा ॥ पन्नगाऊचुः ॥ मातृशापभयाद्भीता देवदेव महेश्वर ॥ तव पार्श्वेवसान्नित्यं सर्वेषां भयरक्षकः ॥ ईश्वर उवाच ॥
अन्येषामपि सर्पाणां ये मदाराधनेरताः ॥ तेषामपि समस्तानां भयं नास्ति ममाज्ञया ॥ वासुकिर्वल्लभो मह्यं गलभूमे कृतो म-
या ॥ वासुकिं शरणं गत्वा भयं वो नास्ति पन्नगाः ॥ कल्पांतस्थायिनो नागा ये केचित्कुलमूर्धगाः ॥ वासुकिः कंठपीठो मे
महाकल्पं वसिष्यति ॥ आप्लुता नर्मदातोये भुजगा रक्षिता मया ॥ नास्तिसर्पभयं तेषां वसध्वं यत्र वांछयः ॥ कद्रुशापभया-

न्मृत्युर्नास्ति दत्ते वरे मया ॥ एवं दत्वा वरं तेषां देवदेवो महेश्वरः ॥ जगामाकाशमाविश्य कैलासं धरणीधरं ॥ गते चादर्शनं देवे धनंजयमुखा नृप ॥ स्थापयित्वा ययुः शीघ्रं देवदेवं महेश्वरं ॥ तत्र तीर्थे तु यः कश्चित्पंचम्यामर्चयेच्छिवं ॥ तस्य नागकुलाद्भयं नहि संतिकदाचन ॥ मृतःकालेन महता तत्र तीर्थे नराधिप ॥ शिवस्यानुचरो भूत्वा वसते कालमीप्सितं ॥ नागेशं नर्मदातीरे नित्यं यः स्नापयेच्छुचिः ॥ दधिक्षीरेण मधुना घृतशर्करया समं ॥ योषिद्वा पुरुषो वापि पुत्रपौत्रान्स विंदति ॥ तत्र स्नात्वा च यो भक्त्या तर्पयेत्पितृदेवताः ॥ पिंडदानेन च तथा पितॄणां प्रीतिमावहेत् ॥ इति श्रीरेवामाहात्म्ये नागेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र गौतमेश्वरमुत्तमं ॥ शप्तां भार्यां पुराहिल्यां तपः सक्तां निरीक्षितुं ॥ तत्रायातेन मुनिना गौतमेन प्रतिष्ठितं ॥ स्वयं रेवांभसि स्नात्वा स्थापितं लिंगमुत्तमं ॥ स्वनाम्ना परमेशानं पूजयित्वा विधानतः ॥ प्राप्तस्तत्र निजां भार्यां तपः शुद्धां युधिष्ठिर ॥ तत्र तीर्थे नरः स्नात्वा श्राद्धं कुर्यात्समाहितः ॥ ब्राह्मणान् भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणां ॥ गौतमेशं समभ्यर्च्य सर्वपापैः प्रमुच्यते ॥ दीपं दद्याच्च देवाय न रोगैः परिभूयते ॥ इति गौतमेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र अहिल्येश्वरमुत्तमं ॥ यत्र शुद्धा मुनेर्भार्या अहिल्या तपसा किल ॥ क्रोशांतरे नागतीर्थादहिल्यातीर्थमुच्यते ॥ गौतमस्य तु सा पत्नी अहिल्यानाम विश्रुता ॥ तस्या मनोहरं रूपं वीक्ष्य देवः शतक्रतुः ॥ मोहितो लोभयामास अहिल्यां बलसूदनः ॥ इंद्र उवाच ॥ मां भजस्व वरारोहे देवराजमनिंदिते ॥ किं करिष्यसि विप्रेण शौचाचारकृतेन तु ॥ तपः स्वाध्यायशीलेन क्लिश्यति तापसी यथा ॥ एवमुक्ता वरारोहा स्त्रीस्वभावात्तु चंचला ॥ मनसा चिंतयच्छक्रं कामेन कलुषीकृता ॥ विदित्वा तां च तद्भावां स देवः पाकशासनः ॥ गौतमं वंचयामास दुष्टभावेन भावितः ॥ विदित्वा चांतरं तस्य गतस्य वनमुत्तमं ॥ अहि

१ मालेद.

CC-0. In Public Domain. Digitization by eGangotri

वैः पूजयित्वा प्रवाहमविशत्स्वकं ॥ तदा प्रभृति विख्यातं तीर्थमेतद्युधिष्ठिर ॥ नर्मदेश्वरसंज्ञं तु सर्वपापक्षयंकरं ॥ तत्र तीर्थे नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ अन्नावनाशके तोये यदि मृत्युं लभेन्नरः ॥ महेशवचनात्तस्य गतिः स्यादनिवर्तिका ॥ स्नानं श्राद्धं जपं पूजां शक्त्या च द्विजभोजनं ॥ दत्वा पार्थ नरः पापाद्विमुक्तः स्वर्गमाप्नुयात् ॥ इति श्रीनर्मदामहात्म्ये नर्मदेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेच्च राजेंद्र कपर्दीश्वरसंज्ञितं ॥ क्रोशार्द्धे नर्मदेशात्तु सर्वविघ्नविनाशनं ॥ स्थापितं विघ्नराजेन शिवानुग्रहकांक्षया ॥ पुरा पुरत्रयं दग्धं प्रार्थितेन पुरारिणा ॥ गणेशस्तत्र चागत्य तपस्तताप महन्नृप ॥ तोषयित्वा महेशानं सिद्धिं प्राप्य तथाखिलां ॥ स्थापयित्वा महेशानं कपर्दीश्वरसंज्ञितं ॥ पुरविध्वंसने[1] पश्चात्पुरारेरग्रतोभवत् ॥ ततः प्रभृति विख्यातं कपर्दीश्वरमुत्तमं ॥ तत्र तीर्थे तु यः स्नात्वा चतुर्थ्यां समुपोषितः ॥ पूजयेद्देवमीशानं मोदकांश्च निवेदयेत् ॥ धूपदीपसमायुक्तान् भक्त्या च द्विजभोजनं ॥ न विघ्नं जायते तस्य सप्तजन्मनि भारत ॥ तत्र तीर्थे च यत्किंचिद्दीयते नृपसत्तम ॥ तदक्षयफलं सर्वं प्रतिजन्म भवेन्नृप ॥ इतिश्रीकपर्दीश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो यायान्महाराज तीर्थं वै सागरेश्वरं ॥ तत्र तप्तं तपः पूर्वं सागरेण युधिष्ठिर ॥ युधिष्ठिर उवाच ॥ सागरः[2] कथमायातः कस्मात्तप्तं तपो मुने ॥ एष मे विषयोतीव तच्चरित्रंवदाखिलं ॥ मार्कंडेय उवाच ॥ द्वारकायां पुरा राजन् मुनिसिद्धसमागमे ॥ वदतां तीर्थमहात्म्यं कोरिल्लापुरसंभवं ॥ रेवाया उत्तरे कूले देवसिद्धर्षिसंस्तुतं ॥ श्रुतवान्सागरस्तत्र विस्मयं परमं ययौ ॥ अगण्यपुण्यदा यत्र नर्मदैव निरंतरं ॥ तीर्थं तदुत्तरे तीरे कोरिल्लापुरसंज्ञितं ॥ नरः काशीनिवासी हि यथामोक्षपथानुगः ॥ तथेह गुप्तकाश्यां च कोरिल्लायां विमुक्तिभाक् ॥ पुर्यो यथेह विख्याता अयोध्याद्यास्तु मुक्तिदाः ॥ सप्तापि वाच्छितद्वम्मुक्तिदा कोरिल्लाष्टमी ॥ इत्यादि सागरः श्रुत्वा महिमानं युधिष्ठिर ॥ विस्मयादु-

१ (त्रिपुरनगरदाहे) २ (सायेर)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सुको द्रष्टुं तीर्थं तद्विघविश्रुतं ॥ लिंगिवेषं समास्थाय संप्राप्तः कोरिलां पुरीं ॥ पुरंदरादिभिर्देवैस्त्रयस्त्रिंशाद्भिराश्रितां ॥ सानुगैः
सिद्धसंघैश्च ऋषिभिः परिसेवितां ॥ दिनानिकतिचित्तत्र तीर्थे वै सर्वतोभ्रमन् ॥ पृच्छते प्रत्यहं तीर्थं पृष्टा चापि निनिंद सः ॥
हीयते वैयथा तस्य माहात्म्यं वै पुरस्य हि ॥ तथानृतेन संयुक्तः सागरः पुरमुत्तमं ॥ कोरिलाख्यं सुतीर्थं तत्तीर्थश्रितसुरादिकान् ॥
मुनिसिद्धांश्च राजेंद्र निनिंदन्स्खलितं यदा ॥ तदा सिद्धर्षिभिर्देवैर्विमृश्याकूतकारणं ॥ दैत्योयमिति पापोयं विधर्मनिरस्ततथा ॥
इत्येवं वादिभिः सर्वैः पुरान्निष्कासितोहृतं ॥ ततः संज्ञापयामास सागरस्तेषु भारत ॥ तथापिनप्रवेशस्तैर्दत्तस्तस्य दुराशयात् ॥
चित्तमंतर्गतंदुष्टंतीर्थस्नानेनशुध्यति ॥ शतशोपि जले धौतं सुराभांडमिवाशुचिः ॥ ततः स सागरः स्थित्वा क्षुवे क्रोशांतरे पुरात् ॥
तपश्चचार विपुलं तोषयन्परमेश्वरं ॥ ततस्तुष्टे जगन्नाथे प्राप्य तीर्थफलं महत् ॥ स्थापयित्वा महेशानं जगाम स्वं निवेशनं ॥
ततः प्रभृति विख्यातं तीर्थमेतद्युधिष्ठिर ॥ सागरेश्वरनाम्ना वै सर्वपापक्षयंकरं ॥ कपर्दीश्वरतीर्थात्तु स्थितं क्रोशार्द्धमात्रतः ॥ किंचि-
ज्ञाप्यधिके पुण्यं महेशाधिष्ठितं नृप ॥ तत्र स्नात्वा च संतर्प्य पितॄन् भक्त्या नृपोत्तम ॥ श्राद्धं दत्वा विधानेन पूजयेत्सागरेश्वरं
॥ इति कृत्वा नरः पार्थ पापसंघाद्विमुच्यते ॥ पुरंदरपुरं याति शिवलोकं च शाश्वतं ॥ इति श्रीसागरेश्वरतीर्थं ॥ मार्कंडेय उवा-
च ॥ ततः क्रोशांतरे पार्थ रवितीर्थमनुत्तमं ॥ यत्र देवः सहस्रांशुस्तपस्तप्त्वा दिवं गतः ॥ युधिष्ठिर उवाच ॥ कथं देवो ज
गद्धाता सर्वदेवनमस्कृतः ॥ तपो तप्यत्तच्छीमूर्तिस्तपनो भास्करो मुने ॥ आराध्यः सर्वभूतानां सर्वदेवादिपूजितः ॥ दृश्यः प्र-
त्यक्षदेवो सौ सृष्टिसंहारकारकः ॥ आदित्यत्वं कथं प्राप्तः कथं भास्कर उच्यते ॥ एतत्सर्वं समासेन कथयस्व ममानघ ॥ मार्कं-
डेय उवाच ॥ महाप्रश्नो महाभाग यस्त्वया परिपृच्छितः ॥ तत्सर्वं संप्रवक्ष्यामि नमस्कृत्य स्वयंभुवे ॥ आसीदिदं तमोभूतम-
प्रज्ञातमलक्षणं ॥ अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वशः ॥ ततस्तेजः परं दिव्यं तप्तपिंडनिभं शुभं ॥ आकाशात्तु यथैवोल्का सृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एहितोरधोमुखी ॥ तेजोमध्ये च पुरुषः संजातो विश्वभूषणः ॥ सशिरःपाणिपादश्च तेन सर्वमिदं ततं ॥ तस्योत्पन्नस्य भूतस्य
तेजोरूपस्य भारत ॥ पश्चात्प्रजापतिर्भूयः काले कालांतरेण वै ॥ अग्रे जातः सभूतानां समुरासुररक्षसां ॥ सर्वदेवादिदेवोयमा-
दित्यस्तेन वोच्यते ॥ आदौ तस्य नमस्कुर्यादन्येषां तदनंतरं ॥ नमस्कुर्वंति तं देवाः सिद्धविद्याधरोरग.: ॥ मुनयो योगिनो य-
क्षारक्षोदानवमानवाः ॥ नमस्कृतेन सूर्येण सर्वे देवा नमस्कृताः ॥ न दिवा न भवेद्रात्रिः षण्मासं दक्षिणायनं ॥ अयनं चोत्तरं
चापि भास्करेण विना नृप ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं ॥ न वर्तते विनासूर्यं तेन पूज्यतमो रविः ॥ प्रत्य-
क्षो भगवान्देवो दृश्यते लोकपावनः ॥ उत्पत्तिप्रलयस्थाननिधानं बीजमव्ययं ॥ हेतुरेको जगन्नाथो नान्यस्तिष्ठति भारत ॥
एवमात्मभवं कृत्वा जगत्स्थावरजंगमं ॥ लोकानां तु हितार्थाय स्थापयद्धर्मपद्धतिं ॥ धुरमासाद्य विश्वस्य यतः समुदितो विभुः
॥ धुरादित्य इति ख्यातस्तस्मात्सूर्यः सुरार्चितः ॥ धुरि धर्मस्य देवानां दिवसस्य च योर्च्यते ॥ धुरादित्य इति ख्यातं धाम का-
मप्रदं ततः ॥ धौरं पदमनुप्राप्तोद्यतः कालत्रये रविः ॥ धौरादित्यं ततः संतः प्रशंसंति जगत्त्रये ॥ आविर्भूतस्तदादित्यो ववृधे म-
हसापि च ॥ धौरेयं पदमन्विच्छन् धुनीं प्रायात्स धूर्जटेः ॥ वृतो देवर्षिसिद्धैश्च स्तूयमानः स योगिभिः ॥ नर्मदातटमाश्रित्य
स्थापयित्वात्मनस्तनुं ॥ स्नात्वा सर्वत्रगो भानुः सेंद्रैरपि सुरासुरैः ॥ ऋषिभिः सिद्धसंघैश्च प्रार्थितोस्य प्रकाशने ॥ पालने धर्म
संतानज्ञाने ध्याने च योगिभिः ॥ सहस्रांशुनिधिभानुर्जगामाकाशमव्ययं ॥ त्रयीधाम तपत्येतन्महन्मार्तंडमंडलं ॥ धर्मस्य साधनं
मुख्यं कालमानस्य कारणं ॥ नहि सूर्यात्परं विश्ववंद्यं विश्वस्य जीवनं ॥ वेदत्रयीमयं ह्येतदेतदेव त्रयीमयं ॥ वन्हित्रयीमयं
ह्येतदेतत्तेजस्त्रयीमयं ॥ लोकत्रयीमयं ह्येतदेतन्मात्रात्रयीमयं ॥ विश्वस्य मंडनं ह्येतदेचक्षुरुदाहृतं ॥ नास्ति नास्तीति मन्येहं परं
भानोर्युधिष्ठिर ॥ स्वमूर्तिस्तेन रेवायास्तटे संस्थापिता तदा ॥ ततः प्रभृति तत्तीर्थं धौरादित्याह्वयं शुभं ॥ तत्र तीर्थे त यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्नात्वा पूजयेत्परमेश्वरं ॥ तेन दत्तं ग्हुतं जप्तं तेन सर्वमनुष्ठितं ॥ तेन सम्य ग्विधानेन संप्राप्तं परमं पदं ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं ॥ ये स्नात्वा नर्मदातोये धौशादित्यार्चने रताः ॥ तस्य देवस्य राजेंद्र ये कुर्वंति प्रदक्षिणं ॥ अनन्यभक्त्या सततं ये त्र्यक्षरसमन्विताः ॥ तेन पूतशरीरास्ते मंत्रेण हृतपातकाः ॥ तत्पुण्यं जायते तेषां तदिहैकमना शृणु ॥ ससमुद्रगुहा तेन सशैलवनकानना ॥ प्रदक्षिणीकृता राजन् पृथिवी नात्र संशयः ॥ मंत्रमूलमिदं सर्वं त्रैलोक्यं सचराचरं ॥ तेन मंत्रविहिनं तु कार्यं लोके न सिध्यति ॥ यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ॥ न कार्यायोपयोगाय तथाकार्यममंत्रकं ॥ हुतं वै भस्मनि यथा दानं तोयं विना कृत ॥ निष्फलं जायते सर्वंतथा मंत्रविवर्जितं ॥ काष्ठपाषाणलोष्टेषु मृन्मयेषु विशेषतः ॥ मंत्रस्यैव जनः पूजां करोतीति न संशयः ॥ संक्रांतौ च व्यतीपाते विषुवत्ययनद्वये ॥ तत्र रेवाजले स्नात्वा धौशादित्यं यजेत्तु नः ॥ वर्षैर्द्वादशभिः पापमज्ञानात् ज्ञानतः कृतं ॥ तत्क्षणान्नाशमायाति वन्हिना तूलराशिवत् ॥ चंद्रसूर्यग्रहे स्नात्वा सोपवासो जितेंद्रियः ॥ धुरादित्यमुखं दृष्ट्वा मुच्यते सर्व किल्बिषैः ॥ माघमासे तु संप्राप्ते सप्तम्यां नृपसत्तम ॥ सोपवासो जितक्रोध उषित्वा सूर्यमंदिरे ॥ प्रातः स्नात्वा विधानेन दद्यादर्घ्यं विवस्वते ॥ विधिना मंत्रयुक्तेन स लभेत्फलमुत्तमं ॥ मंदिरे देवदेवस्य ततः पूजां समाचरेत् ॥ गंधपुष्पैर्धूपदीपैरर्घनीराजनैस्तथा ॥ नैवेद्यैश्च प्रणामैश्च स्तुतिजाप्यैर्विशेषतः ॥ पूजयित्वा जगन्नाथं ततो मंत्रमुदाहरेत् ॥ विष्णुः शक्रो यमो धाता मित्रोथवरुणस्तथा ॥ विवस्वान् सविता पूषा त्वष्टांशुर्भग एव च ॥ एभिर्द्वादशभिर्मंत्रैर्जपं कृत्वा प्रदक्षिणं ॥ यत्फलं जायते तेषां तदिहैकमना शृणु ॥ दरिद्रो व्याधितो मूर्खो बधिरो जड एव च ॥ न भवेत्सप्तजन्मानि इत्येवं शंकरोऽब्रवीत् ॥ एवं ज्ञात्वा विधानेन जपन्मंत्रं विचक्षणः ॥ आराधयेद्रविं भक्त्या इच्छेच्चच्छ्रेयमात्मनः ॥ मंत्रहिनस्तु यः कुर्याद्भक्तिं देवस्य भारत ॥ विडंबयेत्स चात्मानं पशुकीटपतं-

नवत् ॥ तत्र तीर्थे तु यः कश्चित्प्राणत्यागमवाप्नुयात् ॥ स गच्छेद्भास्करं लोकं पूज्यमानः सुरर्षिभिः ॥ उषित्वा सुचिरं कालमि-
हागत्य नृपो भवेत् ॥ पुत्रपौत्रसमायुक्तो हस्त्यश्वरथसकुलः ॥ दासीदासान्वितः श्रीमान् जायते विमले कुले ॥ चिरायुर्विज-
यी नित्यं धनधान्यसमन्वित्तः ॥ तत्र तीर्थे च य. कुर्याच्छ्राद्धं तु विधिना नृप ॥ पितरस्तस्य तृप्यंति शतं वार्षाणि चाष्ट च॥ दत्वा
गां विधिवत्पार्थ कांचनं द्विजभोजनं ॥ स भवेत्पापनिर्मुक्तः स्वर्गलोके महीयते ॥ इदं तीर्थं मया ख्यातं महापुण्यं नृपोत्तम ॥
श्रवणात्कीर्तनादस्य सर्वपापैः प्रमुच्यते ॥ इति श्रीरेवामाहात्म्ये धौतादित्यतीर्थनामद्वात्रिंशच्छतमोध्यायः ॥ १३२ ॥ मार्कंडेय
उवाच ॥ ततोगच्छेच्च राजेंद्र परं तीर्थमयोनिजं॥ न कस्माज्जनितं लिंगं प्रादुर्भुतं स्वयं यतः॥शौनकस्य मुनेस्तत्र संध्यायां स्मरतः
शिवं ॥ समुत्थितो यदा शंभुर्लिंगरूपी पुरो नृप ॥ तदा विचारं कृतवान् मुनिः कोयमितिस्मह ॥ केन जातः कुतो जातः
कोयं किं ज्ञास्यते मया ॥ इति चिंतान्वितं विप्रं वागुवाचाशरीरिणी ॥ अंतरिक्षे महाराज गंभीरध्वनिरुच्चकैः ॥ न कोप्यस्तिजने-
तास्यमा चिंतां कुरु शौनक ॥ अयमादिभवोदेवस्त्वयोनिसंभवो ह्ययं ॥ स्वयंभूरेष विश्वात्मा ज्ञायते खलु योगिभिः ॥ इह ध्या-
तस्त्वयैवायमुदंतष्ठन्महेश्वरः ॥ इत्युक्तः स तया देव्या भारत्या किल भारत ॥ शौनकः सुचिरं कालमयोनिसंभवाह्वयं ॥ शिवं
संपूजयामास तत्र लिंगे मुदान्वितः ॥ शिवप्रसादात्परमां सिद्धिं प्रापाशु वांछितां॥ततः प्रभृति विख्यातं तीर्थमेतदनुत्तमं॥अयोनि-
संभवं नाम यदुवाचाि भारती ॥ स्नानमात्रो नरस्तत्र मुच्यते योनिसंकटात् ॥ तत्र स्नात्वा महाराज याचेत्संपूज्य शंकरं ॥ अ-
योनिजो महादेव यथा त्वं परमेश्वर ॥ तथा मोचय मामाशु संभवाद्योनिसंकटात् ॥ तस्यदेवस्य यो भक्त्या कुरुते लिंगपूरणं ॥
स वसेद्देव देवस्य लोके वै सिक्थसंख्यया ॥ अयोनिजं महादेव स्नापयेद्गंधवारिणा ॥मधुक्षीराज्यदधिभिः सलभेद्विपुलां श्रियं॥अ-
ष्टम्यां च चतुर्दश्यामुभयोः पक्षयोपि ॥ पूजयित्वा महादेवं प्रीणयद्गीतवादनैः ॥ नृत्यनीराजनैरर्घैः स्तुतिजाप्यप्रणामतः ॥ वसे

CC-0. In Public Domain. Digitization by eGangotri

स्तस्येश्वरे लोके भवेजन्मानि जन्मानि ॥ आलयं तस्य देवस्य ये कुर्वंति मनोहरं ॥ वास्तुस्तेषां शिवपुरे यावदाहूतसंप्लवं॥ किं तस्य बहुभिर्मंत्रैः कंठशोषणकारिभिः॥येनोंनमः शिवायेति प्रोक्तं वै शिवसांनिधौ ॥ तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं ॥ न तत्फलमवाप्नोति सर्ववेदेषु वै द्विज ॥ यत्फलं समवाप्नोति षडक्षरउदीरणात् ॥ तत्र तीर्थे तु यः स्नात्वा भोजयेच्छिवयोगिनं ॥ द्विजानाम युते साग्रे यत्फलं तल्लभेन्नरः ॥ अथवा भक्तियुक्तस्तु शांते दांते जितेंद्रिये ॥ ददति सत्कृतं भिक्षां तस्य पुण्यं ततोधिकं॥ यतिहस्ते जलं दद्याद्भैक्षं दत्वा पुनर्जलं ॥ सा भिक्षा मेरुसंकाशा तज्जलं सागरोपमं ॥ श्राद्धं दद्याच्च यस्तत्र विधिवद्वेदपारगे॥पितॄणामक्षया तृप्तिर्जायते युगसंख्यया ॥ इति श्रीरेवामाहात्म्ये आयोनि संभवं तीर्थं ॥मार्कंडेय उवाच॥ततो गच्छेत राजेंद्र तीर्थं वै पिंगलेश्वरं॥ अग्निना स्थापितं पूर्वं शप्तेन मुनिना नृप ॥ रुचीकोनाम विप्रर्षिर्भृगुवंशसमुद्भवः ॥ तत्पत्नी रूपसंपन्ना सुशीला लक्षणान्विता ॥ पुलोमानाम राजेंद्र गुर्विणी[1] गुणसंयुता॥प्रातः समित्कुशार्थे तु वनं याते मुनौ नृप ॥ हर्तुं कामोथ तां दैत्यौ आजगामाश्रमं महान् ॥ पलायनपरा सा स्त्री तृणपुंजांतरे स्थिता ॥ शून्यं तमाश्रमं दृष्ट्वा वन्हिशालां गतोऽसुरः ॥ पप्रच्छाग्निं स कोपाद्वै वन्हिरावेद यच्च तां ॥ तृणपत्रचयांतस्थां दैत्योपि च जहार तां ॥ कोप्यत्रास्ति ममत्रातेत्यार्तरावविराविणी ॥ तदानीं सोदरस्थो वै कोपाद्गर्भः श्रुतो भवत् ॥ च्यवमानस्तयातौ सौ तेजसा स्कंदसंनिभः ॥ज्वलज्ज्वलनसंकाशः कोपाद्दानवमैक्षत ॥ दृष्टमात्रः स तेनाशु दैत्यो भस्मीभवत्क्षणात् ॥ ऋषिरेतावता प्राप्तः स रुचीको युधिष्ठिर ॥ दैत्यस्य च तथा वन्हेर्ज्ञात्वा वृत्तातमादितः ॥ शशाप वन्हिं कोपेन पुलोमा पिशुनं नृप ॥ यत आवेदिता वन्हे पुलोमादानवाय ते ॥ उपासितेनापि चिरं विप्राणां गुरुणासती ॥ तस्मात्त्वं सर्वभक्षो वै भविष्यसि हुताशन ॥ भक्ष्याभक्ष्यविवेकस्ते न भाविष्यति पावक ॥ यज्ञकर्मसु सर्वत्र ना

१ (गर्भवंती)

Nepal Sanskrit University Balmeeki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिकारी कदाचन ॥ मार्कंडेय उवाच ॥ इत्येवमृषिणा शप्तः स वन्हिस्तत्क्षणान्नृप ॥ नर्मदातीरमासाद्य तपस्तेपे सुदुश्चरं ॥
तत्र तीर्थे शुचिः स्नात्वा ध्यायन्देवं महेश्वरं ॥ गते वर्षशते पार्थ प्रसन्नो भगवान् हरः ॥ ददौ यज्ञाधिकारित्वं संस्कृतस्य तु मं-
त्रतः ॥ यदुक्तं सर्वभक्षीति एनाद्द्रवचोन्यथा ॥ अदोषं सर्वभक्षित्वे ददावपि महेश्वरः ॥ वरं प्राप्य शिवाद्वन्हिः स्थापयित्वा म-
हेश्वरं ॥ पिंगलेश्वरनामानं स्वनाम्ना धर्मनंदन ॥ स्वस्थान मगमत्पश्चात् ऋषिसंघनिषेवितः ॥ ततः प्रभृति तत्तीर्थे मग्नितीर्थमि-
ति श्रुतं ॥ तत्र तीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ सत्कर्मस्वधिकारी स्याद्वन्हिलोकं च गच्छति ॥ श्राद्धं दत्वा विधानेन
पितॄन्प्रीणाति भारत ॥ तत्र तीर्थे यः कन्यां ददाति स्वमलंकृतां ॥ तस्य यत्फलमुद्दिष्टं तच्छृणुष्व नृपोत्तम ॥ अग्निष्टोमादि
रात्राणां सम्यगिष्टशते फलं ॥ माप्नोति पुरुषो दत्वा यथाशक्त्या स्वलंकृतां ॥ तस्याः पुत्रप्रपौत्राणां मानसंख्या भवेद्धि या ॥
स तस्यास्तेन मानेन शिवलोके सुखं वसेत् ॥ हेमान्नोदकदानेन आयुरारोग्यमश्नुते ॥ इति श्रीरेवामाहात्म्ये कोरीलापुरे अग्नि-
तीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र भृग्वीश्वरमनुत्तमं ॥ कोरिलायां तु पूर्वेण पुत्रपौत्रप्रदं परं ॥ यत्र सिद्धो महाभा-
गो भृगुः परमकोपनः॥ तेन वर्षशतं साग्रं तपश्चिर्णं पुरानघ ॥ पुत्रार्थं वरयामास पुत्रं तुष्टे महेश्वरे ॥ वरे दत्ते महाभाग देवेनांध-
कघातिना ॥ प्राप्य पुत्रं कविं पूज्यमसुराणां परं गुरुं ॥ स्थापितस्तेन भृगुणा महेशानः स्वनामतः ॥ ततः प्रभृति विख्यातं ती-
र्थं भृग्वीश्वराह्वयं ॥ यत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं ॥ अग्निष्टोमस्य यज्ञस्य फलं त्वष्टगुणं लभेत् ॥ यः कश्चित्पार्थपुत्रार्थी
क्षीराज्यमधुनासमं ॥ तथा शर्करया दया भृग्वीशं स्नापयेन्मुदा ॥ भक्त्या मंत्रैश्च विधिवत्स लभेत्पुत्रमीप्सितं ॥ तत्र तीर्थे तु
यः स्नात्वा दद्याद्विप्राय कांचनं ॥ धेनुं दद्यान्महीं वापि तस्य पुण्यफलं शृणु ॥ स समुद्रगुणातेनसशैलवनकानना ॥ दत्वा पृथ्वी-
नसंदेहस्तेनसर्वान्नृपोत्तम ॥ तेन दानेन सत्स्वर्गे वसित्वा स यथा सुखी ॥ मर्त्ये भवति राजेंद्रो ब्राह्मणो वा सुपूजितः ॥ श्राद्धदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेन परमां पितरस्तृप्तिमापुयुः॥इति श्रीनर्मदामाहात्म्ये भृग्वीश्वरतीर्थं॥ मार्कंडेय उवाच॥ ततो यायान्महाराज ब्रह्मतीर्थमनुत्तमं ॥ अन्येषां ताद्धि तीर्थानां परात्परतरं महत् ॥ पुराणोदिततीर्थानां पृथगासीद्विचारणा ॥ सत्यलोकादिहागत्य मेरोः पृष्ठे पुरा नृप ॥ मुनिसिद्धर्षिदेवानां राजर्षीणां समागमे ॥ तत्र ब्रह्मादयो देवा रेवायां विस्मिता भवन् ॥ स्वर्गापवर्गदा रेवा शिवसिद्धांतसंनिभा ॥ भाति भूमितले भर्गभूर्भूरिदुरितापहा ॥ एतस्मिन्नंतरे तत्र नारदोभ्याजगामह ॥ तत्र संवदतां तेषां ब्रह्मादीनां मुनिर्नृप ॥ पितरं प्रणिपत्याथ ब्रह्माणं निषसादह ॥ विचारे क्रियमाणे तु श्रीमद्भिः शास्त्रचक्षुषा ॥ सारासार विचारज्ञैस्तीर्थानां पृथगादृतैः ॥ त्रिजगत्पद्ममधुपं ब्रह्मा पप्रच्छ नारदं ॥ ब्रह्मा उवाच ॥ त्वया त्रिजगती क्रांता बहुशः सुरपूजित ॥ नूनं नारद नाज्ञातं तत्र किंचिन्न ते भवेत् ॥ भूचंक्रमसकृद्दृष्टं गम्यागम्यं हि यत्नरैः ॥ ब्रूहि तीर्थविशेषं नः सरितां शंस साधुतां ॥ यद्दृष्टमनुभूतं च पूतं यत्सर्वतोधिकं ॥ तदत्र वद सर्वेषां देवर्षीणां पुरो मुने ॥ नारद उवाच ॥ शृण्वंतु ऋषयः सिद्धा देवा ब्रह्मपुरोगमाः ॥ यथा दृष्टं श्रुतं तद्वदनुभूतं च यन्मया ॥ भ्रांतं भूवलयं भानुभानुभिर्भासितं च यत् ॥ जंबूद्वीपस्य यद्वर्षं भरातं नाथ नारतं ॥ भारति भूमिरखिला कर्मभूरिति विश्रुता ॥ स्वर्गच्युतानां सर्वेषां तथान्या भोगभूमयः ॥ शुभाशुभं कृतं कर्म भारते फलमावहेत् ॥ तीर्थानि संति बहुशः सरितश्चापि सत्तमाः ॥ नदीत्रयस्य पुण्यस्य न तुलां कापि गच्छति॥ब्राह्मी च वैष्णवी रौद्री जगत्सृष्टं नदीत्रयं ॥ सरस्वती स्मृता ब्राह्मी गंगा विष्णुपदी मता ॥ रेवा रौद्रीति विख्याता तापत्रय भयापहा ॥ स्वर्गमोक्षप्रदास्त्वेता स्वर्चशः सुरलोकदाः ॥ पापनाशकराः सर्वा स्वखर्वा नैकपुण्यदाः ॥ दृष्टः किंतु विशेषो मे नर्मदानीरसंभवः ॥ सर्वस्थानेषु सर्वत्र गीर्वाणाः सर्ववस्तुषु ॥ चराचरे च नियतं विशेषो नरिजस्मृतः ॥ महानेप विशेषोयं दृष्टो मे नर्मदोद्भवः ॥ यत्कुक्षिसंभवाश्मानो भजंतीश्वरतां यतः ॥ सा किं न सेव्यते रेवा देवादिपददा नृणां ॥ शिलापि सेवनाद्यस्या शिवबुध्यार्च्यते जनैः ॥ दुर्लभं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मानुषं जन्म भारते सुरसत्तमाः ॥ तत्रापि सुकुलप्राप्तिः सद्बुद्धिश्चापि दुर्लभा ॥ भारते भूय मनुजो भवजां यो न गच्छति ॥ दुष्प्रापं मानुषं जन्म मुधा तेनैव हारितं ॥ कल्पवल्लीयमतुला नाकनिश्रेणिरुत्तमा ॥ मोक्षमार्गो महानेष प्रवाहः पापशातनः॥नार्मदः सर्वजंतुनां मज्जतामवलंबनं ॥भवाब्धौ भारतभुवो भूषणं भव जान्हवी॥स्वर्गे दिविषदामंतः सिद्धगंधर्वसंवृतः ॥यइच्छेदमृतं पातुं स स्नातुं यातु नर्मदां॥यो विमानेन शुभ्रेण सत्यादि सुरसद्मसु॥इच्छेदस्खलितेच्छया तुं स स्नातुं यातु नर्मदां ॥ कुरंगी चक्षुषां रंगी नीरंगी संवृतं मुखं॥ य इच्छेत्सततं पातुं स स्नातुं यातु नर्मदां॥यामीन्यो यातनाभ्यश्च नरकेभ्यश्च दुर्गतात् ॥ य इच्छेत्स्वपितॄंस्त्रातुं स स्नातु यातुनर्मदां ॥ भवाभवभयोद्विग्नः संसाराद्दुःखसंकुलात्॥य इच्छेदात्मनः त्रातुं स स्नातुं यातु नर्मदां ॥नाके नाक सुखं भोक्तुं भुवि राज्यमकंटकं॥य इच्छेद्य परं दातुं स स्नातुं यातु नर्मदां॥पुण्यात्पुण्यतरा प्रोक्ता गंगा तीर्थचतुष्टये ॥ मुक्तेश्वरे शूकरे च प्रयागे चापि पूजिता ॥ तथा कनखले तीर्थे विश्वबंधाघनाशिनी ॥ तथा तीर्थत्रये पुण्या सुरश्रेष्ठा सरस्वती ॥ विशेषतः कुरुक्षेत्रे श्रीस्थले रुद्रसंनिधौ ॥ प्रभासे च विशेषेण ब्राह्मिसर्वाघनाशिनी ॥ सर्वत्र दुर्लभारेवा शिवोपलाविभूषिता ॥ विशेषात् षट्सु तीर्थेषु तानि मे शृणुतानघाः ॥ पुण्यापुण्यतरा रेवा तीर्थे ख्यातामरंकटे ॥ द्वितीया शूलभेदे च तथा रेवोरिसंगमे ॥ चतुर्थी कोरिलापुर्यौ भृगुस्थानें च पंचमी ॥ तीर्थे पुण्यतरा तद्वद्रेवा सागरसंगमे ॥ ख्यातो गुप्तप्रयागोयं यत्र रेवोरिसंगमः ॥ गुप्ता काशीति विख्याता या प्रोक्ता कोरिलापुरी ॥ तत्र वासं परं मन्ये यत्र सा कोरिलापुरी ॥ काशीवासेन किं तेषां कोरिलायां वसंति ये ॥ श्रूयाम पितृभिर्गीता गाथा गुणविभाविनी ॥ स्ववंश्याय पुरा देवा दृष्ट्वा तीर्थबलाबली ॥ मा वत्स गच्छ गंगां त्वं मा प्रभासं च पुष्करं ॥ रेवायां तत्र गच्छत्वं यत्र सा कोरिलापुरी ॥ किं प्रयागं परं गत्वा किं काशीं किं गयामपि ॥ सेव्यते यदि सर्वेष्ठा कोरिला कलिनाशिनी ॥ तत्र गत्वा शु नो दद्यात्त्वमत्त्येकं जल जालिं ॥ येन वः परमा तृप्तिर्भवेदाहूतसंप्लवं

CC-0. In Public Domain. Digitization by eGangotri

॥ कर्मबंधविमोक्षाय भवाब्धितरणाय च ॥ तत्र पुत्र वशेथास्त्वं यत्र सा कोरिलापुरी ॥ इत्यादि पितृभिर्गीतं श्रूयते वै पुरा सुराः ॥ एतन्मम मतं यद्वै निवासः कोरिलापुरे ॥ मार्कंडेय उवाच ॥ इत्याकर्ण्य शुभं वाक्यं नारदात्ते सुरर्षयः ॥ निवासं रोचयामासुर्ब्रह्माद्याः कोरिलापुरं ॥ ब्रह्मा उवाच ॥ समीचीनमिदं देवा यदुक्तं नारदेन हि ॥ पुराणे पिमया दृष्टं प्रसिद्धं कोरिलापुरं ॥ तत्र वः क्रियतामंशैः स्थितिर्वरपुरे सुराः ॥ कर्मबंधविनाशाय पुनर्भवसमृद्धये ॥ देवाऊचुः ॥ कोरिलाख्यमिदं कस्मात्तीर्थं सिद्धिप्रदं कथं ॥ कदा जातमिदं ब्रह्मन्महात्म्यं विस्तराद्वद ॥ ब्रह्मा उवाच ॥ शृण्वंतु मुनयः सर्वे ऋषिदेवतपोधनाः ॥ यथापृष्टं प्रवक्ष्यामि कोरिलातीर्थसंभवं ॥ एकएवादिपुरुषः जगद्धाता जगन्मयः ॥ यन्नाभिपद्मकुहरादाविर्भावोममापि हि ॥ शेषशयासनः श्रीमान् जगदादिः सनातनः ॥ वन्हेर्यथा विस्फुलिंगात्संभवंति पृथग्विधाः ॥ तथा तन्महसो जाताः स्वाभाव्यादस्मदादयः ॥ स एव वेत्तावेद्यश्च सृष्टिसंहारकारणं ॥ पुरा काले महीं मग्नामुद्धर्तुं निर्गुणोपि सः ॥ आदिरूपं स वाराहं तत्र दध्रे तपोमयं ॥ सर्वयज्ञमयं श्रीमत् शंखचक्रगदाधरं ॥ तत्र तेन तपस्तप्त्वा मही साधु समुद्धृता ॥ तदाप्रभृतितत्स्थानं पुण्यसिद्धिप्रदं परं ॥ सर्वलोकेषु विख्यातं विश्वाघशमनं शुचि ॥ पुरुषोत्तमपादाभ्यामभिक्रांतं सुरोत्तमाः ॥ श्रुत्वा वै मुनयः सिद्धा सुराश्च ऋषयो नराः ॥ तत्र ते स्वर्गमोक्षार्थं समागच्छंति संघशः ॥ स्वर्कामाः स्वर्गगतयो मोक्षं मोक्षार्थिनो ययुः ॥ कालेन गच्छता देवास्तीर्थस्यास्य प्रभावतः ॥ रिक्ता वै नरका जाताः पुरं शून्यं यमस्य च॥भूतले सर्वतीर्थानां प्रभाव श्छन्नतां ययौ॥एकदा सर्वलोकेषु तप्यत्सु निवसत्सु च ॥ सागरः सर्वतीर्थानां प्रतिज्ञाय सहायतां ॥ तीर्थं प्लावयितुं प्राप्तो रोषामर्षसमन्वितः ॥ सार्द्धं नदीभिः सर्वाभिर्वर्जयित्वा तु शांकरीं ॥ प्लाव्यमाने तदा क्षेत्रे सागरेण दुरात्मना ॥ न्हियमाणैर्भयोद्विग्नैः फूत्कृतं तैस्तपस्विभिः ॥ धावस्वाशु धराधाररेलितास्मेति भाषया ॥ ब्रह्मा उवाच ॥ तदोक्तःसतु तैरेवं शूलपाणिः शिवस्त्वरन् ॥ रोषान्वितोष्टमूर्तीनामाद्यांक्षिस्वोस्थि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तः सुराः ॥ कोरेलत्यत्र माभैष्टेत्यसकृत्वोचुकैर्वदन् ॥ प्राथ वच्छूलमूद्यम्य साक्षाच्छंभुः सनातनः ॥ ततः पलायनं चक्रे सागरः सहसा द्रुवन् ॥ सार्द्धं नदीभिः सर्वाभिस्तापसाः स्वस्थतां ययुः ॥ प्रार्थयामासुरीशानं चिरमत्र वसेश्वर ॥ स्थानस्यास्य तु रक्षार्थं काश्यां विश्वेश्वरो यथा ॥ सर्वलोकहितार्थाय गणैः स्वैः परिवारितः ॥ यथा मुक्तिप्रदा काशी वरुणाशीसमन्विता ॥ तथा रेवाभिजुष्टेयमस्तु स्वर्गापवर्गदा ॥ ब्रह्मा उवाच ॥ एवं तैः प्रार्थितो रुद्रस्तत्र वासमरोचयत् ॥ कोरेलतीति यच्चोक्तमसकृच्चेन शंभुना॥तस्य क्षेत्रस्य तन्नाम कोरिलेत्यकरोत्स्वयं॥सह सर्वैश्च तैः सिद्धतपसैश्च सुरर्षिभिः ॥ प्रतिदिक्षु गणेशांश्च क्षेत्रपालांश्च चंडिकाः ॥ रक्षार्थं तस्य तीर्थस्य मुमोचाथ महेश्वरः ॥ साकं वराहरूपेण विष्णुना वीतमत्सरः॥ततःप्रभृति विख्यातं तीर्थं वै कोरिलाह्वयं॥यत्रोषित्वा सुरश्रेष्ठाः न स शोचे त्कृताकृते ॥ मार्कंडेय उवाच ॥ इत्युवाच तदा ब्रह्मा देवर्षीन्प्रति भारत ॥ माहात्म्यं कोरिलापुर्याः समुत्पत्तिं च विस्तरात् ॥ सार्द्धक्रोशद्वयं क्षेत्रं कोरिलाख्यं युधिष्ठिर ॥ तत्र मध्ये मृतो जंतुः स्वर्गमोक्षाय कल्पते॥तत्र तीर्थे सुरश्रेष्ठः सर्वलोकपितामहः ॥ हितार्थं सर्ववर्णनां नर्मदातीरमाश्रितः ॥ कोरिलातीर्थवासार्थं सर्वकर्मविशुद्धये ॥ वाचिकं मानसं वापि कर्मजं यत् पुरा कृतं ॥ तत् क्षालयति देवेशो दर्शनादेव पातकं ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृ देवताः ॥ अग्निष्टोमस्य यज्ञस्य लभेत्पुण्यमनुत्तमं ॥ तत्र तीर्थे च यद्दानं ब्रह्मोद्देशेन दीयते ॥ तदक्षयफलं सर्वामित्येवं शंकराब्रवीत् ॥ गायत्रीमंत्रजाप्यंतु शक्त्या कुर्वन् द्विजोत्तमः ॥ ऋग्यजुः सामवेदानां पारायणफलं लभेत् ॥ तत्र तीर्थे च यो भक्त्या प्राणत्यागमवाप्नुयात् ॥अनिवर्तिका गतिस्तस्य ब्रह्मलोकान्न संशयः ॥ यावदस्थीनि तिष्ठंते ब्रह्मतीर्थे तु देहिनां ॥ तावद्वर्षसहस्राणि ब्रह्मलोके महीयते ॥ अवतीर्णः स कालेन विप्रोत्तमकुले भवेत् ॥ उत्तमः सर्ववर्णानां देवानामिव वासवः ॥ विद्यास्थानानि सर्वाणि वेत्ति वेदविदां वरः ॥ पूज्यते सर्वलोकैश्च सर्वज्ञः स न संशयः ॥ पुत्रपौत्रैः परिवृत्तः सर्वव्याधिविवर्जितः॥जीवेद्वर्षशतं साग्रं ब्रह्मतीर्थप्रभावतः ॥ श्राद्धं दत्वा पितृणां च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतकृत्यो भवेन्नरः ॥ ब्रह्माणं पूजयित्वा च दीपं दद्याच्च शक्तितः ॥ ब्रह्मतीर्थं समासाद्य यो दद्याद्विप्रभोजनं ॥ एकस्मिन् भोजि-
ते विप्रे कोटिर्भवति भोजिता ॥ ब्रह्मसूत्रप्रदानेन छत्रोपानत्प्रदानतः ॥ कमंडलुप्रददानेन गोपिचंदनदानतः ॥ धौतवस्त्रप्रदानेन
विद्यादानेन भारत ॥ ब्रह्माणं प्रीणयेद्भक्त्या ब्रह्मलोके वसेच्चिरं ॥ एतत् पुण्यं पापहरं धन्यं दुःस्वप्ननाशनं ॥ तीर्थं नित्यं चिंत-
याना अमृतत्वं प्रयांति वै ॥ इति श्रीनर्मदामाहात्म्ये कोरलापुर्यां ब्रह्मतीर्थंनाम त्रयस्त्रिंशदधिकशततमोध्यायः ॥ १३३ ॥ मार्कं-
डेय उवाच ॥ तत्रैव च मया पार्थ तीर्थं मत्संज्ञया कृतं ॥ ब्रह्माणं वै नमस्कर्तुं प्रयातेन तदाज्ञया ॥ मार्कंडेश्वरसंज्ञं तु सर्वक-
ल्मषनाशनं ॥ दृष्ट्वा तीर्थस्य माहात्म्यं ब्रह्माणं च कृतस्थितिं॥तत्र स्नात्वा महाराज समभ्यर्च्य महेश्वरं॥दीपं दद्याच्च देवाय तथैव
द्विजभोजनं ॥ एवं कृत्वा नरस्तत्र सर्वपापैः प्रमुच्यते ॥ अष्टम्यां च चतुर्दश्यां पूजयेच्छंकरं शुचिः ॥ इति श्रीमार्कंडेश्वरतीर्थं ॥
तत्रैवच नृपश्रेष्ठ तीर्थं ब्रह्मप्रसादजं॥ दशाश्वमेधसंज्ञं तु सर्वपापप्रणाशनं॥ समागतानां देवानां ऋषीणां च तदानघ ॥ ब्रह्मणा वै
प्रसन्नेन तीर्थमेतन्निवेदितं ॥ कुर्वंतु स्नानमत्रैव मत्पार्श्वे वै सुरर्षयः ॥ दशानामश्वमेधानां फलंप्राप्स्यथ निश्चितं ॥ अत्रैव योनरो
भक्त्या स्नात्वासम्यक् ग्विधानतः ॥ तर्पणं पिंडदानं च पितॄनुद्दिश्य दास्यति॥ तस्यावश्यं हि पितरः परं तृप्ति मुपागताः॥नित्यं प्र
मुदिताः पार्थ प्रदास्यंति समाहितं ॥ महादेवं समभ्यर्च्य दद्याद्यो द्विजभोजनं ॥दशाश्वमेधजनितं फलं प्राप्नोत्यसंशयः ॥ इति श्री
कोरीलायां दशाश्वमेधतीर्थं ॥मार्कंडेय उवाच॥ तथैव तत्र राजेंद्र कोटितीर्थमनुत्तमं ॥श्रुत्वा तीर्थस्य माहात्म्यं नानादेशसमागतैः ॥
ऋषिभिस्तपसैस्तत्र वर्णैश्च ब्राह्मणादिभिः ॥ कोटिशो मिलितैः पार्थ स्थापितं तीर्थमुत्तमं ॥ कोटिभिर्मनुजैर्यस्मात्स्थापितं तीर्थ
मुत्तमं ॥कोटितीर्थमितिख्यातं ततः प्रभृति भारत ॥ तत्र तीर्थे नरः स्नात्वा शिवमभ्यर्च्य शक्तितः ॥ पितॄन्वैतर्पयेच्छ्राद्धैः कोटि ती
र्थ फलंलभेत् ॥इति श्रीकोरिलायां कोटितीर्थं ॥मार्कंडेय उवाच ॥ ततो गच्छेन्महाराज कोरीलायामघापहं॥भुवनत्रयविख्यातं वारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हं नाम नामतः ॥ तत्र देवो जगद्धाता वाराहं रूपमास्थितः ॥ स्थितो लोकहितार्थाय संसारार्णवकुंभजः ॥ पुरा निमग्ना येनाशु कल्पादौ धरणिधृता ॥ तेनरूपेण तस्मात्स आदिवाराहसंज्ञितः ॥ देवैर्देवर्षिभिः सिद्धैस्तथा ब्रह्मर्षिभिर्विभुः॥आदौ संपूजितो विष्णु र्वाराहरूपमास्थितः ॥ यज्ञांगान्येव वपुषि दृश्यंते यस्य भारत ॥ बिश्वमूर्तिः स भगवानि इह तीर्थे कृतालयः॥ततः प्रभृति विख्यत मादिवाराहसंज्ञितं ॥ तीर्थं तीर्थवरं पार्थ नृणांपरमदुर्लभं ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्धरणीधरं ॥ गंधमाल्यविशेषैश्च जयशब्दादिमंगलैः ॥ उपवासपरो भूत्वा द्वादश्यां पक्षयोर्द्वयोः ॥ नजल्पेत्पतितैः सार्द्धं पापकर्मभिरुद्धतैः॥बधिरांधपिशाचैश्च पशुभिश्चांत्यजैर्विटैः ॥ त्रयिबाह्यैर्महाराज लुब्धकैर्लक्षणोज्झितैः ॥ आलापाद्गात्रसंपर्कान्निःश्वासात्सहभोजनात् ॥ पापं संक्रमते यस्मात्तस्मात्तं परिवर्जयेत् ॥ ब्राह्मणान्पूजये द्भक्त्या यथाशक्ति यथाविधिः ॥ रात्रौ जागाणं कार्यं कथाख्यानविनोदतः ॥ चरित्रं वासुदेवस्य वाराहस्य महात्मनः ॥ शृणुयात्कीर्तयेत्पार्थ हर्षानंदसमन्वित. ॥ प्रभाते विमले स्नात्वा तत्रतीर्थे जगद्गुरुं ॥ ये पश्यंति जितक्रोधास्ते मुक्ताः सर्वकिल्बिषैः ॥ यथा हि दृष्ट्वा भुजगाः सुपर्णं नश्यंति मुक्ता विषयुक्तमाशु ॥ नश्यंति पपानि तथैव शीघ्रं दृष्ट्वादिवाराहमुखं नरेंद्र ॥ नभोगतं नश्यति चांधकारं दृष्ट्वा रविं यद्वदशेषरु । नश्यंति नानाविधपापसंघास्तथादिवारामुखं निरीक्ष्य ॥ नश्यंति कंठीरवमाशु दृष्ट्वा वने यथा मत्तमतंगजा द्याः॥नश्यंति नूनं नरदुष्कृतानि तथादिवाराहमुखं विलोक्य॥ प्रदह्यते वन्हि मवाप्य यद्वच्चिरार्जितो योऽपिह तूलराशिः ॥ दह्यंति पापनि तथा नराणां पार्थादिवाराहमवाप्य तत्र ॥ जयत्यमितरूपोयं वराहस्त्वादिरूपधृक् ॥ उद्धृत्यधरणीं येनत्रिलोकी परिरक्षिता ॥ जयत्पतिबलो देवो विष्णुर्जिष्णुः सनातनः ॥ वराहरूपिणा येन लीलयैवोद्धृता मही ॥ एकोयोगीमहद्रूपं सदसद्गतिरीश्वरः ॥ हिरण्याक्षासुविच्छेत्ता वराहो धरणीधरः ॥ वासुदेवो महादंष्ट्री पुराणपुरुषः परः॥ ध्येय ईड्यश्च ईज्यश्च नमस्यश्च स एव हि ॥ किं तस्य बहुभिर्मंत्रै र्भक्तिर्यस्य जनार्दने ॥किं तस्य बहुभिर्मंत्रैर्वासुदेवेति यन्मुखे ॥ किं

CC-0. In Public Domain. Digitization by eGangotri

तस्य बहुभिः क्लेशैर्गोविंदो यस्य मानसे ॥ किं करिष्यंति पापानि श्रीकृष्णासक्तचेतसां ॥कथंस्याद्दुर्गतिर्नृणां हरिमुच्चरतां सदा ॥ न
मोनारायणायेति मंत्रः सर्वार्थसाधक ः ॥ एकोपि कृष्णस्य कृतप्रणामो दशाश्वमेधावभृथेन तुल्यः॥दशाश्वमेधी पुनरेति जन्म कृष्ण
प्रणामी न पुनर्भवाय ॥ साजिह्वाया हरिं स्तौति तच्चेतो यत्तदर्पितं ॥ तच्छिरो यन्नतं कृष्णे तौ हस्तौ यौ तदर्चकौ ॥ ध्याय
माना महत्तेजो रूपं नारायणं हरेः ॥ ये त्यजंति स्वकं देहं तत्र तीर्थे जितेंद्रियाः ॥ ते गच्छंत्यमलं स्थानं यत्सुरैरपि दुर्लभं ॥ भा
वाभावविनिर्मुक्तं तद्विष्णोः परमं पदं ॥ निर्दोषं निर्गुणं रूपं निर्विकारमशुक् ध्रुवं॥तत्र तीर्थे च यः स्नात्वा श्राद्धं दद्याद्विधानतः॥ते
षामप्यक्षया लोकाः पितॄणां नृपसत्तम ॥ ब्राह्मणान् भोजयेच्छक्त्या मिष्टान्नैस्तु पृथ ग्विधैः ॥ एकस्मिन् भोजिते विप्रे पुण्यसंख्या
न विद्यते॥महीं सस्यवतीं दत्वाप्यसस्यांवा त्वनूषरां ॥ सर्वधान्यानी च तथा तीर्थे वाराहसंज्ञिके ॥ विमानेनार्कवर्णेन गंधर्वाप्सर
सांगणैः ॥ सेव्यमानः सहस्राक्षं स्वर्गलोके महीयते ॥ चिरकालादिहायातो राजा भवतिधार्मिकः ॥ पुत्रपुत्रैश्च भृत्यैश्चश्रिया चाभि
तया न्वितः ॥दीर्घायुर्व्याधिरहितो दाता सौभाग्यवान् भवेत् ॥निर्वैरः पुण्यकीर्तिश्च पुनस्तीर्थं च सस्मरेत् ॥इतिते कथितं पार्थ तीर्थं
वाराहसंज्ञकं ॥ श्रवणात्कीर्तनादस्य सर्वपापैः प्रमुच्यते ॥ इति श्रीरेवामाहात्म्ये कोरिलायां आदिवाराहतीर्थं नाम चतुस्त्रिंशदधिक
शततमोध्यायः ॥ १३४ ॥ मार्कंडेय उवाच ॥ तत्रैवाशापुरादेवी सर्वाशापरिपुरका ॥ नियुक्ता तीर्थरक्षार्थं महादेवेन शंभुना ॥आद्या
सा परमाशक्तिः पूरयत्युपयाचितं ॥ सौभाग्यं पुत्रपौत्रांश्च गृहकर्मेप्सितांश्रियं ॥ उक्ता पूर्वं महेशेन सा देवी विश्ववंदिता ॥ वसेह
देवी तीर्थस्य रक्षार्थं लोकपूजिता ॥पूरयस्व प्रपन्नाशां प्रीत्यै लोकात्मनो हरेः ॥ एवमुक्ता तदा देवी गिरिशेन युधिष्ठिर ॥ तथेत्यु
क्त्वा स्थिता तत्र लोकानां हितकाम्यया ॥ तीर्थस्यास्य च रक्षार्थं वरदा विश्ववंदिता ॥ ततः प्रभृति पूज्या सा आशासंपूरकांबि
का ॥ पूजिता विविधैर्भावैः प्रददातीप्सितं नृणां ॥ सिंदूरैः कुंकुमैर्धूपैः ग्रीवासूत्रैश्च कज्जलैः ॥ बलिपुष्पैश्च धूपैश्च तोषयेत्तां शिवप्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यां ॥ ददाति वांछितं भक्त्या पूजिता सा युधिष्ठिर॥इति श्रीरेवामहात्म्ये आशापुरी महात्म्यं ॥ मार्कंडेय उवाच॥ ततो गच्छेन्महा
राज तत्र तीर्थचतुष्टयं ॥ यद्दर्शनादपि नृणां सर्वपापक्षयो भवेत् ॥ कौबेरं वारुणं याम्यं वायव्यं च ततः परं ॥ यत्रेप्सिता लोकपा
लाः सिद्धिंप्रापुर्महाबलाः ॥ युधिष्ठिर उवाच ॥ किमर्थं लोकपालास्ते तपस्तेपुस्तदानघ ॥ नर्मदातीरमासाद्य कारणं वक्तुमर्हसि ॥
मार्कंडेय उवाच ॥ ब्रह्मणा समनुज्ञाता मेरु पृष्ठे पुरा नृप ॥ श्रुत्वा तीर्थस्यमाहात्म्यं सिद्धिस्थानमितिस्मह ॥ ब्रह्मणश्चाप्यधिष्ठानं
दृष्ट्वा तत्र शुभं नृप ॥ निवासं रोचयामासुरचलं हि चलेऽसति ॥ संसारे सर्वभूतानां तृणाग्रजलबिंदुवत् ॥ कदलीस्तंभनिःसारे
मृगतृष्णेव चंचले ॥ स्थावरे जंगमे चैवभूतग्रामे चतुर्विधे ॥ नास्ति धर्मात्परो बंधुर्नप्रभुर्वै हरेः परः ॥ धर्मो माता पिता भ्राता
धर्मो बंधुः सुहृत्सखा ॥ आधारः सर्वभूतानां त्रैलोक्ये सचराचरे ॥एवं ज्ञात्वा तु ते सर्वे लोकपालाः कृतक्षणाः ॥तत्रागत्य तपस्ते
पुर्विपुलं मारुताशनाः॥गते कृतयुगस्यार्धे ततस्तुष्टो महेश्वरः ॥ अनुरूपेण राजेंद्र युगस्य परमेश्वरः ॥ वरेण छंदयामास लोकपाला
न् महाबलान् ॥ भोलोकपाला याचध्वं येन यस्य प्रयोजनं ॥ क्लेशेनालं महाभागाः सिद्धिस्थानमुपागताः ॥ यो यमिच्छति कामं
वै तस्य तस्य ददामि तं ॥ एतत् श्रुत्वा तु वचनं लोकपाला मुदान्विताः ॥देवेशं प्रार्थयामासुर्वरदं वरमुत्तमं ॥ कुबेरउवाच ॥ य
दि तुष्टो महादेव यदि देयो वरो मम ॥ यक्षानामीश्वरश्चाहं भवेयं धनदस्त्विति ॥ ततः प्रोवाच देवेशं यमः संयमने
रतः ॥अहं शास्ता महादेव भावेयं सर्वजंतुषु॥पितृणामपि सर्वेषां तथा नाथत्वमुत्सहे ॥ वरुणोनंतरं प्राह प्रणम्य परमेश्वरं ॥ क्री
डेयं वारुणे लोके यादोगणपतित्वधृक् ॥ अच्छेद्याभेद्यपाशैश्च वैरिवर्गस्तुबंधुयत् ॥ जगादाशु ततो वायुः प्रणम्य जगदीश्वरं ॥व्याप
कत्वं त्रिलोक्यांतु प्रार्थयामि महेश्वर ॥ जीवनः सर्वजंतूनां बलोद्धतःप्रभंजनः ॥ मार्कंडेय उवाच ॥ तं तं तदीप्सितं काममुमयास
ह शंकरः ॥ सर्वेभ्यो लोकपालेभ्यो दत्वा चादर्शनं ययौ ॥ गते महेश्वरे देवे यथास्थानेषु ते स्थिताः ॥ स्थापयामासुरीशानं स्व-

CC-0. In Public Domain. Digitization by eGangotri

चनाम्ना पृथक् पृथक् ॥ कुबेरो वै कुबेरेशं यमश्चैव यमेश्वरं ॥ वरुणो वरुणेशं च वातो वातेश्वरं नृप ॥ स्नात्वा पितॄंस्तर्पयित्वा श्राद्धैश्च विधिवच्छुभैः ॥ सर्वेश्वरं देवदेवं पूजत्त्वा यथाविधि ॥ विप्रेंद्रानाह्वयामासुः सर्वे सर्वेश्वरा इव ॥ क्षांतान्दांतान् जितक्रोधान्सर्वभूताभयप्रदान् ॥ वेदविद्याव्रतस्नातान् सर्वशास्त्रविशारदान् ॥ ऋग्यजुःसामसंयुक्तान् अथर्वणविभूषितान् ॥ लोकपालाऊचुः ॥ विप्रवर्यामहात्मानः सुखं यूंय वसत्विह ॥ चातुर्विधं तु सर्वेषां स्थानं दास्याम गृण्हत ॥ एवमुक्त्का तु सर्वेषां विप्राणां दानकारणात् ॥ पादप्रक्षालनं कृत्वा विधिपूर्वं युधिष्ठिर ॥ तत्र स्थाने ददुस्तेषां भूमियानमनुत्तमं ॥ ऊचुश्चाथ प्रणम्याशु वाचमुच्चैर्नियामिकां ॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ तावद्दत्तस्य युष्मभ्यंपरिपंथी न कश्चन ॥ राजा वा राजतुल्यो वा लोकपालानुशासनं ॥ दत्तं लोपयते मुढः श्रूयतां तस्य यो विधिः ॥ शोषएद्धनदो वित्तं तस्य पापस्य भारत ॥ शरीरं वरुणो देवः संततीः श्वसनस्तथा ॥ आयुर्नयाति तस्याशु यमः संयमनो महान् ॥ निःशेषं भस्मासत्कृत्वा हुताशो याति वै नृप ॥ तस्मात्सर्वप्रयत्नेन ब्राह्मणेभ्यो युधिष्ठिर ॥ भक्तिः कार्या नृपैः सर्वैरिच्छाद्भिः श्रेयआत्मनः ॥ यदुक्तं धर्मशास्त्रेषु नीतिमद्भिः पुरातनैः ॥ तत्सदा मनसा चिंत्यं राज्ञा धर्मं विजानता ॥ राजा वृक्षो ब्राह्मणास्तस्य मूलं पर्णान् भृत्यामंत्रिणस्तस्य शाखाः ॥ तस्मान्मूलं यत्नतो रक्षणीयं मूले गुप्ते नास्ति वृक्षस्य नाशः ॥ षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ॥ आछेत्ता चानुमंता च तान्येव नरके वसेत् ॥ स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर ॥ भूमिं भूमिभृतां श्रेष्ठ दानाच्छ्रेयोनुपालनं ॥ देवताज्ञामनुस्मृत्य राजानो येपि तान्नृप ॥ पालयिष्यंतिसततं तेषां लोका महोदयाः ॥ आयुर्यशो बलं वित्तं संततिस्तेषु चाक्षया ॥ सानुकूला ग्रहास्तेषां ये प्रजापालने रताः ॥ मार्कंडेय उवाच ॥ एवमुक्त्का तु ते सर्वे लोकपाला द्विजोत्तमान् ॥ पूजयित्वा विधानेन प्रणिपत्य विसर्जयेत् ॥

१ (विघ्नकर्ता)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्थानमाश्रितेत्त्येवं विप्रमुख्येषु भारत ॥ कदाचिल्लोकपालास्ते स्नाता हुतहुताशनाः ॥ लिंगिवेषाः क्षुधाविष्टाः पर्यभिक्षंत वेश्म
सु॥ अस्थिचर्मावशेषांगाः कपालोद्धृतपाणयः ॥ अलब्ध्वाग्रासमात्रार्धं निर्ययुर्नगराद्बहिः॥ शापं ददुस्तदा क्रुद्धा ब्राह्मणानां नराधिप॥
कृपणा न ददंतीमे भिक्षामप्यागताथिषु ॥ दरिद्राः सततं मुर्खा भवंतूज्झितशासनाः॥ दीनाश्च कृपणाः शापादित्युक्त्वांतर्हिताः सु
राः॥ तदाप्रभृति ते सर्वे ब्राह्मणा धनवर्जिताः ॥ शापदोषेण देवानां संजाता दुःखभाजनाः ॥ धनं न पैतृकं पुत्रो न पिता पुत्रपौ
त्रकं ॥ भुंक्ते वै सुचिरं कालं शिवोप्येवं पुराब्रवीत् ॥ मार्कंडेय उवाच ॥ कुबेरेशं नरः स्नात्वा यस्तु पूजयते सदा ॥ गंधपुष्पा
र्धधूपैश्च नैवेद्यैः सप्रणामकैः ॥ स्तुतिप्रदक्षणाभिश्च सोश्वमेधफलं लभेत् ॥ शक्त्या धनप्रदानेन कुबेरस्तुष्टिमाप्नुयात् ॥ यमतीर्थे
च यः स्नात्वा पूजयेद्दै यमेश्वरं ॥ नानाविधोपहारैश्च नतिस्तुतिविशेषतः॥ सप्तजन्मार्जितैः पार्थ सर्वपापैः प्रमुच्यते ॥ पुर्णमास्या
ममावास्यादिने स्नात्वा च तर्पणं ॥ यः करोति तीलैः स्नात्वा तस्य पुण्यफलं शृणुं ॥ सुतृप्तास्तेन तोयेन पितरश्च पितामहाः ॥
क्रीडंते द्वादशाब्दानि स्वर्गस्थाः प्रपितामहाः ॥ प्रीणयित्वा पितॄन् श्राद्धे ब्राह्मणान् भोजयेन्नृप ॥ माषान्नं कृष्णवस्त्रं वा महिषीं वा
ददाति यः॥ यमस्तस्य भवेत्प्रीतः प्रददाति समीहितं ॥ वरुणेशे नरः स्नात्वा पूजयित्वा च शंकरं ॥ जायते कृतकृत्यो सौ
पुण्यमाप्नोति पुष्कलं ॥ मृतः कालेन महता वारुणं लोकमाप्नुयात् ॥ ततः प्रयाति यानेन यत्र देवो महेश्वरः ॥ जलदानं च
मृत्पात्रं वस्त्रमन्नं च यो ददेत्॥ प्रीणाति वरुणं पार्थ वारुणे नच बाध्यते ॥ इतिवरुणेशतीर्थं ॥ वातेश्वरे नरः स्नात्वा पूजयित्वा
महेश्वरं ॥ पितॄन्प्रीणाति यः श्राद्धे मिष्टान्नैस्तर्पयन्द्विजान् ॥ स कृतार्थो भवेद्राजन्न रोगैः परिपीड्यते ॥ घृतमन्नं तिलांश्चापि द
त्वा वायुं स तोषयेत् ॥ मृतो वायुपुरं याति वर्षाणां शतपंचकं ॥ ततः शिवपुरं याति विमानेनार्कवर्चसा ॥ उषित्वा तत्र सुचिरं
राजराजो भवेद्भुवि ॥ चिरायुर्विजयी पुत्री धनी दानी जनप्रियः ॥ इत्येतं ते मयाख्यातं पार्थ तीर्थचतुष्टयं ॥ धन्यमायुष्यमारोग्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वर्ग्यं दुःखैकनाशनं ॥ पठतां शृण्वतां वापि सर्वपापक्षयो भवेत् ॥ इति श्रीवायुक्तशिवसंहितायां कोरिल्लापुर्यां रेवामाहात्म्ये कौबेरयाम्यवारुणवातेश्वरतीर्थचतुष्टयमाहात्म्यंनाम पंचत्रिंशदधिकशततमोध्याय ॥ १३५ ॥ मार्कंडेय उवाच॥ ततो गच्छेत राजेंद्र अयोध्यासंज्ञितं पुरं ॥ क्रोशांतरे कोरिलायाः पापघ्नं पुण्यवर्द्धनं ॥ रामेश्वरं नाम पुण्यं यत्र रामेण निर्मितं ॥ पूर्वमेव यथोक्तं ते रामस्यागमनं नृप ॥ तीर्थयात्राप्रसंगेन अहिल्यातीर्थपार्श्वतः॥ निर्गतः सगणो रामो ब्राह्मणैः परिवेष्टितः ॥ द्रष्टुं रेवातटं पुण्यं समं सौम्यमकर्दमं॥ सद्वृक्षसेवितं श्रीमन्निवसादानुगैः सह ॥ इहैव परमायोध्या निवासाय मता मम ॥ यथा हि सरयूतीरे तथा रेवातटे स्थिता ॥ विप्रा मां पावयिष्यंतिपालयिष्यंति ते पि च॥रेवावगाहनं पुण्यमाकल्पं मम रोचते ॥इत्युक्त्वा स्थापनं चक्रे शिवस्य सहवाडवैः ॥ रामेश्वराह्वयस्तत्र ब्राह्मणैः सुप्रतिष्ठितः॥त्रिरात्रमुषितस्तत्र ब्राह्मणैः सह भारत॥रामोदाशरथिः श्रीमान् ददौ बहु धनं तदा ॥ निवासो यत्र रामस्य तत्रायोध्या न संशयः ॥ इत्युक्तैर्ब्राह्मणैर्लोकैर्निवासं चक्रिरे जनाः॥अयोध्येत्यभवन्नाम तस्य स्थानस्य वै नृप ॥ तदा रामेश्वरं तीर्थं तत्र रामेण निर्मितं ॥ तत्र रेवाजले स्नात्वा श्राद्धं कृत्वा विधानतः ॥ रामेश्वरं पूजयेद्यः सर्वपापैः प्रमुच्यते ॥ पुरं प्रदक्षिणीकृत्य कृतकृत्यो भवेन्नरः॥ स्वशक्त्या धनदानेन रामेशं तोषयेन्नरः॥ इति रामेश्वरतीर्थमाहात्म्यं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे गच्छेनकर्कटेश्वरमुत्तमं ॥ यत्र कर्कटकः सिद्धः शंभुत्वमगमन्नृप ॥ पुरा काशीश्वरो राजा जयंतोनाम धार्मिकः ॥ धनिनो विप्रवर्यस्य बलाद्धनमहारयत् ॥ चिरं ब्रह्मविरोधे स चकार कलिवर्द्धनं ॥ अचिरेणाथकालेन नृपः पंचत्वमाप्तवान् ॥ स च विंध्याचलतटे कुलीरःसमभवत ॥ त्रिंशद्वर्षसहस्राणि महानद्भुतविक्रमः ॥ नाशयन्सर्वभूतानि ब्राह्मणांश्च जिघांसति ॥ एकदा तस्य नाशाय गगने विचरन्महान् ॥ गरुडान्वयसंभूतः पक्षिराट् तं ददर्शह ॥ जहार सहसा क्रुद्धः कुलीरं चंचु

१ (ओघ) २ (कांकीडो)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताडितं ॥ द्वीपांतरनिवासी स तत्र गंतुं प्रचक्रमे ॥ रेवातीरमनुप्राप्य नीरमालोक्य निर्मलं ॥ दूराध्वस्तु परिश्रांतस्तृषार्तश्चापतत्तटे ॥ कर्कटं तं स्थले मुक्त्वा जले पातुमुपागतः ॥ ममार मुक्तमात्रः स कर्कटः शिवतां ययौ ॥ तं शकुंतं महांतं च दृष्ट्वा लोकाः सुविस्मिताः ॥ अत्यद्भुतं कर्कटं च वीक्ष्याश्चर्यकरं जनाः ॥ इतस्ततः समायाताः ददृशुर्लिंगमुत्थितं ॥ निर्गतं कर्कटस्थाने स च लिंगे लयं ययौ ॥ शकुनी तत्र तं वीक्ष्य शिवलिंगात्मकं नृप ॥ परं विस्मयमासाद्य स्नात्वा गच्छद्यथागतं ॥ ततः प्रभृति राजेंद्र जनैस्तीर्थमुदाहृतं ॥ कर्कटेश्वरसंज्ञं तु सर्वपापक्षयंकरं ॥ तत्र स्नात्वा तु यः पार्थ पूजयेत्परमेश्वरं ॥ नत्वा स्तुत्वा विधानेन पूजयित्वा स्वशक्तितः ॥ न चैवावर्तते नूनं शिवलोकात्स कर्हिचित् ॥ तत्र पार्थ नरः कर्म कृत्वा चैव शुभाशुभं ॥ अक्षयं फलमाप्नोति यावदाहूतसंप्लवं ॥ तच्चरित्रं शकुंतेन हिमाद्रौ गच्छता तदा ॥ कथितं वालिखिल्यानां स कुलीरो यथा भवत् ॥ नर्मदायाश्च माहात्म्यं तेप्याकर्ण्य सुविस्मिताः ॥ विनोदाद्द्रष्टुमायातास्तीर्थे वै नार्मदे तटे ॥ मृतं रेवातटे तत्र कर्कटं शिवतांगतं ॥ दृष्ट्वा सुविस्मिताः सर्वे प्रशशंसुश्च नर्मदां ॥ नराणां च तथा धर्मकर्मनैपुण्यलक्षणं ॥ कर्मणा जायते जंतुः कर्मणैव प्रलीयते ॥ सुखं दुःखं भयं क्षेम कर्मणैव प्रलीयते ॥ सुखं दुःखं भयं क्षेम कर्मणैवाभिपद्यते ॥ क्व तु काशीश्वरो राजा क्व तु तस्य कुलीरता ॥ क्व च रेवातटे मृत्युः क्व च तस्य शिवात्मता ॥ जीवः शिवः शिवो जीवस्तत्र भेदोऽनयोश्च कः ॥ कर्मणा जायते जीवः कर्मणैव शिवो भवेत् ॥ इत्युक्त्वा ते तपस्तेपुर्वालिखिल्या महर्षयः ॥ जीवंतएव मुक्तास्ते कर्मबंधविवर्जिताः ॥ तत्रस्थं हि न जानंति नरा ज्ञानबहिष्कृताः ॥ शरीरस्थं मिवात्मानं महः शैवमजाव्ययं ॥ ततः प्रभृति तीर्थेस्मिन् देवी नारायणी शुभा ॥ अद्यापि तपते घोरं तपो यावत्समार्बुदं ॥ तत्र तीर्थे नरः स्नात्वा तर्पयित्वा सुरान् पितॄन ॥ श्राद्धं कृत्वा विधानेन शक्त्या वै भोजयेद्द्विजान् ॥ तस्य ते द्वादशाब्दानितृप्ताः स्युः पितृदेवताः ॥ अन्नं वस्त्रं जलं छत्रं कमंडलुमुपानहौ ॥ हिरण्यं वा धनं दत्वा शिवलोके महीयते ॥ इति श्रीरेवामाहात्म्ये क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्कटेश्वरतीर्थ ॥ मार्कंडेय उवाच ॥ ततः परं महाराज कर्कटेश्वरतीर्थतः ॥ गत्वा क्रमशतं पुण्यं शक्रतीर्थमितिश्रुतं ॥ यत्र सिद्धो महाभागो देवराजः शतक्रतुः ॥ गौतमेन पुरा शप्तं ज्ञात्वा देवं शतक्रतुं ॥ ब्रह्माद्या देवताः सर्वाऋषयश्च तपोधनाः ॥ गौतमं प्रार्थयामासुः वाक्यैः सानुनयैर्नृप ॥ ब्रह्मा उवाच ॥ गतराज्यो गत श्रीकः शक्रो दैन्यमुपाश्रित.॥ इंद्रेण रहितं राज्यं न कश्चिं कामये द्विज ॥ देवो वा मानवो वापि तथा ते विदितं मुने ॥ तस्य त्वं भगयुक्तस्य दयां कुरु हिताय नः ॥ निलीनः क्वापि शक्रः स दूषितः स्वेन कर्मणा ॥ प्रकीर्तितः सतां कोपः शारदाभ्रवदस्थिरः ॥ देवानां वचनं श्रुत्वा गौतमोवेदवित्तमः ॥ तथेति कृत्वा शक्रस्य वरं दातुं समुद्यतः ॥ यत्तद्भगसहस्रं ते पुरा जातं शतक्रतो ॥ तल्लोचनसहस्रं हि मत्प्रसादाद्भविष्यति ॥ गच्छ त्वं नर्मदा तीरं तत्राराधय शंकरं ॥ स्थापयित्वा महादेवं पूजयस्व धृतव्रतः ॥ तत्प्रसादात्सहस्राक्ष पूतगात्रो भविष्यसि ॥ रेवाजलावगाहाश्च रसानि संयम्य साधुधीः ॥ एवमुक्तः सहस्राक्षः प्रणम्य सुरसत्तमं ॥ ब्रह्माणं ब्राह्मणांस्तांश्च प्रययौ नर्मदां नदीं ॥ तत्र स्नात्वा शुभे तीर्थे स्थापयित्वा महेश्वरं ॥ मासमेकं समाराध्य जपध्यानपरायणः ॥ जगाम त्रिदिवावासं पूज्यमानोप्सरोगणैः ॥ तत्र तीर्थंसु विख्यातं ततः प्रभृति भारत ॥ तत्र स्नात्वा महाराज तर्पयित्वा पितॄन्सुरान् ॥ श्राद्धं कृत्वा च विधिवत् ब्राह्मणान् भोजयेच्छुचीन् ॥ तत्र यः पूजयेद्भक्त्या देवं शक्रेश्वरं नृप ॥ नानाविधोपहारैश्च दीपदानेन शक्तितः ॥ पारदार्यकृतैः पापैर्मुच्यते स नसंशयः ॥ तथान्यपापनिर्मुक्तः स्वर्गलोके महीयते ॥ इति श्रीरेवामाहात्म्ये शक्रेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः परं सोमतीर्थं गच्छेत्क्रमशतद्वये ॥ सोमेन स्थापितो यत्र शंकरः पापनाशनः ॥ युधिष्ठिर उवाच ॥ सोमेन स्थापितस्तत्र शंकरः केन हेतुना ॥ एतन्मे पृछतो ब्रूहि कारणं मुनिसत्तम ॥ मार्कंडेय उवाच ॥ बृहस्पतिर्देवगुरुर्यस्त्वेवांगिरसोमतः ॥ तस्य दारा

१ (सोमज)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृता तारा तां सोमो धर्षयद्बलात् ॥ गुरुदाराभिगमानात्पातित्यमुपजग्मिवान् ॥ सद्भिर्विगर्हितः सोमोः जातो यज्ञपथाद्बहिः ॥ वृ
क्षाण्यौषधयः पार्थ स्वामिनं नेपलेभिरे गुप्तं यज्ञ विधानं च कांदिशीकास्तथा द्विजाः ॥ न च स्फीतजला नद्य पर्जन्यो न ववर्ष
च ॥ न क्षोरिण्यस्तथा गावो जातं सोपद्रवं जगत् ॥ एवं वर्षायुते याते हाहाभूते जगत्पथा देवैर्ब्रह्मादिभि : पार्थ तथाब्रह्मर्षिभि
स्ततः ॥ देवर्षिभिर्मुनिगणै र्मिलित्वानुग्रहः कृतः सोमाय जगतः सांत्यै धर्मतत्वार्थवेदिभिः ॥ आमंत्र्य सोमं राजानं प्रोचुः सर्वे
सुरर्षयः ॥देवाऊचुः॥ सोमराज मेदनेदं कृतं कर्मविगर्हितं ॥ पातित्यजननं सम्यक् गुरोर्दारप्रधर्षणं ॥ राजा सर्वस्य लोकस्य न्याय
मार्गप्रवर्तकः स एवोन्मार्गगः स्थाने किं तत्र कुरुते जनः ॥ अग्नषोममयं विश्वं विनात्वां नैव सिध्यति ॥ हानिः सत्कर्मजा लोके
जन्मजातं विलक्षणं ॥ब्रह्माउवाच॥ सोम सर्वधुनी तीरे स्थापयित्वा महेश्वर ॥ नित्यं त्रिषवणस्नायी पूजयस्व धृतव्रतः॥ षण्मासा
त्पूजनस्नानध्यानजप्यादि कर्मभिः ॥ निंदिताकर्मणः सोम ततः पूतो भविष्यसि ॥ मार्कंडेय उवाच ॥ इत्युक्तो विधिमुख्यैः स
विधुर्गत्वा च नर्मदां ॥ तत्र स्नात्वा च संस्थाप्य शंकरं लोकशंकर ॥ पूजयामास विधिना जपध्यानपरायणः ॥ स राजा नियता
हारः षण्मासाच्छुद्धिमाप्तवान् ॥ ततो जगाम स्वं धाम सर्वदेवर्षिपूजितः ॥ ततः प्रभृति राजेंद्र सोमतीर्थमिदं श्रुतं ॥ तत्र तीर्थे तु
यो भक्त्या ब्राह्मणान् भोजयेच्छुचिः ॥ तेन सम्यग्विधानेन कोटिरेकेन भोजिता ॥ पादकोपानहौ छत्रं वस्त्रं वा कंबलाजिनं ॥ द
दाति विप्रमुख्याय तस्य तत्कोटिधा भवेत् ॥ सहस्रं तु सहस्राणामनृचां यस्तु भोजयेत् ॥ एकस्य मंत्रयुक्तस्य कलां नार्हति षो
डशीं ॥ एकं वा बह्वृचं तत्र भोजयेद्वेदपारगं ॥ शाखागतमथाध्वर्युं छेदोगं वा समासिकं ॥ अग्निहोत्रसहस्रस्य फलं संप्राप्यते बुधैः
॥ समंताद्वेदविदुषा तीर्थे वै भोजितेन हि ॥ संन्निरुद्धेंद्रियग्रामो यत्र यत्र वसेन्मुनिः ॥ तत्र तत्र कुरुक्षेत्रं नैमिषं
पुष्करं गया ॥ तस्मात्सर्वप्रयत्नेन ग्रहणे चंद्रसूर्ययोः ॥ संक्रांतौ च व्यतिपाते योगी भोज्यो विशेषतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संन्यासं कुरुते यस्तु तत्र तीर्थे युधिष्ठिर ॥ हंसयुक्तविमानेन स याति त्रिदिवं नरः ॥ सोमस्यानुचरो भुत्वा तेनैव सह मोदते ॥ इति श्रीरेवामाहात्म्ये सोमतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ नंदातीर्थमनुत्तमं ॥ यत्र सिद्धा महाभागा नंदा देवी शुभप्रभा ॥ येन रुद्रास्तथा साध्या वसवो मरुतां गणाः ॥ शक्राग्निवायुना सार्द्धं चंद्रादित्यौ तथैव च ॥ देवास्ते निर्जिताः सर्वे ब्रह्मविष्णुपुरोगमाः ॥ तस्मिन्महिषदैत्ये तु पुरा देवभयंकरे ॥ कृत्वा तु कदनं घोरं तदा देवीसुरेश्वरी ॥ शोणिताक्ता तथा स्विन्ना श्रांता च जयसुंदरी ॥ तत्र सा नर्मदातीरे सुनीरे विमले ह्रदे ॥ स्नाता तदा विशालाक्षी रेवया चाभिपूजिता ॥ ततः प्रभृति राजेंद्र तेन नंदाह्रदः स्मृतः॥सख्यं च रेवया सार्द्धं चक्रे सा पूजिता तथा॥नंदनात्सुरलोकानां नंदाख्यामगसच्छिवा ॥ ततः प्रभृति पूज्या सा रेवातीरे युधिष्ठिर ॥ तत्र तीर्थे नरः स्नात्वा नंदां संपूज्य भारत ॥ ददाति दानं विप्रेभ्यो सोश्वमेधफलं लभेत् ॥ विजयं सम वाप्नोति स्वर्गलोके महीयते ॥ श्राद्धं दत्वा पितॄणां चाप्यतुलां प्रीतिमावहेत् ॥ भैरवं चैव केदारं तथा रुद्रमहालयं ॥ नंदाह्रदश्च तुर्थस्यात्पंचमंचातिदुर्लभं ॥ बहवस्तं न जानंति कामरागविमोहिताः ॥ रेवायां तु ह्रदं पुण्यं सर्वपापप्रणाशनं ॥ तत्र तीर्थे तु यः स्नात्वा नंदामाराधयेच्छुचिः ॥ किं तस्य हिमवद्दुर्गगमनेन प्रयोजनं ॥ परमार्थमविज्ञाय पर्यटंति तमावृताः ॥ तेषां गमागमः पंथा श्रम एव हि केवलं ॥ पृथिव्यां सागरांतायां स्नानदानेन यत्फलं ॥ तत्फलं समवाप्नोति स्नात्वा नंदाह्रदे नरः ॥ इति श्रीनर्मदामाहात्म्ये नंदाह्रदतीर्थनाम षट्त्रिंशदधिकशततमोध्यायः ॥ १३६ ॥ ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ चक्रंतीर्थमनुत्तमं ॥ तदेव द्वादशीसंज्ञं सर्वपापप्रणाशनं ॥ पुरा वराहरूपेण विष्णुना निहतो सुरः ॥ हिरण्याक्षो महाराज चक्रेण द्वादशीदिने ॥ तेनासौ जयवाराहो द्वादश्यां विजयी यतः॥ चक्रं प्रक्षालितं चात्र वाराहेण महात्मना॥चक्रतीर्थं ततः प्रोक्तं द्वादशीतीर्थमित्य

१ नांद. २ ग्नणोर.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पि ॥ चक्रतीर्थे नरः स्नात्वा न पापैः परिभूयते ॥ श्राद्धेन तत्र दत्तेन पितॄणांतृप्तिरक्षया ॥ क्षरंति सर्वदानानि जपहोमबलिक्रियाः ॥ न क्षीयते हि राजेंद्र चक्रतीर्थे तु यत्कृतं ॥ यद्भूतं यद्भविष्यं च तीर्थमहात्म्यमुत्तमं ॥ कथितं ते मया सर्वं पृथग्भावेन भारत ॥ इति चक्रतीर्थं ॥ तत्रैव च महाभाग वाराहं तीर्थमुत्तमं ॥ जयं प्राप्तस्तपस्तत्वा वरहो यत्र वै हरिः ॥ संपूज्य जयवाराहं न शोच्यो जायते नरः ॥ जयं प्राप्नोति सर्वत्र रिपुभिर्नाभिभूयते ॥ नाकालमरणं चैव तथांते स्वर्गलोकभाक् ॥ जयवाराहमुद्दिश्य शक्तितो भोजये द्विजान् ॥ तीर्थेच जयवाराहे स्नात्वा सौभाग्यमाप्नुयात् ॥ संततिं समवाप्नोति श्राद्धं दत्वा युधिष्ठिर ॥ इति श्रीजयवाराहतीर्थं ॥ तत्रैव शिवतीर्थं वै वराहानुज्ञया द्विजैः ॥ स्थापितं शिवसानिध्याद्विजये विश्वरूपिणः ॥ हिरण्याक्षवधे जाते निहतेषु च शत्रुषु ॥ प्रीत्या प्राप्तः सिवस्तत्र गगनाद्दंष्ट्रिणो जये ॥ जितं भगवता तेन हरिणा लोकधारिणा ॥ तदा वराहरूपेण निहतेष्वसुरेषु च ॥ अभ्यागतः शिवस्तत्र प्रशसंसाथपो त्रिणं ॥ दत्वा जयाभिषेकं स तस्य देवर्षिभिः सह ॥ चकार जयतीर्थं तत्तस्य नाम्ना तदा शिवः ॥ वराहेणापि भगवान् प्रार्थितस्तीर्थहेतवे ॥ यत्र प्राप्तो महादेवो विश्वयोनिः सदाशिवः॥ तत्तीर्थमतुलं मन्ये सांनिधानं ततः कुरु ॥ शिवतीर्थे स्थापयिष्ये प्रसादं तत्र मे कुरु ॥ देह्यनुज्ञां हमेशान सर्वलोकहिताय वै ॥मार्कंडेय उवाच॥ एवमुक्तो वराहेण तथेत्याह तदा शिवः ॥ सदा संनिहितस्तुभ्यमित्युक्त्वांतरधीयत ॥ ततस्तत्र वराहेण सार्द्धं विप्रैर्महात्मना ॥ शिवः प्रतिष्ठितस्तत्र शिवतीर्थं ततोभवत् ॥ तत्र तीर्थे नरः स्नात्वा शिवं संपूज्य भक्तितः ॥ दीपार्घधूपनैवेद्यैः शिवलोके महीयते ॥योगिनस्तापसान्विप्रान्भोजयेच्छिवसन्निधौ॥परितोषं शिवो याति भक्त्या भारत पूजितः ॥ प्रसंन्ने शंकरे देवे किमन्यैस्तोषितैः सुरैः॥अप्रसन्ने महेशाने किमन्यै र्जायते सुरैः॥ इति श्रीरेवामात्म्ये शीवतीर्थं नाम ॥ मार्कंडेय उवाच ॥ ततस्तत्रैव राजेंद्र विख्यातं योधनीपुरं ॥ चक्र तीर्थादिपंचादियत्र संति समीपतः ॥ रामकेशवतीर्थं

१ (त्रणोर)

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि प्रथमं यत्र भारत ॥ द्वितीयं रुक्मिणीतीर्थं तृतीयं शिवसंज्ञितं ॥ चतुर्थं जयवाराहं चक्रतीर्थं च पंचमं ॥ इत्युत्तमा पंचतीर्थी विख्याता योधनीपुरे ॥ यत्र सिद्धौ पुरा कल्पे नरनारायणावुभौ ॥ तत्र तीर्थे तपस्तप्त्वा संग्रामे देवदानवे ॥ जयं प्राप्तौ महात्मानौ नरनारायणावृषी ॥ तथा त्रेतायुगेपार्थ तौ देवौ रामलक्ष्मणौ ॥ तत्र तीर्थे पुनः स्नात्वा रावणं जघ्नतुर्मृधे ॥ राक्षसानां क्षयं कृत्वा जयं प्राप्तौ युधिष्ठिर ॥ तथैव द्वापरप्रांते संभूतौ रामकेशवौ ॥ वसुदेवकुले जातौ दुष्करं कर्म चक्रतुः ॥ नरकं कालनेमिं च कंसं चाणूरमुष्टिकौ ॥ केशिनं शिशुपालं च जरासंधं च जघ्नतुः ॥ तीर्थस्यास्य प्रभावेन तपः कृत्वा पुरानघ ॥ पूजयित्वा द्विजान् भक्त्या जयिनौ द्वाराकाश्रितौ ॥ ऋषिभिस्तत्र लोकैश्च तन्मूर्तीभक्तितोर्चिते ॥ रामकेशवतीर्थं हि ततः प्रभृति विश्रुतं ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्बलकेशवौ ॥ तेन देवो जगद्धाता पूजितस्त्रिगुणात्मकः ॥ उपोष्य यो नरो भक्त्या तत्र कुर्यात्प्रजागरं ॥ मुच्यते सर्वपापेभ्यो गायन् शृण्वन् शुभां कथां ॥ यावतस्तत्रतीर्थे तु वृक्षान्पश्यति मानवः ॥ तावत्पापानि कंपंते शरीरे तस्य भारत ॥ प्रातरुत्थाय ये केचित्पश्यंति बलकेशवौ ॥ नमर्त्यास्ते तु वै देवा तुल्य देवेन चक्रिणा ॥ ते पूज्यास्ते नमस्कार्यास्तेषां जन्म सुजीवितं ॥ ये नमंति जगन्नाथं बलकेशवरूपिणं ॥ तत्र तीर्थे च यद्दानं स्नानं देवार्चनं नृप ॥ क्रियते तत्फलं सर्वमक्षायायोपकल्पते ॥ अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवीसूर्यसूताश्च गावः ॥ लोकस्त्रयस्तेन भवंति दत्ता यः कांचनं गां च महीं च दद्यात् ॥ एतत्ते कथितं राजन् तीर्थमहात्म्यमुत्तमं ॥ अतीतं च भविष्यं च वर्त्तमानं महत्फलं ॥ श्रुत्वा वापि पठित्वा वा सर्वपापैः प्रमुच्यते ॥ इति श्रीरेवामाहात्म्ये योधनीपुररामकेशवतीर्थं ॥ मार्कंडेय उवाच ततो गच्छेन्महाराज रुक्मिणीतीर्थमुत्तमं ॥ तत्रैव पंचमं पुण्यं ख्यातं लोकत्रये शुभं ॥ तत्र तीर्थे नरः स्नात्वा रूपवान्सुभगो भवेत् ॥ अष्टम्यां च चतुर्दश्यां तृतीयायां विशेषतः ॥ स्नानं समाचरेत्तत्र नचेहा जायते पुनः॥रुक्मिणीतीर्थमासाद्य स्नात्वा दत्वा च कांचनं ॥ तत्तीर्थस्य प्रभावेन शो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कं नाप्नोति मानवः ॥ पुत्रभृत्यसमायुक्तः सुखसौभाग्यमाप्नुयात् ॥ मार्कंडेय उवाच ॥ कथयामि यथावृत्तमितिहासं पुरातनं ॥ चि
त्रंचरित्रं रुक्मिण्याः पवित्रं च मनोहरं ॥ कथितं पूर्वतो वृद्धैः पारंपर्येण भारत ॥ तत्तेहं संप्रवक्ष्यामि शृणुष्वैकाग्रमानसः ॥ न
गरं कुंडिनं नाम भिष्मको ह्युपभुंजते ॥ हस्त्यश्वरथसंपन्नो धनधान्यसमन्वितः बहुपत्तिगुणाकीर्णो बहुभृत्यसुहृत्सखः ॥
तस्य भार्या महादेवी प्राणेभ्योपि गरीयसी ॥ तस्यां स जनयामास पुत्रमेकं तु रुक्मकं ॥ पुत्रीं च रुक्मिणीं
नाम द्वितीयां पार्थिवर्षभ ॥ तदाशरीरिणी वाचा राजानं तमुवाचह ॥ चतुर्भुजाय दातव्या कन्येयं राजसत्तम ॥
एवं तद्वचनं श्रुत्वा हृष्टो राजा प्रियान्वितः ॥ ब्राह्मणैः सह विद्वद्भिः प्रविष्टः सूतिकागृहं ॥ ब्राह्मणान्वाचयित्वा सा कृता नाम्ना
तु रुक्मिणी ॥ यतः सुवर्णतिलकं जन्मना सह भारत ॥ ततः सा रुक्मिणी नाम्ना ब्राह्मणैः कीर्तिता तदा ॥ ततः सा कालप
र्याये अष्टवर्षा व्यजायत ॥ पूर्वोक्तमशरीरिण्यास्तद्वाक्यं भरतर्षभ ॥ स्मृत्वा स्मृत्वा तु तद्राजा चिंतयामास वै तदा ॥ कस्येयं
दीयते कन्या को भवेच्च चतुर्भुजः ॥ एतस्मिन्नंतरे तावद्रैवतात्पर्वतोत्तमात् ॥ मुख्यश्चेदिपतिस्तत्र दमघोषः समागतः ॥ प्रविष्टः पुर
मार्गेण यत्र राजा स भीष्मकः ॥ तं दृष्ट्वा स्वागतेनाशु पूजयामास वै तदा ॥ आसनं विपुलं तस्य सभामध्ये निवेश्य च ॥ प्रप
च्छ कुशलं राजा दमघोषः श्रियायुतः ॥ कुशलं ते महाराज सर्वत्र विजयश्च ते ॥ त्वद्दर्शनोत्सुकश्चाहं शोभनं वै त्वया कृतं ॥
कन्या मदीया राजेंद्र अष्टवर्षा व्यजायत ॥ चतुर्भुजस्य दातव्या यतो वागाह दैवीकी ॥ मार्कंडेय उवाच ॥ भीष्मकस्य वचः श्रु
त्वा दमघोषोब्रवीदिदं ॥ चतुर्भुजो मम सुतास्त्रिषु लोकेषु विश्रुतः ॥ तस्येयं दीयतां कन्या शिशुपालस्य भीष्मक ॥ ततस्त्वद्वचनं
श्रुत्वा दमघोषमुखाच्च्युतं ॥ भीष्मकेन ततो दत्ता शिशुपालस्य भारत ॥ प्रारब्धं शोभनं तत्र भीष्मकेन युधिष्ठिर ॥ दिग्देशांतर
जाश्चैव वसंति स्वगोत्रजाः ॥ निमंत्रिता हि ते सर्वे आजग्मुश्च यथाक्रमं ॥ ततो यादववंशस्य तिलकौ बलकेशवौ ॥ निमंत्रितौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समायातौ कुंडिनं पुरमुत्तमं ॥ पूजितौ च यथान्यायं भीष्मकेन यदूत्तमौ ॥ ततः प्रदोषसमये रुक्मिणी कामरूपिणी ॥ सखी
भिः सहिता पार्थ आगता देवपूजने ॥ गीतवादीत्रनिर्घोषैर्नगरोपांतदेवतां॥ अंबिकां नाम तेषां वै कुलधर्मोयमुत्तमः॥ उद्वाहपूर्वे दि
वसे कन्या तां पूजयेदिति ॥ तत्र तौ बलदाशार्हौ वेषप्रावर्तधारिणौ ॥ विनोदाद्द्रष्टुमायातौ तया पूर्वश्रुतौ नृप ॥ तत्र सा वीक्ष्य
देवेशं गोपवेषधरं प्रभुं ॥ तं दृष्ट्वा मोहमापन्ना कामेन कलुषीकृता ॥ केशवोपि च तां दृष्ट्वा संकर्षणमुवाच ह ॥ स्त्रीरत्नमतिकल्या
णी हर्तव्येति मतिर्मम ॥ केशवस्य वचः श्रुत्वा बलदेवोब्रवीदिदं ॥ एवं भवतु चेत्तुभ्यं रोचते रत्नसंग्रहः ॥ गच्छ
कृष्ण महाबाहो स्त्रीरत्नं चाशु गृह्यतां ॥ अहं हि तव मार्गेण समागच्छमि पृष्ठतः ॥ दानवान् मानवान् सर्वा
न्छम्भयुद्धेन रोधयन् ॥ संकर्षणमतं ज्ञात्वा केशवः केशिसूदनः ॥ ययौ कन्यां गृहीत्वा तु रथमारोप्य सत्वरः ॥ निर्ग
च्छत्पुरमार्गेण पश्यतामेव धीरधीः ॥ पक्षिध्वजो रथो याति वेगेनेवानिलोयथा ॥ हाहारावस्ततो जातस्तस्मिन्वै कुंडि
ने पुरे ॥ कुर्वतश्चैव राजानो दानवांशा हि ये भुवि ॥ मिलितास्तत्र ये केपि शिशुपालपुरः सराः॥निर्गताः सर्वतः कुद्धा उद्वेला इ
व चार्णवाः ॥ गर्जमाना महाशद्बैर्धावंतो रथवर्त्मनि ॥ बलभद्रं ततः प्राप्ताः रथमार्गानुगामिनं ॥ तेषांयुद्धं महाघोरमभूल्लोकक्षयं
करं ॥ तारकामयमित्येतत्रिषुलोकेषुविश्रुतं ॥ गदाहस्तो महाबाहुस्त्रलोक्याप्रतिमो बली ॥ हलेनाकृष्य समरे गदयाभिजिघांसति
॥ नशक्ता दानवा हंतुं बलभद्रं महाबलं ॥ बभंज तान्नृपान्संख्ये तस्थौ गिरिरिवाचलः ॥ तं ज्ञात्वातिबलं क्रूरं दुर्द्धर्षं त्रिदशैरपि ॥
भीष्मकस्य सुतः क्रुद्धो रुक्म्यो नाम महायशाः ॥ नराणामतिशूराणां अक्षौहिण्या समन्वितः ॥ बलभद्रमतिक्रम्य त्यक्त्वायुद्धंनिरा
मिषं ॥ तं युद्धे वंचयित्वा तु रथमार्गेण निःसृतः॥केशवोपि ततो राजन् तां देवीमपहृत्य च ॥ विंध्यमुल्लंध्य सहसा त्रैलोक्य गुरुर
व्ययः ॥ नर्मदातटमायातो यत्र सिद्धः पुरायुगे ॥ अजेयोयेन संजातस्तस्य तीर्थप्रभावतः ॥ जयं च प्राप्तवान् युद्धे हत्वा चैवासुरीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चमूं ॥ एतस्मात् कारणात्तात योध नीपुरमुच्यते ॥ रुक्मोपिन्नृपपुत्री वै प्राप्तस्वंस्थानमुत्तमं ॥ अच्युतं प्राह क्रुद्धस्तु तिष्ठातिष्ठेति
मात्रज ॥ अद्य त्वां निशितैर्बाणैः प्रेषयामि यमक्षयं ॥ एवं परस्परं तौहि प्रजगर्जतुराहवे चिक्षेप शरजालानि केशवं प्रति रुक्मकः
॥ तानाचिंत्यशरांस्तस्य केशवः केशिसूदनः ॥ शरं मुमोच रुक्माय मुकुटं तेन चिच्छिदे ॥ तयोर्युद्धमभूत्तत्र तारकामयसन्निभं ॥
ततो रुक्मेन क्रुद्धेन गृहीत्वा धनुरुत्तमं ॥ सायकेन सतीक्ष्णेनाभिन्नः कृष्णोपि वक्षसि ॥ततो विष्णुः स्वयं क्रुद्धश्चक्रं गृह्य सुदर्शनं॥
प्रहरिष्यत्यमुया यावत् रुक्मिण्या विधृतः करे ॥नहिजानात्ययंदेव चतुर्बाहुंजनार्दनं ॥ दर्शयस्व स्वकं रूपं दयं कृत्वाममोपरि ॥ एवमु
क्तस्तु रुक्मिण्या दर्शयामास भारत ॥ देवापि दृष्ट्वा यद्रूपं स्तुवंत्याकाशसंस्थिताः ॥ दिव्यं चक्षुस्तदा देवो ददौ रुक्मस्य
भारत ॥ रुक्मक उवाच ॥ यन्मया मंदभाग्येन पापयुक्तेन केशव ॥ सायकैराहतोत्यर्थं तत्सर्वं क्षंतुमर्हसि ॥ पूर्वं
दत्ता स्वयं देवैर्जानकी जनकात्मजा ॥ मयापि दत्ता देवेश तथेयं रुक्मिणी विभो ॥ अहो भाग्यं परं मेद्य यद्विष्णुर्दृक्पथं गतः
॥ ते धन्यास्ते कृतात्मानो ये त्वां ज्ञात्वार्चयंति हि ॥ शाठ्येनापि सुरश्रेष्ठ दंभलोभादिनापिवा ॥ धन्येयं धरणी मन्ये पुरं वंश
कुलं हरे ॥ लोकश्च लोकनाथाद्यपिता माता च पूजिताः ॥ विश्वरस्यतीर्णस्त्वं दृश्यो येषां जनार्दन ॥ धन्यं ममापि सकलमेत
त्पूर्वोदितं तथा॥धान्योहं मे स्वसा धन्या विरोधश्च त्वया सह ॥ मत्समो नास्ति लोकेस्मिन् यतस्त्वं मे स्वसापतिः ॥ उद्वाहय य
थान्यायं विधिदृष्टेन कर्मणा ॥ इत्युक्त्वा स रथाच्छीघ्रमवस्कंद्याथ रुमयकः ॥ दंडवत्प्रणतो भूमौ धन्यं दिनमिति ब्रुवन् ॥ रुक्मस्य
वचनं श्रुत्वा ततस्तुष्टो जगद्गुरुः ॥ अब्रवीद्देवदेवेशो रुक्मं नृपतिपुत्रकं ॥ श्रीकृष्ण उवाच ॥ गच्छ त्वं भीष्मकपुरं कुरुराज्यमकं
टकं ॥ सर्वं वदयथावृत्तंपुरतस्तेपितुर्गतः ॥ स्मरेथाः कार्ययोगे मां संकटे भविता शुभं ॥ मार्कंडेय उवाच ॥ केशवस्य वचः श्रुत्वा
स रुक्मी राजपुत्रकः ॥तं प्रणम्य जगन्नाथं तथेत्याह कृतांजलिः ॥ पदपद्मभवां सेवामभीष्मन्नपि वै चिरं ॥ प्रस्थापितः पुरं प्रीत्या

CC-0. In Public Domain. Digitization by eGangotri

जगाम स मुदा युतः ॥ गते कृष्णस्तदा रुक्मे समामंत्र्य द्विजोत्तमान् ॥ मरीचिमत्र्यंगिरीसं पुलस्त्यं पुलहं क्रतुं ॥ वसिष्ठंच महा
प्राज्ञमित्येते सप्त मानसाः ॥ सप्त ब्रह्मसुताः पार्थ ब्राह्मणा इति निश्चिताः ॥ पुराणे ब्रह्मसंभूताः सत्यवंतो महामते ॥ नर्मदा
तीरमायाता ध्याताः कृष्णेन पांडव ॥ तपःस्वाध्यायनिरता जपहोमपरायणाः ॥ निमंत्रितास्तु राजेंद्र केशवेन तदानघाः ॥ श्रा
द्धं कृत्वा यथान्यायं ब्रह्मोक्तविधिना ततः ॥ स्वयं संपूजयित्वा तान् सप्तब्रह्मर्षिपुंगवान् ॥ प्रददौ द्वादशग्रामान् तेभ्यस्तत्र जना
र्दनः ॥ उक्तं देवेन च तदा दत्वा दानं युधिष्ठिर ॥ यावच्चंद्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ तावद्दानं हि युष्माकं परिपंथि न
कश्चन ॥ ममदत्तं पालयंतो राजानो गतकल्मषाः ॥ तेशामहं स्वस्तियुक्तो दास्यामि परमां गतिं ॥ यावद्धि यंति भूतानि महान्य
पि तु पंच च ॥ तावत्ते दिवि मोदंते मम दत्तस्य पालकाः ॥ यश्च लोपयते मूढो राजा वान्यो महितले ॥ स वसेन्नरके घोरे
यावदाहूतसंप्लवं ॥ स्वदत्तां परदत्तां वा यो हरेत वसुंधरां ॥ यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ अन्यायेन हृता भू
मी अन्यायेन च हारिता ॥ हरन्वा हारयन्वापि विष्ठायां जायते कृमिः ॥ षष्टिवर्षसहस्राणि स्वर्गेतिष्ठति भूमिदः ॥ आछेत्ता
चानुमंता च तान्येव नरके वसेत् ॥ यानीह दत्तानि पुरा नरेंद्रैर्दानानि धर्मार्थयशस्कराणि ॥ निर्माल्यपुष्पप्रतिमानि तानि को
नाम साधुः पुनरा ददीत ॥ एवं तान्पुजयित्वाथ सम्यक् न्यायेन वाडवान् ॥ रुक्मिण्याः केशवः पाणिं जग्राह विधिवत्प्रभुः ॥
रेवातीरे तदा तत्र मुनीनां सन्निधौ नृप ॥ बलदेवोपि जित्वा तानसुरांशान्नरान् तदा ॥ तत्स्थानमागमत्तद्वत्कृत्वा कार्थ सुशोभ
नं ॥ ततस्तौ द्वारकां यातौ कृष्णसंकर्षणावुभौ ॥ गच्छमानं तु तं दृष्ट्वा केशवं क्लेशनाशनं ॥ ते विप्राःसत्यवंतश्च निर्गताः सं
सितव्रताः ॥ आगच्छमानांस्तान्दृष्ट्वा रथमार्गेण वाडवान् ॥ मुहुर्तमप्यविश्रम्य केशवो वाक्यमब्रवीत् ॥ किममार्गेण गच्छामः
कुमुहुर्तेन वा द्विजाः ॥ पूजितास्थ यथान्यायं मनदत्तेषु तिष्ठत ॥ देवस्य वचनं श्रुत्वा ऋषयो वाक्यमब्रुवन् ॥ कल्पकोटिसहस्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु सत्यशीलादितार्थितः ॥ दुःप्राप्योसि मनुष्याणां प्राप्तो नस्त्यजसे हरे ॥ कथमद्य महाविष्णो क्वप्राप्यस्त्वं पुनर्हि नः ॥ ब्रा
ह्मणानां वचः श्रुत्वा विष्णुर्वचन मब्रवीत् ॥ श्रीकृष्ण उवाच ॥ मथुरायां द्वारवत्यां योधनीपुर एव च ॥ त्रिकालमेषु स्था
स्यामि सत्यं सत्यं मयोदितं ॥ अत्रैवाहं सदाध्येयो भवद्भिर्द्विजसत्तमाः ॥ यत्र मे रुक्मिणी भार्या विधिनोद्वाहिताभवत् ॥
स्थानमेतत्प्रियं मह्यं प्रियाप्राप्तिकरं द्विजाः ॥ नत्याज्यमेतद्धि मया कलावपि कदा च न ॥ रेवातीरं प्रियाप्राप्तिर्भवतां च समाग
मः ॥ एतदेवाकुलं तीर्थं तुलाचास्य न विद्यते ॥ मार्कंडेय उवाच ॥ एवमुक्तास्ततो विप्रा योधनिपुरमागताः ॥ स्थितो देवस्त्रि
भागेन प्रादुर्भावे तु माथुरे ॥ एवं ते कथितं सर्वं तीर्थस्योत्पत्तिकारणं ॥ भूतं भव्यं च विशदं वर्तमानं तथापरं ॥ यत् श्रुत्वा स
र्वपापेभ्यो मुच्यते नात्र संशयः ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्बलकेशवौ ॥ तेन देवो जगद्धाता पूजितस्त्रिगुणात्मवान् ॥ उ
पोष्य यो नरो भक्त्या स्वयं कुर्यात्प्रदक्षिणं ॥ मुच्यते सर्वपापेभ्यो नात्र कार्या विचारणा ॥ यावता तत्र तीर्थे तु वृक्षान्पश्यंति
मानवाः ॥ तावत्पापैर्विमुच्यंते भ्रूणहत्यासमैरपि ॥ प्रातरुत्थाय ये केचित्पश्यंति बलकेशवौ ॥ ते तेन सदृशाः सर्वे देवदेवेन च
क्रिणा ॥ ते पुज्यास्ते नमस्कार्यास्तेषां जन्म सुजीवितं ॥ ये नमंति जगन्नाथं देवं नारायणं हरीं ॥ तत्र तीर्थे तु यद्दानं स्नानं
श्राद्धं सुरार्चनं ॥ तत्सर्वमक्षयं तस्य यथा मे शंकरोब्रवीत् ॥ प्रविश्याग्नौ मृतानां च यत्फलं जायते नृप ॥ तच्छृणुष्व
समासेन प्रोच्यमानं मया यथा ॥ विमानेनार्कवर्णेन किंकिणीजालशोभिना ॥ अग्नेयभवनेनूनं मोदते कालमीप्सितं
॥ तथा जलमृतानां च योधन्यां नृपसत्तम ॥ वासः स्याद्वारुणे लोके यावदाहुतसंप्लवं ॥ अनाशके मृतानां च त
स्मिन्तीर्थे युधिष्ठिर ॥ सत्यमेतन्मया प्रोक्तं गतिः स्यादानिवर्तिका ॥ तत्र तीर्थे तुयो दद्यात्कपिलादानमुत्तमं ॥ विधानेन तु
संयुक्तं शृणु तस्यापि यत्फलं ॥ यावंति तस्या रोमाणि तत्प्रसूतेश्च भारत ॥ तावत्ते दिविमोदंति सर्वकामैः सुपूजिताः ॥ तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थे तु यो दद्या दुपानद्वस्त्रमेव च ॥ धान्यानि कंबलं शुभ्रं गां च पार्थ पयस्विनीं ॥ पूर्वोक्तां गुणसंयुक्तां कपिलां वान्यवर्णजां ॥ तस्य तीर्थप्रभावेन लभते स्वर्गमीप्सितं ॥ प्रयागे यद्भवेत्पुण्यं गयायां च त्रिपुष्करे ॥ कुरुक्षेत्रे च राजेंद्र राहुग्रस्ते दिवाकरे ॥ प्रभासे चापि यत्पुण्यं सोमपर्वाणि भारत ॥ तत्पुण्यं स्नानमात्रेण तत्र तीर्थे न संशयः ॥ द्वादश्यां तु नरः स्नान्वा नमस्कृत्य जनार्दनं ॥ भक्त्या विप्रान् भोजयित्वा अवाप्तं जन्मनः फलं ॥ संक्रांतौ च व्यतीपाते द्वादश्यामयनद्वये ॥ अष्टम्यां च चतुर्दश्यां पूर्णमास्यां च वैधृते ॥ ब्राह्मणं भोजयित्वैकं कोटीर्भवति भोजिता ॥ पृथिव्यां यानि तीर्थानि समुद्रांतानि भारत ॥ आगच्छंति हि सर्वाणि द्वादश्यां तानि निश्चितं ॥ न क्षीयंते च दानानि यज्ञहोमबलिक्रियाः ॥ यद्भूतं यद्भविष्यं च तीर्थमहात्म्यमुत्तमं ॥ कथितं ते मया सर्वं पृथक्भावेन भारत ॥ इति श्रीवायुपुराणे शिवसंहितायां श्रीनर्मदामाहात्म्यं रुक्मिणितीर्थं नाम सप्तत्रिंशदधिकशततमोध्याय॥ १३७ ॥ मार्कंडेय उवाच ॥ आस्माहकं ततो गच्छेत्पितृतीर्थमनुत्तमं ॥ प्रेतत्वाद्यत्र मुच्यंते पिंडेनकेन पूर्वजाः ॥ युधिष्ठिर उवाच ॥ अस्माहकस्य माहात्म्यं कथयस्व ममानघ॥स्नानदानार्चने पुण्यं तथा पिंडोदकेन च ॥मार्कंडेय उ०॥ पुरा कल्पे नृपश्रेष्ठ पितृदेवर्षिसंगमे ॥ प्रश्नोयं पृच्छितस्तात यथात्वमनुपृच्छासि ॥ तमहं ते प्रवक्ष्यामि शृणु यत्नेन पांडव ॥ सतीर्थाः सागराः सप्त प्रयागं पुष्करं गया॥सर्वतीर्था निसं[1] त्यत्र नात्र कार्या विचारणा॥सोमनाथं तु विख्यातं सोमराज्ञा प्रतिष्ठितं ॥ सोमग्रहेऽत्र यत्पुण्यं तत्पुण्यं लभते नरः॥मासांते च महाबाहो ध्यायंतीहात्मसंततिं॥कश्चिदस्मत्कुले पिंडं दास्यती पितामहाः॥प्रपितामहा निरीक्षंते श्रुतिरेषा सनातनी॥एवं ब्रुवंति ते देवा ऋषयश्च तपोधनाः॥सकृत्पिंडोदकेनैव शृणुपार्थिव यत्फलं॥द्वादशाब्द राजेंद्र यागाष्टस्य फलं लभेत् ॥अस्माहके महाराज पूर्वजास्तु युगे युगे॥सर्वदा ह्यवलोकंते आगच्छंतं स्वगोत्रजं॥भवेद्यदि महाराज अमावास्या अमाहके॥कुर्वते स्नान

१ धर्मशाळा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दानादि पितृश्राद्धं च तर्पणं॥ते सर्वे पापनिर्मुक्ताः सर्वान्कामान् लभंति हि॥जलमध्ये महाराज वन्हितीर्थं च तिष्ठति ॥दर्शनात्तस्य तीर्थस्य नश्यते पापसंचयः॥स्नानमात्रेण तत्रैव ब्रह्महत्यां व्यपोहति॥शुक्लांबरधरो नित्यं संयतात्मा जितेंद्रियः ॥ एकभुक् निवसेत्तत्र मासं तीर्थस्य संनिधौ॥सुवर्णालंकृतं दत्वा कन्याशतफलं लभेत्॥पृथिव्यामासमुद्रायां महाभोगपतिर्भवेत् ॥धनधान्यसमायुक्तो दाता यज्वा च धार्मिकः ॥ उपास्य च शुचिः संध्यां ब्रह्मलोकमवाप्नुयात् ॥ अस्माहके महाराज यस्तु प्राणान्परित्यजेत् ॥ षष्ठिवर्षसहस्राणि रुद्रलोके महियते ॥ ततः स्वर्गात्परिभ्रष्टः क्षीणे पुण्ये नृपो भवेत् ॥ सुवर्णमाणि मुक्ताढ्ये कुले महतिरूपवान् ॥ गजाश्वरथसंपन्नश्चिरमायुरवाप्नुयात् ॥ स्नानं कृत्वा च यस्तत्र रुद्राध्यायं पठेद्द्विजः ॥ सूक्तं वा पौरुषं पार्थ शिवसंकल्प संयुतं ॥ गायत्रीजाप्यमथवा यदि वा पितृसंहितं ॥ अंतर्जले वा त्रिपदां सोश्वमेधफलं लभेत् ॥धनाढ्यो रूपवान्दक्षो दाता भवति धार्मिकः ॥ चतुर्वेदेषु यत्पुण्यं सत्यवादिषु यत्फलं ॥ तत्फलं लभते राजन् तस्मिन्तीर्थेन संशयः ॥ तीर्थानां परमं तीर्थं निर्मितं शंभुना पुरा ॥ जपेत्तत्रेश्वरं विष्णुमेकचित्तेन यो नृप ॥ विश्वेदेवाश्च पितरः सचंद्राः सदिवाकराः ॥ मरिचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥ प्रचेताश्च वसिष्ठश्च भृगुर्गौतमनारदौ ॥ च्यवनो गालवश्चैव वामदेवो महानृषिः ॥ वालिखिल्याः सगांधारास्तृणबिंदुश्च जाजलिः ॥ उद्दालकः सुनंदश्च ऋष्यशृंगोथ देवलः ॥ शुक्रश्चैव भरद्वाजो वात्स्यो वात्स्यायनस्तथा ॥ मित्रावरुणजोगस्त्यो विश्वामित्रो महानृषिः सनातनश्च कपिलो वोढः पंचशिषस्तथा ॥ अन्येच बहवस्तत्र ऋषयः शंसितव्रताः ॥ क्रीडंति देवताः सिद्धा मुनयश्च तपोधनाः ॥ मनुष्या योगिनस्तद्वत्पितरश्च पितामहाः ॥ अमाहके नरश्रेष्ठ सर्वे तिष्ठंति सुव्रताः ॥ पितरः पितामहाश्चैव तथैव प्रपितामहाः ॥ येषांकृतमुपस्थायि सुकृतं वापि दुष्कृतं ॥ अक्षयं तत्र तत्सर्वं यत्त्वेवामाहके कृतं ॥ मातरं पितरं त्यक्त्वा सुहृद्बंधुजनं तथा ॥ धनं धान्यं प्रियान्पुत्रान्तथा देहं नृपोत्तमा प्रयाति वायुभूतस्तु शुभाशुभसमान्वित : ॥ अदृश्यः सर्वभूतानां जीवः कर्माभिकर्षितः ॥

CC-0. In Public Domain. Digitization by eGangotri

शुभाशुभगतिं प्राप्तः कर्मणा स्वेन पार्थिव ॥ शुभाशुभे बंधुजानो जायते वै न भोग भाक् ॥ एकः प्रसूयते जंतुरेक एव प्रलीयते
॥ एको न भुक्ते सुकृतमेक एवच दुःकृतं ॥ एषत्वयोक्तो नृपते महाप्रश्नः श्रुतो मया ॥ पितामहमुखोद्गीतं श्रुतं ते कथयाम्यहं ॥ य
न्मां पितामहः पूर्वमुवाच ऋषिसंन्निधौ ॥ नचात्मनः कश्चिन्न बंधुर्न सुहृत्कचित् ॥ को जंतुः कोभवेत्प्राणी को जीवः पांचिभौति
के ॥ कोत्त्यत्र जायते वायुः पंचभुताभिवेष्टितः ॥ यद्येवं हेतुवादः स्याल्लोकस्यास्य नरेश्वर ॥ अमर्यादा भवन्नूनं विनश्यति चराच
रं ॥ एवं ज्ञात्वा महिपाल समस्तैर्लोकपूर्वजैः ॥ मर्यादा स्थापिता लोके यथा धर्मो न नश्यति ॥ धर्मे नष्टे मनुष्याणामधर्मो भि
भवेत्पुनः ॥ ततः स्वधर्मचलनान्नरके पतनं ध्रुवं ॥ लोको निरंकुशः सर्वो मर्यादालंघने रतः ॥ मर्यादास्थापितातस्माच्छास्त्रं वी
क्ष्य महार्षिभिः ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं ॥ पिंडोदकप्रदानं च तथैवातिथिपूजनं ॥ पितरः पितामहा श्चैव त
थैव प्रपितामहाः ॥ त्रयो देवा स्मृतास्तात ब्रह्मविष्णुमहेश्वराः॥ पूजितैः पूजिताः सर्वे तथा माता महास्त्रयः॥ तस्मात्सर्व प्रयत्नेन
श्रुतिस्मृतिपुराणजं ॥ धर्मं समाचरेन्नित्यमेवं पापैर्न लिप्यते ॥ श्रुतिस्मृत्युदितं धर्मं मनसापि न लंघयेत् ॥ इह लोके परे चैव
यदिच्छेच्छ्रेय आत्मनः॥ पितापुत्रौ यथाप्येकौ बिंबाद्बिंबमिवोद्धृतौ ॥ विभक्तो च विभक्तो वा श्रुतिस्मृत्यर्थतस्तथा ॥ उद्धरेदात्मना
त्मानमात्म नमवसादयेत् ॥ पिंडोदकप्रदानाच्च कृते पार्थनसंशयः ॥ एवं ज्ञात्वा प्रयत्नेन पिंडोदकप्रदो भव ॥ आयुः कीर्त्तिर्यशस्ते
जः संततिश्चैव जायते ॥ पृथिव्यां सागरांतायां पितृक्षेत्राणि यानिच ॥ तानि ते संप्रवक्ष्यामि येषुदत्तं महाफलं ॥ गयायां पुष्करे
चैवनैमिषे चक्रसंभवे ॥ संनिहत्या कुरुक्षेत्रेप्रभासेषु युधिष्ठिर ॥ पिंडोदकप्रदानेन यत्फलं कथितं वुधैः ॥अमाहके तदाप्नोति नर्मदा
यां न संशयः ॥ तत्र ब्रह्मा च बिष्णुश्च रुद्रश्चैवोमया सह ॥ इंद्राद्या देवताः सर्वा पितराऋषयस्तथा ॥ सागराः सरितश्चैव
पर्वताश्च बलाहकाः ॥ तिष्ठंति पितृभिः सार्द्धमधिकं तेन तं नृप ॥ स्थिता ब्रह्मशिला तत्र गजकुंभनिभा शुभा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कलौ न दृश्यते तादृक् प्रधानं यद्वयासिरः ॥ वैशाखे मासि संप्राप्ते अमावास्यां नृपोत्तम ॥ व्याप्य सा तिष्ठते तीर्थे गजकुंभ नि
भा शिला॥तच्च गव्यूतिमात्रं हि तीर्थं तात प्रचक्षते ॥ तस्मिन्दिने तत्र गत्वा यस्तु श्राद्धप्रदो भवेत् ॥ पितॄणां जायते तृप्तिरक्षया
शतवार्षिकी ॥ अन्यस्यामप्यमायां वा तत्र स्नात्वा जितेंद्रियः ॥ यः कुर्याद्विधिना श्राद्धं तस्य पुण्यफलं शृणु ॥ अग्निष्टोमाश्वमे
धानां बाजपेयस्य यत्फलं ॥ तत्फलं समवाप्नोति नात्र कार्या विचारणा ॥ रौरवादिषु सर्वेषु नरकेषु च ये स्थिताः॥ पितरः पिता
महा गोत्रे मातृके पैतृके तथा॥ पिंडदानेन वैकेन तर्पणेन विशेषतः ॥ क्रीडंति पितृलोकस्था यावदाहूतसंप्लवं ॥ सुकर्मस्था विकर्म
स्था ये जाताः प्रेतयोनयः ॥ पिंडेनैकेन मुच्यंते तेपि तत्र न संशयः ॥ अमानाम कला भानोर्यदा चरति तां विधुः ॥ तदा श्रद्धा
न्वितैः पार्थ पितॄणां दत्तमक्षयं ॥ अमानिवेशिता यस्मादत्र तीर्थे पुरातनैः ॥ पितृभिः कव्यवाहाद्यैस्तेन प्रोक्तममाहकं ॥
अमागतिरिति ख्याता शुद्धलोकप्रदायिका ॥ अहकं प्रोच्यते स्थानं गतेरमरदर्शितं ॥ गंतेः स्थानं विनिर्दिष्टममाहकमतो नृप ॥
अमाहके शिला दिव्या तिष्ठते गजसंनिभा ॥ ब्रह्मणा निर्मिता पार्थ सर्वपापक्षयंकरी ॥ तस्योपरि यथान्यायं पितॄनुद्दिश्य भारत
॥ दक्षिणाग्रेषु दर्भेषु दद्यात्पिंडान्विचक्षणः ॥ भूमौ चान्नेन विधिनाश्राद्धदः शुचिराहतः ॥ श्राद्धिभ्यो वस्त्रयुग्मानि छत्रोपानद्युगा
नि च ॥ दक्षिणा विधिवद्देया पितॄनुद्दिश्य शक्तितः ॥ यो ददाति द्विजश्रेष्ठे दातुः पुण्यफलं शृणु ॥ तस्य ते शतमद्वानि तृप्तिं यां
ति न संशयः ॥ अमाहके सदा राजन् पितरश्च पितामहाः ॥ वायुभूता निरीक्षंते आगच्छंतं स्वगोत्रजं ॥ अस्मिंतीर्थे सुतोस्माकं
स्नात्वा तोयं प्रदास्यति ॥ श्राद्धं वा पिंडमेकं वा तेन यास्याम सद्गतिं ॥ स्नाने कृते तु ये केचिज्जायंवे वस्त्रबिंदवः ॥ प्रीणये
न्नरकस्थांस्तु तैः पितॄन्नात्र संशयः ॥ केशोदकेन स्नातस्य येत्वन्ये लेपभाजिनः ॥ तृप्यंत्यनग्निसंस्कारा ये मृता गोत्रिणां कुले ॥

(१ गतेमोक्षस्य)

CC-0. In Public Domain. Digitization by eGangotri

तास्मिंस्तीर्थे तु यः कश्चिच्छ्राद्धं कृत्वा दिधानतः॥नरकादुद्धरत्याशु जपन्वै पितृसंहितां ॥ वनस्पातिगते सोमे यदा सोमादिनं भवेत्॥
अक्षयान् लभते लोकान् पिंडेनैकेन वै तदा॥अक्षयं तत्र वै सर्वं जायते भरतर्षभ॥तास्मिंस्तीर्थे त्वमावास्यां पितृनुद्दिश्य भारत॥नी
लं सर्वांगसंपूर्णं योभिषिच्य समुत्सृजेत् ॥ तस्य पुण्यफलंवक्तुं यदि वाचस्पातिः क्षमः ॥ अमाहके वृषोत्सर्गाद्यत्पुण्यं समवाप्नुयात्
॥ तव सुश्रुषता कथयिष्यामि भारत ॥ रौरवादिषु ये केचित्पच्यंते तस्यपूर्वजाः ॥ वृषोत्सर्गेण तान्सर्वान् तारयेदेकाविं
शतिं ॥ लोहितो यस्तुवर्णेन मुखेपुच्छे च पांडुरः॥ पिंगः क्षुरविषाणाभ्यां स नीलो वृष उच्यते॥यस्तु सर्वांगपिंगश्च श्वेतः पुच्छखुरेषु
च ॥ स पिंगो वृष इत्याहुः पितृणां प्रीतिवर्द्धनः ॥ पारावतसवर्णं च ललाटे तिलकान्वितं॥तं वृषं बभ्रुमित्याहुः पितृणां प्रीतिवर्ध
नं ॥ नीलं सर्वशरीरेण आरक्तनयनं दृढं॥तमेव नीलमित्याहनीलः पंचविधः स्मृतः॥यस्तु वै स्वगृहे जातः स वै नीलो विशेष्यते॥
नवाहयेद्गृहं जातं वत्सकं तु कदा च न ॥ तेनैव च वृषोत्सर्गापितृणामनृणो भवेत् ॥ जातं तु स्वग्रहे वत्सं द्विजन्मा यः सुवाह
येत् ॥ पतंति पितरस्तस्य यदि चेद्ब्राह्मणि स्थिताः ॥ यथा यथा हि पिबती पीत्वा धुनाति मस्तकं ॥ पिवन्पितृन् प्रीणयति नरका
दुद्धरेद्धुनत् ॥ यथा पुच्छाभिघातेन ऊर्द्ध्वं गच्छंति बिंदवः ॥ नरकादुद्धरत्याशु पतितान् गोत्रिणस्तथा ॥ गर्जन्प्रावृषिकालेषु विषाणा
भ्यां लिखन् भुवि॥खुरेभ्यो या मृदुद्भूता तया संप्रीणयेदृषीन् ॥पिबन् पितृन् प्रीणयति खादनो लेखने सुरान् ॥गर्जन् ऋषिंन्मनुष्यां
श्च धर्मरूपो हि धर्मज ॥ भूतैर्वापि पिशाचैर्वा चातुर्थिकादि ज्वरेण वा ॥ गृहीतो माहकं गच्छेत्सर्वेषामार्तिनाशनं ॥ स्नात्वा च
विमले तोये दर्भकंठीं निबंधयेत् ॥ मस्तकेवाथ बाहुभ्यां ताभ्यां वा गलकेपि वा ॥ गत्वा रेवासमीपे तु प्रदक्षिण्य जनार्दनं ॥ त
तो मंत्रं समुच्चार्य गायत्रीमथवैष्णवीं ॥ नारायण शरण्येश सर्वदेवनमस्कृत ॥ नमो यज्ञांगसंभूत सर्वव्यापि न्नमोस्तु ते ॥ विष्णु
मंत्रः ॥ नमो नमस्ते देवेश पद्मगर्भ सनातन ॥ दामोदर जयानंत रक्ष मां शरणागतं ॥ त्वं कर्ता त्वं तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हर्ता जगत्यस्मिंश्चराचरे ॥ त्वं पालयसि भूतानि भुवनं त्वं विभर्षि च ॥ प्रसीद देवदेवेश व्याधिग्रस्तं विमोचय ॥
त्वद्धर्म निरतं मां हि त्वद्भक्तिनिरतं हरे ॥ स्तुतिप्रार्थनामंत्रः ॥ इति स्तुतो मया देव प्रसादं करु मेऽच्युत॥रक्ष रक्ष च भूतानि
त्राहि मां शरणागतं ॥ एवं स्तुत्वा च देवेशं दानवांतकरं हरिं ॥ पुनरुक्तेन वै स्नात्वा ततो विप्रांश्च भोजयेत् ॥ वेदोक्तेन विधाने
न श्राद्धं कृत्वा यथाविधि ॥ पिंडानिर्वपणं कृत्वा वाचयेत्स्वस्तिवाचकान् ॥ संतोषयित्वा तान्पार्थ ततो विप्रान्विसर्जयेत् ॥ तथै
वोर्वरितं चान्नं द्विजेभ्यो विनिवेदयेत् ॥ तत्र तीर्थे तु यः स्नात्वा पुमांश्चैवाथ चांगना ॥ शक्तितो दक्षिणां दत्वा श्राद्धं कृत्वा यथा
विधि ॥ ददाति तत्र यो भक्त्या पितॄणां तु तिलोदकं ॥ तावत्पुष्करपत्रेषु पिबंति पितरो जलं ॥ तत्र तीर्थे नरो यस्तु स्नपयेन्मधु
सुदनं ॥ घृतमध्वाज्यक्षीरेण दध्ना वा तीर्थवारिणा ॥ युगादौ विषुवे चैवअयने सूर्यसंक्रमे ॥ पुष्पैः संपूजयेद्देवं नैवेद्यं च निवेद
येत् ॥ सोऽश्वमेधस्य यज्ञस्य फलं प्राप्नोति पुष्कलं ॥ तत्र तीर्थे नरः स्नात्वा सूर्यपर्वाणि तिष्ठति ॥ सूर्यतेजोनिभैर्यानै र्विष्णुलोके म
हीयते ॥ तत्र तीर्थे नरः श्राद्धं यो ददाति सुबुद्धिमान् ॥ सत्पुत्रेण तु तेनैव संप्राप्तं जन्मनः फलं ॥ मार्कंडेय उवाच ॥ एवं श्रु
त्वा ततो देवा ब्रह्मविष्णुमुखास्ततः ॥ चंद्रेंद्ररुद्रप्रमुखैः स्थापितो॥ जगदीश्वरः॥सर्वरोगप्रशमनो महापातकनाशनः॥यस्तु संवत्सरं
पूर्णं अमावास्यांसुभावितः ॥ पितृभ्यः पिंडदानं च कुर्यादमाहके नृप ॥ त्रिपुष्करे गयायां च प्रभासेनैमिषे वटे॥ यत्पुण्यं श्राद्धक
तृणां तदिहैव लभेध्रुवं ॥ तिलोदकं कुशैर्मिश्रं पितृभ्यो दक्षिणामुखः ॥ मन्वादौ च युगदौ च व्यतिपाते दिनक्षये ॥ यो दद्या
दश्वमेधस्य फलमाप्नोति सध्रुवं ॥ अमाहके नरो यस्तु स्नात्वा संपूजयेद्धरिं ॥ ब्रह्माणं शंकरं सूर्यं यश्च जागर्ति वै निशां ॥ स
सर्व पापनिर्मुक्तः शक्रातिथ्यमवाप्नुयात् ॥ एका मुर्तिस्त्रयोदेवा ब्रह्मविष्णुमहेश्वराः ॥ सत्कार्यकरणोपेताः सुसूक्ष्माः सुमहाबलाः ॥
पूजितास्तेहि पितरो जगद्वै पूजितं भवेत् ॥ एतत्ते कथितं पार्थ किमन्यत्परिपृच्छसि ॥ इति श्रीरेवा माहात्म्ये अमाहकतीर्थं नाम अष्टत्रिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शदाधिकशततमो ध्यायः॥१३८॥मार्कंडेय उवाच॥ ततो गच्छेन्महाराज तीर्थं सिद्धेश्वरंपरं॥ क्रोशांतेर्द्धे स्थितं पुण्यं ब्रह्मणा स्थापितं पुरा॥ यज्ञसिद्धैस्तपस्तप्त्वा स्थापितः सिद्धिदो शिवः ॥ नर्मदादक्षिणे कूले सिद्धिंप्राप्तास्ततः शुभाः ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेद्वृषभ ध्वजं ॥ सर्वपापविनिमुक्तो गतिंया त्यश्वमेधिनां ॥ तत्र तीर्थे तु यो भक्त्या श्राद्धं कृत्वा विधानतः ॥ पितॄन् संप्रीणयेन्नूनं सर्वं ते न कृतं भवेत् ॥ तत्र तीर्थे मृतानां च जंतूनां नृपसत्तम ॥ गर्भवासास्थिति स्तेषां नभवेद्वै कदा च न ॥ गर्भवासो हि दुःखाय न सुखाय कदा च न ॥ तस्मात्तदाच रेत्तेन नेहसंसारिको भवेत् ॥ अस्मिन्तीर्थे नरः स्नात्वा भोजयेद्यो द्विजोत्तमान् ॥ प्रीणिताः पितरस्तेन देवाश्च समहर्षिभिः ॥ इतिश्रीरेवामहात्म्ये सिद्धेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ क्रोशांतरे ततो गच्छेतीर्थं तापेश्वरं नृप ॥ पुरा वेदशिरो विप्रो यत्रातप्यत्तपो महत् ॥ शाक्रं पद मनुप्राप्तुं सिद्धवीरासनस्थितः ॥ सहस्रवत्सरं कालं दिप्तिमूर्तिः प्रतापयन् ॥ ध्यायन्महेश्वरं देवं सूर्यवत्परितापयन् ॥ ततस्तुष्टो महादेवः प्रत्यक्षः प्राह तं द्विजं ॥ किमिच्छसि महाभाग ब्रूहि यत्ते हृदि स्थितं ॥ वेदशिरा उवाच ॥ शाक्रं पदमनुप्राप्तु मिच्छे देव महेश्वर ॥ देवराज्यमभीप्सामि यदि देयो वरोमम ॥ ईश्वर उवाच ॥ नह्येतदुचितं विप्र त्वं तत्र वानुचितज्ञता ॥ तत्र यस्यावमा बुद्धिः स मूढ इति मे मतिः ॥ तपस्तापाकुले विश्वे तववृत्तवतो द्विज ॥ चतुर्विधानां मुक्तीना मेकाकाप्यर्थितावरा ॥मार्कंडेय उवाच॥ इत्याकर्ण्य शिवाद्विप्रः क्षणं संचिंत्य चेतसि॥अयाचद्ब्रह्मसामीत्यं यावद्ब्रह्मस्थितिः स्थिरा ॥ ईश्वर उवाच ॥ एवमस्तुद्विजश्रेष्ठ प्रार्थितं यत्त्वयाधुना ॥ तपसा तव संतुष्टो ददाम्यन्यदभीप्सितं ॥ वेदाश्चैवोपवेदाश्च शास्त्राण्यन्यान्यपिद्विज ॥ तव वंशे दि सर्वाणि भविष्यंत्यक्षयानि वै ॥ स्थापयस्वामले पक्षे मामष्टम्यां रवेर्दिने ॥ भूताष्टम्योर्दिने पर्वव्यतीपातार्कवासरे ॥ संक्रांतौ ग्रहणे भान्वोः पूजयिष्यंति ये नराः ॥ स्नात्वा श्राद्धैः पितॄन्पूज्य

१ (त्रोटिदिरु) २ (तरशा॥डि)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तियुक्तेन चेतसा ॥ तेषां वर्षकृतं पापं सकृदभ्यर्चताद्व्रजेत् ॥ द्वादशाहस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ अंते शिवपुरं
याति सहस्रं परिवत्सरान् ॥ ब्रह्मलोकं ततो गच्छेतावद्दिव्यपुरं ततः ॥ तर्पयित्वा पितॄन् श्राद्धे कुरुते तृप्तिमक्षयां ॥ इत्युक्त्वा भ
गवानीशस्तत्रैवांतरधीयत ॥ सोपि विप्रस्ततः स्नात्वा प्रतिष्ठाप्य महेश्वरं ॥ भक्त्या तापेश्वरं नाम पूजयित्वा विधानतः ॥ जगाम
सत्यलोकं स सर्व देवाभिपूजितः ॥ इति ते कथितं पार्थ तीर्थं तापेश्वरं परं ॥ श्रवणात्कीर्तनादस्य लयज्ञफलं नरः ॥ इति श्रीरे
वामहात्म्य तापेश्वर तीर्थं ॥ मार्कंडेय उवाच ॥ तथा सिद्धेश्वरं तीर्थं ततः क्रोशद्वयांतरे ॥ यत्र सिद्धिः पुरा जाता नाविकेतस्य
भूपतेः ॥ सर्वांगानि तु पुण्यस्य प्राप्तुमिछन्नृपः पुरा ॥ तात्सिध्ये नर्मदातीरे सिद्धिदं शर्वमीश्वरं ॥ आराध्य तत्प्रसादेन सिद्धिं प्राप
सुदुर्लभां जपस्तपस्तीर्थदान व्रतमंत्रादिसाधनैः ॥ न विघ्नं लध्यवान्राजा पुण्यराशिनवर्द्धयत् ॥ सिकता शक्यते पार्थ संख्यातुं वै
कदा च ॥ तारागणांश्च नभसः समुद्रांभश्च बिंदुभिः ॥ नशक्यते तु संख्यातुं नाचिकेतकृतं शुभं ॥ एवं संप्राप्य सिद्धिं स स्थाप
यमास शंकरं ॥ भक्त्या शिध्येश्वरं नाम सर्वेषामपि सिद्धिदं ॥ ततः प्रभृति विख्यातं तीर्थं सिध्येश्वरं नृप ॥ यत्र सिद्धिमनुप्राप्तो
नाचिकेतो नृपोत्तमः ॥ तत्र तीर्थे नरः स्नात्वा श्राद्धं दत्वा यथाविधिः ॥ विप्राणां भोजनं दत्वा पितॄणां तृप्तिमावहेत् ॥ संपूजयि
त्वा सिद्धेशं पुण्यासिद्धिं लभेन्नरः ॥ यथा यथा हि कुरुते नरः पुण्ये मनः सदा ॥ तथा तथा हि देवाश्च पितरो वर्द्धयंति तं॥ इति
श्रीसिद्धेरमाहात्म्यं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र वारुणं तीर्थमुत्तमं ॥ स्थितं सिद्धेश्वरात्तीर्थात्पार्थ क्रमशतांतरे ॥ व
रुणो वै तपस्तप्त्वा यत्र पाशानवाप्तवान्॥दुर्निवारानमोघांश्चाप्यमेघान्देवदानवैः॥प्रसन्ने शंकरे तद्वत्पुष्करं पुत्रप्राप्तवान्॥स्थापयित्वा
महेशानं स्वनाम्या चाभि पूज्य च॥शक्तिं चाप्यतुलां प्राप्य स जगाम यथागतं॥तत्र तीर्थे नरः स्नात्वा पूजयित्वा महेश्वरं॥सर्वान्का
मानवाप्नोति सर्वपापैर्विमुच्यते॥भोजयित्वा द्विजान् शक्त्या दीपं दत्वा च शंकरे॥स शक्तिमतुलां लब्ध्वा स्वर्गलोके महीयते ॥इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीवारुणेश्वरतीर्थं॥मार्कंडेय उवाच॥ततो गच्छेत राजेंद्र तीर्थं चांगारकं परं॥उत्तरे नर्मदाकूले सर्वपापक्षयं करं॥अमाहकात्स्थितं तीर्थात् क्रोशमात्रे नराधिप॥चतुर्थ्यंगारकदिने संकल्पकृतनिश्चयः॥स्नात्वा चास्तंगते सूर्ये संध्योपासनतः परं॥यजेदंगारकं भक्त्या गंधमाल्यानुले पनैः संस्थाप्य स्थंडिले देवं रक्तचंदनकुंकुमैः ॥अंगारकायेति नमः कर्णिकायां प्रपूजयेत् ॥ कुजभूमिसुतायेति रक्तांगरक्तवाससे ॥हरकोपोद्भवायेति स्वेदजे दीर्घवाहवे ॥ सर्वकामप्रदायेति पूर्वादिषु दलेषु च ॥एभिः संपूज्य विधिवद्दद्यादर्घं विधानतः ॥ भूमिपुत्र महातेज स्वेदोद्भव पिनाकिनः ॥ महाबल ग्रहाणार्घं लोहितांग नमोऽस्तुते ॥ करकं वारिसंपूर्णं शालितंदुलसंयुतं ॥ सहिरण्यं सदानं च मोदकैरुपरिस्थितं ॥ निवेदयेद्ब्राह्मणाय कुजो मे प्रीयतामिति ॥ अर्घो देयस्तुपहारैरक्तचंदनवारिणा ॥ रक्तपुष्पसभाक्षीर्णस्तिलतंदुलमिश्रितः ॥ कृत्वा तांम्रमये पात्रे मंडले शुभे ॥ कृत्वा शिरसि तत्पात्रं जानुभ्यामवनिं गतः ॥ मंत्रपूतो महाराज देयस्त्वर्घो विचक्षणैः ॥ ततो भुंजी तमौनेन क्षारतिक्ताम्लवर्जितं ॥ स्निग्धं सुमधुरं चैव भोजनं ब्राह्मणैः सह ॥ एवं चतुर्थ्यां संप्राप्ते तथैवांगारके नृप ॥ सौवर्णं कारयेद्देवं यथाशक्त्या सुरूपिणं ॥ स्थापयेताम्रपात्रे च गुडपीठसमन्विते ॥ गंधधूपादिभिर्देवं पूजयेद्गुडसंस्थितं ॥ इसान्यां स्थापयेद्देवं गुडतोयसमचितं ॥ कासारेण तथान्येया स्थापयेत्करकं नव ॥ रक्ततंदूलसंमिश्रं नैऋत्यां वायुगोचरे ॥ स्थापये न्मोदकैः सार्द्धं चतुर्थ्यंगारकं बुधः ॥ सूत्रेण वेष्टितग्रीवं गंधमाल्यैरलंकृतं शंखतूर्यानिनादन जयशब्दादिमंगलैः ॥रक्ताबरधरं विप्रं रक्तगंधानुलेपनं ॥ वेदिमध्यगतं वापि महदसनसंस्थितं ॥ सुरूपं सुभगं शांतं सवभूतहिते रतं ॥ वेदविद्याव्रतस्नातं सर्वशास्त्रसमन्वितं ॥ पूजयित्वा यथान्यायं वाचयेत्पाडुनंदन रक्ता गां च ततो दद्याद्रक्तेनान दुहा सह ॥ अंगारकः प्रियतां मे सवदेव तपूजितः॥प्रदक्षिण्य ततो विप्रं पत्नीपुत्रसमन्वितः॥मातापितृ सुहृत्सार्द्धं क्षामयित्वा विसर्जयेत् ॥पूरा तत्र तपस्तेपे महदंकांगारको

१ (अंगारेश्वर)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नृप दिव्यंपदमनुप्राप्तुं तथा तोषयितुं शिवं प्रसन्ने तत्र दवेशे स्थापयामास धूर्जटिं ॥ स्वनाम्ना भरतश्रेष्ठ ततो दिव्यं पदं गतः ॥ तत्र तीर्थं नर स्नात्वा पूजय त्पार्वतीपतिं श्राद्धं कृत्वा विधानेन रवौ भोमदिनेपिवा ॥ एवं कृतस्य तस्याथ तत्र तीर्थे विशेषतः ॥ यत्पुण्यफलमुद्दिष्टं तत्ते सर्वं वदाम्यहं॥बहुसंवत्सरं कालं शिवलोके महीयते॥ततोवतीर्य भूमोसंन्नृपतिर्धार्मिकोधनी सप्तजन्मानि राजेंद्र सुरूपः सुभगो भवेत् ॥ तत्तीर्थस्य प्रभावेन नात्र कार्या विचारणा॥अकामो वा सकामो वा तत्र तीर्थे मृतो नरः अंगारक पुरं याति देवगंधर्वसेवितं तत्रावाप्य यथान्याय दिव्यभोगाननुत्तमान् ॥ इह मानुष्यमासाद्य पूर्ववन्नृपतिर्भवेत् ॥ वीर्यवान् रूपसंपन्नः सर्वव्याधिविवर्जितः जीवेद्वर्षशतं साग्रं सर्वलोकनमस्कृतः इति रेवामाहात्म्य अगारकेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे वार्थ लिंगवाराहसंज्ञितं ॥ तीर्थं परं पापहरं वैष्णवं भुवि विश्रुतं ॥ दर्शनात्तस्य देवस्य पापसंघः प्रणस्यति ॥ वाराहं रुपमास्थाय पुरा विष्णुः सनातनः ॥ कृतवान्कदनं घोरं दानवानां युधिष्ठिर ॥ हिरण्याक्षमुखानां तु नर्मदायां व्यवस्थितः ॥ लिकिगत्यर्थधातोर्हि योगात्कोलवपुर्हरिः ॥ तरंगन्विजयं प्राप्य शीघ्रं रेवामुपागतः ॥ देवर्षिभिस्ततः सर्वैर्लिंकवाराहसंज्ञया ॥ भाषितः पूजितो भक्त्या भक्तानामभयप्रदः ॥ स्नात्वा सत पसा शुद्धो व सामृङ्मेदसार्चितः ॥ सेवितो मुनिसिद्धैः स चिरंत त्रैव तस्थिवान् ॥ तत्र तीर्थे नरः स्नात्वा यः पश्येद्देवमच्युतं ॥ समुच्यते नरश्रेष्ठ माहापापैः पुरार्जितैः ॥ द्वादशीं शुक्लपक्षस्य कृष्णां वा समुपोषितः॥ गंधमाल्यैर्जगन्नाथं पूजयेद्धर्मनंदन ॥ब्राह्मणांश्च महागाभान् दानसन्मान भोजनैः पूजयेत्परया भक्त्या तस्य पुण्य फलं शृणु ॥ सत्रयाजीफलं यत्तु लभते द्वदशाद्वतः ॥ ब्राह्मगान् भोजएन्नग्रे तदेव फलमश्नुते ॥ तर्पयित्वा पितृन्देवान्स्नात्वा, तद्गतमानसः ॥ जपेद्द्वादशनामानि देवस्य पुरतः स्थितः ॥ मासि मासि निराहारो द्वादश्यां कुरुनंदन॥ केशवं पुजएन्नित्यं मासि

१ (निकवरा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गशिरे बुधः ॥ पौषे नारायणं देवं माघे च मधुसूदनं ॥ गोविंदं फाल्गुणे मासि विष्णुं चैत्रे कुरूद्वह ॥ वैशाखे मधुहंतारं ज्येष्ट मासि त्रिविक्रमं ॥ वामनं च तथाषाढे श्रावणे श्रीधरं विभुं ॥ हृषिकेशं भाद्रपदे पद्मनाभं तथाश्विने॥दामोदरं कार्तिके च कीर्तयन्नाव सीदति ॥ वाचिकं मानसं पापं कर्मजं यत्पुरातनं ॥ नश्यते तन्नसंदेहो मासाधिपतिकीर्तनात् ॥ स्वपन्विबुध्य सततं उन्मिषं न्नि मिषंस्तथा ॥ जिघ्रन्पश्यंश्च भुंजान एतन्मंत्रमयो भवेत् ॥ ता निशास्तेच दिवसास्ते मासास्ते च वत्सराः ॥ नराणां सफला येषु चिंतितो भगवान्हरिः ॥ परमापन्नस्यापि यस्य देवो जनार्दनः ॥ नापसर्पति हृत्पद्मात्स योगी नात्र संशयः ॥ एतत्तीर्थवरं पुण्य लिको यत्र जनार्दनः ॥ विजिगाय रिपुं संख्ये क्रोडरूपः सनातनः ॥ उपप्लवे चंद्रमसो रवेश्च यद्वाष्टकायामयनद्वये च ॥ पानीयम प्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ॥ इति श्रीरेवामाहात्म्ये लिकेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ अंकोलं च ततो ग च्छेत्सर्वपापविनाशनं यत्रांकोल्लतरोर्मूले वराहप्रीतिकाम्यवा ॥ चित्रं तच्चरितं द्रष्टुं सर्वशत्रुविमोहनं ॥ निषसाद पुरा सेमा सवृषे वृषभध्वजः ॥ तत्रादौ पूजितः शर्वः सर्वै र्देवर्षिभिर्नृप ॥ अंकोल्लस्य वरं दत्वा तत्रैवांतदधेशिवः ॥ तत्र स्नानं जपो दानमर्चनं द्विज भोजनं ॥ पिंडदानं च कृतं प्रत्यानंतफलप्रदं ॥ त्र्यंबकेन तोयेन यश्चरुं श्रपयेत्ततः ॥ अंकोल्लमूले दद्याच्च पिंडान्पार्थ यथाविधिः ॥ तारिताः पितरस्तेन तृप्यंत्याचंद्रतारकं ॥ स्वर्णं सपायसं दत्वा प्रीणयेच्छंकरं नरः ॥ शिवलोके चिरं स्थित्वा इहकामांश्च विंदति ॥ चिरमायुः सुतान् सौख्यं धनं च लभते बहु ॥ इति श्रीनर्मदामहात्म्ये अंकोल्लतीर्थनाम एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र नर्मदा दक्षिणे तटे ॥ पराशरेश्वरं तीर्थं क्रोशार्द्धे वरुणेशतः ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनं ॥ पराशरस्तपस्तेपे शतपुत्रार्थमादरात् ॥ प्राप्य रेवातटं पुण्यं वसिष्ठतनयात्मजः ॥ परितोष्य महादेवं पुत्रं प्राप

१ (पोरा) २ (वसिष्टस्यपुत्रः शक्तिस्तस्यपुत्रपिराशरः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणान्वितं ॥ योगिनां प्रवरं विष्णुं सर्वैर्ऋषिगणैर्युतं ॥ स्थापयामास देवेशं स्वनाम्ना तत्र शंकरं ॥ ततः प्रभृति विख्यातं तीर्थं पाराशरं नृप ॥ तत्र तीर्थे नरः स्नात्वा स्नापयेत्परमंशिवं ॥ दधिक्षीराज्यमधुना मंत्रपूर्वं विधानतः ॥ शिवसूक्तैः पूजयित्वा पुत्रं प्राप्नोति शोभनं ॥ श्राद्धदानेन पितर स्तृप्ता युगचतुष्टयं ॥ विविधानैस्तथा विप्रान् भोजयित्वा स्वशक्तितः॥ सर्वान् कामानवाप्नोति स्वर्गलोके महीयते ॥ इति श्रीपाराशरेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ तीर्थं वै कुसुमेश्वरं ॥ नर्मदादक्षिणे कूले ह्युपपातकनाशनं ॥ कामेन स्थापितो यत्र कुसुमेश्वरसंज्ञितः॥ख्यातः सर्वेषु लोकेषु देवदेवः सनातनः ॥ कामं मनोद्भवं चक्रे कुसुमायुधधारिणं॥स कामान् ददते सर्वान् पूजितो वृषकेतनः ॥ तेन निर्दग्धकायेन समाराध्य महेश्वरं॥अनंगेन तदा प्राप्तमंगित्वं नर्मदातटे ॥ युधिष्ठिर उवाच ॥ अंगिभूतस्य नाशः किमनंगस्य च मे वद ॥ न श्रुतं न च मे दृष्टं भूतपूर्वं कदाच न ॥ एतत्सर्वं यथावृत्तमाचक्ष्व द्विजसत्तम ॥ श्रोतुमिच्छामि विप्रेंद्र भीमार्जुनयमैः सह ॥ मार्कंडेय उवाच ॥ आदौ कृतयुगे तात देवदेवो महेश्वरः ॥ तपश्चचार विपुलं गंगासागरसंस्थितः ॥ तेन संतापिता लोकास्तपसा ससुरासुराः ॥ जग्मुस्ते शरणं सर्वे देवदेवं शचीपतिं ॥ देवासुरलोकाऊचुः ॥ व्यापकः सर्वभूतानां त्रिपुरारिर्महेश्वरः ॥ संतापयति लोकांस्त्रीन् तं नीवारय गोपते ॥ श्रुत्वा च वचनं तेषां देवानां बलवृत्रहा ॥ चिंतयामास तपसो विघ्नोपायं तदा हरिः ॥ उवाच मेनकां रंभामुर्वशीं च तिलोत्तमां ॥ वसंतं कोकिलं कामं दक्षिणानिलमंजसा ॥ गत्वा तूर्णमहादेवं तपश्चरणतत्परं॥क्षोभयध्वं यथान्यायं गंगासागरवासिनं ॥ एवमुक्तास्तुते सर्वे देवराजेन भारत ॥ देवाप्सर समोपेता जग्मुस्ते हरसंन्निधौ॥तेन संमूर्छिताः सर्वे संसर्गात्पन्नगोत्तमाः॥मधुमाधवगंधेन सकिंनर महोरगाः ॥ यावदालोकते देवस्तद्वनं व्याकुलीकृतं ॥ अपश्यन्मदनाविष्टं दशावस्थगतं जनं ॥ देवदेवोपि देवानामवस्थात्रितयं गतः ॥ सात्विकी राजसी राजन् तामसी ता श्रृणुष्वमे ॥ एकं मुकिलितं चक्षुर्योगयुक्तस्य धूर्जटेः॥ द्वितीयं चैव पार्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्याः पार्श्वतः प्रेमलालितं ॥ तदेव रममाणायाः स्तनयुग्मे निवेशितं ॥ जघनाभिनिवेशाच्च शृंगारभरघूर्णितं ॥ तृतीयं मदनाकृष्ट चापसंदर्शना नृप॥ क्रोधकालानलोद्दीप्तं विश्वत्रासकरं परं ॥ अवस्थात्रितयं शंभुरभजद्वरतर्षभ ॥ दृष्टो मारः स देवेन सशरः सश रासनः ॥ भस्मीभवत्तदैवाशु यद्दंशे सर्वदेहिनः ॥ कामं दृष्ट्वा क्षयं प्राप्तं तत्र देवाप्सरोगणाः ॥ भीता यथागताः सर्वे जग्मुश्चैव दि शोदश ॥ कामेन रहिता लोकाः ससुरासुरमानवाः ॥ त्रैलोक्यवासिना मूढाः सृष्टिसंहारकारकं ॥ ब्रह्माणं शरणं जग्मुर्देवाः शक्रपु रोगमाः ॥ सीदमानं जगतदृष्ट्वा तमूचुः परमेष्ठिनं ॥ जानासि त्वं जगच्छ्रेष्ठप्रजामैथुनसंभवा ॥ प्रजाः क्षयंगमिष्यंति कामेन रहिताः प्रभो ॥ क्षयं नीतः स रुद्रेण तस्मान्नः पाहि पद्मज ॥ एवं श्रुत्वा वचस्तेषां देवानां प्रपितामहः ॥ जगाम तैः समं तत्र यत्र दे वो महेश्वरः ॥ उवाच मधुरं वाक्यं देवान् ब्रह्मपुरोगमान् ॥ किं कार्यं कस्य संतापः किंवागमनकारणं ॥ देवतानामृषीणां च कथ्यतां मम माचिरं ॥ ब्रह्माउवाच ॥ कामनाशे जगन्नाशो भवतीति चराचरे ॥ त्रैलोक्ये तं पुनः शंभो उत्पादयितुम र्हसि ॥ तच्छ्रुत्वा वचनं तेषां विमृश्य परमेश्वरः ॥ चिंतयामास कामास्य पुनर्देहं सुदुर्लभं ॥ आगतः स्मरणाच्छीघ्रमनंगोह्यंगि तां गतः ॥ प्राणदः सर्वभूतानां पश्यतां नृपसत्तम ॥ ततः शंखनिनादेन भेरीणां शाब्दिनेन च ॥ अभिनंदंति देवेशं सुरसुरामहोर गाः ॥ ततस्ते देवदेवेन कृतार्थाः सुरसत्तमाः ॥ विसर्जिताः प्रयातास्ते यथागतमरिंदम ॥ गतेषु सर्वदेवेषु कामदेवोपि भारत ॥ तपश्चचार विपुलं नर्मदातीरमागतः ॥ जपहोमैः कृशीभूतो दिव्यं वर्षशतं किल ॥ महाभूतैर्विघ्नकरैः पीड्यमानः स नंततः ॥ तत स्तेनात्मरक्षार्थं संस्मृतः कुंडलीश्वरः ॥ चकाररक्षां सर्वत्र शरपाते नृपोत्तम ॥ ततस्तुष्टो महादेवो दृढभक्त्या नृपोत्तम ॥ वरेण छंद यामास कामं कामविनाशनः ॥ ज्ञात्वा तुष्टं महादेवमुवाच वृषकेतनं ॥ प्रणतः प्रांजलिभूत्वा देवदेव त्रिलोचन ॥ यदितुष्टोसि देवेश यदि देयो वरो मम ॥ कौसुभान्मे शरान्देहि कौसुमं धनुरुत्तमं ॥ तेन विश्वजयं देहि कल्याणकुसुमप्रिय ॥ कुसुमायुधेश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रंनाम अत्र संनिहितो भव ॥ कुडलेश्वरनाम्ना च भक्त्याभुवन पालक॥धनुर्धराणां प्रवरो विश्वजेता हृदास्यदः॥नमेमः स्यात्सततं तथा कुरुमहेश्वर ॥ तथेति चोक्का वचनं देवदेवो महेश्वरः ॥ जगामाकशमाविश्य स्तूयमानः सुरर्षिभिः ॥ गते चादर्शनंदेवे काम देवो जगद्गुरुः॥ स्थापयामास देवेशं कुसुमेश्वरसंज्ञितं॥ तथैव कुंडलीशोपि स्थापयित्वा सनातनं।। यातौ यथागतौ देवौ पार्थ सार्थ कतामितौ ॥ तत्र तीर्थे तु यः स्नात्वा उपवासपरायणः॥ चैत्रे मासि चतुर्दश्यां मदनस्य दिनेपिवा॥ प्रभाते विमले प्राप्ते स्नात्वा पूज्य दिवाकरं॥ तिलसंमिश्रतोयेन तर्पयेत्पितृदेवताः।। पंचामृतेन संस्नाप्य देवं पुष्पायुधेश्वरं ॥ अभ्यर्चयेद्विधानेन पुष्पधूपानुलेपनैः ॥पिंडनिर्वपणं कृत्वा तस्य तीर्थफलं शृणु ॥ सत्रयाजिफलं यच्च लभते द्वादशाब्दिकं ॥ पिंडदानात्फलं तद्वै नरः प्राप्नोत्यसंशयः ॥ ॥ अंकोलमूले यः पिंडं पितृनुद्दिश्य दापयेत्॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति पितामहाः॥ कृमिकीटपतंगाश्च तत्र तीर्थे युधिष्ठिर ॥ मृताः स्वर्गं प्रयांत्येव किंपुनर्ये मृता नराः ॥ संन्यासं कुरुते यस्तु जितक्रोधो जितेंद्रियः ॥ कुसुमायुधतीर्थे वै स गच्छेच्छिवमंदिरं ॥ तत्र दिव्याप्सरोभिश्च देवगंधर्वगायनैः ॥ क्रीडते सेव्यमानस्तु कल्पमेकं युधिष्ठिर ॥ पुर्णेचापि ततः काले भुविमानुष्यतां गतः ॥जायते राजराजेश्च पुज्यमानो नृपो महान्॥ पुरुषः सुभगो वाग्मी विक्रांतो मतिमान् शुचिः॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः ।। एतत्पुण्यं पापहरं तीर्थं तीर्थादनुत्तमं ॥ कुसुमायुधेश्वरं नाम सर्वदेवनमस्कृतं ।। इति रेवामहात्म्ये कुसुमायुधेश्वर तीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ तीर्थं पापक्षयं करं ॥ रेवादाक्षिणतीरस्थं नाम्ना कलकलेश्वरं ॥ विख्यातं सर्वलोकेषु स्वयं देवन निर्मितं॥ अंधकं समरे हत्वा देवदेवो महेश्वरः ॥ सहितो देवगंधर्वैः किंनरैश्च महोरगैः ॥ शंखतुर्यनिनादैश्च मृदंगपणवस्वनैः॥ वेणुवीणानिनादैश्च स्तुतिभिर्जयमंगलैः॥ गायंति सामानि यजूंषि चान्ये तथैवचान्ये गिरमुद्गिरंति॥ स्तोत्रैरनेकैरपरे गृणंति महेश्वरं तत्र महानुभावाः॥ एवं रेवातटं प्राप्तः पुरारिः पार्वतीपतिः॥ तत्र पुण्यजनानांतु प्रमथानां च योगिनां॥ सिद्धविद्याध

CC-0. In Public Domain. Digitization by eGangotri

राणां च सूतमागधबंदिनां ॥ देवता नामृषीणां च गधर्वाप्सरसां नृप॥ जाते कलकलाशब्दे रेवातीरे तदा शुभे॥ परमानंदसंपूर्णः स्वय
लिंगत्वमाप्तवान् ॥अंतरिक्षात्तदा तेषां वागुवाचाशरीरिणी॥ यतः कलकलाशब्दादानंदितमना हरः॥ लिंगरूपस्थितस्तस्मान्नाम्नाकलक
लेश्वरः ॥ इत्याकर्ण्य ततः सर्वे देवाद्या वागु युदीरितं ॥ सर्वैः प्रतिष्ठितो यस्मात्तस्माज्जातः सएवतु ॥ तत्र तीर्थे तु यः स्नात्वा यजेत्क
लकलेश्वरं ॥ वाजपेयाधिकं पुण्यं सलभेन्नात्र संशयः ॥ तेन पुण्येन पूतात्मा प्राणत्यागी दिवं व्रजेत्॥ आरूढः परमं यानं गीयमानो
प्सरोगणैः ॥ तत्र स्थित्वा महाभोगी कालेन महता ततः ॥ मृत्युलोके महात्मासौ जायते विपुले कुले ॥ ब्राह्मणः सुभगो वाङ्मि वे
दवेदांगपारगः ॥ व्याधिशोकविनिर्मुक्तो धनी जीवेच्छरच्छतं ॥ तत्र तीर्थे तु यच्छ्राद्धं पितॄनुद्दिश्य दीयते ॥नंदंति पितर स्तस्य परं तृप्ताः
शतं समाः ॥ ब्राह्मणान् भोजयेद्भक्त्या शक्त्या यस्तत्र पार्थिव ॥ एकेन भोजिते पार्थ कोटिर्भवति भोजिता ॥ इतिश्रीरेवामहात्म्ये क
लकलेश्वरतीर्थं नामचत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥ मार्कंडेय उवाच ॥ ततः परं महाराज तीर्थं परमशोभनं ॥ उत्तरे नर्म
दाकूले श्वेतवाराहसंज्ञितं॥पृथिव्युद्धारणार्थाय पुरा वाराहरूपधृक्॥उद्धृत्य जगतीं देवीं सर्वदेवनमस्कृतः॥यथानिवेशं स पुनः स्थापया
मास तां विभुः ॥ विलोक्य रुद्रजां देवीं विश्वाघौघविनाशिनीं ॥ ज्ञात्वा तत्र परं तीर्थं कलिकालुष्यनाशनं॥ विशुद्धीकरणं सर्वलो
कानां शांतिदं शिवं ॥ प्रकाशनाय तीर्थस्य स्नात्वा श्वेतत्वमाददे ॥ लोकानुग्रहबुध्या स तत्र रेवातटे स्थितः ॥ न्यंकुवाराहतीर्थस्य
क्रोशांते विश्ववंदितः ॥ तत्र तीर्थे तु यः स्नात्वा पश्येच्च मधुसूदनं ॥ मुच्यते सर्वपापेभ्यो दशजन्मानुकीर्तनात् ॥ मत्स्यः कूर्मो
वराहश्च नरसिंहोथ वामनः ॥ रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥ युधिष्ठिर उवाच ॥ मत्स्येन किं कृतं तात कूर्मेण
द्विजसत्तम ॥ वाराहेण नृसिंहेन वामनेन च किं कृतं ॥ रामेण रामचंद्रेण तथान्यैरपि यत्कृतं ॥ तद्वदस्व मुनिश्रेष्ठ विचित्रं वि
ष्णुकेलितं ॥ सूत उवाच ॥ एवमुक्तः स विप्रेंद्रो धर्मपुत्रेण धीमता ॥ उवाच मधुरां वाणीं तदा धर्मसुतं नृपं ॥ हर्षयन्मुनिसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घांश्च पांडवानपि कृत्स्नशः ॥ शृण्वतामृषिसंघानां विष्णोर्विक्रमणं सकृत् ॥ मार्कंडेय उवाच ॥ शृणु राजन्प्रवक्ष्यामि विष्णोश्चरित
मुत्तमं ॥ दशस्वप्यवतारेषु दशजन्माघनाशनं ॥ प्राप्य पूर्वं भृगोः शापं संसारे जन्मकारकं ॥ वृथावतरणं नेच्छत्सुरकार्यपरो भ
वत् ॥ विश्वपालनशक्तिं स संचिंत्य सुरपूजितः ॥ वपुषा येन यत्कार्यं सिद्धिमेतत्प्रपंचितं ॥ तेन तेनात्र वपुषा तत्तत्संचिंत्य च
क्रिवान् ॥ मत्स्यो भूत्वा पुरा कल्पे प्रीत्यर्थं ब्रह्मणो नृप ॥ ददौ वेदान्समुद्धृत्य दैत्यनीतान्महार्णवे ॥ अमृतोत्पादने पूर्वं कूर्मो भू
त्वा जगद्गुरुः ॥ दधार मंदरं कुध्रं तथा पृष्ठे वसुंधरां ॥ वाराहं रूपमास्थाय देवदेवो जनार्दनः ॥ उज्जहार धरां मग्नां पातालतल
वासिनीं ॥ नरस्यार्धतनुं कृत्वा सिंहस्यार्धतनुं तथा ॥ हिरण्यकशिपोर्वक्षोदारयामास भारत ॥ जटी वामनरूपश्च स्तूयमानः सु
रर्षिभिः ॥ तद्दिव्यं रूपमास्थाय मेदिनीं परिचक्रमे ॥ कृतवांश्च बलीं पश्चात् पातालतलवासिनं ॥ स्थापयित्वा सुरान्सर्वान्गतो वि
ष्णुपुरं स्वकं ॥ जमदग्निगृहे रामो भूत्वा शस्त्रभृतां वरः ॥ क्षत्रियानसुरान् भूपान् निजघान पृथक् पृथक् ॥ तपस्तप्यति देवेशो
महेंद्रेद्यापि भारत ॥ द्विजेभ्यः पृथिवीं दत्वा सपर्वतवनांतरां ॥ तथा दाशरथो रामो रावणं देवकंटकं ॥ सगणं समरे हत्वा राज्यं
दत्वा विभीषणे ॥ पालयित्वा चिरं भूमिं मखैः पूज्य पितामहं ॥ स्वर्गं गतो महातेजा रामो राजीवलोचनः ॥ वसुदेवकुले भूयः
संकर्षणसहायवान् ॥ अवतीर्णो जगन्नाथो वासुदेवो युधिष्ठिर ॥ संबंधी तव सामर्थ्याद्वधार्थं दुष्टचारिणां॥ कंसकेशिजरासंधचाणू
रादिसुरद्विषां ॥ शिशुपालस्य दुष्टस्य मथुरा येन निर्जिता ॥ कर्णदुर्योधनादीनां वधार्थं द्रोणभिष्मयोः॥ सखा तव नरश्रेष्ठ भवि
ष्यति रणाजिरे ॥ तेन त्वं सुसहायेन हत्वा शत्रुन्नरेश्वर ॥ मोक्ष्मसे वसुधां सर्वां भ्रातृभिःसहितोनघ ॥ ततो
बुद्धत्वमपरं नवमं पुरुषोतमः ॥ यास्यते देवदेवशो मधुहंना मधुप्रियः ॥ तेन बुद्धत्वभूतेन देवेन परमेष्ठिना ॥ भ
विष्यति जगत्सर्वं मोहितं सचराचरं ॥ न श्रोष्यंति पितुः पुत्रास्तदा प्रभृति भारत ॥ न गुरुं बांधवाः शिष्याः भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्यत्यधरोत्तरं ॥ जितो धर्मो ह्यधर्मेण सत्यं चै वानृतेन हि ॥ जिताश्चोरैश्च राजानस्त्रीभिश्च पुरुषा जिताः ॥ सीदंति चाग्निहो त्राणि गुरुपुजा न शिष्यति ॥ धार्मिकाश्चावसिदंति मानवा न तु पापिनः ॥ दशाब्दा दशमे वर्षे नारी गर्भमवाप्स्यति ॥ प्रचु रा पुत्रिकास्तत्र ब्राह्मणो हरिपिंगलः ॥ भविष्यति गृहे तस्य जनने दशमे हरिः ॥ एतत्ते कथितं राजान् देवस्य परमेष्ठिनः ॥ कारणं दशजन्मोत्थं सर्वपापक्षयंकरं॥श्वेतवाराहतीर्थे यः स्नात्वा संपूजयेद्विभुं ॥दशजन्मानि राजेंद्र राजराजो भवेद्भुवि॥तत्र श्राद्धेन दत्तेन पितॄणां तृप्तिरक्षया॥भूमिदानेन वै पार्थ भूपतिर्जन्मनां शतं॥ धेनुदानेन भगवान् द्विजभोज्येन शक्तितः॥आजन्मसंचितं पापं नाशमाप्नोति भारत॥परां प्रीतिमवाप्नोति वराहवपुरीश्वरः ॥ इति श्रीनर्मदामाहात्म्ये श्वेतवाराहतीर्थं ॥मार्कंडेय उवाच॥ ततः क्रो शांतरे पार्थ भार्गलेश्वरमुत्तमं ॥ यायाच्छंभुं जगत्प्राणं स्मृतिमात्राघहारिणं ॥ ब्राह्मणो भार्गलोनाम कश्यपस्य कुलोद्भवः ॥ स पूर्वं तपसा सिद्धः सप्तसप्तिरुचिर्बभौ ॥ पूर्णे वर्षसहस्रे स रुद्रस्य गणतां गतः ॥ आराधयन्महादेवं कपर्दिनमुमापतिं ॥ तेनात्र स्थापितः शंभुर्भार्गलेश्वरसंज्ञया ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेच्छूलपाणिनं ॥ नानोपचारपुजाभिः सोश्वमेधफलं लभेत् ॥ दीप दानेन राजेंद्र सर्वकल्मषवर्जितः ॥ दीप्तिमान्सर्वलोकेषु विमानेनार्कवर्चसा ॥ प्रयाति लीलया स्वर्गे देवगंधर्वपूजितः ॥ आश्विनस्य चतुर्दश्यामष्टम्यां वा युधिष्ठिर ॥ स्नात्वा श्राद्धं तथा दत्वा पितॄणां तृप्तिमावहेत् ॥ एकेन द्विजभोज्येन भोजितं स्याद्दिजायुतं ॥ तत्र तीर्थे नृपश्रेष्ठ प्राणत्यागं करोति यः ॥ अनिवर्तिका गतिस्तस्य रुद्रलोके कदाचन ॥ इति श्रीभार्गलेश्वरतीर्थं ॥ मार्कंडेय उ वाच ॥ ततः क्रोशांतरे गच्छेद्रवितीर्थं नृपोत्तम ॥ यस्य संदर्शनादेव मुच्यंते पातकैर्नराः ॥ रवितीर्थे नरः स्नात्वा भास्करं यदि पश्यति ॥ तस्य यत्फलमुद्दिष्टं स्वयंदेवेन तच्छृणु ॥ नाधो न मूको बधिरः कुले भवतिक कश्चन ॥ कुरूपः कुनखीवापि तस्य जन्मानि षोडश ॥ दद्रुश्वित्रककुष्ठानि मंडलानि विचर्चिका ॥ नश्यंते देवभक्तस्य षण्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सान्नात्र संशयः ॥ चरितं तस्य देवस्य पुराणे यच्छ्रुतं मया ॥ तत्तद्वर्णयितुं शक्यं संक्षेपेण निबोधमे ॥ तत्र तीर्थे तु यद्दानं रविमु
द्दिश्य दीयते ॥ विधिना पात्रभूताय तस्यांतो नैव विद्यते ॥ अयने विषुवे चैव चंद्रसूर्यग्रहे तथा ॥ रवितीर्थे तु दत्तानां दानानां
फलमुत्तमं ॥ संक्रांतौ हव्यकव्यादि दानानि नृपसत्तम ॥ सप्तजन्मानि तान्येव ददात्यर्कः पुनः पुनः ॥ शतमिंदुक्षये दानं सहस्रं
तु दिनक्षये ॥ तद्दिने शतसाहस्रं व्यतिपातं त्वनंतकं ॥ युधिष्ठिर उवाच ॥ रवितीर्थं कथं विप्र पुण्यात्पुण्यतरं स्मृतं ॥ विस्तरेण
समाख्याहि श्रवणौ लंपटौ मम ॥ पुण्यतीर्थमिमं श्रोतुं विशेषाद्धर्मसाधने ॥ मार्कंडेय उवाच ॥ शृणुष्वावहितो भूत्वा आदित्ये
श्वरमुत्तमं ॥ उत्तरे नर्मदाकूले सर्वव्याधिविनाशनं ॥ पुरा कृतयुगस्यादौ जाबालेर्ब्राह्मणो भवत्॥वसिष्ठान्वयसंभूतो वेदवेदांगपार
गः ॥ पतिव्रताधर्मशीला तस्य भार्या मनस्विनी ॥ ऋतुकालं स्वस्य मत्वा भार्तारं त्विदमब्रवीत् ॥ वर्तते ऋतुकालो मे यते दारा
नुपस्थितान् ॥ भज मां प्रीतिसंयुक्तः पुत्रकामां तु कामिनीं ॥ एवमुक्तो द्विजः प्राह व्रतवानस्मि भामिने ॥ गच्छेदानीं वरारोहे
दास्याम्यन्यऋतौ पुनः ॥ पुनर्द्वितीये संप्राप्तेऋतौसा प्रत्युपस्थिता ॥ पुनः सा छंदिता तेन व्रतस्थोहमिति प्रभो ॥ इत्थं सा बहुश
स्तेन छंदिता तु पुनः पुनः ॥ निराशा सा भवत्तं तु भर्तारं प्रति भामिनी ॥ दुःखेन महताविष्टा कृत्वाचानशनं मृता ॥ तेन भ्रूण
हनेनैव पापेन सहसा द्विजः॥शीर्णघ्राणांघ्रिरभवत्तपः सर्वव्यनश्यत॥दद्ध्वात्मानं सकुष्ठेन व्याप्तं तु द्विजसत्तमः॥विषादं परमं गत्वा
नर्मदातटमाश्रितः॥अपृच्छद्ब्राह्मणान् श्रेष्ठान् सर्वार्थकुशलान्नृप ब्रूत मे व्याधिनाशाय श्रेष्ठोपायं द्विजोत्तमाः॥ब्राह्मणाऊचुः॥आरोग्यं
भास्करादिच्छेदिति संचिंत्य तं भज ॥विप्रउवाच॥ तस्य स्थानं तु वा तीर्थं कथ्यतां मे द्विजोत्तमाः ॥तपस्तप्स्याम्यहं तत्र भास्करा
राधने रतः ॥द्विजाऊचुः॥ रेवाया उत्तरे कूले शूलभेदे समीपतः॥आदित्येश्वरतीर्थं वै सर्वव्याधिविनाशनं॥तत्र गच्छाविचारेण गंतुं
ते यदिशक्यते॥एवमुक्तो द्विजैर्विप्रो गंतुं तत्र प्रचक्रमे॥व्याधिना परिभूतस्तु घोरेण प्राणहारिणा ॥ यदा गंतुं न शक्नोति तदा तेन

CC-0. In Public Domain. Digitization by eGangotri

विचिंतितं ॥ नासाध्यं ब्राह्मणानां हि विद्यते भुवनत्रये ॥ लिंगपातः कृतो विप्रै र्देवदेवस्य शूलिनः ॥ समुद्रः शोषितस्तैश्च विंध्यवृद्धिर्निवारिता ॥ अहमप्यत्र संस्तंभ्य स्थापयिष्यामि भास्करं ॥ तपोबलेन महता आदित्येश्वरसंज्ञितं ॥ इति निश्चित्य मनसा उग्रे तपसि संस्थितः ॥ वायुभक्षो निराहारो ग्रीष्मे पंचाग्निमध्यगः ॥ शिशिरे ह्यप्सुसंशायि वर्षास्वभ्रावकाशिकः ॥ साग्रे वर्षशते तस्य ततस्तुष्टो दिवाकरः ॥ साक्षाद्रूपः शिवं ध्यायन् लोकानां पर्युपस्थितः ॥ आदित्य उवाच ॥ वरं वरय भद्रं ते यत्ते मनसि वांछितं ॥ अदेयमपि दास्यामि ब्रूहि मात्र चिरं कृथाः ॥ किमसाध्यं हि ते विप्र यदिदानीं तपोबलात् ॥ सम्याकृष्टस्त्वया विप्र साक्षादहमुपागतः ॥ जाबालिरुवाच ॥ यदि तुष्टोसि मे देव यदि देयो वरो मम ॥ मम प्रतिज्ञा देवेश आदित्येश्वरदर्शने ॥ तां तु पालयितुं देव न शक्तो व्याधिपीडितः ॥ शुक्लतीर्थांतिके भानो आदित्येश्वरमूर्त्तिमान् ॥ तस्मादवतरप्रीत्या यदि तुष्टोसि सांप्रतं ॥ एवमुक्तः स देवेशो बहुरूपो दिवाकरः ॥ उत्तरे नर्मदाकूले तत्क्षणाद्दृश्यतां गतः ॥ लोकानां हितमन्विच्छन् जाबालिप्रीतिकाम्यया ॥ ततः प्रभृति तत्तीर्थमादित्येश्वरसंज्ञितं ॥ सर्वपापहरं पार्थ व्याधिदुःखविनाशनं ॥ यस्तु संवत्सरं पूर्णं नित्यमादित्यवासरे ॥ स्नात्वा प्रदक्षिणाः सप्त दत्वा पश्यति भास्करं ॥ यत्फलं लभते तेन तच्छृणुष्व मयोदितं ॥ प्रसूत्यो मंडलानीह दद्रुकुष्ठविचर्चिकाः ॥ तत्क्षणान्नश्यत्ते सर्वे तूलराशिरिवानलात् ॥ धनमित्रकलत्राशां पुरायज्जननत्रयं ॥ मार्तंडं भानुमादित्यं भास्करं तपनं रविं ॥ हंसं दिवाकरं वेति जपन् रोगैः प्रमुच्यते ॥ यस्तु श्राद्धप्रदस्तत्र पितॄनुद्दिश्यसंक्रमे ॥ तृप्यंते पितरस्तस्य पितृदेवस्यभास्करः ॥ गां च दद्याद्द्विजे ध्यात्वा रविमुद्दिश्य भारत ॥ कपिलां वान्यवर्णां वा सुवर्णं वा स्वशक्तितः ॥ स्नात्वा संपूज्य तपनं सर्वपापैः प्रमुच्यते ॥ इति ते कथितं सम्यगादित्येश्वरमुत्तमं ॥ सर्वपापहरं दिव्यं सर्वरोगविनाशनं ॥ इतिश्रीरेवा महात्म्ये आदित्येश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र क्रमपंचशतांतरे॥हुंकारतीर्थं विख्यातं शुक्लतीर्थसमीपतः॥शुक्लवृत्तिकरैर्विप्रैर्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासः कृतो महान् ॥ वासुदेवस्य तीर्थं तत्सर्वलोकेषु पुजितं ॥ तद्धि पुण्यं सुविख्यातं नर्मदायां पुरातनं॥शुक्लतीर्थं परं पुण्यमृषीणां रुचिकारकं ॥ स्नानदानार्चने श्राद्धे निवासे च नराधिप॥परंचातीव साबाधं स्नानतपर्णपूजने॥सर्वान्सत्कर्मसंभारान् दर्भपुष्पाक्षतादिकान् ॥ मुक्तान् रेवातरंगैः स्वैः प्रगृण्हाति पुरस्थितान् ॥ कोपं जनयितुं तेषां तीर्थे विघ्नावभासिनं ॥ देशो निरवकाशश्च स्थातुं तीरस्य तीर्थगः ॥ एकदा ऋषिभिः सर्वैः सामतपस्वांतगोचरे ॥ वासुदेवो जगन्नाथः स्मृतः सर्वार्थदो विभुः ॥ शोकदुःखापहः श्रीशो भक्तानां वांछितार्थदः ॥ स्थानदो यो ध्रुवादीनां भृग्वादीनां च मानदः ॥ स्मृतमात्रः स भगवान् ज्ञात्वा तेषां विचिंतितं ॥ हुंकारमसृजद्राजन् रेवाप्रोत्सारणाय तु ॥ यत्र हुंकारमात्रेण रेवाक्रोशं जगाम ह ॥ सावकाशमयो तीर्थं तीरं च कृतवान्विभुः ॥ यदा प्रभृति राजेंद्र हुंकारेण गतासरित् ॥ तदा प्रभृति तैर्देवः कृतो हुंकारशब्दितः ॥ ब्राह्मणैर्विस्मितैः पार्थ स्नात्वा संस्थापितो हरिः॥ तदा प्रभृति स स्वामी हुंकारः शब्दितो बुधैः ॥ हुंकारतीर्थे यः स्नात्वा पश्यत्यव्ययमच्युतं॥ स मुच्यते नरः पापैः सप्तजन्मकृतैरपि ॥ संसारार्णवमग्नानां नराणां पापकर्मणां ॥ नान्यस्त्राता जगन्नाथं विना नारायणं विभुं ॥ सा जिव्हा या हरिं स्तौति तच्चित्तं यत्त दर्पितं ॥ ता वेव केवलौ श्लाघ्यौ यौ तत्पूजाकरौ करौ॥सर्वदा सर्वकार्येषु ये प्रपन्नास्त्रिधा हरिं॥तेषाममंगलं नास्ति न भयं न पराजयः ॥ यदन्यत्सर्वदेवानां नत्या स्तुत्यार्चया फलं ॥ साष्टांगप्रणिपातेन तत्फलं लभते हरेः ॥ यावंति पत्रपुष्पाणि कृष्णपुजाकृतानि च ॥ तावद्वर्षसहस्राणि विष्णुलोके महीयते ॥ येनार्चितोसौ भगवाननंतः स्नानानुलेपासनगंधपुष्पैः ॥ नीराजनैर्वस्त्रफलप्रदीपैः ॥ स्तुतिप्रणामैरखिलोपचारैः ॥ सम्मार्जनाभ्युक्षणलेपनैश्च जन्मार्जितं नश्यति तस्य पापं ॥ स याति लोकं गरुडध्वजस्य विधूतपापः सुरसंघपूज्यः ॥ शाठ्येनापि नमस्कारं यः प्रयुंजीत केशवे ॥ जन्मप्रभृति तत्पापं गच्छत्याशु नसंशयः ॥ पूजया तुष्यते रुद्रो जपहोमैर्दिवाकरः ॥ शंखचक्रगदापाणिः प्रणिपातेन तुष्यति.॥ एवंविधः स भगवान् हुंकारस्वामि संज्ञितः ॥ तत्र सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापितस्तीर्थे मुनिभिर्वेदपारगैः ॥ हुंकारतीर्थे यः स्नात्वा श्राद्धे संप्रीणयेत्पितॄन् ॥ तुष्यंति पितरस्तस्य यावद्वर्षशतं नृप ॥ हुंकार केशवं भक्त्या पूजयेद्यः स्वशक्तितः ॥ तस्यांतकाले भगवान् न जहाति नृपोत्तम ॥ हुंकारतीर्थमासाद्य भोजयेद्ब्राह्मणान् हि यः ॥ एकस्मिन् भोजिते विप्रे प्रयुतं भोजितं भवेत् ॥ हुंकारतीर्थे राजेंद्र शुभं वा यदिवाशुभं ॥ यत्कृतं पुरुषव्याघ्र स तदक्षयमश्नुते ॥ जायते जलधेरंतस्तस्यांतो वै नजायते ॥ इति श्रीनर्मदामहात्म्ये हुंकारस्वामीविष्णुतीर्थनामएकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१॥मार्कंडेय उवाच ॥ अतः परं प्रवक्ष्यामि सर्वतीर्थेष्वनुत्तमं॥रेवाया उत्तरे कूले शुक्लतीर्थं युधिष्ठिर॥अत्युग्रपापैः परिपूर्ण काया भ्रात्वा समस्ता मवनीं मनुष्याः ॥ प्रक्षालयंति स्वतनुं च यत्र तच्छुक्ल तीर्थं प्रणमामिचाग्र्यं ॥ वांछंति देवादिविमार्गसंस्था मुनीश्वरा ध्यानविदः पुराणाः ॥ यत्तीर्थ सेवां मनुजास्मरंतित च्छुक्लतीर्थं प्रणमामिचाग्र्यं ॥ तेजस्विनां मध्यगतो यथार्कः तेजोभिरग्र्यैः प्रविभातिचैकः ॥ तीर्थेपुसर्वेषुतथैवचैकंतच्छुक्लतीर्थंप्रणमामिचाग्र्यं ॥ अश्वत्थजंबूवटचिंचिणीकपित्थबिल्वाशमीवेतसपाटलाद्याः ॥ पश्यंतितीर्थेतटिनींचधन्यातच्छुक्लती० ॥ अस्यप्रभावंचतुराननोपिवक्तुंचतुर्भिर्वदनैर्नचालं ॥ आद्यंशिवंपापहरंपवित्रंतच्छुक्लतीर्थं० ॥ प्रजापतिः पूर्वमिदंहिविश्वंसृष्ट्वातिदीनंकृपयाविलोक्य ॥ संसृष्टवान्कामदमेवतीर्थंतच्छुक्लतीर्थं ॥ जानंतिनूनंनचमूढमर्त्यामोहाकुलास्तापयुताः सदैव ॥ ब्रह्मैवतीर्थंनिजदेहसंस्थंतच्छुक्लतीर्थं० ॥ विहंगमाः कीटपतंगभृंगाः म्लेंछाःपुलिंदाअपिपापपूर्णाः ॥ मृतादिवंयांति च यत्रतीर्थेतच्छुक्लतीर्थं०॥ अहोविश्वसृजापूर्वंसृष्टंशुक्लेनचेतसा ॥ सात्विकेनचभावेनशुक्लतीर्थंतिताद्विदुः ॥ म्लेंछामांसाशनाः क्रूराः निस्त्रिंशाः पापसंकुलाः ॥ कुमार्गगामिनोलुब्धाः सदाहिंसापरायणाः ॥ शुक्लतीर्थेजलेस्नात्वातक्षणाल्लब्धचेतसः ॥ मलभावंपरित्यज्यशौक्ल्यंभावंप्रयांतिते ॥ सर्वोत्कृष्टं महाभाग्यंलोकानांपुण्यकर्मणां ॥ रेवातटेलोकसृजाशुक्लतीर्थं विनिर्मितं ॥ मुक्तिदश्चतथाविष्णुः कामदः शंकरोयथा ॥ रोगहाचयथासूर्योब्रह्मविद्येवबुद्धिदा ॥ महिम्नस्तीर्थराजस्यपारंगंतुंनश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्यते ॥ वर्षैर्लक्षसहस्रैवनुनंवक्रशतैरपि ॥ तेधन्यायेसदारेवांसत्यांसोमोद्भवांशिवां ॥ शुक्लतीर्थेतुपश्यंतिप्रातरुत्थायमानवाः ॥
स्मरंतिमनसानैवदुष्टास्तीर्थंमलापहं ॥ मनसोनैवसाधूनांकदाचिदपिसर्पति ॥ या गतिः प्राप्यतेयज्ञै रिष्टैस्तुबहुदक्षिणैः ॥
स्नानमात्रेणतीर्थस्यसागतिः प्राप्यतेध्रुवं ॥ अत्रसंसेवनान्नूनंकोनयातिसुरालयं ॥ उपपातकयुक्तोपिमहापापैः प्रपूरितः ॥ येकुर्वं
तिसदास्नानंप्रातः प्रात र्द्विजोत्तमाः ॥ नतेषांपुनरावृत्तिः कल्पकोटिशतैरपि ॥ तत्तीर्थवासिनोलोकाः सदाचारयताश्वये ॥
सर्वेरुद्रगणाज्ञेयानात्रकार्यविचारण ॥ सर्वनद्योविलीयंतेसंप्राप्तेयुगसंक्षये ॥ योगमूर्तिधरादेवीनमृतातेननर्मदा॥ रेवेपारंनगछंतिब्रह्म
द्या स्त्रिदिवेश्वराः ॥ महिम्नोमहसांराशेरद्यापितवनर्मदे ॥ वसवोमरुतः सूर्योयक्षाः किंपुरुषाः सदा ॥ गंधर्वोरगरक्षांसिकु
र्वंतितवसेवनं ॥ त्वत्तीरेसंस्थितादेवामुनयोध्यानवित्तमाः ॥ अव्यक्ताव्यक्तरूपाश्चतवसेवापरायणाः ॥ त्वत्तोयममृतंरेवेकुष्ठरो
गविनाशनं ॥ मानवानांहितार्थायरुद्रदेहाद्विनिःसृत ॥ द्वेविद्येपरमंब्रह्मसदसद्रूपमेवच ॥ निर्गुणंवागुणैर्युक्तंनिःष्कलंसक
लंतथा ॥ ययेदंचेष्टतेविश्वंशक्त्यादेहस्थयासदा ॥ शक्तिरूपंहियच्चान्यत्तत्सर्वंतवनर्मदे ॥ तस्य तीर्थस्य चान्यानि पु
ण्यत्वाद्दर्शनादपि ॥ पृथिव्यां सर्वतीर्थानि कलां नार्हंति षोडशीं ॥ युधिष्ठिर उवाच ॥ तस्य तीर्थस्य महात्म्यं श्रोतुमिच्छामि त
त्वतः॥भ्रातृभिः सहितः सर्वै स्तथान्यैर्विप्रसत्तमैः॥मार्कंडेय उ०॥संभवं शुक्लतीर्थस्य शृणु त्वं पांडुनंदन॥यस्य संदर्शनादेव ब्रह्महत्या
प्रणश्यति ॥ नर्मदा सरितः श्रेष्ठा सर्वपापप्रणाशिनी ॥ बालवृद्धकृतं पापं दर्शनादपि नाशयेत् ॥ त्रिषु लोकेषु विश्रांतं मया भर
तसत्तम ॥ धुनी न नर्मदातुल्या दृष्टा वापि श्रुतापि वा ॥ दृष्टानि सर्वतीर्थानि कृतं तत्परिशीलनं ॥ मोक्षदं न तु सर्वत्रशुक्लतीर्थे
मृते नृप ॥ शुक्लतीर्थस्य महात्म्यं पुराणे यच्छ्रुतंमया ॥ देवर्षिपितृसिद्धानां सरित्तीर्थसमागमे ॥समीपे देवदेवस्य शितिकठंस्य भा
रत ॥ कैलासे पर्वतश्रेष्ठे तन्मे निगदतः शृणु ॥ गंगा कनखले पुण्या कुरुक्षेत्रे सरस्वती ॥ ग्रामे वा यदि वारण्ये पुण्या सर्वत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नर्मदा ॥ गात्रमध्ये यथा पुण्यं ललाटं नृपसत्तम ॥ शुक्लतीर्थं तथा श्रेष्ठं सर्वतीर्थेषु नार्मदं ॥ चतुष्पदेषु सुरभी वर्णानां ब्राह्मणो यथा ॥ प्रधानं सर्वतीर्थानां शुक्लतीर्थं यथा नृप ॥ ग्रहेष्वपि यथादित्यो नक्षत्रेषु यथा शशिः ॥ उमा देवी यथा स्त्रीणां आदित्यस्तेजसांयथा ॥ साध्वीष्वरुंधती यद्वत्सत्यं धर्मेषु पार्थिव ॥ मन्त्राणां प्रणवो यद्वत्सावित्री जप्यवस्तुषु ॥ एवं हि सर्वतीर्थेषु शुक्लतीर्थमनुत्तमं ॥ दुर्विज्ञेयो यथा लोके परमात्मा सनातनः ॥ सुसूक्ष्मत्वादनिर्देश्यं शुक्लतीर्थं तथा नृप ॥ मंदभाग्यत्वमापन्ना दंभशाठ्यसमन्विताः ॥ शुक्लतीर्थं न जानंति नर्मदातटसंस्थितं ॥ एकः पुरा धरापृष्ठे पितृणामार्तिनाशनः ॥ चाणक्योनाम राजर्षिः शुक्लतीर्थविदुत्तमः ॥ युधिष्ठिर उवाच ॥ कौसौ द्विजवरश्रेष्ठ चाणक्यो राजसत्तमः ॥ शुक्लतीर्थस्य यो वेत्ता नान्यो वेत्ता कथं भवेत् ॥ केनोपायेन तत्तीर्थं तेन ज्ञातं धरातले॥तदहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ मार्कंडेय उवाच॥ इक्ष्वाकुसंभवो राजा नप्ता शुद्धोदनस्य तु ॥ चाणक्योनाम राजर्षिर्भुनक्ति पृथिवीमिमम्मां ॥ विक्रांतो मतिमान् शुरः सर्वभूतहिते रतः ॥वंचितःसहसा धूर्तैर्दानवैः काकतां गतैः ॥ युधिष्ठिर उवाच ॥ कथं स वंचितो राजा वायसैः केन हेतुना ॥ पुरा येन प्रतिज्ञातं धीगर्वेण महात्मना ॥ न जीवे वंचितोन्येन प्राणांस्त्यक्षे न संशयः ॥ एतदाख्याहि विप्रेंद्र परं कौतूहलं हि मे॥ मार्कंडेय उवाच ॥ सुंदोपसुंदयोः पुत्राः सप्तासन्वायुविक्रमाः ॥ ब्रह्मणो वितते यज्ञे पुरा विघ्नार्थमागताः ॥ दानवाः क्रूरकर्माणः पूर्ववैरस्मराः सुरैः॥ब्रह्मणा च तदा ज्ञात्वा शप्तास्ते काकतां गताः ॥ इंद्रस्यानुचरा जाता ब्रह्मावाक्य प्रणोदिताः ॥ धीगर्वे लोकविख्यातं श्रुत्वा चाणक्यभूपतिं ॥ शक्रेण ते समादिष्टा वंचनाय युधिष्ठिर ॥ स्वजातिमध्यगास्तेच प्राप्य चाणक्यमादरात् ॥ छलं विलोकयंत्यत्र विचरंत इतस्ततः ॥ एकदा तुस्वबुध्या स राजा तान्वीक्ष्यवायसान् ॥ यथात्मवंचने प्राप्तानप्राकृतविचेष्टितान् ॥ लीलया ग्राहयामास तदा तान्कर्मकोविदः ॥ भुंजानाः प्रत्यहं स्वन्नं ते चान्ये वायसाःकिल ॥ विष्ठया वंचयामासुर्विश्वरुपार्चकं नृपं ॥आत्मानं वंचितं ज्ञात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहीतांस्तां श्च वायसान् ॥ ताडयामास तिव्रेण दंडेनाशुद्ददानवान् ॥ वायसाऊचुः॥ मा वधस्व महाराज कस्मिंश्चित्कारणांतरे ॥ आगताश्च घृनाश्चैव त्वया कोपेन वीक्षिताः॥निरस्ता वा निरस्तावा यास्यामः परमां गतिं॥ब्रह्मशापाद्विनिर्मुक्ति स्त्वद्वाक्य कारणे भवेत्॥तदादिश महाराज यथा तव महत्प्रियं॥कृत्वा मुक्ताभविष्यमो ब्रह्मणो वचनं यथा॥तच्छ्रुत्वा वचनं तेषां चाणक्यो नृपसत्तमः॥ प्रोवाच वंचितइव वंचनेच्छुर्यमं तदा ॥ चाणक्य उवाच ॥ मयि सत्यं प्रतिज्ञाय वचनं चेत्करिष्यथ ॥ मोचयिष्ये ततो युष्मान्सत्यं सत्यं मयोच्यते ॥ छद्मना विकृतैर्भावैर्लोकोयं वंचितो मया ॥ देवाश्च ब्राह्मणाश्चापि निर्द्रव्याश्च कृताः प्रजाः ॥ न वंचितोहं केनापि किंतु युष्माद्दिना द्विजाः ॥ तत्रापि लेशमात्रं हि किमुस्का बहुधा पुनः ॥ नायं जीवेद्ददत्येवं वंचितः केनचित्काचित् ॥ तस्मात्तीर्थं विजानंतु गत्वाद्य यमसंसदि ॥ श्रुत्वा च पुनरागत्य तन्ममाख्यातुमर्हथ ॥ सत्यवाक्यं गृहीत्वा वः प्रेषयामि यमांतिकं ॥ शीघ्रं निवेद्यतां मह्यंश्रुत्वा वै तस्य भाषितं ॥ तेनैवमुक्तास्ते काका गृहीत्वा सत्यमुत्तमं ॥ प्रेषिता यमलोकाय स्रक्चंदनविभूषिताः ॥ चाणक्यउवाच ॥ तत्र धर्मपुरं गत्वा विचरध्वमितस्ततः ॥ यदिपृच्छति धर्मात्मा यमः संयमनो महान् ॥ के यूयं कुत आयाता ब्रूत केन विभूषिताः ॥ मदर्थे भारती तस्य कथनीया ह्यशंकितैः ॥ इक्ष्वाकुवंशजो राजा चाणक्योनाम धार्मिकः ॥ द्वादशाहे मृतस्यास्य तर्पिता भोजनार्चनैः ॥ मार्कंडेय उवाच ॥ तच्छ्रुत्वा वचनं तस्य गतास्ते यममंदिरं ॥ क्रीडंतः प्रांगणे तस्य स्रक्चंदनविभूषिताः ॥ ते दृष्ट्वा धर्मराजेन पृष्टाश्चैव पुनः पुनः ॥ यमउवाच ॥ कुतः समागता यूयं वायसाः केन भूषिताः ब्रूत तन्मे प्रयत्नेन वायसास्त्वविशंकिताः ॥ काकाउचुः ॥ इक्ष्वाकुसंभवो राजा चाणाक्योनाम धार्मिकः ॥मृतस्य द्वादशाहे वै तस्य संतर्पिता वयं ॥ तत्श्रुत्वा वचनं तेषां तदा वैवस्वतो यमः ॥ चित्रगुप्तं कलिं कालं वीक्ष्यतानिदमब्रवीत् ॥ अंडजस्वेदजादीनां जगत्यपि सदाऽखिले ॥ विहिता ब्राह्मणा नूनं गतिर्मत्संनिधौ स्वयं ॥ ब्रह्मणा लोककर्तृगामपि तन्निखिलं वृथा ॥ मृतस्त्वसौ दु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राचारश्चाणक्ये नामतस्त्विह ॥ अन्विष्यतां पुराणेषु सेतिहासेषु या गतिः ॥ कथं क कर्मणा केन मृतो नायाति मे पुरं ॥ ततस्तै र्द्धर्मपालैस्तु धर्मराजप्रणोदितैः॥ निरीक्षिता पुराणेषु श्रुतौ वा कर्मजा गतिः ॥ प्रोवाचैवं सांतिवचो धर्मो धर्मभृतां वरः ॥ शृण्वतां धर्मपालानां मेघगंभीरया गिरा ॥ ज्ञातो मया विशेषोत्र विचिंत्य च पुनः पुनः ॥ तं मेश्शृणुत कालाद्यास्तथैव च महर्षयः ॥ जीवितं मरणं चैव द्वयं शिष्येत पंडितः ॥ जीवितं दानभोगाभ्यां मरणं रणतीर्थयोः ॥ अतः सुतीर्थमरणं वांछंतीहोत्तममानवाः ॥ शुक्लतीर्थे मृतानां तु नर्मदोत्तरनीरजे ॥ अडंजस्वेजादानां न गतिर्मम संनिधौ ॥ तत्तीर्थं कामिकं लोके ब्रह्मविष्णुमहेश्वरैः ॥ समाधितारमखिलं विन्यस्तमिहभारत॥ पापोपपातकैर्युक्ता ये नरा नर्मदाजले ॥ शुक्लतीर्थे मृता न्यूनं न ते यांति यमालये ॥ मार्कंडेय उवाच ॥ एतत् श्रुत्वा च वचनं ते काका यमभाषितं ॥ आगताः शीघ्रगाः पार्थ दृष्ट्वा यमपुरं तथा ॥ प्रणता पृछितास्तूर्णं यथावृत्तं यथाश्रुतं ॥ वायसाः कथयामासुः पूर्वदेवा नृपं प्रति ॥ तवादेशाद्गतास्तत्र यमस्य सदनं वयं ॥ पृथिव्या दक्षिणे भागे त्वनि यत्र हुयोजनं ॥ तत्पुरं कामदं दिव्यं स्वर्गप्रकारतोरणं ॥ अनेकगृहसंबाधं मणिरत्नविभूषितं ॥ चतुः पथैश्चत्वरैश्च घंटाकिंकिणिनादितं ॥ उद्यानवनसंछन्नं पद्मिनीखंडमंडितं ॥ हंससारससंघुष्टं कोकिलाकुलशाद्वितं ॥ मयमायोपविहितं स्वर्गलोकमिवापरं ॥ गतास्तत्र ततश्चान्यैर्यमदुतैर्यमाज्ञया ॥ विदिताः प्रेषितास्तत्र यत्र सौरिः वृषासनः ॥ प्रणम्य नीतैर्दष्टोसौ सिंहासनगतः प्रभुः ॥ महाकायो महास्कंधो महाजंघो महोदरः ॥ महामहिषमारुढो महामुकुटभूषितः ॥ तत्र मृत्युः कलिः कालश्चित्रगुप्तो बकस्तथा ॥ सभागतास्तदा दृष्ट्वा ज्वलिताः पावका इव ॥ पुण्यपापानि जंतुनां श्रुतिस्मृत्यर्थशंसनैः॥विचारयंतः सततं तत्पराःस्ते दिवानिशं॥ ततोस्माभिः प्रणामितो यमः संयमनो महान् ॥ पप्रच्छागमने हेतुं तथास्माभिर्निवेदितं ॥ तस्मै यत्तच्छृणुष्वात्र नृपते धूर्तचेष्टितं ॥ उज्जयिन्यां महीपालश्चाणक्योभूत्प्रतापवान् ॥ द्वादशाहेमृतस्यास्य भूत्का प्राप्तास्तवांतिकं ॥ ततोस्मद्वचनं श्रुत्वा कंपयित्वाशिरो य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मः॥ प्रोवाच वचनं साधु सभामध्ये हसन्निव ॥ अस्ति तत्कारणं येन चाणक्यः पापपूरुषः॥ न प्राप्तो यमलोकं हि सर्वलोकभया
वहं॥विचिंतयद्भिः सर्वैस्ततपुनः प्रोवाच वैयमः॥शुक्लतीर्थे मृतानां तु नर्मदायां परं पदं॥जायते सर्वजंतूनां नात्र काचिद्विचारणा॥
अवशः स्ववशो वापि जंतुस्तत्तीर्थमंडले॥मृतो नूनं शिवं गच्छेच्छिवस्यानुचरो भवेत्॥संति तीर्थान्यनेकानि गतवुच्चावचानिच॥न शुक्ल
तीर्थतुलनां प्राप्नुवंतीति निश्चयः॥प्रभासे च प्रयागे च कुरुक्षेत्रे मरंकटे॥द्वारवत्यां तथा काश्यां शुक्लतीर्थे च हंसके॥त्रिविधा जायते
मुक्तिश्चित्रगुप्त शृणुष्व तत् ॥ सालोक्या चैव सारूप्या सानिध्या शीघ्रतः क्रमात् ॥ क्रमात्काला च्चतुर्थीस्यात्सायोज्या तत्र वै मृते
॥न मत्समीपमायाति जंतुस्तत्र मृतः क्वचित् ॥ तस्य तद्वचनं श्रुत्वा नीचैर्निर्गत्य वै पुरात् ॥ आगच्छंतस्त्वपश्यामो विविधाः प्रा
णियातनाः ॥ नरका घोररूपाश्च तान् शृणुष्व नराधिप ॥ त्रिंशत्कोट्यो हि घोराणां नरकाणां निरीक्षिताः ॥ दृष्ट्वा भीताः परमा
र्तिं गतास्तत्र महापथि ॥ नरको रौरवस्तत्र महारौरव एव च ॥ पीषगः शोषणश्चैव कालसूत्रोऽस्थिभंजनः ॥ तामिस्रश्चांधतामि
स्रः क्रमिपूतिवहस्तथा ॥ नदी वैतरणी दृष्टा सर्वपापप्रणाशिनी ॥ शीतलं स्वच्छसलिलं पीयते ह्यमृतोपमं ॥ तदेव तत्र पापानां
शोणितं परिवर्तते ॥पूतिगंधं कृमिमयं फेनबुद्बुद संकुलं॥अगाधंग्राहसंयुक्तं पापिनामतिपीडनं॥असिपत्रवनं चान्यदृष्टान्यामहती शि
ला ॥ अग्निपुंजनिभा चान्या शाल्मलीधमिता तथा॥क्रकचः कर्तरी शूली कुंभीपाको निकृंतनः ॥ झलः भौतैलयंत्रश्च भ्राष्ट्रोयंत्रश्च
धातुकः ॥ खदिरांगारकश्चैव कृतघ्नो यत्र धम्यते शिवतुश्चोष्णिकश्चैव काकगृध्रश्च जविनः ॥एवमादि तथैवान्ये शतसाहस्रसंख्यया॥
घोरा घोरतरा दृष्टाः क्लिश्यंते येषु पापिनः ॥ वाचिकैर्मानसैः पापैः कर्मजैश्च पृथग्विधैः ॥ अहंकारकृतैर्दृढैर्मायाश्रितकुपौरुषैः ॥ पि
ता माता गुरुर्भ्राता अनाथा विकलेंद्रिया॥भ्रमंत्यनावृतां येषां तेषा पातस्तु रौरवे॥तत्र ते द्वादशाब्दानि क्षपित्वा रौरवेऽधमाः॥ इह
मानुष्यके लोके दीनांधास्ते भवंति वै ॥ देवब्रह्मस्वहर्तॄणां अन्येषां पापकर्मिणां ॥ महारौरवमाश्रित्य तेषां वासो यमालये॥ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालेन महता पापाः पापेन वेष्टिताः॥जायंते कंटकैर्भिन्नाः कोशौ वाकोशकारकाः ॥ मृगपक्षिपतंगानां घातका मांसखादकाः ॥ पी
षणं नरकं यांति शोषणं जीवबंधनात् ॥ इह मानुषतां प्राप्ताः पंग्वंधबधिरा नराः ॥ गुरूणां ब्राह्मनां वाप्यलीकं
ब्रुवतां सतां ॥ पततं जायते राजन् नरके कालसूत्रके यत्र ॥ या यातना घोरा विहिता शास्त्रदर्शिभिः ॥ मु
क्ता तामागता ह्येते लभंते चांत्यजां गतिं ॥ कुब्जा वामनकाः पापाजायंते दुःखभाजिनः ॥ ये त्यजंति स्वकां
भार्यां मूढाः पंडितमानिनः ॥ हितामनागसां साध्वीं सुशीलां कुलवंशजां ॥ ते यांति नरकं घोरं तामिस्त्रं नात्र
संशयः ॥ ततो वर्षशतस्यातादिह मानुष्यतां गताः ॥ दुश्चर्मणो दुर्भगाश्च जायंते दद्रुकंडुकाः ॥ मानकूटं तुलाकूटं वंचद्रोहानृतं च
रन् ॥ नरके चांधतामिस्त्रेपच्यते वै नराधिप ॥ शतसाहस्त्रिकाब्दं स उषित्वा तत्र संकटे ॥ इहावतीर्णः शत्रूणां मध्ये पंग्वंधदैन्य
रन् ॥ जायते सुचिरं कालं शत्रुभिः परिभूयते ॥ पितृदेवद्विजातिभ्यो ह्यदत्वा यस्तु भुंजाति ॥ कृमिभक्षे स नरके निपतेद्धात्म
घोषकः ॥ तत्र तंवत्सरशतं कृमयोदंति निर्घृणाः ॥ इह वा जायते कालात् अशुचिः कृपणात्मकः ॥ दुर्गंधः क्रूरदशेग्धा परभो
ग्योपजीवकः ॥ अग्निदो गरदश्चैव लोभमोहरतो नरः॥नरके विषसंपूर्णे प्रपतेत्स दुरात्मवान् ॥ तत्र वर्षशतं पूर्णं मज्जत्युन्मज्जाति
स्थितः ॥ भुवि मानुषतां प्राप्य स्याद्दीनः कृपणोपि सः ॥ पादुकोपानहौ छत्रं शय्या प्रावरणानि च ॥ अदत्वा, दंशमशकैर्भक्ष्यते
जन्मसप्ततिः ॥ या सा वैतरणी घोर नदी रक्तप्रवाहिनी ॥ पिबंति रुधिरं तत्र ये तु यांति रजस्वलां॥ असिपत्रवने घोरे क्षिप्यंते
पापकारिणः॥परपीडारता नित्यं पुष्टमांसोपजीविनः ॥ गुरुदाररता नित्यं महापातकिनो नराः ॥ शाल्मलीमुपगूहंति वन्हितप्तां
पुनः पुनः ॥ आयसीं कंटकैर्व्याप्तामगम्यागामिनश्च ये ॥ क्रूरा सा यातना तेषां जायते जन्मसप्ततिः॥ ज्वलल्लोहशिलायां तु घोरा
यां बहुविस्तरां ॥ सुप्ता लुठंति सततं परदाररता नराः ॥ परस्य योषितं गत्वा ब्रह्मस्वमपहृत्य च ॥ अरण्ये निर्जले देशे स भवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रूरराक्षसः ॥ देवस्वं ब्राह्मणस्वं च लोभतोवा हरेच्च यः ॥ स पापो नरकान् भुक्त्वा गृहश्वा जायते भुवि ॥ एवमा
दीनि पापानि भुंजनास्तु यमालये ॥ दृष्ट्वा श्रुना कथयतां दूतानां यमशासनात् ॥ रथैरन्ये गजैरन्ये केचिद्वाजिभिरावृताः
दृष्टास्तत्र ॥ महाभाग तपः संचयसंभृताः ॥ गोदातुः स्वर्णदातुश्च भूमिरत्नप्रदस्य च शय्यासनगृहादीनां लोकास्तु
कामदा नृप ॥ अन्नपानीयंयुक्तं ये ददंति नरोत्तमाः ॥ ते स्वर्गतुष्टपुष्टाश्च तृप्ताः क्रीडंति सर्वतः ॥ अत्र यद्दीयते
दानमपि वालाग्रमात्रकं॥ देशे काले च पात्रे च विधिना नृपसत्तम ॥ तदक्षयफलं सर्वं जायते प्रतिजन्मनि ॥ एतत्ते
कथितं सर्वं यदृष्टं यत्श्रुतं मया ॥ यदत्रानंतरं कृत्यमभिप्रेतं कुरुष्व तत् ॥ तत् श्रुत्वा वचनं तेषां चाणक्यो तुष्ट मानसः ॥ वि
सर्जयामास खगानभिनंद्य पुनः पुनः ॥ गतेषु तेषु सर्वस्वं दत्वा विप्रेभ्य एव च ॥ कामक्रोधौ वशे कृत्वा जगामामरपर्वतं ॥ त
त्र वध्वोडुपं गाढं कृत्वा रज्वाबलंबितं नीलीरक्तं ह्युभयतो रज्जुद्वयमुपाक्षिपन् ॥ चिंतयन् कं स्मरामीति मूर्तिषु त्रिषु मुक्तिदं ॥
द्विजवाक्यमिदं प्राप्य मोक्षदोधोक्षजस्त्विति ॥ प्लवमानो जगामाशु ध्यायमानो जनार्दनं ॥ आरोग्यं भास्करो दत्ते धनं दत्ते हुता
शनः ॥ दत्ते ज्ञानं तुसर्वज्ञो दत्ते मोक्षमधोक्षजः ॥ निश्चित्यैवं नरपतिः प्लवेनाशु महानदीं॥ततार तीर्थमाकांक्षन् शुक्लाख्यं भवजा
न्हवीं ॥ नीलीरक्तं यदभवन्मोचकं सूत्ररज्जुकं ॥ शुद्धस्फटीकसंकाशं जातं तत्राश्ववैक्षत ॥ दृष्ट्वा च मकुते राजाचिरं संचिंत्य चाच्यु
तं ॥ प्रविश्य विमले तोये गतोसौ वैष्णवं पदं ॥ ध्यायंति यं योगविदः पुराणा नारायणं त्वच्युतमप्रमेयं ॥ तं प्राप्तवान् राजसुतो
महात्मा क्षिप्त्वातनुं नार्मदशुक्लतीर्थे ॥ एतत्ते कथितं राजन् चाणक्याख्यानमुत्तमं ॥ तथान्यत्संप्रवक्ष्यामि महात्म्यं तच्छृणुष्व
मे ॥ इति श्रीनर्मदामहात्म्ये शुक्लतीर्थे चाणक्यनृपसिद्धिर्नाम द्विचत्वारिंशदाधिकशततमोध्यायः ॥ १४२ ॥ श्रीमार्कंडेय उ
वाच॥नास्ति लोकेषु तत्तीर्थं पृथ्व्यां वाथ नरेश्वर ॥ शुक्लतीर्थं समासाद्य उपमानेन दीयते ॥ शुक्लतीर्थं सदैवेह नर्मदायां व्यव २४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितं ॥ प्रत्युदक्प्रवणे देशे सुरसिद्धर्षिसेवितं ॥ सर्वधर्ममयं बीजमिह मुक्तं स्वयंभुवा ॥ सर्वज्ञानतपोबीजमृषिभिस्तत्वदर्शिभिः
॥ आदिकल्पसमारंभे तथा सिद्धैरिहाग्रतः ॥ समाधानसमारोपं मुक्तिबीजं निवेशितं ॥ अशुक्लं शुक्लतां याति शुक्लं च परमार्थतां
॥ तीर्थेस्मिन्नृपशार्दूल शुक्लतीर्थमतो विदुः॥वैशाखे च तथा मासि शुक्ले कृष्णे शिवाहानि॥कैलासादुमया सार्द्धं स्वयमायातिशंकरः
॥ मध्यान्हसमये स्नात्वा पश्यत्यात्मानमात्मनि ॥ब्रह्मविष्णिंवइसहित क्षेत्रे स्नातुं समागतः॥कार्तिकाषाढवैशाखमाघपूर्णादिने स्वयं
॥ ब्रह्माच्युतो रविस्नात्वा महादेवं प्रपश्यति ॥ देवराजः सुरैः सार्द्धं वायुमार्गे व्यवस्थितः॥ भूताष्टम्योर्महादेवं स्नात्वा पश्यति भक्ति
तः ॥ गंधर्वाप्सरसो यज्ञाः सिद्धविद्याधरोरगाः॥ तद्दिने तेपि देवेशं दृष्ट्वा मुंचंति किल्बिषं ॥अर्द्धयोजनविस्तारं तदर्धेनतदायतं ॥ शु
क्लतीर्थं महापुण्यं महापातकनाशनं ॥ यत्रस्थितैः प्रदृश्यंते वृक्षाग्राणि नरोत्तमैः॥तत्र स्थापयितेते सर्वे मुच्यंते पातकैर्नराः ॥ पापोप
पातकैर्युक्तो नरः स्नात्वा विमुच्यते ॥ भीतभीता नरश्रेष्ठ भ्रूणहत्यापि नश्यति ॥ तत्र तिष्ठति देवेश उमया सह शंकरः॥ वैशाख्यां
तु विशेषेण कैलासादेत्य भारत ॥ सरिद्भिः सह सर्वाभिः सतीर्थाभिः क्रतुव्रतैः ॥ शुक्लत्वमृषयः सर्वे योगिसिद्धामरैः सह ॥ ति
थ्यांते प्रापुरतुलं पुरापार्थिवसत्तम ॥ तेन तीर्थं महापुण्यं शुक्लाख्यं पापनाशनं ॥ कथितं ब्रह्मणा पूर्वं मया ते समुदाहृतं ॥ रजके
न यथा धौतं वस्त्रं भवति निर्मलं ॥ तथा कलेवरं स्नातं शुचिस्यादाशु भूपते ॥ पूर्वे वयसि पापानि कृत्वा पुष्टानि मानवः ॥ अ
होरात्रोषितो भूत्वा शुक्लतीर्थे व्यपोहति ॥ शुक्लतीर्थे महाराज दत्तो रेवाजलांजालिः ॥ कल्पकोटिसहस्राणि पितरस्तेन तर्पिताः ॥
न माता न पिता बंधुः पततं नरकार्णवे ॥ उद्धरंति यथा पुण्यं शुक्लतीर्थं नरेश्वर ॥ तपसा ब्रह्मचर्येण न तां गच्छंति सद्गतिं ॥ शु
क्लतीर्थे मृतो जंतुर्देहत्यागेन यांलभेत् ॥ कार्तिकस्य तु मासस्य शुक्ले[1]भूता दिने नृप ॥ घृतेन स्नापयेद्देवमुपोष्य प्रयतो भवेत् ॥ स्ना

१ (चतुर्दश्यां) २ (चतुर्दश्याष्टम्योः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वा प्रभाते रेवायां दद्यात्सघृतंकबलं ॥ सहिरण्यं यथा शक्त्या समुद्दिश्य महेश्वरं ॥ स गच्छति महातेजाः शिवलोकं मृतो नरः ॥
एकविंशकुलोपेतो यावदाहूतसंप्लवं ॥ शुक्लतीर्थे नरः स्नात्वा उमारुद्रं च योर्चयेत् ॥गंधपुष्पाक्षतैर्धूपैः सोश्वमेधफलं लभेत् ॥ मासो
पवासं यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर॥स मुच्यते महापापैः सप्तजन्मार्जितै रपि॥उष्ट्रीक्षीरमजाक्षीरमायश्राद्धेषु भोजनं॥वृषलीगमनं
चैव तथाभक्षस्य भक्षणं ॥ अविक्रेयानृते पापं माहिष्ये ऽयाज्ययाजके ॥ वार्द्धक्ये पंक्तिगरदे देवब्राह्मणनिंदके ॥ एवमादीनि पा
पानि यानि चान्यानि भारत ॥ शुक्लतीर्थे विनश्यंति कृत्वा चांद्रायणव्रतं ॥ शुक्लतीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ तस्य ते
षुसहस्राणि तृप्तिं यांति सुतर्पिताः ॥ पादुकोपानहौ छत्रं शय्यामासनभोजने ॥ स्वर्णं रूप्यं च कुप्यं च धान्यमन्नं रसान्नृप॥ वा
ससी जलमन्नं च शुक्लतीर्थे ददंति ये ॥ ते सर्वे कामसंपूर्णाः शिवलोकं व्रजंति हि ॥ तत्र तीर्थे तु यो भक्त्याशिवमुद्दिश्य भारत॥
भिक्षामात्रप्रदश्चापि स सत्रस्य फलं लभेत् ॥ यतीनां व्रतीनां चैव शुक्लतीर्थनिवासिनः ॥ अपिवालाग्रमात्रं हि दत्तं भवति चाक्षयं
॥ अग्निप्रवेशं यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर ॥ अग्निलोकनिवासी स्याच्छिवलोके युगायुतं॥ जलप्रवेशं यः कुर्याच्छुक्लतीर्थे समाहि
तः ॥ रागद्वेषविनिर्मुक्तो हृदि ध्यात्वा जनार्दनं ॥ सर्वकामसुसंपूर्णः सगच्छेद्वारुणं पुरं ॥ शुक्लतीर्थं परं पार्थ सर्वव्याधिविनाशनं ॥
नास्ति तेन समं तीर्थमित्याहादौ महेश्वरः ॥ दर्शनात्स्पर्शनात्तस्य स्नानाद्दानात्तपोजपात् ॥ होमाद्यैश्चोपवासाच्च शुक्लतीर्थे महाफलं
॥ योजनं तत्स्मृतं क्षेत्रं समंताद्देवसेवितं ॥ शुक्लतीर्थं त्रिलोकेषु विख्यातं पापनाशनं॥ पादपाग्रेण दृष्टेन ब्रह्महत्यां व्यपोहति ॥ दे
व्यासह सदा भर्गस्तत्र तिष्ठति शंकरः ॥ कृष्णपक्षे चतुर्दश्यां वैशाखे च विशेषतः ॥ स्वकाल्लोकाद्विनिर्गत्य तत्र संनिहितो भवेत् ॥
क्षारदाहाम्लशीताद्यैर्मलं मुंचंति धातवः॥आजन्मजनितं पापं त्यजतीति नरो ध्रुवं॥स्नानं दानं तपः श्राद्धमनंतं तत्र दृश्यते॥शुक्लती
र्थात्परं तीर्थं न भूतं न भविष्यति॥तपसा ब्रह्मचर्येण यज्ञैर्दानेन वा पुनः॥न तां गतिमवाप्नोति शुक्लतीर्थे तु यां लभेत्॥तत्र स्नात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरो राजन्पुनर्जन्म न विंदति॥अयने वा चतुर्दश्यां संक्रांतौ विषुवे तथा॥स्नात्वा तु पोषितः श्रद्धो विजितात्मा समाहितः॥दानं दत्त्वा यथाशक्तिर्नच्यवेदैश्वरात्पदात्॥सत्पात्रायब्रुवन्नेवं प्रीयेतां हरिशंकरौ॥तीर्थस्यास्य प्रभावेन सर्वं भवति चाक्षयं॥अनाथं दुर्गतं विप्रं नाथवं तमथापि वा॥उद्वाहयति यस्तत्र तस्य पुण्यफलं शृणु॥यावत्तद्रोमसंख्यानं तत्प्रसूतिकूलेषु च॥तावद्वर्षसहस्राणि रुद्रलोके महीयते॥न रोगो न जरा तत्र यत्र देव उमापतिः ॥ अनाशकं तु यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर॥अनिवर्ता गतिस्तस्य रुद्रलोकान्न संशयः॥अवशः स्ववशो वापि जंतुस्तत्क्षेत्रमंडले ॥ मृतः स तु न संदेहो रुद्रस्यानुचरो भवेत् ॥ शुक्लतीर्थे च यः कन्यां शक्तयाद द्यादलंकृतां ॥ विधिवद्वा नरश्रेष्ठ कुरुते वृषमोक्षणं ॥ तस्य यत्फलमुद्दिष्टं पुराणे रुद्रभाषितं ॥ तदहं ते प्रवक्ष्यामि शृणुष्वैकमना नृप ॥ यावंति तस्य रोमाणि सर्वांगेषु पृथक् पृथक् ॥ तावद्वर्षसहस्राणिस्वर्गलोके सुखं वसेत् ॥ शुक्लतीर्थे तु यद्दत्तं ग्रहणे चंद्रसूर्ययोः ॥ वर्द्धते तद्गुणं तावद्दिनानि दशपंचच ॥ शुक्लतीर्थे शुचिर्भुत्वा यः करोति प्रदक्षिणं ॥ प्रदक्षिणीकृता तेन मही नास्त्यत्र संशयः ॥ शोभनं मिथुनं यस्तु रुद्रमुद्दिश्य पूजयेत् ॥ सप्तजन्मानि वै तस्य न वियोगो भवेत्कचित् ॥ ता वद्गर्जंति तीर्थानि क्षेत्राणि भरतर्षभ ॥ यावन्न शुक्लतीर्थं हि सेव्यते वांछितार्थदं ॥ एतत्ते कथितं राजन् शुक्लतीर्थे हि यत्फलं ॥ य इदं शृणुयाद्भक्तया पुराण विहितं फलं ॥ स लभेन्नात्र संदेहः सत्यमेतन्मयोदितं ॥ पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनं ॥ मोक्षार्थी लभते मोक्षं स्नानदानात्परं पदं॥ रहस्यमेतत्परमं शुक्लतीर्थं युधिष्ठिर ॥ पठनात् श्रवणादस्य सर्वक्रतुफलं लभेत् ॥ इति श्रीवायूक्तशिवसंहितायां नर्मदामहात्म्ये शुक्लतीर्थ महात्म्यंनाम त्रीचत्वारिंशदधिशकशततमोऽध्यायः ॥ १४३ ॥ श्रीमार्कंडेय उवाच ॥ ततो यायान्महाराजरेवाया दक्षिणे तटे ॥ क्रोशद्वयांतरे पुण्ये तीर्थात्कलकलेश्वरात् ॥ संगमेश्वरसंज्ञं तु तीर्थं पापक्षयंकरं ॥ धनदस्तत्र विश्रुतो महूर्तं नृपसत्तम ॥ रावणाभिद्रुतः पूर्वं लंकायाः शंकरं व्रजन् ॥ स्वयं पित्रा समादिष्टः कैलासे धरणीधरे ॥तस्य पादेन नमितं मधुपूर्णं कमंडलु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ कमंडलुक्षता तत्र च्युता मणिलता तदा॥ प्रत्ययार्थं नृपश्रेष्ठ अद्यापि धरणीतले॥रक्तवर्णा हि पाषाणा दृश्यंते विविधप्रभाः ॥
विंध्याद्रिशिखराद्याता पुण्यतोया सरिद्वरा ॥ तदा नीरस्वरूपेण नाम्ना मधुमती शुभा ॥ कमंडलुजलोद्भूता यक्षराजस्य दिक्पतेः
॥ प्रविष्टा नर्मदातोये सर्वपापप्रमोचने ॥ संगमे तत्र यः स्नात्वा पूजयेत्संगमेश्वरं ॥ कुबेरस्थापितं लिंगं विनोदात्स्वसरिद्भवात् ॥
अश्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयं ॥ घंटा ध्वजं वितानं च यो दद्यात्संगमेश्वरं ॥ हंसयुक्तविमानस्थो दिव्यस्त्रीशतसंवृतः ॥
सरुद्रपदमासाद्य रुद्रस्यानुचरो भवेत् ॥ दधिभक्तेन देवस्य यः कुर्याल्लिंगपूरणं ॥ सिक्थसंख्याब्द मानं स वसेच्छिवपुरे मुदा ॥ श्री
फलैः पुरयेल्लिंगं निःस्वो भूत्वा भवस्य तु॥सोपि तत्फलमाप्नोति गतःस्वर्गे नरेश्वर ॥ अक्षया संततिस्तस्य जायते जन्मसप्तकं ॥
स्नपनं देवदेवस्य दध्ना मधुघृतेन वा ॥ पयसा तीर्थतोयेन सितया वा वगुंठनं ॥ यः कारोति विधानेन तस्य पुण्यफलं शृणु ॥
घृतक्षीरवहा नद्योदधिपायसकर्दमाः ॥ शर्करा वालुका यत्र यत्र वृक्षा मधुश्रवाः ॥ तत्र ते मानवा यांति येर्चयंति महेश्वरं ॥ पत्रं
पुष्पं फलं तोयं यस्तु दद्यान्महेश्वरं ॥ स तस्य सप्तजन्मानि फलमक्षयमश्नुते ॥ सर्वेषामेव पात्राणांमहापात्रं महेश्वरः ॥ तस्मा
त्सर्वप्रयत्नेन सदाभ्यर्च्यः सदाशिवः ॥ ब्रह्मचर्यधरो नित्यं यस्तु पूजयते शिवं ॥ इह जन्मन्सदेवःस्यान्मृतो गच्छेदनामयं ॥ शिवे
हि पूजितेपार्थ यत्फलं प्राप्यते बुधै. ॥ योगिनश्चापि तस्यार्धं पूजने लभते फलं ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं ॥
एषां गृहेषु भुंजंति शिवभक्तिपरायणाः ॥ संनिरुद्धेंद्रियग्रामो यत्र यत्र वसेन्मुनिः ॥ तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं गया॥यत्फलं
वेदविद्वद्भिर्भोजितैः शतसंख्यया ॥ भिक्षामात्रप्रदानेन तत्फलं शिवयोगिनां ॥ यत्र भुंजाति भस्मांगी मुर्खो वा पंडितोपि वा ॥
तत्र भुंजाति देवेशः सपत्नीको वृषध्वजः ॥ द्विजानां वेदविदुषां कोटिभोज्येन यत्फलं ॥ तत्फलं जायते पार्थ एकेन शिवयोगिना
॥ संगमेश्वरमासाद्य प्राणत्यागं करोतियः॥ न तस्य पुनरावृत्तिः शिवलोकात्कदाच न ॥ शुक्लपक्षे त्रयोदश्यां फाल्गुने मासि भारत

CC-0. In Public Domain. Digitization by eGangotri

॥ मधुमाधवयोर्वापि स्नात्वा संपूजयन् शिवं ॥ सोपवासः शुभैर्गंधैर्धीनवान्पुत्रवान् भवेत् ॥ सर्वान्कामानवाप्नोति जागरी दीपदो हि यः ॥ इति श्रीनर्मदामाहात्म्ये मधुमतिसंगमे संगमेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततोगच्छेन्महाराज नर्मदेश्वरमुत्तमं ॥ अदूरे संगमेशस्य नर्मदा यत्र शंकरं ॥ स्थापयामास वै हर्षाद्व्यासं साक्षान्महेश्वरं॥ यत्र निंबुवती नाम तथा मधुमती नदी॥रेवाया संगमे पुण्ये तत्र प्राप्तो महेश्वरः ॥ सखा वै किंनरेशस्य स्नेहाद्रष्टुं पुरा किल॥निंबकों नाम यक्षाग्र्यः सहायो धनदस्य तु॥तेनापि निर्झरस्तत्र स्वनाम्ना वै प्रवाहितः ॥ दृष्ट्वा मधुमतीतोयं तथा निंबुकृतं जलं ॥ रेवाया संगतं पार्थ यत्र देवो महेश्वरः ॥ धनिना निंबुना यक्षैर्मणिभद्रादिभिः ॥ स्वगणैर्गिरिजासार्द्धं मुखेन जलखेलनं ॥ नर्मदा तत्र चायाता दृष्ट्वा केलिपरं हरं ॥ प्रणम्य प्रार्थयामास स्थेयमत्र महेश्वर ॥ सदा मयिदयां कृत्वा मन्नाम्ना स्थापितेन ते ॥ तथेत्युक्ता महेशानः कंचित्कालं विहृत्य च ॥ अभिनंद्याथ तां रेवां तत्रैवादर्शनंययौ ॥ नर्मदा स्थापयामास शिवं तत्र स्वसंज्ञया ॥ ततः प्रभृति राजेंद्र विख्यातो नर्मदेश्वरः ॥ निंबकेनात्मनस्तुष्ट्यै निंबभद्रं निषेवितं॥ पुरंपरमयोगींद्र तुष्टिदं तत्प्रसादनः ॥ तत्राप्याहर्निशं भक्त्या ब्रह्मचर्यसमन्वितः ॥ मौनी शिवध्यानपरोभ्यर्चयन्परमेश्वरं ॥ निंबपत्रं मुखे दत्वा बिल्वपत्र मथापि वा ॥ योगिनः पूजयन् भक्त्या गांच दद्यात्सुशोभनां एवकुर्वन्महाराजन्न शोकैः परिभूयते ॥ नरोगदुःखदौर्भाग्यं लभते स्यान्न निर्द्धतः ॥ नर्मदेश्वरमभ्यर्च्य तथा विप्रांश्च भोजयन् ॥ श्राद्धं कृत्वा विधानेन न दैन्यंलभते नरः ॥ दशवर्षसहस्राणि पितृणां तृप्तिरक्षय॥गणमुख्यो भवेत्पाथ नरो देवस्य शूलिनः ॥ नमः शिवाय मंत्रेण सप्ताहं शंकरं यजन् ॥ विल्वमंदारधत्तूरैः कुशकाशपलाशजैः॥पुष्पैरभ्यर्च्यनकृतैः सशोच्यो न भवेदिह ॥ इति श्रीरेवाखंडे नर्मदेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः पुण्यं महाराज तीर्थं ह्यनरकेश्वरं ॥ नर्मदेश्वरतीर्थाद्दै स्थितं क्रोशद्वयांतरे ॥ तत्र तीर्थे नरः स्नात्वा पापकर्मा पि भारत ॥ न पश्यति महाघोरां नरकद्वारसंस्थितिं ॥ य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिष्ठिर उवाच ॥ शुभाशुभैः फलैस्तात भुक्तभोगा नरास्त्विह ॥ ज्ञायंते लक्षणैर्यैस्तु तानि मे वद भार्गव ॥ यथा निर्गच्छते जीव
स्त्यक्त्वा देहं न दृश्यते ॥ तथा गच्छेत्पुनर्देहं पंचभूतात्मकं कृतं ॥ त्वगस्थिमांसमेदोसृक्केशस्नायुशतैः सितो ॥ विण्मुत्ररेतः संघा
तैः का संज्ञा जायते नृणां ॥ कथं तीर्थमिदं जातं नाम्ना चानरकेश्वरं ॥ एतत्सर्वं ममाचक्ष्व कृपया मुनिसत्तम ॥ सूत उवाच ॥
एवमुक्तः स मार्कंडः कथयामास तत्ववित् ॥ ध्यात्वा सनातनं शर्वं देवदेवं महेश्वरं ॥ मार्कंडेय उवाच ॥ शृणु
पार्थ महाप्रश्नं कथयामि यथाश्रुतं ॥ सकाशाद्ब्रह्मणः पुर्वं देवविप्रसमागमें ॥ यमेनेह तपस्तप्तं पुरा वर्षत्रयं महत् ॥
महेशं द्रष्टुकामेननानोपायशतैरपि ॥ स्तुतश्च भगवानीशः सर्वस्यार्तिहरो हरः ॥ यम उवाच ॥ नमो देवाय शर्वाय सर्वाधाराय
शंभवे ॥ वरदाय वरेण्याय सर्गस्थित्यंतहेतवे नमोस्तु भूतनाथायभवभीतिहराय च॥ भवाय भवरूपाय भक्ताभ्युदयकारि
णे ॥ नमो गीर्वाणपतये गिरिजापतये नमः ॥ नमोस्तु पंचवक्राय जगद्धर्त्रेनमोनमः॥यो देवः सर्ववेद्यात्मा पठ्यते वेदवादिभिः ॥
तं नमाम्यखिलाधारं सृष्टिसंहारकारकं ॥ योदेवः सर्वभूतात्मा योगी ध्येयः सनातनः ॥ तं नमाम्यखिलाधारंविश्वरूपं महेश्वरं ॥
यो देवः सर्वविद्यात्मा सर्वज्ञः सर्वदर्शितः ॥ वेदांतवेद्यो वरदस्तंनमामि चराचरं ॥ यो ब्रह्मसंज्ञया देवो सृजत्येतच्चराचरं ॥ रजो
गणमयो भूत्वा तं नमाम्या दिवेधसं ॥ यो विष्णुसंज्ञया विश्वं पाति सतात्मकः शिवः॥ विविधोपद्रवेभ्यश्च विश्वकृत्सेनं नमामि
तं ॥ निःप्रपंचो निरीहश्च प्रपन्नार्तिहरो हरः ॥ यस्मादुत्पद्यते विश्वं प्रपंचस्तं नमाम्यहं ॥ यस्मादिंद्रादयो देवा यस्मात्सूर्या
दयो ग्रहाः॥ यदा निष्प्राप्य मर्यादां पालयंति नमामि तं॥अस्ति नास्तीति सदसत्प्रोच्यते वै महात्मभिः॥यश्चाप्रमूर्तिः सततं नम
स्तस्मै नमोनमः ॥ मार्कंडेय उवाच ॥ एवं तु स्तुवतस्तस्य तेजोमयवपुर्द्धरः ॥ प्रत्यक्षः प्राह भगवान् यमंलोकपतिं मुदा ॥ ईश्व
रवाच॥ प्रसन्नोस्मि महाभाग ब्रूहि यत्ते भिवांछितं ॥ स्तोत्रेणानेन तुष्टोहं दास्ये ते वरमुत्तमं ॥यमउवाच ॥ यदि तुष्टोसि मे देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि दास्यासि मे वरं ॥ खिन्नोस्मि सततं देव कृत्वा वै प्राणियातना: ॥ बीभत्सं कर्म मे तादृक् नारकं नैवरोचते ॥ अन्येशां लोकपालानां व्यावृतिर्वै पृथग्विधा ॥ रौद्रबिभत्सकरुणा भयरुपा हि मे स्थितिः ॥ व्यापारेणालमेतेन तस्मान्मां पाहि पार्श्वगं ॥ ईश्वरउवाच ॥ नैवं वाच्यं त्वया भद्र व्यापारास्थितिरीदशी ॥ यथातथं कर्म कुर्वन् नरो दोषैर्न लिप्यते ॥ तवैव विहितं धर्मकर्म चेदं सुरेष्वपि ॥ न शक्तोन्यो मतो मह्यं प्राणिनां कर्मसाधने ॥ शुभाशुभानि कर्माणि विविधानि बहूनि च ॥ कृत्वा त्वादृशमा यांति प्राणिनस्त्विति निश्चयः ॥ तस्मा त्वया विषादोत्र न कर्तव्यः कदा च न ॥ यच्छत्तया चेष्टितोनूनं करोषि न यदृच्छया ॥ न ते दोषोणुमात्रोपि चरतो वै यथातथं ॥ प्रार्थयस्व यथाकामं तुष्टोस्मि तव सुव्रत ॥ धर्मउवाच॥ एवं भवतु देवेश प्रमाणं वचनं तव॥ तदत्र तीर्थे नियतं त्वया स्थेयं सदैव हि ॥ दयां कृत्वा मयि परां नरकांतकसंज्ञया ॥अत्र तीर्थेऽद्य दिवसे मासि वाश्वयुजे विभो ॥ कृष्णपक्षे चतुर्दश्यां इह प्रत्यक्षगो भगवान् ॥ अत्र तीर्थे तथा स्नात्वा यस्त्वां पश्येच्च पूजयेत् ॥ नरकं स न पश्येदै तथा त्वं देहि मे वरं ॥ मां च संतर्पयेद्भक्त्या रेवाजलतिलैस्तु य: ॥ सत्यं तस्याक्षया लोका: सुखप्रायास्त्वनारका: ॥ स्तोत्रेणानेन च नरो यस्त्वां स्तौति महेश्वर ॥ स प्राप्नोतु महाभोगान् सौभाग्यं संततिं सुख ॥ मार्कंडेय उवाच ॥ तेनैवमुक्तो देवेशस्तथेत्युक्त्वा सनातनः ॥ सर्वं भ विष्यतीत्युक्त्वा तत्रैवांतरधयित ॥ यमोपितत्रसंस्थाप्यदेवंत्वनरकेश्वरं ॥ स्नात्वासंपूज्यविधिवज्जगामाशुपुरंस्वकं॥ततः प्रभृति विख्यातं तीर्थं त्वनरकेश्वरं ॥ सर्वपापक्षकरं दु:खदुर्गतिनाशनं ॥ अतः परं महाराज कर्मचिन्हानि मे शृणु ॥ जायंते लक्षणैर्यैस्तु लक्षिताः सर्वयोनिषु ॥ गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनां ॥ इह प्रछन्नपापानां अनेका जीवसंततिः ॥ गत्वा मानुषभावेषु पापचिन्हा भवंति ते ॥ तान्यहं संप्रवक्ष्यामि शृणुष्वेकमना नृप ॥ वैवस्वतक्षयं प्राप्य स हित्वा सर्वेयातना: ॥ निस्तीर्य तास्ततस्ते तु लोकमायांति चिन्हिता: ॥ गद्गदोनृतवादी स्यान्मूकश्चैव गवानृते ॥ ब्रह्महा जायते कुष्ठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यावदंतश्च मद्यपः ॥ कुनखी स्वर्णहरणात् दुश्चर्मा गुरुतल्पगः ॥ संयोगी हीनयोनिः स्याद्दरिद्रोऽदत्तदानतः ॥ ग्रामशूकरतां याति
अनज्ययाजको द्विजः ॥ खरो वै बहुयाचित्वात्काको निर्मंत्रभोजनात् ॥ अपरीक्षितभोजीस्याद्वानरो विजने वने ॥ बहुतर्जको
मार्जारः खद्योतः कक्षदाहकः ॥ आवेद्यां यः प्रयच्छेत बलिवर्दो भवेतु सः ॥ अन्नं पर्युषितं विप्रे प्रददन् कुब्जतां व्रजेत् ॥ मात्स
र्यादति रात्र्यंधो जन्मांधः पुस्तकं हरन् ॥ फलान्याहरतोपत्यं न जीवेन्नात्र संशयः ॥ मृतो वानरतां याति तन्मुक्तो गलगंडवान् ॥
अदत्वा भक्षमश्नाति सोनपत्यो भवेन्नरः॥हरद्वस्त्रं भवद्गोधा गरदः पवनाशनः॥प्रव्रज्यागमनाद्राजन् भवेन्नरुपिशाचकः॥घातको जल
हर्ता स्याद्धान्यहर्ता च मूखकः॥अप्राप्तायौवनां सेवन् भवेत्सर्प इति श्रुतिः॥गुरुदाराभिगामी च कृकलासो भवेद्ध्रुवं॥जलप्रश्रवणं यस्तु
भिद्यान्मत्स्यो भवेन्नरः ॥ अविक्रेयान्विक्रयान्वै त्रिकटक्षो भवेन्नरः ॥ अयोनिगो वृको हिंस्यादुलूक. क्रयवंचनात् ॥ मृतस्यैकादशा
हे तु भुंजानः श्वाभिजायते ॥ प्रतिश्रुत्य द्विजेभ्यार्थ मदमन् जंबुको भवेत् ॥ राज्ञीगामी भवेदुष्ट्रस्तस्करो विड्वराहकः ॥ परिवादा
द्वाजातीनां लभते काच्छपीं तनुं लभेदेवलको राजन् योनिं चांडालसंज्ञितां ॥ दुर्भगः फलविक्रेता वृकः श्वावृषलीपतिः ॥ मार्जारो
ग्निं पदा स्पृष्ट्वा रोग वान् परमांसभुक् ॥ सोदर्या गमनात् षंढो दुर्गंधश्च सुगंधरुत् ॥ यद्वा तद्वा पिपारक्यं स्वल्पं वा यदिवा बहु ॥
हृत्वा वै योनिमाप्नोति तैर्यवीं नात्र संशयः ॥ एवमादीनि चिन्हानि तथान्यानि नृपोत्तम ॥ स्वकर्मविहितान्येव दृश्यंते यैस्तु मा
नवाः ॥ ततो जन्मशतं मर्त्यः सर्वजंतुषु भारत ॥ जायतेनात्र संदेहः समीभूते शुभाशुभे ॥ तत्र गर्भस्थितिं राजन् शृणुष्व वि
धिनिर्मितां ॥ स्त्रीपुं सोत्रप्रसंगेन निरुद्धे शुक्रशोणिते ॥ पंचभूतसमायुक्तः स षष्ठः परमेश्वरः ॥ इंद्रियाणि मनः प्राणज्ञानमायुः सु
खं धृतिः ॥ धारणाप्रेरणं दुःखमिच्छाहंकार एव च ॥ प्रपन्नाकृतिवर्णं च सविद्वेषो भवाभवौ ॥ तस्येदमात्मना: सर्व मनदेरादि

१(विषयी) २(सर्पः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिच्छतः ॥ संपद्यते महाराज कृतकर्मानुसारतः ॥ प्रथमे मासि संक्के दोरेतोधातुविमुर्छिनः ॥ घनं मासि द्वितीये तु तृतीये चेंद्रियै
र्युतः ॥ आकाशाल्लाघवं सूक्ष्मं शब्दश्रोत्रज्ञता तथा ॥ वायोस्तु स्पर्शनं चेष्टा गूहनं रूक्षमेव च ॥ पित्ता तु दर्शनं ठ्यक्ति रोमरूप
प्रकाशनं ॥ रसेभ्यो रसनं शैत्यं स्नेहः क्लेदः समार्दवः ॥ भूमेर्गंधस्तथा घ्राणं गौरवं मूर्तिरेवच॥ आत्मागृण्हात्यजः सर्वं तृतीये स्पंद
ते चसः ॥ दौर्हृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् ॥ वैरूप्यं मरणं वापि तस्मा त्कार्यं प्रियं स्त्रियः ॥ स्थैर्यं चतुर्थे प्यंगानां पंचमे
शोणितोद्भवः ॥ षष्ठे बलस्य वर्णस्य नखलोम्नां च संभवः ॥ मनसा चेतनायुक्तो नरस्नायुशिरायुतः ॥ सप्तमे चाष्टमे चैव त्वग्वां श्च
स्मृतिमानपि ॥ पुनर्गर्भे पुनर्द्धात्रीमोजस्तस्य प्रधावति ॥ अष्टमे मास्यतो गर्भो जातः प्राणैर्वियुज्यते ॥ नवमे
दशमे वापि प्रबलैः सूतिमारुतैः ॥ निःसार्यते बाण इव यंत्राच्छिद्रेण सत्वरः ॥ शरीरावयवैर्युक्तो ह्यंगप्रत्यं गसंयुत
॥ अष्टोत्तरं मर्मशतं तत्रास्थनां तु शतत्रयं ॥ सप्तशिरःकपालानि विहितानि स्वयंभुवा ॥ तिस्रः कोव्योर्द्धकोटी च
रोम्णामंगेषु भारत ॥ द्वासप्ततिसहस्राणि हृदयादभिनिसृताः ॥ हितानामहिता नाड्यस्तासां मध्ये शशिप्रभं ॥ मंडलं तस्य मध्य
स्थ आत्मा दीप इवाचलः ॥ मध्ये यस्तं विदित्वेह पुनराजायते न तु ॥ एवं प्रवर्त्तीतचक्रं भूतग्रामे चतुर्विधे ॥ समुत्पत्तिविनाश
श्च जायते पार्थ देहिनां॥ऊर्ध्वा गतिर्हि धर्मेणाप्य धर्मेण ह्यधो गतिः॥जायते सर्ववर्णानां स्वस्वधर्मबलान्नृप॥देवत्वे मानुषत्वे च दा
नभोगादिका क्रियाः ॥ यादृश्यते महाराज तत्सर्वं कर्मजं फलं ॥ कुकर्मविहिते घोरे कामक्रोधार्जिते शुभे ॥ नरके पतते भुयो य
स्योतारो न विद्यते ॥ उत्तारणाय जंतूनां नर्मदातटमास्थितं ॥ श्रेष्ठं त्वनरकं तीर्थं तदेनन्नृपसत्तम ॥ नरकापहं महापुण्यं सर्वपा
पप्रणाशनं ॥ तत्तीर्थं सर्वतीर्थानां श्रेष्ठं भुवि सुदुर्लभं ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ तस्याशु नरकात् घोरान्मुच्य
ते पितरो नृप ॥ तीर्थे ह्यनरके स्नात्वा संपूज्यानरकेश्वरं ॥ महापातकयुक्तोपि नरकं नैव पश्यति ॥ तस्मिन्तीर्थे च यो राजन् द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं.
१८४ देद्वैतरणीं शुभां ॥ स तरेद्वै सुखेनैत नदीं वैतरणीं नरः ॥ युधिष्ठिर उवाच ॥ यमद्वारे महाघोरे या सा वैतरणी नदी ॥ किं अध्या.
रूपा किंप्रमाणा सा कथं सा वहति द्विज ॥ कथं तस्याः प्रमुच्यंते केषां वासस्तु संततं ॥ केषां च सानुकूला सा वद विस्तरतोऽ १४४
खिलं ॥ मार्कंडेय उवाच ॥ धर्मपुत्र महाबाहो शृणु सर्वं मयोदितं ॥ या सा वैतरणी नाम यमद्वारे महासरित् ॥ यत्प्रमाणा
च सा देवी शृण्वतां वै भयावहा ॥ शतयोजनविस्तीर्णा पृथुत्वेसा महासरित् ॥ अगाधा दुस्तरा पापैर्दृष्टमात्रा भयावहा ॥ पूय
शोणिततोया सा मांसदुष्कर्दमान्विता॥ तत्तोयं कथ्यते तूर्णं तापीमध्ये धृतं यथा ॥ कृमिभिः संकुलं यूयं वज्रकुंडे समंततः ॥ शि
शुमारैश्च मकरैर्वज्रकर्तरिसंयुतैः ॥ अन्यैश्च जलजीवैश्च हिंसकैर्मांसभेदिभिः ॥ तपंते द्वादशादित्याः प्रलयांते यथा हि तें ॥ पतंति
तत्र जीवौघाः क्रंदमानाः सुदारुणं ॥ हा भ्रातः पुत्र हामातरीति क्रंदंति वै पृथक् ॥ वितरंति निमज्जंति ग्लानिं गच्छंति वा सकृ
त् ॥ चतुर्विधैः प्राणिगणैर्द्रष्ठव्या सा महानदी ॥ तरंति तस्या दानेन अन्यथा तुपतंति वै ॥ मातरं ये न मन्यंते ह्याचार्यं गुरुमे
व च ॥ अवमन्यंते ये मूढास्तेषां वासस्तु संततं ॥ पतिव्रतां साधुशीलां मूढधर्मेषु निश्चितां ॥ परित्यज्यंति ये मूढास्तेषां वासस्तु
संततं ॥ बिश्वासप्रतिपन्नानां स्वामिमित्रतपस्विनां ॥ स्त्रीबालविकलादीनां छिद्रमन्वेषयंतिये ॥ पच्यंते ते तत्र मध्ये क्रंदमानाः
सुपापिनः ॥ श्रांतं बुभुक्षितं विप्रं यो विघ्नायोपसर्पति ॥ कृमिभिर्भक्ष्यते तत्र यावत्कल्पशतत्रयं ॥ ब्राह्मणाय प्रतिश्रुत्य यथार्थं न
ददाति तत् ॥ आहूय नास्ति यो ब्रुयात् तस्य वासस्तु संततं ॥ अग्निदो गरदश्चैव कूटसाक्षी च मद्यपः ॥ यज्ञविध्वंसकश्चैव रा
ज्ञगामी च पैशुनी ॥ कथाभंगकरश्चैच स्वयंदत्तापहारकः ॥ क्षेत्रे सेतुविभेदी च परदारप्रधर्षकः ॥ ब्राह्मणो रसविक्रेता वृषलीप
तिरेव च ॥ गोकुलस्य तृषार्तस्य पालीभेदं करोति यः ॥ कन्याभिदूषकश्चैव दानं दत्वा नुपातकः ॥ शूद्रश्च कपिलापानी ब्राह्मणो
मांसभुक् वृथा ॥ एते वसंति सततं मा विचारं तथा नृप ॥ सदामर्षी सदा क्रोधी निजवाक्यप्रमाणकृत् ॥ परोक्त्युच्छेदको नित्यं २५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैतरिण्यां वसेच्चिरं ॥ सानुकूल्या भवेद्येन तच्छृणुष्व नराधिप ॥ अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ॥ अन्येषु पुण्यकालेषु दीयते दानमुत्तमं ॥ कृष्णां वा पाटलां वापि कुर्याद्वैतरणीं शुभां॥स्वर्णशृंगीं रूप्यखुरां कांस्यपात्रसुदोहनां॥कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसमन्वितां ॥ इक्षुप्लवो परिस्थांच धंटातिलकभूषितां ॥ कर्पासद्रोणशिखरे आसीनं ताम्रभाजने ॥ यमं हैमं प्रकुर्वीत लोहदंडसमन्वितं ॥ उडपोपरितां धेनुं सूर्यदेहसमुद्भवां ॥ कृत्वा प्रकल्पयेद्दिवांच्छत्रोपानहसंयुतां॥अंगुलीयकवासांसि ब्रह्मणाय निवेदयेत् ॥ इममुच्चारयेन्मंत्रं संगृह्य मधुभिक्षयं ॥ यमद्वारे महाघोरे दृष्ट्वा वैतरणीं नदीं ॥ तर्तुकामो ददाम्येनां तुभ्यं वैतरणीमिमां ॥ मंत्रः ॥ गावो ममाग्रतः संतु गावोमे संतु पृष्ठतः ॥ गावो मे हृदये संतु गवां मध्ये वसाम्यहं ॥ विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन ॥ सदाक्षिणा मया तुभ्यं दत्ता वैतरणी नमः ॥ धर्मराजं च सर्वेशं वैतरण्याख्यधेनुकां ॥ सर्वं प्रदक्षिणी कृत्य ब्राह्मणाय निवेदयेत्॥ पुच्छं संगृह्य धेन्वाश्च कृत्वाग्रेतं द्विजोत्तमं ॥ समुच्चरेदिदं वाक्यं मरुगच्छन् पदाष्टकं ॥ धेनुकेत्वं प्रतीक्षस्व यमद्वारे महाभये ॥ उत्तारणार्थं मे देवि वैतरिण्यै नमोनमः ॥ अनुव्रजेत गच्छंतं सर्वं तस्य गृहं नयेत् ॥एवं कृते महीपाल सा सरित्सुखगा भवेत् ॥ सर्वान्कामानवाप्नोति ये दिव्या ये च मानुषाः ॥ स्वस्थे सहस्त्रगुणितं आतुरे शतसंमितं ॥ मृतस्येव तु यद्दानं परोक्षे तत्समं स्मृतं ॥ स्वहस्तेन ततो देयं मृतेकः कस्य दास्यति ॥ इतीदमुक्तं तव धर्मसूनो दानं मया वैतरणी समुत्थं ॥ शृणोति भक्त्या पठतीह सम्यक् स याति विष्णोः पदमप्रमेयं ॥ मार्कंडेय उवाच ॥ प्राप्तं चाश्वयुजं दृष्ट्वा तास्मिन् कृष्णा चतुर्दशी ॥ तस्यां स्नातः कृतश्राद्धः संपूज्य परमेश्वरं ॥ पितृभ्यो दीपदानं च दद्याद्भक्त्या वृतेन तु ॥ पश्चाज्जागरणं कुर्याद्गीतनृत्यकथानकैः ॥ ततः प्रभातसमये स्नात्वा वै नर्मदाजले ॥ तर्पणं विधिवत्कुर्यात्पितॄणां देवपूर्वकं ॥ सौवर्णं घृतसंयुक्तं दीपं दत्वा द्विजातये ॥ पश्चाच्च भोजयेद्विप्रान् स्वयं चैव विमत्सरः ॥ एवं कृते नरश्रेष्ठ न जंतुर्नरकं व्रजेत् ॥ अवश्यमेव जीवोच्चैर्द्रष्टव्या नरकस्थितिः ॥ अनेन विधिना कृत्वा न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्येन्नरकान्नरः ॥ तत्र तीर्थे मृतानां तुं नराणां विधिनां नृप ॥ मन्वंतरं शिवे लोके वासो भवति दुर्लभे ॥ विमानेनार्कवर्णेन किं
किणीजालशोभिना ॥ स गच्छति मांहाभाग सेव्यमानोप्सरोगणैः ॥ भुनक्ति विविधान् भोगाम् उक्तकालं महातपाः ॥ पूर्णे चैव
ततः काले पुनर्मानुष्यतां गतः ॥ सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदःशतं॥अतश्चाश्वयुजे मासि कृष्णपक्षे शिवादनि॥ अहोरात्रोषित
स्नात्वा अर्चयित्वा महेश्वरं ॥ महापातकयुक्तोपि मुच्यते नात्र संशयः ॥ अष्टाविंशतिकोट्यों वै, नरकाणां नरेश्वर ॥ विमुक्ता
नारकैर्दुःखै शिवलोकंव्रजंति ते ॥ तत्र भुक्त्वा महाभोगान् दिव्यैश्वर्यसमन्विताः ॥ लभंते मानुषं जन्म सर्वोत्तमगुणान्विनाः ॥
इति श्रीवायूक्तशिव०श्रीनर्मदामाहात्म्ये अनरकेश्वरतीर्थनामचतुश्चत्वारिंशदधिकशत्तमोऽध्यायः ॥ १४४ ॥ श्रीमार्कंडेय उवाच
॥ ततो यायान्नृपश्रेष्ट सर्पतीर्थमनुत्तम ॥ अदूरे तत्स्थितं तीर्थं तीर्थादनरकेश्वरात् ॥ यत्र सिद्धो महासर्पस्तपः कृत्वा युधिष्ठिर
॥ धनंजयेनाम पुरा दष्ट्वा कुलमुपद्रुतं ॥ तार्क्ष्येण त्रिजगन्मध्ये चारिणा विष्णुधारिणा ॥ अत्र तीर्थे तपः कृत्वा तोषयित्वा महे
श्वरं ॥ प्रसादात्तस्य देवस्य त्रातिस्म स्वकुलं ततः ॥ तथान्ये पि च ये सर्पाः स्वकुलं पातुमिच्छवः ॥ तत्र तीर्थे महापुण्ये तपः
कृत्वा सुदुष्करं ॥ सपुत्रपौत्राः क्रीडंते त्रैलोक्ये पि यथासुखं ॥ तत्र तीर्थे तु यः स्नत्वा तर्पयेत्पितृदेवताः ॥ वाजियज्ञफलं सम्यक्
स प्रप्नोति न संशयः ॥ सर्पतीर्थे मनुष्याणां स्नातानां भुवि भारत ॥ सर्पवृश्चिकजातिभ्यो न भयं विद्यते क्वचित् ॥ मृतो भोगव
तीं प्राप्य पूज्यते सिद्धपन्नगैः ॥ नागकन्यापरिवृतो महाभोगपतिर्भवेत् ॥ मार्गशीर्षस्य मासस्य कृष्णपक्षे तु याष्ठमी ॥ सोपवासः
शुचिस्तस्य स्नात्वा संस्नापयेच्छिवं ॥ दधिदुग्धमधुप्रायो घृतैस्तीर्थांबुना सह ॥ ततः शुद्धतिलैः शुभ्रैः शिवलिंगं प्रपूरयेत् ॥ तथा
विभवसारेण गंधपुष्पैः समर्चयेत् ॥ रात्रौ महोत्सवं कृत्वा प्रणिपत्य क्षमापयेत् ॥तस्ययत्फलमुद्दिष्टं तच्छृणुष्व नृपोत्तम ॥ यावंतः
पार्थसंख्यतास्तिलाः पुष्पफलैः सह ॥ तावद्वर्षाणि राजेंद्र शिवस्य पुरतो वसेत् ॥ ततः स्वर्गात्परिभ्रष्टो जायते विपुलेकुले ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरूपः सुभगश्चैव धनी दाता सुधीरधीः ॥ पुत्री पौत्री च दीर्घायुरारोग्यं च तथा लभेत् ॥ इति श्रीरेवा० सर्पेश्वरतीर्थं ॥ मार्कंडे
य उवाच ॥ ततो गच्छेत राजेंद्र मोक्षतीर्थमनुत्तमं ॥ सेवितं देवगंधर्वैर्ऋषिभिश्च तपोधनैः ॥ बहवस्तं न जानंति विष्णुमायाविमो
हिताः ॥ यत्र सिद्धिमनुप्राप्ताः पुरा ऋषिगणा नृप ॥ पुलस्त्यः पुलहश्चैव क्रतुरांगिरस एव च ॥ प्राचेतसो वसिष्ठश्च दक्षो नारद प
र्वती ॥ एते चान्ये महाभागाः शतसाहस्रसंमिताः ॥ तीर्थं संस्थापयामासुर्मोक्षदं देहिनामिह ॥ संगता यत्र कावेरी नदी श्रेष्ठा तु
रेवया ॥ प्रवाहमध्यमापन्ना संगमस्तत्र मोक्षदः ॥ कावेरीसंगमं तीर्थं सर्वपापविमोक्षदं ॥ तिलपिंडेन चैकेन मुच्यंते प्रेततां गताः
॥ऋग्यजुःसामसंज्ञानामभ्यस्तानां हि यत्फलं॥सम्यक् जप्त्वा चविधिनागायत्रीं तत्र तल्लभेत्॥तत्र दत्तं हुतं जप्तं स्नातं तप्तं तथार्चि
तं॥सर्वमक्षयतं याति नात्र कार्या विचारणा ॥ तत्रान्यतो वाराद्र विशेषः परमोमतः ॥तत्र तीर्थे मृतानां तु सन्यासेन द्विजन्मनां
॥ अनिवर्ता गति स्तेषां मोक्षतीर्थप्रभावतः ॥ प्रेतत्वा न्मुच्यते प्रेतस्त्वन्यो वै जन्मबंधनात् ॥सदा पर्वसु तत्रैव स्नात्वा सर्वं सम
र्चयेत् ॥ जपहोमार्चनै र्ध्यानैर्दानैश्च द्विजभोजनैः ॥ मुच्यते सर्व पापेभ्यः स्व पितॄंश्च समुद्धरेत् ॥ एष ते विधिरुद्दिष्टः संक्षेपे
ण मयानघ ॥ मोक्षतीर्थस्य तु महान् पुराणे यो भिधीयते ॥ ऋषितीर्थं परं पुण्यं मोक्षाख्यं पुण्यसाधनं ॥ इतिश्रीरेवामाहात्म्ये
मोक्षतीर्थकावेरी संगमतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ तीर्थं गोपेश्वरं व्रजेत् ॥ विख्यातं सर्वलोकेषु शिवक्षेत्रम
नुत्तमं ॥ पुरा कृतयुगे पार्थ पुंडरीकाह्वयो भवत् ॥ गोपः सहस्रलक्षाणां गवां पालनकात्किल ॥ धार्मिकः सत्यवादी च गवां शुश्रूषणे
रतः ॥ तस्य भावं परिज्ञातुं संगतः किल धूर्जटिः ॥ वृषरूपेण राजेंद्र तत्र कामदुघा सह ॥ नपारं लब्धवान् तस्य गोपचित्तस्य
वै क्वचित् ॥आदिमध्यावसाने तं रुत्यव्रतपरं दृढं दउवाच॥मत्वा कामदुघायुक्तः प्रसन्नो भवदीश्वरः ॥ कृत्वा कर्मक्षयं तस्य ददौनि

१ (गुआलि)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपदं विभुः ॥ तेनापि प्रार्थितः शर्वस्तीर्थसंस्थापनाय च ॥ गोप उवाच ॥ यत्र त्वं मे प्रसन्नोसि रेवातीरे सुरेश्वरे ॥ कृपया परं
या ह्यत्र तीर्थे त्वां स्थापयाम्यहं॥अत्र तिष्ठ महादेव लोकानां हितकाम्यया॥ गोपस्य चेत्प्रसन्नोसि मम त्वं त्रिपुरांतक ॥एवमस्त्वि
ति वोक्त्वेशस्तत्रैवां वरधयित ॥ स च गोपः शिवंदेवमुमयासह भारत ॥ स्थापयित्वाथ कालेन मुच्यते पातकै र्नरः ॥ तत्र ती
र्थे तु यः स्नात्वा श्राद्धे संतर्पयेत्पितॄन् ॥ भोजयित्वा द्विजान् शक्त्या सर्ववांछित भाग्भवेत् ॥ शिवमभ्यर्च्य यो राजन् कुरुते प्रा
णसंक्षयं॥स गच्छे द्धर्षियुक्तेन विमानेन शिवालयं ॥ क्रीडित्वा सुचिरं कालं शिवलोके महामनाः ॥ इह मानुष्यतां प्राप्य राजा
भवति वीर्यवान् ॥ हस्त्यश्वरथसंयुक्तो दासीदाससमन्वितः ॥ पूज्यमानो नरेंद्रैश्च जीवेद्वर्षशतं सुखी ॥ इतिश्रीरेवामाहात्म्ये
गोपेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे गच्छे न्मार्कंडेश्वरमुत्तमं॥मया संस्थापितं तीर्थं स्वर्गमोक्षफलप्रदं ॥अहं च न
र्मदा चैव सततं सह चारिणौ ॥ न तीर्थं नर्मदातुल्यं मया दृष्टं युधिष्ठिर ॥ कल्पानुकल्पं भ्रमता नदीतीर्थवनालयान् ॥ एको दे
वो महारुद्रो नद्येका तत्तनूद्भवा ॥ धर्मो माहेश्वरो धन्यो भक्ति र्माहेश्वरी मता ॥ परितुष्टेय या शर्वे गोपः शिवपुरं ययौ ॥ चित्रं
चरित्रं गोपस्य पवित्रं नर्मदातटे ॥ श्रुतं तीर्थकरं पार्थ कर्णकार्णिकया मया ॥ ततो विनोदादगमं तीर्थयात्राप्रसंगतः ॥ भक्त्या सं
तोषितो देवः किं नद्यान्महेश्वरः ॥ विशेषान्नर्मदातीरे यथा गोपस्य तस्य वै ॥ तत्रापश्यं महातीर्थं गोपेन स्थापितं नृप ॥ जाने
साक्षाच्छिवस्तत्र स्थितो गौर्या गणान्वितः ॥ स्नातोहं तत्र कृतवान्महेशमहनं शुभं ॥ अर्कमंदारधतूराबिल्वपत्रकुशांबुभिः ॥ ब्रह्मयज्ञं
जपयज्ञं तत्र कृत्वा मया नृप ॥ गत्वा च दूरतः प्रत्यक् तीर्थं चापि मया कृतं ॥ स्नात्वा भक्त्या महेशानं स्थापयित्वा प्रपूज्यचा ॥
मम नाम्ना महीपाल लोकानां हितकाम्यया ॥ त्रिरात्रमुषितस्तत्र ततः स्वाश्रममागतः ॥ तत्र तीर्थे नरस्नात्वा मार्कंडेश्वरपूजनात्

१ (मांडवा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिवर्षजनितं पापं तत्क्षणादेव नाशयेत्॥ध्यानाच्च मानसं पापंस्वल्पायाचाकृतं व्रजेत्॥पूजनात्कर्मजं स्येनितं पापं नश्येद्युधिष्ठिर॥श्राद्ध पिंडप्रदानेन पितृतृप्तिस्त्रिहायिनी ॥ विप्रभोजनदानेन शिवलोकमवाप्नुयात् ॥ इतिश्रीरेवामहात्म्ये मार्कंडेश्वर तीर्थे ॥ मार्कंडेय उवाच ॥ ततो यायान्नृपश्रेष्ठ नागतीर्थमनुत्तमं ॥ क्रोशांतरे महापुण्यं काम्यं कलिमलापहं ॥ विंध्यपादाद्विनिः सृत्य नागेनौदुंबरेण तु ॥ व्याधिवंध्यत्व नाशाय शिवस्याराधनाय च ॥ पुरासरिद्वरातरिमाभिसृत्य स्वभक्तितः ॥ निराहारेण वर्षाणि द्वादशाराध्य शंकरं ॥ कृत्वा प्रसन्नं पुत्रार्थं व्याधिनाशार्थमादरात् ॥ प्रत्यक्षे प्रार्थयित्वा च प्राप्य नीरोगतां तथा ॥ वरदानान्महेशस्य स्वनाम्ना स्थाप्य शंकरं॥ उदुंबरेश्वरं नाम विशेषाद्वांछितप्रदं॥ तीर्थसंस्थापितं पुण्यं नदी तन्मार्गासंभवा ॥उदुंबरी सुविख्याता संगमस्तस्यशोभनः ॥ तत्र तीर्थे महाराज स्नात्वा भक्त्या विधानतः ॥ आश्विनस्य सिते पक्षे पंचम्यं नियतः शुचिः ॥ आदित्यदिवसे वापि स्नापये॥च्छर्वमव्ययं ॥ मध्वाज्यदधिदुग्धैस्तु विधिना भक्तितत्परः॥ संतानशुभमाप्नोति रोगनाशं च भारत॥ यो यमिच्छति तं कामंप्राप्नोत्यभ्यर्च्चयन् शिवं ॥ संपूज्यविविधैः पुष्पैरुपहारैरनुत्तमैः॥ रात्रौ जागरणं कृत्वा गंधधूपनिवेदनैः॥ प्रभाते विमले स्नात्वा श्राद्धं कृत्वा यथाविधि ॥ शक्त्या च भोजयेद्विप्रान् मिष्टान्नैर्मधुपायसैः ॥ मुच्यते तत्र पापेभ्यो नात्रकार्या विचारणा ॥ नागलोके चिरं स्थित्वा शिवलोके चिरं वसेत् ॥ स्नापितौ संगमे पार्थ दंपतीपुत्रवांछया ॥ वंध्यत्वस्य विनाशः स्यात्प्राप्नुतः पुत्रमुत्तमं ॥ तिलपिंडेन वै केन प्रेतयोनिपरांगति ॥ इतिश्रीरेवामाहात्म्ये उदुंबरीसंगमे नागतीर्थं नाम पंचचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ सौरतीर्थमनुत्तमं सांबादित्यमितिख्यातं नर्मदादक्षिणेतटे॥ यत्र संनिहितो भानुः पूज्यते वै सुरासुरैः ॥ युधिष्ठिर उवाच ॥ सांबादित्यमितिख्यातं कथं वै मुनिसत्तम ॥ कः सांबः केन तत्तीर्थं कृतंकस्माद्वदस्वमे ॥ मार्कंडेय उवाच ॥ श्रीकृष्णो यादवाधीशःशंखचक्रगदाधरः ॥ साक्षाद्विष्णुरितिख्यातो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूभारहरणाय यः ॥ महीरुहलतावल्लीर्गिरीशोमर्त्यनिम्नगाः ॥ येनावतीर्य चरता नीताः सार्थकतां पदै. ॥
यस्तेबंधुः सखा शौरिर्यत्प्राणोसि युधिष्ठिर ॥ यद्बाद्धिश्वासियंनेत्रस्तं वरिंविद्धि पार्थिव ॥ तस्य सांबइतिख्यातः सुतः सगुणिनां
वरः ॥ सुरूपः स्वाकृतिः श्रिमान्सर्वस्त्रीषु मनोहरः कामी॥कामगुणै र्युक्तः कामकेलिविशारदः ॥ एकदा कृष्णदेवस्य पत्नींत्वपरमा
तरं॥ निजांनिरीक्ष्य सहसा दैवात्कामोपरुद्धधी:॥रंतुं वाचिंतयत्पार्थ पतित: स्मरणादपि॥क्षणात्कुष्टार्दिततनुः वर्णेनौदुंबरं यथा॥ त
तः साचिंतयामास मया पापं तु चिंतितं ॥ मात्रा मदनकेलिर्हि साकं मूढेन चिंतिता ॥ तत्पापफलमेतन्मे यज्जातं विकलं वपुः॥
ततो लज्जान्वित: सांबः शीघ्रं संप्राप्यनर्मदां ॥ भास्कराराधनं चक्रे सुचिरं संजितेंद्रियः ॥ कृछ्रातिकृछ्रपाराकचांद्रायणविधानत:॥
स्नात्वा संपूजयन् देवं सर्वरोगार्तिनाशनं ॥ ततश्चसप्तमे मासि प्रसन्नस्तस्य भानुमान् ॥ पुरः प्रत्यक्षमात्मानं चक्रे क्रांतजगत्रयः ॥
तेजःपुंजमयः सूर्यस्तन्मध्ये पुरुषाकृतिः ॥ पद्मासनः पद्महस्तः किरीटीद्विभुजो नृप ॥ तं दृष्ट्वा सहसा सांबउथाय प्रणिपत्य च
॥ स्तुतिं चक्रे ग्रहेशस्यबध्वाशिरसि चांजलिं ॥ सांब उवाच ॥ ॐनमो निखिलेशाय नीरजाक्षाय ते नमः॥नमो नीरजहस्तायनीर
जासनधारिणे ॥ नमस्तेनीरचोराय नीरवावालिकारिणे ॥ नमो नीरजवर्णाय नीरदाय किरीटिने ॥ नमः शांताय सौम्याय स्वर्ग
द्वाराय ते नमः ॥ निर्गुणाय निरीहाय मोक्षद्वाराय ते नमः ॥ प्रकाशकाय पुण्याय धर्मकर्मस्रृजे नमः ॥ नमोनंताय कालय काल
कर्त्रे नमो नमः॥नमो विश्वस्य बीजाय विश्वभर्त्रे नमोनमः ॥नमस्तेनंतमहसे तमोहर्त्रे नमोनमः॥येन विश्वमिदं व्याप्तं जीवभूतेन
भास्वता ॥ तं सर्वदेहगंध्येयं जीवादित्यं नमाम्यहं ॥ अविर्भवतिरोभावौजगद्येनावगाह्यते ॥ प्रत्यहं परमं धाम तमादित्यं नमाम्य
हं॥कर्मकांडमिदं येन शश्वदस्तमयोदये॥वेदात्मना विभाव्येत वेदादित्यं नमामितं॥नानाकर्माणि लोकानां विहिताविहितानि यः॥अ
धिष्ठाय स्वयं पश्येत्कर्मादित्यं नमामितं॥यस्मिन्नभ्युदिते धर्मो गाहते जगदंजसा॥शक:पृथग्विध: प्रीत्या धर्मादित्यं नमामितं॥यत्करे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेधितं सोम मुपजीवंति देवताः॥मुहुर्मुहुः सुधारूपं सोमादित्यं नमामितं॥परं ब्रह्म परं धाम निर्गुणं निरवग्रहं ॥ योगिहृत्स्थगमानदं योगादित्यं नमामि तं ॥ नित्यं ब्रह्माणमाश्रित्य सर्गकर्मकरः प्रगे॥प्रवर्तनविधानस्थं धर्मादित्यं नमामि तं॥शश्वद्विष्णुर्यमाश्रित्य परिपात्यंजसा जगत् ॥ श्रुतिसन्मार्गशक्तिस्थं विष्णवादित्यं नमामि तं ॥ रुद्रोपि संहरेद्विश्वं यमाश्रित्यातिदुःसहः ॥ निवर्तनविधानस्थं रुद्रादित्यं नमामि तं ॥ एकमेवसुरं मन्येसमक्षं भानुमव्ययं ॥ विश्वाधारं विश्ववंद्यं जीवनं मोक्षकारणं ॥ स्वर्गाप वर्गसिद्धीनां दाता कः शक्तिमान्सुरः ॥ अस्ति चेद्भुतयस्यास्य पश्येदावर्त समक्षयं ॥ असमक्षा ह्यशक्तत्वाद्देवाः संति सहस्रशः ॥ तेषाम पीशतां धत्तेप्रत्यक्षः शक्तिमान्रविः ॥ ददाति सेवितोन्नं च विष्णुरग्निर्द्दनं शिवः ॥ ज्ञानं सर्वार्थदः साक्षात्स भानुः किं न सेव्यते॥ व्याधयो राजयक्ष्माद्यास्तावद्गर्जंति देहिषु ॥ यावन्न सेव्यते सूर्यस्मरणं परमौषधं ॥ कुष्ठेन कलिनाशेषकामेनौदुंबरेण मां ॥ पाहि पाहि जगन्नाथ शरणं सूर्य मे भवान् ॥ इत्युक्त्वा दंडवद्भूमौ पपात पुरतो रवेः ॥ जल्पान्मां पाहिपाहीति दुष्कर्माणं दुराशयं ॥ त्वत्पदांभोजभृंगानामशुभं विद्यते विभो ॥ दीनोस्मि पुण्यहीनोस्मि विमूढं रक्ष मां रवे ॥मार्कंडेय उवाच॥ लुंठमानं पुरः सांबमेवं वीक्ष्य दयानिधिः ॥ प्रोवाचोत्तिष्ठ सांबेति वरयेति वरं रविः ॥ अदेयमपि ते दास्ये स्तुत्या भक्त्या च तोषितः ॥ सांबउवाच ॥ यदाश्नुते भुक्तिमुक्तित्रयी यत्र प्रतिष्ठिता ॥ साक्षात् ज्ञानमयो राशिः सोयं सर्वार्थदो रविः ॥ किंवांबुयानं मोक्षाब्धेः किमसौ ज्ञानतोयधिः ॥ जरामरणरोगार्तिः हृदसौवा सुधारसः ॥ किंवाऽपौरुष धाम श्रुतिश्रुतरसो तु वा ॥ अघौघछेदनायालमेतच्चक्रंतुवाविभोः ॥ किं वा महामोहतमस्तनुकरणदीपकः ॥ सेव्यतामेष एवाद्धा नित्यं सिद्धरसो रविः ॥ ज्ञातुं वक्तुं किमु स्तोतुं न जाने त्वामशक्तिमान् ॥ प्रसीद त्वामहं याचे दुष्टं कुष्ठं हराशु मे ॥ वर्णरूपबलघ्नं मे पापलज्जाकरं गदं ॥ हर भानो हरार्कांशु हर भास्कर सत्वरं ॥ मार्कंडेय उवाच॥ ततः स्तृतीये वचने विव्हलः प्रणमन् रविं ॥ नष्टकुष्ठो भवत्सांबो रेत्वार्कस्य प्रसादतः ॥ ततोहृष्टमनाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सांबस्तथा हृष्टतनुरुहः ॥ पुनस्तं प्रार्थयमास तच्छ्रुणुष्व नराधिप ॥ सांबउवाच ॥ अत्र तीर्थे त्वया भानो चिरं स्थेयमहार्निशं ॥ लोकानामुपकराय दयां कृत्वा परां मयि ॥ इह त्वां स्थापयिष्वामि भक्तार्तिहरण प्रभो ॥ स्तोत्रेणानेन च नरो यस्त्वां स्तौति समाहितः ॥ तस्य रोगाः प्रणश्यंतु क्षयकुष्ठमुखा रवे ॥ सुखसौभाग्यपुत्रांश्च धनधान्यादिसाधनं ॥ त त्प्राप्नोतु सुधाधारसंसारध्वांतनाशनं ॥ मार्कंडेय उवाच ॥ एवं संप्रार्थितो भानुः प्रत्युवाच यदुत्तमं ॥ एवमस्तु तथान्यच्च यत्ते मनसि संस्थितं ॥ इत्युक्त्वा स जगामाशु ग्रहाधीशः स्वकां स्थितिं ॥ सांबोपि यादवश्रेष्ठस्तत्र संस्थाप्य भास्करं ॥ स्वनाम्ना पूजयित्वा च स जगाम यथागतं ॥ ततः प्रभृति तत्तीर्थे नदी सांबेति निर्मिता ॥ तस्यां लुठित्वा रेवायां स्नातं तेनासकृन्नृप ॥ कुष्ठमौदुबरं नष्टं मुदं वा तेनसोच्यते ॥ तत्र तीर्थे नरः स्नात्वा न रोगैः परिभूयते ॥ नानाविधानि कुष्ठानि क्षयदद्रुविचर्चिकाः ॥ श्वित्रश्वपचिकाद्याश्च नाशमायांति सत्वरं ॥ स्नात्वा संपूजयेद्भानुं यस्तत्र नियतः शुचिः ॥ स याति भास्करं लोकं पूज्यमानः सुरर्षिभिः ॥ तत्र ये पंगुतां प्राप्ताः शीर्णघ्राणनखा नराः ॥ दद्रुश्वित्रक संकोर्णाः कृमिराशिसमाकुलाः ॥ मातापितृभ्यां रहिता भ्रातृभार्यासुतोज्झिताः ॥ अनाथा विकला दीना निमग्नाः शोकसागरे ॥ तेषां नाथो जगद्योनिर्नर्मदातीरगो रविः ॥ सांबादित्यो हि लोकानामार्तिहा दुःखनाशनः ॥ तत्र तीर्थे तु यो स्नात्वा मासमेकं निरंतरं ॥ पूजयेद्भास्करं भक्त्या तस्य पुण्यफलं शृणु ॥ चतुर्दिक्जलधिस्नानाद्यत्पर्वसुफलं लभेत् ॥ आदित्यदिवसे स्नात्वा तत्र तीर्थे हि तत्फलं ॥ कौमारे यौवने पापं जनितं यच्च वार्द्धके ॥ तत्प्रणश्यति तत्तीर्थे स्नानमात्रान्नसंशयः ॥ न रोगो न चदारिद्र्यं न च बंधुवियोजनं ॥ सप्तजन्मानिमर्त्यानां सांबार्कपरिसेवनात् ॥ सप्तम्यामुपवासेन व्रतैश्चांद्रायणादिभिः ॥ सतत्फलमवाप्नोति तत्र स्नात्वा च तं लभेत् ॥ सकृत्पिंडप्रदानेन श्राद्धे तत्र युधिष्ठिर ॥ नरो न लिप्यते पापैः स्वपितॄन्प्रीणयेच्चिरं॥ तत्र यः कपिलां दद्या द्भानुमुद्दिश्य तद्दिने ॥ लोकाः कामदुघास्तस्य ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यं राज्यं च विंदति॥हेमान्नदानाद्धनवान् दैन्यं दुःखं च मुंचति।।स्वर्गसौख्यं चिरं भुक्त्वाजायते विपुले कुले॥ते धन्यास्ते महात्मानस्तेषां
जन्म सुजिवितं॥स्नात्वा पश्यंति ये नित्यं सांबार्कं सुसमाहिताः॥इति श्रीनर्मदामहात्म्ये सांबादित्यतीर्थं॥मार्कंडेय उवाच॥ततः
क्रोशांतरे राजन् सिद्धेश्वरमनुत्तमं॥परं पापहरं तीर्थंसिद्धैः कृतमिति प्रभो॥कपिलाद्यास्तु ऋषयो दक्षपुत्राश्च भारत।तत्रतेपुस्तप. पूर्वं सि
द्धयर्थं संयतेंद्रियाः॥महेशमुमया सार्द्धं पूजयंतो विधानतः॥तपंतस्ते यजंतश्च ध्यायंतश्चास्तुवन्विभुं॥षण्मासात्तैश्चतत्रस्थैः सिद्धिराप्तायु
धिष्ठि॥प्रत्यक्षश्चाभवच्छंभुर्ददौ सिद्धिं हि तेष्वपि॥तैश्च साक्षात्परा शक्तिर्गौरी दृष्टा वरप्रदा॥वरं ददानां सिद्धिः सा साक्षात्सिद्धिर्हर
प्रिया॥शिवा शाकंभरी देवी दुर्गा दुरितनाशनी॥मुक्ता मुक्तस्वरूपा सा भक्तनां चिंतितप्रदा॥विद्या लक्ष्मी रतिः क्षांतिः सिद्धिः श्रीर
खिलांबिका ॥ प्रकृतिर्मूलभूता या माया मुरुजिदर्चिता ॥ ते च सर्वेपिमुनयः सिद्धाः सिद्धेश्वराह्वयं ॥ शिवं शिवां च सहिताः स्ना
त्वा सिद्धेश्वरीमुमां ॥ तत्र संस्थापयामासुः पुजयंतस्तथांजसा ॥ एवं सिद्धा महाभागाः कपिलाद्यामहर्षयः ॥ नर्मदायां महाभाग
दक्षिणं कूलमाश्रिताः ॥ जपंतस्ते परंब्रह्म योगासिद्धा महाव्रताः ॥ सिद्धिं हि परमां प्राप्तास्ते च दक्षसुता नृप ॥ तद्धि तीर्थं महापु
ण्यं सर्वतीर्थेष्वनुत्तमं ॥ नर्मदायां महाराज दक्षिणं कूलमाश्रितं ॥ तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ श्राद्धं च तत्र यो
दद्यात्पितॄन्नुदिश्य भारत ॥ तृप्यंति पितरस्तस्य द्वादशाद्वान्यसंशयं ॥ तत्र तीर्थे च यो भक्त्या स्नात्वा संपूजयेच्छिवं ॥ रात्रौ जा
गरणं कृत्वा पठेत्पौराणिकीं कथां ॥ ततः प्रभाते विमले स्नानं कृत्वा यथाविधि ॥ योवीक्षते महादेवं स गच्छेत्परमां गतिं ॥ भो
जयेद्यो द्विजान् भक्त्या तेभ्यो दद्याच्च दक्षिणां ॥ एकेन द्विजभोज्येन कोटिर्भवति भोजिता ॥ इति श्रीसिद्धेश्वरतीर्थं ॥ मार्कंडेय
उवाच ॥ तत्र सिद्धेश्वरी देवी वैष्णवी पापनाशनी ॥ सानंदं परमंप्राप्ता स्थानं चाप्यतिशोभनं ॥ सा तवोक्ता महासिद्धिर्वर

१(सांभोर) १ (अंदाडु)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मंगलदायिनी ॥ ऋषिभिस्थापिता तत्र सिद्धिर्लोकहिताय वै ॥ तत्र स्नात्वा च संतर्प्य देवांश्च पितृभिः सह ॥ देवीं पश्यति यो
 भक्त्या मुच्यते सर्वपातकैः ॥ मृतवत्सा तु यानारी वंध्या स्त्री जननी तथा ॥ तत्र तीर्थे हि सा स्नाता शोभनं पुत्रमाप्नुयात् ॥ अ
ष्टम्यां च चतुर्दश्यां देवीं यस्तु प्रपश्यति ॥ तत्रैवसं गमेस्नात्वा योषिद्वा पुरुषोपि वा ॥ धनं पुत्रान्सुखं देवीददाति परमार्चिता ॥
गोत्ररक्षां च कुरुते दृष्टा देवी प्रतोषिता ॥ पातिप्रजां च वंशं च पूजिता नात्रसंशयः ॥ नवम्यां च महासिद्धिं स्तुत्वा देवीमुपोषि
तः ॥ प्रशांतः प्रयतः सम्यक् गौरिणी र्भोजयेच्छुभाः ॥ कुमारिकाश्च राजेंद्र भोजयेत्पूजयेदपि ॥ पुष्पकुंकुमतांबुलकज्जलैः कंचुकैरपि
॥ ग्रीवा सूत्रकसिंदूरैः शक्त्या पार्थ विभूषयेत् ॥ गौरी सिद्धेश्वरी देवी प्रीयतामितिकीर्तयेत् ॥ तस्य दोषाः प्रणश्यंति प्रजायंते सु
ताः शुभाः ॥ इतिश्रीरेवामहात्म्ये सिद्धेश्वरतीर्थनामषष्टचत्वारिंशदधिकशततमोऽध्यायः ॥१४६ ॥ मार्कंडेय उवाच ॥ तथा च परमं
विद्धि तीर्थं तत्रैव शोभनं॥मम नाम्ना सुविख्यातं मार्कंडाह्वयमुत्तमं ॥ युधिष्ठिर उवाच ॥ कथं तत्र मुनिश्रेष्ठ तव चिन्होपलक्षितं
॥ तीर्थं तन्मे समाख्याहि तत्तु जातं कथं मुदा ॥ मार्कंडेय उवाच ॥ पुरा कृतयुगे राजन् यातोहं दक्षिणं गिरिं ॥ विंध्यं सर्वगुणो
पेतं नियतो नियताशनः ॥ ऋषिसंघैः कृतातिथ्यो दंडके न्यवसं तदा ॥ उषित्वा सुचिरं तत्र वर्षाणामयुतं सुखी ॥ तीर्थयात्राकृत
राश्चिश्चातुर्मास्यानि सर्वतः ॥ वसमानः परिभ्रम्य रेवासेवा धृतादरः ॥ तान् ऋषीन् समनुज्ञाप्य शिष्यैश्चानुगतस्तदा ॥ निवृतोहं
महाभाग नर्मदाकूलमाश्रितः ॥ पुण्यं च रमणीयं च पापविद्राविणं परं ॥ कृतोमयाश्रमस्तत्र यत्र सिद्धा मुनीश्वराः ॥ यत्र सिद्धे
श्वरी देवी सर्वदेवैरुपासिता ॥ देवैस्तत्र कृतं कुडं सरोरुहमिति श्रुतं ॥ तत्र देवैश्च मुनिनिः सर्व तीर्थपरः कृतः ॥ कमंडलुकरैः स
र्वैः सर्वतापूरितं सरः ॥ स्थितस्तत्राश्रमे चाहं द्विजसंघसमावृतः ॥ ब्रह्मचारिभिराकीर्णो गृहस्थैरुपशोभितः॥वामनस्थैश्च यतिभिर्जि
ताहारै र्जितेंद्रियैः॥तपस्विभि महाभागैः कामक्रोधविवर्जितैः॥शतंवर्षाणि तत्राहं तपः कृत्वा सुदुष्करं॥आराधयन्महादेवं विश्वकर्त्तार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मीश्वरं ॥ जपध्यानस्तुतिनपोनियमैर्नर्मदातटे ॥ ततस्तुवरदौ देवौ मम जातौ युधिष्ठिर ॥ प्रत्यक्षौ शिवकृष्णौ द्वावुमाश्रीसंविभूषितौ ॥ प्रणम्याहं ततो देवौ भक्तियुक्तो ब्रुवं पुनः ॥ भवंतौ प्रार्थयामिस्म वरदौ वरमुत्तमं ॥ धर्मस्थितिः सदामेस्तु भक्तिश्च युवयोस्थिरा ॥ अजरोव्याधिरहितः पंचविंशाद्बिको यथा ॥ भवेयं तपसा सिद्धः कामादिभिरथोःज्झितः ॥ तथा लोकहितार्थाय भवद्भयां लोकपूजितौ ॥ अस्मिन् स्थाने सदा स्थेयं सहदेवैः प्रसादतः ॥ एवमुक्तो मया पार्थ तौ देवौ कृष्णशंकरौ ॥ तावुचतुः प्रहर्षाढयौ निवासार्थं युधिष्ठिर ॥ देवावूच तु ॥ अस्मिंस्थाने स्थितौ विद्धि देवैः सहसवासवैः ॥ आवां लोकोपकाराय प्रीत्या ते मुनिसत्तम ॥ तव च प्रार्थितं सर्वं भविष्यति न संशयः ॥ एवमुक्त्वा ततो देवौ तत्रैवांतरधीयतां ॥ अहं च स्थापयित्वा तौ कृष्णं शंभुः तथाव्ययं ॥ कृतकृत्यस्ततो राजन् संजात सुसमाहितः ॥ स्तस्मिन्स्तीर्थे नरःस्नात्वा पूजयेत्परमेश्वरं ॥ घृतेन पयसा दध्ना मधुशर्करया तथा ॥ तीर्थांभसा च पुण्येन गंधपुष्पैस्तथार्जयेत् ॥ पुष्पधूपार्चिर्दीपैश्च नैवेद्यैर्नियतात्मवान् ॥ एवं च विष्णोः कुर्वीत जागरं भक्तिसंयुतः ॥ आषाढस्य सिते पक्षे एकादश्यामुपोषितः ॥ वैष्णवं लोकमाप्नोति विष्णुतुल्यो भवेन्नरः ॥ माहेश्वरे तथा लोके गणवन्मोदते सदा ॥ श्राद्धं तत्र प्रकुर्वीत पितॄनुद्दिश्य भक्तितः ॥ तस्य ते तृप्तिमायांति कल्पमेकं युधिष्ठिर ॥ तत्र तीर्थे द्विजःस्नात्वा मौनी नियतमानसः ॥ उपास्य संध्यां तत्रस्थो जपं कृत्वा विधानतः॥तर्पयित्वा सुरान्पिन्तॄमनुष्यांश्चनृपोत्तम ॥ कृष्णस्य पुरतःस्थित्वा मार्कंडेश्वरसंनिधौ ॥ अप्येकविप्रभोज्येन कोटिर्भवति भोजिता ॥ मृतप्रजा च या नारी वंध्यास्त्री जननी तथा ॥ स्नाप्यते साविधानेन पुत्रान्प्राप्नोति शोभनान् ॥ रुद्रांस्तुविधिवज्जःवाब्राह्मणो वेदतत्ववित् ॥ लिंगस्य दक्षिणे पार्श्वे स्थापयित्वा घटं शुभं ॥ रुद्रैकादशकं जप्त्वा स्नापयेत्कुंभवारिणा ॥ पुत्रमाप्नोति सा नारी गुणिनं दीर्घजीवितं ॥ मार्कंडेश्वरवृक्षांश्च दूरस्थो योपिपश्यति ॥ ब्रह्महापि विमुच्येत इत्येवं शंकरोऽब्रवीत् ॥ यइदं श्रृणुयाद्भक्त्या पठेद्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नृपसत्तम ॥ सर्वपापविनिर्मुक्तः सोपि रुद्रपुरं व्रजेत् ॥ इति श्रीरेवामाहात्म्ये मांडकेश्वरतीर्थं ॥ तथा अंरकुंडं स्कंदपुराणोक्तं
शिव उवाच ॥ शुक्लतीर्थात्क्रोशमात्रे तीर्थं कोटीश्वरं परं ॥ उत्तरे नर्मदातीरे सर्वपापप्रणाशनं॥ यत्र सिद्धाः पुरा स्कंद मुनयः
कोटिसम्मिताः॥गत्वा शिवपुरं भूत्वा त्रिनेत्राः शशिशेखराः॥नागोपधारिणः सर्वे मुंडमालाविभूषणाः॥खट्वांगधारिणः सर्वे जटिलाग
जकृत्तयः॥जरामरणनिर्मुक्ता भस्मोद्धूलितविग्रहाः॥सारूप्यमुक्तिमापन्नाःपुनरावर्त्तिवर्जिताः॥तीर्थस्यास्य प्रभावेन परानंदमुपागताः॥स्कं
दउवाच कथमीदृग्गुणं तीर्थं कथं जातं कुतश्चतत्॥कथयस्व प्रसादेन शिवलोकसुखावहा॥महादेवउवाच॥ शृणु स्कंद समासेन कथां
पुण्यां पुरातनीं गंगाकनखले पुण्या कुरुक्षेत्रे सरस्वती॥ग्रामे वायदि वारण्ये पुण्या सर्वत्र नर्मदा॥माघस्नानं प्रयागे वै महापुण्यं प्रकी
र्त्तितं॥ कार्त्तिके तु सरस्वत्यां स्नानं पापौघनाशनं ॥ वैशाखे नर्मदास्नानं पुनरावर्त्तिवर्जितं॥ सर्वशास्त्रपुराणानां मतमेतन्मुनीश्व
राः॥निश्चित्य मनसा सर्वे नर्मदां स्नातुमागताः॥कश्यपात्रिर्वशिष्ठाद्याः सर्वे ऋषिगणाःपुनः॥सशिष्याःकोटिशः स्कंद शुक्लतीर्थमुपाग
ताः॥रेवातीरस्थतीर्थानां मुख्यं मत्वा तदुत्तमं॥ब्रह्मचर्यादिनियताःफलमूलाशना परं॥मासोपवासिनः केचित्केचित्पक्षोपजीविनः॥
एकांतरभुजः केचित् केचित्पर्णाशनाः परं॥ वाताशनाः स्थिताः केचिदपरे वन्यभोजिनः ॥ एवं व्रतरताः सर्वे सप्तशौचरताः सदा
संप्राप्य शुक्लतीर्थं हि परानंदमुपागताः॥ रेवातीर्थकृतस्नानाः श्राद्धतर्पणकारिणः॥ कृतार्थतामात्मनस्तु मन्यमानास्ततः परं ॥तत्तीर्थे
शान्मुनीन् भक्त्या प्रप्रच्छुः परमादरात्॥ शुक्लतीर्थे वयं स्नाताः कृतार्थत्वमुपागताः ॥ यदि तीर्थविशेषोऽत्र कर्त्तव्यः सोपि हीश्वरैः॥
तदा तत्रस्थयमुनयः प्रोचुः संप्रीतमानसः ॥ पुरा बाणासुरः शंभोर्भक्तितत्परमानसः॥ गुरुप्रसादात्परमां विद्यां पंचाक्षरीं जपन् ॥शि
वलिंगार्चने श्रद्धा प्राप्तवान्परमादरात्॥एकैकलिंगवृध्यासौ भक्त्या परमया युतः॥यावल्लक्षं हि लिंगानां वृद्ध्या पूजामकल्पयत्॥ततः

१ मांडवा २ अंकलेश्वर

CC-0. In Public Domain. Digitization by eGangotri

स नियमं चक्रे प्रत्यहं लक्षपूजनं ॥ संपूज्य ब्राह्मणान् भक्त्या लक्षलिंगार्चनं सदा॥ प्रत्यहं प्रणिपत्याथ भुंक्ते नीराजनोत्तरे ॥ एवं
नियमवान् भक्त्या लक्षलिंगार्चनं सदा ॥ एवं नियमवान् राजा वरं कार्श्यमुपागतः॥ यामार्द्धरात्रे प्रहरे तृतीये वाशनं चरेत् ॥तत
स्तुष्टो महादेवोनुग्रहं कृतवान्वरं॥महादेवउवाच॥वरं वरय भो वत्स यत्ते मनसि वांछितं॥अदेयमपि दास्यामि तवभक्त्या वशो गतः
॥मा विलंबस्त्वया कार्यो ब्रूहि ब्रूह्यसुरेश्वर॥बाणउवाच यदि तुष्टोसि देवश यदि देयो वरो मम॥रासुसुरमनुष्याणा मजेयो वै भ
वाम्यहं॥नैव लक्ष्मीवियोगी च रोगशोकविवर्जितः॥सदा त्वत्पादभक्तिश्च सदा सर्वहिते रतः॥एवमुक्तोथ बाणेन शंकरो वाक्यमब्र
वीत्॥यत्वया वांछितं वत्स तत्सर्वं सिद्धिमेष्यति॥लिंगलक्षस्य या पूजा प्रत्यहं क्रियते त्वया॥प्रात र्द्विजाननुप्राप्य शंकरस्य हि पूजने
॥समर्प्य पूजासंभारांस्त्वं तु भुक्ष्व यथारुचि॥एवमुक्तो शिवेनाथ पुनर्बाणासुरोब्रवीत्॥न मया भोजनं कार्यं लिंगलक्षार्चनंविना ॥
लिंगार्चनान्महेशान प्रसादस्तेभवद्यतः॥साधनं त्वत्प्रसादस्य लिंगलक्षार्चनंमयि॥तस्मात्पूजा समाप्तौवै भोजनं मे न चान्यथा॥एवमु
क्तिते बाणे पुनस्तं शंकरोब्रवीत्॥शंकरउवाच॥प्रसन्नोस्म्यसुरश्रेष्ठ नियमात्तव दुष्करात्॥श्रृणुष्वैकं पुनर्गोप्यं रहस्यं सर्बदुर्लभं॥गुह्या
त्गुह्यतरं वत्स तव भक्त्या प्रकाश्यते॥शुक्लतीर्था पश्चिमेतु क्रोशमात्रं व्यवस्थितं तीर्थं॥कोटीश्वरं नाम सर्वपापप्रणाशनं॥मलमासे तु
वैशाखे लिंगकोटीस मुद्भवः॥स्वेच्छया जायते यत्र कोटीतीर्थं ततः परं॥गल्लकीचक्रवत्पुण्यं समुत्पन्नं ममेच्छया॥सर्वपापहरं पुण्यं दर्श
नात् स्पर्शनादपि॥एकास्मिन् पूजिते लिंगे कोठिलिंगार्चनात्परं यद्ददात्यसुरश्रेष्ठ नित्यं तत्पूजनं कुरु॥पुराहं पार्वतीशापात्पाषाणत्वमु
पागतः॥लिंगरूप धरो भूत्वा नर्मदातीरमाश्रितः ॥पूजनात्तस्य लिंगस्य सर्वसिद्धिर्भवेन्नृणां॥यस्यानुग्रहमिच्छामि तस्मै तल्लिंगमर्चयेत्
कलौ पापाधिकं चैव गुप्तमेतद्भविष्यति॥ मत्प्रसादात्तु केषांचित्प्राप्तिरस्य भविष्यति ततोसो शंभुवचनात्कोटीतीर्थ मुपागतः नित्य
त्रिषवणं कृत्वा शिवस्तुतिपरायणः॥सोपवासो ब्रह्मचारी ध्यानाच्छंकरदर्शनः॥लधवा लिंगं मुदायुक्तः पुनर्भवनमागतः तस्माद्भवाद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्ततीर्थे गत्वा मासिमलिम्लुचे स्नानदानादिकाः सर्वाः क्रिया कार्या प्रयत्ननः॥ततस्तदाज्ञया सर्वै कोंटीतीर्थमुपागताः॥ मासमात्रं
स्छितास्तत्र परां सिद्धिमुपागताः॥भुत्त्का तु विपुलान् भोगान् परां सिद्धिमुपागताः कोटितीर्थे॥नरस्नात्वा कोटिजन्मसमुद्भवे कोटितीर्थे
महा प्राज्ञ विष्णुवैकुंठलोकत गरुडेन समारुह्य क्षिवदर्शनतत्परः अधिघे माधवे मालि कोटितीर्थे जगत्प्रभुः ब्रह्मादिदैवतैः सार्द्धं
तिष्टते नात्र संशयः॥ विमुक्तः सर्वपापौघैः शिवलोके महीयते॥कोटितीर्थे नरो यस्तु ब्राह्मणात् भोजयेत् शुभान्॥एकस्मिन् भोजि
ते विप्रे कोटिर्भवति भोजिता॥कोटितीर्थ कृतं यत्तत्सर्वं कोटिगुणं भवेत् पितृणां श्राद्धदानेन तृप्तिः कोटियुगा निवै एका गौदानत
श्चैव क्षीयते न कदाचन॥दत्तानि भुमिदेवेभ्यो वर्द्धतेच दिने दिने॥एतत्तीर्थप्रभावेनबहवः सिद्धिमागताः अस्प तीर्तमहात्म्यं न वक्तुं
पारयाम्यहं॥न ब्रह्मा नच शेषश्च वत्स वर्षशतैरपि॥ऋच मेकांजपन् तत्र फलं रुग्वेदर्जलभेत्॥यजुर्वेदजपस्तद्वद्यजु वैदफलं लभेत् मा
म्नैकेन च जप्तेन सामवेद फलोदयः॥ठात्यैारा पुराणाध्यायमात्रस्य पाठा रणजं फलं॥पूर्णप्राप्नोति नास्त्यत्र संशयः कृत्तिकासुत॥ अ
पुत्र पुत्रं माप्नोति मुर्खौ मवति पंडितः॥ रागे। रोगाद्विमुक्तश्च कोटितीर्थनिषेवणात् ॥ पिंडमात्रप्रदानेन प्रेतो मोक्षमवप्नुया
त् ॥ इति ते कथितं स्कंद तीर्थं कोटिश्वरं परं ॥ प्रयागादधिकं चैतत् तीर्थराजान्न संशयः ॥ यथा काशि प्रिया स्कंद गो
कर्णो वा ममप्रियं ॥ तथैव कोटितीर्थं मे सदा प्रितिधिवर्द्धनं ॥ न वक्तव्यं त्वया स्कंद यस्मै कस्मै कदा च न ॥
महाभाग्योदयात् चैव तत्तीर्थं लभ्यते नरः ॥ कांक्षंति पितरो नित्यं कदा स्मत्कुलसंभवः ॥ कोटितीर्थं व्रजंनास्मा
नुद्धारिष्यंति तत्क्षणात् ॥ दुस्तरान्नकरकात् सद्यो परं मोक्षं करिष्याति ॥ इति श्रीसकंदपुराणे शिवस्कंदसंवादे कोटितीर्थं
॥ततोगच्छेन्महाराज रेवायाउत्तरे तटे ॥ क्रोशांतरे शुक्लतीर्था द्वोपेश्वरमितिश्रुतं॥नंदगोपः पुरा यत्र संदेहः सिद्धिमाप्तवान् ॥ मथुरा
यासमागत्य शुक्लतीर्थाभिवांच्छया॥कृच्छ्रादिभिर्निजंदेहं शोषयित्वा शिवं स्मरन्॥स्नात्वा संपूजयन् रुद्रं त्रिकालं संजितेंद्रियः॥त्रिभिर्व

CC-0. In Public Domain. Digitization by eGangotri

षेमहाराज स्थापयित्वा महेश्वरं॥दशकोट्यर्कपुष्पैश्च पूजयन् धूर्जटिंस्वयं॥ततः प्रसन्ने सशिवे सदेहो गणतांगतः॥ततः प्रभृतिविख्यात
तीर्थंगोपेश्वराह्वयं ॥ यत्र स्नानेनचैकेन मुच्यते पातकैर्नरः॥तत्र तीर्थे तु यः स्नात्वा कुरुते प्राणसंक्षयं॥सगच्छेद्वर्हिं युक्तेन यानेन शि
वमंदिरं॥क्रीडित्वा सुचिरं कालं शिवलोके महामनाः॥ इह मानुषतां प्राप्य राजा भवति वीर्यवान्॥हस्त्यश्वरथसंपुर्णो दासीदाससम
न्वितः॥पूजमनोबहुनृपैः जीवेद्वर्षशतं सुखी ॥पुत्रपौत्रैः परिवृतो दाताभोगीगुणाधिनी ॥शुचिर्विनयसंपन्नो ब्रह्मण्यः शुचिरात्मवान् ॥
गंधपुष्पैः समभ्यर्च्य रात्रौ कुर्वीतजागरं॥तस्य यत्फल मुद्दिष्टं तच्छृणुष्व नराधिप॥यावत्संख्या दीपकानां वर्तितं तु कृता तथा ॥ ता
वद्युगसहस्रं सशिवलोके महीयते ॥ तस्मिन्स्तीर्थे च राजेंद्र यः कुर्याल्लिंगपूरणं ॥ तिलैः सितै र्वा सितया पद्मैर्दध्योदनैस्तथा ॥ घृतैः
फलैश्च वासोभि स्तस्य पुण्यफलं शृणु ॥ यावत्तिलादिके संख्याभक्तानांतुफलादिके ॥तावद्युगसहस्राणि शिवलोके महीयते ॥पद्मसं
ख्या शिवलोके मोदते कालमक्षयं ॥ तस्मिंस्तीर्थे तुराजेंद्र यश्च किंचित्प्रदीयते ॥ सर्वकोटीगुणं लोके लभते नात्र संशयः ॥ इ
तिश्रीरेवा° गोपेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशद्वये पार्थ साधिके तीर्थमुत्तमं उत्तरे ॥ नर्मदाकूले भृगुक्षेत्रस्य मध्यतः
॥ कपिलेश्वरसंज्ञं तु विशेषात्पापनाशनं ॥ योसौसनातनोदेवः पुराणे परिपठ्यते ॥ वासुदेवः सविश्वात्मा कपिलत्वमुपागतः ॥ पा
तालं सुतलं नाम तस्यैवनितलं त्वधः ॥ गभस्तिमञ्चतस्याधो ह्यतलं वितलं तथा ॥ रसातलं तथा षष्ठं पातालं नाम सप्तमं ॥
तत्रासौ वसते देवः पुराणः परमेश्वरः ॥ स ब्रह्मा समहादेवः सदेवो गरुडध्वजः ॥ पूज्यमानः सुरैःसिद्धैस्तिष्ठते ब्रह्मवादिभिः ॥ व
सतस्तस्य राजेंद्र कपिलस्य जगद्गुरोः ॥ विनाशं चाग्रतः प्राप्ताः क्षणेन सगरात्मजाः ॥ भस्मीभुतां स्तुतां दृष्ट्वा कपिलो मुनिसत्तमः
जगाम परमं शोकं चिंतयानोथकिल्बिषं ॥ सर्वसंगपरित्यागे चित्ते निर्विषये कृते ॥ अयुक्तं जीवसंघानां कर्तुं मम विनाशनं ॥ कृ

१(तवरा)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य करणं नास्ति तस्मात्पापविनाशनं ॥ प्रायश्चितं करिष्यामि येनशुद्धिर्निगद्यतो ॥ मत्वाशिवधुनीं पुण्यां सर्वपापविमोचनीं ॥ गंगा यत्र तपस्तेपे कपिलारूपधारिणी ॥ संप्राप्यकृत्तरं तीरं पापौघाकुलिनापुरा॥ पाताल सततोमुक्ता कपिला मुनिसत्तम ॥ तपश्च चार सुम हद्रे वायाउत्तरेतटे ॥ व्रतोपवासनियमैः स्नानदानजपादिकैः ॥ परं निर्वाणमापन्ना पूजयन्शिवमव्ययं ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं ॥ कपिलेश्वरसंज्ञं तु स्थापितं मुनिना पुरा ॥ गोसहस्रप्रदानस्य लभते स महत्फलं ॥ ज्येष्ठमासस्य राजेंद्र प्राप्य शुक्लांचतुर्दशीं ॥ तत्र स्नात्वा विधानेन भक्त्या दानं प्रयच्छति ॥ पात्रभूते नृपश्रेष्ठ स्वल्पं वा यदिवाबहुः ॥ अक्षयं तत्फलं तस्य शिवेनोक्तं पुरारिणा ॥ अंगारकदिने प्राप्ते चतुर्थ्यां नवमीषु वा ॥ स्नानं करोति पुरुशो नारि वा भक्तितत्परा ॥ रुपमैश्वर्यमतुलं सौभाग्यं संततिं सुखं ॥ लभते सप्तजन्मानि सत्यमेतन्मयोच्यते ॥ पूर्णिमास्याममवास्यां स्नात्वा पिंडंप्रयच्छति ॥ तस्य ते द्वादशा ब्दानि तृप्तायांति सुरालयं ॥ तत्र तीर्थे तु यो भक्त्या ददेद्दीपं सुशोभनं ॥ जायते तस्य राजेंद्र दीप्तिश्चक्षुः शरीरजा ॥ तत्र तीर्थे मृतानां च जंतूनां सर्वदा नृप ॥ वासः शिवपुरे नूनं जायते युगसंख्यया ॥ इति श्रीरेवामाहात्म्ये कपिलेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ तीर्थं घोडेश्वरं परं ॥ अश्विनौ देवभिषजौ यत्राश्वं रूपमास्थितौ ॥ भिषग्विधानसिध्यर्थं तेपतुस्तपउत्तमं ॥ रेवायाउत्तरेकूले भृगुतीर्थ समीपतः ॥ तत्र प्रसन्नोभगवान् तयोवर्षशते गते ॥ आयुर्वेदकरीं सिद्धिं सर्वरोगनिवर्हिणीं ॥ ददौ ताभ्यां महादेवस्त्वष्टांगैः सुपरिष्कृतां ॥ तत्रतौवैद्यनाथं हि घोडेश्वरपराह्वयं ॥ शंभुंस्नात्वा प्रतिष्ठाप्य यातौस्वसदनं नृप ॥ तत्र तीर्थे तु यःस्नात्वा वैद्यनाथं प्रपूजयेत् ॥ यथा प्राप्तोपहारैश्च भक्त्या ह्यनुदिने स्वयं ॥ सर्वाघौघविनिर्मुक्तो नरोगैः परिभूयते ॥ तत्र स्नात्वा चयः पार्थश्राद्धे पिंडप्रदोभवेत् ॥ सकृत्पिंडप्रदानेन दीपदानेन भारत ॥ पितरःशाश्वतीं तृप्तिंप्राप्य स्वर्गेवसंतिहि ॥ आयुर्वेदं प्रदानेन नरोगैः पीड्यते क्वचित् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रेभ्यो भोजनं दत्वा तोषयेत्पितृदेवताः ॥ इति श्रीनर्मदामात्म्ये धौंडेश्वरवैद्यनाथ तीर्थनाम सप्तचत्वारिंशदधीकशततमोऽध्यायः ॥ १४७ ॥ श्रीमार्कंडेय उवाच ॥ ततः क्रोशद्वयं गत्वा भृगुक्षेत्रांतिके नृप ॥ पिंगलेश्वरतीर्थं तु सर्वपापक्षयंकरं ॥ तीर्थं सर्वगुणोपेतं कामिकं भुवि दुर्लभं ॥ वाचिकं मानसं पापं कर्मजं यत्पुरा कृतं ॥ पिंगलेश्वर मासाद्य तत्सर्वं विलयं व्रजेत् ॥ तत्र स्नानं च दानं च देवखाते कृतं नृप ॥ अक्षयं तद्भवेत्सर्वमित्याहादौ महेश्वरः ॥ पृथिव्यां सर्वतीर्थेभ्यः समुद्धृत्य शुभं जलं ॥ मुक्तं तत्र सुरैः स्नात्वा देवखातं ततोभवत् ॥ युधिष्ठिर उवाच ॥ कथं तु देवखातं तत्संजातं मुनिसत्तम ॥ सुराः सर्वे कथं तत्र मुमुचुर्वारि तीर्थजं ॥ पिंगलेश्वरतीर्थस्य विस्तरं च वदस्व मे ॥ संभवंचास्य तीर्थस्य श्रोतु मे लंपटौश्रुती ॥ मार्कंडेय उवाच ॥ यदा शूलस्य शुध्यर्थं रुद्रो देवगणैः सह ॥ बभ्राम पृथिवीं सर्वां मंधके निहने सति ॥ मुनिसिद्धसुरैः सार्धं तैः कमंडलुधारिभिः॥प्रभासाद्येषु तीर्थेषु स्नानं चक्रेचतैर्वृतः ॥ सर्वतीर्थभवं तोयं पात्रेषु विहितं चतैः ॥ शूलभेदमनुप्राप्य शुद्धं शूलं तु शूलिनः ॥ तत्रोत्थमुद्दशतांतरे ॥ तीर्थानामुत्तमं तीर्थं गच्छेद्गीर्वाणसेवितं ॥ दर्शनादेव तीर्थस्य यस्य पापं प्रणश्यति ॥ तत्र स्थाने पुरा पार्थ देवदेवेन शंभुना ॥ उद्धूलनं कृतं गात्रे तेत भूतीश्वरो विदुः ॥ स्नानानामुतमं स्नानं यद्भूत्या भरतर्षभ ॥ भवस्य वल्लभा भूतिरभवत्तत्र भारत ॥ स्वयंभूरथ संजातस्तेन तीर्थे महेश्वरः ॥ भूतेश्वरेति विख्यातं स्वस्यनाम चकारह ॥ततः प्रभृति विख्यातं तीर्थं पापप्रणाशनं॥ पुण्ये वा जन्मनक्षत्रे यदि चेंदुक्षये नृप ॥ भूतिश्वरे नरः स्नात्वा कुलकोटिं समुद्धरेत् ॥ तत्र भक्त्या तु यो भूत्या कुरुतेंगावगुंठनं ॥ तस्य यत्फलमुद्दिष्टं तछ्रुणुष्व नृपोत्तम॥यावत्यो भूतिकाणिका गात्रलग्ना भवंति हि ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ स्नानानामिह सर्वेषां भस्मस्नानं परं स्मृतं ॥ पुराणे ऋषिभिः प्रोक्तं सर्वशास्त्रेषु शस्यते॥एककालं द्विकालं वा त्रिकालं वापि यः सदा ॥

१ (घोडेश्वर)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रे. खं. करोति स्नानमाग्नेयं तस्य पापं प्रणश्यति॥दिव्यस्नानादरं तात वायव्यं परिकीर्तितं॥वायव्यादुत्तमंब्राह्मं परंब्राह्मात्तुवारुणं ॥आग्नेयं अध्या.
१४८ वारुणाच्छ्रेयं यस्मादुक्तं तु शंभुना ॥ तस्मात्सर्वप्रयत्नेन स्नानमाग्नेयमाचरेत् ॥ युधिष्ठिरउवाच ॥ अग्नेयं वारुणं ब्राह्मं वायव्यं दि १४८
१४९ व्यमेव च ॥ किमुक्तं श्रोतुमिच्छामि परं कौतूहलं हि मे॥मार्कंडेय उवाच॥अग्नेयं भस्मना स्नानं अवगाह्येति वारुणं॥आपोहिष्ठेति १४९
च ब्राह्मं वायव्यं गोरजं स्मृतं ॥ दृष्टसूर्यं तु यद्वर्षं गंगातोयसमं हि तत् ॥ तत्स्नानं पंचमं प्रोक्तं दिव्यं पांडवसत्तम ॥ तस्मात्सर्व
प्रयत्नेन स्नात्वा भूतीश्वरेनरः ॥ पूजयेद्देवमीशानं सबाह्याभ्यंतरः शुचिः ॥ तत्र स्थाने तु ये नित्यं ध्यायंति परमेश्वरं ॥ सूक्ष्मं चा
तींद्रियं नित्यं ते धन्या नात्र संशयः ॥ मुक्तिक्षेत्रं हि तत्तीर्थं सर्वतीर्थेष्वनुत्तमं ॥ दर्शनादेव यस्याशु पापं याति सहस्रधा ॥ पूज
यित्वा लभेद्राज्यं स्तुत्या वागीशतां लभेत्॥ जाप्येन पापसंशुद्धिः ध्यानेनानंत्यमश्नुते ॥ दानेन च धनी दाता ज्ञानी विद्याप्रदान
नः ॥ ज्योतीरूपमरूपं तमादिमध्यांत वर्जितं ॥ अनुत्ताद्यमतीर्थं च दोषाष्टादशकोधितं ॥ सर्वभूतस्थितं शांतं सर्वयोगीश्वरं विभुं ॥
सर्वलोकेश्वरं शुद्धं ज्ञानगम्यंस्मराहं॥ तत्र तीर्थे च यो भक्त्या श्राद्धे वै भोजयेद्द्विजान् ॥ पंचामृतैर्यथाशक्त्या स शोच्यो न क
चित् क्वचित् ॥ तत्रतीर्थे तथा पार्थ पंचभूतैर्हि योजयेत् ॥ आत्मानं यः परे लोके शिवस्यानुचरो भवेत् ॥ इति श्रीनर्मदामहा
त्म्ये भूतीश्वरतीर्थनाम अष्टचत्वारिंशदधिकशततमोध्यायः॥१४८॥मार्कंडेय उवाच॥तत्र क्षेत्रे महाराज सैंधवायतनं महत्॥ तत्ती
र्थादुत्तरे देशे क्रोशार्द्धे च सरिज्जलात् ॥ सैंधवा परमा शक्तिर्निर्दिष्टा तत्र शांकरी ॥ योगिनीभिः परिवृात्ता सर्वसिद्धिकरी नृप ॥
कूपः शाक्तश्च तत्रैव पुरतः पुण्यलक्षणः ॥ दृष्ट्वा स्पृष्ट्वा जलं तस्य न दोषैः परिभूयते ॥ फलपुष्पाक्षतैस्तत्र मध्ये चंदनकुंकुमैः ॥
अर्घदानान्महादेव्या लभते वांछितं फलं ॥ योगिनीविवरं तत्र नर्मदाजलसंश्रितं ॥ खेलं तिशक्तयास्तत्र पार्थभूताष्टमीषु च ॥ सा
कष्टहारिणी देवी सैंधवा संस्मृतापिच ॥ दृष्ट्वाचपूजितान्दणां स्त्रीणां च नृप किं पुनः॥ सा वैष्णवी परा शक्तिः सैव ब्राह्मी च शां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करी ॥ तस्याः पूजनमात्रेण लभते वांछितं नरः ॥ नानोपचारैः परमां दीपधूपार्घसंस्तवैः ॥ तांबूलवस्त्रवासोभिः पूजयेत्परमेश्वरीं ॥ तां चोपयाचितैर्लोका ये भजंति शिवां सदा ॥ तत्तत्संपादयेत्तेभ्यो भक्त्या यैः परितोषिता॥ सैंधवायाः परं स्थानं तवोक्तं मे स मासतः ॥ एषैव परमा शक्तिः किमुक्ता बहुविस्तरं ॥ इति नर्मदामाहात्म्ये सैंधवायतनमाहात्म्यं ॥ मार्कंडेय उवाच ॥ भूतेश्वरा त्ततो गच्छेत्पार्थाशीतिक्रमांतरे ॥ गंगावाहेति विख्यातं शंखोद्धारापराह्वयं ॥ नर्मदायां महापुण्यं भृगुक्षेत्रांतिके नृप॥उद्वेजिता पा पिपापैः समागत्यात्र जान्हवी ॥ पुरा वर्षशतं साग्रं परमव्रतसंस्थिता ॥ ध्यायमाना जगद्योनिंनारायणमकल्मषं ॥ आत्मानं पर मं धाम सरित्सा जगतीपते ॥ अभजद्भगवंतं सा विष्णुपादाग्रसंभवा ॥ ततो जनार्दनो देवी आगत्येदमुवाच ह ॥ श्रीभगवानु वाच ॥ तपसा तव तुष्टोस्मि गंगे मत्पदसंभवे ॥ मत्तः किमिच्छसि शुभे ब्रूहिकिं करवाणि ते ॥ गंगाउवाच॥ त्वदंघ्रिकमलाद्ब्रह्मा जाताहं गगनेचरा ॥ यदृच्छया त्रिलोकेश वंद्यमाना दिवौकसैः ॥ नृपो भगीरथस्तस्मात्तपः कृत्वा सुदुःकरं ॥त्वांचाराध्य जगंनाथ शंकरं लोकशंकरं॥ अवतारयामास नृपः पृथिव्यां धरणीधरं ॥ मयावैयुवयोर्वाक्यादवतारः कृतो भुवि ॥ ये वै ब्रह्महणो लोके ये चान्यगुरुतल्पगाः ॥ त्यागिनः पितृमातृणां ये च स्वर्णहरा नराः ॥ गोघ्ना ये मानुषा लोके तथा ये प्राणिहिंसकाः ॥अगम्यागामि नो ये च येचाभक्षस्य भक्षकाः ॥ येचानृतप्रवक्तारो ये च विश्वासघातकाः ॥ देवब्राह्मणवित्तानां हर्तारो येनराधमाः ॥ वेददेवद्विज स्त्रीणां गुरूणां ये च निंदकाः ॥ ब्रह्मशापेन ये दग्धा ये चैवात्महनो जनाः ॥ भ्रष्टानशनसंन्यासा नियमव्रतवर्जिताः ॥ तथैवापे यपानाश्च स्वगुरोश्चातिवर्तिनः ॥ कृतघ्ना ये स्वपत्नीनां पत्युः प्रियहिते सति ॥वाक्यं चाकुर्वतां पित्रोः प्रतिश्रुत्वा प्रयच्छतां ॥बांध वेषु च दीनेषु करुणा यस्य नास्ति वै ॥ क्षेत्रांबुसेतुभेत्तारो ये पूर्वपथलोपकाः ॥ नास्तिकाः शास्त्रहीनास्तु विप्राः संध्याविवर्जिताः ॥ कृतघ्ना नास्तीकाः क्रूराः कदर्या ये द्विजातयः ॥ रसविक्रयिणो विप्राः पिशुना श्राद्धवर्जिताः ॥ पर्वमैथुनिनो ये च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथा येचाहुताशनाः ॥ सर्वाशिनो ह्यसंतुष्टाः सर्वविक्रयिणो परे ॥ सगोत्रगामिनो ये च तापसागी ामिनोधमाः ॥ तेदि मां प्राप्य मुच्यंते पापसंघैः समावृताः ॥ तत्पापतापतप्ताया मम शर्म न विद्यते ॥ तस्मादहं सर्वधुनीती रेवां पार्थये विभो ॥ तथा कुरु यथा शर्म लभेयं विमलासती ॥ तयैवं पार्थितो देवस्तुष्टः प्रोवाच जान्हवीं ॥ श्रीभगवानु वाच॥ एवंभवतु भद्रं ते यथा त्वं याचसे शुभे ॥ नैर्मल्यं परमं गत्वा सुखिनी त्वं भाविष्यासि ॥ अहमप्यत्र वस्यामि गंगाधरसहायवान्॥ निवासं भज रेवायामिहगंगे मयासह ॥ मम पादयुगं प्राप्ता वह त्रिपथगामिनि ॥ यदाबहूदके काले नर्मदा जलसंभृता ॥ त्वं च सा प्रावृषि यदा भविष्यसि जलाकुला ॥ प्लाव्योभयतटं देवि प्लाव्य मां तीरसंस्थितं ॥ प्लावायिष्यति मत्पादौ शंखं च करसंस्थितं ॥ तदा पर्वशतोद्रिक्तं पर्व वैष्णवसंज्ञितं ॥ न तेन सदृशं किंचिव्द्यतिपातादि संक्रमं ॥ अयने द्वे चेत् न तथा तद्वै पुण्यपरं यथा ॥ तस्मिन्पर्वणि कल्याणि शंखं संस्पृश्य मानवः ॥ स्नानं समाचरेन्तोये मिश्रे गांगेयनार्मदे ॥ शंखंच प्रार्थयेत्तत्र मंत्रेणानेन जान्हवि ॥ पुण्यस्त्वं शंख पुण्यामां मंगलानां च मंगलं ॥ विष्णुना विधृतो यस्मात्तस्माच्छांतिं प्रयच्छमे॥ यएवं प्रार्थयेच्छंखं संस्पृश्य मम पाणिगं ॥ सचांतं पापसंघस्य ध्रुवं प्राप्नोति मानवः ॥ शंखोद्धारे नरः स्नात्वा तर्पयेत्पितॄ देवताः ॥तृप्तास्ते तस्य यच्छेति शताद्वं सिद्धिमुत्तमां ॥ गंगावाहे तु यः श्राद्धं शंखोद्धारे प्रदास्यति ॥ तेन पिंडप्रदानेन ापितरस्तृप्तिमाप्नुयुः ॥ शंखोद्धारे नरः स्नात्वा संपूज्य हरकेशवौ ॥ दत्वा सुवर्णं विप्राय पापसंघैः प्रमुच्यते ॥ तस्मात्त्वं सर्वयत्नेन शंखोद्धारो यतो भवेत् ॥ तदेत्य नर्मदा तीरे नियमव्रतधारिणी ॥ उपोष्य तद्दिनं तत्र संपूज्य हरकेशवौ ॥ रात्रौ जागरणेनाशु विशुद्धा भ व जान्हवी ॥ यत्वं लोककृतं भारं मन्यसे भुवि दुर्द्धरं ॥ तस्मिन्पर्वणि तत्सर्व मागत्येह व्यपोहय ॥ एवमुक्त्वा नृपश्रेष्ठ तत्रैवांतर्दधे हरिः ॥ मार्कंडेय उवाच ॥ तदा प्रभृति राजेंद्र तद्धि तीर्थं प्रचक्षते ॥ ब्रह्माद्यैरृषि भिस्तत्त पारंपर्यक्रमागतैः ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥

CC-0. In Public Domain. Digitization by eGangotri

अग्निष्टोमफलं तस्य जायते नात्र संशयः ॥ तत्र तीर्थे च यः स्नातो भक्तिभावेन भारत ॥ गंगारेवोभयतटे सस्नातो नात्र संशयः ॥ तत्र तीर्थे मृतानां च नराणां भावितात्मनां ॥ गंगारेवाप्रभावेन पुनर्जन्म न विद्यते ॥ इति श्रीरेवा०शंखोद्धारगंगावाहतीर्थनाम नवचत्वारिंशदधिकसततमोऽध्यायः ॥ १४९ ॥ मार्कंडेय उवाच ॥ तस्मात्क्रमशते पार्थ तीर्थं पुण्यं शृणुष्वमे ॥ गौतमेश्वरसंज्ञं तु पापतापापहं परं ॥ महर्षिणा स्थापितं तन्निषु लोकेषु विश्रुतं ॥ गौतमेन तपस्तप्तं तत्र तीर्थे युधिष्ठिर॥दिव्यवर्षसहस्रं तु ततस्तु ष्टो महेश्वरः ॥ पुत्रार्थं च वरं लेभे महेशाद्गौतमो मुनिः ॥ स्थापयामास देवेशं गौतमेश्वरसंज्ञितं ॥ तत्र देवैः सगंधर्वैः ऋषिभिश्च तपोधनैः ॥ प्राप्ता ह्यनुत्तमा सिद्धिराराध्य परमेश्वरं ॥ तुष्टिदं पितृदेवानां सार्वं कामिकमुत्तमं ॥ तीर्थं तीर्थवरं प्राह पुरातत्कश्यपो मुनिः ॥ तत्रतीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः ॥ पूजयेच्च महादेवं सर्वपापक्षयं लभेत् ॥ बहवस्तं न जानंति विष्णुमाया विमोहिताः ॥ तत्र संनिहितं देवं शूलपाणिं सनातनं ॥ ब्रह्मचारी तु यो भूत्वा तत्र तीर्थे नरेश्वर ॥ स्नात्वार्चयेन्महेशानं सोऽश्वमेधफलं लभेत्॥तत्र तीर्थे च यद्दानं भक्त्या विप्राय दीयते ॥ तदक्षयफलं प्राह स्वयमेव प्रजापतिः ॥ मासि चाश्वयुजे कृष्णपक्षे भूतदिने नृप॥स्नात्वा तत्र विधानेन दीपकानां शतं ददेत्॥पूजयित्वा महादेवं गंधधूपनिवेदनैः॥मुच्यते पापसंघातान्मृतः शिवपुरं व्रजेत्॥अष्टम्यां वा चतुर्दश्यां कार्तिके मासि यत्नतः॥उपोष्य प्रयतो भूत्वा घृतेन स्नापयेच्छिवं॥पंचगव्येन मधुना दध्नात्वा शीतवारिणा ॥सर्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः॥भक्त्या यः पूजयेद्देवं उपहारैः पृथग्विधैः॥स लभेत्पुण्यमतुलं भक्तिं मुक्तिं च भारत॥ बिल्वपत्रैरखंडैश्च पुष्पैरुन्मत्तकोद्भवैः॥कुशापामार्गनिर्गुंडीकर्दंबद्रोणजैरपि मल्लिकाकरवीरैश्च रक्तपीतैः सितासितैः॥पुष्पैरन्यैर्यथालाभं यो नरः पूजयेच्छिवं॥नैरंतर्येण षण्मासं गौतमेश्वरसंज्ञितं॥स सर्वकामसंपन्नो मृतः शिवपुरं व्रजेत्॥पितृदेवसमुद्देशे ब्राह्मणान् भोजयेच्च यः ते सर्वे तस्य तृप्यंति न स शोचेत्कृताकृतं ॥ छत्रोपानत्प्रदानेन दिव्यलोके महीयते॥ इति श्रीनर्मदामाहात्म्ये गौतमेश्वरतीर्थं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्कंडेय उवाच॥क्रमद्दादशके तस्माद्गच्छेतीर्थमनुत्तमं॥दशाश्वमेधसंज्ञं तु त्रिषु लोकेषु विश्रुतं॥तत्र गत्वा महाराज स्नात्वा संपूज्य शं
करं ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ युधिष्ठिर उवाच ॥ अश्वमेधो महायज्ञो बहुसंभारदक्षिणः ॥ अशक्यः प्राकृतैः
कर्तुं कथं तद्दशपुण्यभाक् ॥ अत्याश्चर्यमिदं तात त्वयोक्तं तीर्थजं फलं ॥ यथा मे जायते श्रद्धा दीर्घायुस्त्वं तथा वद ॥ मार्कंडेय
उवाच ॥ इदमाश्चर्यभूतं हि गौर्या पृष्टः पुरा हरः ॥ तत्तुभ्यं संप्रवक्ष्यामि पृच्छते निपूणाय वै ॥ पुरा वृषस्थोदेवेश उमया सह
शंकरः ॥ कदाचित्पर्यटन् पृथ्वीं नर्मदातटमागतः ॥ दशाश्वमेधिकं तीर्थं दृष्ट्वा देवो महेश्वरः ॥ तीर्थस्यचांजलिं बध्वा नमश्चक्रे त्रि
शूलधृक् ॥ कृतांजलिपुटं देवं देवी दृष्ट्वेदमब्रवीत्॥श्रीदेव्युवाच॥किमिदं देवदेवेश चराचर नमोस्तुते॥ प्राह्वेनेहांजलिर्बद्धो भक्ति ना
श्यता त्वया ॥ एतदाश्चर्यमतुलं सर्वं कथय मे प्रभो ॥ महेश्वर उवाच ॥ प्रत्यक्षं पश्य तीर्थस्य पुण्यं वै विस्मिता भव ॥ कि
यत्स्थाने भुवि स्वस्य क्षणं दिवि स्थिराभव ॥ एवमुक्त्वा स देवेशो गौरवर्णो द्विजो भवत्॥क्षुत्क्षामकंठो जटिलः शुष्को धमनिसतं
तः ॥ उपाविश्यभुवः पृष्ठे सस्वरं क्रममुच्चरन् ॥ क्रमप्रियो महादेवो माधुर्येण प्रमोदयन् ॥श्रुत्वा तां मधुरां वाणीं स्वयं शर्वेण नि
र्मितां॥संभ्राता ब्राह्मणाः सर्वे स्नातुं तत्रागता हि ये ॥ नित्यक्रिया च सर्वेषां विस्मृता श्रुतिविभ्रमात् ॥ तं दृष्ट्वा पठमानं च क्षु
त्पिपासाभिपीडितं ॥निमंत्रयद्द्विजः कश्चित् भक्त्या तं भोजनाय वै ॥ प्रसादं कुरु विप्रेंद्र भोजनाय गृहे मम ॥ अद्य मे सफलं ज
न्म अद्य मे सफलाः क्रियाः ॥ सर्वान्कामान्प्रदास्यंति प्रीता मह्यं पितामहाः ॥ त्वयि भुक्ते द्विजश्रेष्ठ प्रसीदातः कृपानिधे॥मार्कंडे
य उवाच ॥ एवमुक्तो महादेवो द्विजरूपधरस्तदा प्रहसन्प्रत्युवाचेदं ब्राह्मणं श्लक्ष्णया गिरा ॥ देव उवाच ॥ मया
वर्षसहस्रं तु निराहारं तपः कृतं ॥ इदानीं पारणं तस्य करिष्ये वेश्मनि द्विज ॥ अश्वमेधैहि दशाभिर्येनेष्टं तु भवि
ष्यति ॥ इत्युक्तो द्विजरूपेण ब्राह्मणो विस्मयान्वितः ॥ उत्तमांगंविधुन्वानो जगाम स्वगृहं प्रति॥ तेनैवं बहवो विप्राः प्रत्याख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ता निमंत्रणैः ॥ पुराणार्थं न जानंति मूढाः संदेहमाश्रिताः ॥ अथ कश्चिद्द्विजो विद्वान् पुराणार्थं हि तत्ववित् ॥ देवं निमंत्रयामा
स द्विजरूपधरं शिवं ॥ तथैव सोपि देवेनप्रोक्तः प्राहेति तं पुनः ॥ विचिंत्य मनसा सत्यं पुराणोक्तं द्विजोत्तमः ॥ वेदस्मृतिपुराणे
षु यथोक्तं तत्तथा ध्रुवं ॥ इति निश्चित्य तं विप्रमुवाच प्रहसन्निव ॥ भोभोविप्र प्रतीक्षस्व यावदागमनं मम ॥ इत्युक्त्वा स ततो
गत्वा दशाश्वमेधिकं पुरं ॥ स्नानं मृदाद्यालभनात्कृतं तीर्थे द्विजन्मना ॥ जपश्राद्धार्चनं दानं कृत्वा वित्तानुसारतः ॥ संक्षिप्ता क
पिला तत्र पुराणोक्तविधानतः ॥ समियात्त्वरितस्तत्र यत्रासौ तिष्ठते द्विजः ॥ अथागत्य द्विजः प्राह वाजिमेधैर्मयेजितं ॥ उत्तिष्ठ
द्वि गृहं मह्यं भोजनार्थं द्विजोत्तम ॥ इत्युक्तः शंकरस्तेन ब्राह्मणेनातिविस्मितः ॥ उवाच ब्राह्मणं देवो ब्रूहीदानीं गतोभगवान् ॥ क
थमिष्टा द्विजश्रेष्ठ वाजिमेधमखा दश ॥ विधिश्रेष्ठ्यसमायुक्ता महासंभारसंभृताः ॥ धनान्नदानबहुला बहुदक्षिणयान्विताः ॥ ब्रा
ह्मणउवाच ॥ न विचारस्त्वया कार्यः कृता यज्ञा मयानघ ॥ यदि वेदाः प्रमाणं वो धर्मो देवा जातथा ॥ दशाश्वमेधिकं
तीर्थं ततः सत्यं द्विजोत्तम ॥ यदि वेदपुराणोक्तं वाक्यं निःसंशयं भवेत् ॥ कृतवस्तेन इष्टा मे नात्र कार्या विचारणा ॥ एवमुक्तः
स देवेश अस्तिक्यं तस्य चेतसः ॥ विमृश्य बहुधा किंचिदुत्तरं न प्रपद्यते ॥ जगाम तद्गृहं साधु पठन् ब्रह्म सनातनं ॥ संप्राप्तं
तं द्विजो भक्त्या पादार्घेण सर्चयेत् ॥ षट्रसं भोजनं तेन दत्तं तस्मै यथाविधि ॥ तथा भुक्ते महादेवे सर्वलोकमये शिवे ॥ पु
ष्पवृष्टिः पपाताशु गगनात्तस्य मूर्द्धनि ॥ तस्यास्तिक्यं तु संलक्ष्य तुष्टः प्रोवाच शंकरः ॥ महेश्वरउवाच ॥ किंतेद्य क्रियतां ब्रूहि
वरदोहं द्विजोत्तम ॥ अदेयमपि दास्यामि त्वेकचित्तस्यते ध्रुवं ॥ब्राह्मणउवाच॥ यदि प्रीतोसि मे देव यदिदेयो वरो मम ॥ अ
त्र तीर्थे महादेव स्थातव्यं सर्वदैवहि॥उपकाराय लोकानामेष मेवर उत्तमः॥एवमुक्तः सदेवेशस्तथेत्युक्त्वा द्विजं प्रति॥दशाश्वमेधिके
ह्यां च मुक्त्वा प्रोवाच तं पुनः ॥ आत्मानं प्रकटीकुर्वन्स।क्षाद्रुद्रः सनातनः ॥ देवउवाच ॥ गच्छपुण्यकृतांल्लोकान् दशाश्वमेध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याजिनां ॥ दिव्यं विमानमारुह्य वीज्यमानोप्सरोगणैः ॥ एवमुक्तस्तु देवेन समारोहद्विजोत्तमः ॥ गंधर्वाप्सरसां संघैः सं
बाधं सार्वकामिकं ॥ पूज्यमानो गतस्तत्र यत्रदेवः सनातनः ॥ एवमाश्चर्यभूतं हि दृष्ट्वा देवी शुचिस्मिता ॥ विस्मयोत्फुल्लनय
ना पुनःप्रोवाच शंकरं॥ श्रीदेव्युवाच॥ कथं ते तद्भवेत्सत्यं यत्रेदमसमंजसं ॥ स्नानं कुर्वंति बहवो लोकाह्यत्र महेश्वर ॥ तेषां न
स्वर्गगमनं यथैकः स्वर्गतिं गतः ॥ कथमेतत्समाचक्ष्व विस्मयः परमो मम ॥ एतच्छ्रुत्वा सदेवेशः प्रहसन्प्रत्युवाचह ॥ ईश्वरउवा
च ॥ वेदवाक्ये पुराणार्थे स्मृत्यर्थे द्विजभाषिते ॥ विस्मयो नैव कर्तव्यो ह्यनुमान्यं हि तत्तथा ॥ असंभाव्यं हि लोकानां पुराणे
यत्तु गीयते ॥ तत्र संशेरते मूढा हैतुका धर्मनिंदकाः ॥ यदि पक्षंपुरस्कृत्य लोकाः कुर्वंति पार्वति ॥ तस्मान्न सिद्धिरेतेषां भवत्यत्र
न संशयः नास्तिक्याद्भिन्नमर्यादा ये निश्चयबहिष्कृताः ॥ तेषां न विद्यते सिद्धिरास्तिके सिद्धिरुत्तमा ॥ पुराणं पंचमो वेद अज्ञेयं
परमेश्वरी ॥ प्रमाणमेव तत्कार्यं न विचारोस्ति कश्चन ॥ श्रुत्वाख्यानमिदं देवी पवित्रं चित्रमुत्तमं ॥ शिवस्य वक्त्रकमलाद्भवं दे
तीर्थमुत्तमं ॥ सर्वपापहरं दिव्यं नर्मदोत्तरतीरगं ॥ मार्कंडेय उवाच ॥ दशाश्वमेधमेतद्धै सर्वतीर्थमयं शुभं ॥ तीर्थं सर्वगुणोपेतं
महापातकनाशनं ॥ प्रियव्रतस्य राज्ञो हि प्रीत्या पूर्वं तु वेधसा ॥ दशानामश्वमेधानां स्नानादेवास्तु यत्फलं ॥ तत्राग
ता महाभागा स्नातुकामा सरस्वती ॥ पुण्यानां परमा पुण्या नदीनां प्रवरा नदी ॥ नाममात्रेण यस्यास्तु सर्वपापैः
प्रमुच्यते॥पित्रा हिरण्यगर्भेण तत्र प्रस्थापिता सुता ॥स्वांशेन सा स्थिता तीर्थे विधिवाक्यन्नृपोत्तम ॥ स्नातास्तत्र दिवं
यांति ये मृतास्तेऽपुनर्भवाः ॥ दशाश्वमेधतीर्थे सा नियता ब्रह्मचारिणी॥ आराधयित्वा देवेशं पवित्राणां पुरोभवत् ॥कालुष्यं ब्रह्म
संभूता संवत्सरसमुद्भवं ॥ प्रक्षालयितुमायाति दशम्यामाश्विने सिते ॥ उपोष्य रजनीं तां तु संपूज्य त्रिपुरांतकं ॥ प्रातर्निः कल्म
षा याति राजन्स्वपदमुत्तमं॥ युधिष्ठिर उवाच ॥ सरस्वती महापुण्या नदीनामुत्तमा नदी॥ दशाश्वमेधिके स्वामिन्स्नातुं याति स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रित्सदा ॥ किमाधिक्यं भवेत्तीर्थे दशम्यां तत्र संगमे ॥ मार्कंडेय उवाच ॥ राजन्नश्वयुजे मासि दशम्यां तद्विशिष्यते ॥ पार्थिवेषु च तीर्थेषु सर्वेष्वेव न संशयः ॥ दशम्यामधिके राजन् नित्यंसा दशमी शुभा ॥ विशेषादाश्विने मासि शुक्ला पापौघनाशिनी ॥ तस्यां यस्तर्पयेद्देवानुपवासपरायणः ॥ श्राद्धं कृत्वा विधानेन पश्चात्तं पूजयेध्रुवं ॥ तत्रस्थां पूजयेद्देवीं स्नातुकामां सरस्वतीं ॥ नमोनमस्ते देवेशि ब्रह्मपुत्रि जगद्धिते ॥ कुरु पापक्षयं मेद्य संसारान्मां समुद्धर॥ गंधधूपार्घनैवेद्यैः पूजयित्वा पुनःऽपुनः ॥ दत्वा दक्षिणाः कृत्वा[1] सूत्रेण परिवेष्टयेत् ॥ कपिलां तत्र विप्राय दद्याद्विगतमत्सरः ॥ सर्वलक्षणसंपूर्णां सर्वोपस्करसंयुतां॥दत्वा वै कपिलां विप्रे न शोचति कृताकृते ॥ पश्चात् जागरणं कुर्यात् घृतेनोज्वाल्य दीपकं ॥ गीतनृत्यविनोदैश्च पुराणाख्यानकैस्तथा ॥ प्रभाते विमले पश्चात्स्नायाद्वै नर्मदाजले ॥ ब्राह्मणान् भोजयेच्छक्त्या शिवभक्तांश्च योगिनः ॥ एवं कृते ततो राजन्सम्यक्तीर्थफलं लभेत् ॥ तत्र तीर्थे च यः स्नात्वा पूजयेच्छंकरं नरः ॥ दशाश्वमेधावभृथं लभते पुण्यमुत्तमं ॥ पूतात्मा तेन पुण्येन शक्रलोकं स गच्छति ॥ आरूढः परमं यानं कामगं शुभलक्षणं ॥ तत्र दिव्याप्सरोभिश्च वीज्यमानोथ चामरैः ॥ क्रीडते सुचिरं कालं जयशब्दादिमंगलैः॥ततोवतीर्णः कालेन राजराडिह जायते॥हस्त्यश्वरथसंपन्नो भोगवान् चिरजीविचः॥दशाश्वमेधे यद्दानं दीयते शिवयोगिनां ॥ दशाश्वमेधफलदं जायते नात्रसंशयः ॥ सर्वेषामेव यज्ञानामश्वमेधो विशिष्यते ॥ दुर्लभः स्वल्पवित्तानां भूरीणां पाप कर्मण ॥ अकामो वा सकामो वा मृतस्तत्र नरेश्वर ॥ देवत्वं प्राप्नुयात्सोपि नात्र कार्याविचारणा ॥ अग्निप्रवेशं यः कुर्यात्तत्र तीर्थे नराधिप ॥ अग्निलोके वसेत्तातद्यायदाहुतसंप्लवं ॥ जलप्रवेशं यः कुर्यात्तत्र तीर्थे युधिष्ठिर ॥ ध्यायमानो महादेवं वारुणं लोकमाप्नुयात् ॥ दशाश्वमेधे यः कश्चित् गुरवृत्या तनुंत्यजेत् ॥ अक्षया तु गतिस्तस्य इत्येवं श्रुतिदर्शनैं ॥ न तां गति यांतिं भृगुप्र

१ (सरस्वती)

पातिनो न दंडिनश्चैव न सांख्ययोगिनः ॥ तस्मिंस्कृते दुंदुभिशंखनादिनः क्षणेन ते यांति महाहवे हतः॥यत्र तत्र हतः शूरः श
क्षुभिः परिवेष्टितः ॥ अक्षयान् लभते लोकान् यदि क्लिबं न भाषते ॥दशाश्वमेधे सन्यासं यः करोति विधानतः ॥ अनिवर्तिका गां
तिस्तस्य रुद्रलोकात्कदा च न ॥ दशाश्वमेधमहात्म्यं संक्षेपेण युधिष्ठिर ॥ कथितं ते सुभक्ताय सर्वपापप्रणाशनं ॥ न त
स्य विस्तरं वक्तुमन्ये ब्रह्मापि न क्षमः ॥ इति श्रीवायूक्तशिवसंहितायां नर्मदामाहात्म्ये दशाश्वमेधतीर्थनामपंचाशदधिक
शततमोध्यायः ॥ १५० ॥ मार्कंडेय उवाच॥अतः परं प्रवक्ष्यामि भृगुतीर्थमनुत्तमं ॥ स्थितं दशाश्वमेधाद्वै तदशीतिक्रमांतरे ॥ वि
स्तरं तस्य भूपाल वक्तु ब्रह्मादयोक्षमाः ॥ संक्षेपेण नृपश्रेष्ठ श्रृणुष्वत्वं समाहितः ॥ यं श्रुत्वा ब्रह्महा गोघ्नो मद्यपोगुरुतल्पगः ॥
स्तेयीद्रोही गुरूणांच मुच्यते पातकैर्नरः ॥तत्र तीर्थे सुविख्यातं वृषखातामिति श्रुतं॥भृगुणा तत्र राजेंद्र तपस्तप्तं पुरा किल॥युधिष्ठिर
उवाच ॥ भृगुः क एष विप्रेंद्र कस्यपुत्रः स किंस्थितः ॥ तपस्तप्त्वा सुविपुलं परांसिद्धिमुपागतः ॥ कोवा वृषस्त्वया प्रोक्तस्तत्खातं
येन निर्मितं ॥ एतत्सर्वं यथा न्यायं कथयस्व ममानघ॥मार्कंडेय उवाच॥एष प्रश्नो महाराज यस्त्वया परिपृच्छतः॥ तत्सर्वं ते प्रव
क्ष्यामि श्रृणुष्वै कमना धुना ॥ एषस्तु मानसः पुत्रो ब्रह्मणो द्विजसत्तम ॥ तपश्चचार विपुलं श्रीभृगुक्षेत्र उत्तमे ॥ दिव्यं वर्षसहस्त्रं
तु शुष्को धमभिसंततः॥निराहारो निरानंदः काष्ठपाषाणवत्स्थितः॥ ततः कदाचिद्देवेशो विमानवरमास्थितः ॥ उमया सहितः श्री
मान् आययौ ते नवर्त्मना ॥ दृष्ट्वा तत्र महात्मानं भृगुं वल्मीकवत्स्थितं ॥ उवाच देवी देवेशं किमेतद्दृश्यते प्रभो ॥ महेश्वर उवा
च॥ भृगुर्नाम महादेवी ब्रह्मणो मानसः सुतः ॥ किंचिन्मनासि संचिंत्य तपस्तप्यति दारुणं ॥ दिव्यं वर्षसहस्त्रं तु ममध्यानप
रायणः ॥ तत्श्रुत्वा वचनं देवी क्रोधसंवर्त्तितेक्षणा ॥ उवाच तत्र देवेशं शूलपाणिं महेश्वरं ॥ श्रीदेव्यु उवाच ॥ सत्यमुक्तो २६४
॥सि देव त्वं लोकेस्मिन् वृषभध्वज ॥ निर्दयोसि दुराराध्यः सर्वभूतभयंकरः ॥ दिव्ये वर्षसहस्त्रं यत्ध्यायमानाय शंकर ॥ ब्राह्मणा

CC-0. In Public Domain. Digitization by eGangotri

य वरं देव नप्रयच्छसि धूर्जटे ॥ द्विवाधीनं जगच्छंभो मंत्राधिनाः सुरास्तथा ॥ मंत्राश्च वाडवाधीना तस्माद्देवाद्विवाडवाः ॥ पूज्या
श्च भवतोपीह महादेव द्विजोत्तमाः ॥ तेष्ववज्ञा न साध्वी स्यादिति ब्रुते सदा भवान् ॥ एवमुक्तो महादेवः प्रहस्य गिरिनंदिनी
म्॥उवाच नृपशार्दूल मेघगंभीरया गिरा ॥ महेशउवाच ॥ स्त्री विनश्यति गर्वेण तपः क्रोधेन नश्यति ॥ गावो दूरप्रचारेण शू
द्रान्नेन द्विजातयः ॥ क्रोधाधिको द्विजो गौरी तेन सिद्धिर्न विद्यते ॥ पापोयमरिषड्वर्गस्तत्र क्रोधोतिरिच्यते ॥ नासि
द्धिः क्रोधलोभाढ्ये वेदवाक्यमवेहि तत् ॥ वर्षायुतैर्वा लक्षैर्वा प्रिये तान्यद्धिकारणी ॥ एवं भतस्य विप्रस्य क्रो
धोत्थचरितं महत् ॥ प्रमाणं पश्य तस्य त्वं देवि क्रोधस्य सांप्रतं ॥ एवमुक्त्वा महादेवो वृषं सस्मार भारत ॥
वृषोद्धि भगवान् धर्मो वृषरूशे महेश्वरः ॥ ध्यातः प्राप्तः क्षणेनैव जगर्ज च मुहुर्मुहुः ॥ प्रणम्य पुरतो देवमुवाच विनयान्वितः ॥
किं करोमि सुरश्रेष्ठध्यातः केनात्र हेतुना ॥ करोमि कस्य निधनं प्रसादं वा महेश्वर ॥ शीघ्रं समादिशात्तस्. किंकरस्याद्य मे वि
भो ॥ महेश्वरउवाच ॥ कोपयस्व द्विजश्रेष्ठं गत्वा त्वं तापसं भृगुं ॥ येनेह श्रद्दधात्येषा गौरी लोकांबिका वृष ॥ एतच्छ्रुत्वावृषः
प्राप्तो धर्षणार्थं भृगोस्तदा ॥ नर्मदायास्तटे रम्ये भृगोस्तत्राश्रमांतिके ॥ मुमोच च महानादं खुरैः क्षोणीं लिखन् वृष ॥ श्रृंगाग्रे
ण ततः क्षिप्तौभृगुर्वै नर्मदाजले ॥ एवं क्रुद्धो भृगुस्तत्र दंडहस्तोभ्यधावत ॥ पशोरस्याद्य दास्यामि घातं दंडेनमस्तके ॥ ततः शि
खोपवीतादि परिधानं च पार्थिव ॥ तदाशु संवृतं तेन पृष्ठतो धावतो जवात् ॥ भृगुरुवाच ॥ पापकर्मन् दुराचार कथं यास्यसि
मे वृष ॥ अवमानं ममोत्पाद्य कृत्वा गर्त्तं खुरैः पुरः ॥ गर्जित्वेह महानादं क्षिप्तोहं ब्राह्मणो जले ॥ तिष्ठ तिष्ठ दुराचार न मे
जीवन्विमोक्षसे ॥ मार्कंडेय उवाच ॥ ज्ञात्वा प्रक्षिप्तमात्मानं वृषेनाथ भृगुस्तदा ॥ क्रोधेनातीव जज्वाल हुताहुतरिवानलः ॥
करे गृह्य महादंडं ब्रह्मदंडमिवापरं ॥ हंतुकामो वृषं विप्रो प्रधावन्नृपसत्तम ॥ धावमनं ततो दृष्ट्वा तं वृषं पूर्वसागरं ॥ जंबुद्वीपं कु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्रौंचं शाल्मलं शाकमेव च ॥ गोमेदं पुष्करं प्राप्तः पूर्वतो दक्षिणापथं ॥ उत्तरं पश्चिमं चैव द्वीपाद्वीपं नरेश्वर ॥ पातालं सुतलं
पश्चान्नितलं च महातलं ॥ गभस्तिमच्च तामिस्रं पातालं सप्तमं ययौ ॥ अतिक्रम्य च भूर्लोकं भुवर्लोकं च भारत ॥ महर्जनः तपः
सत्यं प्राणार्थी स वृषोत्तमः ॥ अन्वीयमानो विप्रेण न शर्म लभते क्वचित् ॥ पापं कृत्वेव पुरुषः कामक्रोधबलार्दितः ॥ ततो ज
गाम शरणं ब्रह्माणं विष्णुमेव च ॥ शक्रं सोमं तथादित्यं यमं वरुणमारुतौ ॥ सर्वैरेव तदा त्यक्तो लोकालोकैः सुरासुरैः ॥ त
तः शिवं समासाद्य नमस्कृत्य च विव्हलः ॥ अब्रवीद्रक्ष रक्षेति ब्राह्मणान्मां महेश्वर ॥ लिंगिनं च गुरुं गां च ब्राह्मणं नृपतिं स्त्रि
यं ॥ मूर्खं बालं च सर्पं च कोपयंति न पंडिताः ॥ मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः ॥ चक्रात्तीव्रतरो मन्युस्तस्माद्विप्रान्न कोप
येत् ॥ वध्यमानं महादेव भृगुणा परमेष्ठिना ॥ सर्वलोकैः परित्यक्तमनाथमिव मां प्रभो ॥ मार्कंडेय उवाच ॥ दृष्ट्वा श्रांतं वृषं
देवो लुठंतं चरणाग्रतः ॥ ततो देवीमुवाचेशः स्मित्वा विप्रस्य चेष्टितं ॥ पश्य पश्य विशालाक्षि शमं विप्रस्यया दृशं ॥ अतस्तवो
क्तं हि मया विप्रः कोपकदर्थितः ॥ श्रीदेव्युवाच॥विप्रोसौ नावयोर्यावन्कुप्यते परमेश्वर ॥ तावद्वरं प्रयच्छाशु मम चेदिच्छसि प्रियं
॥ मार्कंडेय उवाच॥ पार्वत्या वचनाद्रुद्रः प्रतिश्रुत्य तथास्थितिः॥ततो भस्मिजटी शूली चंद्राकृतशेखरः ॥ उमार्द्धदेहो भगवानुवाच
भृगुमंजसा ॥ ईश्वरउवाच ॥ भो भो भृगो द्विजश्रेष्ठ क्रोधस्थानं भविष्यति ॥ ततो दृष्ट्वा ग्रतः शंभुं देवदेवं त्रिलोचनं ॥ जानु
भ्यामवनिं गत्वा भृगुस्तोत्रमिदं जगौः॥भृगुरुउवाच॥प्रणिपत्य भूतनाथं भवोद्भवं भूतिदंभव्यं॥भवभीतो स्तौतुभुवनपतेंत्वां किंचिदिच्छा
मि ॥ त्वद्गुणनिकरान् वक्तुं नहि शक्तो भवति मादृशो नाम ॥ शेषोहरिपि वदति न यान् वदनसहस्रं भवेद्यस्य ॥ भक्तिस्तथापि
शंकर मुखरयति त्वत्सुतो महेशान ॥ स्तुतिमुखरस्य ममाद्य प्रसीद तव चरणपतितस्य॥ सत्वं रजस्तमसस्त्वंस्थित्युत्पात्तो लये च
देवेश ॥ त्वांमुक्त्वा भुवनपते भुवनेस्मिन्नैव दैवतं किंचित् ॥ यमनियम यज्ञावितरणं वेदाभ्यासाश्च धारणायोगः ॥ त्वद्भक्तेः सर्वमिदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नार्हति नू सहस्रांशं ॥ उत्कृष्टरसानयनखट्वांजनविवर पादुकासिद्धौ ॥ चिन्हं हिं तव नतानां प्रदृश्यते जन्मनि प्रकट ॥ यदि शाठ्य न प्रणमति वितरसि तयसपि वांछितं त्वमिनं ॥ भवति भवच्छेदकरो भक्ति र्मोक्षाय निर्मिता सत्या ॥ परदारं परस्वरतं प रपपरिभवदुःखशोकसंततं ॥ परवदनवीक्षणपरं परमेश्वरमामविनयाद्रक्ष ॥ मिथ्याभिमानदग्धं क्षणभंगुरतनुविलासपसक्तं ॥ क्रूरं कुपथामिमुखं पदतलपतितं तु पाहि मां शंभो ॥ हीनाद्विजजनसार्थे बंधुजने वहुदुष्टाशं ॥ तृष्णां कुरं विनाशाय किमुठवां विडंवसे नाथ ॥ हर तृष्णां हर शीघ्रं लक्ष्मींप्रददस्व सुस्थिरां मह्यं ॥ छिंधि मदमोहपाशान् भव मे शरणं सदैव दुर्वारिं ॥ एकस्त्वं मेवे देवो भुक्तर्मुक्तेश्च दानवान् जगति ॥ नान्यं मान्यं मन्ये सृष्टं संहर्तुमस्य यः शक्तः ॥ मुढास्तएत्र लोकास्त एव ।निरयाय नाथ सुचिराय ॥ येषां न भवति चिंत्तं भवति सपर्यार्थमीश वा ध्यातुं ॥ मन्यंतु सा मन्यतु या लोको मूढ स्तयाप्यमाने त्वं॥क्रियतेन किंचिदार्तै प्रभुणा लालयति भृत्यवर्गे स्वे ॥ करुणाभ्युदयनाम्ना स्तोत्रमिदं सिद्धिशासनं दिव्यं ॥ यः पठति भक्तियुक्तस्तस्य तुष्येद्भृगोरिवेशा नः ॥ मार्कंडेय उवाच ॥ एवं स्तुत्वा महादेवस्तोत्रं हि भृगुभाषितं ॥ उवाच वरदो स्मीति सह देव्या सुरोत्तम ॥ भृगुं प्रति प्रस न्नात्मा याचस्वेतितमब्रवीत् ॥ भृगुः प्रसन्नं तं मत्वा महादेवमयाचत भृगुरुवार्ष॥प्रसन्नो यदिदेवेश यदि देयो वरोमम ॥ सिद्धिक्षेत्र मिदं स्थानं भवतान्मम नामतः ॥ त्वया च सांनिधौ स्थेयमिह चैवोमया सह ॥ देवक्षेत्रमिदं पुण्यं येन सर्वं हि सिध्यति ॥ रे वातीरस्य कच्छोयं मम नाम्ना सुविश्रुतः ॥ अत्र कच्छे महास्नानं करोमि जगदीश्वर ॥ मनोरथोयं मे देवपूर्यतां त्वत्प्रसादतः ॥ महेश्वर उवाच ॥ श्रिया वृतमिदं पूर्वं किं न ज्ञातं त्वया द्विज ॥ अनुमान्य श्रियं देवीं यथावन्मन्यते भवान् ॥ करोतु यदभि प्रेतं त्वत्क्षेत्रं न तदन्यथा ॥ एवमुक्त्का गते देवे स्नात्वा गच्छद्भृगुः श्रियं ॥ कृत्वा च पारणं तत्र वसन्विप्रस्तया सह ॥ स श्रिया

१ (विशेषरसज्ञानंवानुज्ञानं)

CC-0. In Public Domain. Digitization by eGangotri

सहितः काले विप्रः प्रादेदमादरात् ॥ भृगुरुवाच ॥ यदि ते रोचते भद्रे सुखासीनं च ते यदि ॥ त्वयावृते महाक्षेत्रे स्वस्थानं च
करोम्यहं ॥ श्रीरुवाच ॥ मम नाम्ना च तातेदं तव नाम्ना च शोभनं ॥ स्वस्थानं कुरु विप्रर्षे अविरोधेन मे यदि ॥ भृगुरु वाच
॥ कच्छपाधिष्ठितं ह्येतत्तस्य पृष्ठिगतं शुभं ॥ संमंत्र्य सहतेनात्र शोभनं जायते कृतं ॥ चलनं दृश्यते भूमेः संप्राप्ते वै युगक्षये ॥
वासुदेवांशभूते तु कच्छपे ह्यचलं भवेत् ॥ मार्कंडेय उवाच ॥ ततो भगुश्रियौ पार्थ सहितौ कच्छपं गतौ ॥ अभिनंद्य यथावत्तमू
चतुः कच्छपं वचः ॥ त्वाया धृता धरा सर्वा तथा लोकाश्चराचराः ॥ सदा त्वं पुण्यभावत्वात् स्थिर स्थितः इलातले ॥ इद क्षेत्र
मिदं स्थानं तव पृष्ठगतं यतः ॥ अतत्वां प्रार्थयावोद्य तदूरीकुरु सत्तम ॥ चतुर्विधंद्विजस्थानं करिष्यामि श्रिया सह॥यदित्थं मन्य
से देव तदादिश ममोच्चयीः ॥ कूर्मउवाच ॥ एवमस्तु द्विजश्रेष्ठ मम नामांकितं पुरं ॥ भविष्यति चिरं कालं मत्पृष्ठस्थायि सुस्थिरं
॥ स्वाचारं सुस्थितं पुण्यं नथीः कार्या विलंबने ॥ एवं चेत्क्रियते विप्र तत्कार्य मविशंकितं ॥ मार्कंडेय उवाच ॥ एतच्छ्रुत्वा शुभं
वाक्यं कच्छपस्य मुखात् च्युतं ॥ जुष्टस्तुष्टः श्रिया सार्द्धं पद्मयोनिसुतो भृगुः ॥ अभीचेरुदये प्राप्ते कृतकौतुकमगलः ॥ नंदने वत्स
रे माघे पंचम्यां शुक्लपक्षतः ॥ शस्ते तथोत्तरायोगे कुंभस्थेंदौ नृपोत्तम ॥ रेवाया उत्तरे तीरे गभीरे चारिभिचारिणि॥प्राप्रदक्ष्या
वणे देशे तीर्थकोटिविभूषितं ॥ क्रोशप्रमाणं तत्क्षेत्रं प्रासादशतसंकुलं ॥ अचिरेणैव कालेन तपोबलसमन्वितः ॥ विचिंत्य विश्वक
र्माणं चकार मुदितो भृगुः ॥ ब्राह्मणा वेदविदुषः क्षत्रियाः क्षत्रसंयुताः ॥ वैश्यवृत्तिरता वैश्याः शूद्राः श्रूषकास्त्रि
षु ॥ एवं श्रिया वृतं क्षेत्रं परमानंदनंदितं ॥ निर्मितं भृगुणा तात सर्वपातकनाशनं ॥ इतिभृगुकच्छोत्पत्तिः ॥ मार्कंडेय उवाच॥
ततः कालेन महता कस्मिंश्चित्कारणांतरे ॥ देवलोकं जगामाशु लक्ष्मी ऋषिसमागमे ॥ समर्प्य कुंचिकां तालं भृगवे ब्रह्मवादिने
॥ स्थानं मे पालयस्वेति ब्रह्मन्नुक्तुजगाम सा ॥ देवत्कार्याण्यशेषाणि कृत्वा श्रीः पुनरागता ॥ भृगुकच्छं महापुण्यं कोटितीर्थसम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्वितं ॥ ययाचे कुंचिका तालं स्वग्रहं सपरिछदं ॥ यदा तदा भृगुः पार्थ तां मिष्येस्यवदमुनिः ॥ एवं विवादः संजातो गरीयांस्तु गरीयसोः ॥ ममेति वै ममेवेति न ते स्थानं न तेतिच ॥ एवं कालेन महता भृगुः परममन्युमान् ॥ चातुर्विद्यप्रमाणार्थं चकार महतीं गिरं ॥ भृगुरुवाच ॥ अस्मदीयं यथा सर्वं नगरं पुत्रि सुव्रते ॥ चातुर्विद्या द्विजाः सर्वे तथा जानंति पृच्छ तान् ॥ श्रीरुवाच ॥ धर्मः सत्यं च शास्त्राणि सर्वं विप्रेषु वै स्थितं ॥ विश्वमेतत् द्विजाधीनं सत्याधाराहि वाडवाः ॥ नब्राह्मणात्परो देवो न धर्मो बाथ बांधवाः ॥ पतंतं नरके घोरे वचनाद्योभिरक्षति ॥ ब्रह्मविष्णुशिवादीनां प्रमाणं ये द्विजोत्तमाः ॥ न कस्य वंद्यामान्याश्च पूजनीयाश्च ते भृगो ॥ प्रमाणं मम ते तात चातुर्विद्या न संशयः ॥ मदीयं वा त्वदीयं वा कथयंतु द्विजोत्तमाः ॥ सत्यं हि तपसो मूलं सत्यं साध्वीषु संस्थितं ॥ ब्रह्मवादिषु विप्रेषु सत्ये सर्वं प्रतिष्ठितं ॥ वदंत्विह द्विजश्रेष्ठाश्चातुर्विद्या यथास्थितं ॥ मार्कंडेय उवाच ॥ ततः सर्वेपि ते तत्र संप्रधार्य परस्परं ॥ द्विधा चापि कलीं दृष्ट्वा ब्राह्मणा ह्यनृतं वचः ॥ अष्टादशसहस्राणि नावोचत्किंचिदुत्तरं ॥ अष्टादशसहस्रैश्च भृगुकोपभयान्नृप ॥ उक्तं तालकहस्तोयस्तस्येदं स्थानमुत्तमं ॥ एतच्छ्रुत्वा रमा देवी नगरं नैगमैः सह ॥ क्रोधेन महता क्रांता शशाप द्विजपुंगवान् ॥ श्रीरुवाच ॥ यस्मात्सत्यं समुत्सृज्य लोभोपहतमानसैः ॥ लुप्तं मे स्थानमनृतैस्तस्माच्छृण्वंतु मे गिरं ॥ न भविष्यति वो विद्या धनं च पुरुषत्रयं ॥ य द्वितीयं तथा वेदं पठिष्यंति द्विजाहिवः ॥ गृहाणि न द्विभौमानि न च भूतिः स्थिरा द्विजाः ॥ पक्षपातकृतो धर्मो न च नैश्रेयसः कृतः ॥ दृष्ट्वा गोत्रजने किंचित् लोभेनावृतमानसाः ॥ न च द्वैधं परित्यज्य स्वैकमत्यं भविष्याति ॥ अद्य प्रभृति सर्वेषामहंकरो द्विजन्मनां ॥ न पिता पुत्रवाक्यार्थी पुत्रो वा पितृवाक्यकृत् ॥ अहंकाररताः सर्वेप्येवमुक्त्वा दिवं ययौ ॥ ततो गतायां लक्ष्म्यां वै देवा ब्रह्मर्षयोमलाः ॥ क्रोधलोभहतं स्थानं तेपि मुक्त्वा दिवं ययुः ॥ गतान् दृष्ट्वा ततो देवान् ऋषींश्चापि तपोधनान् ॥ परमेष्ठी भृगुः सोथ विषादमगमत्परं ॥ प्रसाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 यामास पुनः शंकरं त्रिपुरांतकं ॥ तपसा महता पार्थ ततस्तुष्टो महेश्वरः ॥ उवाच वचनं तत्र हर्षयन् भृगुमुत्तम ॥ ईश्वर उवाच॥
 किंविषण्णोसि विप्रेंद्र किंवा संतापकरणं ॥ मयि प्रसन्नेपि तव ब्रूह्येतत्सर्वमंजसा ॥ भृगु रुवाच ॥ शश्वास्थानं द्विजाश्चापि ल
क्ष्मी कोपाद्दिवं गता ॥ अयोग्यमिति मन्वानाः स्थानं देवर्षयो गताः ॥ किं करोमि क्व गच्छामि कथं मे स्थानयोग्यता॥प्रसादितो
ह्यतः शर्व वरमेनं ददस्व मे ॥ महेश्वर उवाच ॥ पुरा मया यथा प्रोक्तं तत्तथा न तदन्यथा ॥ क्रोधस्थानं न संदेहस्तथान्यदपि
मे शृणु ॥ अत्रस्थानसमुद्भूता महद्भयविवर्जिताः॥ब्राह्मणा मत्प्रसादेन भविष्यंति न संशयः ॥ वेदविद्याव्रतस्नाताः सर्वशास्त्रविशा-
रदाः ॥ येपि ते शतसाहस्रा अन्यतो ह्यागतास्त्विह ॥ अपठस्यापि मुर्खस्य सर्वावस्थागतस्य च ॥ उत्तरादुत्तरं शक्तो दातुं कोपि न
वै भृगो ॥ पुण्यात्पुण्यमिदं स्थानं तीर्थकोटीनिषेवितं ॥ अद्यप्रभृतिविप्रेंद्र भविष्यति न संशयः ॥ मत्प्रसादाद्देवगणैः सेवितं च भ
विष्यति ॥ भृगुक्षेत्रं मृतानां तु कृमिकीटादिपक्षिणां ॥ वासः श्रेष्ठः शिवे लोके युगमेकं भविष्यति ॥ वृषखाते नरः स्नात्वा पूजये
न्मां हि यो भृगो ॥ सर्वमेधस्य यज्ञस्य फलं प्राप्नोत्यसंशयं ॥ भृगुतीर्थे नरः स्नात्वा तर्पयेद्यः सुरान्पितॄन् ॥ तस्य ते द्वादशाब्दानि
तृप्तिं गच्छंति तर्पिताः ॥ दधिक्षीरसिताज्यैश्च मधुना सह सर्वदा ॥ स्नापयंति विरुपाक्षं ते लभंत्यभिवांछितं ॥ मत्प्रसादाद्द्विजश्रेष्ठ
देवसिद्धर्षिसेवितं ॥ भविष्यति भृगो स्थानं कुरुक्षेत्रादिभिः समं ॥ मार्तंडग्रहणे प्राप्ते यवं कृत्वा हिरण्मयं ॥ दत्वा सिरसि य
स्नायाद्भृगुक्षेत्रे द्विजोत्तम ॥ अवश्यमेव तं विद्धि संस्नातं कुरुजंगले ॥ अहमत्र वसिष्यामि सदैवांबिकया सह ॥ मम
प्रियाबिका देवी गिरिजा दैत्यनाशिनी ॥ दुःखदौर्भाग्यहरणी नाम्ना सौभाग्यसुंदरी ॥ यस्य तुष्टा महादेवी तस्य तुष्टोहमप्यतं
॥ वसिषयामि तया सार्द्धं दैवैश्च भृगुकच्छदे ॥ मार्कंडेय उवाच ॥ एवमुक्त्वा स्थितो देव्या सह देवो भृगोः स्थले ॥ भृगुश्च
वपुरं प्रायाद्ब्रह्मघोषनिनादितं ॥ तत्र तीर्थे च यः स्नानं चैत्रे मासि समाचरेत् ॥ देदे च लवर्णाशिप्यां पूज्य सौभाग्यसुंदरीं ॥ गो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिरण्यं ब्रुवन्नेव प्रीयतां ललिताशिवौ ॥ न दुःखं दुर्भगत्वं च वियोगं पतिना सह ॥ प्राप्नोति नारी राजेंद्र भृगुतीर्थप्लवेन तु ॥ य
श्च भृग्वीश्वरं नित्यं पश्यते पांडुनंदन ॥ आब्रह्मसदनं नूनमसौ पश्येत्समंततः ॥ यत्फलं समवाप्नोति तच्छृणुष्व नृपोत्तम ॥ सुव
र्णशृंगीं कपिलां च धेनुं पयस्विनीं साधुसुशीलवत्सां ॥ दत्वा द्विजाय श्रुतिसंयुताय फलं हियस्यात्तदिहैव नूनं ॥ समाः सहस्रा
णि च सप्त वै जले मृयन् लभेद्वा दश वन्हिमध्ये ॥ तनुं त्यजन् शूरवृत्तथा नरेंद्र शक्रातिथ्यं याति दि मर्त्यधर्मा ॥ आख्यानमेत
च्च सदा यशस्यं स्वर्ग्यंधन्यंपुत्र्यमायुष्यकारि ॥ शृण्वन् लभेत्सर्वमेतद्विभक्त्या पठन्पर्वण्याजमीडन्वदं च ॥ एतत्क्षेत्रं सुविपुलं सर्व
पापविनाशनं ॥ तत्र स्नात्वा दिवं यांति ये मृतास्तेऽपुनर्भवाः ॥ उपानहौ तथा युग्मं देयमन्नं च कांचनं ॥ भोजनं च द्विजेंद्राणां
तदस्याक्षयतां व्रजेत् ॥ क्षरंति सर्वदानानि यज्ञजाप्य तपःक्रियाः ॥ नक्षरेय्यत्तपस्तप्तं भृगोस्तीर्थे युधिष्ठिर ॥ तस्यैव तपसोग्रेण रुद्रे
ण त्रिपुरारिणा ॥ सानिध्यं तत्र विहितं भृगुतीर्थे नराधिप ॥ भृगुक्षेत्रे महाराज यत्किंचित्क्रियते नरैः ॥ त्रयोदेशदिनान्येव त्रयोद
शगुणं भवेत् ॥ अतउर्ध्वं तदर्द्धार्द्धं तदर्द्धार्धदिनानिवै॥स मृतः परमं स्थानं यातीति शिवभाषितं॥एतछ्रुत्वा भृगुक्षेत्रं स्वयं रुद्रेणभा
षितं ॥ प्रहृष्टवदनो भूत्वा तत्रैवावस्थितो द्विजः॥ तत्रैवांतर्हिते शर्वे ब्रह्मपुत्रो भृगुर्मुनिः ॥ स्वमूर्तिं तत्र मुक्त्वा च ब्रह्मलोकं जगा
मह ॥ गुणवान्निर्गुणो वापि पापैर्वा परिवेष्टितः ॥ भृगुं भृग्वीश्वरं भक्त्या भवानीं यः प्रपश्यति ॥ भवतीति विनिर्मुक्तो भवेद्भा
गवतां वरः॥नाबिभेति यमस्यापि नियमेन वसन् यमी॥एष ते भृगुकच्छस्य संभवः कथितो मया ॥संक्षेपण महाराज सर्वपापप्रणा
शनः ॥ एतत्पुण्यं पापहरं क्षेत्रं देवेन कीर्तितं॥भृगुणा निर्मितं पार्थ सर्वभूतार्तिनाशनं ॥ चतुर्युगसहस्रेण पितामहदिनं स्मृतं ॥
विप्र ब्रह्मदिनांते च जायते भूतसंप्लवः ॥ तथापि न त्यजामीदं क्षेत्रमेवं वदेच्छिवः ॥ अश्विनस्य तु मासस्य प्राप्तेदर्शादिवासरे ॥
रुद्रलोके व्रजेत्क्षेत्रामिदं प्राहेति शंकरः ॥ विप्रादिवर्णैः सहितं प्राणिभिः सचराचरैः॥ उत्प्रयास्यति राजेंद्र कस्मिंश्चित्कालपर्यये ॥ य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदं शृणुयाद्भक्त्या पुरुषोवनितापिवा ॥ स याति पापनिर्मुक्तः स्वर्गमित्याह शंकरः ॥ वृषखाते नरः स्नात्वा पिंडदानादि सत्क्रियां
॥ यः करोति नृपश्रेष्ठ तामक्षयफलां विदुः ॥ यश्चेदं शृणुयाद्भक्त्या भृगुकच्छस्य विस्तरं ॥ कोटितीर्थावगाहस्य फलमाप्नोति मानवः
॥इति श्रीरेवामाहात्म्ये भृगुकच्छतीर्थनामएकपंचाशदधिकशततमोऽध्यायः ॥१५१॥ मार्कंडेय उवाच॥सौभाग्यसुंदरी देवी मर्त्यानाम
घनाशिनी ॥ दृष्ट्वा च पूजिता पार्थ स्तुता वा प्रणतापि वा ॥ नाशयेत्सर्वदुरितं सुखसौभाग्यमावहेत् ॥ अतस्तां पूजयंतीह लो
का वांछितसिद्धये ॥ भृगोः क्षेत्रे महाराज प्रियां भृग्वीश्वरस्य हि॥ स्तुता संपूजिता ध्याता नानाभेदैर्नृणां भुवि ॥ ददाति वित्तं पु
त्रांश्च भुक्तिंमुक्तिंच शाश्वतीं ॥ एवं क्षेत्रमिदं पुण्यं त्रिषु लोकेषु विश्रुतं॥ समंतात्क्रोशमात्रे वै रक्षकैरप्यधिष्ठितं॥महादेवनियुक्तास्तु
ये तान् शृणु नराधिप ॥ यत्र क्षेत्रे दशाष्टौच दुर्गास्तादिक्ष्ववस्थिताः ॥ पालयंति सदा क्षेत्रं क्षेत्रपालाश्च षोडश ॥ स्वयंभुवस्थिता
स्तत्र रुद्राश्चैकादशा नृप ॥ तथैव द्वादशादित्यास्तावतश्च गणेश्वराः ॥ नागाश्चैवैकविंशा हि साध्याश्च वसवस्तथा ॥ एतैः पवित्रं
क्षेत्रं हि पाल्यते चान्वहं नृप ॥ किं तेन सदृशं पार्थ वर्ण्यते वेतरन्मुधा ॥ इति ते कथितं पार्थ विधानं तीर्थलक्षणे ॥ सर्वोपद्रव
नाशाय विहितं शंभुना यथा ॥ क्षेत्राणां परमं क्षेत्रं तीर्थानामपि चोत्तमं ॥ स्थानानां प्रवरं ह्येतत्भृगुणा निर्मितं पुरं ॥ किमन्यैर्ब
हुभिर्जुष्टैर्वासश्चेद्भृगुकच्छके ॥ किमन्यैर्बहुभिर्दृष्टैर्नदृष्टं चेद्भृगोः स्थलं ॥ किमुच्यते महाराज अतित्यत्वान्मयाबुधः ॥ वि
स्तरेण भृगु क्षेत्रे महिमानः समासतः॥इति श्रीभृगुकच्छेरक्षाविधानं नाम॥मार्कंडेय उवाच॥ततो गच्छेत राजेंद्र केदारं तीर्थमुत्तमं
भृगुखातात् स्थितं तद्चत्वारिंशत्क्रमांतरे ॥ यत्र स्नात्वा पितृश्राद्धं कृत्वा पश्चात्पिबेज्जलं ॥ संपूज्य देवदेवेशं केदारोक्तं फलं लभेत्
॥ युधिष्ठिर उवाच ॥ कथमत्र द्विजश्रेष्ठ केदारेण स्थितिः कृता॥ उत्तरे नर्मदाकूले समैतद्विस्तराद्वद॥ मार्कंडेय उ०॥ पुरा कृतयुग
स्यादौ शंकरस्तु नरेश्वर ॥ भृगुणाराधितः प्राह कच्छपेन च संभवं ॥ श्रियावस्थानकार्येस्मिन् ततः सिद्धिर्भविष्यति॥न निर्व्यूढं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तेन श्रिया शप्तं च तत्पुरं ॥ अपवित्रमिदं स्थानं सर्वदेवर्षिवर्जितं ॥ भविष्यति नृपश्रेष्ठ गतेत्युक्ता हरीप्रिया ॥ तपश्चचार विपु
लं भृगुवर्षसहस्रकं ॥ वायुभक्षो निराहारः शिराधमनिसंततः ॥ ततः प्रत्यक्षतामागाल्लिंगरूपो महेश्वरः ॥ प्रादुर्भूतस्तु सहसा भि
त्वा पातालसप्तकं ॥ ददर्शाथ भृगुर्देव मौत्पलं कौरकं यथा ॥ स्तुतिं चक्रेथ देवाय स्थाणवेत्र्यंबकाय च॥नमोस्तु विश्वरूपाय विरूपा
क्षाय शूलिने ॥ पुर विध्वंसिने शश्वत्कामांधकविनाशिने ॥ व्यक्ताव्यक्तस्वरूपाय कालत्रयमयायच॥ नर दाय हिरण्याय निर्गुणाय
गुणात्मने॥सदोदिताय शांताय जन्ममृत्युहराय च ॥ नमः शुद्धस्वरूपाय सर्गस्थित्यंतहेतवे ॥ गौरीप्रियाय गौराय मृगांकालंकृताय
च॥नमोस्तुनीलकंठाय नमोगंगाधराय च ॥ रजोगुणमयेनादौ येन सृष्टमिदं जगत् ॥ व्यस्तं विधिनिषेधाभ्यां तं नमामि सदाशि
वं ॥ तमोगुणमयो यश्च संहृत्य निखिलं जगत् ॥ शेतेतु प्रकृतो शांतस्तं नमामि सदाशिवं ॥ दीनानाथ समुद्धर्ता गौरीभर्ता गण
प्रियः ॥ सृष्टिसंलयबीजाढ्यः सशिवोमेप्रसीदतु ॥ मार्कंडेय उवाच ॥ एवंस्तुतः सभगवान् साक्षाद्रूपोहसन्निव पुनः प्राह भृगोमतः
किं पुनः प्रार्थ्यतेवद ॥ भृगुरु उवाच ॥ अपवित्रमिदं क्षेत्रं सर्वदेवर्षिवर्जितं ॥भविष्यतीति प्रोक्ता सा गता देवी त्रिविष्टपं ॥ तस्मा
त्पवित्रतां याति यथा क्षेत्रमिदं पुनः ॥ तथा कुरुमहेशान प्रसन्नोममचेद्विभो ॥ महादेव उवाच ॥ त्वयातुस्तुवतामह्यं यत्के दार
स्वमीरितं ॥ शायमोक्षकरं ब्रह्मन् महापापहरं ततः ॥ केदाराख्यमिदं श्रेष्ठं लिंगमाथं भविष्यति ॥ यथा हिमाद्रिनि
लयो ह्यहं सर्वाघनाशनः ॥ तथेहापिस्थितोलिंगे भक्तानां वांछितार्थदः ॥ कृत्वेदमादिलिंगानि भविष्यंति सदैवहि ॥
एकादशप्रदश्यं च क्षेत्रमध्ये भविष्यति ॥ पावयिष्यंति तत् क्षेत्रमेकादशस्वयं भुवः ॥ तथैवद्वादिशादित्या मत्प्रसा
दात्स्वमूर्तितः ॥ भविष्यंति भृगुक्षेत्रे रोगदुःखनिबर्हणाः ॥ दुर्गाष्टादशपूर्वोक्ताः क्षेत्रपालाश्च षोडश ॥ पवित्रीकृतमेतै
र्हि नित्यं क्षेत्रं भविष्यति ॥ माघमासे ह्युषाकाले स्नात्वा मासं जितेंद्रियाः ॥ ये पूजयंति केदारं ते गच्छंति परां गतिं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्मिंस्तीर्थे नरः स्नात्वा पितॄनुद्दिश्यभारत ॥ श्राद्धं ददाति विधिवत्तस्य प्रीताः पितामहाः ॥ कार्तिके माघमासे वा तत्र दीप प्र
दोहियः॥न चक्षुर्हीयते तस्य दीप्तिरायुश्च वर्द्धते ॥ शैवान्पाशुपतान्विप्रान् तथा कार्पटिकान् द्विज ॥ भोजयेद्योनरो भक्त्या सगच्छे
द्गतिमक्षयां ॥ मार्कंडेय उवाच ॥ एवमुक्त्का ययौ शंभुस्तत्रैवादर्शनं नृप ॥ भृगुश्च परमं स्थानं पुनराश्वासयन् स्वयं ॥ यद्देहि
माचलं गत्वा केदारस्यार्चनात्फलं ॥ नरस्तत्समवाप्नोति भृगोः केदारदर्शनात् ॥एतत्ते कथितं राजन् केदारं तीर्थमुत्तमं॥सर्वपापहरं
पुण्यं दुःखदुःस्वप्ननाशन ॥ इति श्रीनर्मदामाहात्म्ये केदारतीर्थंनाम ॥ मार्कंडेय उवाच ॥ ततः क्रमशतस्यांते धूतपापं व्रजेन्नरः
॥ भृगुतीर्थसमीपे तु पापतापापहं परं ॥ वृषेण तु भृगुस्तत्र भूयोभूयोधुनोद्दठान् ॥ धुतं पापं तु तेनास्य ख्यातनाम्ना हि तेन
तत् ॥ तत्रोतस्थौ महादेवस्तुष्टो वै भृगुसत्तमे ॥ प्रहर्षमतुलं गत्वा महाकोपस्य दर्शनात् ॥प्रशशंस भृगुंपार्थ ददौ तस्य वरं परं ॥
तत्र तीर्थे हि यःस्नायात् शाठ्येनापि नरेश्वर ॥ मुच्यते सर्वपापेभ्यो नात्रकार्याविचारणा ॥ यश्च सम्यग्विधानेन तत्र स्नात्वार्चये
च्छिवं ॥ देवान् पितॄंश्च संतर्प्य मुच्यते सर्वपातकैः ॥ ब्रह्मस्त्रीबालगोहत्या तत्र तीर्थे युधिष्ठिर ॥ भितान प्रविशेत्पार्थ प्रविष्टापि
क्षयं व्रजेत् ॥ युधिष्ठिर उवाच ॥ आश्चर्यमेतल्लोकेस्मिन्कथयस्व द्विजोत्तम ॥ ब्रह्महत्यापि न विशेत् धूतपापे यथा विभो ॥ ब्रह्म
हत्यासमं पापं भवितानेहकिंच न ॥ कथं च धूतपापेसा प्रविष्टा नश्यति द्विज ॥ एतद्विस्तरतः सर्वं पृच्छामि व
द कौतुकात् ॥ मार्कंडेय उवाच ॥ आदिसर्गे पुरा शंभुर्ब्रह्मणः परमेष्ठिनः ॥ विकारिपंचमं दृष्ट्वा शिरोश्वतरसंन्निभं ॥
अंगुष्ठागुलियोगेन कृतं तेनाशुतच्छिरः ॥ कृत्तमात्रे च शिरसि ब्रह्महत्या समुद्गता॥तया समन्वितो यात उत्तरं नर्मदातटं ॥ वृषे
ण धुनितो यत्र भृगुर्वै धर्ममूर्तिना भृगुणा द्राविते नात्र प्राप्ता देवी हरप्रिया ॥ वृषेण स्थापिता देवी नाम्ना धूतेश्वरी ततः अश्वा

१ वाडवा.

CC-0. In Public Domain. Digitization by eGangotri

सिते भृगौ पार्थ तया सर्वस्य सांनिधौ ॥ ददर्श भगवान् शभुः सर्वदेवनमस्कृतः ॥दृष्ट्वा धूतेश्वरीं देवीं ब्रह्महत्याविनाशिनीं ॥ तत्र विश्राममकारोत् शंकरस्त्रिपुरांतकः ॥ स शंकरो ब्रह्महत्याविहीनं मेनेत्मानं तत्र तीर्थप्रभावात् ॥ सुविस्मिते देवदेवो वरेण्यो दृष्ट्वा दूरे ब्रह्महत्या च तीर्थात् ॥ विधूतपापं रक्षितं च धर्मशक्त्या विशेन्न हत्या तत्र देव्याः प्रभीता ॥ रक्तांबरा रक्तमाल्योपयुक्ता रक्ता नारी रक्ताक्षमात्तहस्ता ॥ सावांछती स्कंधदेशं हरस्य दूरे स्थिता तत्र तीर्थप्रभावात् ॥ संचिंत्य देवो मनसा स्मरारिर्वासाय बुद्धिं च तत्र तीर्थे चकार ॥ विमृश्य देवो बहुशःस्थितः स्वयं विधूतपापः प्रथितः पृथिव्यां ॥ संपूजयामास सुरेश्वरीं तां धुतेश्वरीं नाम महाघहंत्रीं ॥ तदा प्रभृति राजेंद्र ब्रह्महत्याविनाशनं ॥ धूतपापं परं तीर्थं नर्मदायां व्यवस्थितं ॥ अश्वयुक् शुक्लनवमी तत्र तीर्थे विशिष्यते ॥ दिनत्रयेपि राजेंद्र सप्तम्यादि विशेषतः ॥ समुपोऽष्याष्टमीं भक्त्या सांगं वेदं पठेत्तु यः॥ अहोरात्रेण चैकेन ऋग्यजु सामसंज्ञितं ॥ अभ्यसन् ब्रह्महत्याया मुच्यते नात्र संशयः ॥ वृषलीगमनं यत्र यश्चगुर्वंगनागमः ॥ स्नात्वा ब्रह्मरसामृष्टकुंभेनैव विमुच्यते॥वंध्या स्त्री जननी या च काकवंध्या मृतप्रजा ॥ तत्र कुंभोदके स्नाता जीवपुत्रा प्रजावती ॥ शरिरदोषैर्मुक्ता स्यत्पुत्रं श्रेष्ठगुणं लभेत् ॥ उपोष्य प्रपठन्विप्रोपि ऋग्यजुः सामसंभवां ॥ऋचमेकां जपन् यस्तु तथाथर्वणतोपि वा॥अनृचोपि जपेत्तत्र गायत्रीं वेदमातरं ॥ जपन्नवश्यं विप्रेंद्रो मुच्यते पापसंचयात् ॥ एवं ते कथितं तात पुराणोक्तं महर्षिभिः ॥ धूतपापं महापुण्यं शिवेन कथितं मम ॥ यस्त्वत्र संत्यजेत्प्राणान् जले वाग्नौ स्थलेपि वा ॥ स गच्छाति विमानेन ज्वलनार्कसमप्रभः ॥ हंसबर्हिप्रयुक्तेन सेव्यमानोप्सरोगणैः ॥ शिवस्य परमं स्थानं यत्सुरैरपि दुर्लभं ॥ क्रीडते स्वेच्छया तत्र यावच्चंद्रार्कतारकाः ॥ धूतपापे तु या नारी कुरुते प्राणसंक्षयं ॥ तत्क्षणादेव सा पार्थ पुरुषत्वमवाप्नुयात् ॥ तर्पयेद्यः पितॄन् श्राद्धे पूजयेच्च महेश्वरं॥ ब्राह्मणान् भोजयेच्छक्त्या दीपं देवाय दापयेत् ॥ ब्राह्मणानन्नवस्त्रैश्च दक्षिणाभिश्च तोषयेत् ॥ य एवं कुरुते पार्थ सर्वान्कामानवाप्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यात् ॥ तर्पयेद्यः पितॄन् श्राद्धे सर्वपापैः प्रमुच्यते ॥ अथ किं बहुनोक्तेन शुभं वायदिवा शुभं ॥ तदक्षयफलं सर्वं धूतपापे कृतं
हि तत् ॥ इति श्रीभृगुकच्छे धूतपापतीर्थनाम द्वीपंचाधिकशततमोध्यायः ॥ १५२ ॥ ॥ मार्कंडेय उवाच ॥ ततः परं महारा
ज एरंडीतीर्थमुत्तमं ॥ धूतपापाक्रमाणां तच्चतुर्विंशांतरे स्थितं ॥ पुनिरेरंडीनामा वै तपोतप्यत्पुरा महत् ॥ अनुसूयाश्रमे पुण्ये
संतानार्थं युधिष्ठिर ॥ कालेनाबहुना तस्य पुत्री परमलक्षणा ॥ शांता जगद्धिता सौम्या परमार्थविदां वरा ॥ पितरं सा परिचर
न्वहं सा तु कन्यका ॥ स्वर्याते दैवयोगेन ताते सातीव दुःखिता ॥ एरंडीनाम राजेंद्र तीर्थात्तीर्थं तु निर्गता ॥ कुमारी योगनिर
ता परा शक्तिरिवोत्तमा ॥ भृगुक्षेत्रमनुप्राप्ता तपस्तप्तुं धृतव्रता ॥ धुतपापे ततः स्नात्वा विविक्तं स्थानमाश्रिता ॥ तपश्चचार विपुलं
देवैः संप्रार्थितापि च ॥ न चचाल महाराज सा परं नियमं श्रिता ॥ ततो देवैर्वरो दत्तो मुनिभिः श्च तपोधनैः ॥ लप्स्यसे सिद्धि
मचिराद्वपुषा तेन कन्यके ॥ दृश्यादृश्यस्वरूपा त्वं भ्रमिष्यसि जगत्त्रये ॥ पूजयिष्यंति ये लोकास्तीर्थेस्मिन्प्रतिमा तव ॥ तेषामपि
भविता च सिद्धिः पुत्रादि वांछिता ॥ एवं दत्वा वरान् तस्यै गता देवा यथागतं ॥ कालेन कियताप्याप सिद्धिं सापि युधिष्ठिर ॥
दृश्यादृश्येन रूपेण सा स्वतीर्थं न मुंचति ॥ साधूनामुपकाराथ दुष्टानामपकारिणी ॥ एवं ते कथितं पार्थ एरंडीतीर्थमुत्तमं ॥ मा
सि चाश्वयुजे तत्र शुक्लपक्षे चतुर्दशीं ॥ उपोष्य प्रयतः स्नात्वा तर्पयेत्पितृदेवताः ॥ स्नानमात्रेण राजेंद्र तथैरंड्याश्च पूजनात् ॥ भ्रू
णहत्यादिपापानि क्षीयंते पांडुनंदन ॥ पुत्रर्द्धिरूपधर्माढ्यो जीवेच्च शरदां शतं ॥ मृतः शिवपुरं याति नात्र कार्या विचारणा शाक्तं
च लोकमाप्नोति संपूज्यैरंडिकां नरः ॥ यो यदिच्छति तीर्थेस्मिन् कामं कृत्वा परं हृदि ॥ सुतमाप्नोति नियतं सिद्धैरंड्याः प्रभावतः
॥ इति श्रीरेवामहात्म्ये एरंडीतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततस्तीर्थान्महाराज गत्वा षष्टिक्रमातरे ॥ सिद्धिदं भक्तलोकानां
तीर्थं कनखलोपमं ॥ प्रसन्ना गरुडस्यादौ यत्रांशा कनकेश्वरी ॥ गरुडेन तपस्तप्तं पूजयित्वा महेश्वरं दिव्यं वर्षशतं यावज्जातमात्रे

CC-0. In Public Domain. Digitization by eGangotri

ण भारत ॥ तपसा स कृशीभूतो दृष्टो देवेन शंभुना ॥ततस्तुष्टो महादेवो वैनतेयं महाबलं॥उवाच परमं वाक्यं विनतानंदवर्द्धनं॥
प्रसन्नस्ते महाभाग वरं वरय सुव्रत॥दुर्लभं त्रिषु लोकेषु ददामि तव खेचर॥गरुड उवाच॥जातस्य मम मात्रा वै प्रोक्तमेवं महेश्वर॥
वाहनं त्वं महाविष्णोर्भव शत्रुभयंकर॥ब्रह्मविष्णुशिवान्मुक्त्वा शत्रुभिश्चापराजितः॥तस्माद्देवं महेशान त्वां याचे मातृकं वचः॥भवामि
वाहनं विष्णोस्तथैंद्रत्वं शिवार्थये॥प्रसन्नश्चेन्महादेव तथा कुरु मम प्रभो॥ईश्वर उवाच दुर्लभः प्राणिनां वत्स यो वरः प्रार्थितस्त्वया॥वाहनं
देवदेवस्य कथं भवितुमर्हसि॥नारायणोदरे सर्वं त्रैलोक्यं सचराचरं॥त्वया सकथमुह्येत तवस्यात्कथमिंद्रता॥तेनैव स्थापितेश्चेंद्रस्त्रैलोक्ये
स चराचरे इंद्रत्वं मन्यस्य कथं भवतीति सुदुर्लभं॥तथापि ममवाक्येन वाहनं भविता हरेः॥शंखचक्रगदापाणेर्वहतोपि जगत्त्रयं॥इंद्रश्च
पक्षिणां मध्ये भविष्यति न संशयः॥इति दत्वा वरं तस्मै तत्रैवांतर्दधे शिवः॥गते चादर्शनं देवे पुनस्तत्र खगोत्तमः॥स्वयेच्छन् शक्ति
मतुलां शक्तिं स कनकेश्वरीं ॥ आराधयामास तदा चामुंडां शंकरप्रियां ॥ स्मशानवासिनीं देवीं नामभूतगणावृतां ॥ योगिनीं यो
गसंसिद्धां वसामांसासवप्रियां ॥ चंडाट्टहासिनींचंडां चंडमुंडविनाशिनीं ॥ चामुंडां मुंडमालाढ्यां नाम्ना तु केनकेश्वरीं ॥ ध्यातमा
त्रा तु सा तेन प्रत्यक्षा ह्यभवत्क्षणात् ॥ जालंधरे च यासिद्धिः लक्ष्मीः कोलापुरे च या ॥ मायापुरे च या माया उडियाणे च
योगिनी ॥ समग्रा सा भृगुक्षेत्रे सिद्धिदा सम वस्थिता ॥ स्तुता या ऋषिभिर्देवैः पुरा सर्वार्थसिद्धये॥वैनतेयस्तदा तस्याःस्तुतिं चक्रे
महामतिः ॥ गरुड उवाच ॥ या सा क्षुत्क्षामकंठा नवरुधिरगलत्प्रेतपद्मासनस्था भूतप्रेतादिवृंदैः प्रितृवननिलया क्रीडते शूलह
स्ता ॥ शस्त्रध्वस्त प्रवीरव्रजरुधिरगलन्मुंडमालोत्तरीया सा देवी विश्वमाताविमलशशिनिभा पातु नश्चर्ममुंडा ॥ या सा सिंहासन
स्था भुवनभयकरी त्रासना दुष्कृतानां मुंचज्वालाकलापैर्दशनकसमसैः खादति प्रेतमासं ॥ पिंगोर्द्धावद्धजूटा श्रवदसृगरुणव्याघ्रच
र्मोत्तरीया दैत्येंद्रैर्यक्षरक्षासुरसुरनमिता पातुवश्चर्ममुंडा ॥ या सा निम्नोदरांगी विकृतकृतरवारावरंगप्रसक्ता॥प्रोद्यच्छूलाग्रहस्ताप्रबल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भवभया भास्करैंद्रग्निनेत्रा त्रैलोक्यं त्रासयंती-डदडहकडहारावघोरैरनेकैः ॥ नृत्यंती मातृमध्ये शिवगिरिनिलया पातु वश्चर्ममुंडा ॥
या सा दोर्दंडचंडाडमरुरणरणद्धोरघंटाट्टहासा ॥ कल्पांतोत्पातवाताहतपटुपटहैर्वल्गती नृतमाता ॥ भक्तानां पूरयंति विविधमनासि
जान् पूजिता सेविता वै साद्याशक्तिर्महेशप्रमुखसुरनता पातु वश्चर्ममुंडा ॥ या धत्ते विश्वमखिलंनिजांशेन महोज्वला कनकप्रस
वे लीना पातु मां कनकेश्वरी ॥ हिमाद्रिसंभवा देवी दयादर्शितविग्रहा ॥शिवप्रिया शिवे सक्ता पातु मां कनकेश्वरी ॥ अनादिज्ज
गदादिर्या रत्नगर्भा वसुप्रिया ॥ रथांगपाणिना पद्मा पातु मां कनकेश्वरी ॥ सावित्री या च गायत्री मृडानि वागथेंदिरा ॥ स्मर्त्री
णां या सुखं दत्ते पातु मां कनकेश्वरी ॥ सौम्या सौम्यैः सदा रूपैः सृजत्यवति या जगत् ॥ परा शक्तिः परा बुद्धिः पातु मां कन
केश्वरी ॥ ब्रह्मणः सर्गसमये सृज्यशक्तिः परा तु या ॥ जगन्मया जगद्धात्री पातु मां कनकेश्वरी ॥ विश्वस्य पालने विष्णोर्याश
क्तिः परिपालिका ॥ मपनोन्मादिनी मुख्या पातु मां कनकेश्वरी ॥ विश्वसंलयने मुख्या या रुद्रेण समाश्रिता ॥रौद्री शक्तिः शि
वानंता पातु मां कनकेश्वरी ॥ कैलाससानुसंरूढकनकप्रसवेशया ॥ भस्मकाभिहता पूर्वं पातु मां कनकेश्वरी ॥ प्रतिप्रभावमिच्छं
ती त्रस्यतीथाविनापतिं ॥ अबलात्वैकभावा च पातु मां कनकेश्वरी ॥ विश्वसंरक्षणे सक्ता रक्षिता कनकेन या ॥ आब्रह्मस्तंबजन
नी पातु मां कनकेश्वरी ॥ ब्रह्मविष्णवीश्वराः शक्त्या शरीर ग्रहणं यया ॥ प्रापिताः प्रथमा शक्तिः पातु मां कनकेश्वरी ॥ एवं स्तु
ता परा शक्तिर्गरुडेन सुरेश्वरी ॥ प्रसादसुमुखी भूत्वा वाक्यमेतदुवाच ह ॥ श्रीदेव्युवाच ॥ तुष्टाहं ते द्विजश्रेष्ठ वरं वरय वांछितं
॥ स्तोत्रेणानेन मे तुष्टिः परा जाता खगोत्तम ॥ स्तुत्यानया मांयो नित्यं स्तोष्यति प्रयतः सुधीः ॥ तस्यदास्याम्यहं भोगान् वां
छितं चापि दुर्लभं ॥ गरुड उवाच ॥ अजेयश्चामरश्चद्यै त्वत्प्रसादाद्भवाम्यहं ॥ शर्वेणापि वरे दत्ते त्वतो मे द्रढिमा भवेत् ॥ त्व
या चात्र सदा देवि स्थातव्यं तीर्थमुत्तमं ॥ श्रीदेव्युवाच ॥ एवं भवतु ते भद्र यन्मत्तो वांछितं त्वया ॥ अजरश्चामरश्चैव भविता

CC-0. In Public Domain. Digitization by eGangotri

हरिवाहनं ॥ यन्मे कनकेश्वरी नाम त्वया गुह्यं प्रकाशितं ॥ स्थास्यामि नाम्ना तेनैव लोके प्रियचिकिर्षया ॥ यो मां कनकेश्व
रीं नाम्ना पूजयिष्यति भक्तितः ॥ दास्ये तस्यातुलां शक्तिंसर्वकार्येषु वीश्वर॥संतानसुखसौभाग्यधनानि च सलप्स्यते ॥ पशुपुष्पार्घ
धूपैर्मां यः स्नात्वाभ्यर्चयिष्वति ॥ गरुडप्रार्थिता देवी तत्राशेनात्मनास्थिता ॥ तदा प्रभृति राजेंद्र नाम्ना तु कनकेश्वरी ॥ गरुडोपि
ततः स्नात्वा संपूज्य कनकेश्वरीः॥तीर्थं तत्रैव संस्थाप्प जगाम स्थानमात्मन.॥युधिष्ठिर उवाच॥ ब्रह्मन्कनकेश्वरी संज्ञा त्वया प्रो
क्ता तु या मम ॥ नैव सा श्रुतपूर्वा मे विस्मयोयं महान् यदि ॥ बहूनि संति नामानि पुराणेषु श्रुतानिमे ॥ कथमेतत्कदा जातं
वद मे नामनिर्णयं ॥ मार्कंडेय उवाच ॥ कैलासाद्रौ पुरा पार्थ पार्वतीपरमेश्वरौ ॥ रमतो विविधैर्भावैर्भक्तानां भयनाशनौ ॥
कदाचित्कालयोगेन शिवः स्वर्णगिरिं ययौ ॥ सुरकार्ये समुत्पन्ने ज्ञात्वा ब्रह्मकृतां सभां ॥ दिक्पालालोकपालाश्च सिद्धविद्याधरोरा
गाः ॥ मेरुपृष्ठे तदा राजन् गंधर्वाप्सरसोऽगमन् ॥ एतस्मिन्नंतरे देवीमेकां मत्वा शिवालये ॥ भस्मकोनाम दैत्येंद्रस्तत्रायात्तजिघृ
क्षया ॥ शूरः सर्वेश्वरीं हर्तुं बलशक्तिसमन्वितः ॥ ज्ञात्वा दैत्यपतिं प्राप्तं दुष्टदैत्यनिबर्हणी ॥ सूक्ष्मरूपधरा गौरी पलायाशु तदग्रतः
॥ शतकृत्वस्तु बभ्राम स्वधाम परितो नृप ॥ पृष्ठलग्नश्च दैत्योपि न तां त्यजति लंपटः ॥ यदा तदा भगवती कैलासाद्रिमशेषतः॥
परिबभ्राम वेगेन वृक्षाद्वृक्षं वनाद्वनं ॥ तथाप्यनुगतं दृष्ट्वा देवी श्रमसमाकुला ॥ किं कृतं रुचिरं मे स्यादिति भर्तृहितैषिणी ॥ चिं
तयती पुराऽपश्यत् कनकं चातिशोभनं ॥ सून्मीलत्प्रसवं प्राप्य वेगेन महता नृप ॥ वंचयित्वानगं दैत्यं प्रसूने तन्यलीयत ॥ त
द्दिनं सकलं सोपि परिबभ्राम तं गिरिं ॥ नापश्यत्तामुमां देवीं कनकप्रसवास्थितां ॥ एतास्मिन्नंतरे प्राप्तो महादेवोऽसुरांत
कृत् ॥ शूली पिनाकपाणिश्च कंपयन्सकलं जगत् ॥ नापश्यद्भवने देवीमुमां देहार्द्ध धारिणीं ॥ उन्मत्तस्थितिरीशानो
भ्रमन् दैत्यं ददर्श ह ॥ प्रयुद्धस्तेनवैशर्वो दिनान्यष्टौ नृपोत्तम ॥ ततो बिभेद नवमे दिने शूलेन वक्षसि ॥ स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नहृदयस्तूर्णं पपात च ममार च ॥ ततस्ता वीक्ष्यमाणोपि नापश्यद्गिरिजां यदा ॥ तदोन्मत्तवदारब्ध देवीमाह्वारयन्प्रियां ॥
श्रुत्वा शब्दं शिवस्याथ शिवा प्रसवसंस्थिता ॥ जगाद देवदेवेशं लीनास्म्यत्र प्रसूनके ॥ एह्येहि जगतां नाथ भ्रम मोन्मत्तवच्चिरं
॥ दैत्येनाभिहृतेत्येवं तद्वृत्तांतमशेषतः ॥ आचक्षाणा महेशानं प्राप प्रेम्णा तु पार्वती ॥ पार्वत्युवाच ॥ दैत्याक्रांता परिश्रांता
श्रांतातीवाहमीश्वर ॥ नाधिगच्छामि शरणं शरण्यं शरणप्रदं ॥ चिंतयती तदा मूढा कं गच्छामीति विव्हला ॥ दृष्ट्वा पृष्ठानुगं दै
त्यं संलीनास्मी प्रसूनके ॥ पिनाकिन् कनकेनाशु पालिता तेन धूर्जटे ॥ सुखं स्थिता त्वविज्ञाता तस्य दैत्यस्य पापिनः ॥ वरं
देहि माहादेव कनकाय हितार्थिने ॥ येनाहं रक्षिता देव तरुणा त्वद्धितैषिणा ॥ ईश्वर उवाच ॥ यस्मादुन्मत्तभावो मामागा
त्संलीनया त्वया ॥ तस्मादुन्मत्तनामायंभविता भुवनत्रये ॥ कनकः स्वर्णवर्णत्वात्पालनात्ते शिवप्रियः ॥ नानाविधानि पुष्पाणि
पवित्राण्यपि पार्वति ॥तथा न मे प्रियाणि स्युर्यथा वै कनकः प्रियः॥अशुद्धभूमावपि जातमेनं पावित्र्यलक्ष्मीर्न विहास्यति क्वचित्
॥ रुष्टोपि तुष्टोपि च सर्वदाहं विशेषतुष्टिं कनकेन यास्ये ॥ इत्यादि सुबहून् दत्वा कनकस्य वरान् शिवः ॥ दर्शयामास देव्या
स्तं पतितं दैत्यसत्तमं ॥ संलीना कनके यस्माच्चिरं देवी हरप्रिया ॥ कनकेश्वरीनाम्ना सा स्तुता देवर्षिभिस्तदा ॥ सुप्रीता तेन
नाम्ना सा ददौ तेभ्योपि वांछितं ॥ गोप्यमेतत्त्रिलोकेपि नामनिर्णयलक्षणं ॥ इति ते कथितं राजन् संक्षेपान्नामकारणं ॥ सर्वासां
पुष्पजातिनां वेत्ति सर्वोपि वै गुणान् ॥ धत्तुरकगुणान्वेत्ति शर्व एव युधिष्ठिर ॥ इति देवी समाख्याता मया ते कनकेश्वरी ॥ वर
दा कनकस्यैवं सर्वाशुभविनाशिनी ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्कनकेश्वरीं ॥ ये भजंति भवाब्धिं ते तरंति गतकिल्बिषाः ॥
पितॄणां श्राद्धदानेन तृप्तिर्भवति शाश्वती ॥ स्तोत्रेणानेन यः स्तौति स्वभक्त्या कनकेश्वरीं ॥ विद्या वक्तृत्वमौन्नत्यं स लभेच्चाभिवां
छितं ॥ इति श्रीरेवामाहात्म्ये भृगुकच्छे कनकेश्वरीतीर्थनाम पंचाधिकशततमोध्यायः ॥१५३॥ मार्कंडेय उवाच ॥ धनुःषष्ठ्यंतरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्थ तीर्थं परमशोभनं ॥ ज्वालेश्वरं ततो गच्छेल्लिंगमाद्यं स्वयंभुवः ॥ कालाग्निरुद्रं विख्यातं भृगुकच्छे व्यवस्थितं ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनं ॥ क्षेत्रपापान् विनाशाय कृपया च समुत्थितं ॥ पुरा कल्पे सुरगणे राज्ञां भुव वेदोक्तकर्मनाशे च धर्मे च विलयं गते ॥ देवर्षिमुनिसिद्धेषु निश्वासपरमेषु च ॥ कालाग्निरुद्रादुत्पन्नो धूमः कोपानलोद्भवः ॥ धूमात्समुत्थितं लिंगं भित्वा पातालसप्तकं ॥ अवटं दाक्षिणे कृत्वा लिंगं तत्रैव तिष्ठति ॥ तत्र पुण्यं नृपश्रेष्ठ कुंडं ज्वालासमुद्भवं ॥ यत्र सा पतिता ज्वाला दुष्टान्निर्दहतो विभोः ॥ तत्र गर्तः समुद्भूतो धूमावर्तकृतो महान् ॥ तस्मिन् कुंडे तु यः स्नानं कृत्वा वै नर्मदाजले ॥ कुर्याच्छ्राद्धं पितृभ्यो वै पूजयेच्चापि शंकरं ॥ कालाग्निरुद्रनामानं सगच्छेत्परमां गतिं॥ यत्किंचित्काम्यकं कर्म नाभिचारिकमेव वा ॥ रिपुसंक्षयकृद्वापि सांतानिकमथापरं ॥ तत्र तीर्थे कृतं सर्वं मा चिरात्सिध्यते नृप॥ इतिश्रीरेवामाहात्म्ये ज्वालेश्वर तीर्थनाम ॥ श्रीमार्कंडेय उवाच ॥ ततः परं महाराज चत्वारिंशत्क्रमांतरे ॥ शालिग्रामं पुरे गच्छेत्सर्वदैवतपूजितं ॥ यत्रादिदेवो भगवान् वासुदेवस्त्रिविक्रमः ॥ स्वयं तिष्ठति लोकात्मानारदप्रियकाम्यया ॥ नारदेनतपस्तप्त्वा कृता शाला द्विजन्मनां ॥ सिद्धिक्षेत्रं भृगुक्षेत्रं ज्ञात्वा रेवातटेस्वयं ॥ शालग्रामाभिधोदेवो विप्राणां त्वधिवासितः ॥ साधूनां चोपकाराय वासुदेवः प्रतिष्ठितः॥शालग्रामाह्वयस्तेन नर्मदातटमाश्रितः ॥ योगिनामुपकाराय योगगम्यो जनार्दनः ॥ मासि मार्गशिरे शुक्ला भवत्येकादसी यदा ॥ तत्र तीर्थे तदा पार्थ शालिग्रामे वसेद्बुधः ॥ स्नात्वा रेवाजले पुण्ये तद्दिनं समुपोषयेत् ॥ रात्रौ जागरणं कृत्वा संपूज्य च जनार्दनं ॥ विधियुक्तोपचारैश्च उपहारैरनुत्तमैः ॥ पुनः प्रभातसमये द्वादश्यां नर्मदाजले ॥ स्नात्वा संतर्पयेद्देवान् पितॄन्मर्त्यान्यथाविधि ॥ श्राद्धं कृत्वाततः पार्थ पितृभ्यो विधिपूर्वकं ॥ भोजयेत्पूजयेद्विप्रान् स्वर्णवस्त्रादिदानतः॥क्षमापयेच्चतान्विप्रान्तथादेवं खगध्वजं ॥ एवं कृते महाराज यत्पुण्यं जायते नृणां॥शृणुष्वावहितो भूत्वा तत्पुण्यं नृपसत्तम॥न शोकदुःखैः प्रतिपश्यतीह जीवन्मृतो याति मुरारिसाम्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ महांति पापानि विहाय दुग्धं पुनर्न मातुः पिबतिस्तनोत्थं ॥ शालग्रामं पश्यते यो हि देवं स्नात्वा जलेनार्मदेघौघहारि ॥ स
मुच्यते ब्रह्महत्यादिपापैर्नारायणानुस्मरणेन तत्र सत्यस्य सर्वं निवसंति तत्र॥मर्त्याहि ये द्वंद्वसहास्त्वसंगाः॥ ध्यायंतो वै सांख्ययु
क्ता तुरीयं पदं मुरारेस्ते हि तत्रैव यांति ॥ इति श्रीरेवामहात्म्ये भृगुकच्छे शालग्रामतीर्थनाम ॥ श्रीमार्कंडेय उवाच ॥ ततः परं
महाराज गत्वा क्रमशतद्वये ॥ सोमेन स्थापितं यायात् सोमतीर्थमनुत्तमं॥नाम्ना वै चंद्रहासेति सर्वदैवतपूजितं॥यत्र सिद्धिं परां प्रा
प्तः सोमो राजा सुरर्षभः॥युधिष्ठिर उवाच॥कथं सिद्धिमनुप्राप्तः सोमस्तत्र भृगूत्तम॥तत्सर्वं श्रोतुमिच्छामि कथयस्व ममानघ॥ मा
र्कंडेय उवाच ॥ पुरा शप्तोमुनींद्रेण दक्षेण किल भारत ॥ यथापूर्वं मया प्रोक्तं दारार्थे कारणं तव ॥ असेवनाद्धि दाराणां क्षयरो
गी भविष्यसि॥उद्वाहितानां पत्नीनां ये न कुर्वंति सेवनं॥या निष्ठा जायते तेषां तच्छृणुष्व नराधिप॥ऋतावृतौ हि नारीणां सेवना
ज्जायते सुतः ॥ सुतात्स्वर्गश्च मोक्षश्च श्रुतिरेषा सनातनी ॥ऋणं पुत्रे दधात्याशु अमृतत्वं च गच्छति॥जिवतश्चेन्मुखं पश्येदौरसस्य
सुतस्य च ॥ तत्कालोचितधर्मेण सेवंते ये न तां नराः ॥ तेषां ब्रह्महणं पापं जायते पापकर्मणां॥तेन पापेनघोरेण विष्टितो रौरवे
पतेत्॥तस्य तद्रुधिरं पापः पिबते कालमीप्सितं॥ततोवतीर्णः कालेन यां यां योनिं प्रपद्यते॥तस्यां तस्यां स दुष्टात्मा दुर्भगोजायते
ध्रुवं॥नाराणांतु सदा कामो ह्याधिकः स्याद्युधिष्ठिर॥ऋतुकाले विशेषेण भिद्यते कामसायकैः॥परिभूता हि सा भर्त्रा ध्यायतेन्यं पतिं य
दि॥तत्र पुत्रः समुत्पन्नो दहते कुलमुत्तमं ॥ स्वर्गस्थानेन पितरः पूर्वजाता महीपते॥पतंति जातमात्रेण कुलटस्तेनसोच्यते ॥ शप्तश्च
कर्मणा तेन क्षयरोग्यभवच्छशी ॥ नाकलोकं ततस्त्यक्त्वा मर्त्यलोकमुपागतः ॥ स प्राप्य भारतं वर्षं कर्मभूमिं स ऋक्षराट् ॥ त
त्ततीर्थान्यनेकानि पुण्यान्यायतनानि च॥भ्रमित्वा नर्मदा प्राप्तः सर्वपापप्रणाशिनीं ॥ उपवासांश्च दानानि व्रतानि नियमानथ
॥ चचार द्वादशाब्दानि रेवातीरे युधिष्ठिर ॥ स्थापयित्वा महादेवं पूर्वं रेवोरि संगमे ॥ द्वितीयं च भृगोः स्थाने सर्वपातकनाश

CC-0. In Public Domain. Digitization by eGangotri

नं ॥ जगाम प्रभया पूर्णः सोमलोकमनुत्तमं ॥ येनेह स्थापितो देवः पूज्यते वर्षसंख्यया ॥ तावद्युगसहस्राणि तस्य लोके स पूज्यते ॥ ततदेवान् विधानोक्तान् स्थापयंति नरा भुवि ॥ अक्षयं चाव्ययं यस्मात्फलं भवति नान्यथा ॥ सोमतीर्थे तु यः स्नात्वा पूजयेद्देवमीश्वरं ॥ जायते स नृपो भूम्यां सोमवत्प्रियदर्शनः ॥ तस्मिंश्चंद्रप्रभासे यो गत्वा नायाद्विधानतः व्याधिनाप्यभिभूतो वा क्षयकुष्ठादिनापि वा ॥ चंद्रहासे नरः स्नात्वा द्वादश्यां साज्यशर्करं ॥ चतुर्दश्यां तु वो पोष्य क्षीरस्यजुहुयाच्चिरं ॥ विधिवत्पंचभिर्मंत्रैरीशान्यं त्र्यंबकं यजेत् ॥ हविःशेषं स्वयं प्राश्य सोमतीर्थे निरुग्भवेत् ॥ अनेन विधिना राजन् स्तुष्येद्देवो महेश्वरः ॥ विधितीर्थानुयोगात्स सर्वरोगैर्विमुच्यते ॥ यः सप्तसोमवारान्वै स्नानं तत्र समाचरेत् ॥ सर्वकर्मकृताद्रोगान्मुच्यते पूजयन् शिवं ॥ कर्णाक्षिरसनारोगानश्यंतीह शिवार्चनात् ॥ चंद्रप्रभासे यो गत्वा ग्रहणे चंद्रसूर्ययोः कृत्वा स्नानार्चने दानं मुच्यते सर्वकिल्बिषैः ॥ स्नानदानादिकं चापि चद्रहासे शुभाशुभं ॥ कृतं नृपवरश्रेष्ठ सर्वं भवति चाक्षयं ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं ॥ ये भोजयंति विप्राग्र्यान् चंद्रतीर्थे सुभक्तितः ॥ चंद्रहास्येतु यः स्नात्वा पश्यंति ग्रहणं नराः ॥ वाचिकं मानसं पापं कर्मजं यत्पुराकृतं ॥ स्नानार्चनेन राजेंद्र तत्र तीर्थे प्रणश्यति ॥ बहवस्तन्न जानंति महामोहसमन्विताः ॥ देहस्थमिव सर्वेषां परमात्मानमव्ययं ॥ पश्चिमे सागरे गत्वा सोमतीर्थे तु यत्फलं ॥ तत्समग्रमवाप्नोति सोमतीर्थे नरो नृप ॥ संक्रांतौ च व्यतीपाते अयने विषवे तथा॥ चंद्रहासे नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥ ते मूढास्ते दुरात्मानस्तेषां जन्म निरर्थकं ॥ सोमेश्वरं नार्चयंति तथा दीपप्रदा न ये ॥ रेवायां भृगुकच्छस्थं दृष्ट्वा सोमेश्वरं शिवं ॥ युक्तः पापैर्दशविधैः स्नात्वा मुक्ता भवंति हि ॥ चंद्रहासे च यः कश्चित् सन्यासं कुरुते नृप ॥ अनिवर्तिका गति स्तस्य सोमलोकात्कदा च न ॥ इति श्रीरेवामहात्म्ये उत्तरे भृगुकच्छेसोम तीर्थनाम ॥ मार्कंडेय उवाच ॥ धनुः शतद्वये तस्माद्वाराहं तीर्थमुत्तमं॥उद्दीर्णो यत्र वाराहो यत्राभूद्धरणीधरः ॥ धावन् हठाच्च दंष्ट्राग्रे बिभ्रन्नागः पृथिवीमिमां ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सचात्रपंचमः प्रोक्तो वाराहो मुक्तिदः सतां ॥ युधिष्ठिर उवाच ॥ कथमुदीर्णरुपोभूद्वाराहो धरणीधरः ॥ वाराहत्वं गतः केन पंच
मः केन शङ्कितः ॥ मार्कंडेय उवाच ॥ आदिकल्पे महाराज क्षीरोदे भगवान् हरिः ॥ शेते स भोगिशयने विना निद्रां सुखाश्रि
तः ॥ लक्ष्मीकरांबुजस्पर्शमृज्यमानपदद्वयः ॥ तस्मिन् स्वपिति देवेशे भाराक्रांता वसुंधरा ॥ गत्वोवाच सुरान्पार्थ गमिष्यामि रसा
तलं ॥ तया सह समुद्विग्ना देवा गत्वा जनार्दनं ॥ तुष्टुवुर्वाग्भिरिष्टाभिः क्लेशघ्नं जगतः पतिं ॥ देवाऊचुः ॥ नमोनमस्ते देवेश सु
रार्तिहर सर्वग॥विश्वमूर्ते नमस्तुभ्यं त्राहि विश्वंभरा भयात् ॥ नमो गिरिशवंद्याय गजेंद्रार्तिहराय ते ॥ कामपित्रे नमस्तुभ्यं त्रा
हि विश्वंभरा भयात् ॥ नमस्तेस्तु ध्रुवाधार भास्करांशुबलप्रद ॥ नमो बुद्धजगत्प्राण त्राहि विश्वंभरां भयात् ॥ नमोनंतस्वरूपाय
जगद्वंद्याय ते हरे ॥ व्यक्ताव्यक्तस्वरूपाय त्राहि विश्वंभरां भयात् ॥ पालनेकव्रतं देव त्वयैवोरीकृतं यतः ॥ अतस्त्वं प्रार्थ्यसे देवै
स्त्राहि विश्वंभरां भयात् ॥ त्वयैवेदं जगद्व्याप्तं व्याप्तं च स्वकर्मसु ॥ दिक्पाला लोकपालाश्च त्राहि विश्वंभरामतः ॥ सर्वेषाम
पि लोकानामाधारः कारणं मही ॥ स्वर्मोक्षनरका भूमेस्त्राहि तां महतोभयात् ॥ प्रवृत्तं च निवृत्तं च कर्म भूमेर्यतो विभो॥ त्वन्ना
था याचते सेयं ससुरा त्राहि तां भयात् ॥ मार्कंडेय उवाच ॥ एवं स्तुतः सुरै र्विष्णुरुवाच किमुपस्थितं ॥ ब्रूत कार्यं सुराः शीघ्रं
यत्कृते मामुपागताः ॥ देवाऊचुः ॥ धात्री धरा हि भूतानां भारखिन्ना निमज्जति ॥ तामुद्धर हृषीकेश लोकान् स्थापय संस्थितौ॥
एवमुक्तः सुरैः सर्वैः केशवः परमेश्वरः ॥ वाराहं रूपमास्थाय सर्वयज्ञमयं विभुः ॥ दंष्ट्राकरालं पिंगाक्षं समाकुंचितमूर्द्धजं ॥ कृत्वा
नंतं पादपीठं दंष्ट्राग्रेणोज्जहार गां ॥ सपर्वतवनामाशु समुद्र परिमे खिलां ॥ उद्धृत्य भगवान् विष्णुरुदीर्णः समजायत ॥ दर्शयन्प
चधात्मानमुत्तरे नर्मदातटे ॥ तत्राद्यं कोरिलापीठे द्वितीयं योध नीपुरे ॥ जयक्षेत्राभिधानेन योजयेत्याख्यया स्मृतः ॥ असुरान्मोह
यन् लिंकस्तृतीयः परिकीर्तितः ॥ पावनात्पालनाद्विश्वे स्थितो यस्माच्छाशिप्रभः ॥ अतस्तु नृपशार्दूल स श्वेते त्यभिधीयते उद्ध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्य जगतीं देवीं उद्दीर्णो भृगुकच्छके ॥ उद्दीर्णः पंचमस्तस्माद्वाराह इतिसंज्ञितः इति पंचवराहास्ते कथिता पांडुनंदन ॥ युगपद्दश
नात्तेषां ब्रह्महत्या प्रणश्यति ॥ ज्येष्ठे मासि सिते पक्षे एकादश्यां विशेषतः ॥ गत्वा ह्यादिवराहं तु पूर्वतो दशमीदिने ॥ हविष्य
मन्नं भुंजीयाल्लयं सावगते रवौ ॥ रात्रौ जागरणं कुर्यादादिवाराहपार्श्वतः ॥ ततः प्रभाते ह्युषसि संस्नात्वा नर्मदाजले ॥ देवापितॄंश्च
संतर्प्य तिलैर्यवविमिश्रितैः धेनुं दद्याद्द्विजे योगे सर्वोपस्करसंयुता ॥ निर्ममो निरहंकारो दानं दद्यात् द्विजातये ॥ गत्वा संपूजयेदं
वमादिवाराह संज्ञितं ॥ उपवासादिनियमान् गृहीत्वा वाग्यतस्त्वरन् ॥ निर्जलायां जलं त्यक्त्वाशक्त्या वोपानहौ नृप ॥ स्मरन्वि
ष्णुं जयन्विष्णुं स्तुवन्विष्णुं त्वरन् व्रजेत् ॥ अनेन विधिनाभ्यर्च्य पश्चा द्गच्छेजयाह्वयं ॥ त्वरितस्तु जयं गत्वा पौर्विकं विधिमाच
रेत् ॥ अश्वं दत्वा द्विजे योग्ये शक्त्या वा हेमदानकृत् ॥ तिलाश्चैवाविकं लिंके श्वेते चैवं हिरण्यदः ॥ तथोद्दीर्णे भुवं दद्यात्पौर्विकं
विधिमाचरेत् ॥ अनस्तमितआदित्ये वाराहान्पंच पश्यतः ॥ जायते यत्फलं पार्थ तदिहैकमनाः शृणु ॥ ब्रह्महत्या सुरापानं स्तेयं
गुर्वंगनागमः॥एभिर्वा सह संसर्गो विश्वस्तानां च वंचनं स्वसृदुहितृस्वस्रेयपितृभार्योपसेवनं॥आजन्ममरणाद्यावत्पापं भारतसत्तम॥
तीर्थपंचकपूतस्य वैष्णवस्य विशेषतः ॥ विनश्यत्येव युगपत् स्थूलं सूक्ष्मं लघूत्कटं॥आर्द्रं शुष्कं च नश्येद्वै तूलराशिरिवानलात ॥
नारायणानुस्मरणाजपध्यानाद्विशेषतः ॥ प्रणश्यंत्येव पापानि गिरिकूटसमान्यपि ॥ दृष्ट्वा पंचवराहान्वै पौरुषमहतिस्थितः ॥
आप्लुवन्नर्मदातोये श्राद्धं कुर्वन् यथाविधि॥उदयास्तमनादर्वाक् यः पश्येल्लुंठनेश्वरं ॥ मुक्तिं प्रयाति सहसा दुष्प्राप्या परमेश्वरीं ॥
कलेवरं विमुक्त्वापीत्येवमाह महेश्वरः ॥ पौरुषे क्रियमाणेपि न सिद्धिर्जायते यदि ॥ वदंति सुचिरं स्वर्गमपि पापान्वितस्य च ॥
यत्र तत्र गतश्चैवं भवेत्पंचवराहिकी ॥ जेष्ठे शुक्ले हरिदिने ध्रुवं तत्र वसेन्नरः ॥ आहिं जयं तथा लिंकं श्वेतमुद्दीर्णमेव च ॥ आ
श्रित्य तस्यां वस्तव्यं वराहं वै यतस्ततः ॥ जेष्ठे शुक्ले हरिदिने विष्णुना प्रभविष्णुना ॥ वाराहं रूपमास्थाय उद्धृता धरणी नृप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ तत्र पुण्यतमा तेना शेषाघौघनाशिनी ॥ दृष्ट्वा पंचवराहान्वै क्रोडमुद्दीर्णसंज्ञकं ॥ पूजयित्वा विधानेन पश्चाज्जागरणं निशि ॥
पंचभिर्वर्तिभिर्दीपान् घृतेनोज्वाल्य भक्तितः ॥ पुराणश्रवणैर्नृत्यैर्गीतवाद्यैः सुमंगलैः ॥ वेदैः सूक्तैश्च जाप्यैश्च क्षपयित्वा तु शर्वरीं
॥ यत्पुण्यं लभते मर्त्यो ह्याजमीढ शृणुष्वतत् ॥ रेवाजलं पुण्यतमं पृथिव्यां तथा च देवो जगतां पतिर्हरिः ॥ एकादशी पापह
रा पृथिव्यां बव्हायसो यश्च निजस्तथैव ॥ एकैकशो ब्रह्महत्यादिकान्वै शक्ता निहंतुं पापसंघान्नरेंद्र ॥ नैते सर्वे युगपद्दै समेतान्हं
तुं शक्ता किमुतद्वद्दि राजन् ॥ इतीदमुक्तं तव धर्मसूनो यद्दै श्रुतं शंकराचंद्रमौलेः ॥ श्रुत्वेदमित्थं मुच्यते पापसंघैः पठन्पदं याति
वृत्रस्य शत्रोः इति श्रीरेवामाहात्म्ये उत्तरे भृगुकच्छेउद्दीर्णवाराहतीर्थनाम चतुष्पंचाशदधिकशततमोध्यायः ॥ १५४ ॥ श्रीमार्कं
डेय उवाच परं तीर्थं ततो गच्छेत्पार्थ क्रमशतांतरे ॥ चंद्रप्रभासमिति यद्विख्यातं भुवनत्रये ॥ निष्पापस्य प्रभा पूर्णा यत्र चंद्र
स्य भारत सोमतीर्थे तु संस्थाप्य सोमनाथं सितद्युतिः ॥ आत्मानं यत्र मंगल्यैर्योजयामास सुव्रतः ॥ किंचित्यक्त्वा भुवोदेशं गु
रुं संस्मार ऋक्षराट् ॥ तथैव देवगंधर्वान् ऋषिसिद्धगणांस्तथा ॥ विधाय मंगलस्नानं मंत्रैश्चापि पृथग्विधैः ॥ मंगलालंभनं कृत्वा
गुरुणा संप्रयोजितं ॥ वेदोक्तांह्याशिषः प्राप्य विप्रर्षीणां तपस्विनां ॥ प्रभया सेवित श्चंद्रो ज्योत्स्ना प्राप विशेषतः ॥ ददौ दाना
नि बहुशो ब्राह्मणेभ्यो विधुर्नृप ॥ स्थापयामास तत्रेशं प्रभासेश्वरसंज्ञिकं ॥ सार्द्धं चणांकमुख्यैस्तं देवैर्ब्राह्मणसत्तमाः ॥ पूजयामा
सुरीशानं प्रभासेश्वरमादरात् ॥ दत्वा देवर्षयस्तस्मै चंद्राय विविधान् वरान् ॥ चंद्रप्रभासतीर्थाद्दैततो जग्मुर्यथागतं ॥ ततः प्रभृति
तत्तीर्थं विख्यातं पांडुनदन ॥ तत्र तीर्थे च यः स्नात्वा विधिवद्भर र्षभ ॥ देवान्पितृंश्च संतर्प्य तिलाक्षतजलैः क्रमात् ॥ श्राद्धं
कुर्यात्पितृणां यो यथा लब्धोप हारतः ॥ तार्पिताः पितरस्तेन युगमेकं युधिष्ठिर ॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ संक्रा
तौ च व्यतीपाते वासरे शिवसोमयोः ॥ स्नाने दाने जपे होमे पितृश्राद्धे कृते नृप ॥ पश्चिमाब्धेः प्रभासोत्थं फलं प्राप्नोति मान

CC-0. In Public Domain. Digitization by eGangotri

वः॥इति श्रीरेवामाहात्म्ये भृगुक्षेत्रे चंद्रप्रभासतीर्थ ॥ मार्कंडेय उवाच ॥ दशदंडांतरे पार्थ ततस्तीर्थं व्रजेच्छुभं ॥ सिद्धेश्वरं नाम सुराद्द्वादशादित्यसंज्ञकं ॥ अमृतश्रावि तं लिंगमाद्यं स्वायंभुवं तथा ॥ दृष्टमात्रेण येनेह ऋणमुक्तो भवेन्नरः ॥ पुरावर्षशतं साग्रमाराध्य परमेश्वरं ॥ यत्र प्रापुः परां सिद्धिमादित्याद्द्वादशैव तु ॥ अतः सिद्धेश्वरः प्रोक्तः सिद्धिदात्सिद्धिकांक्षिणां ॥युधिष्ठिर उवाच॥ कथं सिद्धेश्वरे प्राप्ताः सिद्धिं देवा द्विजोत्तम ॥ आदित्या इति यत्प्रोक्तं तन्मे विस्माहृदि ॥ तपस्युग्रे व्यवसिता आदित्या केन हेतुना ॥ मार्कंडेय उवाच ॥ पुरा ब्रह्मसुतो राजन् मरीचिर्नाम मानसः ॥ मरीचेः कश्यपो जात स्तस्य पुत्रास्तु द्वादश ॥ आदित्या द्वादशादित्या जाताः शक्रपुरोगमाः ॥ इंद्रो धाता भवत्त्वष्टा मित्रोथ वरुणोर्यमः ॥ विवस्वान्सविता पूषा अंशुमान्विष्णुरेव च ॥ त इमे द्वादशादित्या इच्छंतो भास्करं पदं ॥ नर्मदातटमाश्रित्य तपस्युग्रे व्यवस्थिताः सिद्धेश्वरे महाराज कश्यपेयैर्महात्माभिः ॥ परा सिद्धिरनुप्राप्ता द्वादशादित्यसंज्ञितैः॥अत्र पूर्वं तपस्तप्तं सनकाद्यैर्नृपोत्तम॥योगसिद्धिः॥परा प्राप्ता प्रसादात्पार्वतीपतेः ॥ साक्षात्समुत्थितस्तेषां लिंगरुपो महेश्वरः ॥ स्तुतः सपूजितस्तैश्च तत्र लिंगे नमस्कृतः ॥ सिद्धेश्वर इति ख्यातः प्राप्तसिध्ययतोर्चितः ॥ तदा प्रभृति विख्यातस्त्वादौ सिद्धेश्वरो विभुः ॥ तत्पार्श्वे च तदादित्यैस्तैश्च तत्यं तवो महत् सिद्धिं प्राप्य ततस्तैश्च मुदितैर्मनुजर्षभ ॥ स्थापितश्च जगद्धातुस्तीर्थे तस्मिन् दिवाकरः ॥ स्वकीयांशुविभागेन पृथग्द्वादशभिः सुरैः ॥ तदा प्रभृति तत्तीर्थं द्वादशादित्यसंज्ञितं ॥ सिद्धेश्वरसमीपे तु सर्वकामप्रदं परं ॥ प्रलये समनुप्राप्ते आदित्या दशापि ते ॥ द्वादशादित्यतो राजन्संभवामि युगक्षये ॥ इंद्रस्तपति पूर्वेण धाता चैवाग्निगोचरे ॥ भगस्तपति वै याम्ये त्वष्टा नैर्ऋतदिङ्मुखे ॥ वरुणः पश्चिमे भागे मित्रो वै वायुगौ॥चरेआर्यमा सौम्यदिग्भाग विवस्वानीशगोचरे ॥ उर्द्धं च सविता देवः अधः पा तपत्वलं ॥ अंशुमांश्च तथा विष्णु र्मुखतोस्य विनिर्गतौ ॥ प्रदहंतो जगत्पार्थ बभ्रमंति यतस्ततः ॥ यथैव ते महाराज दहते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सकलं जगत् ॥ तथैव द्वादशादित्या भाक्तनां भावशोधनाः ॥ प्रातरुत्थाय यः स्नात्वा द्वादशादित्यसांज्ञितं ॥ पश्यते तत्क्षणादेव
द्वादशादित्यदर्शनात् ॥ प्रदक्षिणं च यः कुर्यात्तस्य देवस्य भारत ॥ प्रदक्षिणीकृता तेन सप्तदीपा वसुंधरा ॥ कुरुक्षेत्रे तु यः सप्तस
प्तमीं समुपोषयेत् ॥ तत्र यत्फलमाप्नोति लभते तदिहैकया ॥ षष्ठ्यां रविदिने राजन् द्वादशादित्यदर्शनात् ॥ माघे मासि विशेषेण
शुक्लपक्षे तु सप्तमी ॥ तस्यां स्नात्वा च संपूज्य भास्करं यत्फलं शृणु ॥ अरोग सप्तजन्मानि धनमाप्नोति पुष्कलं ॥ पापैर्न लिप्य
ते सोपि पद्मपत्रमिवांभसा ॥ यश्च प्रदक्षिणशतं दद्याद्भक्त्या दिने दिने ॥ दद्रुकुष्ठविकुष्ठानि मंडलानि विचर्चिका॥नश्यंति व्याधयः
सर्वे गरुडादिव पन्नगाः ॥ पुत्रप्राप्तिश्च सौभाग्यं लभेच्छष्ठ्यां रविं यजन् ॥ विप्रांश्च भोजयन् शक्त्या तोषंकुर्याद्रवेर्नरः ॥ इति श्री
भृगुकच्छे द्वादशादित्यतीर्थं मार्कंडेय उवाच ॥ दशदंडांतरे तस्मात्प्रोक्तं सिद्धेश्वरं हि तत् ॥ तांलिंगं नृपतिश्रेष्ठ पूजितं सिद्धिदं
नृणां ॥ स्वायंभुवं परं लिंगं आदिकल्प समुद्भवं ॥ तत्र स्नात्वा विधानेन श्राद्धैः संतोषयेत्पितॄन् ॥ पूजयेत्परमेशानं युगान्येकोन
विंशति ॥ तोषयन्पदमाप्नोति शांकरं सर्वदुर्लभं ॥ तत्र सिद्धेश्वरी देवी द्वादशादित्यसिद्धये ॥ प्रादुर्भूता तदा पार्थ प्रिया सिद्धेश्वर
स्य तु ॥ पार्वती जगतां माता जगत्सिद्धिप्रदा शिवा विविधैरुपहारैस्तु पूजिता सा पुरामरैः ॥ तत्र सा दीपदानेन शक्त्या बलिनि
वेदनैः ॥ ददाति वांछितं नृणां सर्वकर्मसु सिद्धिदा ॥ इति सिद्धेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ दशदंडांतरे पार्थ तीर्थं तु कपिले
श्वरं ॥ सिद्धेश्वरांतिके गच्छेद्भुक्ति मुक्तिफलप्रदं ॥ तीर्थानां परमं तीर्थं कामधेन्वा विनिर्मितं ॥ रेवाया उत्तरे कूले भृगुक्षेत्रस्य म
ध्यतः ॥ सर्वपापहरं राजन् विख्यातं कपिलेश्वरं ॥ योसौ सनातना देवः पुराणेपरिपठ्यते ॥वासुदेवो जगन्नाथः कपिलत्वमुपागतः
॥ अतलात्सुतलं नाम तस्यैव वितलं ह्यधः ॥ गभस्तिमच्च तस्याधस्तामिश्रं ह्यंधमेव च ॥ पातालं सप्तमं यच्च अधस्तत्र सितं म २७६
हत् ॥ श्रूयतामभिधास्यामि क्रमशस्तद्यथास्थितं ॥ अधस्ता त्सप्तलोकानां नरकाः क्रमशः स्थिताः ॥ पातालानि यथा सप्त तला

CC-0. In Public Domain. Digitization by eGangotri

नां वै त्रयं तथा ॥ यावत्प्रमाणं स्यादूर्द्ध्वं परिच्छिन्नमहीयते ॥ तावत्प्रमाणमेवाधः कूपाकारं हि संस्थितं ॥ तेषां प्रत्येकशो मानं प्रमाणं परिकिर्तितं ॥ योजनानां सहस्राणि दश तत्वार्थदर्शिभिः ॥ सहस्रं योजनान्येषां दलान्यंतरनेमयः ॥ शुषिराणां प्रमाणं तं सहस्राणि नवैकशः ॥ तेन वै सुरमध्यस्थं नामतस्तन्महातलं ॥ दिव्यरत्नोपमं पत्रं श्रीमच्चामीकरांचितं ॥ नागराजः सदैवास्ते त स्मिन्क्षिति निकेतनं ॥ अनंतोनंतनामा च मुचुकुंदो नृपो बलिः ॥ ततो रसातलं नाम शिलासंघातभूमिकं ॥ वासुके नगिराजस्य तत्र चारुमहापुरं ॥ पुरं पुलोम्नस्तत्रैव दानवाधिपते र्महत् ॥ सुपर्वणश्च दैत्यानामन्येषां च महात्मनां॥ ततस्तलातलं नाम शर्करां चितभूमिकं ॥ नागानां तक्षकादीनां निवासस्तत्र तीर्तितः ॥ दानवाधिपतिनां च तत्रैव निलयो महान् ॥ विरोचनहिरण्याक्षप्रभृ तीनां महात्मनां ॥ ततः सुतलमित्युक्त पातालं पीतस्थलभूमिकं ॥ तस्य चार्द्धं हा सर्वेषां मृन्मयी कीर्तिता महि ॥ असुराधिपते स्तत्र कालनेमेर्महत्पुरं ॥ चारुचामीकरप्रख्यं वैनतेयस्य चापरं ॥ ततश्च नितलं नाम पातालं रक्तभूमिकं ॥ तस्मिन्मदांतको नाम दानवस्तु कृतालयः ॥ तारकोग्निमुखश्चैव प्र-हादश्च कृती स्थितः ॥ निवसंति कृतावासास्तथाप्र-हाददानवाः ॥ पातालं वितलं नाम शुक्लक्षीतितलं ततः ॥ कंबलाश्वतरौ नागौ सहितौ तत्र तिष्ठतः ॥ महाजंतोर्हयग्रीवप्रभृतीनां महात्मनां ॥ वराणामसुरेंद्राणां नि वासस्तत्र कल्पितः ॥ कृष्णक्षितितलं तस्यात्पातालं तलसंज्ञितं ॥ शंकुकर्णमहानादप्रभृतीनां निकेतनं ॥ गभस्तिमत्कृतश्चाथस्ता मिस्रं ह्यंधमेव च ॥ पातालं सप्तमं यच्च अधस्तात्संस्थितं महत् ॥ तत्रैव सच स्वसत्यहृपुराणः परमेश्वरः॥ स ब्रह्मा स महादेवः स चैव गरुडध्वजः ॥ पूज्यमानः सुरैः सिद्धैस्तिष्ठते ब्रह्मवादिभिः ॥ वसतस्तत्र राजेंद्र कपिलस्य जगद्गुरोः ॥ लीलया ना रदस्तत्र भ्रममाण उपागतः ॥ मुनिर्ब्रह्मसुतः श्रीमान् विष्णोः प्राणप्रियः सखा ॥ नारद उवाच ॥ महर्षे मे परिभ्रांतं जंबुद्वीपम शेषतः ॥ बहून्यपि च तीर्थानि भारते वर्षे उत्तमे॥न रेवा सदृशी क्वापि सरिदस्तीति मे मतिः ॥ भुवने भारतं पुण्यं तत्रापि च स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रीद्वरा॥ विंध्यपादप्रसूता सा रेवा देवादिदुर्लभा ॥ सर्वत्र दुर्लभा रेवा विशेषस्थानसप्तके ॥ शृणु तानि मुनिश्रेष्ठ समासात्कथया
मिते ॥ ॐकारः प्रथमस्तत्र शूलभेदस्तथा परः ॥ रेवोरिसंगमस्तद्वच्चतुर्थं कोरिलापुरं ॥पंचमं शुक्लतीर्थं वै षष्ठं च भृगुकच्छकं महर्षे
सप्तमः पुण्यो रेवासागरसंगमः ॥ एषु भ्रांतं हि भवता तीर्थसंस्थापना कृता ॥ भृगुकच्छमृते मन्ये तत्र योग्या भवास्थितिः ॥पुण्या
त्पुण्यतमं विद्धि तत्र क्षेत्रं भृगोः स्थलं ॥ सर्वे सुरर्षयः सिद्धाः शक्रयश्च गणेश्वराः ॥ ज्ञात्वा तीर्थविशेषं हि सर्वे तत्र कृतालयाः ॥
तस्मात्ते युज्यते गंतुं महानसि महच्च तत् ॥ मार्कंडेय उवाच ॥ इत्युक्त्वा नारदः पार्थ कथा कृत्वा पृथग्विधाः ॥ अपृच्छय त मृषि
श्रेष्ठं जगामाथ यथागतं ॥ ततः स कपिलोऽप्याशु गत्वा तस्माद्भृगोस्थलं ॥ तपश्चचार सुमहन्नर्मदातीरमाश्रितः ॥ यत्र सा कपिला
देवी कामधेनुः पुरातनी ॥ तपस्तप्त्वा परं तीर्थं स्थापयामास वै पुरा ॥ सर्वकामदुधा जाता लोकानां भरतर्षभ ॥ महेश्वरप्रसादा
त्तु तीर्थं चक्रेस्वसंज्ञया ॥ कपिलोप्यादिदेवो यः पुराणे परिपद्यते ॥ सोपि तत्र तपो तप्यद्भृगुक्षेत्रे समाहितः ॥ दिव्यं वर्षसहस्रं तु
ध्यायमानो महेश्वरं ॥ ततः साक्षान्महादेवः प्रोवाचेदं मुनिं प्रति ॥ महेश्वर उवाच ॥ वरं वरय भद्रं ते यद्यपि स्यात्सुदुर्लभं ॥
॥नूनं तव प्रदास्यामि किं क्लेशेन महत्मुने॥कपिल उवाच॥स्वनाम्ना तीर्थमत्रैव कर्तुमिच्छामि कामदं॥भृगुकच्छे महादेव त्रिकालं क
लिनाशनं॥निवसत्वं महेशान प्रसन्नो ह्यसि चेत्मयि॥प्रसादात्तव देवेश त्रिदशैरपि पूज्यते॥अत्र स्नानं प्रकुर्वंति मानवा येस्त्रभक्तितः॥ते
यांतु परमं स्थानं त्वत्प्रसादात्सुदुर्लभं॥एककालं द्विकालं वा त्रिकालं नित्यमेव च॥ये त्वांप्रपूजयंतीह भक्त्या नामोपचारतः॥न तेषां पुनरा
वृत्तिर्घोरे स्याद्भवसागरे॥प्रार्थिता कपिलेनैवं मुनिना स महेश्वरः॥एवं भविष्यतीत्युक्त्का तत्रैवान्तरधीयत॥तदा प्रभृति तत्तीर्थं विख्यातं
भृगुमंडले॥रुष्टतुष्टो महात्मासौ कपिलो मुनिसत्तमः॥स्थापयामास देवेशं लिंगरूपं सुशोभनं॥तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्व
रं॥गोसहस्रफलं तस्य जायते नात्र संशयः ॥ जेष्ठे शुक्ले महाराज चतुर्दश्यां समाहितः॥ तत्र स्नात्वा विधानेन भक्त्या दानं प्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छति ॥ पात्रभूते नृपश्रेष्ठ स्वल्पं वा यदि वा बहु ॥ अक्षयं तत्फलं प्रोक्तं शिवेन परमेष्ठिना ॥ अंगारकदिने प्राप्ते चतुर्थ्यां नव
मीषु वा ॥ स्नानं करोति पुरुषो नारी वा भक्तिसंयुता ॥ परमैश्वर्यमतुलं सौभाग्यं संततिं परां ॥ लभते सप्तजन्मानि गत्वा ग
त्वा पुनः पुनः ॥ पौर्णमास्याममायां वा स्नापितां पिंडदायिनां ॥ पितरस्तृप्तिमायांति द्वादशाब्दानि भारत ॥ तत्र तीर्थे च यो भ
क्त्या ददेद्दीपं सुशोभनं ॥ जायते तस्य राजेंद्र महादीप्तिः शरीरजा ॥ तत्र तीर्थे मृतानां तु जंतूनां किल भारत ॥ अनिवर्तिका
गतिः प्रोक्ता शिवलोकात्कदाच न ॥ कापिलं तीर्थमासाद्य भोजयेच्छक्तितो द्विजान् ॥ एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजि
ता ॥ इति श्रीरेवामाहात्म्य भृगुक्षेत्रे कपिलेश्वरतीर्थं ॥ श्री मार्कंडेय उवाच ॥ ततस्त्रिविक्रमं तीर्थं दंडद्वादशकांतरे ॥ यज्ञवि
ध्वंसनात्पूर्वं दानवेंद्रस्य वै बलेः ॥ कृते त्रिविक्रमे रूपे पातालं प्राप्य दानवं ॥ ज्ञात्वात्र प्राक्तनं कर्म स्वभक्तस्य विडंबनात् ॥
भृगुणाभ्यर्थितो देवस्तपस्तप्तुमिहागतः ॥ देवश्चिरं तपस्तप्त्वा स्थापयित्वा च धूर्जटिं ॥ भृगुणा पूजितो विष्णुर्जगाम स्वपुरं परं
॥ ततः प्रभृति राजेंद्र तीर्थं ख्यातं त्रिविक्रमं ॥ तत्र तीर्थे तु यः स्नात्वा पूजयित्वा पिनाकिनं ॥ दीपं दद्यात्सुरेशाय शक्तितो भो
जयेद्द्विजान् ॥ वर्षाणामयुतं पार्थ स वै शिवपुरे वसेत् ॥ ततो विष्णुपुरं याति देवगंधर्वपूजितः ॥ तिलोदकैस्तथा श्राद्धैस्तर्पयेद्य
श्च पूर्वजान् ॥ तृप्यंति पितरस्तस्य द्वादशाब्दानि भारत ॥ इति श्रीत्रिविक्रमेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ विश्वरूपं ततो गच्छे
त्क्रमद्वादशकांतरे ॥ भृगोर्न्यायामपाहंतु रूपं यत्र हरिर्दधौ ॥ स्वरूपं दर्शयत्येवं भृगुणा प्रार्थितो भुवि ॥ रूपं तद्दर्शयामास यत्पुरा
सुरसंसदि ॥ सुराणां दर्शितं पार्थ लोकानामभयंकरं॥मही पादं भुवो जानु स्वः कटिनाभिसन्महः ॥ जनहृच्च तपः कंठः सत्यलो
कः शिरो महत् ॥ चंद्रादित्योरुर्नेत्रं च दिशः श्रोत्रं च सहस्रपात् ॥ वातस्कंधकृतप्राणः सहस्राक्षं जगन्मयं ॥ ब्रह्मावक्त्रं शिवः
क्रोधौ त्रेताग्निर्जठरानलं ॥ किमुक्त्वा बहु राजेंद्र वक्तुं तत्रैव पार्थते ॥ पुरा सिद्धः सुरर्षीणां यद्वै विस्मयकारकं ॥ ततस्तुष्टाव स भृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुर्भक्त्या भागवतां वरः ॥ तद्दृष्ट्वा परमं रूपं चराचरमयं तदा ॥भृगुरुवाच ॥नमो देवाय महते नमो देवाय भास्वते ॥ नमश्चराचरत
नो व्यक्ताव्यक्ताय ते नमः ॥ स्त्रीपुंनपुंसकत्वेन त्रिधा येनाखिलं जगत् ॥ व्याप्तमेतन्नमस्तस्मै सदेकाय त्रिधात्मने ॥ मणिमाद्यष्ट
सिद्धिनां तपये चिंतचारिणे ॥ प्रवृत्ताय निवृत्ताय सिद्धरूपाय ते नमः ॥ मीलनोन्मीलने प्राहुर्यदक्षणोः सर्गसंकृती ॥ तस्मि न्न
मोस्तु देवाय विश्वरूपाय वेधसे ॥ रोमरोमांतरे लीना यस्य ब्रह्मांडकोटयः ॥ को वराकः कथं स्तौति तमीशानं सनातनं ॥ वि
स्फुलिंगा यथा वन्हेस्तथेदं यत्समुद्भवं ॥ यस्य तस्य नमस्योसौ निरीहो विश्वतोमुखः ॥ यन्मायामोहितं विश्वं नैकमन्यमुपाश्रि
तं ॥ तं नमाम्यादिपुरुषं सर्वकारणकारणं ॥ गुणातीतं गुणमयं भावभावविवर्जितं ॥ तमरूपं स्वरूपं वा विश्वरूपं नमाम्यहं ॥
त्वचोहं त्वद्गतप्राणस्त्वद्बुधित्स्वयि संश्रितः ॥ किंस्तौमि पार्थिवप्रज्ञः अतीतत्वामगोचरं ॥ भक्तिमेव परां मत्वा भजे त्वां जगतांगु
रो ॥ पाहि कृष्ण हृषीकेश त्वद्गतं मां त्वदाश्रयं ॥ मार्कंडेय उवाच ॥ भृगुणैवं स्तुतो विष्णुः प्रसन्नात्मा तमब्रवीत् ॥ तुष्टोहमया
स्तुत्या तव विप्रेंद्र सन्मते ॥ वरदोस्मि वरं ब्रूहि यद्यपि स्यात्सुदुर्लभं ॥ भृगुरुवाच ॥ उपसंहर विश्वेश रूपमेतदलौकिकं ॥ वि
श्वरूपाद्वयं तीर्थमद्यारभ्य भवत्विह ॥ त्वया चाधिष्ठितं नाथ वरमेनं ददस्व मे ॥ अत्रतीर्थे च यः कुर्याच्छ्राद्धं विधिवदीश्वर ॥ पि
तृनुद्दिश्य तत्तेषां गयाश्राद्धवदस्तु वै ॥ श्रीभगवानुवाच ॥ एवं भवतु विप्रेंद्र त्वया यत्प्रार्थितं भृगो ॥ अत्र तीर्थे हि यः कोपि
पूजयित्वा तु मां भृगो ॥ श्रद्धया कुरुते श्राद्धं पितृणां स्यात्तदक्षयं ॥ एवमुक्त्वा स विश्वात्मा तत्रैवांतरधीयत ॥ मार्कंडेय उवाच ॥
तत्र तीर्थे नृपश्रेष्ठ स्नात्वा यः पूजयेद्विभुं ॥ पूजितास्तेन सर्वेपि देवाश्च पितरस्तथा ॥ श्रद्धया च कृतं श्राद्धं गयाश्राद्धसमं भवेत् ॥
दीपं दत्वा च देवाय न स शोच्यः क्वचिद्भवेत् ॥ इति श्रीरेवामाहात्म्ये विश्वरूपतीर्थं नामपंचपंचाधिकशततमोध्याय ॥ १५५ ॥
श्रीमार्कंडेय उवाच ॥ ततोगच्छेत राजेंद्र क्रमद्वादशकांतरे ॥ तीर्थं नारायणाख्यं वै सर्वकल्मषनाशनं ॥ नारायणगिरिर्नाम्ना यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्र तिष्ठति केशवः ॥ युधिष्ठिर उवाच ॥ नारायणगिरिर्नाम विष्णोः कस्मान्महामुने॥श्रुतपूर्वं न मे विप्र वद कौतूहलं हि मे ॥ मार्कंडेय उवाच॥ संक्षेपात्कथयिष्यामि साध्यस्य चरितं महत् ॥ न हि विस्तरतो वक्तुं शक्ताः सर्वे महर्षयः ॥ आपो नारा इति प्रोक्ता यतः सृष्टा नरेण ताः ॥ कृत येनस्तासु विभुस्तेन नारायणो मतः ॥ एकार्णवे प्रसुप्तस्य कल्पादौ नृपसत्तम ॥ नारायणस्य नाभ्यब्जाज्जातो देवश्चतुर्मुखः ॥ तस्य दक्षोंगजो राजन् दक्षिणांगुष्ठसंभवः ॥ धर्मस्तनांतराज्जातस्तस्य पुत्रो नरोभवत् ॥ नारायण सहायोसावजोपि भरतर्षभ ॥ अरुंधती वसुर्जामिर्लंबाभानुमरुत्पती ॥ संकल्पा च मूहूर्ता च साध्या विश्वा च ता दश ॥ दशध र्मस्य पत्न्यस्ता दाक्षायिण्यो महाप्रभाः ॥ तासां साध्या महाभागा पुत्रान जनयन्नृप ॥ नरो नारायणश्चैव हरिः कृष्णस्तथैव च ॥ विष्णोरंशांशका ह्येते चत्वारी धर्मसूनयः ॥ तेषां नारायणनरौ गंधमादनपर्वते ॥ आत्मन्यात्मानमाधाय तेपतुः परमं तपः ॥ ध्या यमानावनौपम्यं स्वकारणमकारणं ॥ वासुदेवमनिर्देश्यमतर्क्यं च त्वनंतरं ॥ योगयुक्तौ महात्मानावास्थिवुरुताप्यता ॥ तयो स्तपः प्रभावेन न तताप दिवाकरः॥ववावाशंकितो वायुः सुखस्पर्शो ह्यशंकरः शिशिरो भवदत्यर्थं ज्वलन्नपि विभावसुः ॥ सिंहव्या घ्रादयः सौम्यश्चैरुः सहमृगैर्गिरौ॥त योगौरिव भारार्त्ता पृथिवी पृथिवीपते॥चचाल भूधराश्चेलुश्चक्षुभे च महोदधिः॥देवाश्च स्वेषु धिष्ण्यो षु निष्प्रभेषु हतप्रभाः॥बभूवुरवनीपालाः परमक्षोभमागताः॥देवराजः परं शक्रः संत्रस्तस्तपसा तयोः ॥ युयुजाप्सरसश्रेष्ठास्तयोर्विघ्न चिकीर्षया॥इंद्र उवाच॥रंभे तिलोत्तमे कुब्जे घृताचि ललिते शुभे॥अम्लोचे शृणु प्रम्लोचे सौरभेयि मदोद्धते॥अलंबुसे मिश्रकेशि पुंडरी के वरुथिनी ॥ दर्शनीयं हि बिभ्राणा वपुर्मन्मथबोधनं॥गंधमादनमासाद्य कुरुध्वं वचनं मम॥नरनारायणौ तत्र तपोदिक्षान्वितौ द्वि जौ ॥ तप्येते धर्मतनयौ तपः परमदुश्चरं ॥ तावस्माकं वरारोहः कुर्वाणौ परमं तपः ॥ कर्मातिशयदुखार्तिप्रदावायतिनाशनौ ॥ त द्गच्छत न भीः कार्या भवतीभिरयं वचः ॥ स्मरः सहायो भविता वसंतो दक्षिणानिलः ॥ रूपं वचः समालोक्य मदनोद्दीपनं परं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कै-३५७९

॥ कंदर्पवशमभ्येति विवशां को न मानवः॥ मार्कंडेय उवाच ॥ इत्युक्त्वा देवराजेन मदनेन समं तदा ॥ जग्मुरप्सरसः सर्वा वसंतश्च महीपते ॥ गंधमादनमासाद्य पुंस्कोकिलकुलाकुलं ॥ चचार माधवो रम्यं प्रोत्फुल्लवनपादपं ॥ प्रववौ दक्षिणाशोच्छा मलयानुगतोनिलः ॥ भृंगमालारुतरवै रमणीयमभूद्वनं ॥ गंधश्च सुरभिः संघो वनराजिसमुद्भवः ॥किन्नराणांच यक्षाणां बभूव घ्राणसौख्यदः ॥ वरांगनाश्च ताः सर्वा नरनारायणावृषी ॥ विलोपयितुमारब्धा गायंत्यो ललितस्मिते: ॥ जगुर्मनोहरं काश्चिन्ननृतुस्तत्र चापराः॥ अवादयंस्तथैवान्या मनोहरतरं नृप ॥ हावैर्भावैस्स्मितैर्लास्यै स्तथान्या वल्गुभाषितैः ॥ तयोः क्षोभाय तन्वंग्यश्चकुरुद्यममंजसा ॥ तथापि न तयोः कश्चिन्मनसः पृथ्वीपते ॥ विकारो भवदध्यात्मपारसंप्राप्तचेतसोः ॥ निर्वातस्थौ यथा दीपावकंपौ नृप तिष्ठतः ॥ वासुदेवार्पिते स्वस्थे तथैव मनसी तयोः ॥ पूर्यमाणोपि चांभोभिर्भुवमन्यां महोदधिः ॥ यथा न याति संक्षोभं तथा तन्मानसं क्वचित् ॥ सर्वभूतहितं ब्रह्म वासुदेवमयं परं ॥ मन्यमानौ न रागस्य द्वेषस्य च वशं गतौ ॥ स्मरोपि नशशाकाथ प्रवेष्टुं हृदयं तयोः ॥ विद्यमाने यथा दीपेह्यंधकारमिवालयं ॥ पुष्पोज्वलान्तरुवरान्वसंतं दक्षिणानिलं ॥ नाश्चैवाप्सरसः सर्वा कंदर्पं च महामुनी ॥ प्रारब्धतपसोरयोगात् अध्यात्मज्ञान सिद्धिदः ॥ ददृशातेखिलं रूपं ब्रह्मणः पुरुषर्षभ ॥दाहायेनानलो वन्हे न विक्लेदाय चांभसः ॥ तत्रत्यमेव तद्द्रव्यविकारा यत्र वै यतः ॥ ततो विज्ञानविज्ञेयपरब्रह्मस्वरूपयोः ॥ मधुकंदर्पयोषित्सु विकारो नाभवत्तयोः ततो गुरुतरं यत्र वसंतमदनो नृप ॥ चक्राजेजाश्च तन्वंग्यस्तत्क्षोभाय पुनः पुनः॥अथ नारायणो धैर्यं संधायोदारमानसः ॥ उरोरुत्पादयामासुः कराभ्यामबलां तदा ॥ त्रैलोक्यसुंदरी रत्नमशेषमवनीयतें ॥ गुणा लघुत्वमायांति यस्याः संदर्शनादनु ॥ तां विलोक्य महोपाल चकंपे मनसा निलः ॥ वसंतोविस्मयं यातः स्मरति कंचन ॥ रंभा तिलोत्तमा धाश्च विलक्ष्यादेव योषितः ॥ न रेजुरवनीपाल लज्जाक्रांतहृदीक्षणाः ॥ ततः कामोवसंतश्च पार्थिव्यप्सरसाश्चनाः ॥ प्रणम्य भगवंतौ तौ तुष्टुवुर्मुनिसत्तमौ ॥ अप्सरा उवा २७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च ॥ प्रसीदतु जगद्धाता यस्य देवस्य मायया ॥ विजानीमो नांतरं हि मोहिताह्यवनी ययौ ॥ प्रसीदतु स नौ देवो यस्य रूपमि
दं द्विधा ॥ धामपूतस्य लोकानामनादेरवतिष्ठतः ॥ नरनारायणौदेवौ शंखचक्रगदाधरौ ॥ आस्तां प्रासाद सुमुखावस्माकमपराधि
नां ॥ विधानं सर्वविद्यानां सर्वपापेंधनानलः॥ नारायणोनो भगवान्सर्वं पापं व्यपोहतु ॥ शार्ङ्गचक्रायुधः श्रीमान् आत्मज्ञानमयो
नघः ॥ नरः समस्तपापानि हत्वान्मासर्वदेहिनां ॥ जटाकलापबांधोयमनयोस्तु क्षमावतोः॥ सौम्यो च दृष्टिपापानि हंतु जन्मार्जि
तानतः ॥ अनात्मविद्या दोषेण योपराधः कृतोमहान् ॥ अस्माभिर्जगतामीश क्षम्यतां भवता हि सः ॥ शरणं हि प्रपन्नानां तवा
स्म इति वादिनां ॥ प्रसादं पितृहंतृणामपि कुर्वंति साधवः ॥ एष एव वधोस्माकमविवेकादितोमहान् ॥ त्रैलोक्यबंधू यन्नाथौ
विलोभयितुमागताः ॥ प्रसीद देहि विज्ञानं येन मूढादिशामिव ॥ भवंति संतः सततं सद्धर्मस्योपदेशकाः ॥ दृष्ट्वैवनसमुत्पन्नं य
था स्त्रीरत्नमिदृशं ॥ त्वयि नारायणोत्पन्ना तथा परवती मतिः ॥ तेन सत्येन सत्यात्मन्परमात्मन्सनातन ॥ नारायणप्रसीदेश
सर्वलोकपरायण ॥ प्रसन्नबुद्धे शांतात्मन् प्रसन्नवदनेक्षण ॥ प्रसीद योगिनामीश नरः गताच्युत ॥ नमस्यामोनरं देवं यथा नारा
यणं हरिं ॥ नमोनराय रम्याय नमोनारायणाय च ॥ प्रपन्नानामनाथानां त्वां नाथमभिकांक्षतां ॥शंकुरुष्व नरास्माकं शं नाराय
णदेहि नः ॥ मार्कंडेय उवाच ॥ एवमभ्यर्चितस्तुत्या रागद्वेषविवर्जितः ॥ मदेशः सर्वभूतानां मध्येनारायणोनृप ॥ प्रपन्नवदनोवि
क्ष्यप्रोवाच कलया गिरा ॥ स्वागतं माधवे कामे भवत्वप्सरसामपि ॥ यत्कार्यमागतानां च इहास्माकं तदुच्यतां ॥ यूयं संसिद्धये
नूनमस्माकं बहुशत्रुणा ॥ संप्रेषितास्ततोस्माकं नृत्यगीतादिदर्शितं ॥ नावा हि नृत्यगीतेन नागचेष्टासु भाषितैः ॥ शक्यौ लो
भयितुं नार्थोविषयाणां च दुर्गमं ॥ उपभुक्तं विषं हंति विषयास्मरणादपि ॥ शब्दादिसंगदुष्टानि यदानाक्षाणिनः शुभा
॥ तदनृत्यादयोभावाः कथं लोभप्रदायिनः ॥ तौ सिद्धौस्तेनवै साध्यौ भवतीनां स्मरस्य च ॥ माधवस्य तु शक्रस्य स्वास्थ्यं यातु

CC-0. In Public Domain. Digitization by eGangotri

सदेवराट् ॥ योसौ परस्तथानंतः पुरुषः परमेश्वरः ॥ परमात्मा समस्तस्य स्थावरस्य चरस्य च ॥ उत्पत्तिहेतुरंते च यस्मिन्सर्वं प्रतिष्ठितं ॥ सर्ववासी च देवस्त्वाद्वासुदेवेत्युदाहृतः ॥ वयमंशांशकास्तस्य चतुर्व्यूहस्य मानिनः ॥ यदादेशेन वर्तात्मो जगद्बोधाय चासकृत् तं सर्वं सर्वभूतेशं सर्वत्रसमदर्शिनं ॥ पश्यंत कुत्र रागादीन् करिष्यामोविभेदिनः ॥ वसंते मयि चंद्रे च भवतीषु तथा स्मरे ॥ यदा स एव भूतात्मा रागद्वेषादयः कुतः ॥ तन्मयान्यविभक्तानि यदा सर्वेषु जंतुषु ॥ पृथिव्यापस्तथा तेजोवायुराकाशमेव च ॥ तथेंद्रियाण्यहंकारोबुद्धिश्च न पृथक् यतः ॥ समदृष्टे कुतस्तस्य रागद्वेषादयस्ततः ॥ ब्रह्माणमिंद्रमीशानमादित्यं मरुतोखिलान् ॥ विश्वेदेवान् ऋषीन् साध्यान् वसून्पितृगणांस्तथा ॥ यक्षराक्षसभूतादीन् नागान् सर्पसरीसृपान् ॥ मनुष्यपक्षिगोरक्षगजसिंहजलेचरान् ॥ मक्षिकादंशमशकान् शलभानलसान् कृमीन् ॥ गुल्मवृक्षलतावल्ली त्वक् सारतृणजातिषु॥यच्चकिंचिदवश्यं वा दृश्यं वा त्रिदशांगनाः ॥ मन्यध्वं जातमेकस्य तत्सर्वं परमात्मनः ॥ जानानास्त्वमहाविष्णुमात्मानं परमेश्वरं॥ रागद्वेषादि रिपुभिः प्रीतिं बध्नाति कोवलाः ॥ सर्वभूतस्थिते विष्णौसर्वगे सर्वधातरि ॥ जाते दृष्टे पृथग्भूते कुतोरागादिकोगणः ॥ एवमस्मासु युष्मासु सर्वभूतेषु चावलाः ॥ वन्मयैकत्वभूतेषु रागाद्यवसरः कुतः ॥ सम्यक् दृष्टिरियं प्रोक्ता समस्तैक्यावलोकिनी ॥ पृथक् विज्ञानमानैव लोकसंव्यवहारवत् ॥ भूतेंद्रियांतःकरणप्रधानपुरुषात्मकं ॥ जगद्यदेतदखिलं तदा भेदः क्रियात्मकः ॥ भवंति लयमायांति समुद्रसलिलोर्मयः ॥ न वारिभेदतोभिन्नास्तथैवैक्यमिदं जगत् ॥ यथाग्नेरर्चिषः पीता पिंगलारुणधूसराः ॥ तथापि नाग्नितोभेदास्तथैतद्ब्रह्मणोजगत् ॥ भवतीभिश्च तत्क्षोभमस्माकं सपुरंदरः ॥ कारयत्यसदेत च्च विवेकाकारचेतसां ॥ भवत्यः स च देवेंद्रोलोकाश्च ससुरासुराः ॥ यथेयं चारु सर्वांगी भवतीनां मया यतः ॥ दर्शिता दर्शयिष्यामि तथा चैवाखिलं जगत् ॥प्रायात शक्रं मागवत्वंमिंद्रत्वं कस्य सुस्थिरं ॥ यूयं च विस्मयं यातं संतिरुपास्तथा स्त्रियः ॥ किं सुरूपं कुरूपं वायत्राभेदोन दृश्यते ॥ तारतम्यं सुरूपत्वे सततं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिन्नदर्शनात् ॥ भवतीनां स्वयं मत्वा रुपौदार्यगुणान्वितं ॥ मयेयं दर्शिता तन्वी सत्सर्वे कामखेलितं ॥ यस्मात्सदूरोनिष्यन्नामी यभींपीवरेक्षना ॥ उर्वशीनामकल्याणी भविष्यति वराप्सरा ॥ तदियं देवराजस्य नीयतां वरवर्णिनी ॥ भवत्यस्तेन चास्माकं प्रेषिता: प्रीतिकाम्यया ॥ वक्तव्यश्च सहस्राक्षोनामास्कं भोगकारणात् ॥ तपश्चर्या न चाप्राप्यं फलं प्राप्तुमसांप्रतं ॥ संमार्गमस्य जगतोदर्शयिष्यंति करोम्यहं ॥ तपोनारायणसहितो जगतः पालकोद्यतः॥यदि कश्चित्त वाबाधां करोति त्रिदशेश्वर ॥ तमहं वारयिष्यामि निवृत्तोभववासव ॥ कर्तासि वेत्वमाबाधामदुष्टस्येह कस्यचित् ॥ तवापि शास्ता तमहमितिज्ञेय मशंसयं ॥ इतिज्ञात्वा नसंतापयत्स्वयाकामोहि सांप्रति ॥ परित्राणाय जगतामुपकाराय मेस्थितं ॥ या चेयमुर्वीशीमत्तः समुद्भूता पुरं दर ॥ त्रेताग्निहेतुभूते यमैलंप्राप्य भविष्यति ॥ अप्सरस उवाच ॥ भगवन् भवतायेयमुपदेशे हितार्थिना ॥ प्राक्तः ससर्वोविज्ञातोमहात्म्यं विदितं च ते ॥ यदेव द्भवता प्रोक्तं प्रसन्नेनाव्यं यात्मना ॥ दर्शितेयं विशालाक्षी दर्शयिष्ये च वोजगत् ॥ यदि देयोपराधेपि नास्मासुकुवितस्ततः ॥ तन्नाथ सर्वभावेन प्रपन्नानां जगत्पते ॥ कृपया जगतामीश दर्शयात्मा नमात्मवा ॥ मार्कंडेय उवाच ॥ इत्युक्ते भगवान्देवस्तदा नारायणोनृप ॥ उच्चैर्जहासस्व नवत्तदाभूदखिलं जगत् ॥ ब्रह्मा प्रजापतिः शक्रतत्र रुद्राश्च सेश्वराः ॥ आदित्यावसवः साध्या विश्वेदेवा महर्षयः ॥ नासत्पदस्त्रौ मरुतः सर्वेशाश्वतथाग्नयः ॥ यक्षगंधर्वरक्षांसि पिशाचाः किं नरोरगाः ॥ समस्ताप्सरसोविद्याः सांगावेदास्तदुक्तयः ॥ मनुष्याः पशवः कीटा पक्षिणः पादपास्तथा ॥ सरीसृयाश्चयेसूक्ष्मा चान्यत् जीवसंज्ञकं ॥ समुद्राः सरितः शैलाः काननानि वनानि च ॥ द्वीपाण्यशेषाणि तथा सरासि च जगत्रयं ॥ नगरग्रामसंपूर्णा मेदिनी पेत ॥ तथा गताभिर्देवस्य देहे दृष्टं जगद्वितोः ॥ नक्षत्रग्रहताराभिः सुसंपूर्णं नभस्तलं ॥ ददृशुः मात्मनातास्तु तस्यांतर्विश्वरुपिणः ॥ उर्द्ध न तिर्यङ् ताधश्च यदांतस्तस्य दृश्यते ॥ तमनं तमनादिं च तुष्टुवुस्तास्ततः प्रभुं ॥ अधुना ससमीरेण मदनैन समं शुभाः ॥ साध्वसा च भक्तिपराः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परं विस्मयमागताः ॥ अप्सरसउचुः ॥ यश्यामनादिं तव देवनांतं नमध्यमव्याकृतरुपपारं ॥ परायणं तं जगतामनंतं नतास्म नारायणमात्मभूतं ॥ महीदिवं वायुजलाग्नियस्त्वं शब्दादिरूपश्च परावरात्मन् ॥ त्वत्तोभवत्यच्युतसर्वमेतत् भेदादिरुपोपि न भेद वात्त्वं ॥ द्रष्टासि रुपस्यरसस्यवेत्ता श्रोतासि शब्दस्य हरेत्वमेकः स्प्रष्टा भवान् सर्वगतोखिलस्य घ्रातासि गंधस्य पृथक् शरीरात् ॥ सुरेषु सर्वेषु नसोस्ति कश्चित् मनुष्यलोकेपि नसोस्ति कश्चित् ॥ पश्वादिवर्गेषु नस्तोस्ति नूनं यं नांशभूतस्तवदेवदेव ॥ ब्रह्मेंद्ररुद्र प्रमुखानिविष्णो दिग्लोकपालादितवोत्तमानि ॥ समुद्ररुपं तवधैर्यवस्तु तेजः स्वरूपेषु रविस्तथाग्निः क्षमाधरेषु क्षितिरुपमव्ययं शीघ्रेषु शीघ्रं वलवत्सु चायुः ॥ मनुष्यरुपं तव राजवेषोजडेषु मूढेषु च यादपोसि ॥ दर्पानितेघच्युतदानवस्त्वं तथाभिजातश्च विवेकवसु ॥ रसस्वरुपेण जलस्थितोसि गंधस्वरुपश्च तथा धरित्र्यां॥रुपात्मकश्चापि हुताशने त्वं स्पर्शस्वरुपं भवतः समीले॥शब्दात्मकं ते नभसि स्वरुपं मंतव्यरुपो मनसः प्रभोत्वं॥बोधा च बुद्धौ प्रथितस्त्वमेक सर्वत्रसर्वेश्वरसर्वभूतं॥इमः सकामाः समरुद्धसंतः सुविस्मिता चस्वरशाः सुरेश ॥ पश्यंति तेनाभिसरोजमध्ये ब्रह्माणमीशं च हरं भृकुघां ॥ तथा स्विनौ कर्णतौ समस्ता भवास्थिता त्वाहुषु लोकपालान् ॥ घ्राणेनिलं नेत्रगतौ रवींदुजिव्हाश्रितां नाथ तथा सरस्वतीं ॥ पादौ धरित्रीं जठरं समस्तान् लोकान हृषीकेश विलोकयामः ॥ जंघेवयं पादतलां गुलीषु पिशाचयक्षोरगसिद्धसंधान ॥ पुस्त्वेप्रजानां पतिरोष्टयुग्मे प्रतिष्ठितास्तेक्रतवः समस्ताः ॥ सर्वेष्ययस्ते दशमेषु देव दंष्ट्रासु देवा भवनश्च तज्ञाः ॥ रोमाण्यशेषस्तव देव संधा विद्याधरा नाथ तवांरुरेखाः ॥ सांगाः समस्तास्तव देव वेदाः समास्थिताः संधिषुर्बहु युक्ताः वरावरुपं च तथा करालं पश्यामि ते वाजिशिरस्तथोयैः ॥ अश्वस्तयः शक्रपुरी प्रपन्नस्त्रिविक्रम यचनदाप्रमेयं ॥ अग्नीसमुद्रास्तव देहदेहे सर्वेंद्रियः शैलवरास्तथामी ॥ इमाश्च गंगाप्रमुखास्त्वं त्योद्वीपाण्य शेषाणि वनानि देव ॥ स्तुवंति चे मे मुनयस्तवैवदेहेस्थिता स्वन्महिमानमग्र्यं ॥ त्वामीशितारं जगतामनंतं यज्ञैः समभ्यर्च्य चंयं: ज्विनीमो ॥ त्वत्तोनु सौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्यं जगतीह किंचित्त्वतोन रौद्रं च समस्तमूर्ते ॥ त्वतोन शीतं न च केशवोष्णं सर्वस्वरुपातिशयीत्वमेव॥ प्रसीद सर्वेश्वरसर्वभूतस नातनात्मम् परमेश्वरे इ ॥ यन्मायया मोहितमानसाभिर्यते पराधं तदिदंक्षमस्व ॥ किंवापराधस्तव देव विष्णो यन्मायया मोह दयंत ॥ पापानिशंकिप्रणतातिहंतृन् मनोहनोविव्हलतामुपैति ॥ नते पराधं यदि तेपराधमस्माभिरुन्मार्ग्रविवर्तिनीभिः ॥ तक्षम्य तां सृष्टिकृतस्तवैवदेवापराधः सृनतेविवेकात् ॥ नमोनमस्ते गोंविदनारायणजनार्दन ॥ त्वन्नामशरणातापमाशपंनः प्रणाशतु ॥ न मो नमस्ते वैकुंठ श्रीवत्साज्वांवलोचन ॥ त्वन्नामशरणात्पापमशेशंनः प्रणशतु ॥ नमोस्तुते जनानाय चराचरकृते हरे ॥ त्वन्नाम शरणात्पापमशेषन्नः प्रणश्यतु ॥ नमः परस्मै शांताय वासुदेवाय वेधसे ॥ स्वछयागुणयुक्ताय सर्ग्रस्थित्यंतहेतवे ॥ परमा नुग्रहोस्मासु विश्वरूपप्रदर्शनात् ॥ यत्वया मेरुपृष्ठेवै दर्शितं सुरसंसदि ॥ पुरेयच भृगोः प्रीत्या प्रार्थया न सदर्शितं ॥ यन्नः प्रदर्शि तं रुपं सांप्रतं कृपया विभो ॥ उपसंहर विश्वात्मन् रुपमेतदकृत्रिमं ॥ वर्धमानं ननोदृष्टुं समर्थं चक्षुरीश्वर ॥ प्रलयाग्र्यर्घ कोटीनां समादीप्तिस्तवाच्युत ॥ प्रमाणेनदिशो भुमिर्गगनं चेदमादृतं ॥ नविघ्नः कुत्र वार्ता मोभवान्नाथोहि लक्षते ॥ सर्वं जगदिहैकस्थं पिं डितं लक्षयामहे किंवर्णयामारुपं ते ।किं प्रणाममिदंहरे ॥ माहात्म्यं किंनुते देव जिव्हवायन्न गोचरे ॥ वक्तारोवास्यलक्षेण बुद्धिनाम युतायुतैः॥गुणनिर्वर्तनं नाथ तव वक्तुं भवरग्ल्हं॥तवेद दर्शितं रुपं प्रसादः परमः कृतः छंदतोजगतामीश त्वमेतदुपसंहर ॥ मार्कं० ॥ एवं संस्तुवतस्ताभिरप्सरोभिर्जनार्दनः ॥दित्यज्ञानोपपन्नानां तासां प्रत्यक्षमीश्वरः॥विवेशसर्वभूतानि स्वैरं शैभूतभावनः ॥ तं दृष्ट्वा सर्वभूतेतु लीयमानमधोक्षजं ॥ विस्मयं परमं चकुः समस्तादैव पोषितः ॥ स च सर्वेश्वरः शैलातपादयान् सागरान् भुवं जलमग्निं तथा वायुमाकाशं च विवेशह ॥ देवदानवरक्षांसि यक्षाविद्याधरारेगान् ॥ मनुष्यपशुकिटादि मृगपाक्षिसरीसृपान् छंतरिक्षेतथा भूमौ दिवियेचजलाश्रयाः ॥ तांविशेषसविश्वात्मा पुनस्तद्रुपमास्तितः ॥ नरेणसार्द्धं यन्नाभैर्दृष्टपूर्वमरिदम ॥ताः परं विस्मयं गत्वा सर्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 त्रिदशयोषितः प्रणेमुः साध्वसं पांडुवदना नृपसत्तम ॥ नारायणोपि भगवानाहतं त्रिदशां गताः ॥ नीयतामुर्वशोभद्रायत्रा सौत्रि
 दशेश्वरः ॥ भवतीनां हितार्थाय सर्वभूतेष्वसाविति ॥ ज्ञानमुत्पादितं भूयोलयं भूतेषु कुर्वतां ॥तद्गच्छतसमस्तोयं भूतग्रामोमदंशकः
॥ अहं मध्याभिभूतस्य वासुदेवस्य योगिनः ॥ अस्मात्परतरं नास्ति योनंत परिपष्यते ॥ तमजं सर्वभूतेशं जानितं परमं पदं ॥
अहं भवत्योदेवाश्च मनुष्यापशवश्च ये ॥ एतत्सर्व मनंतस्य वासुदेवस्य वैकृतं ॥ एतज्ज्ञात्वा समं सर्वं सदेवासुरमानुषं ॥ सपश्चादिग
णां श्चैव द्रष्ठव्यं त्रिदशांगनाः ॥ श्रीमार्कंडेय उवाच ॥ इत्युक्तस्तिनदेवेन समस्तादिव्ययोषितः ॥ प्रणम्यताः समदनासवसंतादि
कान्नृप ॥ आदाय चोर्वशीं योवै देव राजमुपागता ॥ आचक्षुश्च यथा वृत्तदेवराजा य न तथा मार्कंडेय उवाच ॥ तथा त्वमपि
राजेंद्र सर्वभूतेषु केशवं ॥ चिंतयन्समतां गछ समतैवहि मुक्तये ॥ जानन्नेवमशेषेषु भूतेषु परमेश्वरं ॥ वासुदेवं तथा लोकान् दोषा
दीन्नप्रहास्यसि ॥ सर्वभूतानि गोविंदोयदान्यानि च भूपते ॥ तथा वैरादयोभावाः क्रियतां कस्य केन चित् ॥ इतिपश्यन् जग
त्सर्वं वासुदेवात्मकं नृप ॥ यमंतः पुरुषं कृत्वा परं निर्वाणमृछति ॥ जन्मादि भावरहितं ताद्विष्णोः परमं पदं ॥ श्रीमार्कंडेय उवा
च ॥ तच्छ्रुत्वा नंदनवने विश्वरूपमुदा हृतं ॥ सहदेवैर्देवराजः परं विस्मयमागतः ॥ दृष्ट्वा वाप्सरसं ण्यामुपूर्वशीं
कमलेक्षणां ॥ सत्रस्तोविस्मितश्चाभुछक्रोराज्यश्रिया वृतः ॥ न किंचिदुत्तरं वाक्यमुक्तवान् जोषमास्थितः ॥ पुनः पुनः
स्मरन् भक्त्या नारायणविचेष्ठितं ॥ प्रणामार्थं ततः शक्रस्ततोविभुः समागतः ॥ तावतातावनुप्राप्तौ रेवातीरे भृगोछलं
॥ सहस्रं मदर्सं वादाताभिरुद्वेजितोयतः ॥ दोषसंख्यानलेशकोश्रुतौ शक्रणनिर्मितौ ॥ तत्रेत्यं दंडवद्भूमौ लुठितास्तोप्रण
म्य च ॥ नरनारायणौ देवानृषीतुष्टाव भक्तितः ॥ जानुभ्यामवनिं स्थित्वा बद्धां जलिरुदारधीः ॥ इंद्र उवाच ॥ स्तौमि
दिव्यगिरा देवं नारायणमकल्मषं ॥ चराचरगुरुं सौम्यं भक्तानाम भयप्रदं ॥ सर्वभूताश्रयोयद्वगिरिर्भवति निर्भयः॥ यया नारा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ गिरिर्गिरीणामाधारं नगिरामपि गोचरं ॥ निर्गुणं गुणिनामग्र्यं नौमिनारायणं गिरिं ॥ नारायण
यणगिरिर्विश्वाधारस्थितोमहान् ॥ गिरिर्गिरीणामाधारं नगिरामपि गोचरं ॥ निर्गुणं गुणिनामग्र्यं नौमिनारायणं गिरिं ॥ नारायण
यणगिरिर्विश्वाधारस्थितोमहान् ॥ गतिरस्मद्विधानां त्वं सर्वलोकपरायणः॥अहमाग्निर्यमोयक्षोयदोपतिमरुद्धनीः॥ईशानप्रमुखादेवाः त्व
नमस्तेस्तु नारायणनमोस्तुते ॥ गतिरस्मद्विधानां त्वं सर्वलोकपरायणः॥अहमाग्निर्यमोयक्षोयदोपतिमरुद्धनीः॥ईशानप्रमुखादेवाः त्व
यैवस्थापिताः सह ॥ स्तोतास्तुतिर्गीर्धिषणायत्तस्वतोखिलं विभो ॥ तदात्वं श्रूयसे केन कथं किंब्रूहि केशव ॥ तस्मान्नमोनमस्ते
स्तु नारायणगिराकृतः ॥ गिरागिरिर्यतः प्रोक्तो नारायणजगन्मय ॥ तस्मान्नारायणगिरिर्नाम्नाख्यातोभवत्विह ॥ पंचविंशतितत्व
भ्यः परमात्मन् परोह्यासि ॥ तेन सत्येन मां पाहि पुरःपतितमंजसा ॥ वसन् विश्वेषु भूतेषु वासुदेवाद्ययोसियत् ॥ व्याप्तं चैतद्य
तोविश्वं बिष्णुत्वेन प्रकीर्तितः ॥ तेन सत्येन मां पाहि पद्मनाभ कृतागसं ॥ एकमेव परं ब्रह्म त्वमेवासि चराचरे ॥ मूर्तामूर्ति
स्वरूपेण न किंचिद्रहितं त्वया ॥ विस्फुलिंगा यथा वन्हे र्वारिधेर्विप्रषो तथा ॥ वथा त्वत्तोजगत्सर्वं तेन मां पाहि केशव ॥ श्रीमा
र्कंडेय उवाच ॥ एवं तु स्तुवतस्तस्य शक्रस्य परमेश्वरं ॥ नरेण सहसंतुष्टोदेवोनारायणोब्रवीत् ॥ स्वर्गे तं ते सुरेशान् ब्रूहि यत्ते
भिवांछितं ॥ तुष्टोस्म्यनयास्तुत्या वरं वरय सुव्रत ॥ इंद्र उवाच ॥ वश्योस्मितवभृत्योस्मि निदेशे तव संस्थितः ॥ क्षम्यतां यदि
ते किंचिदपराधोविभो मम ॥ लोकानामुपकाराय तीर्थेस्मिन्संनिधौ भव ॥ ममोद्वेगं यदा कुर्युर्दैत्यदानवराक्षसाः॥तदा तदा परित्रा
णं त्वया कार्यं जगत्पते ॥ नारायण उवाच ॥ एवमस्तु सुरश्रेष्ठ त्वया यदिहभाषितं ॥ सर्वं तद्भविता नूनं परित्राणपरोस्मिते
॥ नारायणगिरशक्र यदुक्तोस्मि त्वया सकृत् ॥ नारायणगिरिर्नाम्ना यच्चोक्ता गिरिवद्गिरा॥ तस्मान्नारायणगिरिर्नाममम मास्त्विति
वासव॥यस्माद्विभतिसर्वेषां तस्माद्गिरिरितीर्यते॥यथा सर्वाश्रयः शक्र गिरिपर्वतराट् भवेत् ॥सुरासुरमनुष्याणां तेषामपि तथा श्रमः॥
यएतत्पूजयिष्यंति मंडलं परमं मम॥नारायणगिरिर्नाम्ना दिव्यरूपं सुरेश्वर॥दिव्यज्ञानसमायुक्तोदिव्यदेहविचेष्टितः॥दिव्यलोकेनमस्यं
ति दिव्यदेहसमन्वितं ॥ इत्युक्त्वा देवदेवोपि तत्रैव स्वयमास्थितः ॥ साकं नरेण विभुना तपस्तेपे स्वसिद्धये ॥ इंद्रोपि देवमापृच्छ्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वपुरं प्रति जग्मिवान् ॥ इति ते कथितं तीर्थं नरनारायणद्वयं ॥अत्र तीर्थे च यःस्नात्वा श्राद्धे संतर्पयेत्पितॄन्॥यजेन्नारायणं भक्त्या
सकल्पंविष्णुलोकभाक् दत्वा च कपिलां तत्र कामधेनुपुरं वसेत् ॥ कृष्णाजिनं च कौपीनं छत्रं दंडं कमंडलुं ॥ यतिनां चैव वि
प्राणां शक्त्या दत्वा च भोजनं॥ऊर्ध्वलोकेषु सर्वेषु सवसेत्काममीप्सितं॥इतिश्रीनर्मदामहात्म्येभृगुक्षेत्रेनर नारायणतीर्थनामषट्पंचा
धिकशततमोध्यायः ॥ १५६ ॥ श्रीमार्कंडेय उवाच ॥ ततोगच्छेन्महाराज धनुर्द्वादशकांतरे॥ मूलश्रीपतिसंज्ञं वै तीर्थं पापप्रणाशनं॥
तत्र नारायणोदेवोमूलश्रीपतिसंज्ञितः॥ पूजितरपापसंघातकस्तीर्थे समाश्रितः ॥युधिष्ठिर उवाच॥कथं नारायणोदेवोमूलश्रीपतिसंज्ञि
तः ॥ तत्र तीर्थे मुनिश्रेष्ठ वदैतद्विस्तरान्मम ॥ श्रीमार्कंडेय उवाच ॥ वृत्तांतोयं तवाख्यातो नरनारायणस्ययः ॥ सवै नारायणः
श्रीमान् श्रियःपतिरजायत ॥ भृगोःख्यात्यां समुत्पन्ना पुराश्रीः स्त्रीशिरोमणिः ॥ बभूवाथविवाहस्य योग्या सावरमिच्छति ॥
सुश्राव केवलं कृष्णं हरिं नारायणजनात् ॥ विश्वरूपं परं श्रुत्वा विस्मिताचिंतयत्तदा ॥अत्यद्भुतचरित्रोसौ विश्ववंद्यो जगत्पतिः ॥
केनोपायेन मे भर्ता सःस्यान्नारायणः प्रभुः ॥ व्रतेन तपसा वापि दानेन नियमेन वा ॥ वृद्धानां सेवया वाथ देवताराधनेन च ॥
इति चिंतापरां कन्यां सती ज्ञात्वा युधिष्ठिर॥ प्राह प्राप्तोमया भर्ता शंकरस्तपसा किल ॥ प्रजापतिश्च यायत्र्या संज्ञाप्राप्तोरविः प
तिः ॥ शच्यां सुरेशश्चान्याभिः सर्वाभिरभिवांछिता ॥ तपसैव किल प्राप्तो तस्मा तच्चरसुव्रते ॥सुदुश्चरं महच्चाग्र्यं सर्ववांछितदायकं॥
सर्वं हि तपसः साध्यं परं कल्पतरुस्तपः ॥ श्रीमार्कंडेय उवाच ॥ सत्यं प्रोक्तमिदं वाक्यं लब्ध्वा श्रीः सर्वसाधनं ॥ सागरांतं स
मासाद्यसर्वलक्षणलक्षीता ॥ चचार विपुलं कालं तपः परमदुश्चरं ॥स्थाणुवत्संस्थिता चाभूद्दिव्यं वर्षशतं नृप॥एतस्मिन्नंतरे रेवा वि
ष्णुना प्रेषिताः स्वयं ॥ रूपं मे वैष्णवं देवादर्शयध्वं भृगोस्थले ॥ इंदिरातपते यत्र मदर्थं सासुदुष्करं ॥ततइंद्रादयोदेवाः शंखचक्र
गदाधराः ॥ भूत्वा जग्मुस्तदर्थं ते सातु प्रष्टवती सुरान् ॥ वैष्णवं विष्णुरूपं यत्तद्दर्शयतमाचिरं ॥ ततोविलक्ष्यव्रीडितास्ते गत्वा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारायणं सुराः ॥ अब्रवीत् विश्वरूपं नोशक्तादार्शयितुं प्रभो ॥ त्वया संप्रेषिताः संतः स्तत्कुरुष्व ममोचितं ॥ ततोयथेष्टं ते जग्मुः
सचविष्णु रचिंतयत् ॥ उग्रं तपश्रितादेवी देहं दहति भार्गवी ॥ तत्र गत्वा ह्यसंप्राप्य वरं दत्वा च वांछितं ॥ पुनस्तपः करिष्या
मि चरीष्यामि वापुनः ॥ वैष्णवं विश्वरूपं यद्दुर्दर्शं देवदानवैः ॥ ततोगत्वा हृषीकेशः सागरांतस्थितां प्रियां ॥ प्राह
तुष्टोस्मिते देवि वरं वरयसुव्रते ॥ अदेयमपिदास्यामियत्ते मनसि वांछितं ॥ श्रीरुवाच ॥ यदि तुष्टोसि मे देव प्रपन्नार्तिह
रप्रभो ॥ रूपं दर्शय यद्दष्टं सस्मरैरप्सरोगणैः ॥ तथा तातेन भृगुणा पुरा ब्रह्मादिकैः सुरैः ॥ विश्वरूपमनंतं तद्भूतभावनकेशव
॥ गंधमादनमासाद्य कृतं यत्तपसस्त्वया ॥ तद्वदस्व प्रभोमह्यं निर्मायं यदि मे वद ॥ श्रद्धामैनवैवाहं रुपस्यास्य कथं
च न ॥ बहुभिर्यक्षरक्षोभिर्मायाचारित्रचारिभिः ॥ छंदिता ममजानद्भि र्भावमंतर्गतं हरौ ॥ भूत्वा विष्णुस्वरुपासो चक्रिणश्च चतु
र्भुजाः ॥ व्रीडितास्तु गता.सर्वे विश्वरूपमदर्शनं ॥ मार्कंडेय उवाच ॥ नारायणोथ भगवान् शंखचक्रगदाधरः ॥श्रिया तथोक्तस्तद्रूपं
मुक्तावै सुरपुजितं ॥ पूर्ववत्सयथोक्त वै विश्वरूपमदर्शयत् ॥ दर्शयित्वा च तां प्राह सदागमविधानतः ॥ योर्चयिष्वति मां सूभ्रू सं
पूज्यः सुरपूजितः ॥ धनधान्यसमायुक्तः सर्वभोगसमन्वितः ॥ मूलं हि सर्वधर्माणां ब्रह्मचर्यं परं तप ॥ गंधमादनयस्येह यत्वया
पृष्टमादरात् ॥ धर्म मूले न तेनाहमत्रस्थास्यामि भार्गवि ॥ त्वयाहं च जनैःपूज्योमूलश्रीपतिसंज्ञितः ॥ मूलश्रीप्रोच्यते ब्राह्मी ब्र
ह्मचर्यस्वरुपिणी ॥ धर्म्याणां धर्मणां मूलं चतुवर्गतरोः शुभा ॥ सर्वयागमया पुण्यासर्वपातकहारिणी ॥ पतिस्तस्याः प्रभुरहं वरदः
प्राणिनां प्रिये ॥ भृगुणा प्रार्थितः पूर्वमर्चितस्थानमाश्रितः ॥ रूपं हि तव तद्दिव्यं दर्शितं तत्र चापि च ॥ अहं नारायणे तीर्थे दे
वी पूर्वं कृतास्पदः॥ मूलश्रीपतीनाम्ना च स्थास्ये त्वत्पार्श्वतोर्चितः ॥ भुक्तिमुक्तिप्रदोनित्यं सुहृदां भक्तितोषितः॥रेवाजले नरःस्नात्वा
योर्चयेत्तंयतत्र ः ॥ मूलश्रीपतिनामानं सलभेद्वांछितं फलं ॥ दानानि तत्र योदद्यान्महत्पापि मम प्रिये ॥ सलक्षगुणितं पुण्य म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यस्थानादवाप्स्यति ॥ विश्वरुपेति संतंमां पूजयित्वा सनातनं ॥ सर्वकल्याणभृन्मर्त्यौभविता नचिरादपि ॥ द्रष्टुंन शक्ता यद्रूपं
सुरासुरमहोरगाः ॥ सिद्धकिंनरयक्षाश्च राजसाश्च कुतः परे ॥ दृष्टं त्वया तद्देवेशि सत्यं चित्ते प्रधारितं ॥ तदर्चित्वा वरान्कामान्
प्राप्स्यसि त्वं न संशयः ॥ वरं वृणीष्व देवेशि वांछितं दुर्लभं सुरैः ॥ दुर्गसंसारकांतारपतितैश्चापि भार्गवि ॥ अदेयमपिदास्यामि
माविलंबं कुरु प्रिये ॥ श्रीरुवाच ॥ नारायणजगन्नाथ नारायणजगन्मय ॥ प्रसीद पाहि मां भक्तां धर्मे सम्यक् नियोजय ॥ प्रियो
सि मे प्रियाहं ते यथा स्यांतत्तथा कुरु ॥ त्रिवर्गसाधनं पुण्यं गार्हस्थं देवसंश्रया ॥ तमास्थायाश्रमं पुण्यं मयासहजगत्पते॥पंच
यज्ञक्रियायुक्तोभवभाग्यविभावन ॥ मार्कंडेय उवाच ॥ तया संविदिते चैवं देवइंद्रपुरोगमाः ॥ समागतास्तमुद्देशं सागरांतं महर्षयः
॥ ततोभृगु र्देवराजो नारायणविचिंतितं ॥ज्ञात्वा वव्रे च तत्कन्यां धर्मायासौ ददौ च तां ॥ धर्मोपि विधिवद्दत्तसविवाहं समकारयत्॥
देवदेवस्य राजेंद्र देवतार्थे समाहितः॥युधिष्ठिर उवाच॥धर्मौविवाहमकरो द्विधिवद्यत्त्वयोदितं॥कोविधिस्तत्र कादत्ता दक्षिणाभृगुणापिच॥
स्रुकस्रुचग्रहणेनात्र विवाहेत्वभवच्च कः ॥ऋत्विजः के सदस्याश्च तत्रासन्मुनिसत्तम ॥किं तस्यावभृथं चासीत्तत्सर्वं विस्तराद्वद ॥ त्व
द्वाक्यामृतपानेन तृप्तिर्मम न विद्यते ॥ मार्कंडेय उवाच ॥ नारायणविवाहस्य यज्ञे यद्विधिलक्षणं ॥ तपसस्तस्य देवस्य सम्य
गाचरणेन च ॥ वक्तुं समर्थो न गुणान् चतुर्वक्रोपि नेश्वरः ॥ तथाप्युद्देशतो वच्मि शृणु भूप समाहितः ॥ ब्रह्मा सप्तर्षयस्तत्र स्रुक्
स्रुवग्रहणे रताः ॥ अग्नीन् जुहुविरे त्तत्र वेदी धात्री ससागरा ॥ ददुः समुद्रा रत्नानि ब्रह्मर्षीणां परंतप ॥ वेश्मानि सुविचित्राणि
सर्वरत्नमयानि च ॥ कृत्वा प्रदर्शयामास देवेंद्रोथयशस्विने ॥ शतद्रुस्तु ततो विप्रान्कपिंजलपुरोगमान् ॥ शौनकादींश्च पप्रच्छ बा
ष्कलान् छागलानपि ॥ आत्रेयानपि राजेंद्र शृणुध्वमपि वांछितं ॥ श्रीमार्कंडेय उवाच ॥ दृष्ट्वा ते रत्नचित्राणि गृहाणि शयना २८४
नि च ॥ आसनानि विचित्राणि सर्वान्न्यानुपस्करान् ॥ दृष्ट्वैतदद्भुतं सर्वं प्राहुः शक्रं महर्षयः ॥ देवानां च ऋषीणां च संगमोयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुपुण्यकृत् ॥ अस्मिन्पुण्ये सुरेशान वस्तुमिछामहे सदा॥शतक्रतुपुरीत्वाह वसवोत्र भविष्यति ॥ इंद्र उवाच ॥ सत्यधर्मारत
यावत्कालं यूयं भविष्यथ ॥ तावत्कालनिवासो वो भविष्यत्यत्र निश्चितं ॥ मार्कंडेय उवाच ॥ एवं विवाहयज्ञे वै प्रवृत्ते नृपसत्त
माः ॥ धर्मस्य च भृगोर्जातो वरवध्वोः समागमे ॥ सनत्कुमारप्रमुखाः सदस्यास्तत्र वाभवत् ॥ उद्गात्रमंत्र्यंगिरसो मरीचिश्च चकार
ह ॥ हौत्रं धर्मवसिष्ठौच ब्रह्मत्वं सनको नृप ॥ षट्त्रिशच्छतसहस्त्रं प्रादत्तैन्यः शतक्रतुः॥लक्ष्मींसत्कारयुक्तां च दत्वैवं भृगुणा सह॥ब्र
ह्मणा जुव्हता वन्हिर्यविद्देशस्थितैः सुरैः ॥ दृष्टं ललाटं देशोसौ ललाटइति संज्ञितं ॥ स देशः श्रीपतेः क्षेत्रं पुण्यं देवर्षिसंज्ञितं ॥
सर्वाश्चर्यमयं दिव्यं दिव्यसिद्धिसमन्वितं ॥ ब्राह्मणांस्तत्र वै राजन्विवेशयतुमिच्छामि ॥ मरीचाद्याः सुरेंद्रेण स्थापित:
किलसुव्रता: ॥ नैष्ठिका व्रतिनो विप्रा यतयोत्र धृतव्रताः॥ प्रजापत्ये पदं ब्राह्मे किंचिलब्धपदा द्विजाः ॥ तानहं स्थापयि
ष्यामि त्वत्प्रसादाज्जनार्दन ॥ ततः कौतुहलपरो भगवान् गरुडध्वजः ॥ पप्रच्छ व्रतिन: सर्वान् वृत्तिभेदव्यवस्थितात् ॥ नारदोपि
महादेवं संप्राप्य सतिवल्लभं ॥ देवकृष्णाजिनधरा नैष्ठिका ब्राह्मणाप्यमी ॥ अमीकार्पासवस्त्रेण छन्नगुह्या द्विजोत्तमाः ॥ प्राजापत्या
श्चतुर्विंशत्सहस्त्राणि सुरेश्वर ॥ ब्रह्मचर्यव्रतस्थानां पदं ब्राह्म जयर्षिणां ॥ द्वादशैव सहस्त्राणि संति वै वृषभध्वज ॥ नारदस्य वचः
श्रुत्वा देवादेवर्षयोपि च ॥ साधुसाध्विति मन्वाना नोचुः केचिन्न किंचन ॥ श्रीस्ततस्तान्समाकार्य ब्राह्मणान् भक्तिसंयुतान् ॥शिरः
प्रणम्य प्रोवाच प्रसादः क्रियतामिति॥षड्विंशद्वै सहस्त्राणि वेश्मनामत्र संस्थितैः ॥ विश्वकर्मकृतानां तु तेषु तिष्ठंतु वै द्विजाः ॥ मा
र्कंडेय उवाच ॥ ते तथैव प्रतिज्ञाय स्थिताः संप्रति मानसः ॥ ऋग्वेदादिचतुर्वेदाध्यायिनः परमोज्वलाः ॥ धनधान्यसमृद्धाश्च वां
छितप्राप्तिलक्षणाः ॥ सर्वकामोपसंपन्ना ग्रहक्लेशविवर्जिताः ॥ इति संस्थाप्य तान्विप्रान् श्रीः सदा प्रत्यपालयत् ॥ एवं वैवाहमखे
निवृत्ते ऋषयस्तु ते ॥ पप्रच्छुः श्रीपतिस्थानं तत्र कुर्म जनार्दनं ॥ इत्याकर्ण्य वचस्तेषां श्रीपतेः पादपंकजात् ॥ मुमोच जान्हवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोयं रेवामध्यगमं शुचि ॥ तस्य पादोदकं दृष्ट्वा निर्गतं ऋषयश्च ते ॥ विस्मिताः समपश्यंते नाज्ञातं तस्य गौरवं ॥ रुद्रस्य च पुरो
देवा ऋषयश्च तपोधनाः ॥ विस्मिताश्च कथाश्चक्रुर्धुनंतः स्वशिरांसि च ॥ शंभो किमेतद्भो ब्रूहि सहसा वारिसंभवः ॥ पादाग्रात् ध
र्मपुत्रस्य पश्यता नारायणस्य यत्॥श्रीशं पादांबुजोत्थं वा संमोहकरजं जलं॥महेश्वर उवाच॥पादोदकमिदं विष्णोरहं जानामि वै
सुराः ॥ यदत्र विष्णुना सृष्टं दक्षिणांघ्रिमुखादिदं ॥ महत्तीर्थमिदं जातं स्नानादिकविधायिनं ॥ दशाश्वमेधावभृथैः स्नानमत्रा
तिरिच्यते ॥ युष्माभिः श्रीपतिः पृष्टः क्रकुर्मेस्नानमच्युत ॥ ततस्तेनात्मपादाग्रात् कृपयांबु प्रकाशितं ॥ स्नात्वेह त्रि
दशेशान यत्फलं प्राप्यते नरैः ॥ प्रवक्तुं तेन तच्छक्यं विबुधा किं वदामि च ॥ एवमुक्तास्ततः सर्वे स्नानं कृत्वा मुदा
न्विताः ॥ स्थित्वा वै तत्र तत्तीर्थे जग्मुः शिवमुखाः सुराः ॥ ब्राह्मणाश्च ततः सर्वे स्ववेश्मन्यैव भेजिरे॥ एवं बभूव तत्तीर्थं मूलश्री
पतिसंज्ञितं ॥ स्नाने श्राद्धे तथा दाने पूज्यते द्विजभोजने ॥ जपे होमे च राजेंद्र शतसाहस्रकं फलं ॥ तत्र तीर्थे नृणां नूनं नात्र
कार्या विचारणा ॥ तथैव देवखातेपि सर्वपापप्रणाशने ॥ इतिश्रीनर्मदामहात्म्ये भृगुकछेमूलश्रीपतितीर्थनामसप्तपंचाशदधिकशतत
मोध्याय ॥ १५७ ॥ मार्कंडेय उवाच ॥ तत्रैव च महाराज दंडद्वादशकांतरे ॥ चौलश्रीपतीसंज्ञं तु तीर्थं मंगलदायिकं ॥ वृते श्रि
याथ विधिना पाणिग्रहणकर्माणि ॥ विसर्जिते सुरगणे ऋषिसिद्धगणे तथा ॥ जलकेलिप्रसक्ताया रमायाः पतिना मुदा ॥ प्रेमपूरि
तचित्तेन गृहीत्वांके च तां तदा ॥ रहस्यं मन्यमानेन कृतं वक्त्रस्य चुंबनं ॥ दृढं विधूतचूलाया तेन प्रीतो भवत्स्मरः ॥ कृत्वोत्संगे
न तन्मूर्द्धा तूलाबंधे चकार सः ॥ तदा वियद्गतैर्देवैर्दृष्टो नारायणः स्वयं ॥ प्रेमचूलानिबंधाय प्रियायाः स्मरनिर्जितः ॥ ततो देवैश्च
सिद्धर्षिगवैः समुपागतैः ॥ सर्वैस्तत् प्रार्थितश्चैव विष्णुरद्धा प्रपश्यतु ॥ देवा ऊचुः॥ कामकेलिप्रसते वै देववक्त्रे न युज्यते ॥ अस्मदै
वेतथान्यश्च देवैरुच्चावचैर्विभो ॥ तथापि जगतामीशं किमपि प्रार्थयामहे ॥ विश्वस्य पितरं विष्णुं श्रीसमेतं मुदान्वितं ॥ यत्र चू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लानिबंधस्ते कृतः पत्न्याःपरार्तिहन् ॥ प्रेमपूरितचित्तेन श्रीपतेनर्मदातटे ॥ चौलश्रीपतिसंज्ञंवै तीर्थमेतद्भवत्विह ॥ दंपत्योः प्रीतिजननं स्नानार्चनविधानतः ॥ सौभाग्यपुत्रसंतानदायकं कृपया विभो ॥ नारायण उवाच ॥ एवं भविष्यतीत्युक्त्वा लज्जाक्रांतमुखे हरिः ॥ श्रीसमेतो महाराज तत्रैवांतरधीयत ॥ श्रीमार्कंडेय उवाच ॥ तत्र तीर्थे सदा पार्थ स्नात्वा संपूज्य श्रीपतिं ॥ पितॄन् नांदीमुखश्राद्धे तृप्तान् कृत्वा विधानतः ॥ अमंगलप्रदं त्यक्त्वा मंगलं चिरमाप्नुयात् ॥ श्रीपतेर्लोकमाप्नोति यत्र गत्वा न शोचति ॥ इति श्रीरेवामाहात्म्ये चौलश्रीपतितीर्थं नाम ॥ मार्कंडेय उवाच ॥ युधिष्ठिर महाराज देवतीर्थमतः शृणु ॥ सर्वतीर्थमयं पुण्यं देवर्षिगणसेवितं ॥ युधिष्ठिर उवाच ॥ देवतीर्थमिदं कस्मात्स्थितं तत्कियदं तरं ॥ कोदेवस्तत्र माहात्म्यं तीर्थेयैः किमुदाहृतं ॥ फलं किं स्नानदानादिकारणं जायते मुने ॥ मार्कंडेय उवाच ॥ देवतीर्थं नृपश्रेष्ठ चोलीश्रीपति तीर्थतः ॥ शृणु पार्थ परं पुण्यं धनुर्द्वादशांतरे ॥ पृथिव्यांयानि तीर्थानि देवै ऋषिगणैरपि ॥ सेवितानि महाबाहो तानि धातानि विष्णुना ॥ समागतान्यनेकानि तत्र तीर्थे युधिष्ठिर ॥ तथैव प्रस्थितान्येवं सर्व देवैः सहैवतु ॥ सर्वतीर्थे निवासा च अधिष्ठानाद्धरेर्नृप ॥ तत्तीर्थं वैष्णवं पुण्यं देवतीर्थमिति श्रुतं ॥ यत्रदेवर्षयः सिद्धाः परमानंदमाप्नुयुः ॥ कुरुक्षेत्रं भुवि पुरं नभस्येव त्रिपुष्करं ॥ पुरुषोत्तमतीर्थं वै विख्यातं परात्परं ॥ देवतीर्थ समं नास्ति त्रिषु लोकेषु भारत ॥ तत्रेच्छयामुनीनां हि सर्वतीर्थागमः कृतः ॥ हरिणा लोकपालेन विष्णुना प्रभविष्णुना ॥ दिक्पालैर्लोकपालैश्च वसुविश्वेमरुद्गणैः ॥ देवैरधिष्ठितं तीर्थं आदित्यैश्च युधिष्ठिर ॥ यत्राधिष्ठानमापन्नः सर्वदेवमयो हरिः॥ तत्प्राप्य मनुजस्तप्येन्न कदाचिद्युधिष्ठिर ॥ पृथिव्यां सर्वतीर्थेभ्यो यः स्नानमिह वै चरेत् ॥देवतीर्थे स सर्वत्र स्नातो भवति मानवः ॥ ऋषिसंघैः प्रार्थितेन तत्र नारायणेन तु ॥ आव्हानात्सर्व तीर्थानां कृतं तीर्थमिदं शुभं ॥ देवैर्दत्तवर सर्वैः सेवितं च सुरर्षिभिः ॥ स्नात्वा श्रीशं समभ्यर्च्य उपोष्यैकादशीं सितां ॥ यो पदातिहिरण्यादि दानानि मनुजोत्तमः ॥ तदनंतफलं स

CC-0. In Public Domain. Digitization by eGangotri

वै सूर्यस्य ग्रहणे यथा ॥ भूमिधेनुहिरण्यादिमणिमौक्तिकदानतः ॥ वज्रप्रवालरत्नानि पुण्यसंख्या न विद्यते ॥ देवतीर्थेषु यद्दानं
श्रद्धायुक्तेन दीयते ॥ तदनंतफलं प्राह बृहस्पतिरुदारधीः ॥ देवतीर्थं भृगुक्षेत्रे सर्वतीर्थाधिकं स्मृतं ॥ देवतीर्थे नरः स्नात्वा यः प
श्यति रमापतिं सोमग्रहे कुलशतं ससमुधृत्य नाकभाक् ॥ दानानि द्विजमुख्येभ्यो यैर्दत्तानि नराधिप ॥ देवतीर्थे नरैर्भाग्यभोगिनः
प्रेत्यचेहते ॥ देवतीर्थे नरो नारो स्नास्वा नियतमानसौ ॥ उपोष्यैकादशीं शुक्लां संपूज्य च रमापतिं ॥ रात्रौ जागरणं कृत्वा घृते
नोद्बोध्य दीपकं ॥ द्वादश्यां प्रातरुत्थाय स्नात्वा वै नर्मदाजले ॥ द्विजदंपत्यमभ्यर्च्य विधिना शक्तितो नृप ॥ वस्त्राभरण
तांबूलपुष्यधूपविलेपनैः ॥ ग्रीवासूत्रक सिंदुरैर्भोजनैश्च पृथग्विधैः ॥ अक्षये विष्णुलोके तौ मोदते चरितव्रतौ ॥ यः सदैकादशीं तीर्थे
स्नात्वोपोष्यार्चयेच्छिवं ॥ हरिं च भरतश्रेष्ठ रात्रौ जागरणान्वितैः ॥ वेदशास्त्रकथाभिश्च नृत्यगीतविनोदतः ॥ धर्मराज कृतं पापं न
स पश्यति यातनां ॥ पंचरात्रप्रदां पार्थ सुखसौभाग्यकारिणीं ॥ सुकलत्रप्रदां धर्म्यामायुर्बलविवर्द्धनीं ॥ विष्णुलोकप्रदां तद्वद्विष्णु
सारुप्यकारिणीं ॥ तरेद्धृवं भवांबोधिं स तरेत्कुरुनंदन ॥ योर्चयेदपि तत्रैव देवतीर्थे श्रियःपतिं ॥ विश्वरूपमयो सम्यक् मौलचौ
लाह्वयंहरिं ॥ नारायणगिरिं वापि ग्रहणे वा हरेर्दिने ॥ स्नाप्य पंचामृतैर्भक्त्या पुण्यैस्तीर्थोदकैरपि ॥ सुसूक्ष्मैर्हारितैर्वस्त्रैः पट्टकौशे
यकैरपि ॥ विचित्रैर्नेत्रजैर्वापि पुष्पधूपविलेपनैः ॥ गुग्गुलैर्घृतमिश्रैश्च नैवेद्यैर्विविधैरपि ॥ पायसाद्यैर्नृपश्रेष्ठ पयसा वा फलैरपि ॥घृत
दीपैः सुविमलैर्वर्द्धमानैर्मनोहरैः ॥ समाराध्य नरो याति तथा तच्छृणु भारत ॥ शंखी चक्री गदी पद्मी भूत्वासौ गरुडासनः ॥ दे
वलोकमतिक्रम्य विष्णुलोकं स गच्छति ॥ यश्चापि परया भक्त्या श्रीपतेः पादपंकजं ॥ चतुर्द्धाधिष्ठितं पश्यन् श्रियं त्रैलोक्यमात
रं ॥ नृत्यगीतविनोदेन नतिस्तुतिजपादिभिः ॥ नीराजनं च देवस्य प्रातर्मध्यंदिने तथा ॥ सायं च नियतो नित्यं यः पश्येत्पूजये
द्धरिं ॥ सतीर्त्वाह्यापदं दुर्गं नैवार्तिं संप्रद्यते ॥ आयुः श्रीवर्द्धनं पुंसां चक्षुषामपि पूरकं ॥ पापोपपापघ्नमलं सदानीराजनं हरेः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदा नीराजने काले स्तुतिं यः पठति प्रियां ॥ स धन्यश्चैव सततं प्रसंन्नेनांतरात्मना ॥ हरेर्नीराजनं शेषं पाणिभ्यां च परामृशत् संगृह्य चक्षुषी तेन अंजयेन्मार्जयेन्मुखं ॥ तिमिरादींश्चक्षुरोगान्नाशयेन्मुखदीप्तिकृत् ॥ भवत्यशेषदुःखानां नाशायालं नृपोत्तम ॥ दीपप्रज्वालनं यस्य नित्यमग्रे श्रियःपतेः ॥ स लभेच्चक्रवर्तित्वं मनसा यद्यदिच्छति ॥ यथा दीपप्रदानेन तुष्यते मधुहा हरिः ॥ न तथा बहुवित्तेन सुवर्णाद्येन भूमियं ॥ यस्तु प्रदक्षिणशतं हरेर्दद्याद्धरेर्दिने ॥ स्नात्वा रेवाजले पुण्ये साधिकं चाब्रवीन्नरः ॥ सप्तद्वीपवती तेन सब्धिद्वीपवनाद्रिका॥ प्रदक्षिणी कृता नूनमिति मे शंकरोब्रवीत् ॥ इदं यः पठयमानं वै शृणुयाद्वा पठेत वा ॥ स्मरणं सांतकालेपि विपाद: प्राप्नुयाद्धरेः ॥ इदं यशस्यमायुष्यं स्वर्ग्यं च पितृवल्लभं ॥ महात्म्यं श्रीपतेर्विप्रान् श्रावयेच्छ्राद्धकर्मणि ॥ मधुवाज्यपायसैः स्तेन तर्पितास्युः पितामहाः ॥ त्रिविक्रमादितार्थानि देवतीर्थांतकानि च ॥ वैष्णवानि भृगोः कच्छे प्रयोक्तानि तवाधुना ॥ यत्र स्नात्वा पितॄन्पते वैकुंठपदमाप्नुयात् ॥ इति श्रीरेवामहात्म्ये श्रीभृगुकच्छे देवतीर्थनाम ॥ मार्कंडेय उवाच ॥ हंसतीर्थं ततो गच्छेद्राजन् दंडशांतातरे ॥ यत्र हंसस्तपस्तप्त्वा वाहनं ब्रह्मणोभवत् ॥ कश्यपस्य सुतः पूर्वं दाक्षायिण्यां तु यो भवत् स्वमतिर्नाम यो हंसः सर्वदेवेषु पठ्यते ॥ दित्यदग्दिव्यगमवो रेवातीमुपेत्य च ॥ जगकर्तुर्वपुर्वोढुं तपस्तेपे चिरं महत् ॥ तपसस्तु प्रभावेन सिद्धौ च परितोषिते ॥ वाहनत्वं विधेः प्राप्य ब्रह्मलोकं जगाम ह ॥ तदा प्रभृति राजेंद्र हंसतीर्थमिति स्मृतं ॥ हंसतीर्थे नरः स्नात्वा दानं दत्वा तु कांचनं ॥ सर्वपापविनिर्मुक्तो ब्रह्मलोकमवाप्नुयात् ॥ हंसयुक्तेन यानेन तरुणादित्यवर्चसा ॥ सर्वकामसमृद्धेन सेव्यमानोप्सरोगणैः ॥ तत्र भुक्त्वा यथाकामं सर्वभोगान्यथेप्सितान् ॥ इहमानुष्यतां प्राप्य नरो जातिस्मरो भवेत्॥ सन्यासेन त्यजेद्देहं सद्यो मोक्षमवाप्नुयात् ॥ एतत्ते कथितं पार्थ हंसतीर्थस्य यत्फलं ॥ सर्वपापहरं धन्यं दुःस्वप्नारिष्टनाशनं ॥ इति रेवायां हंसतीर्थं ॥ मार्कंडेय उवाच ॥ ततो धनुः शतं गत्वा प्रभातीर्थमनुत्तमं ॥ हितार्थं सर्वभूतानां प्रभया स्थापितं पुरा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भृगुणा प्रार्थितौ पूर्वं प्रभासूर्यौ युधिष्ठिर ॥ रेवातीरे भृगोः क्षेत्रे चक्रतुः स्थानमादरात् ॥ ऋषीणां सुरसिद्धानां दृष्ट्वा स्थानान्यने
कशः ॥ भास्करश्च प्रभा चैव तत्र संनिहितौ स्थितौ ॥ महेशाराधने युक्तौ तपसा तीर्थकारणात्॥तत्र प्रभा तपस्तप्त्वा स्थापयामास
वै शिवं ॥ स्वनाम्ना स्थापनं चक्रे तीर्थस्य च विधानतः ॥ प्रसन्ने शंकरे पार्थ सार्थकं जन्मयो ययौ ॥ स्नात्वा तत्र नरो भक्त्या स
र्वपापैः प्रमुच्यते ॥ मृतः शिवपुरे याति तीर्थस्यास्य प्रभावतः ॥ स वै युगसहस्राणि रुद्रलोके महीयते ॥ तत्र तीर्थे च यो भक्त्या
दद्याद्दीपं सुशोभनं ॥ जायते तस्य राजेंद्र तेजश्चक्षुःशरीरजं ॥ तत्र तीर्थे मृतानां च जंतूनां किल भारत ॥ अनिवर्तगतिः प्रोक्ता
यावदाहूतसंप्लवं॥प्रभातीर्थे च यद्दानं श्रद्धायुक्तेन दीयते॥तदक्षयफलं प्राहुर्ब्रह्मविष्णुमहेश्वराः॥तत्र स्नात्वा तिलजलैस्तर्पयित्वा पिताम
हान् दृष्ट्वाशिवं च निःपापः पितृभिः सह दानभाक्॥ दानानि द्विजमुख्येभ्यः प्रभातीर्थे ददाति यः ॥ शक्यंशक्त्यनुसारेण परत्रेह च
भोगभाक्॥प्रभातीर्थे नरो नारी स्नात्वा नियतमानसौ॥उपोष्य च चतुर्दश्यां मासि मार्गशिरे शुभे॥निशि जागरणाद्दीपात् सर्वपापैः
प्रमुच्यते ॥ ततश्च प्रातरुत्थाय स्नात्वा संपूज्य धूर्जटिं ॥ पंचामृतेन गव्येन गंगातोयैश्च पार्थिव ॥दिव्यगंधैश्च पुष्पैश्च पद्मनीलोत्पला
दिभिः ॥ वस्त्राभरणतांबुलधूपनीराजनैरपि ॥ नैवेद्यैर्विविधैः पार्थ प्रणिपत्य क्षमापयेत् ॥ मंत्रेणानेन देवेशमुमयासह शंकरं ॥ न
मस्तुभ्यं महेशान प्रभेश्वर जगत्पते ॥ प्रसादसुमुखो भूत्वा देहि मे वांछितं फलं ॥ प्रभेशं प्रार्थयित्वैवं ततो विप्रांश्च भोजयेत् ॥ ए
वं कृत्वा महाराज सर्वतीर्थफलं लभेत् ॥ वाचिकं मानसं पापं कर्म यद्यत्पुराकृतं ॥ स्नानमात्रेण राजेंद्र प्रभातीर्थे विनश्यति ॥ इ
तिश्रीनर्मदामाहात्म्ये प्रभातीर्थनाम अष्टपंचाशदधिकशततमोऽध्यायः ॥ १५८ ॥ श्रीमार्कंडेय उवाच ॥ ततो धनुः शत गत्वा
भास्करं तीर्थमुत्तमं ॥ मूलस्थानमिति ज्ञातं यत्र सिद्धो दिवाकरः ॥ भृगुणा प्रार्थितं पूर्वं ब्रह्मचर्यव्रतान्वितः ॥ चतुर्वर्गस्य यन्मूलं
ब्रह्मचर्यं परंतप ॥ तन्मूलं व्रतमाश्रित्य भानुस्तप्यति वै यदा ॥ मूलश्रीपतिना देवी तदाप्रोक्ता युधिष्ठिर ॥ मूलस्थानमिदं देवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणं सर्वकर्मणां ॥ शुभानां मंगलानां च ब्रह्मचर्यं च यः शुभे ॥ तदाश्रित्य व्रतंभानुस्तपस्तप्याति दुश्वरं ॥ त्रयीमूर्तिरयं सूर्यो म मांशो विश्वजीवनं ॥ पभया सहितस्तीरे रेवायाः समुपागतः ॥ त्वत्पित्रा प्रार्थितः पूर्वं स्थानमत्राश्रयेति मे॥ त्वमप्येनं समभ्यर्च्य प्रियेस्थापय भास्करं ॥ मूलव्रतस्थितं श्रेयं मूलस्थानाख्यभास्करं ॥ मूलव्रतं ब्रह्मचर्यं यः सदाश्रित्य तिष्ठति ॥ परं स मे प्रियो दे वि सुरासुरनरेष्वपि॥मत्पार्श्वस्थं करिष्यामिप्रियेयच्छामि वांछितं ॥ श्रीमार्कंडेय उ०॥ ततो भर्तुवचः श्रुत्वा स्थापितो रमया रविः ॥ तत्र तत्संनिधौ गत्वा ज्ञात्वा पूर्वं पितुर्वचः ॥भर्तुर्वचो ज्ञापयित्वा पूजयित्वा प्रभापतिं॥संप्रार्थितवती भानुं चिरमत्र स्थिरो भव ॥ प्रियोसि मम भर्तुस्त्वं भर्तुर्वाक्यादिदं वदे ॥ स्वमूर्त्या शं समाधाय खरगौप्रभया सह ॥ मत्पित्रा प्रार्थितः पूर्वं मूलश्रीपतिना यथा ॥ ज्ञात्वामूलव्रतं स्थानं मया च प्रार्थितो यतः॥ इति संप्रार्थितो भानुर्जगचक्षुः श्रिया नृप ॥ एवं भविष्यतीत्युक्त्का विनयासहितो र विः ॥ स्थितः स्वांशेन तत्रैव मूलस्थानाभिधानतः ॥ तदाप्रभृति राजेंद्र मूलस्थानमिति श्रुतं ॥ तीर्थं तु भास्करं पार्थ सर्वकामप्र दं शिवं ॥ तत्र तीर्थे नरो यस्तु स्नात्वा भक्त्या युधिष्ठिर ॥ संतर्पयेत्पितॄन्देवान्तोयैरेवासमुद्भवैः ॥ तिलमिश्रैस्तु सप्तम्यां षष्ट्यांवा पि रवौदिने ॥ सप्तम्यां भानुयोगे वा श्राद्धं कृत्वा विधानतः ॥ मूलस्थानं रविं पश्येत्सगच्छेदचलां गतिं ॥ गुह्याद्गुह्यतरस्तत्र वि शेषस्तु श्रुतो मया ॥ समागमे सुरर्षीणां शंकरात् शशिशेखरात् ॥ यदा वै शुक्लसप्तम्यां मूलमादित्यवासरे ॥ तदा रेवाजले गत्वा स्नात्वा संतर्प्य देवताः ॥ पितॄंश्च भरतश्रेष्ठ दत्वा गां कांचनं नृप ॥ स्वशक्त्या कर्णिकारैश्च गंधचंदनवारिणा ॥ संस्नाप्य भास्करं भ क्त्या संपूज्य च यथाविधि ॥ ॥ ततः सागरुकैर्धूपैः कटुरुकैर्विशेषतः ॥ धूपयेद्देवमादित्यं दीपानुज्वाल्य सर्वतः ॥ उपोष्य जागरं कुर्याद्गीतवाद्यविनोदतः॥ एवं कृते महीपाल नभवेदुःखभाक्कचित् ॥ सूर्यलोके वसेत्तावद्यावद्युगशतत्रयं॥गंधर्वैरप्सरोभिश्च सेवमानो नृपोत्तम ॥ स्नात्वा यः पूजयेत्सूर्यमुपोष्य तु यथाविधि ॥ यो ददाति हिरण्यादि दानानि मनुजो नृप ॥ तदानंतफलं तस्य यथैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कुरुजांगले ॥ सोमसूर्यग्रहे पार्थ कुलानां शतमुद्धरेत् ॥ दानानि पात्रमुद्दिश्य यैर्दत्तानि पुरा नृप ॥ रवितीर्थे च दंपत्यं स्नापयि
त्वा विधानतः ॥ समुपोष्य तु सप्तम्यां मूलस्थानं प्रपुज्य च ॥ रात्रौ जागरणं कृत्वा घृतेनोज्वाल्य दीपकान् ॥ अष्टम्यां प्रातरु
त्थाय स्नानादि विधिमाचरेत् ॥ विप्रदंपत्यमभ्यर्च्य विधिवत्कुरुनंदन ॥ वस्त्राभरणतांबूलपुष्पगंधविलेपनैः ॥ अक्षये सूर्यलोके तौ
मोदते चरितव्रतौ ॥ यो भक्त्या शुक्लसप्तम्यां स्नात्वोपोष्यार्चयेद्रविं ॥ वेदशास्त्रविधानेन यः शक्त्या भोजयेद्द्विजान् ॥ धर्मराजकृ
तां पापां न च पश्यति यातनां ॥ सूर्यसंतुष्टिमाप्नोति सदैवाभ्यर्चितो यथा ॥ एतत्ते कथितं पार्थ मूलस्थानाद्भुतं
मया ॥ तीर्थं तीर्थवरं नृणां श्रवणात्पठनादपि ॥ सर्वपापहरं तद्वत्सर्वरोगहरं परं ॥ इति श्रीरेवामहात्म्ये मूलस्थानतीर्थं
॥ मार्कंडेय उवाच॥कंठेश्वरं ततो गच्छे तीर्थं परमशोभनं॥चत्वारिंशत्तथाष्टौ च दंडानामंतरे स्थितं॥मूलस्थानं महाराज भृगुक्षेत्रस्य
मध्यतः॥यत्र कस्यांचिदाख्यातं तच्छृणुष्व नृपोत्तम॥ब्रह्मपुत्रो महाप्राज्ञः कंठोनाम महातपः॥पुरा तेन तपस्तप्तं सर्वतीर्थेष्वनेकशः॥
भृगुकच्छे पि च तथा तपस्तप्तुं समागतः ॥ कंठ शाखाप्रवक्ता च वेदवेदांत पारगः ॥ तस्मिंस्तीर्थे तपस्तप्त्वा दिव्यं वर्षशतं नृप॥
चेतः संयोज्य च शिवे शिवज्ञायोज्यतां गतः ॥ ततः प्रभृति तत्तीर्थं कंटेश्वरमिति श्रुतं ॥ कंठेन स्थापितं शर्वं सर्वपापप्रणाशनं ॥
तमाराध्य महाराज्य लभेच्छैवींगतिं परां ॥ तत्राष्टम्यां चतुर्दश्यामुपोष्य प्रयतो वसेत् ॥ प्रभाते भोजयेद्विप्रान्पायसैर्मधुसर्पिषा ॥ य
तीन्पाशुपता भक्त्यान्भोजयेद्गतमत्सरः॥तर्पयित्वा पितृन्श्राद्धैर्भोजयित्वा द्विजोत्तमान्॥एवं कृते महाराज पितृनामनृणो भवेत्॥सुव
र्णरजतं वापि वस्त्रं धान्यं कमंडलुं॥पादत्राण युतं वापि दत्तं भवति चाक्षयं॥इति श्रीरेवायां कंठेश्वरतीर्थं ॥मार्कंडेय उवाच ॥ ततो
दंड शतार्द्धे वै द्यूते गत्वा युधिष्ठिर ॥ अट्टहासेश्वरं नाम तीर्थं सर्वार्तिनाशनं॥जमदग्नेः प्रपौत्रस्तु जाबालिर्वेदपारगः॥ जडस्वरूपमा
श्रित्य भ्रमन् तीर्थांतराणि च ॥ भृगुणा संगतं प्राप्य नर्मदातीरमागतः ॥ तपश्चचार विपुलं नियतस्तु समाहितः॥ एतस्मिन्नंतरे गौ

CC-0. In Public Domain. Digitization by eGangotri

री शिवं प्राह नभोगता ॥ विप्रं दृष्ट्वा क्लिश्यमानं शिराधमनिसततं ॥ गौरी उवाच ॥ देवदेव महेशान क्लिश्यतेसौ द्विजोत्तमः ॥
वरमस्मै प्रयच्छाशु कृपां कृत्वा ममोपरि ॥ सत्यमुक्तं महादेवि क्लिश्यते तीव वाडवः॥स्मयो महानस्य हृदि सिद्धिस्तेन न विद्यते॥
श्रीदेव्यु उवाच ॥ तथापि प्रार्थयेदेव प्रणम्य पादपंकजं ॥ कृशं दैन्यमनुप्राप्तं द्विजं दृष्ट्वा सुरेश्वर ॥ विप्रं समुद्धरेद्दीनं व्यसनार्ततु
योनरः ॥ उद्धृताः पितरस्तेन कुलान्येकोत्तरं शतं ॥ ईश्वर उवाच ॥ एवं भवतु देवेशि दास्येहं वचनात्तव ॥ यद्यप्यदेयमधुना
वरं विप्रस्य पार्वति ॥ इत्युक्त्वोत्तीर्य वृषभात् शंकरो विप्रमागतः ॥ त्रिशूलखट्वांगधरो जटाभारविभूषितः ॥ गजचर्मपरीधानोमुंडमा
लाविभुषितः ॥ शर्व उवाच ॥ साधु भो ब्राह्मणश्रेष्ठ तपस्ते दुश्चरं महत् ॥ अलं क्लेशेन बहुना वरं वरय वांछितं ॥ मार्कंडेय
उवाच ॥ इत्याकर्ण विभोर्वाक्यं जडतां दर्शयन्द्विजः ॥ मौनिनां कृशतां प्रष्ठीं प्रथयन्संज्ञयैव तं ॥ हस्तनेत्राकृता येन न वा
चा प्राह किंचन ॥ ब्रूहि ब्रूहीति विभुना द्विजः प्रोक्तो मुहुर्मुहुः॥ यदा नोवाच वचसा संज्ञयैवाह पार्थिव॥तदाट्टहासं परमं मुमोच
भगवान् शिवः ॥ पार्थ यस्याट्टहासेन त्रैलोक्यमपिपूरितं ॥ दिवि देवाः समाजग्मुस्तीर्थेभ्यो मुनयस्तदा ॥ ग्रामेभ्यो नगरेभ्यश्च तूर्णं
दुद्रूविरे जनाः ॥ ततो विप्रश्च सहसा चकितो धूर्जटेर्भयात् ॥ विहाय गर्वं परमं पुरश्चाप्यलुठाद्विभोः ॥ विप्र उवाच ॥ वंदे जग
द्गुरुं शर्वं गर्वग्रंथिविनाशनं ॥ पालकं पुण्यचित्तानां दुर्वृत्तानांविनाशनं ॥अणीयसामणीयांसं महांतं महतामपि॥चराचरस्य विश्वस्य
हेतुभूतं नमाम्यहं ॥ पुण्यगतिगं गुणमयं निर्विशेषं सदाव्ययं ॥ मूढोहं गर्वकलुषः शिवमाद्यं भजे महः ॥एकः शिवःपरं धाम ना
न्यस्त्रातास्य विद्यते ॥ सर्वदोषातिगः पातु पापान्मोचयथातथा ॥ देव यत्वयावसृष्टोहमीदृक्शीलो महेश्वर ॥ दुःशीलं वा सु
शीलं वा यथा सृष्टमथात्र मां ॥ ईश्वर उवाच॥ मुने त्वं योगसिद्धोसि सिद्धिस्तव समीपगा ॥ किंतु गर्वार्गलारुद्धा न च प्राप्नो
ति तां भवान् ॥ अतो मया ट्टहासेन भग्ना यत्रार्गळा तव ॥ वरं वरय विप्रेंद्रत्यक्त गर्वो गतोसि मे ॥ तुष्टोस्मि चानया स्तुत्या द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाम्थपि तु दुर्लभं ॥ विप्र उवाच ॥ प्राप्ता वर मया सिद्धिरट्टहासप्रसादतः॥ अट्टहासेश्वरो नाम्ना तस्मादत्र स्थिरो भव॥ तीर्थेत्वं धू
र्जटे देव कृपया पापनाशन ॥ परमानंदपूर्ण त्वां इह तु स्थापयाम्यहं ॥ वरदोसि महेशान यदि मे त्वं दयानिधे ॥ त्वयि भ
क्तिं परां देहि चिरवप्रमथं कुरु ॥ ततस्त्वन्महसा सार्द्धं लयं देहि त्रिलोचन ॥ भवत्यभेदस्तु यथा तवापि च ममापि च ॥
मार्कंडेय उवाच ॥ तथेत्युक्त्वा महादेवस्तत्रैवांतरधीयत ॥ ततः प्रभृति तत्तीर्थं अट्टहासेश्वरं स्मृतं ॥ देवैश्च ऋषिभिः सिद्धैर्मनुजै
श्चापि पूजितं ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनं ॥ तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ महेश्वरं समभ्यर्च्य सर्व
पापैः प्रमुच्यते ॥ मृतवत्सा च या नारी वंध्या स्त्री जननी तथा ॥ तत्र तीर्थे च सा स्नात्वा पुत्रमाप्नोति शोभनं ॥ अष्टम्यां
वा चतुर्दश्यां यः पश्येत्तत्र शंकरं ॥ स्नात्वा कुंभैर्मंत्रैः शुचिर्भूत्वा समाहितः॥ स्नानं करोति यो भक्त्या सु पुत्रान् लभते शुभान
॥ श्राद्धे संतर्प्य च पितॄन् शक्त्या विप्रांश्च भोजयेत् ॥ सप्तधान्यानि च घृतं फलानि विविधानि च ॥ तिलपात्राणि राजेंद्र द
द्यद्धसमन्वितः ॥ एवं कृते महातीर्थे सर्वकामानवाप्नुयात्॥इति श्रीरेवामाहात्म्ये अट्टहासतीर्थं ॥मार्कंडेय उवाच॥ शतार्द्धव्यूनदंडा
श्च ततो गत्वा युधिष्ठिर ॥ भुर्भुवस्वरनामानं तीर्थं परमशोभनं ॥पुरा वर्षशतं साग्रं भृगुस्तत्र समाहितः॥ध्यायन्देवं जगन्नाथं शिवं
परमकारणं ॥ आत्मनः परमं धाम रुद्रैकादशसंज्ञितं ॥ व्याहृतीःप्रणवाद्याश्च ध्यायन् धैर्यान्वितो भृगुः ॥ ततो वर्षशतांते॥ माघे
कृष्णशिवाहनि ॥ स्नात्वा मंत्रपरो ध्यानं चकार च यदा मुनिः ॥ मध्यरात्रे महाराज मानसेप्रणवोद्गमे ॥निर्घोषैश्चाति पूर्णानि पा
तालानि युधिष्ठिर ॥ भूरिति ध्यानमात्रेण प्रचकंपे वसुंधरा ॥ भुवः इत्यक्षरे ध्याते भुवं भित्वा रसातलं ॥ उत्थितं परमं लिंगं भृ
गुः परमशोभनं ॥ स निर्घोष परव्याप्ता यत्र लोकाश्चतुर्दश ॥ तत उत्थाय स मुनिः साष्टांगं प्रणतो भवेत् ॥ तस्मिन्प्रणमति प्री
त्या तुतोष भगवान् शिवः ॥ साक्षान्मूर्तिस्तदा लिंगादुवाचोत्तमया गिरा ॥ महेश्वर उवाच ॥ उत्तिष्ठोतिष्ठ विप्रेंद्र क्लेशेनालं म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यि स्थिते ॥ वरं वरय शीघ्रं त्वं यत्ते मनसि वांछितं ॥ श्रीभृगुरुवाच ॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मम ॥ इह तीर्थे स
दा स्थेयं त्वयैकादशमूर्तिमान् ॥ व्याहृतिप्रणवोच्चाराद्यत्ते लिंगं समुत्थितं ॥ भूर्भुवेश्वरनाम्ना वै ख्यातिं भवतु शंकर ॥ ब्रह्महा गु
रुहा गोघ्नस्तथैव गुरुतल्पगः ॥ पित्रोस्त्यागी स्वर्णहरस्त्वगम्यागमनश्च यः ॥ अभक्ष भक्षको यश्च द्विजो यश्चात्मघातकः ॥ देवद्विज
गुरुस्त्रीणां यश्च निंदाकरो नरः ॥ इत्यादि पापिनां पापं ज्ञाताज्ञातकृतं च यत् ॥ कौमारे यौवने मध्ये वार्धुके वापि संचितं ॥ त
त्प्रणश्यतु वै क्षिप्रं समस्तं भूर्भुवेश्वरे ॥ न व्याधिर्न च दारिद्र्यं न चैवेष्ट वियोजनं ॥ जायते सप्तजन्मानि तीर्थे स्मिन् तत्तथा कु
रु ॥ अष्टम्यां वा चतुर्दश्यां जेष्ठमासि विशेषतः ॥ उपोषितः शिवं पूज्य अश्वमेधफलं लभेत् ॥ अत्र तीर्थे नरः स्नात्वा शिवं पं
चामृतैः शुभैः ॥ स्नापयित्वा शुभैर्गंधैश्चंदनेनानुलेपयेत् ॥ पुष्पैः फलैश्च तांबूलैर्नीराजननिवेदनैः ॥ प्रदक्षिणानमस्कारैर्ध्रुवं फलम
वाप्नुयात् ॥ नर्मदासलिलं पुण्यं सर्वपातकनाशनं ॥ निरीक्षितं विशेषेण भृगुणा भुर्भुवेश्वरे ॥ ते धन्यास्ते महात्मानस्तेषां जन्म
सुजिवितं ॥ स्नात्वा पश्यंति ये देवं रेवायां भूर्भुवेश्वरं ॥ इति श्रीनर्मदामहात्म्ये भुर्भुवेश्वरतीर्थनाम नवपंचाधिकशततमोध्यायः
१५९ ॥ श्रीमार्कंडेय उवाच ॥ शुलेश्वरं ततो गच्छेच्चत्वारिंशिक्रमांतरे ॥ अष्टाधिके नृपश्रेष्ठ तीर्थं सर्वोत्तमं महत् ॥ पंचायतम
ध्ये तु तिष्ठते परमेश्वरः ॥ शुलपाणिर्महादेवः सर्वदैवतपुजितः ॥ ससंगमे भद्रकल्याणि नित्यं गौर्या निषेवितः ॥ दर्शनात्तस्यदे
वस्य स्नानदानाद्विशेषतः ॥ दुर्भाग्यं दुर्निमित्तं च अभिशापो परोग्रहः ॥ यदन्यदुष्कृतं कर्म नश्येतच्छंकरोब्रवीत् ॥ युधिष्ठिर उ
वाच ॥ कथं शूलेश्वरी देवी कथं शुलेश्वरः शिवः ॥ एवं नाम्ना स्थितस्तीर्थे विस्तरादिह मे वद ॥ मार्कंडेय उवाच ॥ बभुव ब्राह्म
णः कश्चिन्मांडव्य इति विश्रुतः ॥ धृतिमान्सर्वधर्मज्ञः सत्ये तपस्यवस्थितः ॥ अथाश्रमपदद्वारि वृक्षमुले महातपाः ॥ ऊर्ध्वबाहु
र्महातेजास्तथौ मौनव्रतान्वितः ॥ तस्य कालेन महता तस्मिंस्तपसि वर्ततः ॥ तमाश्रममनुप्राप्ता दस्यवो वसुहारिणः ॥ अनुस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंमाणा बहुभिर्ग्रामरक्षिभिरादरात् ॥ ते च तस्या श्रमे गुप्तं निदधुः कुरुनंदन ॥ निदधाय च भयाल्लीनास्तत्रैवाश्रमंडले॥ तावता
युगपच्छीघ्रं प्राप्ता ग्रामस्य रक्षिणः ॥ आगतास्तत्र चापश्यंस्तमृषिं तस्करान्वितं ॥ तमपृच्छंस्तथा वृत्तं रक्षिणस्ते तपोधनं ॥ कि
मनेन यथा याता दस्यवो द्विजसत्तम ॥ तेन गच्छामहे ब्रह्मन् यथा शीघ्रं वदस्व नः ॥ मार्कंडेय उवाच ॥ तथापि रक्षिणां ते
षां पृच्छतां वै तपोधनः ॥ न किंचिद्वचनं राजन्नवादीत्साध्वसाधुवा ॥ ततस्ते राजपुरुषा विचिन्वंतस्तथाश्रमे ॥ ददृशुस्तत्र तत् द्र
व्यं चौरांल्लीनांस्तदंतिके ॥ ततः शंका समभवद्रक्षिणां तमृषिं प्रति ॥ संयम्यैनं च तान् दस्युन् नीत्वा राज्ञि निवेदयन् ॥ नृपस्तै
रुक्तमाकर्ण्य रक्षिभिः कुपितोब्रवीत् ॥ मुख्यो यः सर्वचौराणां शुलमारोप्यताश्वसन् ॥ चौराः सर्वेपि बध्यंतामिति भृत्यांस्तान्समा
दिशत् ॥ यतिभ्यः काचनं दत्वा तांबुलं ब्रह्मचारिणां ॥ चौराणामभयं दत्वा दातापि नरकं व्रजेत् ॥ श्रीमार्कंडेय उवाच ॥ रा
जादेशात्ततस्त्वेनं नीत्वा दस्यूंश्च निर्गतान् ॥ ततस्ते शुलमारोप्य तं मुनिं रक्षिणस्तदा ॥ प्रतिजग्मुर्महीपालं द्रव्यं तस्मै न्यवेदयन्
॥ शूलस्थः स च धर्मात्मा कालेन महता ततः ॥ ध्यायं देवं त्रिलोकेशं शंकरं सोममादरात् ॥ पुरापि च विशेषेण शुलरोपक्षणा
दितः ॥ अहर्निशं चिरं कालं मृत्युंजयमनश्वरं ॥ आहारनिद्रारहितो मरणं नाभ्युपागमत् ॥ ध्रियमाणं च तं विप्रमृषयः स्तमुपाग
मन् ॥ शूलाग्रे तप्यमानं तं महात्मानमवेक्ष्य च ॥ संतापं परमं जग्मुर्मुनयस्ते परंतप ॥ सर्वतः पक्षिणो भुत्वा समवर्तंत भार
त ॥ स्वशक्तिं दर्शयंतश्च तच्छीलं द्रष्टुमीप्सवः ॥ ऋषयः पक्षिरूपास्ते तमपृच्छन् द्विजोत्तमं ॥ विप्राऊचुः ॥ श्रोतुमिच्छामहे ब्र
ह्मन्किं पापं कृतवानसि ॥ येन राजा निगृण्हाति त्वामिहैवं कृतागसं ॥ ततः स मुनिशार्दुलो तानुवाच तपोधनान् ॥ दोषतः
किं गमिष्यामि यन्मां पृछथ सत्तमाः ॥ विषमे कर्मगहने नाहि मेन्योपराध्यते ॥ एवमुक्तास्ततस्तेन तदागत्वा निजाश्रमान् ॥ द्वि २९०
तीयेन्हि ततो गत्वा मुनयो नृपमब्रुवन् ॥ राजा च तमृषिं श्रुत्वा निष्क्रातः सहबंधुभिः ॥ प्रसादयामास तदा शुलस्थमृषिसत्तमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ राजा उवाच ॥ यन्मयोपार्जितं पापप्रज्ञानाद्दषिसत्तम ॥ प्रसादये त्वां तत्राहं न मे त्वं क्रोधमर्हसि ॥ मार्कंडेय उवाच ॥ एव मुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः ॥ मांडव्यस्तपतां श्रेष्ठस्तदा दृष्टः परावरः ॥ कृतप्रसादं राजानमवतारयतुमुद्यतः ॥ अवतार्य माणस्तु मुनिः शुले मांसत्वमागते ॥ अतीवपंडितस्तद्दच्छंकरं मनसा गतः ॥ संध्यातः शंकरस्तेन बहुकालोधिवासितः ॥ प्रादु भूतो महादेवः शूलमुले व्यथापहः ॥ स शूलमूलतः शर्वो लिंगरूपो गिरा वदत् ॥ ब्रुहि किं क्रियतां विप्र शूलस्थेन स्मृतोस्मि य त् सत्वथो मत्परो यस्माद्दरं वरवांछितं ॥ अदेयमपि दास्यामि तुष्टस्तेऽद्योमया सह ॥ कथं सत्ववतां लोके सिद्धिर्न स्याद्दरीय सी ॥ स्वस्व कर्मानुरूपं हि फलं भुंजंति जंतवः ॥ शुभेन कर्मणा भुमिरशुभेनाशुभं नृप ॥ बहुभेदप्रभिन्नं तु मानुषेषु विपद्यते ॥ केचिदरिद्रभावेन केचिद्धनविपत्तितः ॥ संतत्यभावतः केचित् केचित्कृतविपर्ययात् ॥ अविधेयप्रवृत्त्या च असत्संगातत्तः परे॥प्रियापुत्र सुहृन्मित्रवियोगैरितरे तथा ॥ राजचौराग्नितः केचिल्लभंते दुःखः मंजसा ॥ केचिल्लभंते शारीरं ज्वरादिव्याधिजं महत् ॥ लभंते मा नसं केचित्पूर्वोक्तेष्टविपत्तिजं ॥ केचित्तथाभिशापोथपूर्वकर्मनियोजनं ॥ कष्टात्कष्टतरावस्था दृश्यते चाप्यनागसः ॥सुखसंक्लेशबहुलाः क्वचिच्चाप्यपराधिनः ॥ पूर्वकर्मविपाकेन स्वधर्मे तपसि स्थिताः ॥ दांताः स्वदारनिरता भूरिशः सुरपूजकाः ॥ -हीमंतो नयसंयुक्ता विविधैः सद्गुणैर्युताः ॥ दुखामर्षापदं प्राप्य निजकर्मविपाकजां ॥निचित्यप्यानयंतीह धर्मनिंदा च कुर्वते ॥ इदमेव तपो मत्वा क्ष पयंति सुचेतसं ॥ सुहृत्भ्रातृपुत्रतातकष्टेषु न वदंति ये ॥ स्मरंति मां महेशानमुमां वा पुष्करेक्षणां ॥ दुष्कृतं पूर्वजन्मोत्थं भोक्त व्यमिति निश्चितं दिनानि यावंति वसेत कष्टव्यथां विना चिंतय देवमीशं ॥ तावंत्यसौ सुकृतान्येव मत्वा भवंति विप्रश्रु तिनोदितैषा ॥ यस्मात्त्वया कष्टगतेन नित्यं स्तुतः स्मृतः पूजितश्चेतसश्च ॥ गौरीसहायोहंस्थितस्त्वयिव ब्रूहि ह्यघ कृतं वरादोस्मि विप्र ॥ भांडव्य उवाच ॥ तुष्टोयद्युमयासार्द्धं वरदो मेसि शंकर तन्मे शूलाग्रसंस्थस्य संशयं प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रमं वद ॥ पीडा काचिन्न जात हे शूलस्थे मयि मे तनौ ॥ अमृतं श्रावयेच्छूलं प्रभाव कस्य शंसमे ॥ शूलपाणिरुवाच ॥
शूलस्थेन यदा विप्र मनसा चिंतितो न्वहं॥आमयार्तिनिहंता च कृत्वा पीडानिबर्हणं ध्यायमानो ह्यहं विप्र पातालं प्राप्य संस्थितः॥
शूलमूले तदारभ्य देवी शूलाग्रसंस्थिता ॥ सर्वकष्टहरा दुर्गा जगन्मातांबिका द्विज ॥ कृपया मयि संतुष्टे शूलचक्रे सुधामयं ॥ मा
डव्य उवाच ॥ पूर्वमेव स्थितो यस्माच्छूलं व्याप्योमयासह ॥ प्रसादं प्रवृणोमह्यं इदानीं शिवया सह ॥ स्वयं भूर्भवशूलेश गौ
र्या सौभाग्यया सह ॥ सौभाग्यसुंदरी नाम तथा शूलेश्वरीति च ॥ यस्याः संस्मरणादेव दौर्भाग्यं प्रलयं व्रजेत् ॥ न दौर्भाग्यात्प
रं लोके दुःखं दुःखानकं प्रभो ॥ किलैवं श्रूयते गाथा पुराणेषु जगत्पते ॥ त्रैलोक्यं दहनस्तुभ्यं सौभाग्यं त्वकृतां गतं ॥ विष्णो
र्वक्षस्थलं प्राप्य तत्स्थितं चेति नः श्रुतं ॥ पीततद्दक्षसस्तद्वै दक्षेण परमेष्ठिना ॥ तस्मात्सताति संजाता यथामिंदीवरेक्षणा ॥ द
क्षस्य जगतो देव तव मानविडंबनात् ॥ जुहावाग्नौ च सा देवी आत्मानं प्राणसंकटे ॥ आत्मानं भस्मसात्कृत्वा मालेमाद्रेश्च तद्व
ता ॥ मेनकायां प्रभा जाता सांप्रतं या उमा स्मृता ॥ योगिन्यां योगिनी देवी अप्रतर्क्या सुरेश्वरी ॥ अनादिनीधना
शक्तिरिति मे श्रुतिनोदितः ॥ यदि तुष्टोसि देवेश देवी मे वरदा यदि ॥ उभावप्यत्र संस्थौ चेदद्यशूलाग्रमालयोः ॥ अवतारो
यथात्र स्यास्थितिरेकत्र तत्कुरु॥ मार्कंडेय उवाच ॥तेनैवमुक्तः सहसा कृत्वा भूमंडलं द्विधा॥निःसृतो शूलमालातोलिंगाच्चप्रितिरूपी
णौ ॥ द्योतयन्तो दिशः सर्वा शूले शूलस्य दृश्यते ॥ वामतः प्रथमा देव्याः साक्षात् शूलेश्वरोति या ॥ लोभयंती जगद्भोमिः पूरयं
ती दिशस्तथा ॥ सतौ वीक्ष्यांजलिं बध्वा स्तुतिदेव्यास्तदाकरोत् ॥ मांडव्य उवाच ॥ त्वमस्य जगतो माता जगत्सौभाग्यदेवता
॥ न त्वया रहितं किंचिद्ब्रह्मांडं सचराचरं ॥ प्रसादं कुरु मे मातर्मम त्वां ज्ञातुमिछतः ॥ ईद्रिशेनैवरूपेण केषु केष्वित्ति तिष्ठासि ॥
स्थानेषु वरदा भूत्वा वद भानि महेश्वरी ॥ श्रीदेव्युवाच ॥ सर्वदा सर्वभूतेषु द्रष्टव्या सर्वतो द्विज ॥ सर्वलोकेषु यत्किंचिद्राहितं न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयाद्विज ॥ तथापि येषु स्थानेषु द्रष्टव्या सिद्धिमिच्छुभिः ॥ स्मृता वा भूतिकामैश्च तानि वक्ष्यामि तत्वतः ॥ वाराणस्यां विशा
लाक्षी नैमिषे रूपधारिणी ॥ प्रयागे ललिता देवी कामदा गंधमादने मानसे कुमुदा नाम विश्वकाया तथांबरे ॥ गोमंते गोमती
नाम मंदरे कामचारिणी ॥ मदोत्कटा चैत्ररथे जयंती हास्तिनापुरे ॥ कन्यकुब्जे तथा गौरी रंभा मलयपर्वते ॥ एकाम्रके कीर्तिम
ती विश्वा विश्वेश्वरी तथा ॥ पुष्करे पुरुहूता च केदारे मार्गदायिनी ॥ नंदा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका ॥ स्थानेश्वरे भवा
नी च बिल्वके बिल्वपत्रिका ॥ श्रीशैले माधवी नाम भद्रे भद्रेश्वरी तथा॥जया वाराहशैले च कमला कमलाह्वये ॥ रुद्रकोटय तु
रौद्राणी काली कालिंजरे तथा ॥ महालिंगे च कपिला मुकुटे मुकुटेश्वरी ॥ शालग्रामे महादेवी शिवलिंगे जलप्रिया ॥ मायापुर्यां
कुमारी च संताने ललिता तथा ॥ उत्पलाक्षे सहस्राक्षी हिरण्याख्ये महोत्पला ॥ गयायां मंगलानाम विश्वेशा पुरुषोत्तमे॥ विपा
शायाममोघाक्षी पाठला पुंड्रपर्वते ॥ नारायणी सुपार्श्वे च त्रिकूटे भद्रसुंदरी ॥ विपुले विपुला नाम कल्याणी कमलाचले ॥ को
टिरो कोटितीर्थे च सुगंधा मगधाचले ॥ गोदाश्रमे त्रिसंध्या च गंगाद्वारे हरिप्रिया ॥ शिवचंडे समाचंडा नांदिनी देविकातटे रु
क्मिणीद्वारवत्यां च राधा वृंदावने मता॥देवकी मथुरायां च पाताले परमेश्वरी॥चित्रकूटे तथा सीता विंध्योद्रा विंध्यवासिनी॥सह्याद्रा
वेकवीरादं हरिश्चंद्रे च चंडिका ॥ रमणा रामतीर्थे च यमुनायांमृगावती ॥ करवीर महालक्ष्मी रुमादेवी विनायके ॥ अ
रोग्यावैद्यनाथे च महाकाले महेश्वर अभया पुण्यतीर्थे अमृता नर्मदातटे ॥ मांडव्ये मांडकी नाम स्वाहा माहेश्वरे पुरे ॥ छाग
लिंगे प्रचंडा च चंडिका मरकंटके॥सामेश्वरे वरारोहा प्रभासे पुष्करावती ॥ देवमाता सरस्वत्यां पारा पारतटे मता भद्रालये महा
भागा पययोष्ण्यां पिंगलेश्वरी ॥ सिंहिका कृतसौचे च वार्तिके चैव शांकरी ॥ उत्पलावर्तके लोला सुभद्रा सेनसंगमे ॥ माता सि
द्धिवने लक्ष्मीस्तरंगा प्ररताश्रमे ॥ जालंधरे विश्वमुखी तारा किष्किंधपर्वते ॥ देवदारु वनेपुष्टिर्मेधा काश्मीरमंडले भीमा देवी हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

माद्री च तुष्टिर्वस्त्रेश्वरे तथा ॥ कपालमोचने सिद्धिर्मायां कायावरोहणे ॥ शंखोद्धारे ध्वनिर्नाम धृतिः पिंडारके तथा॥कला च चं
द्रभागायां अच्छेदी सिंधुधारिणी ॥ वेण्यां चापभृता नाम बदर्यामुर्वशी तथा ओषधी चोत्तरकुरौ कुशद्वीपे किशोरिका ॥ मन्मथा हे
मकूटे च कुमुदे सत्याहीनी ॥ अश्वत्थे वंदिनी नाम निधिर्वैश्रवणालये ॥ गायत्री ब्रह्मसदने पार्वती स्वीशसंनिधौ ॥ देवलोके त
थेंद्राणी ब्रह्मास्येषु सरस्वती॥सूर्यबिंबे प्रभा नाम मात्रणां वैष्णवी मता॥अरुंधतीसतानां तु रामासु च तिलोत्तमा ॥ चित्ते ब्रह्मकम
ला नाम शक्तिः सर्व शरीरिषु ॥ शूलेश्वरी भृगुक्षेत्रे भृगो सौभाग्यसुंदरी ॥ एतदुद्देशतः प्रोक्तं नामाष्टशतमुत्तमं॥अष्टोत्तरं च तीर्थानां
शतमेतदुदाहृतं॥इदमष्टोत्तरशतं यो नाम्नां मनसा स्मरेत् ॥ मुच्यते स नरः पापैः प्राप्नोति च यथेप्सितं ॥ स्नात्वा नारी तृतीयायां
तामभ्यर्च्य च भक्तितः ॥ दुःखदौर्भाग्यसा निर्मुक्ता भत्तप्रसादाद्भवेत्द्विज ॥ नित्यं सा दर्शने नारी नियता या भ
विष्यति ॥ पतिपुत्रभवं दुःखं न सा प्राप्स्यति कर्हिचित् ॥ ममालये च या नारी तुलापुरुषसंज्ञितं ॥ दद्यात्संपूज्य देवांश्च
लोकपालान्सवन्हिकान् ॥ सपत्नीकान् द्विजान् भक्त्या वासोभिर्भूषणैस्तथा ॥ भूतेभ्यश्च बलिं दत्वा ऋषीन्साधूंश्च तोषयेत् ॥ ततः
प्रदक्षिणं कृत्वा तुलामित्यभिमंत्रयेत् ॥ शुचीरक्तांबरधर गृहीत्वा कुसुमांजलिं ॥ नमस्ते सर्वभूतानां शक्तिस्त्वं परमा स्थिता ॥ सा
क्षिभूता जगद्धात्रा निर्मिता विश्वयोनिना ॥ त्वकुले सर्वभूतानां प्रमाणमिह कीर्तिता ॥ मां तोलयंतां संसारादुद्धरस्व नमोस्तु ते॥
एवं पुष्पांजलिं क्षिप्त्वा ततः पुण्याहवाचनैः ॥ पुनः प्रदक्षिणीकृत्य तां तुलामारुहेदथ ॥ उत्संगे प्रतिमां कृत्वा शांकरीं हेमनिर्मि
तां ॥ कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन्नुमामुखं ॥ ततस्तुलापरे भागे न्यासेयुर्युधिपुंगव ॥ द्रव्यमष्टविधं विप्र आत्मवित्तानुसार
तः ॥ मदंशभूतं विप्रेंद्रं यत्पृथिव्यामधिष्ठितं ॥ सुवर्णं सितरूप्यं वा तथा जंजिकुसुंभकं॥तवराजेक्षुलवणं कुंकुमं च तथाष्टमं ॥ ए

१ (जारुद.)

CC-0. In Public Domain. Digitization by eGangotri

षामेकतमं कृत्वा यथावित्तानुसारतः ॥ साम्यादभ्यधिकं यावत्कांचनादि भवेद्द्विज ॥ तावतिष्ठंन्नरो नारी यश्चादीदमुदीरयेत् ॥ नमो
नमस्तेललितेतुलापुरुषसांज्ञिते ॥ त्वमुमेतारयस्वास्मान् संसाराब्धेः सुदुस्तरात् ॥ ततो वतीर्यगुरवेपुर्वमर्धन्यवेदयेत् ॥ ऋत्वि
ग्भ्यो परमर्द्धं च दद्यादुदकपूर्वकं ॥ तेभ्यो दद्यात्तथान्येभ्यो दद्याद्दानं द्विजोत्तम ॥ सपत्निकं गुरुं रक्तवाससी परिधारयेत् ॥ अन्यां
श्च ऋत्विजः शक्त्या मुद्राकेयुरकुंडलैः ॥ शुक्लांगीं क्षीरिणीं दद्याल्ललिता प्रीयतामिति ॥ एवं विधानं या कुर्यान्नारी द्विजममालये ॥
मत्तुल्या सा भवेद्भाग्ये लक्ष्मीवद्वर्चसा भवेत् ॥ सावित्रीवत् सदाचारे जन्मानि दश पंच च ॥ श्रीमार्कंडेय उवाच ॥ एवं निश
म्य वचनं गौर्या द्विजवरस्तदा ॥ नमस्कृत्य जामाशु धर्मराजनिवेशनं ॥ तदा प्रभृति तत्तीर्थं ख्यातं शूलेश्वरीति वै ॥ तस्मिंस्ति
र्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः॥ ब्राह्मणाश्चान्नवा सोभिः पिंडैः पितृपितामहान्॥पूजोपहारैर्देवेशमुमया सह शंकरं॥धूपगुग्गुलग
धैश्च दीपनीराजनादिभिः॥सर्वपापविनिर्मुक्तो सगच्छेच्छिवसाम्यतां॥तस्मिन्तीर्थे च यः कश्चित् अधियुक्तो नरेश्वरः ॥ कृष्णपक्षे चतु
र्दश्यां रात्रिं जागर्तिपूजयेत् ॥ उपवासपरः शुद्धः शिवं प्रयतमानसः ॥ सर्वपापाविनिर्मुक्तो रुद्रलोक स गच्छति॥ इति श्रीरेवामहा
त्म्ये श्रीभृगुकच्छे श्रूलेश्वरीतीर्थनामषष्ट्याधिकशततमोध्यायः ॥ १६० ॥ मार्कंडेय उवाच ॥ ततः सरस्वतीतीर्थं चत्वारिंशक्रमांत
रे ॥ विख्यातं त्रिषु लोकेषु तीर्थं पुण्यं युधिष्ठिर॥युधिष्ठिर उवाच ॥तस्य तीर्थस्य महात्म्यं श्रोतुमिच्छामि तत्वतः कारणं च मुनिश्रे
ष्ठ कृपया वद मे खिलं॥कथं जातं कदा विप्र तीर्थं सारस्वतं महत्॥मार्कंडेय उवाच॥सरस्वती पुरा पार्थ स्मृता विद्यार्थिभिःसुरैः॥
स्तोतुं महेश्वरं देवं वाचस्पतिसमन्वितैः॥तपश्चचार विपुलं नर्मदातटमाश्रिताः॥विद्यार्थिनां हितार्थाय सस्मार यमुनां तदा॥दातुं दि
व्यां पृथक्वाचं शिक्षारसमन्वितं॥छंदोनिरुक्तयुक्तां च सर्वज्ञस्य प्रतोषिणीं॥कालिंदीसंगमस्तत्र नर्मदायास्तटे शुभ॥रेवायाउत्तरेकूले
कालींदी यत्र तिष्ठति॥सरस्वतीं विजानो हि तत्र पार्थ वरप्रदा॥तत्र स्नात्वा नरो भक्त्या ब्रह्महत्यां व्यपोहति ॥अष्टम्यां वा चतुर्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यां शुक्लपक्षस्य पंचमी॥उपोष्यादानिशं पार्थ पिंडांदद्याद्विधानतः॥ब्राह्मणान् भोजयेत्तत्र यथा वित्तानुसारतः॥तत्सर्वमक्षयं प्रोक्तं तत्र
तीर्थे युधिष्ठिर ॥ तृतीया पंचमी चैव दशमी च त्रयोदशी ॥ अमावास्या च तास्तत्रापिंडं दद्याद्यथाविधि ॥ अनिंद्यान्पूजयेद्विप्रान् य
थावित्तानुसारतः ॥ तत्र तीर्थे च यः स्नात्वा पूजयेद्वै सरस्वतीं अर्थं दत्वा विधानेन स याति परमां गतिं ॥ प्रातः स्नात्वा च यस्त
त्र संध्योपासनमाचरेत् ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति वै द्विजः ॥ पिंडान्दद्यात्प्रयत्नाद्यः सदा पर्वणि पर्वणि ॥ तावद्युगसह
स्राणि पितॄणामनृणो भवेत् ॥ स्वर्गार्थी लभते स्वर्गं धनार्थी लभते धनं ॥ पुत्रार्थी लभते पुत्रान्मोक्षार्थी मोक्षमाप्नुयात् ॥ सु
खार्थी लभते सौख्यं ऐश्वर्यं च तदीप्सितं ॥ सर्वपापहरं तीर्थं नात्र कार्या विचारणा ॥ न शोको विद्यते तस्य यः पश्यति सरस्व
तीं ॥ देवानामपि शोकघ्नी विद्यादानायुधिष्ठिर ॥ विद्यादानं प्रयच्छंति तत्र ये नृपसत्तमः ॥ तेषामनंतविद्याप्तिः सत्यलोकश्च शाश्व
तः ॥ यादृशं तादृशं वापि स्वल्पं वा यदि वा बहु ॥ अक्षयं जायते पार्थ दत्तं विप्राय शक्तितः ॥ देवानां वरदानानि तीर्थस्यास्य
युधिष्ठिर ॥ वरोवाग्देवतायाश्च तीर्थं तेन महाफलं ॥ नारी वा पुरुषो वापि मूको वा बधिरस्तथा ॥ सर्वान्कामानवाप्नोतीत्येवमा
ह पुरा विधिः ॥ एतत्ते कथितं पार्थ यत्त्वया परिपृच्छितं ॥ इति श्रीनर्मदामाहात्म्ये भृगुकच्छे सरस्वतीतीर्थं ॥मार्कंडेय उवाच॥ त
तो गछेत राजेंद्र दारुकेश्वरसंज्ञितं ॥ पूर्वोक्तेन प्रमाणेन तीर्थं परमशोभनं ॥ हिताय सर्वजंतूनां मुनिभिः सेवितं यथा ॥ अद्भुतं
परमं लिंगं सर्वपापप्रणाशनं ॥ यत्र कस्यचिदाख्यतं तदाकर्णय भारत ॥ यो वै श्रीकृष्णदेवस्य सारथिः सचिवो महान् ॥ सतत्सा
रथ्यलाभाय चचार विपुलं तपः ॥ पुरा वर्षाण्यनेकानि जीर्णपत्रजलाशनः ॥ योगमष्टांगमासाद्य शिवं ध्यायन् शिवं जपन् ॥ रेवा
या उत्तरे कूले भृगोः प्रीत्या युधिष्ठिर ॥ स्थानवीरासनाभ्यां च काष्ठवन्निर्विचेष्टितः ॥ ततश्च बहुवर्षा ते निर्विकल्पाच्च चेतसः ॥ प्रा
दुर्भूतं महालिंगं पुरस्तस्याति दीप्तिमत् ॥ तस्मिन्साक्षात्स्वयं शंभुरुवाच वरदो स्मिते ॥ विचिंतितं ते मनसः सर्वं दास्ये वद त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रं ॥ दारुक उवाच ॥ यदि प्रसन्नो देवश वरं थदास्यसि चेन्मम ॥सारथ्यं देहि मे विष्णोरवतीर्णस्य भूतले ॥ हा कष्टमवतारस्य
धर्मसंस्थितिहेतवे ॥ योह्यादिपुरुषो नंतश्चाच्यतो विश्वपालकः ॥ गुणाश्च शक्त यो यस्मिन्सिद्धयश्च तथोदयाः॥ निर्गुणो गुणितां प्रा
प्तश्चाव्यक्तो व्यक्ततां गतः॥सेवितुं तं जगद्योनि सारथ्येनैव सेवितुं॥इच्छामि गिरिजाकांत तथा शर्व प्रसीद मे॥स्मरणं कृष्णदेवस्य
पूजनं तव धूर्जटे ॥ स्तुतिं देव्या नातिंभानोः कृत्वा कामानवाप्नुयात् ॥ मार्कंडेय उवाच ॥ एवं तदुक्तवचनात्तथेत्युक्त्वामहेश्वरः॥
पुनर्लिंगे निलीनोभूत्तत्रैव भरतर्षभ ॥ शिवस्य वरदानेन दारुकः सर्वमाप्तवान् ॥ सारथिं संगतिं विष्णोस्तस्व ज्ञानं गणश्यतां ॥ त
स्य नाम्ना च तल्लिंगं तीर्थं चाभवदुत्तमं ॥ तत्र तीर्थेनरो भक्त्या कपिलां यः प्रयच्छति ॥ सर्वेषामेव दानानां कपिलादानमुत्तमं
॥ शिवेन कथितं पुर्वमृषिदेवसमागमे ॥ सद्यः प्रसूतां कपिलां सोपहारां च शोभनां ॥सोपवासो जितक्रोधो यो ददाति विधानतः
॥स समुद्र गुहा ते न सशैलवनकानना ॥ दत्ता तेन सुतीर्थे स्यात्पृथिवी नात्र संशयः ॥वाचिकं मानसं पापं कर्मजं यत्पुरा कृतं॥
नश्येद्वै कपिलां दत्वा सप्तजन्मार्जितं नृप ॥ भूमिधान्यादिहस्त्यश्वकनकाद्रिमुखानि च॥कपिलाधेनुदानस्य कला नार्हंति षोडशीं ॥
दारुतीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं पंचामृतेन संस्नाप्य सुगंधैश्च विलेपयेत् ॥ अष्टम्यां च चतुर्दश्यां नारी वा पुरुषोपि वा॥अ
होरात्रोषितो भूत्वा पूजयेद्दारुकेश्वरं ॥ ततः प्रदक्षिणीकृत्य प्रणिपत्य क्षमापयेत् ॥ अनेन विधिना पार्थ तुष्यते परमेश्वरः ॥ मृतः
शिवपुरं याति गीयमानोप्सरोगणैः ॥ एकविंशकुलोपेतः शिवलोके महीयते ॥ यावन्तोस्ततनुरोमाणि सवत्सायास्तु भारत ॥ ताव
द्वर्षसहस्राणि कामधेनुपुरं वसेत् ॥ ततोवतीर्णः कालेन इहमानुष्यमागतः ॥ धनधान्यसमायुक्तो विप्रोत्तमकुले भवेत् ॥ वेदवि
द्याव्रतस्नातः सर्वशास्त्रविशारदः ॥व्याधिशोकाविनिर्मुक्तो जीवेच्चशरदः शतं ॥ एतत्ते कथितं राजन्दारुतीर्थस्य यत्फलं ॥ संक्षेपेणैव
परमं दारुकेश्वरकारणं ॥ महापापहरं लिंगं महाक्रतुफलप्रदं ॥ यस्य दर्शनमात्रेण वाजिमेधफलं लभेत् ॥ वैशाखे शुक्लपक्षे च भू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताष्टम्योर्दिने नृप ॥ तत्र तीर्थे नरः स्नात्वा ततो दद्यात्तिलोदकं ॥ ब्राह्मणैर्वेदविद्वद्भिः श्राद्धं कुर्यात्प्रयत्नतः ॥ भोजयेद्ब्राह्मणान् भक्त्या शक्त्या दद्याच्च दक्षिणां ॥ एवं कृत्वा नरो राजन्तत्रतीर्थे न मुह्यति ॥ इति श्रीरेवामाहात्म्ये भृगुकच्छेदारुकेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्रअश्विनोस्तीर्थमुत्तमं ॥ गत्वा पूर्वोक्तभूमानं मर्त्यानां कामिकं मदत् ॥ तत्र तीर्थेश्विनौ देवौ रूपावयवसुस्थिरौ ॥ दिव्यशीलसमायुक्तौ संजातौ तपसा किल॥समाकर्ण्य भृगोः क्षेत्रं महादेवर्षिसेवितं ॥ यज्ञांशभाजिनौ जातौ तपसा देवचारिणौ ॥ युधिष्ठिर उवाच ॥ आदित्यस्य सुतौजातौ नासत्यौ केन हेतुना ॥ त्वत्तोहं श्रोतुमिच्छामि निर्णयं परमं द्विज ॥ मार्कंडेय उवाच ॥ पुराणे भास्करेभूपमयैतद्विस्तराच्छ्रुतं ॥ चरितं देवदेवस्य मार्तंडस्य महात्मनः वदतं शृणु संक्षेपात्समाहितमना नृप ॥ कथयामि न संदेहो वृद्धत्वेनापि कर्शितः ॥ संज्ञादेवी पुरापार्थ रविं मत्वातितेजसं ॥ तेजः सोढुमशक्ता तदुद्विग्नाकार्यगौरवात् ॥ चचार मेरुकांतारे तपस्तेजोपशांतये ॥ छायारूपं तत्र मुक्त्वा तथा वेत्तिम भास्करः ॥ ततः कतिपयाहोभिः सस्मार भगवान् रविः ॥ ज्ञात्वा छायां परां भार्यां त्यक्तातां त्वरितो ययौ ॥ यत्र तिष्ठतितन्वंगी वडवारूपमाश्रिता ॥ चिंतयंति पतिं प्रेम्णा स्तुवंती रविमेव च ॥ नमस्यती पतिं हंसंखरवोल्कं जपमादृता ॥ भर्तुस्तेजः परं सोढुंचरंती दुश्चरं तपः ॥ तां दृष्ट्वा वडवारुपां समाछाद्य स्वकं वपुः ॥ मनोभववशीभूतो हयो भुत्वा लघुक्रमः ॥ चकार नासिकाघ्राणं तस्या स्नेहेन भास्करः ॥ यथा तथा नासिकाया प्रविष्टं बजिमुत्तमं ॥ ततो नासागते बीजे संजातौ गर्भउत्तमः ॥ जातौ तत्र सुतौ पार्थ नासत्यौ तेन विश्रुतौ ॥ शुभमौ सुविभक्तांगौ विंबाद्बिंबमिवोद्धृतौ ॥ अधिकौ सर्वदेवानां रूपैश्वर्यसमन्वितौ ॥ नर्मदातटमाश्रित्य भृगुकच्छेश्विनावुभौ ॥ परां सिद्धिमनुप्राप्तौ तपः कृत्वा सुदारुणं ॥ तत्र तीर्थे तु यः स्नात्वा तर्पयेत्पितृदेवताः॥सुरूपः सुभग पार्थ जायते स नरोत्तमः॥ गोनागोनीतिसंज्ञं वै तीर्थं तत्रैव भारत ॥ मादेश्वरं हि लोकानां सिद्धिदं मंगलप्रदं ॥ युधिष्ठिर उवाच ॥ गौनागोनीतिकिं नाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं जातं च किं फलं ॥ अश्विनौ यत्र संसिद्धौ तन्मे वद महामुने ॥ मार्कंडेय उवाच ॥ महद्भृगुवनं यत्र तत्र तीर्थान्यनेकशः ॥
तत्र प्राप्तौ पुरा पार्थ क्रीडितुं लीलयाशिवौ॥कचिच्छन्नौ कचिद्दृश्यौ विचेरतुरथो वने॥आज्ञातौ सर्वलोकानां वृषं त्यक्त्वा तु दुरतः ॥
एवं सति महीपाले लतागहनसंकुले ॥ विनोदेनैव गिरिजा निलिल्ये सा दुरगाशिवात् ॥ न ददर्श यदा गौरीं गिरिशो ग
व्हरे स्थितां ॥ तदा सर्वात्मना शर्वो विव्हलत्वमुपागतः ॥ क गता क स्थिता गौरी कथं द्रक्ष्येत्यचिंतयत् ॥ दृश्यादृश्यो यदा दे
वश्चरन्नपि न पश्यति ॥ तदा वत्सतरो भूत्वा जनमध्ये व्यलोकयत् ॥ वृक्षाद्वृक्षं भ्रमन्नेव तीर्थात्तीर्थं गृहाद्गृहं ॥ गोनामास्य च तै
र्लोकैः संबे धनपदे कृतं ॥ हंभारवमिषेणैवमुमाव्हानपरो हरः ॥ भ्रमन्नत्यर्थमायात अश्विनौ यत्र तेपतुः ॥ नीलरूपो महादेव
स्तावता वत्सिकां ययुः ॥ उमा हंभारवकरी शर्वं प्राप जगत्पतिं ॥ दृष्टौ तौ मुनिभिर्लोकैः संगतौ प्रेमसंयुतौ ॥ गोनागोनी
तिनाम्ना तौ लोकैरुक्तौ युधिष्ठिर ॥ शुक्ले भाद्रपदे मासि दशम्यां संगमस्तयोः ॥ उदाहितौ च तीर्थेस्मिन् लोकैस्तौ पांडुनं
दन ॥ एतस्मिन्नंतरे पार्थभृगुस्तत्र समागतः ॥ प्रदक्षिणीकृत्य तयोः प्रणाममकरोद्भुवि ॥ मत्वा तामीश्वरा साक्षा
द्भृगुः सस्मार शंकरं ॥ तदा विहाय तद्रूपं शंकरश्चोमया सह ॥ प्रोवाच तं शिवः साक्षाद्व दोस्मीति भार
त ॥ श्रीभृगुरुवाच ॥ अद्य मे सफलं जन्म जीवितं च सुजीवितं ॥ अद्य स्थानं महास्थानं इदं देवादिपूजितं ॥ अद्यलोका वि
शोकाश्च संगत्या भवतोरिह ॥ अद्य धन्यं भृगोस्थानं वरदौ यत्र मे शिवौ ॥ एतच्छ्रुत्वा शुभं वाक्यं देवदेवोमहेश्वरः ॥ हृष्टतुष्टा
च सा देवी समुखा सौम्यलोचना ॥ ज्ञात्वापि तत्र पप्रच्छ क्षेत्रमाहात्म्यकारणं ॥ ईश्वर उवाच ॥ शृणु देवि महाभागे विप्र
र्षीणां च शृण्वतां ॥ भृगोः प्रीत्या प्रवक्ष्यामि क्षेत्रस्यास्यतु संभवं ॥ यत्पृष्टोहं त्वया पुण्यं क्षेत्रतीर्थसमुद्भवं ॥काष्ठा स्त्रिंशत्कलात्रिं
शत्कला मुहुर्तिकोविधिः ॥ त्रिंशद्भिस्तैरहोरात्रं मानुषं विदुरुत्तमाः ॥ त्रिंशद्भिस्तैरहोरात्रं पित्र्यमाहुर्मनीषिणः ॥ मानुषाब्देन देवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामहोरात्रं वरानने ॥ चतुर्युगेन देवानां युगमाहुः पुरातनाः॥कृतं त्रेता द्वापरं च कलिश्चैभिश्चतुर्युगं ॥ सप्तादशैव लक्षाणि प्रमाणे
न कृतं युगं ॥ अष्टाविंशसहस्राणि यत्र शुक्लोभवद्धरिः ॥ चतुष्पादभवद्धर्मोनिस्पृहा यत्र जंतवः ॥ चिरायुषोनिरोगाश्च सर्वोपद्रवव
र्जिताः ॥ ततस्त्रेतायुगे देवि यत्र रक्तोभवद्विभुः ॥ प्रमाणं यस्य वर्षाणां लक्षाणि द्वादशैव तु ॥ षण्णवत्याधिकैर्देवि सहस्रैः परि
कीर्त्यते ॥ तत्र धर्मस्त्रिपादश्च लोकाः किंचित्सरोगिणः ॥ पूर्वादल्पायुषश्चैव किंचिदुःखसमन्विताः॥ ततश्च द्वापरं नाम तृतीयं युग
मुच्यते ॥ द्विपाद्धर्मंभवेद्यत्र कपिलस्य जनार्दनः ॥ चतुःषष्टिसहस्राणि लक्षाण्यष्टौ प्रमाणतः ॥ अल्पायुषोनरास्तत्र स्पर्द्धितश्च पर
स्परं ॥ विज्ञेयोरोगबहुला निर्द्रव्या किंचिदेव च ॥ ततः कलियुगं घोरं संभयिष्यति दारुणं ॥ द्वात्रिंशद्भिः सहस्रैश्च सह लक्षचतुष्ट
यं ॥ वर्षाणि तत्प्रमाणेन विज्ञेयं हि युगंप्रिये ॥ यत्र कृष्णोभवद्विष्णुः प्रपन्नार्तिहरः परः ॥ एकपादस्थितोधर्मोलोकः सत्यविवर्जि
तः ॥ जयेद्धर्ममधर्मोवै सत्यस्याप्यनृतं तथा ॥ जयिंते च नृपाश्चारै स्त्रीभिर्वरानने ॥ सीदंतिचाग्निहोत्राणि गूरुपूजा प्रणस्यति ॥
अल्पक्षीरास्तथा गावः कुत्सिताहारपोषिताः ॥ तथैवाल्पोदकानद्योमही चाल्पफलप्रदा ॥ क्लिष्टवृत्तिरतोलोकस्तथा ह्यल्पायुषः शुभे
॥न सतीत्वं च नारीषु न धर्मछद्मवर्जितः ॥ इत्यादि लक्षणं देवि कलौ युगमुदाहृतं ॥ एवं चतुर्युगं देवी देवानां युगमुच्यते ॥ च
तुर्युगसहस्रं हि ब्रह्मणोदिवसं विदुः ॥ सहस्रं च तथा रात्री कुलक्षं तदहर्निशं ॥ त्रिंशकल्पोदिधेमासि वर्षद्वादशभिश्च तैः ॥ ब्रह्म
ण्योह्या पुरा ख्यातं तच्छतं गिरिनंदिनी ॥ एवं कल्पव्यवस्था च मयोक्ता तव मानतः ॥ प्रारंभे त्वादि कल्पस्य बधुवुर्ब्रह्मणः सु
ताः॥मानसा नवविख्यातास्ते प्रजापतयोभवन् ॥ मरीचिरंगिरसोपुलस्त्यः पुलह्यः क्रतुः ॥ दक्षोभृगुर्वसिष्ठश्च यथा ब्रह्मा तथैव ते
॥ नवब्राह्मणइत्येते पुराणे निश्चयं गताः ॥ तेषां भृगुर्महातेजा तपसा सिद्धिमागतः ॥ दृष्ट्वा रेवां महापुण्यां विशिष्टां सर्वसिंधिषु॥
एतस्यास्तीरमासाद्य तपः कृत्वा सुदुःश्चरं ॥ प्रसाद्यमामुमे क्षेम मत्प्रसादादनुत्तमं ॥ स्थापयामास देवैश्च सर्वैर्दत्तवरोद्विजः ॥ प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्य पुत्रीं वरां देवीं श्रियं विष्णोर्हि वल्लभां॥ सुरर्षिभिरनुज्ञातः प्रार्थयित्वा च कच्छपं मुनिसिद्धसमायुक्तः कृतकौतुकमंगलः ॥नंदने वत्सरे माघे पंचम्यां शुक्लपक्षतः ॥ प्रशस्ते तूत्तरार्के च कुंभराशिस्थिते विधौ ॥ समुद्रोपांतु भूभागे पश्चिमे सुरसेविते ॥ प्रशस्ते नर्मदातीरे उत्तरे ब्रह्मशासनात् ॥ प्रागुदक्प्रवणे देशे कोटितीर्थसमन्विते ॥ पंचक्रोशप्रमाणं तु त्रैलोक्यव्यापकं महत् ॥ विश्वकर्मविधानाटयं प्रासादशतसंकुलं ॥ हर्म्यकुट्टिमसंबाधमहाट्टालकमंडितं ॥ सिद्धिक्षेत्रं भृगुस्थानं तीर्थदेवर्षिसेवितं ॥ अचिरेणैव कालेन स्थापयामास पार्वति ॥ पूर्वं चैव मयादत्तं वरदानेत भार्गवे॥ तत्र देवि निलीनात्वं प्राप्ता नासत्य संनिधौ॥तीर्थे मया सुरेशाने अत स्तीर्थमिद शुभं॥आवयोरिह संयोगो यत्र जातोमनोहरः ॥गोनागोनीतिसंज्ञाभि र्यदुक्तं चावयोर्जने ॥ विवहास्तेन लोकानां अविष्यंतिह शोभने ॥ एतत्ते कथितं देवि किमन्यत्परिपृच्छसि ॥ श्रीदेव्युवाच ॥ गोनागोनेति विख्यातं स्थानं चाब्धिसमीपगं॥भृगोः क्षेत्रे सुरश्रेष्ठ ह्यावयोर्यत्र संगमः ॥ देशकालोकथं तत्र सुप्तेदेवे जनार्दने ॥ दक्षिणायन गते भानौ कथं प्रोक्तस्त्वया विभो ॥ व्रतबंधस्तथा दीक्षा प्रतिष्ठा वास्तुपूजनं॥चूडाकर्मविवाहोवा विधानं यज्ञकर्मणां॥न भवेद्यत्र कातत्र वार्तानापिविवाहजा॥शृण्वतां भृगुमुख्यानां यथार्थं वद मे विभो ॥ इश्वर उवाच ॥ शृणु देवि महाभागे मदुक्ते का विचारणा ॥ आवयोर्यत्र संयोगो यत्र देवः श्रीयः पतिः ॥ यत्राश्विनौ भृगोस्थाने विवाहास्तत्र शोभनाः ॥अस्मिन्मासे नभस्ये तु शुक्ले च दशमी दिने॥लग्ने गोधूलिके कुर्याद्विवाहं मनुजः शुभे ॥ विकल्पभ्रांतिरहितं संशयोद्वेधवर्जितं ॥ अवश्यं क्रियमाणे तु विवाहेशुभगंभवेत् ॥ इदमर्थमहं देवि प्रार्थितो भृगुणा पुरा ॥ अनेन विप्रवर्गेण तथा ते कथयाम्यहं ॥ तपस्तप्त्वा भृगुः पूर्वं प्रत्यक्षं मां प्रणम्य च ॥ भृगुरुवाच ॥ शप्त्वा देवाद्विजान्सर्वान्पुरा लक्ष्मीर्विनिर्गता ॥ अपवित्रामिदं स्थानं मम जातं महेश्वरी ॥ पुरा यथा मया प्रोक्तं कलापग्रामवासिनां कथं तद्भविता देव शरणं त्वां समागतः ॥ इत्युक्ते भृगुणा देवि मया चोक्तो भृगुस्तथा॥ मा विषीद द्विजश्रेष्ठ किं शप्तैरभवद्द्विजैः ॥ क्रोध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानं नसंदेहस्तथान्यदपि तच्छृणु ॥ तत्र स्थानसमुद्भूता मदद्वयविवर्जिताः ॥ ब्राह्मणा मत्प्रसादेन भविष्यंति न संशय ॥ वेदविद्याव्रतस्नाताः सर्वशास्त्रविशारदाः ॥ योपि ते शतसाहस्त्रां अन्यतोह्यागतास्त्विह ॥ अपठस्यापि मूर्खस्य सर्वावस्थागतस्यच॥उत्तराउत्तरं दातुं न शक्तोन्योभृगुत्तम ॥ कोटितीर्थाश्रितं स्थानं सर्वपापप्रणाशनं॥अद्यप्रभृति विप्रेंद्र भविष्यति च सिद्धिदं ॥ तथैतदपि ते वच्मि प्रियेहं भृगुसंनिधौ॥न दृष्टं न श्रुतं यद्वै सांप्रतीनसमागमात् ॥ मत्प्रसादादिदं विप्र गोनागोनीति विश्रुतं ॥ स्थानमेतत्सुरर्षीणां मर्त्यानां च हितायवै ॥ भृगुक्षेत्रे स्थिताये तु भार्गवस्तव संज्ञया ॥ विवाहस्त्विहतैः कार्यो ह्यस्मिन्काले ममाज्ञया ॥ अस्मीन्तीर्थे नरःस्नात्वा नभस्ये दशमी दिने ॥ प्राप्ते वै लग्नससमये विवाहं कारयेत्ततः ॥ शोभनं मंगलं विद्या तत्रैवं शास्त्रनिश्चयः॥ कुब्जकुष्टांधमूकाश्च खल्वाः पंगुरेव च ॥ बधिरोह्यंगहीनश्च दशम्यां दिवसंज्ञये ॥ लग्नकाले नरस्नात्वा सुखसौभाग्यभाक् भवेत् ॥ तत्तस्मिन्स्तीर्थे नरस्नात्वा तर्पयेत्पितृदेवताः ॥ तस्य ते द्वादशाब्दानि तृप्तागच्छंति चाशिषः ॥ दधिक्षीरेण वाज्येन मधुना सितया सह॥तीर्थतोये विरूपाक्षं गोनागोनीश्वराह्वयं ॥ स्नापयंति द्विजश्रेष्ठ तेषां वासस्त्रिविष्टपे ॥ मत्प्रसादाद्द्विजश्रेष्ठ सर्वेदेवानुसेवितं ॥ सर्वतीर्थमयं स्थानं ऋषिसिद्धसमाश्रितं ॥ भविष्यति भृगुक्षेत्रं यावदाहूतसंप्लवं ॥ गोनागोनीति विख्यातं तीर्थं यत्राश्विनौ स्थितौ ॥ अहमत्र वसिष्यामि प्रिययांविकया सह ॥ गोनीयं पार्वती देवी गोनाशब्दादहं शिवः ॥ ताभ्यां मेलापकोयत्र विवाहस्तत्र शोभनः ॥ पूजनीयोत्वया विप्र सततं प्रीति काम्यया ॥ श्रीमार्कंडेय उवाच ॥ इत्युक्त्वा तावुभौ पार्थ तीर्थमश्विसुखप्रदं ॥ अश्विनौ च यथोत्पन्नौ यथा त्रिदिमुपागतौ तत्रैव च परं तीर्थं गोनागोनीश्वरं शुभं ॥ महात्म्यं तस्य ते प्रोक्तं पापघ्नं मंगलप्रदं ॥ इति पठति नरोयोयः शृणोतीह भक्त्या विपुलमतिरसौम्यात्सर्वसौभाग्ययुक्तः॥बहुदुरितगिरीणां तारणं ह्यश्वितीर्थं सुकृतबहुलगोनागोनिकायाश्वरीत्रं ॥ इतिश्रीवायूक्तशिवसंहितायांनर्मदामहात्म्ये श्रीअश्विनीतीर्थं नाम एकषष्ठ्यधिकततमोऽध्यायः॥१६१॥ श्रीमार्कंडेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ ततोधनुः शतार्द्धं च गत्वानूनं युधिष्ठिर ॥ पुरःप्रसेव्यमतुलं सावित्रीर्थमादरात् ॥ पुण्यं पवित्रं विख्यातं पापतापोपश तिदं ॥ यत्र सिद्धा वेदमाता सावित्री ब्रह्मणःप्रिया ॥ युधिष्ठिर उवाच ॥ सावित्री का द्विजश्रेष्ठ कथमाराधते बुधैः ॥ प्रसंना कं वरं वाथ दद्यादेतद्वदस्वमे ॥ श्रीमार्कंडेय उवाच ॥ आदि कल्पे यदा ब्रह्मा विष्णोर्नाभिसरोरुहात्॥प्रादुर्भूतस्तदा साकंवागु वाच। शरीरिणी ॥ विश्वं श्रृजमहाभागेत्यशिक्षत्तं विधिं प्रति ॥ श्रुत्वा तां ब्रह्मणाश्चिंता बभूवाशूसृजेतिकं॥सृजामि प्रोक्तमनया किं वि श्वं सृजते कथं ॥ इत्थं चिंतयतस्तस्य विधेर्मातृकयान्वितः ॥ सानुस्वारःसमुद्भूतोनाभिहृत्कंठगोध्वनिः ॥तालुस्पर्शीसुगंभीरः प्राण वाख्योयुधिष्ठिर ॥ ज्ञेयः स एव वेदादिर्विश्वादिनिर्गुणोगुणी ॥ स एव परमं धाम ब्रह्म सत्यदमुत्तमं ॥ दर्शकः सृष्टिमार्गस्य मोक्षमार्गप्रदर्शकः ॥ युगपत्तेन संभूतं त्रैलोक्यं भरतर्षभ ॥ अवर्णोच्चारतोजाता भूर्धरा लोकसंयुता ॥ तमोगुणेन सायु क्ता रौद्री शक्तिनृपोत्तम ॥ उवर्णोच्चारमात्रेण भुवः सृष्टिरजायत ॥ रजोगुणेन तव्याप्तं ब्रह्मशक्त्या भिवेष्टितं ॥ मवर्णोच्चारणात्पार्थ स्वस्तस्यानुप्रजायत ॥ गुणस्तस्यानुसत्वं च विष्णुशक्त्याभिवेष्टितं ॥ एतल्लोकत्रयं नाम महाव्याहृति संज्ञितं ॥ एतद्वेदत्रयीरूपमेतद्देवत्रयी नृप ॥ ध्वनिस्तस्यार्द्धमात्रोयस्तव्द्ब्रह्म परमं विदुः ॥ मोक्षव्यारं च तत्साक्षा योगिनामप्यगोचरं ॥ प्रणवाख्यं तदुत्पन्नं पुरः पूर्णं यदामहः ॥ तस्यानुवेदः संजातः सचतुर्द्धा भवत्किल॥ गुणत्रयमयः सो पिकर्मकांडसमन्वितः ॥ ऋग्यजुः सामसंज्ञोयस्त्रयीप्रोक्ता मनीषिभिः ॥ चतुर्थोव्यभजयंतमंगिराः किल पूर्वतः ॥ तत्सभागः विभागान्सतास्मिंस्तस्मिन्ययोजयत् ॥ कर्माभिचारबहुलं भागं चैवाकरोत्पृथक् ॥ तदेतन्मंडलं पूर्णं महोयत्प्रणवाभिधं ॥ गुणत्रयसृ जाशक्त्या श्रुतित्रय्या च वेष्टितं ॥ सेतिहासपुराणाद्याविद्याः सर्वास्तमाश्रिताः ॥ अव्यक्ता भारती प्राह पुनः सा भरतर्षभ ॥ ज गदादिरयं जातोवेदादिप्रणवात्मकः ॥ सूते विश्वमिदं यस्माद्भूर्भुवः स्वरितिप्रभुः ॥ तथा च सविता चान्यत्सवितायमतःस्मृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्याकर्ण्यगिरीं दिव्यां विधिर्विस्मयमागतः ॥ दिव्यं दृष्ट्वा महत्तेजोदेविगम्यामितीरितं ॥ सवितारं गिराप्रोक्तां सश्रीकं सर्वजीवनं
॥ यं विना नैव लोकास्युर्न मंत्रा कर्मसंस्थतिः॥ततः पद्मासनस्थेन चिंतिता पद्मयोनिना ॥ सवितुस्तेजसोजाता सावित्री तेन सा
स्मृता ॥ सर्वलक्षणसंपन्ना रुपावयवसंयुता ॥ सौभाग्यायतनं पार्थ सा ब्रह्माणमुपाश्रिता ॥ ततः पुनरुवाचैनं दिव्यवागाशरीरि
णी ॥ सवितुर्मंडला जाता सावित्रीयमिहोज्वला ॥ भजमानां भजस्वैनां सावित्रीं वेदमातरं ॥ मार्कंडेय उवाच ॥ ततस्तन्
वोदनात्तेन ह्यभजत्तां मुदान्वितः ॥ ध्यातमात्रा तु या देवी सर्वान्कामान् प्रयच्छाति ॥ सौभाग्यं मंगलं दत्ते सर्वपापंव्यपोहति ॥
पद्माननापद्मावर्णा पद्मपत्रनिभेक्षणा ॥ ध्यातव्या ब्राह्मणैर्नित्यं क्षत्रवैष्यैर्यथाविधि ॥ ब्रह्महत्या भयाच्चापि नतु शुद्रैः कदाचना
॥ उच्चारणाद्धारणात्सरौरवं नरकं व्रजेत् ॥ वेदाक्षरोच्चारणा त्तु क्षत्रियैर्द्धर्मपालकैः ॥ जिव्हाच्छेदोस्यकर्तव्यः शूद्रास्यातिविनिश्चयः ॥
न मंत्रं वैदिकं ब्रूयाच्छूद्राय ब्राह्मणः क्वचित् ॥ लोभाद्वापि भयाद्वन्नतं शूद्रे पिपाठयेत् ॥ पठकः पाठकः श्चापि द्वौ दंड्यौ भूभृत्तान्नृ
प ॥ स्वस्ति वा प्रणवं वापि वेदमंत्रमथापिवा ॥ यः पठेद्ब्राह्मणः शूद्रे राष्ट्रान्निर्वासयेद्द्विजं ॥ निमज्ज्यात्मनासार्द्धं दशपूर्वैर्दशाप
रैः॥बालाबालेंदुसदृशा रक्तवस्त्रानुलेपना ॥ श्वेतवस्त्रपरिच्छन्ना श्वेतयज्ञोपवीतिनी ॥ ध्याता संयोगिनी पार्थ मुक्तिमुक्तिफलप्रदा ॥
प्रदोषे च पुनः पार्थ वृद्धा कृष्णांगमुर्द्धजा ॥ स्मृता सा दुर्गकांतारे तंमात्रपरिरक्षति ॥ विशेषेणतु राजेंद्र सावित्रीत्तीर्थ उत्तमे ॥
स्नात्वा सम्यक् विधानेन प्राणायामं विधारयेत् ॥ सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह ॥ अनुस्वारं त्रिरुच्चार्य प्राणायामः
स उच्यपेतें ॥ प्राणायामैर्दहेद्दोषान्सप्तजन्मार्जितान्नृप ॥ किल्बिषं धारणाभिश्च ध्यानादानंत्यमश्नुते ॥ आपोहिष्ठेति मंत्रैश्चप्रोक्षये
च्च स्वकियां तनुं ॥ नव षट् तथा तिस्रस्तत्र तीर्थे नृपोत्तम ॥ अघमर्षणेतृचं तोयं यत्किंचिदथवापि वा ॥ जपन् विप्रोक्षयन्वापि
प्रयतः सततं द्विजः ॥ आपो हि कुरुते विप्रतुल्लेखांस्त्रीणि कारयेत् ॥ चतुर्थं कुरुते यस्तु ब्रह्महत्यां व्यपोहति ॥ तृपदारव्यस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यो मंत्रो वेदे वाजिसनेयके ॥ अंतर्जले सकृज्जप्तः पापक्षयकरो भवेत् ॥ उदुत्यमिति मंत्रेण पूजयित्वा दिवाकरं ॥ गायत्रीं च
जपेद्देवीं पवित्रां वेदमातरं ॥ दशभिर्जन्मजनितं शतेन तु पुराकृतं ॥ त्रिजन्मजं सहस्रेण गायत्री हंति किल्बिषं ॥ गायत्रीसारमा
त्रोपि वरं विप्र सुयंत्रितः ॥ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥ संध्याहीनोऽशुचिर्नष्टो ह्यनर्हः सर्वकर्मसु ॥ यद्यद्य कुरुते किं
चिन्न तस्य फलभाग्भवेत् ॥ संध्याहीनो भवेद्यस्तु ब्राह्मणो वै विशेषतः ॥सजीवन्नेव शूद्रः स्यान्मृतःश्वा चैव जायते ॥ सावित्री
तीर्थमासाद्य संध्योपास्तिं करोति यः॥द्विकालं वा मासार्द्धं मासमेव वात्रिकालंवा॥संध्यालोपकृतं पापंनाप्नोति द्विजसत्तमः॥षडब्दं वै
कृता संध्या तेन तत्फलमाप्नुयात् ॥ सावित्रीतीर्थमासाद्य गायत्रीजाप्यकृद्द्विजः ॥ वेदत्रयाध्ययनजं फलं प्राप्नोत्यसंशयं ॥ कार्ति
के शुक्लपंचम्यां सवस्त्रं स्नानमाचरेत्॥गायत्रीदशजाप्येन सर्वपापशमो भवेत्॥पितृनुद्दिश्ययः स्नात्वा पिंडनिर्वपणं नृप॥यःकुर्याद्द्वाद
शाब्दानि तृप्तिं यांति पितामहाः॥सावित्रीतीर्थमासाद्य यः कुर्यात्प्राणसंक्षयं॥ब्रह्मलोके वसेत्तावद्यावदाहूतसंप्लवं॥पूर्णे चैव ततः काले
मानुष्यमिह चागतः॥चतुर्वेदद्विजकुले विपुले जायते धनी॥विद्यावृत्तसमायुक्तः पशुपुत्रसमन्वितः॥व्याधिशोकविनिर्मुक्तो जीवेच्च शरत
इति श्री भृगुकच्छे सावित्रीतीर्थं॥मार्कंडेय उवाच ॥ ततो गच्छेन्महाराज धनुर्द्वादशकांतरे ॥ वालिखिल्येश्वरं तीर्थं सर्वपापप्रणाशनं
॥ सेवितं देवगंधर्वैर्ऋषिभिश्चतपोधनैः ॥ बहवस्तं न जानंतिविष्णुमायाविमोहिताः ॥ यत्र सिद्धा महाभागा वालिखिल्यास्तपोधना
॥ ब्रह्मतेजसमुद्भूता वालुकासु युधिष्ठिर ॥ पुरा शंभोर्विवाहे तु गौर्या रूपं निरीक्षतः ॥ मनसो विक्रियाज्जाता ब्रह्मणो ब्र
ह्मवादिनः ॥ वीर्यंतदपतद्भूमौ मृदितं वालुकासु च ॥ अंगुष्ठमात्राः पुरुषा महातेजःसमन्विताः ॥ जटाजिनधराः सर्वे अक्षसुत्रकरा
स्तथा ॥ वालुकाकणसंख्याकाः सूर्यरश्मिसमप्रभाः ॥ पादस्य दक्षिणांगुष्ठमुदितास्ते समुत्थिताः॥ बद्धांजलिपुटाः सर्वे किं कुर्म इति
चावन् ब्रह्म उवाच ॥ तपश्चरध्वं लोकानां हिताय सततं शुभं ॥ वालिखिल्याख्यामुनयो वालुकाच्च समुत्थिताः ॥ श्रीमार्कंडेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ इत्युक्ता ब्राह्मणस्ते वै ऋषयः शंसितव्रताः ॥ तीर्थात्तीर्थं परिभ्रम्य क्रमाद्रेवामुपागताः ॥ सिद्धिस्थानं भृगोक्षेत्रं श्रु
त्वा च भृगुणार्चिताः ॥ तत्रागत्य तपस्तेपुः पूजयंतः परं शिवं ॥ स्थापायित्वा सरित्तीरे जपध्यानपरायणाः ॥ कालेनाल्पेन राजेंद्र
सिद्धिं प्रापुः परांद्विजाः ॥ परितुष्टे महादेवे किं किं न प्राप्यते नरैः ॥ देवैश्च सह गच्छंति दिव्यलोकेषु सर्वशः ॥ वायुना सह ग
च्छंति सूर्यगोभिः समं तथा ॥ दिव्यान्दिव्यांश्च भूभागान्सरिद्वीपवनानि च॥मेरुमंदरमुख्यांश्च गिरीनभिचरंति हि॥दृश्यादृश्ये च ते
रूपैः सिद्धिं प्राप्य युधिष्ठिर ॥ ततः प्रभृति तत्तीर्थं वालिखिल्येश्वरं विदुः ॥ सर्वसिद्धिप्रदं नृणां सर्वपापोपशांतिदं ॥ तत्रागता म
हाभागा पुराद्रष्टुं तु तत्तपः ॥ पुलस्त्यः पुलहो दक्षः क्रतुरांगिरसोशिजौ ॥ प्रचेतसौ वसिष्ठश्च यमौ नारदपर्वतौ ॥ एते चान्ये महा
भागाः शतसः शंसितव्रताः॥यत्र सिद्धिं परां प्राप्ता वालिखिल्येश्वरे नृप ॥ तस्य लिंगस्य मध्ये वै लिंगं परमशोभनं ॥ तत्परं शि
वसंस्थानं सर्वपापक्षयंकरं ॥ ऋग्वदसामवेदौ श्च यजुराथर्वमेव च ॥ पठेत्सम्याग्विधानेन गायत्र्या तत्फलं लभेत् ॥
तत्र शक्त्या हुतं जप्तं दत्तं विधिवदार्चितं॥तस्य चान्यानि दानानि कलां नार्हंति षोडशीं ॥ यमैर्वा नियमैर्वापि
योगेन तपसापि वा ॥ तत्र तीर्थे मृतानां तु गतिः स्यादानिवर्तिका ॥ एवं ते विधिरुद्दिष्टः संक्षेपण मया नघ ॥
वालिखिल्येशतीर्थस्य पुराणे वै यथा श्रुतः ॥ इति श्रीनर्मदायांवालिखिल्येश्वरतीर्थंनाम द्वीषष्ट्यधिकशततमोध्यायः॥ १६२ ॥
श्रीमार्कंडेय उवाच ॥ तथाष्टाद्दशांडानामंतरे भरतर्षभ ॥ नर्मदेश्वरसंज्ञं तु गच्छेत्तीर्थमनुत्तमं ॥ यत्र कस्यचिदाख्या
तं रहस्यं भुक्तिमुक्तिदं ॥ पुण्यं पवित्रमतुलं त्रिषु लोकेषु विश्रुतं ॥ भृगुणाराधितादवीं नर्मदा सरितां वरा ॥ स्थादयित्वा नि
जं स्थानं तीर्थं देवर्षिसेवितं ॥ स्नात्वा तीरे स्थितः सम्यक् पादाग्रेण तु पांडव ॥ दक्षिणेन चिरं ध्यायन्निराहारो जितेंद्रियः ॥ त्री
स्नायी नर्मदाध्यायी त्वेकपादाग्रसंस्थितिः ॥ शांतो दांतो जितक्रोधस्ततस्तुष्टा सरिद्वरा ॥ कालेन बहुना पार्थ साक्षाद्रूपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिवांगजा ॥ दिव्याभरणवस्त्राढ्या दिव्यस्त्रगनुलेपना ॥ नर्मदातत्प्रवाहात्सा विनिर्गत्य पुरः स्थिता ॥ नर्मदा उवाच ॥ तुष्टास्मि ते महाभाग वरं वरय वांछितं ॥ ध्यानादिभाक्तयोगेन प्रसन्नास्मि तवानघ ॥ श्रीभृगुरुवाच ॥ देवी शर्वांगसंभूते विश्वपावनि नर्मदे ॥ तुष्टासि यदि विप्रस्य कुर्या त्तस्य ममानघे ॥ सर्वतीर्थाधिवासेस्मिंस्थाने संनिहिताभव ॥ तीर्थमेकं स्वनाम्ना वै कृपां कृत्वा ममोपरि ॥ हिताय सर्वलोकानां स्थापयस्वाघनाशनं ॥ यथा मयि कृपां लोकास्त्वदीयां वै वदंति च ॥ विश्वेशविग्रहभवे त्वमेकैव सरिद्वरा ॥ प्रपन्नार्तिहरामेवं नान्यांमन्ये सरिद्वरां ॥ नमस्तेस्तु नमस्तेस्तु याचे त्वां प्रणतः पुरः ॥ इत्युक्त्वाथ भृगुर्भूमौ दंडवत्प्रणतो भवत् ॥ मार्कंडेय उवाच ॥ तत उथाप्य तं देवी तथेत्याह भृगुं स्वयं ॥ सुसूक्ष्मं शोभनं लिंगं स्थापयामास शंकरं ॥ स्वनाम्ना च समभ्यर्च्य दत्वा चापि भृगोर्वरं ॥ स्वयमंतर्दधे पार्थ स्वतोये सा सरिद्वरा ॥ ततः प्रभति विख्यातं तीर्थं वै नर्मदेश्वरं ॥ तत्र वै स्नानमात्रस्य नरस्य मनुजर्षभ ॥ इह जन्मकृतं पापं नश्यते नात्र संशयः ॥ तत्तीर्थमुद्दिश्य तु यः स्नानार्थं याति भक्तितः ॥ पितरस्तस्य तुष्यंति गायंति च हसंति च ॥ सप्तजन्मकृतं पापं शिवं संपूज्य नश्यति ॥अष्टम्यां चतुर्दश्यां अश्वमेधफलं लभेत्॥उपोष्य पौषकृष्णायामष्टम्यां नर्मदेश्वरं॥पूजयित्वोपहारैश्च दीपान् दद्याद्दिशो दश॥पंचामृतेन संस्नाप्य सुगंधैश्च विलेपयेत्॥पूजद्विविधैः पुष्पैपद्मनीलोत्पलादिभिः ॥ नीराजनार्घनैवेद्यैः स्तुतिघंटाजयस्वनैः॥सकृत्संपूज्यतं शर्वं माहापातकवान् यदि ॥ ब्रह्महत्यादिपापैः स न लिप्तः स कदा च न ॥ ब्रह्मचर्येण देवेशं शुचिर्भुत्वार्चयेद्यदि ॥ ततः प्रभातसमये श्राद्धं कृत्वा यथाविधि ॥ शैवान्पाशुपतान्विप्रान्शक्त्यानैर्भोजयेन्नृप ॥ तस्याद्वमेकाविंशश्च पितरस्तृप्तिमाप्नुयुः ॥ दक्षिणां दापयेत्तेभ्यो यथा शक्त्या विधानतः॥ नर्मदेश्वरतीर्थे वै दत्तं भवति चाक्षयं ॥ इति श्रीरेवामाहात्म्ये श्रीभृगुकच्छे नर्मदेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ पूर्वोक्तमंतरं भूमेर्विहाय भरतर्षभ ॥ मातृतीर्थं ततोगच्छेत्सर्वकामप्रदं शिवं ॥ पुरा विष्णोः श्रिया सार्द्धं विवाहो वै यदाभवेत् ॥ तदेवामंत्रिता दे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्यो देवैः सह समागताः ॥ निर्वृत्ते तद्विवादे च भृगुणा प्रार्थिता हिताः ॥ चक्रुर्निवासं तत्रैव शर्वाणीप्रमुखा नृप ॥ ततः प्रभृति तत्तीर्थं मातृणां विश्रुतं शुभं ॥ संस्थिताखिलदेव्यस्ताश्चानंदं परमं ययुः॥तत्र तीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ मातृणां पूजनं कुर्यादुपहारैरनुत्तमैः ॥ नारी वा पुरुषो वापि वंध्यत्वे च चतुर्विधे ॥ विधिना तत्र वै स्नात्वा शोभनं पुत्रमाप्नुयात् ॥ स्नात्वाष्टम्यां चतुर्दश्यां पश्येन्मातृगणं हि यः ॥ न दौर्भाग्यं भवेत्तस्य सप्तजन्मानि भारत ॥ गौरिणीर्भोजयेद्भक्त्या पूजयेच्च स्वशक्तितः ॥ रविवारे चतुर्दश्यामष्टम्यां वा युधिष्ठिर ॥ मातृकूपोदके स्नात्वा दत्वार्घं बलिसत्क्रियां॥ नश्यंति देहजा दोषा वंध्यात्वादि पृथग्विधाः ॥ जायते नात्र संदेहस्तस्य वंशकराः सुताः ॥ इति श्रीरेवामाहात्म्ये मातृतीर्थं नाम ॥ मार्कंडेय उवाच ॥ तत्रैव दंडद्वितीये मत्स्येश्वरमनुमत्तमं ॥ सुरसेव्यं जगत्पूज्यं सर्वपापप्रणाशनं ॥ तत्रागत्य तपस्तेपे मत्स्यरुपी हरिः पुरा ॥ मत्स्यकल्पे तु यद्रूपं दधारासुरनाशनं ॥ वेदोद्धारकरं विष्णुरर्णवात्तेन चागतः ॥ तपश्चचार विपुलं दिव्यं वर्षयुतं नृप ॥ स्थानं संस्थापितं श्रीमद्ब्रूणा तदनंतरं ॥ समत्स्यो भगवान्विष्णुः स्थापयामास शंकरं ॥ देवेशं निखिलाधारं सर्वकारणकारणं ॥प्रीत्या परमया तस्य तपस्तप्त्वा पुरा महत् ॥ मत्स्येश्वराह्वयं पार्थ पुराणे यं विदुर्बुधाः॥ स्थापितं मत्स्यकल्पादौ कृतांतभयनाशनं ॥स्थापनाभृगुतीर्थे च श्वेतकल्पादिसंभवः ॥ पुराकल्पभवं चैतन्मत्स्येश्वरमनुत्तमं ॥ स्थापितं परया भक्त्या मत्स्यरूपेण विष्णुना ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेन्मत्स्यकेश्वरं ॥ अश्वमेधस्य यज्ञस्य सप्राप्नोति फलं शुभं ॥ घृतक्षीरवहानद्यो यत्र वृक्षामधुस्रवाः ॥ तत्र ते मानवा यांति प्रसन्ने मत्स्यके श्वरे ॥ दधिभक्तेन देवस्य यः कुर्याल्लिंगपूरणं ॥ सिक्थसंख्या शिवे लोके स वसेत्सुरपूजितः ॥ श्रीफलैः पूरयेल्लिंगं गणो भूत्वा शिवस्य च सोपि तत्फलमाप्नोति तीर्थस्यास्य प्रभावतः ॥ पुष्पं पत्रं फलं तोयं यो दद्यान्मत्स्यकेश्वरे ॥ तत्सर्वमक्षयं पार्थ सप्तजन्मानि जायते ॥ मत्स्यकेश्वरमत्स्यौ च वरदौ तस्य भारत ॥ सर्वेषामेव पात्राणां महापात्रं महेश्वरः ॥ तस्मात्सर्वप्रयत्नेन तो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षयेत्तं नृपोत्तम ॥ शांतो दांतो ब्रह्मचारि नित्यं यः पूजयेच्छिवं ॥ इह जन्मनि देवेशो मृतं गच्छेदनामयं ॥ मत्स्ये मत्स्येश्वरं वा पि पूजिते तत्फलं लभेत् ॥ योगिनां पूजने भक्त्या तत्फलं लभते नरः ॥ ते धन्यास्ते महात्मानस्तेषां जन्म सुजीवितं॥ येषां गृहेषु भुजंति शैवाश्च वैष्णवा नृप ॥ संनिरुद्धेंद्रियग्रामो यत्र यत्र वसेन्मुनिः॥ तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं गया ॥ यत्फलं वेदविदुषां भोजिते कोटिसंख्यया ॥ तत्फलं जायते राजन्नेकेन शिवयोगिना ॥ मत्स्यकेश्वरमासाद्य प्राणत्यागं करोति यः ॥ न तस्य पुनरा वृत्तिः शिवलोकात्कदा च न ॥ अष्टम्यां वा चतुर्दश्यां मासि मार्गशिरे शुभे॥मत्स्येशं पूजयन् भक्त्या सर्वतीर्थफलं लभेत् ॥ इति श्रीरेवामाहात्म्ये मत्स्येश्वरतीर्थनाम ॥मार्कंडेय उवाच ॥ देवतीर्थं ततो गच्छेच्चत्वारिंशत्क्रमांतरे ॥यत्र सिद्धा लोकपाला देवाः सें द्रा दिगीश्वराः ॥ भृगोः पुत्र्या यदोद्वाहे देवाः सर्वे निमंत्रिताः ॥समागतास्तदा जाता विवाहो विष्णुना सह॥ भृगुः स्वस्थानसिध्य र्थं प्रार्थयामास तान्सुरान्॥यूयं सर्वे लोकपाला दिक्पालाश्च समागताः॥मम पुत्र्या विवाहे वै दयां कृत्वा परां मयि ॥स्थानं ममैतत्सक लं दृश्यते सार्थकं सुराः॥स्थितैर्भवद्भिरत्रैव तस्मातिष्ठत सुव्रताः॥अंशैर्वा प्रीतिमिच्छं तोविष्णुनाप्रभ विष्णुना ॥अहं भृगुर्ब्राह्मणो मान्य पात्रं भवद्भिस्तन्मद्वचः कार्यमेतत् ॥अन्ये च वै सर्वलोका यथैव स्थानं वै तत्पालनीयं तथैव॥मार्कंडेय उवाच॥भृगुणा प्रार्थिताश्चैवं सर्वे तत्रैव चास्थिताः॥ रेवातीरे सुगंभीरे पुण्यनीरे मनोहरे ॥ देवैश्च ऋषिभिः सिद्धैः स्थानं यत्सेवितं पुरा ॥ तत्र तीर्थे तपस्त प्त्वा स्थापयित्वा परं शिवं ॥ स्थित्वांशैश्च निजैर्देवास्तमापृच्छययुस्ततः ॥ तदाप्रभृतितंराजेंद्रदेवतीर्थमितिश्रुतं ॥ स्नानं दानं ज पो होमः स्वाध्यायो देवतार्चनं ॥ तत्र तीर्थे कृतं पार्थ भवेत्सर्वं तदक्षयं ॥ कृष्णपक्षे त्रयोदश्यां नभस्ये तु विशेषतः ॥ प्रधानं स र्वतीर्थानां देवैरध्यासितं यथा ॥ तत्र स्थाने त्रयोदश्यां स्नात्वा श्राद्धं समाचरेत् ॥ मध्वाज्यपायसैर्विप्रान् भोजयेच्छक्तितो नृप ॥ देवैः संस्थापितं देवं संपूज्य वृषभध्वजं ॥ सर्वपापविनिर्मुक्तो देवलोकेषु मोदते ॥ इति श्रीनर्मदामाहात्म्ये श्रीभृगुकच्छे देवतीर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम त्रिषष्ट्यधिकशततमोध्यायः ॥ १६३ ॥ मार्कंडेय उवाच ॥ धनुः शतं ततो गत्वा धनुषा तीर्थमुत्तमं ॥ शिखितीर्थं
नृपश्रेष्ठ सर्वदुष्कृतनाशनं ॥ शतसंवत्सरे यज्ञे नृपस्य तु वसोः पुरा ॥बभूव पूर्णयज्ञे वै द्वादशाद्बं घृताहुतिः॥गजशुंडाप्रमाणेन पूर्णा
हुतिरविश्रमाः ॥ परितृप्ताः प्रसन्नाश्च तत्र देवास्तु कोटिशः ॥ ब्रह्मविष्णवीशमुख्यावै स्वस्वप्रीत्या वरान्ददुः ॥ किंतुप्लवामगाद्वन्हि
र्मंदतेजा घृतप्लुतः ॥ गत्वात्मनस्त्वग्निमाद्यंलज्जमानो विनिर्ययौ ॥ पितरं स भृगुं प्राप्य प्रणम्याख्यातुमुद्यतः ॥ बलहीनो यदा व
क्तुं न शक्नोति विभावसुः ॥ तदा ज्ञानबलात्स ज्ञातवान् भृगुरग्रतः ॥ श्रीभृगुरु उवाच ॥ वन्हो वमत्र रेवायास्तीरे तीव्रं तपश्चर
॥ तोषयंतपसा सर्वं ततः सिद्धिमवाप्स्यासि ॥ ततः स भृगुणा प्रोक्तस्तपस्तत्रैव तप्तवान् ॥ त्रिस्नायी धूर्जटिध्यायी जलाशी मारु
ताशनः ॥ एवं दिव्यं द्वादशाब्दं तपस्तेपे हुताशनः ॥ स्थापयित्वा शिवं शांतं पुरतस्तं प्रपूजयत् ॥ तत्र प्रसन्नो भगवान् प्रददौ त
स्य वांछितं ॥ शिखादीप्तिं बलं तेजः ॥ पूर्वस्माच्च विशेषितं ॥ आदोष्यं चैव सर्वत्र ज्वलमानस्य धूर्जटिः ॥ श्रीमार्कंडेय उवाच
॥ ततः प्राप्य वरान्पार्थ प्रणम्य परमेश्वरं ॥ प्रतिश्च प्रययौदिव्यं स्वस्थानं सुरपूजितं ॥ ततः प्रभृति विख्यातं शिखितीर्थं युधिष्ठि
र ॥ तपस्तेपे परं यत्र शिखार्थं हव्यवाहनः ॥ शिखां प्राप्य शिखिर्भूतो देवं स्थाप्य शिखीश्वरं प्रतिपत् शुक्लपक्षे या भवे
दश्वयुजे नृप ॥ शिखितीर्थे नरः स्नात्वा तर्पयेत्पितृदेवताः ॥ हिरण्यं ब्राह्मणे दद्यात्संतर्प्य च हुताशनं ॥ नानाविधोपचारैश्च पूज
यित्वा शिखीश्वरं ॥ अनेन विधिना तीर्थे समाराध्य महेश्वरं॥विमानेनार्कवर्णेन अप्सरोगणसेवितः॥ गीयमानस्तुगंधर्वैर्देवलोकं स
गच्छति ॥ शत्रुक्षयमवाप्नोति तेजस्वी पुत्रवान् भवेत् ॥ इति श्रीरेवामाहात्म्ये श्रीभृगुकच्छे शिखीतीर्थंनाम ॥मार्कंडेय उवाच॥ च
तुः शतांतरे गत्वा दंडानां भरतर्षभ ॥ गंतव्यं कोटितीर्थं तु सर्वपापप्रणाशनं ॥ बदर्याः समनुप्राप्तो नरनारायणावृषी ॥ रेवाया
उत्तरे कूले भृगुकच्छे यदा नृप॥ऋषेर्नारायणस्याभूद्विवाहः स्वप्रीया सह ॥ तदा तु ऋषयः प्राप्तास्तत्र वै कोटिसंख्यया॥ श्रुत्वा भृ ३००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चरित्रं वा प्यतुलं ते तपोधनाः ॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौतमः ॥ जमदग्निर्वसिष्ठश्च च्यवनो पैंग्य एव च॥असितो दे
वलश्चैव तथा नारदपर्वतौ ॥ मतंगश्चापि हारितो जातूकर्ण्योथ बाष्कलः ॥ शाकल्यः शौनको मंगुर्मडूकः सुरभिर्यमः॥ क्रतुर्वेदाशिराः
सौम्यः शंखोथ लिखितस्तथा ॥ शतर्चिनो गृत्समदः सुमंतुर्जैमिनिस्तथा ॥ इत्येवमाद्या ऋशयस्तथान्येपि च कोटिशः॥श्रियो विवा
हे निवृत्ते दृष्ट्वा स्थानं सरिद्वरां॥स्नानध्यानसमाधिस्थाः शंभोराराधने च्छया ॥ तपश्चक्रुः सुविपुलं वर्षाण्ययुतसंख्यया ॥ स्थापयि
त्वा परं शंभुं लिंगरूपं सनातनं ॥ मंत्रैर्नानाविधैस्तत्र पूजयंतः पृथक् पृथक् ॥ ततस्तुष्टो महादेव उमया सह शंकरः ॥ प्रत्यक्षस्ता
न्प्रति प्राह वरयध्वं वरं द्विजाः ॥ ऋषय ऊचुः ॥ यदि तुष्टोसि देवेश यदि देयो वरो हि नः ॥ अत्र स्थाने महादेव सांनिध्यं
कर्तुमर्हसि ॥ ऋषिकोटिकृतं त्वेनत्कोटितीर्थं हि नामतः ॥ त्वत्प्रसादान्महादेव लोकानां भुक्तिमुक्तिदं ॥ जायतां भवपापघ्नं यथा
देहि सुरेश्वर ॥ तथा नस्तपसः सिद्धिः सदैवास्तुमहेश्वर ॥ महादेव उवाच ॥ कोटितीर्थमिदं विप्रा मत्प्रसादाद्भ
विष्यति ॥ नाम्ना कोटीश्वरश्चाहं लोकानां वांछितप्रदः ॥ भविष्यामि न संदेहस्तपः निद्धिस्तथास्तु वः ॥ इत्युक्त्वा
स महादेवस्तत्र लिंगे लयं ययौ ॥ एवं संस्थाप्य तीर्थं ते मुनयः शंसितव्रताः ॥ गतागता भवंतिह भृगोः प्रीत्या भृगु स्थले
॥ तीर्थं कोटीश्वरं नाम ये पश्यंति महामते ॥ तस्य दर्शनमात्रेण कोटितीर्थफलं लभेत् ॥ तथा कोटीश्वरीं देवीं मुनिभिःस्थापिता
मुमां ॥ शूलासिक्षुरिकाहस्तां चामुंडां महिषार्दनीं ॥ कृष्णपक्षे चतुर्दश्यां मासि भाद्रपदे नृप ॥ कोटिशस्तत्र तीर्थानि समाहूय
ततस्ततः ॥ ऋषिभिस्थापितः शंभुः शांभवीशक्तिसंयुतः ॥ तस्यांतिथावुपोष्येह सर्वपातकसंक्षयः ॥ तत्र तीर्थे तदा गत्वा स्नानं कृ
त्वा विधानतः ॥ माघफाल्गुणयोर्मध्ये भूतायां वा युधिष्ठिर ॥ नरकादुद्धरत्याशु पुरुषानेकविंशति ॥ तिलोदकप्रदानेन किं पुनः
श्राद्धदो नरः ॥ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं ॥ तत्तीर्थस्य प्रभावेन सर्वं कोटिगुणं भवेत् ॥ अष्टम्यां वा चतुर्दश्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पक्षयोरुभयोरपि ॥ कृत्वा स्नानं तदा पार्थ भक्तिभावेन संयुतः ॥ तिलोदकं तथा श्राद्धं पितॄणां चिरतृप्तिदं ॥ हृष्टतुष्टाश्च पितर स्तृप्ता यांति शिवालयं ॥ एवं विधं कोटितीर्थं रेवायां भृगुतीर्थगं ॥ सर्वपापहरं पार्थ सर्वदुःखविनाशनं ॥ उपपापानि नश्यंति स्नानमात्रेण भारत ॥ अष्टम्यां वा चतुर्दश्यामुपवासपरो नरः ॥ चतुर्द्धा पूरयेल्लिंगं तस्य पुण्यफलं शृणु ॥ ब्रह्महत्यादिपापानि नश्यंते नात्र संशयः ॥ सोश्वमेधस्य यज्ञस्य लभते फलमुत्तमं ॥ स्वर्णान्नजलवस्त्राणां दानैः संतोषयेद्द्विजान् ॥ पादुकोपानहच्छत्रदानै स्तुष्येन्महेश्वरः ॥ कमंडलुप्रदानं च तत्र तीर्थे प्रशस्यते ॥ भोजनाच्छादनैः पार्थ यतींश्च परितोषयेत् ॥ स याति परमं स्थानं यत्र देवो महेश्वरः ॥ पिष्टदीपं तत्र कृत्वापितॄणां परिकल्पयेत् ॥ तत्र यद्दीयते दानमपि वालाग्रमात्रकं॥तदक्षयफलं सर्व मित्येवं शंकरोब्रवीत्॥कोटीश्वरे मृतानां तु नराणां भावितात्मनां॥अनिवर्ता गतिस्तेषां शिवलोकात्कदा च न॥अथ चेल्लोकवृत्यर्थं मर्त्यलोके जिगीषति॥वेदवेदांगतत्वज्ञो जायते विपुले कुले॥धनधान्यसमायुक्तो विद्यावृत्तिसमन्वितः॥सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदः शतं॥एतत्पुण्यं पापहरं कथितं नृपसत्तम ॥ कोटितीर्थस्य महात्म्यं यः शृणोति युधिष्ठिर ॥ तीर्थकोटिषु यात्रा च स्नात्वा तत्फलमश्नुते ॥ इति श्रीनर्मदामाहात्म्ये भृगुक्षेत्रे कोटितीर्थ महात्म्यं ॥ मार्कंडेय उवाच ॥ ततो दंडसहस्रांते गच्छेत्तीर्थं पितामहं ॥ विख्यातं भृगुकच्छांतः सर्वपापप्रणाशनं ॥ तत्र तीर्थे महापुण्ये पुरा वर्षशतत्रयं ॥ आराधनं कृतं शंभोर्ब्रह्मणा परमेष्ठिना ॥ युधिष्ठिर उवाच ॥ किमर्थं नरशार्दूल ब्रह्मा लोकपितामहः॥आराधयति देवेशमेतत्कथय मे प्रभो॥मार्कंडेय उ०॥ शृणु राजन्पुरा वृत्तं मेरु पृष्ठे महात्मना ॥ सृष्ट्वा तिलोत्तमां नारीं ब्रह्मा विस्मयमागतः ॥ यदुत्तमं यत्परमं यच्छ्रेष्ठं पद्मरूपवत् ॥ ततस्ततो समादाय ब्रह्मणा सा विनिर्मिता ॥ उपमाना तु सर्वस्मात्तिलेनाप्युत्तमा यतः ॥ तिलोत्तमेति नामास्या ददौ ब्रह्मा स्वयं नृप ॥ तां दृष्ट्वा चातिचार्वंगीं रूपलावण्यसंयुतां ॥ सद्यः स्मरशरैर्विद्धो वैयग्र्यं परमं गतः ॥ देवेष्वीश्वरमुख्येषु स्थितेष्वपि नृपोत्तम ॥ ऋषिसिद्धेषु निर्लज्जः सर्वं विस्मृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवान्विभुः ॥ स्वपुत्रिकाभिगमनं तदा वांछन् पितामहः ॥ शप्तः शर्वेण देवेन कोपाविष्टेन दुर्नयात् ॥ महादेव उवाच ॥ स्रष्टात्वमेव जगतो जगतश्च पितामहः ॥ त्वं चेदेवं हि निर्लज्जो नयं विस्मृतवानसि ॥ वेदास्त्वतो न शिष्यंति ज्ञानं च कमलासन ॥ अपूज्यः सर्वलोकानां भविता त्वं न संशयः ॥ दुर्नयादेव सावित्री तव शापं प्रदास्यति ॥ श्रीमार्कंडेय उवाच ॥ एवं शापांकुशाक्रांतो विरिंचिः कृत्तिवाससा ॥ विवेकाद्वीक्ष्य चित्ते स्वे ततः खेदावृतो बहु ॥ रेवाया उत्तरे कूले लज्जितस्तमुपागतः ॥ पश्चिमादुदधेः पार्श्वे चचार विपुलं तपः ॥ आराधयामास विभुं सर्वलोकमहेश्वरं ॥ शापानुग्रहशक्तं च सर्वज्ञं सर्वकारणं ॥ ब्रह्मा उवाच ॥ नमामि ते पादयुगं जगत्पते पुरांधकारे पुरुषोत्तमप्रिय ॥ त्वत्तो हि नान्या गतिरस्ति मे प्रभो प्रसीद पाहीश्वर मामिहागतं ॥ त्वत्प्रसादजनितं हि कर्म मे सर्गलक्षणमिदं महेश्वर ॥ तत्र मोहरचना भवत्कृता या च मामपि विमोहिनी विभो ॥ कोहं कस्त्वं कस्य कः शापलंभः कोहं मोहं प्राप्तवान् का सुयोषा ॥ मोहाविष्टश्चिंतयन्वै विरंचिरेवंभर्गस्त्वत्कृता कापि लीला ॥ त्वयि प्रकुपिते नाथ त्वमेव शरणं मम ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनं ॥ तं दर्शय महेशान यस्त्वत्तोधिकतां वहेत् ॥ सर्गपालनसंहारास्त्वत्त एव भवंति हि ॥ न त्वां स्तोतुं विजानामि यद्गुणांशांशजो ह्यहं ॥ चतुर्विधा च या वाणी त्वल्लीलासंभवा यतः ॥ मूढोहमविनीतोहं मदांधो निस्त्रपः प्रभो ॥ तथापि त्वां प्रपन्नोहं पाहि पाहि महेश्वर ॥ मार्कंडेय उवाच ॥ एवं स्तुतवतस्तस्य वेधसः स्थापितात्पुरः ॥ लिंगाद्भर्गः समुत्थाय वरं ब्रूहीत्युवाच ह ॥ ब्रह्मा उवाच ॥ यदि प्रसन्नोसि मम।ष्टमूर्ते वरं ददासि प्रियमंजसा चेत् ॥ वेदांश्च विज्ञानमनुत्तमं मे भवेद्यथा पूर्वनतो विशिष्टं ॥ तथा कुरुष्व प्रभुता च सर्गे हरस्व दोषानखिलान्ममेश ॥ याचे कपर्दिन् किमपीह नान्यत्प्रभुस्त्वमेवासि चराचरस्य ॥ अद्यप्रभृति तीर्थेस्मिन्मम नाम्ना तु धूर्जटे॥सहोमया त्वया स्थेयं लोकानां हितकाम्यया ॥ महेश्वर उवाच ॥ एवं सर्वं तव विधे भविष्यति न संशयः॥ तथाहमत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थास्यामि तव प्रीत्या सहोमया ॥ एवमुक्त्वा महादेवस्तत्रैवातरधीयत ॥ ब्रह्मापि स्थापितं शर्वं पूजयित्वा विधानतः ॥ गतागस
स्तत्र तिष्ठन्निजांशेन युधिष्ठिर ॥ श्री मार्कंडे उवाच ॥ पितामहेश्वरं तीर्थं तदाप्रभृति विश्रुतं॥ सर्वपापहरं पुण्यं सर्वतीर्थेष्वनुत्तमं ॥
तत्र भाद्रपदे मासि वैशाखे वा युधिष्ठिर ॥ अमावास्यादिने पुण्ये स्नात्वा संतर्पयेपितॄन् ॥ पिंडदानेन विधिना तिलतोयेन वा पु
नः ॥ तृप्यंति पितरस्तस्य यावदाहूतसंप्लवं ॥ पितामहेश्वरे स्नात्वा पूजयेद्यो महेश्वरं ॥ देवं पितामहं वापि ह्युपहारैरनुत्तमैः ॥
स मुच्यते न संदेहः पातकैश्चोपपातकैः ॥ वस्त्रं प्रावरणं धौत्रं छत्रोपानहचंदनं ॥ तीर्थे पितामहे दत्तं सर्वं भवतिचाक्षयं ॥ वेदपा
रायणं यत्र कुर्याद्यः कारयेत्तु वा ॥ पुराणपाठनंवापि तस्य तुष्येत्पितामहः ॥ गायत्रीजाप्यमथवा यः कुर्यात्तत्र वै द्विजः ॥ स या
ति परमं स्थानं यत्र गत्वा न शोचति ॥ इति ते कथितं पार्थ तीर्थं पैतामहं मया ॥श्रुत्वापि तस्य महात्म्यं पूतो भवति मानवः
॥ अग्निष्टोमातिरात्राभ्यां फलं यत्समुदाहृतं ॥ संध्ययोरुभयोः श्रुत्वा महात्म्यं तदवाप्नुयात् ॥ एवं तव मयोक्तानि भृगुक्षेत्रस्य म
ध्यतः ॥ तीर्थान्युच्चावचानीह शृणुतान्यपिनामतः ॥ पिंगलेश्वरमारभ्य यावत्पैतामहं नृप ॥चत्वारिंशत्तथा षट् च तानि वक्ष्याम्यशे
षतः ॥ कल्पे ख्यातानि यान्यस्मिंस्तेषां सिद्धिरनुत्तमा ॥ कल्पे कल्पे महातीर्थं प्रछन्नं स्याद्युधिष्ठिर ॥ प्रच्छन्नानीतराणिस्युर्विशेषा
णां च संभवः ॥ श्रुत्वैतेषां च नामानि प्रत्यहं संध्ययोरपि ॥ वाङ्मनः कायशुद्धस्तु पठन्वापि समाहितः ॥ नानाविधैर्नरः पापैः
संतापैश्च विमुच्यते ॥ वाजपेयस्य यज्ञस्य सम्यगिष्टस्य यत्फलं तत्फलं॥ समवाप्नोति नात्र कार्या विचारणा ॥ तीर्थानां परमं तीर्थं
प्रथमं पिंगलेश्वरं ॥ ततो भूतीश्वरं नाम सैंधवायतनं तथा ॥ शंखोद्धारं परं तीर्थं गौतमेश्वरमुत्तमं ॥ दशाश्वमेधतीर्थं च भृगुतीर्थ
मतः परं ॥ सौभाग्यसुंदरीतीर्थं केदारं च ततो नृप ॥ धूतपापं च दशमं एरंडीतीर्थमेव च॥ कनकेश्वरतीर्थं च ज्वालश्वरमतः परं॥
शालिग्रामं सोमनाथं वाराहं शोडशं नृप ॥ चंडप्रभासतीर्थं च द्वादशादित्यमेव च सिद्धेश्वरं कापिलं च त्रिविक्रममतः परं॥ विश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपं तथा तीर्थं तीर्थं नारायणस्य च ॥ मूलश्रीपतिसंज्ञं च चौलश्रीपतिसंज्ञकं ॥ देवतीर्थं हंसतीर्थं प्रभातीर्थमतः परं ॥ मूलस्थान कठेशं च अट्टहासं च भूर्भुवं ॥ त्रयस्त्रिंशत्तमं पार्थ तीर्थं शूलेश्वरं विदुः ॥ सारस्वतं दारुकेशं षट्त्रिंश च्छ्वाश्विसंज्ञकं ॥ गोनागोर्नी तिविख्यातं सावित्रीतीर्थमेव च ॥ वालिखिल्यं नर्मदेशं मातृतीर्थं च भारत ॥ मच्छकेश्वरसंज्ञं च देवतीर्थ मतः परं ॥ शिखितीर्थं कोटितीर्थं तीर्थं पैतामहं ततः ॥ एतन्मात्रं भृगुक्षेत्रं विद्धि पांडवसत्तम ॥ यत्र स्नात्वा च पीत्वा च नरः शांकरलोकभाक् ॥ इति ते कथितं स्थानं शृणु तीर्थान्यतः परं ॥ पश्चिमाब्ध्यवधि यावद्दक्षिणोत्तरतीर्थयोः ॥ इति श्रीवायुप्रोक्तशिवसंहितायां श्रीनर्मदामहात्म्ये श्रीभृगुक्षेत्रे पितामहतीर्थनाम चतुष्टयाधिकशततमोध्यायः ॥ १६४ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेन्महाराज नर्मदादक्षिणे तटे ॥ क्रोशद्वयांतरे प्राप्ते मार्कंडेश्वरतीर्थतः॥अक्रुरेश्वरपार्श्वे तु मांडव्येश्वरसंज्ञितं॥त्रिषु लोकेषु विख्यातं पवित्रं पापनाशनं॥ संसिद्धो यत्र मांडव्यो मुनिर्नारायणस्तथा॥नारायणे न शुश्रूषा ज्येष्ठ शुलभृतः कृता ॥देवखातं सरस्तत्र स्नानात्पापप्रणाशनं॥तत्र स्नात्वा महाराज मुच्यते पापसंकटात्॥युधिष्ठिर उवाच॥आश्चर्यभूतं लोकस्य यच्च यत्कथितं द्विज॥नदृष्टं न श्रुतं तात शूलस्थेन तपः कृतं ॥ मुनिना तेन विप्रर्षे तत्र मे कारणं महत् ॥ तन्मे कथयसर्वत्वं मुनिभिः सहितो मुने ॥ मार्कंडेय उवाच ॥ शृणु राजन्पुरावृत्तं यथा त्रेतायुगे क्षितौ ॥ लोकपालो परो ह्यासीद्देवराजो नृपोत्तमः ॥ स गां रक्षति यत्नेन पुत्रवत्पालयन्प्रजाः ॥ दाक्षायणी प्रिया तस्य भर्तुश्चित्तवशानुगा ॥ परस्परं सदा प्रीतिर्वर्द्धते वै यथा तयोः ॥ एवं व्यवस्थितो राजा शशास पृथिवीमिमां॥ हस्त्यश्वरथसंपूर्णो धनवाहनसंयुतः ॥ परिपूर्णो गुणैः सर्वैरनपत्यस्तु भूपतिः ॥ दुःखेन महताविष्टः संतप्तः संततिं विना ॥ स्नान होमजपध्यानपूजनैः परमेश्वरीं ॥ व्रतोपवासनियमैः सपत्नीको नराधिपः ॥ दुर्गामाराधयामास देवीं दुःखार्तिहारिणीं ॥ शिवां शिवप्रदां चंडीं चंडमुंडविनाशिनीं ॥ स्तोत्रैर्नाना॥ विधैर्भक्त्या पूजाविधिसमाधिना ॥ राजा उवाच ॥ ययाराधितया लोका प्राप्नुवंत·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 प्सितं फलं ॥ तां नमामि विधेः शक्तिं नानासर्गविचक्षणां ॥ यां प्रपद्येव लोकास्सुराधिव्याधिविनाकृताः ॥ तां वंदे वैष्णवीं देवीं
संसारभयनाशनीं ऐश्वर्यसुखसंतानसंपन्नं स्यादिदंजगत् ॥ यद्भक्त्या शांकरीं शक्तिं तां नमामि वरप्रदां ॥ स्वपदानि सुराः सर्वे या
मवाप्यापुरंजसा॥निःसपत्नकरीं शक्तिं कौमारीं नौमि तां परां॥ दुःखार्तिदैन्यदैत्यघ्नीं हिरण्याक्षविनाशिनीं ॥ शक्तिं वंदे तु वाराहीं
धरोद्धरणकर्मकां ॥हिरण्यकशिपोः पूर्वं वक्षस्थलविदारिणीं ॥ नतोस्मि नारसिंहीं तां शक्तिं सर्वाभयप्रदां ॥ यामवाप्य सुराः सर्वे
वितन्वंति सनाथतां ॥ तां वंदे परमां शक्तिं शाक्रीं कुलिशपाणिनीं ॥ जयदेवि प्रपन्नार्तिहारिणि त्राणकारिणि ॥ जय वाराहि चा
मुंडे चंडमुंडविनाशिनि ॥ त्रियंबके शिवे ब्राह्मि कौमारि कुलिशायुधे ॥ कात्यायिनी महामाये नारायणि नमोस्तुते ॥ नास्ति किं
चित्त्वया हीनं त्रैलोक्ये सचराचरे ॥ अतस्त्वां नौमि नौम्यार्त्तस्त्वां नौमि परमेश्वरीं ॥ मार्कंडेय उवाच ॥ एवं राज्ञा स्तुता दे
वी तुष्टा वचनमब्रवीत् ॥ मध्यरात्रे विविक्ते तु पूजया च प्रतोषिता ॥ श्रीदेव्युवाच ॥ प्रसन्नास्मि नृपश्रेष्ठ वरंवरय वांछितं ॥
आराधिता त्वया भक्त्या स्तुत्या च परितोषिता ॥ याचतो नृप दास्यामि तवाद्य यदभीप्सितं ॥ देवराज उवाच ॥ यदि तुष्टासि
मे देवि वरार्हो यदि चाप्यहं ॥ पुत्रसंतानरहितं संततं मां समुद्धर ॥ देहि संतानवृद्धिं मे गोत्ररक्षां तथा कुरु ॥ अपुत्रिणां गृहा
णीह स्मशानसदृशानि वै ॥ पितरस्तत्र नाश्नंति देवाश्च सहमानुषैः ॥ क्रियमाणेप्यदरहः श्राद्धेमत्पितरः सदा ॥ दृश्यंते बहुशः
स्वप्ने निःश्वासक्षुत्प्रपीडिताः ॥ मार्कंडेय उवाच ॥ तस्य राज्ञो वचः श्रुत्वा देवी ध्यानमुपागता ॥ दिव्येन चक्षुषा दृष्टं त्रैलोक्यं स
चराचरं ॥ अप्रस्फुटमुखा पश्चाद्राजानमिदब्रवीत् ॥ श्रीदेव्युवाच ॥ संतानं नास्ति ते राजन् मया दृष्टमनेकधा ॥यजस्व यज्ञपुरुषं
प्रजापतिपतिं प्रभुं ॥भवित्री तव पुत्री तु तथापि न तु पुत्रकः॥मया दृष्टोमहीपाल तत्तोषाद्दुहितागमः॥एवमुक्त्वांतर्हिता देवी स राजा
प्यगमग्दृहान् ॥ इयाज यज्ञपुरुषं संजाता तेन कन्यका॥तेजोगुणवती तन्वी सर्वलोकमनोहरा॥दिव्यगंधर्वनागानां लोकेष्वस्ति न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्समा ॥ तस्य नाम कृतं पित्रा हर्षात्कौमोदिनीति यत् ॥ हंसलीलागतिः सुभ्रूः पीनोन्नतपयोधरा ॥ शुक्लमाल्यांबरधरा कुंडला
भरणोज्वला ॥ कुचमध्यगतो हारो विद्युत्सौदामिनी यथा॥ भ्रमरांचितकेशा सा बिंबोष्ठी चारुहासिनी ॥ लोचनांचितकर्णाभ्यामा
कर्षतीव दिग्गजान् ॥ पुष्पतांबूलकर्पूरैः कामशक्तिरिवापरा॥ पित्रोर्भ्रातुः सखीनां च क्रीडंत्यानंदवर्द्धनी ॥ एकदा नृप सा बाला
सखीजनसमावृता ॥ चंदनागरुतांबूलपुष्पाक्षतफलानि च ॥ गृहीत्वा निर्गतांबायाः पूजनार्थं सरस्तटे ॥ मुक्ताभूषणवासांसि जलो
पांते शुभेक्षणा ॥ स्नातुं जलविहारार्थं तडागांतर्विवेश सा ॥ क्रीडमाना सखीयुक्ता तिष्ठते यावता जले ॥ तटस्थैर्योधपुरुषैर्वृद्धस्त्री
भिश्च रक्षिता ॥ तावता शंबरो दैत्यः श्येनरूपेण चागतः ॥ गृहीत्वा जलमध्यस्थां माययांतर्दधे रिपुः ॥ वस्त्राभरणजातं चाप्य
दृश्यस्तज्जहार च ॥ नीत्वा कौमोदिनीं दैत्यः खमुत्पत्य स जगामह ॥ वायुमार्गेण तस्यास्य कौमोदिन्या समं नृप ॥ अपतन्
कुंडलादीनि कराद्आभरणानि तु ॥ गच्छत स्त्वतिवेगेन स्थितो यत्र महामुनिः ॥ मांडव्यो नर्मदातीरे योगध्यानरतो मुनिः ॥ ली
नो महेश्वरपदे शिवे नारायणात्मके ॥ यवीयान् तस्य च भ्राता भ्रातुः शुश्रूषणे रतः ॥ तपसा च कृशीभूतो ध्यायमानो जनार्द
नं ॥ इति श्रीरेवामहात्म्ये कामोदिनीहरणंनाम ॥ मार्कंडेय उवाच ॥ अथ कामोदिनीं साक्षान्नीयमानां खगेन तु ॥ दृष्ट्वा क्रो
शंति सर्वास्ता निःसृत्य च जलाद्बहिः ॥ गत्वा राजकुलं सर्वाः कथयंतिस्म दुःखिताः ॥ स्त्रिय ऊचुः ॥ हृता कौमोदिनी राज
न् केनचित् श्येनपक्षिणा ॥ क्रीडंती सा जलोपांते तडागे देवसन्निधौ ॥ अन्वेष्टव्या महाराज तत्पंथा यदि दृश्यते ॥ श्रीमार्कंडेय
उवाच ॥ ततस्तद्वचनाद्राजा हाहेत्युक्त्वा समुत्थितः ॥ दुःखितो व्याकुलो दीनो रुदमानो वरासनात् ॥ वज्रपातसमं वाक्यं श्रु
त्वा च पतितो भुवि ॥ मंत्रिभिश्च समाश्वस्तः पुनरुत्थाय भूपतिः॥ मार्गं विलोकयामास जनाश्चाप्रेषयद्दिशः ॥ न चिन्हं न च त
न्मार्गं पदं वाऽप्राप्य दुःखितः तस्य राज्ञः सुदुःखेन दुःखितो नागरो जनः ॥ क्षणादाश्वासितो राजा मंत्रिभिः स पुरोहितैः ॥ किं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्यमित्युवाचेदं सांप्रतं किं कृतं भवेत् ॥ स सर्वैः संविदं कृत्वा वाहिनीं चतुरंगिणीं ॥ प्रेषयामास सर्वासु दिक्षु हस्त्यश्वसंकुलां
॥ संनद्धश्चाप्यभूद्राजा गगनं संग्रसन्निव ॥ नैवं देवो न गंधर्वो न दैत्यो वा न राक्षसः ॥ किं करिष्यत्यसौ राजा न विद्मो रोग
निष्कृतिं ॥ इति चिंतान्विते लोके वदमाने मुहुर्मुहुः ॥एतस्मिन्नंतरे तावद्दंडवासी समागतः॥ गृहीत्वाऽऽभरणं तस्यास्त्वंगप्रत्यंगदं
हि यत् ॥ निवेद्याकथयद्राज्ञि मया दृष्टं त्ववेक्षणात् ॥ तटे वनाश्रमे राजन् ब्राह्मणो यत्र तिष्ठति ॥ तापसैर्वेष्टितो मौनी दृष्टं
तस्याश्रमे मया ॥ दंडवासिवचः श्रुत्वा दृष्ट्वा तस्या विभूषणं ॥ क्रोधरक्तास्यनयनो वीक्ष्य मंत्रीशनैगमान् ॥ समूर्द्धकंपं प्रोवा
च कोपस्खलितवाक् वचः ॥ ईदृग्विधसमाचारा ब्राह्मणा विषये मम ॥ चौर्यवृत्ता व्रतछन्नाः परद्रव्यापहारिणः ॥ तेनाद्य लिंगिना
पुत्री हृता मम तपस्विना ॥ तपास्विवेषमाश्रित्य मायिना तेन पापिना ॥ श्येनरूपं समाश्रित्य मम घातः कृतो महान्॥पाषंडिनो
विकर्मस्थान् बिडालव्रतिकान् शठान् ॥ जाल्मतस्करदुर्वृत्तान् हत्वैतान् नास्ति पातकं॥न द्रष्टव्यो मया पापः स्तेयी कन्यापहारकः
॥शूलमारोप्यतां क्षिप्रं को विचारोत्र सत्तमाः॥स वध्यो मम दुष्टात्मा वेषच्छन्नो हि राक्षसः॥एवमुक्त्वा ज्वलन् क्रोधादादिशद्दंडनाय
कं॥कार्याकार्यमविज्ञाय सहसा रोषनोदितः ॥श्रीमार्कंडेय उवाच॥ ततः स भूपवचनाद्गत्वा तं ब्राह्मणं त्वरन् ॥ धृत्वा बध्वा स
मानीय शूलप्रोतमथाकरोत् ॥ ततः पौरजनाः सर्वे साश्रुकंठेक्षणा भवन् ॥ हाहेत्युक्त्वा रुदंत्यन्ये वदंत्यन्ये पृथक् पृथक् ॥ कृतं मह
त् कुच्छितं वै राज्ञा चंडालकर्मणा ॥ ब्राह्मणो नैव हंतव्यो विशेषेण च तापसः ॥ सापराधो यदि ततो निर्वास्यो नगराद्बहिः ॥
न राजा ब्राह्मणं हन्यात् महापापेष्ववस्थितं ॥ राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतं ॥ अवध्यो ब्राह्मणो बालः स्त्री तपस्वी च रो
गभाक् ॥ विहिताव्यंगिता तेषामपराधे महत्यपि ॥ इति शास्त्रमतं त्यक्त्वा राजा दुर्नयवान् यदि ॥ किं कुर्मः कस्य वा ब्रूम इति
जल्पंति ते जनाः ॥ नाश्नंति च गृहे रक्ता नाग्निं शुश्रुषयंति च ॥ उद्विग्नमनसः सर्वे गृहव्यापारवर्जिताः ॥ इति श्रीनर्मदामाहात्म्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांडव्यशूलारोपणंनाम पंचषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥ श्रीमार्कंडेय उवाच ॥ अथ तं ब्राह्मणं शूले प्रोतं दृष्ट्वा तपोधनं ॥ नारायणसमीपे तु गताः सर्वे महर्षयः ॥ नारदो देवलो रैभ्यो यमः शातातपोंगिराः ॥वसिष्ठो जमदग्निश्च याज्ञवल्क्यो बृहस्पतिः ॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ नैध्रुवः ॥ कौत्सशौनकपैंग्याश्च सुमंतुर्मुद्गलारुणी ॥ वालिखिल्यादयोन्ये च सर्वे संभूयसान्वयाः ॥ शूलप्रोतं हि तं दृष्ट्वा मांडव्यं मुनिसत्तमं ॥ करुणाशोककोपार्ता भ्रातरं तद्यवीयसं ॥ प्रोचुर्नारायण विप्रं किं कुर्म तव यन्मतं ॥ इत्युक्त्वा तेन सार्द्धं ते मांडव्यांतिकमागताः ॥ संभ्रांतमनसः प्रोचुः किं मृतः किंनु जीवति ॥ अवस्थां तस्य ते दृष्ट्वा विषादमगमन्परं ॥ तस्य दुःखमशक्तास्ते सोढुं सर्वे द्विजोत्तमाः ॥ ऊचुर्नारायणं शीघ्रं मांडव्यः पृच्छतां त्वया ॥ सांप्रतं यदि मन्येत राजानं भस्म कुर्महे ॥ मार्कंडेय उवाच ॥ तेषां तद्वचनं श्रुत्वा तं वै नारायणोब्रवीत् ॥ मयि जीवति यद्भ्रातरवस्थामीदृशीं गतः ॥ धिक् तात जीवितं मेद्य महता तपसा च किं ॥ दृष्ट्वा शूलस्थितं ज्येष्ठं यन्मनो न विदीर्यते ॥ अनुजानिहि मां भ्रातरद्यराष्ट्रं सराजकं ॥ भस्मीभूतं करोम्यद्य तत्राज्ञां तात देहि मे ॥ एवमुक्त्वा गृहीत्वापः करस्था अभिमंत्र्य च ॥ क्रोधेन शपते यावत् हुंकारस्तावदुत्थितः ॥ तेन हुंकारशब्देन ऋषयो विस्मिताः किल ॥ मुनेः समीपमागम्य तमपृच्छन् द्विजोत्तमाः ॥ ऋषयऊचुः ॥ निवारयसि किं विप्र शापं नृपजिघांसया ॥ येनायमनयः क्रूरः कृतश्चाधर्मबुद्धिना ॥ मार्कंडेय उवाच ॥ ऋषीणां वचनाद्विप्रः कृच्छ्रादिदमथाब्रवीत् ॥ अभिवंदामि वो मूर्ध्नाश्रृणुध्वमृषयः सह ॥ मार्कंडेय उवाच ॥ अर्घादिपूजामानार्हान्सामभिस्तानुपास्यच ॥ निर्विष्टैकाग्रमनसा मांडव्यो वाक्यमब्रवीत् ॥ मांडव्य उवाच ॥ प्राप्तं दुःखं मया घोरं पूर्वजन्मार्जितं द्विजाः ॥ क्रियतां मा विषादोत्र यतः स्वकृतभुङ्नरः ॥ ऋषयऊचुः ॥ केन कर्मविपाकेन जंतुर्जात्यंतरं व्रजेत् ॥ दानधर्मफलेनाथ केन स्वर्गं च गच्छति ॥ मांडव्य उवाच ॥ श्रृणुध्वं ऋषयः सर्वे यत्पृच्छत तपोधनाः ॥ भवतां नास्त्यविदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तं त्रैलोक्ये सचराचरे ॥ तथापि पूज्यैर्यत्पृष्टं कृपास्नेहप्रदर्शकैः ॥ तत्प्रवक्ष्यामि संक्षेपादशक्तोपि यथाबलं ॥ अदत्तदाना जायंते पर
भाग्योपजीविनः ॥ न स्नानं न जपो होमो नातिथ्यं न सुरार्चनं ॥ न पर्वणि पितृश्राद्धं कृतं यैर्द्विजसत्तमाः ॥ व्रजंति नरके घोरे
जायंते चांत्यजातिषु ॥ दरिद्रास्तु भवंत्येव पुनः पापं प्रकुर्वते ॥ पापाच्च नरकान्यांति स्थितिरेषा द्विजोत्तमाः ॥ कृमयश्च पतंगाश्च
श्वशृगालसरीसृपाः ॥ मत्स्यमर्कटमार्जारमंडूकमशकादयः ॥ उलूकगृध्रकाकोलककलाससरीसृपाः ॥ विड्वराहाश्च महिषाः कुज्यम
त्स्याः पिपीलिकाः ॥ इत्येवमादिपापास्तु जायंते सर्वयोनिषु ॥ ये स्नानशीला द्विजदेवभक्ता जितेंद्रिया जिवदयानुशीलाः ॥ ते
देवलोकेषु वसंति हृष्टाः पुनर्द्धनाढयाः पुनरेव नाकिनः ॥ये धर्मशीला जितमानरोषा विद्याविनीता न परोपतापिनः॥स्वदारतुष्टाः
परदारवर्जकास्तेषां न कुत्रापि भयं हि किंचित् ॥ ऋषयऊचुः ॥ किं पूर्वजन्मनि कृतं त्वया विप्र सुदुष्कृतं ॥येन कष्टमिदं प्राप्तं सं
धानं शूलगर्हितं ॥ श्रुत्वा त्वामागताः सर्वे मन्यमाना मृतं त्विति ॥ जीवंतं त्वां प्रपश्यामो यदि मन्यामहे वयं ॥ किं कुर्मः क
स्य वा ब्रूमो न चेज्जानाति कश्चन॥राज्ञः संतापजं दुःखमसह्या तव वेदना ॥ मांडव्य उवाच ॥ स्वयमेव कृतं कर्म स्वयमेवोप
भुज्यते ॥ सुकृतं दुष्कृतं विप्रा नान्ये भुंजंति कर्हिचित् ॥ यथा धेनुसहस्रेषु वत्सो विंदति मातरं ॥ तथा पूर्वकृतं कर्म कर्तारमनु
गच्छति ॥ न माता न पिता भ्राता भार्या वा न सुतः सुहृत् ॥ कर्मणो भागभोक्ता वै स्वयमेवोपभुज्यते ॥ श्रूयतां मम वाक्यं वै
भवद्भिः पृच्छितो यथा॥पूर्वे वयसि विप्रेंद्राः स्नानार्थमहमुद्यतः ॥ अभ्यंगसमये प्राप्ते त्वज्ञानाद्बालभावतः ॥धृत्वा विनोदाद्भ्रमरी प्रो
ता मे शूलकंटके ॥ तैलाभ्यक्तशिरोंगस्य परिभ्रमति मे वपुः ॥ धृता मया सा भ्रमरी कंटके चाधिरोपिता ॥ तद्दै पापफलं सद्य इ
हैव॥ मामुपागतं तच्च भुक्त्वा कियत्कालं प्राप्स्ये मोक्षं निरामयं ॥भवद्भिर्नेह संतापो धार्यो ह्यत्राथ वा द्विजाः॥इमामवस्थां भुक्त्वा
हं किंचिच्छेषे नवोत्तरे ॥ शूलाधिरोहणं प्राप्स्ये क्षपयिष्याम्यतस्त्वदं ॥ प्राक्तनं कर्म भुंजानो यन्मया संचितं पुरा ॥ भ्रातर्भूपस्य

CC-0. In Public Domain. Digitization by eGangotri

क्षंतव्यं क्रूरं कोपं निवर्तय ॥ मार्कंडेय उवाच॥ श्रुत्वाथ तस्य तद्वाक्यं मांडव्यस्य महर्षयः ॥लेभिरे हर्षमतुलं साधु साध्वित्यपूजय
न् ॥ नारायण उवाच ॥ इदं जलं मंत्रपूतं क्व मुंचामि वदस्व तत् ॥ येन राजा भवेद्भस्य सराष्ट्रः सपुरोहितः ॥ मांडव्य उवाच
॥ इदं जलं त्वं रक्षस्व कालकूटविषोपमं ॥ क्षेप्स्यामि जलधौ काले देवकार्यं समर्थितं ॥ मार्कंडेय उवाच ॥ अथ ते ऋषयः स
र्वे मांडव्यं प्रणिपत्य च ॥ तमापृच्छ्य गृहान् जग्मुः कश्यपाद्या सुहर्षिताः ॥ गच्छंतस्ते न ते चोक्ताः पंचमेहनि मानसाः ॥
भवद्भिः पुनरेतव्यं मत्सकाशं शिवाज्ञया ॥ मार्कंडेय उवाच ॥ तथेतिते प्रतिज्ञाथ प्रतिजग्मुर्यथागतं ॥ गतेषु विप्रमुख्येषु
शांडिलीया तपोधनाः ॥ द्वितीयेन्हि समायाता नचाबुध्यत तं मुनिं ॥ पतिं शिरसि चारोप्य रात्रौ पर्यटने तु सा ॥ लुब्धं गलित
कुष्ठार्तं करंडे कृतपिंडितं ॥ कामुकं वदमाना सा त्वरिता गच्छते यदा ॥ न दृष्टः शूलिकाप्रोतो विप्रो भारार्तया तया ॥ मांडव्य
जानुस्खलिता शूलस्थस्य पतिव्रता ॥ सर्वांगेषु व्यथा जाता तस्याः प्रस्खलनान्मुनेः ॥ मांडव्य उवाच॥ ईदृग्विधे वर्तमाने कष्टे
मे पूर्वदैवके ॥ पुनः पापफलं किंचित् हा कष्टं ममवर्तते ॥ कंकणानां रणत्कारैर्वेद्मि नारीं तु सर्वथा ॥ व्यथितोहं त्वया पापे कि
मर्थं सौतिकं वृथा ॥ राक्षसीं त्वां तु मन्येहं स्वैरिणीमथ तस्करीं ॥ एवमुक्त्वा क्षणं मोहात् क्रंदमानो मुहुर्मुहुः ॥ नारायणाद्या ये
विप्रास्त्वदूरस्थास्तपस्विनः ॥ मत्वा महन्मुनेः कष्टं तामपृच्छन्युधिष्ठिर ॥ किमर्थं भ्रमसे मूढे निशीथे वहसे नु किं ॥ क्षिप्रं करं
डिकाभारं किंचागमनकारणं ॥ व्यथामुत्पाद्य तु मुनेर्दुःखं कृतं त्वया ॥ शांडिल्युवाच ॥ नासुरी न च गंधर्वी न पिशाची न राक्ष
सी ॥ न तस्करी स्वैरिणी वा नाहमन्यापि कुत्सिता ॥ पतिव्रतां तु मांसर्वे जानंतु तपसि स्थितां ॥ न कामान्न च मे क्रोधान्न
वैरान्न च मत्सरात् ॥ अज्ञानाच्चांधकारान्मे स्खलनं क्षंतुमर्हथ ॥ वहनं भर्तृसौख्याय दिवायद्यापतेद्रुजा ॥ रोगातुरं विजानीध्वं
करंडे स्थापितं सदा ॥ अन्नपानादि वस्त्राणि ददाम्येतस्य रोगिणः ॥ शौनको नाम मे भर्त्ता शांडिलीं मां निबोधत ॥ पतिव्रतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिप्राणां कोपं त्यजत सुव्रतां ॥ नारायण उवाच ॥ परव्यथां न जानीषे विचरंति यथेच्छया ॥ मांडव्यस्य मुनेः कृत्वा व्यथा
मद्याचकारिणी ॥ प्रभाते ह्युदिते भानौ तव भर्ता मरिष्यति ॥ आत्मेच्छयान्यदुःखं त्वं न जानासि कुलाधमे ॥ मार्कंडेय
उवाच ॥ तेन वाक्येन घोरेण शांडिली विमना भवत् ॥ विषादं परमं गत्वा क्षणं ध्यात्वाब्रवीद्वचः ॥ कोपसंरक्तनयना
भर्त्सयंती मुनींस्तदा ॥ शांडिल्युवाच ॥ सतां गेहमनुप्राप्तो नयाऽपनयकृद्यदि ॥ स वै मान्यश्च सामान्यैः किं पु
नः शिघ्र आगते ॥ भवद्भिरीदृगातिथ्यं कृतं यदि ममाधुना ॥ स्वर्गापवर्गधर्मोऽपि भवद्भिर्नैव वीक्षितः ॥ इतरामिव
मां दृष्ट्वा यथान्याः प्राकृताःस्त्रियः ॥ भवंतः स्त्रीबलं मेद्य पश्यंत्वपि च देवताः ॥ न मरिष्यति मे भर्ता नोदेष्यति च भास्क
रः ॥ सांधकारं जगत्स्थातु माक्षयं यातु शर्वरी ॥ मार्कंडेय उवाच एवमुक्ते तया वाक्ये स्तंभितेर्के च पांडव ॥ नष्टप्रज्ञमभूत्सर्वं नि
र्वषट्कारमंजसा ॥ स्वाहाकारस्वधाकारपंचयाज्ञविनाकृतं ॥ स्नानदानजपैर्हीनं संध्याध्यानबहिःकृतं ॥ वेदाध्ययन निर्मुक्तं पूज्यपूजा
विनाकृतं ॥ गोकंठबंधनयुतं नानाशास्त्ररसोज्झितं ॥ षण्मासानभवत्सर्वं लुप्तापिंडोदकक्रिया ॥ इति श्रीरेवामाहात्म्ये शांडिलीशा
पोनाम षट्षष्ट्यधिकशततमोध्यायः ॥ १६६ ॥ श्रीमार्कंडेय उवाच ॥ अथ ते ऋषयः सर्वे देवाश्चेंद्रपुरोगमाः ॥ मांडव्यस्याश्रमे पु
ण्ये समीयुर्नर्मदातटे ॥ विरंचिप्रेषिताः पार्थ ज्ञानदृष्ट्याभिवद्य च ॥ शंखदुदुभिनादेन जयशब्दपुरस्कृताः ॥ अष्टासीतिसहस्राणि
स्नातकानां तपस्विनां ॥ समाजे त्रिदशैः सार्द्धं तत्प्रभावदिदृक्षया ॥ ब्रह्मविष्णुमहेशानास्तत्र हर्षात्समागताः ॥ मातरो मल्लिकाद्या
श्च क्षेत्रपाला विनायकाः ॥ दिक्पाला लोकपालाश्च गंगाद्याश्च सरिद्वराः ॥ प्रयागादीनि तीर्थानि तस्मिन् ऋषिसमागमे ॥ राजा
पि च समायातः श्रुत्वा पौरजनैः सह ॥ द्रष्टुं कौतूहलं तत्र व्याकुले भूतले सति॥वित्रस्तमनसो लोकास्तंभिता इव संस्थिताः ॥
तस्मिन् समागमे दिव्ये ब्रह्माद्यास्तमथाब्रुवन् ॥ भो मांडव्य महासत्त्व वरदास्तेऽमराः स्थिताः ॥ कष्टेनानेन धृत्या च तव सिद्धि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भविष्यति ॥ प्रार्थयस्व यथाकामं यत्ते मनसि रोचते ॥ अनादित्यमिमं लोकं निर्वषट्कारमाकुलं ॥ नष्टधर्मं विजानीहि प्रकृतिस्थं मुने कुरु ॥ अनुग्रहं च शांडिल्याः प्रार्थयाम द्विजोत्तम ॥ एष ते कष्टदो राजा समायातस्तवाग्रतः ॥ संभूषयस्व सौहार्दाद्देवर्षिर्नृप मानवान् ॥ मांडव्य उवाच ॥ त्रयीमूर्त्तिः प्रसन्ना मे यद्यायाता सुरैः सह ॥ कृपां मयि परां कृत्वा तीर्थेस्मिन्नर्मदातटे ॥ सांनिध्यमत्र क्रियतां ब्रह्मविष्णवाश्वराः सुराः ॥ दिक्पालैर्लोकपालैश्च क्षेत्रपालविनायकैः॥ सार्द्धं तपस्विभिः सिद्धैस्तथैव ऋषिभिः सह॥ न नृपस्यात्र दोषोस्ति भूपे कोपोनिवर्त्यते ॥ सपुत्रपशुभार्योपि राजासौ सुखमेधतां ॥ मार्कंडेय उवाच ॥ ततो देवैश्च मुनिभिः ऋषेर्भार्या पतिव्रता ॥ शांडिल्यानुनयार्थं तु समाहुता तपस्विनी ॥ अनुनीता तथा साध्वी सूर्योदयमवर्तयत् ॥ भर्ता च जीवितस्तस्याः सतीत्वं चाभिरक्षितं ॥ न साध्वीसदृशं तेजस्त्रैलोक्येप्यस्ति भारत ॥ गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः॥ अलुब्धैर्दानशीलैश्च सप्तभिर्धार्यते मही ॥ मांडव्य उवाच ॥ प्रणतोस्मि विधिं विष्णुमीशानं देवतागणान् ॥ प्रजापतीन्मुनीन्सिद्धांस्तथा मातृगणानपि ॥ स्वस्त्यस्तु गोब्राह्मणेभ्यो भूपालेषु प्रजासु च ॥ इति ब्रुवति मांडव्ये विस्मितास्ते सुरर्षयः ॥ एवमस्त्विवत्यथोक्त्का ते यावद्गच्छंति पांडव ॥ तावत्तपोबलाक्रांतं मांडव्यस्य महामुनेः ॥ रक्षस्त्वरन् गृहीत्वाग्रे कन्यां कौमोदनीं शुभां ॥ देवर्षिनृपलोकानां पश्यतां तत्रभारत ॥ राक्षस उवाच ॥ ममाभूदुर्वशीशापस्तस्यांतोद्य भवन्मयि ॥ दैत्यरूपधरं रक्षः शंबराख्यां समाश्रितं ॥ अयं मम महाशत्रुर्मांडव्यो नृप सर्वदा ॥ रक्षोघ्नमंत्रजाप्यैर्मामबलं कुरुते द्विजः ॥ कृत्वाह्निकर्मसुपरं संनिधौ तिष्ठते द्विजः ॥ तस्मादस्मिन्महद्वैरं पूरितं नृपसत्तम ॥ हरता कन्यकां तुभ्यमित्युक्त्वांतरधीयत ॥ मार्कंडेय उवाच ॥ गते चादर्शनं पार्थ राक्षसे विस्मयान्वितः ॥ समाजस्तत्र देवानां ऋषीणां नृपसंनिधौ ॥ साधुसाध्विति मांडव्यं प्रशशंस पुनःपुनः ॥ ततो यथागतं जग्मुर्देवाः सर्वे सवासवाः ॥ ब्रह्मविष्णुशिवाद्याश्च वीक्ष्य सम्यक् तपोबलं ॥ ततो राजा सुतां वीक्ष्य पुरः पद्मदलेक्षणां ॥ मंत्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिर्मंत्रयित्वा च ऋषिभिर्ब्राह्मणैः सह ॥ शिल्पिनश्च समाकार्य तं शूलादेवरोहयत् ॥सामभिर्वेदनिर्दिष्टैस्तुत्वा नत्वानुमान्य च ॥दंड
वत्तं प्रणम्याग्रे भूमौ भूयः पुनःपुनः ॥ स्नापयित्वा शुभैर्गंधैः पवित्रैर्नर्मदाजलैः ॥ ददौ कन्यां निजां राजा मांडव्यमुनये ततः ॥
गंधर्वाप्सरसांगीतनृत्यवाद्यपुरस्कृतां॥सूतमागधशब्दैश्च जयशब्दादिमंगलैः॥विवाहयित्वा तां कन्यां वेदोक्तविधिना नृप॥समं माडव्य
मुनिना तानृषीनभिवाद्यविविधानि च॥सर्वान्संतोषयामास दानसन्मानगौरवैः॥मांडव्याय च राजाथ भूषणाच्छादनादिकं॥ददावनि
च्छतेप्यग्ररत्नानि च॥प्रसाद्यैवं ददौ राजा तस्मै कन्यामलंकृतां॥प्रणम्य च ऋषिन्सर्वान् व्यसर्जयदथ क्रमात्॥शांडिल्यपि च भार्ता
रं जीवमानमवाप्य सा॥हृष्टतुष्टा ययो गेहं राज्ञा सन्मानिता सती ॥ निरोगस्तत्पतिर्जातो देवैर्दत्तवरो नृप ॥ अनुसुयाप्रभावेन यथा
कामो यथाश्विनौ ॥ रुपयौवनसंपन्नं प्राप्य सा स्वपतिं मुदा ॥ रमयामास राजेंद्र रात्रिंदिवमतंद्रिता ॥ पूर्ववच्चजगज्जातंस्वस्वकर्म
रतं नृप ॥ मांडव्यस्तमनुज्ञाप्य नृपं गत्वा स्वमाश्रमं ॥ रेवाया दक्षिणे कूले स्नात्वा भ्रातृसमन्वितः ॥ स्थापयामास राजेंद्र मांडव्ये
श्वरसंज्ञितं ॥ महादेवं तथा भ्राता स्वयं नारायणेश्वरं ॥ दिव्यं वर्षशतं पार्थ पूजयामास शंकरं ॥ ततो गतौ भ्रातरौ तौ सहितौ
मेरुपर्वतं ॥ देवकार्ये समुत्पन्ने ब्रह्मादीनां समागमे ॥ मार्कंडेय उवाच॥ ततः प्रभृति विख्यातं मांडव्येश्वरसंज्ञितं ॥ नारायणेश्वरं
वापि तीर्थं तीर्थं वरं नृप ॥ भक्त्या परमया तत्र तीर्थे स्नानं करोतियः ॥ पश्येच्च पूजयेच्छर्वं सगच्छेच्छाश्वतं पदं ॥ तत्र तीर्थे तु
यः स्नात्वा तर्पयेत्पितृदेवताः ॥तृप्तिमायांति पितरः श्राद्धदानाच्छताब्दिकीं ॥ सन्मार्जनं यः करोति पक्षादौ देवतालये॥ नरः सहस्र
गोदानफलमाप्नोति भारत ॥ द्विगुणं तत्रोपलिप्य संपूज्य च चतुर्गुणं ॥दीपमुज्वाल्य वै पुण्यंतदेवाष्टगुणं स्मृतं॥ दध्ना मधुसिताज्ये
न पयसा नर्मदोदकैः ॥ स्नापयंति च ये भक्त्या गंधमाल्यानुलेपनैः ॥ येर्चयंति विरूपाक्षं तथा नारायणेश्वरं ॥ तेपि दिव्यविमाने
न क्रीडंते कल्पसंख्यया ॥ दीपाष्टकं च यो दद्यात्तत्र भूताष्टमीषु च ॥ एकादश्यां सितायां च ते न पश्यंति वै यमं॥ दध्योदनैः फ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लैराज्यैर्यैकुर्युर्लिंगपूरणं ॥ शिवलोकं च ते यांति सिद्धचारणसेविताः ॥ घंटां पताकां च वितानकं च धूपोपधानं कलशं च चामरं ॥ पुष्पोपधानं पटहे च वल्लरीं दत्वा शिवायेश्वरतां भजंति॥ तृणकाष्ठेष्टिपाषाणैः तत्र कृत्वा सुरालयं॥ शैवं वा वैष्णवं वापि सारूप्यां मुक्तिमाप्नुयात् ॥ शिवलोके वसेद्वापि यावदाहूतसंप्लवं ॥ तत्र तीर्थे च यः शक्त्या ब्राह्मणान् भोजयेन्नृप ॥ सिक्थे सिक्थे भवेत्प्रीतः शिवस्तद्वत्सनातनः ॥ एकस्मिन् भोजिते विप्रे कोटिर्भवति भोजिता ॥ अश्विने मासि संप्राप्ते माघे मार्गशिरेपि वा ॥ कृष्णपक्षे चतुर्दश्यां सोपवासो यजेच्छिवं ॥ आरात्रिकैश्च विविधैरुपहारैरनुत्तमैः ॥ रात्रौ जागरणं कृत्वा गीतनृत्यकथानकैः ॥ दीपमाला चतुर्दिक्षु कारयित्वा स्वशक्तितः ॥ पितृभिः सह राजेंद्र सूर्यवद्दिवि मोदते ॥ प्रभाते विमले स्नात्वा कृत्वा नित्यविधिं स्वकं ॥ मार्गमभ्युक्ष्य मौनी यः पश्येद्देवं त्रियंबकं ॥ धनी पुत्री सुरूपश्च दशजन्मानि जायते ॥ चैत्रवैशाखयोर्वापि नभस्ये श्रावणेपि वा ॥ पूर्णमास्यां चतुर्दश्यां स्नात्वा तत्रार्चयेच्छिवं ॥ स फलं समवाप्नोति वाजपेयाश्वमेधयोः ॥ या रुद्रकलशस्नानं कुर्यान्नारी विधानतः ॥ दुर्भगा दुःखिता वंध्या दरिद्रा च मृतप्रजा ॥ सा स्त्री दोषविनिर्मुक्ता सर्वान्कामानवाप्नुयात् ॥ कृमिकीटपतंगाद्यास्तस्मिंस्तीर्थे च ये मृताः ॥ तेपि स्वर्गपुरं याति प्राहैव शंकरः पुरा ॥ अनाशके जलाग्निभ्यां ये मृता व्याधिपीडिताः ॥ अनिवर्तागतिस्तेषा रुद्रलोकात्कदाचन ॥ नित्यं नमति यो राजन् शिवनारायणेश्वरौ ॥ गोदानफलमाप्नोति तीर्थस्यास्य प्रभावतः ॥ देवालयं च राजेंद्र यो वै कुर्यात्प्रदाक्षिणं ॥ प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा ॥ शतं सार्द्धं च तीर्थानामल्लिकाभवनाद्बहिः॥ तत्प्रमाणं सूत्रेण वेष्टयेत्क्षेत्रमुत्तमं ॥शिवस्य मंदिरं वापि लिंगं वा शिवसंभवं ॥ वेष्टिता तेन राजेंद्र सशैलवनकानना ॥ साब्धिक्षेत्रमहातीर्था सप्तद्वीपा वसुंधरा ॥ रेवाया दक्षिणे भागे शिवक्षेत्रसमीपतः ॥ देवखातं सरस्तत्र पूर्वोक्तं देवनिर्मितं ॥ तत्र यः कुरुते स्नानं मुच्यते सर्वपातकैः पौर्णमास्याममाया वा व्यतीपातेर्कसंक्रमे ॥ रवींदोर्ग्रहणे श्राद्धं कृत्वा गच्छेत्परा गतिं॥देवखाते त्रयो देव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रह्मविष्णुमहेश्वराः॥तिष्ठंति ऋषिभिःसार्द्धं पितृदेवगणैः सह॥तत्र तीर्थेश्विने मासि चतुर्दश्या विशेषतः॥वायुमार्गेस्थितः शक्रस्तिष्ठते
दैवतैः सह॥पृथिव्यां यानि तीर्थानि स्सरितः सागरास्तथा ॥ वसंति तानि सर्वाणि देवखाते दिनद्वयं ॥ गयाशिरे च यत्पुण्यं प्रया
गे मरकंटके ॥ देवखाते हि तत्पुण्यं मांडव्येश्वरदर्शनात् ॥ पदबंधेन यत्पुण्यंयात्रायामुकुलीश्वरे ॥ अश्विन्यामश्वनीयोगे तत्पुण्यं
तत्र भारत ॥ उज्जयिन्यां महाकाले वाराणस्यां त्रिपुष्करे ॥ संनिहित्यारवेर्ग्रासे तन्माडव्येपर्शनात् ॥ इति ज्ञात्वा महाराज सर्व
तीर्थेष्वनुत्तमं ॥ पितृदेवान्समभ्यर्च्य स्नानदानादितर्पणैः॥ धौतपापो विशुद्धात्मा लभते वाछितं फलं॥ हिरण्यं वृषभं धेनुं भूमिं गो
मिथुनं हयं ॥ शिवमुद्दिश्य दातव्यं दंपतीपरिधानकं ॥ पादुकोपानहौ छत्रं भाजनं च कमंडलुं ॥ जपे होमे तथा दाने सर्वं स्याद
क्षयं नृप॥ऋचमेकां तु ऋग्वेदं यजुर्वेदात्तथा यजुः॥सामैकं सामवेदात्तु जपेद्देवाग्रतः स्थितः॥वेदपारायणफलं भवेत्तस्याप्यसंशयं॥ गा
त्रीजाप्यमात्रेण सम्यग्वेद फलं लभेत्॥सम्यक्रतुफलं पार्थ लभते वै शिवार्चनात्॥शिवलोकमवाप्नोति यावादिंद्राश्चतुर्दश॥ततः कालेन
महता मर्त्यलोकमुपागतः ॥ राजा भवति मेधावी सर्वसौख्यान्वितस्त्वरुक् ॥ जीवेद्वर्षशतं साग्रं पुत्रपौत्रसमन्वितः ॥ तच्च तीर्थं पु
नः प्राप्य शैवे महासि लीयते ॥ उपास्ते यः सकृत्संध्यां तास्मिंस्तीर्थे तु पर्वणि ॥ संध्यालोपव्रतभ्रंशकालातिक्रमसंचितात् ॥ पापा
च्च विधिलेोपोत्थान्मुच्यते नात्र संशयः ॥ तत्र तीर्थे शिवक्षेत्राछरपातेसमंततः ॥ प्रविशेन्न भयोद्विग्नंपातकं भरतर्षभ ॥ यत्र तत्रा
स्थितो वृक्षानीक्षते यदि तीर्थजान् ॥ नरः पावित्र्यमाप्नोति तीर्थश्रद्धारतो यदि ॥ शिवस्य पश्चिमे भागे पितृक्षेत्रमनुत्तमं ॥ वृषो
त्सर्गं तु यः कुर्यात्तस्मिंस्तीर्थे युधिष्ठिर ॥ क्रीडंते पितरस्तस्य शिवलोके यदृच्छया ॥ अगम्यागमने पापं तथैवायाज्ययाजने ॥
स्तेयाद्गोब्राह्मणवधाद्गुरुद्रोहादुपार्जितं ॥ तत्सर्वं नश्यते पापं वृषोत्सर्गविधानतः ॥ मांडव्यतीर्थमहात्म्यं यः शृणोति
समाहितः ॥ गंगास्नानफलं प्राप्य स्वर्गलोके महीयते ॥ इति श्रीवायुक्तशिवसंहितायां श्रीरेवामहात्म्ये मांडव्येश्वरनाराय

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णेश्वरतीर्थनाम सप्तषष्ट्यधिकशततमोध्यायः ॥ १६७ ॥ श्रीमार्कंडेय उवाच ॥ पार्थ तीर्थं ततो गच्छेदक्रूरेश्वरमुत्तमं ॥ रेवाया दक्षिणे कुले मांडव्येश्वरपश्चिमे ॥ यत्र सिद्धो महाराज अक्रूरोनाम राक्षसः ॥ आद्ये त्रेतायुगे पार्थ शिवस्याराधने रतः ॥ अक्रूरेश्वरसंभूतिं शृणुत्वं नृपसत्तम ॥ मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ वेदशास्त्रार्थकुशलो साक्षाद्ब्रह्मा इवापरः ॥ भार्यार्थे व[१]यामास तृणबिंदोः सुतां स वै ॥ तस्यां स जनयामास पुत्रं विश्रवसं नृप ॥ कदाचिदथ कालेन भरद्वाजो महामुनिः ॥ ददौ विश्रवसे कन्यां स्वकीयां विधिना तदा ॥ स तस्यां जनयामास पुत्रं वैश्रवणं नृप ॥ सोपि मौनव्रतं कृत्वा बाल एव युधिष्ठिर ॥ सर्वभूताभयं दत्वा चचार परमं तपः ॥ ततस्तुष्टो महादेवो दिक्पतित्वं ददौ प्रभुः ॥ यमेंद्रवरुणानां वै चतुर्थस्त्वं तथैव च ॥ ततस्त्वं नंतरे काले कैकसीनाम राक्षसी विश्रवं वरयामास पातालान्निःसृता नृप ॥ पुत्रोस्य रावणो जातस्तस्यां भरतसत्तम ॥ कुंभकर्णो महावाहुर्धर्मात्माथ विभीषणः ॥ कुंभश्चैव निकुंभश्च कुंभकर्णासुतावुभौ ॥ अक्रूरो राक्षसश्रेष्ठः कुंभस्य तनयो भवत् ॥ विभीषणस्यानुगतो जन्मप्रभृति भारत ॥ ततः स यौवनं प्राप्य ज्ञात्वा पैतामहं वधं ॥ परं निर्वेदमापन्नश्चचार परमंतपः ॥ नर्मदायां नृपश्रेष्ठ दिव्यं वर्षशतं किल ॥ ततस्तुष्टो महादेवो वरं ब्रूहीत्युवाच तं ॥ अक्रूरोपि ततः प्राह यदि तुष्टोसिमे प्रभो ॥ दुर्लभं सर्वदेवानाममरत्वं प्रयच्छ मे ॥ न दैत्यत्वे किमप्यास्ति दानवत्वे न राक्षसे ॥ भवद्विष्णुप्रपन्नानां कल्याणं स्यात्पदे पदे ॥ त्वां प्रपन्ना महादेव देवा ये विष्णुमाश्रिताः ॥ मोदंते सततं सर्वे ते सर्वत्रापि निर्भयाः ॥ मम नाम्नापि देवेश तीर्थे संनिहितो भव ॥ ईश्वर उवाच ॥ एवं ते भविता वत्स तीर्थेस्थास्यामि सर्वदा ॥ यावद्विभीषणमतं यावद्धर्मं निषेवसे ॥ तावत्त्वममरो वत्स मम वाक्याद्भविष्वसि ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीयत ॥ अक्रूरः स्थापयामास स्वनाम्ना धूर्जटिं ततः ॥ तत्र तीर्थे तु यः स्नात्वा पूजयेत्परमेश्वरं ॥ श्राद्धं कुर्याद्विधानेन सोश्वमेधफलं लभेत् ॥ इति श्रीअक्रूरेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशत्रयांते च तीर्थं परम शोभनं ॥

१ अंकलेश्वर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धरुद्रेश्वरं नाम त्रिषु लोकेषु विश्रुतं ॥ यत्र सिद्धो महाराज महादेवो महेश्वरः ॥ हत्यादोषयुतः पूर्वं देवआसीत्रिलोचनः ॥ यु
धिष्ठिर उवाच ॥ कथं सिद्धो मुनिश्रेष्ठ देवदेवस्त्रिशूलधृक ॥ का सा सिद्धिरनुप्राप्ता तन्मे कथय सुव्रत ॥मार्कंडेय उवाच॥ विश्वस्य
जगतः स्रष्टा ब्रह्मा लोकपितामहः ॥ पुरा कल्पे महाराज पंचवक्रो बभूव सः ॥ तं दृष्ट्वा स्पर्द्धते पार्थ धूर्जटिः सततं हठात् ॥क
स्मिंश्चित्समये तेन शंकरेण महात्मना ॥ समीपस्थौ स्वमहसः पारं पृष्टौ सुरावुभौ ॥ ब्रह्मविष्णू जगदतुस्त्वज्ञानेज्ञानमानिनौ ॥स्व
रूपस्य परंपारं तवाविद्मो महेश्वर॥इत्युक्ते धूर्जटिः प्राह साधु विज्ञायते खिलं॥भवद्भ्यायदि मे लिंगपारो विज्ञास्यते धुना ॥मार्कंडेय
उवाच॥एवमुक्तो शिवेनाथ ज्ञातु पारं हि लैंगिकं॥ऊर्द्ध्वंब्रह्मा जगामाशु तथाधो हरिरप्यगात्॥कालेन महता गत्वा पुनः प्राप्तौ शिवा
ग्रतः ॥ अप्राप्तवंतौ तौ पारं पुरः पप्रच्छधूर्जटिः ॥ ब्रह्मा उवाच ॥ गत्वा मयोर्द्ध्वं देवेश दृष्टः पारो हि लिंगजः ॥विष्णुरुवाच॥ न प्रा
प्यते परं पारो ह्यधो गत्वापि शंकर ॥ मया तस्माद्विमूढेन यदुक्तंतत्क्षमस्वमे ॥ शिव उवाच ॥ अविदित्वा परं पारं विधे किं मनृतं
वदी ॥ इत्युक्त्वा सहसा तस्मै चुकोप परमेश्वरः ॥ उत्थायाच्छिनदाश्वस्य मूर्द्धानंकरजैस्तदा ॥ तस्यैव तत्करे लग्नं च्यवते न क
दा च न ॥ पंचमं ब्रह्ममूर्द्धानं छित्वा हत्यामवाप सः ॥ लोभकोपौ तु देहस्थौ कुरुतः किं न दुष्कृतं ॥ षडूर्मिरहितं सत्यं परं ब्र
ह्म सनातनं ॥ ततः कपाली भगवान् पर्यटन् पृथवीमिमां ॥ क्रमात्काशीपुरं प्राप्तस्तस्यां तदपतच्छिरः ॥ पतितेपि कपाले तु ब्रह्मह
त्या न मुंचति ॥ नानु गच्छंति तं देवा न वीक्षंते महर्षयः ॥ संभाषं कुरुते नैव सिद्धविद्याधरोरगाः ॥ ततःससागरे गत्वा पूर्व
स्मिन् दक्षिणे तथा ॥ पश्चिमे चोत्तरे पार्थ देवदेवोमहेश्वरः ॥ पर्यटन्सर्वतीर्थेषुतस्य शुद्धिं न मन्यते ॥ तीर्थात्तीर्थं भजन् रेवां प्राप्त
वान् दक्षिणे तटे ॥ द्विजसंघं समासाद्य प्रार्थयित्वा स्वशुद्धये ॥ तत्र तीर्थे तपो तप्यत्परमं दुश्चरं चिरं ॥ ततोदेवाः सगंधर्वा ऋष
यः सिद्धचारणाः ॥ शुद्धं मत्वा महादेवं समाजग्मुः सहस्रशः ॥ रेवादि सर्व तीर्थेभ्यः समानीयजलं शुचिः ॥ स्नात्वा भूमौ कृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तैः कुंडे देवविनिर्मितं ॥ स्तुत्वा नत्वाभ्यर्चयित्वा स्नापितस्तत्र धूर्जटिः ॥ देवखाते शिवः स्नात्वा बभूव गतकल्मषः ॥ देवैः संपूजितो भक्त्या स्थापितस्तत्र धूर्जटिः ॥ रुद्रः सिद्धेश्वरो नाम सिद्धेश्वर्यासमन्वितः ॥ विकल्मषो हृष्टतुष्टो यदा सिद्धिं गतः शिवः ॥ तेषां दत्वा तु तत्स्थानं वरांश्चांतर्दधे ततः ॥ तदा प्रभृति तत्तीर्थं सिद्धरुद्रेति कीर्तितं ॥ विख्यातं सर्वलोकेषु ब्रह्महत्याहरं परं ॥ माघमासस्तसितेपक्षे भूताष्टम्यां युधेष्ठिर ॥स्नात्वा तत्र विधानेन तर्पयेत्पितृदेवताः॥दद्यात्पिंडान् पितृणां च भावितेनांतरात्मना ॥ तस्य ते द्वादशाब्दानि तृप्तिं यांति पितामहाः ॥ गंधधूपप्रदीपार्घैरभ्यर्च्य परमेश्वरं ॥ पंचामृतैः स्नापयित्वा सिद्धरुद्रेश्वराह्वयं ॥ नैवेद्यैर्गीतवाद्यैश्च नत्या स्तुत्या तु तोषयेत्॥भोजयित्वा यतीन् विप्रान् शिवलोके महीयते॥देवखाते नरः स्नात्वा नत्वा सिद्धेश्वरीं नृप॥ अकामो वा सकामो वा सर्वतीर्थफलं लभेत् ॥ सिद्धरुद्रेश्वरे कुंडे स्नातस्य भरतर्षभ॥सर्वपापानि नश्यंते तमः सुर्योदये यथा॥ सर्वेदेवाश्च तुष्टास्युः सर्वतीर्थफलं लभेत् ॥ सर्वकार्याणि सिध्यंति न कैश्चित्परिभूयते ॥ नानाबल्युपहारैर्यो देवीं सिद्धेश्वरीं यजेत् ॥ सर्वकामकलावाप्तिः सुखसंतानभाग्भवेत् ॥ एतत्ते कथितं राजन्तीर्थं सिद्धेश्वराह्वयं ॥ सिद्धेश्वरी रुद्रकुंडं सर्वतीर्थांबुसंभृतं ॥ यथा श्रुतं मया पूर्वं सकाशाच्छूलपाणिनः ॥ सिद्धरुद्रस्य महात्म्यं यः शृणोति समाहितः ॥ मुच्यते सर्वपापेभ्यो रुद्रलोकं च गच्छति ॥ इति श्रीवायूक्तशिवसंहितायां श्रीरेवामाहात्म्ये सिद्धेश्वरं तथा देवखाततीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशद्वये गत्वा पार्थ तीर्थमनुत्तमं॥वैद्यनाथाह्वयं तत्र जलधिस्पर्द्धिनं सरः ॥ दुर्गमं वीक्ष्य रेवायाः पयः पंकातिपिच्छलं ॥ प्रवाहस्य च वैपुल्यात्कूलयोरुभयोरपि ॥ कृतानि ऋषिभिर्देवैः कुंडाकारसरांस्यपि ॥ आत्मनश्च परेषां च कर्तुं स्नानादिकं विधिं ॥ रेवातोयाभिपूर्णानि मंत्रपूतानि तानि च ॥ युधिष्ठिर उवाच ॥ वैद्यनाथमिति प्रोक्तं त्वया यन्मुनिसत्तम ॥ को वैद्यः किं कृतं तेन तन्मे कथय विस्तरात् ॥ मार्कंडेय उवाच ॥ शृणु राजन्प्रवक्ष्यामि वैद्यनाथस्य संभवं ॥ देवर्षिः कश्यपो नाम मरीचिकुलसंभवः ॥ तेन लोकहिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थाय तपस्तप्तं युधिष्ठिर ॥ विविधैर्व्याधिभिर्वीक्ष्य विश्वं व्याकुलितं मुहुः ॥ सर्पादिकैर्दंदशूकैः कृत्स्नं वीक्ष्य कदर्थितं ॥ राजयक्ष्मादिरोगाणां नाशाय नृपसत्तम ॥ जंगमस्थावराणां च विषाणां प्रतिकर्मसु ॥ आयुर्वेदमिहाष्टांगं प्राप्तुं परपुरंजयः ॥ क्षीरार्णवाविष्कृतं स्वं ध्यायन् धन्वंतरिं शिवं ॥ मृत्युंजयं महात्मानं सर्वव्याधिविनाशनं ॥ अनेकानैकरूपं च गुणिनं दोषनाशनं ॥ भिषक्क्रियासु कुशलं सुधाकलशपाणिनं ॥ तपसाराधयन् देवं नर्मदातीरसंश्रितः ॥ कृत्वा कुंडं जलापूर्णं तत्र त्रिषवणं चरन् ॥ स्थापयित्वा शिवं शां[१] पुष्पैरारण्यकैर्यजन् ॥ ततो वर्षशते पूर्णे परितुष्टोस्य शंकरः ॥ भिषक्सिद्धिं परां प्रादात्सर्वलोकहितैषिणः ॥ आयुर्वेदं च संपूर्णं सरहस्यं ससाधनं ॥ कश्यपस्य ददौ विद्यां विषघ्नीं चापि भारत ॥ प्रार्थितस्तीर्थसान्निध्यं स्वनाम्ना तेन शंकरः ॥ वैद्याविद्याप्रदानेन वैद्यनाथस्ततो भवत् ॥ स्थापितस्तेन विधिना सरासि स्वाख्यया नृप ॥ ततः प्रभृति विख्यातं तीर्थमेतद्युधिष्ठिर ॥ वैद्यानाथाह्वयं पुण्यं पूजया पापनाशनं ॥ तत्र यः पूजयेद्देवं वैद्यनाथं स्वभक्तितः॥नानाविधोपचारैश्च उपहारैरनुत्तमैः॥व्याधिनाशमवाप्नोति स्नात्वा देवार्चनादपि ॥ दीपदानेन चैकेन प्रज्ञोत्कर्षमवाप्नुयात् ॥ वैद्यविद्याप्रदानेन तत्र तीर्थे नृपोत्तम ॥ वर्षसंख्यानि वर्षाणि शिवलोके महीयते ॥ नानौषधप्रदानेन न रोगैः परिभूयते ॥ इति श्रीनर्मदायां वैद्यनाथतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशार्द्धभूभागे मातृणां स्थानमुत्तमं ॥ सर्वकामप्रदं पार्थ दौर्भाग्यासुखनाशनं ॥ कार्तिकेये समुत्पन्ने देवकार्याय वै पुरा ॥ स्तन्यं दातुं सुरैस्तस्य कृत्तिकाः संप्रयोजिताः ॥ षट्संख्यास्तत्र ता गत्वा स्तनं दातुं प्रचक्रमुः ॥स शिशुस्तास्तु षट् दृष्ट्वा षट्मुखान्यकरो नृप ॥ ततस्तनात् पपौ तासां न तृप्तिं प्राप षट्स्वपि ॥ न समर्थाश्च तत्तृप्त्यै ताः सर्वापि च कृत्तिकाः॥ ततो नारदवाक्येन प्रेरिता नर्मदातटे ॥ आराधनाय मातृणां तपस्तेपुर्नृपोत्तम ॥ स्नानार्चनरता नित्यं भक्तिध्यानपरायणाः ॥ एवं मासैश्चतुर्भिश्च तासां तुष्टाश्च

---

१ मांटियेरं.

CC-0. In Public Domain. Digitization by eGangotri

मातरः ॥ ब्राह्मी च वैष्णवी रौद्री नारसिंही च षाण्मुखी ॥ वाराही चैव शाक्री च वरदाः सप्तमातरः॥गणेशक्षेत्रपालाद्यैर्ग्रहैश्चोपग्र हैः सह ॥ प्रत्यक्षाः प्रददुस्तासां स्तन्यं प्रचुरमंजसा ॥ यथा तृप्तिं प्रयात्याशु षण्मुखः शर्वनंदनः ॥ कृत्तिकाऊचुः ॥ भगवत्यः प्रस न्नाश्चेदस्माकं स्तन्यदा स्थिताः ॥ भवतीनां निवासोत्र रोचतां लोकभूतये ॥ यत्रैवाराधिताः पूज्याः पूजिताश्च वरप्रदाः ॥ अस्माभिः प्रार्थितास्तत्र तीर्थं सार्थकतास्तु नः ॥ यत्र तप्तं तपो घोरमस्माभिर्यूयमागताः ॥ तत्र यः पूजयेद्यो वै स प्राप्नोत्वभिवांछितं ॥ मा र्कंडेय उवाच ॥ इत्युक्ते कृतिकाभिस्ता तथेत्युक्त्वा युधिष्ठिर ॥ तत्रास्थित्वा निजैरंशैः स्वानि स्थानानि भेजिरे ॥ ततः प्रभृति विख्यातं मातृतीर्थमनुत्तमं ॥ पुण्यं मातृकुटीग्रामं मातृभिः स्वधिवासितं ॥ तत्र तीर्थे नरो नारी यः कुर्यान्मातृपूजनं ॥ क्षीरक्षौद्रै श्च तिलाज्यैर्दध्ना वा स्नापयेच्छुचिः ॥ बलिपूजोपचारैश्च लभते वांछितं फलं ॥ सुखसौभाग्यसंतानधनधान्यादिकं नृप॥इतिश्रीरेवा यां मातृतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततः क्रोशद्वये पार्थ तीर्थं चैवोत्तरेश्वरं ॥ शशबिंदोस्तुराजर्षेस्तनयाविनयान्विताः ॥ जा ता लक्षैकपुत्राणामुपरि प्रेमदा पितुः ॥ मातुश्च मनुजश्रेष्ठ सा यौवनवती स्थिता ॥ लक्षादूर्ध्वं तु या जाता उत्तरा तेन शब्द्यते॥ अपि योग्या विवाहस्य न प्राप्नोति वरं हि सा॥न वृणोति हि तां कश्चिन्न तस्याः सदृशो गुणैः ॥ अनुज्ञाप्याथ पितरौ तपस्तप्तुं ज गाम सा ॥ मुनीनां वचनाद्रेवामभजत्सर्वसिद्धिदां ॥ रेवाया दाक्षिणे कूले तपस्तप्तुं प्रचक्रमे ॥ कृच्छ्रचांद्रायणपरा षष्ठकालाशना क्व चित् ॥ उमापतिं पशुपतिं सर्वस्व जगतः पतिं ॥ हरं विश्वगुरुं चित्ते ध्यायमाना वरप्रदं ॥ निवेदयंती दौभाग्यं निजं नीलगलाग्र तः ॥ ततः कतिपयाहोभिस्तस्याः सत्वेन शंकरः ॥ भुवं भित्वा समुत्तस्थौ पुरो लिंगात्मको विभुः ॥ प्रत्यक्षः प्राह तां प्रीत्या भ क्त्या च परितोषितः ॥ ईश्वर उवाच ॥ अलं क्लेशेन ते पुत्रि वरं ब्रूहि यमिच्छसि ॥ तपसा ते प्रसन्नोस्मि यमैश्च नियमैरपि ॥ उ

१ (उत्तराज.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तरा उवाच ॥ यदि तुष्टोसि मे देव वरार्हायद्यहं मता ॥ हरस्व मम दौर्भाग्यं हर पापहर प्रभो ॥ मम देहि पतिं योग्यमवैध व्यं च शाश्वतं ॥ तिष्ठ त्वं मम नाम्नेह तीर्थे लिंगं स्थिरीकुरु ॥ सर्वलोकहितार्थाय उमया सह शंकर ॥ महेश्वर उवाच ॥ एवं भवतु ते पुत्री मनसा यद्यदिच्छसि ॥ वरं प्राप्स्यसि भर्त्तारं तृणबिंदोः सुतं नृपं ॥ अहं चात्र वसिष्यामि प्रीत्या तीर्थे त्वदाह्वयः ॥ इत्युक्त्वा भगवाञ्शर्वस्तस्मिन्‌लिंगे लयं ययौ ॥ साप्युत्तरा वरं शर्वात्संप्राप्य स्वपुरं ययौ ॥ कालेनाल्पेन सा सर्वमलभच्छर्वनोदितं॥ मार्कंडेय उवाच ॥ ततः प्रभृति विख्यातं तीर्थं तत्रोत्तरेश्वरं ॥ सर्वपापप्रशमनं सर्वोपद्रवनाशनं ॥ सर्व सौभाग्यकरणं दौर्भाग्यं बुद्धिशोषणं ॥ यस्तत्र पूजयेद्देवं यथालब्धोपहारतः ॥ स दौर्भाग्यविनिर्मुक्तः शिवलोके महीयते ॥ पुत्रपौत्रमवाप्नोति वांछितं चापि विंदति ॥ इति श्रीनर्मदायां उत्तरेश्वरतीर्थनाम अष्टषष्ट्यधिकशततमोध्यायः ॥ १६८ ॥ श्रीमार्कंडेय उवाच ॥ ततः क्रोशद्वयं गच्छेदुत्तरेश्वरतीर्थतः ॥ नर्मदेश्वरतीर्थं तु सर्वपापप्रणाशनं ॥ स्वमूर्तेस्तु तृतीयायाः मार्गमाश्रित्य शंकरः ॥ जरद्गवगतिः सोमः सर्वस्यार्तिहरो हरः ॥ लीलयेव पुरा द्रष्टुं स्वतनूस्थांतटद्वयं ॥ क्रमेणैवागतो देवो नर्मदांभोधिसंगमं ॥ पुरा कल्पे स भगवानुत्ततार वृषात्ततः ॥ उत्तरेश्वरपार्श्वे वै विचरन्वीक्ष्यते यदा ॥ तदा रेवा महोत्साहा स्वप्रवाहात्समुत्थिता ॥ दिव्यमाल्यांबरधरा दिव्याभरणभूषिता ॥ प्रणामपरमा देवी लुठंती पुरतः स्थिता ॥ नर्मदा उवाच ॥ स्वागतं ते महादेव लोकानुग्रहकारक॥धन्येयमद्य धरणी धन्याहं धर्मवाहन ॥ परां[1]मयि कृपां कृत्वा यत्त्वं साक्षादुपागतः ॥ स्थापयित्वार्चयिष्यामि त्वामद्यप्रभृति प्रभो ॥ अंशेनैकेन देवेश स्थेयमत्र सदा त्वया ॥ नमस्तेस्तु नमस्तेस्तु प्रसीद परमेश्वर ॥ मार्कंडेय उवाच ॥ एवमुक्तस्तया देव्या महादेवो हसन्मुदा ॥ सह गौर्या स्वसरितं प्रोत्थाप्य प्रणतां पुरः ॥ कृपया देवदेवेशः कृत्वांके परिषस्व

१ नर्मदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जे ॥ ईश्वरोवाच ॥ साधु साधु महाभागे नर्मदे नर्म दायिनि ॥ यद्यदिच्छसि मत्तस्त्वं तत्सर्वं ते भविष्यति ॥ सदैव तव तीरे हि संश्रितोस्मि पुरापि च ॥ इत्युक्त्वांतर्दधे देवस्तत्रैव शिवया सह ॥ ततश्च नर्मदा देवी तत्र संस्थाप्य शंकरं ॥ विधिवत्पूजयित्वा च स्वनाम्ना विश्वपावनी ॥ विवेश स्वजलं पश्चादीशजाऽमरपूजिता ॥ अभ्यर्चितुं तमायाति सदा पर्वणि पर्वणि ॥ इति ते कथितं पार्थ तीर्थं वै नर्मदेश्वरं ॥ तत्र स्नात्वा च पीत्वा च ब्रह्महत्यां व्यपोहति ॥ तत्र स्नात्वा च यो राजन पूजयेन्नर्मदेश्वरं ॥ उपचारैस्तु विविधैर्यथालब्धैरथापि वा ॥ उपहारैः सदीपैश्च स गच्छेदीश्वरालयं ॥ विप्राणां भोजनैः शक्त्या नर्मदा परितुष्यति॥ इति श्री नर्मदेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशत्रये यायान्मातृतीर्थमनुत्तमं ॥ सुखसौभाग्यसंतानसिद्धिदं पापनाशनं ॥ पुरा कल्पे महाराज स्थापयित्वा जगद्विधिः ॥ मानसान्दश पुत्रान्वै स ससर्ज प्रजापतीन् ॥मरीचिमत्र्यंगिरसं पुलस्त्यं पुलहं क्रतुं ॥ भृगुं दक्षं वशिष्ठं च नारदं चेति ते दश ॥ नारदेन पुरा शप्तो दक्षः केनापि हेतुना ॥ दशभ्यस्तु प्रचेतेभ्यो दक्षः प्राचेतसो भवत् ॥ कालेनाल्पेन राजेंद्र सृष्टिहेतोः प्रजापतिः ॥ दक्षस्य चाभवन्पुत्र्यः पंचाशत्पुण्यलक्षणाः ॥ मारीचः कश्यपो जातस्तपःसिद्धः प्रजापतिः ॥ ददौ दक्षश्च सर्वेभ्यो विभज्याथ पृथक्पृथक् ॥ पुत्रिका दश धर्माय कश्यपाय त्रयोदश ॥ सप्तविंशति सोमाय नक्षत्रस्थानगाश्च ताः ॥ सृष्ट्यर्थं वीक्षिताः पुत्रा ब्रह्मणादौ युधिष्ठिर ॥ सृजेति ब्रह्मणा प्रोक्तो मरीचिः प्राह कश्यपं ॥ नियोगाद्ब्रह्मणः पुत्र सृज विश्वं चराचरं ॥ स्वमाश्रममथो गत्वा कश्यपोपि च विस्मितः ॥ किं सृज्यं नु कथं स्रक्ष्ये कोत्रषट्कारकोविधिः॥ मार्कंडेय उवाच ॥ एवं चिंतयतस्तस्य कश्यपस्यातिदुष्करं ॥ पप्रच्छुस्तास्तदापत्न्यः परिवार्य पतिं नृप ॥ पत्न्यऊचु ॥ महती वर्तते चिंता मुने केनाद्य हेतुना ॥ कः संशयो विस्मयो वा ब्रूहि सत्यं वदाशु नः ॥ कश्यप उवाच ॥ सृजेति ब्रह्मणा प्रोक्तस्तातो मामाह वै त

१ मांगिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्याकर्ण्याब्रुवन्प
था ॥ तत्कथं सिध्यते पत्न्यश्चिंतेयं महती मम ॥ दुष्करं सर्गकर्मैतद्विचार्यं ज्ञानपूर्वकं ॥ मार्कंडेय उवाच ॥
त्न्यस्तमृषिं कश्यपं मुदा ॥ मा विचारं कुरुष्वात्र पते चिंतां परित्यज ॥ तपस्तप्स्यामहे सर्वास्तपसः किं नु दुष्करं ॥ अनुजानि
हि नः शीघ्रं सृष्टिरस्मासु संस्थिता ॥ इत्युक्तः कश्यपस्ताभिः प्राह प्रीत्या पुनः पुनः ॥ कश्यप उवाच ॥ एवं भवतु कल्याण्यः
साधूक्तं वेदसंमतं ॥ तत्कुरुध्वं भवंत्वद्धा भवत्यो लोकमातरः ॥ मार्कंडेय उवाच॥ अनुज्ञाता ततस्तेन पत्न्यस्तास्तपसे ययुः ॥ वि
लोक्य सर्वतीर्थानि विचार्य च पुनःपुनः ॥ इदमेव मतं जातं रेवासेवैव सिद्धिदा ॥ इति मत्वा ततः सर्वाः प्राप्यानुज्ञां स्वभ
र्तृतः ॥ रेवाया दक्षिणे कूले समुद्रोपांतमाश्रिताः ॥ दितिरदितिर्दनुःकद्रू निकषा विनता तथा ॥ मरुंधती वसुर्जामिर्लंबा भा
नुर्मरुन्वती ॥ इरा चेति समाख्याता मुनिपत्न्यस्त्रयोदश ॥ दृष्ट्वा तत्पंकिलं नीरं तीरं चागम्यमन्वहं॥ निम्नभूमौ ततः खात्वा सर
श्चक्रुरनुत्तमं ॥ रेवाजलं च कलशैरूह्य चापूरयन् सरः ॥ कुंभावनामितं तोयं यदा भटभटाय यते ॥ ऋषिभिर्मुनिभिः सिद्धैस्तिष्ठ
द्भिस्तत्र भारत ॥ तेन शब्देन नामापि कृतं तासां विनोदतः ॥ मार्कंडेय उवाच ॥ आपूर्य तत्सरस्ताश्च तपस्ते
पुः समाहिताः ॥ दिव्यं वर्षशतं पार्थ सृष्ट्यर्थं संजितेंद्रियाः ॥ ततस्तुष्टस्त्रयीमूर्तिर्भगवान् सृष्टिकृच्छिवः ॥ प्रसन्नः प्राह सर्वा वो
भविष्यति समीहितं ॥ भवतीभिः सरस्त्वेतत्संश्रितं सर्वकामदं ॥ भविष्यति हि लोकानां क्लेशनाशं हि सुव्रताः ॥ युष्मासु भर्तृसा
निध्याद्भविष्यति चराचरं ॥ प्रजापतिः कश्यपोयं भवत्यो लोकमातरः ॥ भविष्यति पतिः सर्वं स्त्रक्ष्यते भवतीषु वै ॥ इत्युक्त्वा च
महादेवस्तत्रैवांतर्दधे नृप ॥ तत्र स्थित्वा निजैरंशैस्ततस्ता लोकमातरः ॥ वरं प्राप्य निजं स्थानं जग्मुर्भर्तृसमीपतः ॥ तासु वि
श्वं समभवत्सदेवासुरपन्नगं ॥ यक्षराक्षसगंधर्वप्रक्षिवृक्षाद्रिगोगजं ॥ चराचरमिदं जातं इतिमातृगणान्नृप ॥ ततः प्रभृति विख्या ३१२
तं मातृतीर्थं युधिष्ठिर ॥ तत्र स्नात्वा देवखाते मातृकुंडे विधानतः ॥ नरो वा यदि वा नारी लभते वांछितंफलं ॥ राजन् भटभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्यास्ता मातृः संपूजयेच्च यः ॥ तस्मिन् सरसि वै भक्त्या पुत्रार्थी पुत्रमाप्नुयात् ॥ रोगार्तो मुच्यते रोगाद्धनार्थी धनमाप्नुयात् ॥ वह्णीभिर्दीपिकाभिश्च तासां नीराजने कृते ॥ वंध्यादिदेहजैर्दोषैर्मुच्यते नात्र संशयः॥ भोजनैर्गौरिणीनां च मातरस्तुष्टिमाप्नुयुः॥ इति श्रीरेवायां भटभटीमातृतीर्थं ॥ मार्कंडेय उवाच ॥ ततो गच्छेन्महाराज रेवाया उत्तरे तटे ॥ तीर्थात्पैतामहात्तीर्थे स्थितं क्रोशांतरे नृप ॥ विख्यातं कुररीतीर्थं सर्वपापप्रणाशनं ॥ तत्र स्नात्वा महाराज लभते वांछितं फलं ॥ युधिष्ठिर उवाच ॥ का नाम कुररी विप्र कथं तीर्थं कृत तया ॥ कदा तीर्थमिदं जातं तन्मे कथय विस्तरात् ॥ मार्कंडेय उवाच ॥ शृणु राजन्पुरा वृत्तं रौच्यै मन्वंतरे यथा ॥ महाकाननवनात्पार्थ श्येनेन शकुनिर्धृतः ॥ कुररः कुररी चैव वृक्षकोटरसंश्रितौ ॥ श्येनो गृहीत्वा तत्रैकं स प्रतीचीमगाद्दिशं ॥ भक्षार्थं तु तदा पार्थ कुररी चाप्यगादनु ॥ भर्तृस्नेहेन शोकार्ता क्रंदमाना मुहुर्मुहुः ॥ श्येनोऽपि पश्चिमांभोधितीरं प्राप्स्यति यावता ॥ तावत्स पक्षिभिश्चान्यैर्द्रावमानैरितस्ततः ॥ वेष्टितस्ताडितश्चंचुपक्षघातैरनेकधा ॥ व्याकुलीकृतदेहस्य तस्य पार्श्वात्खगो पतत् ॥ कुररो मृतकल्पस्तु पतमानो ममार च ॥ रेवांभसि ततस्तीर कुर्यपि च संश्रिता ॥ तीरे नीरतरंगैस्तं क्षिप्तं कुररमीक्ष्य सा ॥ क्रंदमाना निराहारा शोचंती चातिदुःखिता ॥ भर्तृशोकसमाक्रांता पतिव्रतधरा यदा ॥ सा त्यक्षति निजं देहमेतस्मिनंतरे तदा ॥ अंतरिक्षे वृषारूढौ प्राप्तौ गौरीमहेश्वरौ ॥ स्वलीलया गच्छमानौ ददृशाते च तावुभौ ॥ क्रंदमानां च तां दृष्ट्वा कुररं पतितं पुरः ॥ उवाच शंकरं गौरी कृपयापरिचोदिता ॥ उमा उवाच ॥ देवदेव जगंनाथ भूतेश भवनाशन ॥ पश्य साधुसमाचारां पक्षिणीं शोकपीडितां ॥ स्वां तनुं त्यजमानां तु भर्तृदुःखांकुशाहतां ॥ पतिप्रिया पतिप्रगा नित्यं पतिहिते रता ॥ पतिव्रतधरा साध्वी सर्वलोकेषु शोभते ॥ सततं राजते साध्वी पशुपक्षीगणेष्वपि ॥ वराकी श्रूयते पूर्वं कपोती किल भर्तृगा॥ तवस्यै देहि देवेश वरंत्वमभिवांछितं ॥ तव दृष्टिपथं प्राप्य शकुनी शोचते कथं ॥ ख्यातस्त्वनाथनाथस्त्वं दीनोद्धरणकर्म वः ॥ शीलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हि महतामेतद्भजतं यद्भजत्यसौ ॥ स्वसमानं च कुरुते सुदामानं यथा हरिः ॥ ईश्वर उवाच ॥ साधु साधु महादेवि यदुक्तं त
त्तथैव हि ॥ त्वद्भाषितं करिष्यामि विनोदं पश्य सांप्रतं ॥ मार्कंडेय उवाच ॥ एवं वदति देवेशे यावत्सा त्यजते तनुं ॥ तावता
पार्थ संभूतं तत्र लिंगद्वयं शुभं ॥ देहस्थाने द्वयोर्वेद्यं विविधार्थप्रसाधनं ॥ कुररेश्वरसंज्ञं तत्तदाप्रोवाच भारती ॥ विमानवरमारुढौ
दृष्टौ गौर्या च तौ दिवि ॥ गजचर्मपरीधानौ त्रिशूलवरधारिणौ ॥ व्याघ्रचर्मोत्तरीयौ च जटामुकुटमंडितौ ॥ सारुप्यां मुक्तिमापन्नौ
शिवस्य गणतां गतौ ॥ मार्कंडेय उवाच ॥ ततः सा विस्मिता देवी प्रणम्योवाच शंकरं ॥ कृतं साधु महादेव त्वयाद्य जगतां
गुरो ॥ इमौ यद्गणतां नीतौ भक्तार्तिहरण प्रभो ॥ इत्युक्त्वांतर्हितौ पार्थ पार्वतीपरमेश्वरौ ॥ ततः प्रभृति विख्यातं कुररीतीर्थमुत्त
मं ॥ तत्र तीर्थे नरः स्नात्वा तर्पयित्वा पितॄन् सुरान् ॥ यथाप्राप्तोपहारैर्यः पूजयेत्कुररेश्वरौ ॥ स सर्वपापविनिर्मुक्तः सारुप्यां मु
क्तिमाप्नुयात् ॥ दीपं दत्वा च देवाय देववन्मोदते दिवि ॥ पितॄनुद्दिश्य यो भक्त्या विधिवत् श्राद्धमाचरेत् ॥ तृप्यंति पितरस्तस्य
यावन्मन्वंतरं नृप ॥ इति श्रीरेवायां कुररीश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ तत्रैव च महाराज क्षेत्रपालः स्थितो महान् ॥ ढौंढेशो
नाम विख्यातो लोकानां भयनाशनः ॥ ढौंढानाम पुरा पार्थ राक्षसी कामचारिणी ॥ बलात्प्रविश्य तं ग्रामं बालान्हि हरते सदा ॥
एकदा बालकं हृत्वा ब्राह्मणस्याग्निमेधसः॥यावता यास्यति गृहात्तावद्विप्रेण फूत्कृतं ॥ मध्यरात्रे महाराज उच्चैर्ग्रामस्य निर्गमे ॥ बुं
बारावं प्रकुर्वाणो यथोवाच शृणुष्वतत् ॥ ब्राह्मण उवाच ॥ ग्रामपालो न कोप्यस्ति निर्नाथो वसते जनः ॥ यातुधानी हरत्येषा
प्रत्यहं बालकानि च ॥ किं कुर्मः कस्य वा ब्रूमो नदेवो न च राक्षसः ॥ यं वयं शरणं यामः बालान् हरति राक्षसी ॥ क्षेत्रपाला
श्च देव्यश्च सर्वत्र ग्रामपालकाः ॥ संतीह शिवं नौवात्र धात्रा ग्रामे वृथा कृतः ॥ मार्कंडे उवाच ॥ इति ब्रुवाणे विप्रे वै खे चर
न्क्षेत्रपालः ॥ माभैरिति ब्रुवन् तूर्णं आजगाम तदग्रतः ॥ पप्रच्छ तं द्विजं विप्रो वृत्तांतं तमुवाचह ॥ क्षेत्रपालेन दिग्बंधः स्वश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्त्या तत्र निर्मितः ॥ सबालां राक्षसीं दृष्ट्वा धृत्वा चैव निपातिता ॥ ब्राह्मणायाशु तं बालं दत्तवान्क्षेत्रपालकः ॥ गले बध्वा च तां पापां प्रमारणरुचिर्यदा ॥ रुदमाना तदोवाच तं प्रणम्याथ [1]राक्षसी ॥ यातुधानी उवाच ॥ क्षेत्राधिप शृणुष्व त्वं मम वाक्यं यथातथं ॥ न युक्तं तेद्य मां हंतुं रुद्राल्लब्धवरम्यहं ॥ ब्रह्मणो वै समुत्पन्ना कृतोत्साहाखिलाशने ॥ शिवेन ब्रह्मणा चापि निषिद्धा विश्वभक्षणात् ॥ विचार्य च शिवाद्यैस्तुमर्यादा मम कल्पिता ॥ फाल्गुणस्य सितपक्षे पूर्णमास्यां तु राक्षसि ॥ यो दास्यति बलिं तुभ्यं ग्रामे ग्रामे पुरे पुरे ॥ तत्र त्वया नोपसर्गः कर्तव्यः कस्यचित् क्वचित् ॥ इति मे स्थापिता देवैर्मर्यादा क्षेत्रपालक ॥ तां पालयामि सततं अन्यग्रामे पुरेपि च ॥ न ग्रामोयं बलिं दत्ते मम मत्तोधिको मतः ॥ तस्मादिमं भक्षयिष्ये लोकं वै बालपूर्वकं॥ प्रसादं कुरुमे देव भिक्षा याचे चिराशनीं ॥ क्षेत्रपाल उवाच ॥ ढौंढे त्वामेव याचेहं देहि ग्राममिमं मम॥नोवायत्रममावासवासिनी त्वं भविष्यसि ॥ त्वयायं न प्रवेष्टव्यो ग्रामोमय्यत्र संस्थिते ॥राक्षसी उवाच॥एवं भवतु दत्तोयं मयाग्रामस्तवाखिलः ॥मम नाम्नाधिपो भूत्वा ग्रामे यदि निवत्स्यसि॥मार्कंडेय उवाच॥तथेत्युक्त्वा स्थितस्तत्र ढौंढेशः क्षेत्रपालकः॥मुक्ता सा राक्षसी तेन मुक्तो ग्रामोऽपि वै तया ॥ तं पूजयित्वा नत्वा च जगाम स्वेच्छया तु सा ॥ ततः प्रभृति विख्यातौ ढौंढेशः क्षेत्रपालकः ॥ तस्य त्वाराधनं कृत्वा नारी वा पुरुषोपि वा ॥ पूजयित्वा नमस्कृत्य दुर्भगा सुभगा भवेत् ॥ अपुत्रो लभते पुत्रानधनो धनमाप्नुयात् ॥ नारी नरोथवाप्येवं लभते काममुत्तमं ॥ स्पर्शनाद्दर्शनात्तस्य स्तवनान्नमनादपि ॥ न राक्षसभयं तस्य भूतप्रेतपिशाचजं ॥ शाकिनीयक्षझोटिंग भयं न स्याद्रिपोरपि ॥ इति श्रीरेवायां कुररीश्वरतीर्थढौंढेशक्षेत्रपालमाहात्म्यंनाम नवषष्ठ्यधिकशततमोध्यायः ॥१६९॥ ॥ मार्कंडेय उवाच ॥ कोशद्वयांतरे पार्थ तीर्थं परमशोभनं ॥ दशकन्येति विख्यातं कृतं शर्वेण लीलया ॥ एकदा भुवि देवेशो

---

१ भरुच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लीलया विचरन्नृप ॥ समुद्रोपांतमाश्रित्य रेवातीरे व्यलोकयत् ॥ ब्राह्मणान् दश तत्रस्थान् दृष्ट्वा देवोपि कौतुकी ॥ नियमव्रतस
त्वस्थान् जपध्यानरतान् मुनीन्॥यथात्यक्तारिषड्वर्गान् सांख्ययोगविचिंतकान्॥व्यक्तमानापमानांश्च समलोष्टाश्मकांचनान् ॥दृष्ट्वा दूर
स्थितो देवो दशकन्याः ससर्जह॥रूपयौवनसंपन्नाः सर्वाभरणभूषिता:॥तन्वंग्यो मृगशावाक्ष्यो मदनस्यापि मोहदाः॥गजेंद्रगतिगामि
न्य: पुंस्कोकिलकलस्वनाः॥स्वयमग्रेसरस्तासां वृद्धब्राह्मणरूपधृक्॥दशकन्याः समानिय तानुवाच द्विजान्विभुः॥बद्धांजलिपुटः प्राहपुरः
स्थित्वा जरद्गतिः॥ईश्वर उवाच॥पश्यंतु वैष्णवी मायां वृद्धत्वेपि द्विजोत्तमाः॥अहं च मम भार्या च द्वौवृद्धावष्थचंक्रनौ॥न ज्ञायते
जीवितस्य गतिः कापि भविष्यति॥जन्मन्यस्मिन्निमाःकन्याः पुत्रो भाग्यवशाद्भवेत्॥दशेमा मत्प्रसूतास्तु कुमार्यः पुण्यलक्षणाः॥पूज्या
भवंतो योग्यास्थ दशैव ब्राह्मणा:शुभाः॥सहवै दातुं वः सर्वा मनः संप्रति वर्तते॥समकालं विवाहाय त्वरतेतीव मे मनः ॥वरयध्वं
द्विजश्रेष्ठा गतिर्दैवस्य दुर्विदा॥महातीर्थमिदं रेवा भवंतः पात्रमुत्तमं॥चित्तं वित्तं च पात्रं च योगोयं भुवि दुर्लभ:॥जपस्य तपसस्तीर्थे
यमस्य नियमस्य च ॥ एतदेवं बलं पुंसां यउद्भवेत्सुत्द्दागमे ॥ मार्कं० ॥ इत्युक्ते तत्र देवेन ते दृष्ट्वा कन्यकाः शुभाः ॥ परंजहर्षु:
सर्वेपि विस्मयं च परं दधुः ॥ परस्परं निरीक्षंतो विनोदान् जगुरंजसा ॥ तेषां च विस्मृतं ध्यानं तपस्तूर्णं पलायितं ॥ जलपातं
तपश्चक्रे ननाश नियमोपि च ॥ यमः क्रमशतं गत्वा विनोदं वीक्ष्यते स्थितः ॥ मंदावस्थामगान्मौनं कुशाः किमधिशेरते ॥ विल
क्षाण्यक्षसूत्राणि मुद्रानिद्राविघूर्णिता ॥ ईक्षांचक्रे पुरोदिक्षा सेक्ष्यति विप्रचेष्टितं ॥ एवमानंदिता विप्रा वृद्धं विप्रमथोचिरे ॥ विप्रा
ऊचुः ॥ भवंतं प्रति किं ब्रूमश्चेतो दोलायते तुनः ॥ तपोनियमयुक्ताः स्म शास्त्रं ब्रूते तथान्यथा ॥ सिद्धौषधं ब्रह्मजधीरसायनं
सिद्धिर्निधिः साधुकला वरांगना ॥ मंत्रस्तथा सिद्धरसश्च धर्मतो नेमे निषेध्याः स्वधिया समागताः बलात्कारयते यत्र शास्त्रं तत्र
किमुच्यते ॥ मार्कंडेय उवाच ॥ ब्राह्मणा वरयारूासु गत्वा तस्य समीपतः ॥ अक्षसूत्राजिनादीनि जले क्षिप्त्वाशु नर्मदे ॥ तेभ्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्ताः सददौ कन्या उद्वाहेन युयोज च ॥ तासामुद्वाहसमये वीक्षां चक्रुः सुरा दिवि ॥ विस्मितं च जगत्सर्वं दृष्ट्वा देवस्य केलितं ॥ ततश्चांतर्दधे देवो दत्वा तेभ्यःस्वकन्यकाः ॥ तदाप्रभृति तत्तीर्थं दशकन्येति विश्रुतं ॥ पवित्रं हापशमनं शिवप्रीतिकरं परं॥ तत्र स्नात्वा पितॄणां च श्राद्धं कृत्वार्चयेच्छिवं ॥ तत्र तीर्थे च यः कन्यां ददाति समलंकृतां ॥ भक्त्या वराय योग्याय विधिना तत्फलं शृणु ॥ अग्निष्टोमातिरात्राभ्यां फलं शतगुणं कृतं ॥ प्राप्नोति पुरुषो दत्वा शक्त्या तत्र न संशयः ॥ तेन दानेन भूतेशः शिवःप्रीतिमवाप्नुयात् ॥ तेन पुण्येव पूतात्मा शिवलोके नृपोत्तम ॥ स वसेद्रोमसंख्यानि वर्षाणि शिवसंन्निधौ ततः कालेन महता मर्त्यलोकमुपागतः ॥ धनायुःपुत्रसौभाग्यसुखसिद्धयुतो भवेत् ॥ इति श्री रेवायां दश कन्यातीर्थं ॥ मार्कंडेय उवाच ॥ ततः कोशांतरे तीर्थं स्वर्णबिंद्वाख्यमुत्तमं ॥ पापदोषहरं पुण्यं धन्यं स्वर्गस्य साधनं ॥ वैश्योधन पतिर्नाम जयंतिसंभवः पुरा ॥ स्वर्णकोटिसमायुक्तो वृद्धस्तीर्थरुचिर्बभौ ॥ रेवातीरमनुप्राप्य तत्र स्थाने युधिष्ठिर ॥ व्रतोपवासनिरतो जलाशी फलभक्षकः ॥ एवं किंबहुना तत्र स्नात्वा स्वर्णं प्रयच्छति ॥ जलबिंदुप्रमाणं तु प्रत्यहं ब्राह्मणाय वै ॥ एवं कतिपयाहोभिर्ब्राह्मणाःशतशस्ततः ॥ तेन संतोषिताः पार्थ न ददाति ततोधिकं ॥ एवं कालेन महता स्वर्णकोटिर्व्ययीकृता ॥ ब्राह्मणैः स्वर्णबिंद्वाख्यां प्रापितो वैश्यसत्तमः ॥ प्रत्यहं शिवमभ्यर्च्य तत्प्रीत्यैबिंदुमात्रकं ॥ यतः स्वर्णं ददातिह तेनोक्तः स्वर्णबिंदुकः ॥ तेन स्वर्णप्रदानेन तया च शिवपुजया ॥ प्रसन्ने शंकरे राजन् वैश्यः शिवपुरं ययौ ॥ यावद्बिंदुप्रसंख्यानि वर्षाणि शिवलोकभाक् ॥ एवं तीर्थं भुविख्यातं तस्य नाम्ना युधिष्ठिर ॥ यत्र स्नात्वा दिवं यांति मृतास्तं चापुनर्भवाः ॥ तत्र तीर्थे च यो भक्त्या स्नात्वा विप्राय कांचनं ॥ ददाति नृपशार्दूल तस्य पुण्यफलं शृणु ॥ सर्वेषामेव रत्नानां कांचनं रत्नमुत्तमं ॥ वन्हितेजःसमुद्भूतं तेनपुण्यतमं विदुः ॥ तेन दत्ताहि पृथिवी सशैलवनपत्तना ॥ दत्तानि सर्वरत्नानि कांचनं यः प्रयच्छति॥वाचिकं मानसं पापं कर्मणा यदुपार्जि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तं ॥ तत्सर्वं नश्यति क्षिप्रं स्वर्णदानेन भारत ॥ स्वर्णदानं नरो दत्वा अपिवालाग्रमात्रकं ॥ तत्र तीर्थे नृपश्रेष्ठ निधानं कुरुते क्ष
यं ॥ वन्हिसूर्यसुरेंद्राणां लोकेषु स विराजते ॥ तत्र विद्याधरैः सिद्धैर्विमानवरमास्थितः ॥ पूज्यमानो वसेत्तावद्यावदाहुतसंप्लवं ॥
पूर्णे चैव ततः काले मानुष्यमिह चागतः ॥ सुवर्णकोटिसाहिते द्विजानां जायते कुले ॥ दानी भोगी च निर्व्याधिर्धर्मवान्लोकपू
जितः ॥ जीवेद्वर्षशतं पार्थ तृप्ताः स्युः पितरश्चिरं ॥ स्वर्णबिंद्वीश्वरं देवं भक्त्या संपूज्य मानवः ॥ उद्धरेदात्मना सार्द्धं पुरुषानेक
विंशति ॥ इति श्रीरेवायां स्वर्णबिंदुतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे गत्वा तीर्थं वै ऋणमोचनं ॥ सर्व
लोकेषु विख्यातं पितॄणां प्रीतिवर्धनं ॥ युधिष्ठिर उवाच ॥ ऋणं किं तन्मुनिश्रेष्ठ कस्तस्मान्मोचितः पुरा ॥
किमत्र विहितं तीर्थे सर्वं विस्तरतो वद ॥ मार्कंडेय उवाच ॥ श्राद्धपक्षे क्षयाहे च तीर्थे पर्वणियद्भवेत् ॥ तर्पणं
पिंडदानं च पैतृकंतदृणं स्मृतं ॥ अग्निहोत्रं तथा यज्ञाः पशुबंधास्तथेष्टयः ॥ एतद्देवऋणं प्रोक्तं मानुष्यं शृण्वतः परं ॥ ब्रा
ह्मणेषु च तीर्थेषु देवायतनजोत्सवे ॥ अभ्यागतातिथिषु यद्दीयते व्यवहारतः ॥ ऋणं मानुष्वकं चैतदिति प्रोक्तं ऋणत्रयं ॥ ऋणत्र
यविमोक्षार्थं पुत्रानिच्छंति साधवः ॥ गच्छंति पितरश्चापि स्वार्थहेतोः सुतं मुने ॥ पुरा दुश्श्रवनो राजा सोमवंशसमुद्भवः ॥ रेवाती
रमुपायातश्चापुत्रः पुत्रवांछया ॥ संस्थाप्य शंकरं तत्र नित्यं स्नात्वा शिवं जपन् ॥ देवं विज्ञापयत्येवं तच्छृणुष्व नराधिप ॥ पूजनां
ते शिवं वीक्ष्यरुदन्वै श्रीफलाशनः ॥ जानुभ्यामवनिं गत्वा मुखेक्षिप्त्वा दशांगुलीः ॥ दुश्श्रवन उवाच ॥ दीनोद्धरण देवेश मम
पुत्रस्य का गतिः ॥ पितृदेवमनुष्याणां ऋणं पापे मयि स्थितं ॥ अनाथनाथ मां पाहि कृपणं पुत्रवार्जितं ॥ किं करोमि कथमीश
स्थितं मयि ऋणत्रयं ॥ त्वमेव जगतां नाथस्त्वत्तो नान्योस्ति कश्चन ॥ तेन सत्येन विश्वात्मन् मामुद्धर ऋणत्रयात् ॥ मार्कंडेय उ
वाच ॥ तमेवं वादिनं नित्यं दीनं दुश्श्रवनं नृपं ॥ सप्तमे मासि देवेशः प्रत्यक्षः प्राह लीलया ॥ ईश्वर उवाच ॥ दीनोसि पूत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हीनोसि भो राजन् पुत्रमिच्छसि ॥ ऋणत्रयविमोक्षाय पुत्रस्तव भविष्यति ॥ इत्युक्त्वा स महादेवस्तत्रैवांतरधायित् ॥ पुत्रं लेभे स राजापि ऋणमोचनसंज्ञकं ॥ इति ते कथितं पार्थ तीर्थं वै ऋणमोचनं॥तत्र स्नात्वा विधानेन संतर्प्य पितृदेवताः॥शिवं पुज्यं नरः पार्थ पुत्रवानतृणो भवेत् ॥ सत्पुत्राश्चापि ये राजन् तीर्थश्रद्धासमन्विताः ॥ ऋणत्रयाद्विमुच्यंते अपुत्राः पुत्रिणस्तथा ॥ हुत्वा दत्वा तथा जप्त्वा स्नात्वा संपूज्य भारत ॥ श्रद्धावान्सप्तजन्मानि फलमक्षयमाप्नुयात् ॥ इति श्रीनर्मदायां ऋणत्रयमोचनतीर्थनाम सप्तत्यधिकशततमोध्यायः ॥ १७० ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे गच्छेत्तीर्थं त्रैलोक्यविश्रुतं ॥ देवदानवगंधर्वैरप्सरोगणसेवितं ॥ यत्र तिष्ठति देवेशः साक्षाद्रुद्रो महेश्वरः ॥ भारेण महता जातो भारभूतिस्ततोच्यते ॥ युधिष्ठिर उवाच ॥ भारभूतिमिति प्रोक्तं त्वया तीर्थं तु यन्मुने ॥ कथं कदा च तज्जातं वद विस्तरतो मम ॥ मार्कंडेय उवाच ॥ भारभूतिसमुत्पत्तिं शृणु पांडवसत्तम ॥ विस्तरान्मे यथा प्रोक्तं पुरा देवेन शंभुना ॥ आसीत्कृतयुगे विप्रो वेदवेदांगपारगः ॥ रैवतस्य मनोराद्ये साधुकर्मा गुणान्वितः ॥ विष्णुशर्मेति विख्यातः सर्वशास्त्रविशारदः ॥ क्षमा दमो दया दानं सत्यं शौचं धृतिर्घृणा ॥ विद्या विज्ञानमास्तिक्यं एतत्तस्मिन्प्रतिष्ठितं ॥ इदृग्विधा हि ये विप्राः पूज्यंते नृपसत्तम ॥ पततं नरके घोरे तारयंति तरंति ते ॥ क्षांताश्च दांताः श्रुतिशीलिनो ये जितेंद्रियाः प्राणिवधान्निवृत्ताः ॥ प्रतिग्रहे संकुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ एवं गुणगणाकीर्णो ब्राह्मणो नर्मदातटे ॥ शिलोंछवृत्तिजीवी च स वसन्ब्राह्मणैः सह ॥ तीर्थे तीर्थे प्रशंसंति ब्राह्मणा विष्णुशर्मणः ॥ तादृशं ब्राह्मणं ज्ञातुं देवदेवो महेश्वरः ॥ भूत्वा द्विजबटुः श्रीमान् आजगाम तदाश्रमं ॥ दृष्ट्वा तं ब्राह्मणैः सार्द्धमुच्चरंतं पदक्रमं ॥ अभिवाद्य सतं विप्राः स्वागतेनाभ्यपूजयन् ॥ मुहुर्तार्द्धमुवाचाथ ब्राह्मण त्वमिहागतः ॥ किमर्थं मे बटो ब्रूहि किं करोमि तवेप्सितं ॥ बटुरुवाच ॥ विद्यार्थिनमनुप्राप्तं विद्धि मां द्विजसत्तम ॥दास्यसे यदि मेविद्यां ततः स्थास्यामि ते ग्रहे ॥ ब्राह्मण उवाच ॥ सर्वेषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेव विप्राणां बटो त्वं पात्रउत्तमः ॥ दानानां परमं दानं कथं विद्या न दीयते ॥ गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ॥ अथ
वा विद्यया विद्या भवतीति फलप्रदा ॥ बटुरुवाच ॥ यथान्ये बालकास्तत्त्वं शुश्रूषंति ह्यहर्निशं ॥ भगवन् बटुभिः सार्द्धं शुश्रूषा
मि तथा ध्रुवं ॥ मार्कंडेय उवाच ॥ तथेति चोक्त्वा विप्रेंद्रः पठयंस्तं दिने दिने ॥ वर्तते सह शिष्यैः स शिलोंछानुपहारयन् ॥
ततः कतिपयाहोभिः प्रोक्तोबटुभिरीश्वरः ॥ पचनाद्यं बटो कर्म कुरु पर्यायमागतं ॥ तथेति चोक्त्वा देवेशस्तदाश्रमपदे स्थितः ॥ अ
ध्यापकश्च शिष्याश्च वनं जग्मुर्यथा पुरा ॥ बटुर्वनस्पतीन् ध्यात्वा कामधेनुमथाब्रवीत् ॥ यावदागच्छेत विप्रो बटुभिः सह मंदिरं ॥
संसिद्धमन्नं सर्वं हि कर्तव्यं तावदाश्रमे ॥ मार्कंडेय उवाच ॥ एवमुक्त्वा स तान्सर्वान् बहुरूपोमहेश्वरः ॥ तदानीमेव ते
यत्र तत्र धातोनुलीलया ॥ धिक्कृतोबहुभिस्तैः स ततो वै गुरुसंनिधौ ॥ बटवऊचुः ॥ क्षुत्क्षामकंठाः सर्वेस्मइतो
गत्वा स्वमाश्रमं ॥ त्वया सिद्धेन चान्नेन तृप्तिंयास्याम वै यतः ॥ तद्वृथा चिंतितं सर्वं त्वयागत्य कृतं हि नः ॥
मिथ्याप्रतिज्ञ मूढेन दुरनुष्ठितमद्यते ॥ बटुरुवाच ॥ ईर्ष्यां वाप्यनुतापं वा भोजनार्थं द्विजर्षभाः ॥ माकुरुध्वं यथान्या
यं सिद्धेन्ने गृहमेष्यथ ॥ बटव ऊचुः ॥ दिनशेषेण चास्माकं पचनां तु दिने दिने ॥ निष्पत्तिं याति वानेति तदसिद्धमशेषतः॥ अ
सिद्धं सिद्धमस्माकं यत्त्वया समुदाहृतं ॥ गतैस्तत्रानृतं दृष्ट्वा बध्वा क्षेप्यस्त्वमंभसि ॥ बटुरुवाच ॥ शृणुध्वं भोबटुवराः सोपा
ध्याया द्विजर्षभाः ॥ प्रतिज्ञां मम दुर्धर्षां यां श्रुत्वा विस्मयो भवेत् ॥ यदि सत्यमिदं सर्वं यदुक्तं भवतां मया ॥ यूयं बध्वा ततः
सर्वे क्षेप्तव्या नर्मदाजले ॥ पश्यात्वमुपाध्याय बद्धानां क्षिपतां ह्रदे ॥ गतानामाश्रमे साक्षी सर्वांतेवासिनां हि नः ॥ मार्कंडेय
उवाच ॥ तथेति कृत्वा ते सर्वे समयं गुरुसंनिधौ ॥ स्नात्वा जप्त्वा विधानेन भूतिग्रामं ततो ययुः ॥ दृष्ट्वा ते विस्मयं जग्मुर्वि
सृते भक्ष्यभोजने ॥ षट्रसान्नेन ते राजन् जुहुवुर्बुभुजुः पृथक् ॥ तुष्टः प्रोवाच वचनं उपाध्यायस्ततो मुदा ॥ अध्यापक उवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरदोस्मि वरं वत्स शृणु यस्तव रोचते ॥ सांगोपांगास्तु ते वेदाः शास्त्राणि विविधानि च ॥ प्रतिभास्यंति ते वत्स मदीयश्चेद्दशो
वरः ॥ मार्कंडेय उवाच ॥ एवमुक्तः स गुरुणा तैश्चिक्रीड यथासुखं ॥ द्वितीये च ततः प्राप्ते दिवसे नर्मदाजले ॥ क्रीडनार्थं ग
ताः सर्वे सोपाध्याया युधिष्ठिर॥ततः स्मृत्वा पणं तं स समाभाष्य परस्परं॥भारं बबंध सर्वेषां बटूनां वाल्हिदामभिः ॥ शापानुग्रहकृ
द्देवोक्षिपत्तोये यथा गृहे ॥ जलेक्षिप्तान्बटून् दृष्ट्वा विषण्णेन ततो नृप ॥ बटुः स गुरुणा प्रोक्तो हा किं ते साहसं कृतं ॥ एतेषां पि
तरौ मूढ शिष्याणां ग्रहमागताः ॥ यदिइक्ष्यंति ते पुत्रान् वक्ष्यामि क्व गतानहं॥एवं सति महाभारे यदिकश्चिन्मरिष्यति ॥ तदा स्व
कीयजीवेन किं जीवयितुमर्हसि॥मृतेष्वेतेषु विप्रेषु न जीवे निश्चयो मम॥अप्यहं च मरिष्यामि नैतद्द्रष्टुमलं मया॥ब्रह्महत्याश्च ते ब
ह्व्यो भविष्यंति मृते मयि ॥ द्विज बंधनमात्रेण नरके पतनं ध्रुवं ॥प्रापिते मरणावस्थां तत्र न ज्ञायते गतिः॥मनसापि द्विजे हिंसा
यश्चिंतयति मूढधीः ॥ तस्यापि ब्रह्मवध्यास्यात्किमुताधिककारिणः ॥ मार्कंडेय उवाच ॥ एवमुक्तस्तु विप्रेण उज्जहार बटून् जला
त् ॥ भारं मुक्त्वा गुरोरग्रे छादयामास तान्द्विजान् ॥ स्ववस्त्रेण नृपश्रेष्ठ तस्थौ प्रांजलिरग्रतः ॥ उपाध्याय उवाच ॥ मुंच सर्वा
न्पृथक् कृत्वा यदि जीवंति सत्वरं ॥ पणान्नृण्यगताः सर्वे हृष्टस्वांते च वैबटो ॥ उपाध्यायवचः श्रुत्वा यावद्भाराद्विमुंचति ॥ भार
स्थाने महालिंगं तावदुत्थितमैश्वरं ॥ ददर्श सभृतांस्तांश्च जीवितान्पुरतो गुरुः ॥ स्वरूपधारिणं शंभुं सायुधं सविभूषणं ॥ ततः स
विस्मयाविष्टो वीक्ष्य सर्वांश्च शिष्यकान् ॥ विष्णुशर्मा समुत्थाय प्रणाममकरोद्भुवि ॥ विष्णुशर्मा उवाच ॥ धन्योस्मि कृतपु
ण्योस्मि किं करोमि तवेश्वर ॥ अज्ञानेन मया तेद्य यदुक्तं परमेश्वर ॥ दुरुक्तमप्रियं वापि कृतं तत्क्षंतुमर्हसि ॥ महेश्वर उवाच॥
भवान् गुरुर्भवान्देवो भवान् पूज्यश्च मे पिता ॥ वेदगर्भ नमस्तेस्तु नास्तिकश्चिव्द्यतिक्रमः ॥ जनेता चोपनेता च यश्च विद्यां प्र
यच्छति ॥ अन्नदाता भयत्राता पंचैते पितरः स्मृताः ॥ यत्र मे विहितो भारः सहाध्यायि द्विजन्मनां ॥ भारभूतिरितिख्यातं ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न तीर्थं भविष्यति ॥ भारभूतीश्वरं नाम्ना यो मामभ्यर्चयिष्यति ॥ लिंगेऽस्मिन् ब्राह्मणश्रेष्ठ भुक्तिंमुक्ती स लप्स्यते ॥ एवमुक्त्वा
तदा पार्थ विष्णुशर्माणमीश्वरः ॥ तत्र तीर्थे समापृच्छ्य द्विजानंतर्दधे स्वयं ॥ मार्कंडेय उवाच ॥ तदा प्रभृति तत्तीर्थं भारभुतीश्व
रं मतं ॥ विख्यातं सर्वलोकेषु महापातकनाशनं ॥ ब्राह्मणा विस्मिताः सर्वे विष्णुशर्मपुरोगमाः ॥ पूजयांचक्रिरे देवं तत्र तीर्थे
युधिष्ठिर ॥ तत्र तीर्थे पुनर्वृत्तमितिहासं ब्रवीमि ते ॥ समाहितमना पार्थ शृणु तत्पापनाशनं ॥ पुरा कृतयुगस्यादौ वैश्यः कश्चि
न्महाधनः ॥ सुकेश इति विख्यातस्तस्य पुत्रोऽतिधार्मिकः ॥ सोमशर्मा इति ख्यातो दाता मतिमतां वरः ॥ स सखायं वणिक्
पुत्रं कंचिच्चक्रे तु निर्द्धनं ॥ सहदेवाह्वयं राजन्सर्वकर्मसुकोविदं ॥ एकदा तु समं तेन व्यवहारमाचिंतयत् ॥ वैश्यउवाच ॥ सखे
समुद्रयानेन गच्छावो यदि मन्यसे॥भांडं बहु समादाय मदीयं द्रव्यसाधने ॥ परद्वीपं गमिष्याव उत्कर्षश्चावयोःसमः ॥ तथेति ते
न चैवोक्त मंत्रयित्वा मनोगतं ॥ सर्वक्रयाणकं नीत्वा तावारूढौमहोदधिं ॥ परद्वीपं तयोर्गत्वा विक्रीतं वसुतत्तदा ॥ प्राप्तं बहु सु
वर्णं वै रत्नानि विविधानि च ॥ नावं तां संभृतां कृत्वा तौ पश्चादारुरोहतुः ॥ नावमंतर्जले ज्ञात्वा निशीथे स्वर्णसंभृतां दृष्ट्वा
तं सोमशर्माणमुत्संगे कृतमस्तकं ॥ शयानमिति विश्वस्तं सहदेवोऽव्यचिंतयत् ॥ एष निद्रावशं प्राप्तो मयि प्राणान्निधार्यवै ॥ अ
स्याधीनामिदं सर्वं द्रव्यजातमशेषतः ॥उत्कर्षार्द्धं च मे दद्यात्तत्र गत्वेति वा न वा ॥ इति निश्चित्य मनसा पापस्तं लवणोदधौ ॥
चिक्षेपसोमशर्माणं ध्यात्वा पापं हि चेतसा ॥ उत्तीर्णस्तरणात्तस्मात्ततः संगृह्य तद्धनं ॥ स्वस्थः स्वगृहमागात्स निशंकः सुप्रतीक
वत् ॥ ततः कतिपयाहोभिः संयुक्तः कालधर्मतः[1] ॥ गतो यमपुरं घोरं गृहीतो यमकिंकरैः ॥ सनीतस्तेन मार्गेण येन संतपते
रविः ॥ कृत्वा द्वादशधाऽऽत्मानं संप्राप्ते प्रलये यथा ॥ सुतीक्ष्णा कंटका यत्र यत्र श्वान्याः सुदारुणाः ॥ तीक्ष्णदंष्ट्रा महाव्यालाव्या

१ मृतः

CC-0. In Public Domain. Digitization by eGangotri

घ्रा यत्र महावृकाः ॥ सुतप्ता वालुका यत्र क्षुधातृष्णा तमो महत्॥यत्र तोयकथा नास्ति न छाया नाश्रयः कचित्॥ अन्नोदकं प्रार्थयता ज्वलदंगारभक्षणं ॥ छायाः संप्रार्थयमाना भृशं तपति भास्करः ॥ तैर्दह्यमाना बहुशो विलपंति मुहुर्मुहुः ॥ हा भ्रातः पुत्र मातेति पतंति पथि मूर्छिताः ॥ इत्थंभूते तदा मार्गे स नीतो यमकिंकरैः ॥ यत्र तिष्ठति देवेशः प्राणिसंयमनो यमः ॥ ते द्वारदेशे तं स्थाप्य निगदुर्यमकिंकराः ॥ दूताऊचुः॥ बध्वा शृंखलपाशेन आनीतो मित्रघातकः ॥ स्थापितो द्वारि लोकेशविधत्स्व यदनंतरं ॥ यमउवाच ॥ नैव पूर्वं वीक्षितं मे मुखं विश्वासघातिनां॥ यो मित्रद्रोहकः पापो मानवो मा प्रवेश्यतां ॥ ऋषयोत्र विचारार्थे नियुक्ता निपुणाः स्थिताः ॥ ते यत्र ब्रुवते तत्र नीयतां मा विचार्यतां ॥ इत्युक्तास्ते तमादाय किंकराः शीघ्रगामिनः ॥ ऋषीन् गत्वाथ तानूचुस्तं निवेद्य यमाज्ञया ॥ शृणुध्वं भो ऋषिश्रेष्ठाः पापिना तेन यत्कृतं ॥ मित्रो वैश्यस्तु वणिजा संसुप्तो निशि घातितः ॥ धनलोभेन विश्वस्तः कृतोत्संगशिराः शुचिः ॥ आदिश्यतां गतिस्तस्य यथाशास्त्रं हि नो द्विजाः ॥ ऋषयऊचुः ॥ अदृष्टपूर्वमस्माभिर्मुखं विश्वस्तघातिनां ॥ मित्रद्रोहकृतां दूताः कृतघ्नानां विशेषतः ॥ कृत्वा पदांतरे ह्येनं शृण्वंत्वस्य यथागतिः ॥ मार्कंडेय उवाच ॥ते शास्त्राणि विचार्याथ ऋषयस्तु परस्परं॥ आहूय यमदूतांस्तानूचुर्ब्राह्मणपुंगवाः ॥ अन्वेषितानि शास्त्राणि वेदाः सांगाः स्मृतिस्तथा ॥ पुराणानि च मीमांसा सर्वशश्च विचारिताः ॥ ब्रह्मघ्ने च सुरापे च स्तेये गुर्वंगनागमे ॥ निष्कृतिर्विहिता शास्त्रे कृतघ्ने नास्ति निष्कृतिः॥ सर्वपापरतानां च दुर्वृत्ताभक्ष्यभक्षिणां ॥ काप्युक्ता निष्कृति शास्त्रे न तु विश्वस्तघातिनां ॥ मित्रद्रोग्धा कृतघ्नश्च यश्च विश्वासघातकः ॥ त्रयस्ते नरकं यांति यावच्चंद्रदिवाकरौ॥वापीकुपतडागादिभेत्तारो ये च मानवाः ॥ उद्यानवाटिकादीनां तरूणां छेदकारिणः ॥ दावाग्निदाहका ये च सततं प्राणिहिंसकाः ॥ न्यासापहारिणो ये च गरदा स्वामिवंचकाः॥माता पितृगुरूणां च त्यागिनो दोषदायिनः॥बालघ्नी च पतिघ्नी च गर्भघ्नी कुलटा च या॥विवेकरहिता या स्त्री या स्नात्वा नपतिं व्रजेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।।सिद्धान्नं वा स्वयं भुंक्ते स्यक्त्का देवान्‌पितॄन्पातिं।।एतेषांतु गतिर्दृष्टा न तु विश्वासघातिनां॥इति स्थितेषु पापेषु गतिरेवं विधीयते।।
नान्या गतिर्मित्रहणे विश्वस्तेपिं ह निश्चितं॥ऋषयऊचूः॥यमदूता इतो निंत्वा ह्येनं विश्वस्तघातिनं॥कल्प कोटिशतं साग्रं पर्यायेण
पृथक् पृथक् ॥ त्रिंशत्कोटि प्रसंख्येषु नरकेषु स्वकर्मतः ॥ क्षिप्यतामेष मित्रघ्नो न विचारोत्र कश्चन ॥ मार्कंडेय उवाच ॥ इति
ते वचनं श्रुत्वा किंकरा ऋषिभाषितं ॥ निगृह्य नरकान् घोरान्प्रतिक्षेप्तुं गता हि तं॥तंतमादौ हि नरके घोरे रौरवसंज्ञिते ॥ चिक्षि
पुस्तत्र पापिष्टं क्षिप्ते रावो भवन्महान् ॥ प्राणिनां नरकस्थानां मैनं मुंचंतु भाषितां ॥ अस्य संदर्शनादेव पिडा शतगुणा हि नः
॥ यथोल्मुकैः प्रदिप्तैश्च समृद्धैर्दह्यताम्विह ॥ यावत्संदर्शनादस्य तुंडस्यैष फलं महत् ॥ यथा कुजनसंगत्या सुजनो याति दुर्गतिं ॥
संनिधानात्तथास्याभूत्क्षते क्षारावसेचनं ॥ प्रसादः क्रियतामाशु पापोन्यत्रातिवर्त्यतां ॥ नरकाः संति बहवः कथमेकोस्ति रौरवः ॥
एवमुक्तास्ततस्तैस्ते गताश्चैवाशुचिं प्रति ॥ तत्रापि नारकाः सर्वे पूर्ववत्ते विचुक्रुशुः॥एवं ते किंकराःसर्वान् तं नित्वा नरकान्नृप॥प
र्यटंतो विषण्णा वै किंकार्यमिति चावदन् ॥ नरकेपि स्थितिर्नास्ति पापिनोस्याद्य दुर्मतेः ॥ ततो निगृह्य तं जग्मुः किंकरा यम
संनिधौ ॥ गत्वा निवेदयामासुर्यद्वृत्तं नारकैः सह॥किं तस्य वद कर्तव्यं नरकेयस्य नस्थितिः॥यम उवाच ॥ तथास्य शेषनरकान्
भुक्त्वा कालंयथोचितं ॥ योनिं यात्वेष पापिष्टस्तैर्यंचीं पापवृतां॥कालं ऋषिभिरुद्दिष्टमात्रं पापः प्रवेश्यतां ॥ एवमुक्ते च वचने प्र
जासंयमनेन तु ॥ चक्रुर्यथोक्तं ते दूता निन्युस्ते नरकान्पृथक् ॥ ततो नीतः स कृमितां विष्टासु बहुधानृप ॥ ततश्च दंशमशक
मंकोटकपिपीलकाः ॥ यूकामत्कुणविड्भक्षश्वशृगालाहिपक्षिणां ॥ मक्षिकासरठानां च गृहगोधागवासिनां ॥ काककर्कटगृध्राणां वृ
कवृश्चिकसौकरीं ॥ खराश्वाजगरादीनां योनींपापः क्रमाद्गतः ॥ एताश्चान्याश्च बह्वयो वै योनीःस्थावरसंभवाः॥पशुयोनिं
ततो लब्ध्वा गवां योनिमवाप्तवान् ॥ स तां योनिमनुप्राप्य धुर्योभूद्भारवाहकः ॥ गृहे तु पार्थिवेशस्य धार्मिकस्य

CC-0. In Public Domain. Digitization by eGangotri

यशस्विनः ॥ एकदा स नृपः प्राप्तां मत्वा वै कार्तिकीं शुभां ॥ पुरोहितमथाहूय ब्राह्मणांश्च शुभान्बहून ॥ राजा उवाच ॥ न गृहे कार्तकीं कुर्यादिति मे बहुशः श्रुतं ॥ समेतास्तत्र गच्छाम इति ब्रूत द्विजर्षभाः ॥ यो गृहे कार्तिकीं कुर्यात्स्नानदानविवर्जितः ॥ संवत्सरकृतात्पुण्यात्स वहिः स्यादिति श्रुतिः॥ तस्मात्सर्वप्रयत्नेन तीर्थे सर्वगुणोचितं ॥ वयं सर्वेपि गच्छामः स्नातुं दातुं स्वशक्तितः ॥ मार्कंडेय उवाच ॥ एवमुक्ते तु वचने पार्थिवेन द्विजोत्तमाः ॥ ऊचुस्तीर्थं नृपश्रेष्ठ रेवायामुत्तरे तटे ॥ भारेश्वरेति विख्यातं मुक्तितीर्थं द्विजोत्तमाः ॥ तत्र यामो वयं सर्वे तीर्थं पापक्षयंकरं ॥ एवमाभाष्य नृपतिर्गृहीत्वा प्रचुरं वसु ॥ शकटातिपरं भृत्वा तत्र युक्तः स धूर्वहः ॥ मित्रघातकरो यो वै स योनिं तु क्रमाद्गतः ॥ इत्थं स नर्मदां राजा प्राप्तवांस्तीर्थमुत्तमं ॥ गत्वा चतुर्दशे दिने उपवासकृतक्षणः ॥ स्नानार्थं तीरमासाद्य भक्त्या देवं शिवं स्मरन् ॥ शुचिप्रदेशाच्च मृदंस्वयं जग्राह मंत्रवत् ॥ मंत्रः ॥ उद्धृतासि वराहेन कृष्णेन शतबाहुना ॥ मामुद्धर तथा धात्रि प्रजया च धनेन च ॥ स एवं मृदमादाय गत्वा तीरे जलांतिके ॥ अदर्शयद्भास्कराय मंत्रमेनमनुस्मरन् ॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे ॥ मृत्तिके हर मे पापं यन्मया पूर्वमर्जितं ॥ ततोवगाहयेदंभो रैवं मंत्रमुदीरयन् ॥ त्वंनर्मदे पुण्यजला तवांभः शंकरोद्भवं ॥ स्नानं प्रकुर्वतो मेद्य पापं नाशय सर्वतः ॥ अनेन विधिना स्नात्वा संतर्प्य पितृदेवताः ॥ प्रीणयित्वा पितॄन् श्राद्धे ततो देवालयं व्रजेत् ॥ शुभान्संभृत्य संभारान् चिंतयन् शंकरं हृदि ॥ आगमोक्तपुराणोक्तविधिना पुजयेच्छिवं ॥ पूजाचतुष्टयं देवे शिवरात्र्यां समाचरेत् ॥ संस्नाप्य प्रथमे यामे पंचगव्येन शंकरं ॥ पंचामृतेन च तथा देवदेवं जगद्गुरुं॥मार्कंडेय उवाच॥एवं राज्ञा कृतं तेन लिंगमार्ज्येन पूरितं॥धूपदीपादिनैवेद्यैरुपहारैर्यथाक्रमं ॥ददावर्घं च देवाय मंत्रेणानेन भारत॥नमस्तेगिरिजानाथ शंभो परमकारण॥गृहाणार्घ मिमं देव संसारादुद्धरस्व मां॥वित्तानुरूपतो दत्तं सुवर्णं मंत्रकल्पितं॥वन्हिर्वैदेवताः सर्वाः सुवर्णं चहुताशनात्॥अतः सुवर्णदानेन प्रीताः स्युः सर्वदेवताः ॥ अनेन स्वर्णदानेन प्रीतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवतु शंकरः॥अनेन विधिना राज्ञा पूजितः प्रथमे शिवः॥यामे द्वितीये च तथा पूर्वोक्तविधिना यजन्॥स्नापयामास गन्धेन दुग्धेन त्रिपुरांतकं ॥ तंदुलरक्षैस्तेन सितैर्लिंगं प्रपूरितं ॥ सितवस्त्रयुगं चैव दत्तं देवाय भारत ॥ यामे तृतीये मधुना संस्नाप्य परमेश्वरं ॥ तिलैः प्रपूरितं लिंगं तिलद्रोणं च दत्तवान् ॥ तिलाः श्वेताश्च कृष्णाश्च पवित्राः सर्ववल्लभाः ॥ तिलद्रोणप्रदानेन छिंधि पापं महेश्वर ॥ सितवस्त्रयुगं यामे द्वितीये चापि वै ददौ ॥ दध्योदनेन च कृतं तुरीये लिंगपूरणं ॥ तस्मिन् यामे प्रदत्ता गौः शंकरः प्रीयतामिति ॥ अनेन विधिना राज्ञा यामिनी त्वतिवाहिता ॥ गीतनृत्यविनोदैश्च ब्रह्मघोषेण भारत ॥ चकार जागरं चापि बहुपुण्यप्रसाधकं ॥ ये जागरे त्रिनेत्रस्य शिवरात्र्यां व्यवस्थिताः ॥ ते यांति यां गतिं पार्थ न तां वै क्रतुयाजिनः ॥ यानि कानि च पापानि जन्मकोटिकृतान्यपि ॥ हरकेशवयोस्तानि जागरे यांति संक्षयं ॥ यावंतो निमिषा नृणां भवंति निशि जाग्रतां ॥ निमिषे निमिषे राजन् अश्वमेधफलं लभेत् ॥ उपवासपराणां च देवायतनवासिनां ॥ शृण्वतां पुण्यमाख्यानं ध्यायतां हरकेशवौ ॥ भागे तृतीये चरमे निशायाः किंपुनर्नृप ॥ तदा कालार्जितं पुण्यं वक्तुं ब्रह्मापि न क्षमः ॥ न शिवः केशवो वापि का कथान्यसुरस्य वै ॥ बहुस्वर्णेन निमिषः क्रतुना न तुलां लभेत् ॥ शिवरात्रितिथिः पुण्या कार्तिकी च विशेषतः ॥ रेवाया उत्तरे कूले तीर्थे भारेश्वरे नृप ॥ कृतं जागरणं दुःखारकथं पापं न हास्यति ॥ इत्थं स जागरं कृत्वा शिवरात्र्यां नरेश्वर ॥ प्रभाते विमले गत्वा नर्मदातीरसंनिधौ ॥ स्नापितास्तेन ते सर्वे तुरगाश्च धुरंधराः ॥ तत्र मध्यस्थितः स्नातस्तिर्यक्कं यो गतो वणिक् ॥ यैर्वाहैरागतस्तीर्थे स्नातोहं स्नापयामि तान् ॥ दद्यांतेभ्यः समुद्दिश्य किंचिच्छक्त्यानुरूपतः ॥ ददौदानं स पुण्यात्मा राजा परहिते रतः ॥ मार्कंडेय उवाच ॥ एवं वाहनजाद्दोषान्मुक्तो भवति मानवः ॥ अन्यथा सुकृतं भागकृतं व्रजति तान्प्रति ॥ संस्नाप्य तान्ततो राजा स्वयं स्नात्वा विधानतः ॥ संतर्प्य पितृदेवांश्च श्राद्धं कृत्वा यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधि ॥ कृत्वा पिंडान् यथाशास्त्रं वृषमुत्सृज्य पार्थिवः ॥ गत्वा देवालयं पश्चाद्देवं तीर्थोदकेन च ॥ संस्नाप्य पंचगव्यैश्च ततः पं चामृतेन च॥सर्वौषधिजलैः स्नाप्य चंदनेनानुलिप्य च॥कुंकुमैश्च सकर्पूरैर्गंधैश्च विविधैरपि॥ सुगंधै र्विविधैः पुष्पैर्लिंगमापूर्य सर्वतः॥ गोदानं च कृतं पश्चाद्विधिना मंत्रपूर्वकं ॥ धेनुके रुद्ररूपासि रुद्रेण परिनिर्मिता ॥ दत्ता मया भवाब्धौ मां पततं त्वं समुद्धर ॥एवं स्वलंकृतां धेनुं दत्वा पश्चात्क्षमापयेत् ॥ ब्राह्मणान् भोजयेद्भक्त्या शक्त्या संतोषयेच्छिवं ॥ षड्रसैर्भोजनैर्भक्ष्यैर्वासोभिस्तानथार्चये त् ॥ दक्षिणाभिर्विचित्राभिः संतोष्याथ विसर्जयेत् ॥ एवं कृत्वा स राजापि स्वयं च बुभुजे ततः ॥इष्टबंधुजनैः सार्द्धं परिवारसम न्वितः ॥ अपि तां रजनीं तत्र न्यवसज्जगतीपतिः ॥ तत्र तस्योषितस्यैवं निशीथे नृपसत्तम ॥ अंतरिक्षे सुनिर्घोषा वागुवाचाशरी रिणी ॥ भारती उवाच ॥ राजन्संसर्गजं लोके फलं स्यादपि तच्छृणु पातित्यमथवौन्नत्यं संसर्गादेव जायते ॥ संसारसागरे ह्यस्मि न्पतितानां दुरात्मनां ॥ यदि संसर्गमात्रेण फलं स्यात्तस्य ते कथं ॥ य एष त्वद्गृहे वोढा महद्भारधुरं धरः ॥ विश्वस्तमित्रघातो वै कृतो ह्येतेन पापिना॥पुरा जन्मसहस्रेण व्यतीते परजन्मनि॥ततोबहूंश्च नरकान् अनुभूय पृथक् पृथक्॥पापयोनिसहस्राणि गत्वा चारोहणगितिं॥गोयोनिं समनुप्राप्तस्त्वद्गृहे स दुरात्मवान्॥स्नापितश्च त्वया तीर्थे ह्यस्मिन्पर्वणि पार्थिव॥दृष्ट्वा पूजाह्यनेनाद्य तथा जागरणक्रिया॥तेन निष्किल्बिषो जातस्त्वत्पुरः पश्य भूपते॥स्वर्गता स तनुं त्यक्त्वा विमानेनार्कवर्चसा॥एवमुक्ते तया देव्या धुर्यः प्राणैर्विमुच्यत ॥ विमानवरमारूढस्तत्क्षणात्समदृश्यत ॥ दिव्याभरणशोभाढ्यो दिव्यमाल्यांबरावृतः ॥स तं प्रणम्य राजानमुवा चानंदपूरितः ॥ वणिगुवाच ॥ अहो नृपवरश्रेष्ठ तीर्थमहात्म्यमुत्तमं ॥ यत्राप्यस्मद्विधास्तीर्थे मुच्यंते पातकैर्नराः ॥ मया ज्ञात मशेषेण मत्समो नास्ति पातकी ॥ अतः परं किं तु कुर्यान्नृपतीर्थानुकीर्त्तनं ॥ पिता माता सुहृद्बंधुर्भवानेव ममेश्वरः ॥ मुक्तो ह्यशेषपापेभ्यो यत्प्रसादादहं नृप ॥ उच्चैः स्वर्गस्थितिं प्राप्तः पार्थिव त्वत्प्रसादतः ॥ क्षंतव्यं प्रणतोस्म्यद्य यस्मींस्तीर्थे हि माद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाः ॥ गतिमीदृग्विधां यांति नजाने तव का गतिः ॥ समाराध्य महेशानं संपूज्य च यथाविधि ॥ लिंगं चतुर्द्धा संपूज्य दानं दत्वा यथोदितं ॥ का गतिस्तव संभाव्यदेह्यनुज्ञां मम प्रभो ॥ त्वरयंतीह मां ह्येते शांभवाः प्रमथा दिवि ॥ स्वस्त्यस्तु ते गमिष्येहमित्युक्त्वांतरधीयत ॥ मार्कंडेय उवाच ॥ अंतर्द्धानं गते तस्मिन् स राजा विस्मयान्वितः ॥ तीर्थमहात्म्यमतुलं वर्णयन्स्वपुरं ययौ ॥ एवंभूतमिदं तीर्थं नर्मदायां व्यवस्थितं ॥ सर्वपापक्षयकरं सर्वदुःखघ्नमुत्तम ॥ उपपापानि नश्यंति स्नानमात्रेण भारत ॥ कार्तिकस्य चतुर्दश्यामुपवासपरायणः ॥ चतुर्द्धापूरयेल्लिंगं तस्य पुण्यफलं शृणु ॥ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागमः ॥ महापापानि चत्वारि चतुर्भिर्यांति संक्षयं॥ सोश्वमेधस्य यज्ञस्य लभते फलमुत्तमं॥कार्तिके शुक्लपक्षे वै चतुर्दश्यामुपोषितः॥तत्र स्नात्वा च दत्वा च वाजपेयफलं लभेत् ॥ अष्टम्यां वा चतुर्दश्यां वैशाखे मासि पूर्वतः ॥ दीपं पिष्टमयं कृत्वा पितॄन्सर्वान्विमोक्षयेत् ॥ तत्र यद्दीते दानमपि वालाग्रमात्रक ॥ तदक्षयफलं सर्वमेवमाह पितामहः ॥ भारभूत्यांमृतानां च नराणां भावितात्मनां ॥ अनिवर्तिका गतिस्तेषां शिवलोकान्न संशयः ॥ अथवा लोकवृत्यर्थं मर्त्यलोकं जिगीषति ॥ वेदवेदांगविद्विप्रो जायते विपुले कुले ॥ धनधान्यसुखैर्युक्तो धर्मकर्मविशारदः ॥ सर्वव्याधिविनिर्मुक्तो जीवेच्च शरदांशतं॥एतत्पुण्यं पापहरं कथितं नृपसत्तम ॥ भारभूते मया ख्यातं माहात्म्यं तीर्थसंभवं ॥ इति श्रीवायूक्तशिवसंहितायां श्रीनर्मदायां भारभूतितीर्थनाम एकसप्ततितमोऽध्यायः ॥१७१॥ श्रीमार्कंडेय उवाच ॥ ततो क्रोशांतरे पार्थ तीर्थं मुंडश्विरं परं ॥ आश्चर्यभूतं लोकस्य देवदेवेन यत्कृतं ॥ तत्ते सर्वं प्रवक्ष्यामि धार्मिकस्य युधिष्ठिर ॥ द्विजरूपेण देवेशः कुष्ठी भूत्वा जुगुप्सितः ॥ श्रवद्रुधिरपूयाढयो मक्षिकाकृमिसंकुलः ॥ दुश्चर्मी दुर्नखी गंधी प्रस्खलन्वै पदे पदे ॥ ब्राह्मणावसथं गत्वा श्राद्धकाले जगाद[1] तं ॥ भोभो गृहपते भव्यं ब्राह्मणैः सह भोजनं ॥ त्वद्गृहे भोक्तुमिच्छा

१ समनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मि सहैभिस्तु सुसंस्कृतं ॥ मार्कंडेय उवाच ॥ ततस्ते ब्राह्मणा दृष्ट्वा यजमानसमन्विताः ॥ स्रवंतं सर्वगात्रेषु धिक् धिगित्येवम ब्रुवन् ॥ निर्गच्छाशुचिगंधांग गृहाच्छीघ्रं द्विजाधम ॥ अभोज्यमेतत्सर्वेषां दर्शनात्तव संस्कृतं ॥ मार्कंडेय उवाच ॥ एवमुक्तस्तथे त्युक्त्वा देवदेवो महेश्वरः ॥ जगामाशु वनेदृष्टः पश्यमानो द्विजोत्तमैः ॥ गते चादर्शनं देवे स्नात्वाभ्युक्ष्य स मंदतः ॥ भोजनायोद्य ता विप्रा यावत्पात्रे पृथक् पृथक् ॥ यदन्नं यत्र पश्यंति कृमयस्तत्र दारुणाः ॥ तं दृष्ट्वा विस्मयाविष्टाः सर्वे किमिति चाब्रुवन् ॥ ततः कश्चिदुवोचेदं ब्राह्मणो गुणवानृजुः ॥ योगींद्रशंकया तत्र बहुविप्रसमागमे ॥ तस्येदं क्लीबरूपस्य भर्त्सितस्य विपाकजं ॥ फलं भवति नान्यस्य अतिथेः शास्त्रचोदनात् ॥ श्राद्धकाले तु संप्राप्ते अतिथिं यो न पूजयेत् ॥ पिशाचा राक्षसास्तस्य तद्विलुंप त्यसंशयं ॥ रूपान्वितं विरूपं वा गलितं मलिनांबरं ॥ योगींद्रशंकया नित्यमतिथिं न विचारयेत् ॥ मार्कंडेय उवाच ॥ तच्छ्रुत्वा वचनं तस्य यजमानपुरोगमाः ॥ ब्राह्मणा द्विजमन्वेष्टुमधावन्सर्वतो दिशं ॥ तावदुक्तंतुकेनापि गहनं वनमाश्रितः ॥ दृष्टो दृष्ट इति प्रोक्ते तेन ते सर्व आगताः ॥ तत्र पश्यंति तं विप्रं स्थाणुवन्निश्चलं स्थितं ॥ न क्रंदते न चलति स्पंदते न च पश्यति ॥ विप्रा जजल्पुः करुणं प्रणमंश्चास्तुवंन्परे ॥ ततः स वाग्भिरिष्टाभिः स्तूयमानस्त्रिलोचनः ॥ क्षुधार्दितानां देवेशो ब्राह्मणानां युधि ष्ठिर ॥ करुणानिधिरिशान उवाच द्विजपुंगवान् ॥ ईश्वरउवाच ॥ मान्यो ममाप्येष सदैव सुर्मेसुरासुराणामपि यो नमस्यः ॥ अयं गृहीत्वावसथांतराले पूज्यश्च रक्ष्यः सततं द्विजेंद्राः ॥ अन्नाद्यमुद्धृत्य सदा पदेयं प्रदर्शयित्वास्य भवद्भिरार्याः ॥ सुस्वादु भो ज्यं भविता ततोन्नमित्येव सुंडी विभुना वितीर्णः ॥ मया प्रसन्नेन महानुभावास्तदेवचान्नं सुकृतं सुधेव ॥ भुजंतु विप्राः सह बं धुभिस्त्वं संपूज्य पूर्वं खलु सुंडिनं तु ॥ मार्कंडेय उवाच ॥ इत्युक्त्वा सुंडिरूपं हि ददावात्मानमात्मना ॥ विप्रेभ्यः प्रभुरीशा नः स्वयं चांतरधीयत ॥ ते विप्रास्तं समादाय सुंडिनं जग्मुराश्रमात् ॥ यथोक्तं वामदेवेन चक्रुस्तं सुंडिनं प्रति ॥ आश्रमद्वारि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बद्धो वै सुंडी सर्वैरपोज्यते ॥ एकदा ते वनं जग्मुः सर्वे विप्राः पृथक् पृथक् ॥ तीर्थयात्राप्रसंगेन नीत्वान्नानि फलानि च ॥ तत्रै
वचान्हिकं कर्म चक्रुः सर्वे नृपोत्तम ॥ आश्रमस्थस्तदा सुंडी विस्मृतो भरतर्षभ ॥ तथैव भोज्यवेलायां कृमीन् पश्यंति वाडवाः ॥
फलेष्वपि तथान्नेषु विस्मितास्ते ततो भवन् ॥ विप्राऊचुः ॥ अहो स विस्मृतः सुंडी सर्वेषां नस्तथाहि तत् ॥ पूर्ववद्विकृतं जात
मिदमन्नगतं द्विजाः ॥ व्रजंतु सर्वशस्तत्र समभ्यर्च्य शिवं भवेत् ॥ मार्कंडेय उवाच ॥ इत्युक्त्वादुद्रुवुः सर्वे स्वाश्रमान्प्रति पांड
व ॥ गता यावच्च वीक्षते न तं पश्यंति सुंडिनं ॥ तत्र स्थाने नृपश्रेष्ठ ततो मोहमुपागमन् ॥ अन्नोदकं नियम्याथ तत्रासीना
द्वीजोत्तमाः ॥ सुंडीनं द्रष्टुकामानां त्रिरात्रं तावदत्यगात् ॥ एकदा सुंडिनस्थाने महाल्लिंगं समुत्थितं ॥ भुवं भित्वा महाराज व्यो
मगा वागुवाच ह ॥ हठं मुंचंतु भो विप्रा इदमायतनं महत् ॥ सुंडीश्वरं पूजयित्वा शिवं प्राप्स्यथ माचिरं ॥ शिवायतनमेतद्धि
नाम्ना सुंडीश्वरं शुभं ॥ संपूज्य फलपुष्पान्नैस्ततः कल्याणमाप्स्यथ ॥ मार्कंडेय उवाच ॥ इत्युक्त्वा भारती देवी तत्रैवोपरता भव
त् ॥ तथैवायतनं पार्थ देवदेवस्य शूलिनः ॥ सुंडीश्वरमिति ख्यातं तदा विप्रगणार्चितं ॥ ते च विप्रास्तमभ्यर्च्य स्वान् स्वान्
कामांश्च लेभिरे ॥ एतत्कामप्रदं लोके तीर्थं सुंडीश्वरं नृप ॥ सर्वभोगप्रदं नृणां सर्वपापहरं शुभं ॥ कार्तिक्यां कृत्तिकायोगे तीर्थं
काशीसमं विदुः ॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि ॥ तत्र स्नात्वा पूजयित्वा सर्वान् कामानवाप्नुयात् ॥ श्राद्धं दत्वा पि
तृणां तु दीपं सुडीश्वराय च ॥ यावन्मन्वंतरं पार्थ शिवलोके महीयते ॥ इति श्रीरेवायां सुंडीश्वरतीर्थनाम ॥ श्री मार्कंडेय उवाच
॥ ततः क्रोशांतरे गच्छेदेकशालं युधिष्ठिर ॥ ग्रामं डिंडीश्वरं तत्र तीर्थमीश्वरनिर्मितं ॥ अत्र ते संप्रवक्ष्यामि शवर्स्य
चरितं महत् ॥ श्रुतमात्रेण येनैव सर्वपापैः प्रमुच्यते ॥ लीलाचरितमीशस्य शृणुष्व भरतर्षभ ॥ एकदा भिक्षुरूपेण
देवदेवो महेश्वरः ॥ एकशाल्डं गतो ग्रामं भिक्षार्थं क्षुत्पिपासितः ॥ अक्षसूत्रोद्यतकरो भस्मठितविग्रहः ॥ शिखी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूली कपाली च जटामुकुटमंडितः ॥ कृत्तिवासा महाकायो महाहिकृतभूषणः ॥ डिंडिमं प्रथितं वाद्यं वादयन्मधुरध्वनि ॥ कपाल पाणिर्भगवान् बालकैर्बहुभिर्वृतः ॥ क्वचिद्गा यन्हसन्नृत्यन्वादयंश्च क्वचित्क्वचित्॥यत्र यत्र गृहे देवो भिक्षां नाप्नोति भारत॥ तत्र तत्र बालकं लीलया डिंडिमेन्यसेत्॥भाराक्रांतं गृहं पार्थ तत्र तूर्णं विनश्यति॥एवं स प्रचरन्देवो वेष्टितो बहुभिर्जनैः॥ दृश्यादृश्येन रूपे ण बहिर्ग्रामाद्विनिर्ययौ ॥ इतश्चेतश्च धावंतं न पश्यंनि यदा जनाः ॥ विस्मिता ददृशुः क्वापि शंभुं मत्वा ततोऽस्तुवन् ॥ मनसा वचसा चैव कर्मणा चैक्यमागताः ॥ तेषां च स्तुवतां भक्त्या शंकरो जगतां पतिः ॥ डिंडिमं प्रददौ तेषां जनानां गृहसिद्धये ॥ गृ हस्थाने विनिर्मुक्ते ह्यस्मिन् गेहं नवं भवेत् ॥ यदाहं प्रार्थयिष्यामि दातव्यो डिंडिमस्तदा ॥ इत्युक्त्वा देवदेशस्तत्रैवांतरधीयत ॥ गृहीतं डिंडिमं सर्वे लोकग्रामं समागताः ॥ यावत्पश्यंति गेहानि ददृशुर्नूतनानि वै ॥ एकशालानि सर्वाणि प्रहृष्टास्ते ततो ज नाः ॥ डिडिमग्राममध्ये वै मुक्त्वा चक्रुर्महोत्सवं ॥ आसने स्वास्तृते स्थाप्य पूजयांचक्रुरंजसा ॥रात्रौ जागरणं कृत्वा प्रभाते पुनरे व ते ॥ यावत्पश्यंति पूजांतस्तावद्ददृशुरेश्वरं ॥ महल्लिंगं महाराज भुवं भित्वा विनिर्गतं ॥ नडिडिमं ते ददृशुस्ततो विस्मयमाग ताः ॥ डिडिमेश्वरनामानं जगुस्तीर्थं हि ते जनाः ॥ पूजयंत्यन्वहं सर्वे तथान्यग्रामवासिनः ॥ मार्कंडेय उवाच ॥ एवं तत्पार्थ विख्यातं तीर्थं वै डिंडिमेश्वरं॥दर्शनात्स्पर्शनात्तस्य पूजनाच्चाभिभक्तितः॥सर्वपापानि नश्यंति तमः सूर्योदये यथा॥भुक्तिसिद्धिप्रदं तीर्थं ख्यातं वै डिडिमेश्वरं॥शिवेन प्रार्थितं पार्थ लोकानां हितकाम्यया॥इति श्रीरेवायां एकशालायां डिडिमेश्वरतीर्थं ॥ मार्कंडेय उवा च॥अप्सरेशं परं तीर्थं तत्रैव भरतर्षभ ॥ स्नातुमप्सरसः सर्वास्तत्र पूर्वं समागताः॥ताभिराराधितः शंभुः स्थापयित्वा सुभक्तितः ॥ तुष्टो ददौ वरं तासामदोषात्स्पंदतां नृप ॥ स्वनाम्ना ताः शिवं भक्त्या संस्थाप्य प्रययुर्मुदा ॥ अप्सरेशे नरो गत्वा स्नानं तत्र स माचरेत् ॥ क्रीडते नागलोकस्थो ह्यप्सरोभिः स मोदते ॥ अप्सरेशं पूजयित्वा नरः शाक्रे पुरे वसेत् ॥ इत्यप्सरेश्वरतीर्थं ॥ मार्कंडे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

य उवाच ॥ मुन्यालयं ततो गच्छेत्तत्रैव कियदंतरे ॥ मुनीनामालयस्तत्र पूर्वमासीत्सुशोभनः ॥ मुनिभिः स्थापितो देवो मुनी
श्वर इति श्रुतः ॥ स्नात्वा तं शिवमभ्यर्च्य परं निर्वाणमृच्छति ॥ भोजयेद्ब्राह्मणांस्तत्र कोटिरेकेन भोजिता ॥ कर्मबंधविमोक्षाय
पूजयेद्यो मुनीश्वरं ॥ वसन्मुन्यालये भक्त्या समुपोष्य यथाविधि ॥ कर्मबंधविमुक्तः स सत्यलोकमवाप्नुयात् ॥ इति मुन्यालयती
र्थनाम ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र मार्कंडेश्वरसंज्ञितं ॥ मया संस्थापितो देवो यत्र भक्त्या सनातनः ॥ तीर्थान्मु
न्यालयात्तद्वै दंडपचाशतांतरे ॥ द्रष्टुं मया गतेनादौ रेवासागरसंगमं ॥ तत्र स्थित्वा कियत्कालं लोकानां हितकाम्यया ॥ स्वनाम्ना
भरतश्रेष्ठ स्थापितं तीर्थमुत्तमं ॥ तत्र स्नात्वा च पीत्वा च पूजयित्वा महेश्वरं ॥ श्राद्धं दत्वा पितॄणां च न स शोचेत्कृताकृते ॥
सार्द्धं मन्वंतरं चापि शिवलोके महीयते ॥ वेदपारायणं कृत्वा ब्राह्मणानां च भोजनं ॥ दत्वा दीपं स्वशक्त्या च सत्यलोके चिरं
वसेत् ॥ इति श्रीरेवायां मार्कंडेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ अर्धक्रोशांतरे पार्थ गणितास्थानमुत्तमं ॥ तत्र साक्षात्परा शक्तिः
स्थिता वै गणिताह्वया ॥ पूर्वकल्पेमहाराज विश्वं संहर्त्तुमिच्छतः ॥ महारुद्रस्य समये विश्वशक्तिर्विनोदतः ॥ मया हि गणितं
विश्वं शिवः संहर्तुमक्षमः ॥ मां विना स महादेवः कथं भूतानि संहरेत् ॥ इति संचिंत्य शर्वाणी विनोदछद्म संयुता ॥ अमृता
तीरमासाद्य गणयानास चाखिलं ॥ गणितं गणितं देव्या न संहारमवाप्नुयात ॥ संहरन्नपि वै शर्वो शक्तो नस्याद्यदा नृप ॥
विश्वं तदा चिंतितवान् किमेतदिति नूननं ॥ संहारकारणः शक्तः सोहं तच्चाखिलं जगत् ॥मया संन्हियमाणं वै न संहारं व्रजेज्ज
गत् ॥ को भावः को विशेषोय न संहर्त्ता हि मत्परः ॥ न तद्विश्वं न सोहं वा चिंतयान्निति धूर्जटिः ॥ यदा सस्मार रुद्राणीं सा
पि नायाति संस्मृता ॥ तदातां स्वसरित्तीरसंश्रितां ज्ञातवान् हरः ॥ गणितं हि तया विश्वं शनया सस्थाणुजंगमं ॥ कालश्च ग
णितः पार्थ तावत्प्राप्तो महेश्वरः ॥ दृष्ट्वा तां परमां शक्तिं विश्वस्य गणने रतां ॥ अक्षसूत्रकरां देवीं यथा आप्ये समाहितां ॥ एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्थितां महाशक्तिं शर्वः प्रोवाच भारत ॥ रुद्रउवाच ॥ अजाप्ये जपरूपेण किं त्वं कर्तुमिहेच्छसि ॥ [1]किं ते शीलमिदं देवि चीरतं कपटं नुवा ॥ श्रीदेव्युवाच ॥ गणितं हि मया विश्वं यदि संहरसि प्रजाः ॥ मां विनापि क्षमोसि त्वं विश्वसंहरणे विभो ॥ देव उवाच ॥ गणितं हि त्वया विश्वं मया त्वं गणिता शुभे ॥ विश्वशक्तिरिहाद्या त्वं त्वां विना कथमीश्वरः ॥ प्रसीद प्रार्थयामि त्वां संहरामि त्वया सह ॥ सृजाम्यपि च विश्वेशि न हि किंचित्त्वया विना ॥ त्वया व्याप्तं जगत्सर्वं आब्रह्मस्थाणुजंगमं ॥ त्वया व्याप्तमिदं देवि सदसत्क्षरमक्षरं ॥ इत्युक्त्वा पूजयामास शिवस्तां गणिताह्वयां ॥ शक्तिं सनातनीं देवीं रेवातीरचरां परां ॥ मार्कंडेय उवाच ॥ ततः सापूजिता देवी प्रार्थिता चापि शंभुना ॥स्थापयित्वा निजां मूर्तिं तत्र तीर्थे युधिष्ठिर॥विश्वकर्मक्षमा देवी जगाम सह शंभुना ॥ तदा प्रभृति तत्तीर्थं विख्यातं गणिताह्वयं ॥ सर्वकामप्रदं पार्थ सर्वपापप्रणाशनं ॥ तत्र स्नात्वा च यो भक्त्या पूजयेद्गणितां नृप ॥ तस्यापमृत्युनाशः स्यात्सुखं स्यात्संपदः शुभाः ॥ शक्तिं नानोपचारैस्तां पूजयित्वा रविर्दिने ॥ भूताष्टमीषु वा भक्त्या दौर्भाग्यं नाशयेन्नरः ॥ नारी च नृपतिश्रेष्ठ सौभाग्यं संततिं लभेत् ॥ गौरिणीर्भोजयेत्तत्र ब्राह्मणांश्च कुमारिकाः ॥ श्राद्धं दत्तं विधानेन पितृणामक्षयं भवेत् ॥ दीपं चा खंडितं दत्वा न स शोच्यो भवेद्भुवि ॥ गौरीलोकमवाप्नोति यावदिंद्राश्चतुर्दश ॥ इति श्रीनर्मदायां गणितादेवीतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशद्वये पार्थ तीर्थं चैवामलेश्वरं ॥ तत्र चान्यत्प्रवक्ष्यामि देवस्य चरितं महत् ॥ श्रुतमात्रेण येनेह मुच्यते सर्वपातकैः ॥ अबालो बालरूपेण ग्रामयैर्बालकैः सह ॥ आमल्या क्रीडितः शंभुस्तत्ते वक्ष्यामि भारत ॥ सर्वैरामलिका क्षिप्त्वा ततो देवेन पांडव ॥ आनीता तत्क्षणादेव ततश्चिक्षेप चेश्वरः ॥ यावद्गत्वादिशो दिग्भ्य आगच्छंस्ते पृथक् पृथक्॥तावच्चामलकीस्थाने ह्यपश्यन्परमेश्वरं ॥ लिंगरूपं महेशानं सर्वदुःखविनाशनं॥त

१ मेवाम

तस्ते पूजयामासुर्नाम्ना चैवामलेश्वरं ॥ तदा प्रभृति देवेश अमलेश्वर उच्यते ॥ तेन पूजितमात्रेण प्राप्यते वांछितं फलं ॥ तृती
यमेतत्तत्कर्म देवदेवस्य भूपते ॥ आश्चर्यकारणं स्थानं आमलेश्वरमुत्तमं ॥ इति रेवायां आमलेश्वरतीर्थं ॥ श्रीमार्कंडेय उवाच ॥
चतुर्थं संप्रवक्ष्यामि देवस्य चरितं महत् ॥ श्रुतमात्रेण येनात्र मुच्यते पातकान्नरः ॥ कपाली कंथिको भूत्वा विचचार यथा महीं॥
योगिनीभिः परिवृत्तो भूतवैतालसंवृतः ॥ भैरवं रूपमास्थाय हाहाकारकरं महत् ॥ त्रस्तभीताभयं दत्वा चचार विपुलं तपः ॥ कं
थां मुक्त्वा तत्र तेन तत्र कंथेश्वरोभवत् ॥ लोकैर्निगदितो नाम्ना कंथास्थाने महेश्वरः ॥ तमभ्यर्च्य महाराज सुखसौभाग्य
वान् भवेत् ॥ इति कंथेश्वरतीर्थं ॥ २ ॥ मार्कंडेय उवाच ॥ तेनैव यत्र मुक्ताभूत् आषाढी भरतर्षभ ॥ तत्र लिंगं महत् दृष्ट्वा ज
नैर्विस्मयमागतैः ॥ आषाढीश्वरनाम्नेति कृतं तीर्थमनुत्तमं ॥ तत्र स्नात्वा च संपूज्य लभते वांछितं फलं ॥ यष्टिं
च योगपट्टं च दत्वा सिद्धिमवाप्नुयात् ॥ इत्याषाढीश्वरतीर्थं ॥ ३ यत्र मुक्ताभवच्छृंगी सुनादा सुमनोहरा ॥ तत्र
शृंगीश्वरं तीर्थं मोक्षदं सर्वदेहिनां ॥ मृतानां तत्र राजेंद्र नात्र कार्या विचारणा ॥ तत्र पिंड प्रदानेन पितृणा
मनृणो भवेत् ॥ तेन पूजित मात्रेण भवेद्वाणेश्वरी गतिः ॥ तन्मोक्षपरमं तीर्थं प्रवदंति मनीषिणः ॥ इति शृंगी
श्वरतीर्थं ॥ ४ ॥ देवमार्गे भ्रमन् देवः पुनस्तत्र यदृच्छया ॥ दिगंबरो ददर्शाथ वणिजं कमपि प्रभुः ॥ विक्रीणंतं च वल्लकान्दृष्ट्वा
प्राह विनोदतः ॥ यदि भद्र न चेत्कोपं करोषि त्वं ममोपरि ॥ वल्लकैर्भव सेचेत्वमिदं लिंगं सखे मम ॥ ततस्ते याचितं यावद्दा
स्मि बहु ते धनं ॥ एवमुक्तोथ देवेन स वणिग्लोभमोहितः ॥ योजयामास वल्लकान् लिंगे चोत्तममध्यमान् ॥ तावद्यावत्क्षयं सर्वा
न् गतान्बहुदिनार्जितान् ॥ तैर्द्धतवलयैः सर्वैरशोषैर्नैव पूरितं ॥ अर्द्धमापूरितं लिंगं दृष्ट्वा वै दुःखितो वणिक् ॥ स्थौल्येनावर्द्धय

२ कुब्जा

CC-0. In Public Domain. Digitization by eGangotri

ल्लिंगं स दवो लीलया नृप ॥ कृत्वा वलयखंडानि ननर्त्त किल शंकरः ॥ उवाच प्रहसन्वाक्यं दृष्ट्वा त गतसाहसं ॥ लज्जितं जनमध्ये वै व्यवसायधनोज्झितं ॥ देव उवाच ॥ नैव मे पूरितं लिंगं व्रजामि यदि मन्यसे ॥ ददामीह ततो वित्तं यदि लिंगं प्रपूर्यते ॥ वणिगुवाच ॥ अधन्योकृतपुण्योहं निग्राह्योहं तवेश्वर ॥ मया पूर्वं न विज्ञातो भवान् भवभयापहः ॥ तवैव विप्रियं कृत्वा शोचिष्ये शाश्वतीः समाः ॥ एतच्छ्रुत्वा वचः शर्वो वणिक्पुत्रस्य भारत ॥ असंख्येयधनं दत्वा तत्रैवांतरधीयत ॥ तत्रोत्थितं महल्लिंगं वल्लकेश्वरसंज्ञितं ॥ भूमिं भित्वा महाराज जनानां पश्यतां पुरः ॥ तदा प्रभृति ताल्लिंगंवल्लकैरिव पूरितं ॥ प्रत्ययार्थं स्थितं तत्र लोकानां हितकाम्यया ॥ देवस्य चरितं पार्थ क्रीडास्थानमनुत्तमं ॥ देवमार्ग इति ख्यातं त्रिषु लोकेषु शोभनं ॥ देवमार्गे तु यो गत्वा पूजयेद्वल्लकेश्वरं ॥ पंचायतनमासाद्य रुद्रलोकं स गच्छति ॥ देवस्य लीलाचरितं पंचस्थानेषु संस्थितं ॥ पश्यन्वा पूजयन्वापि सर्वपापैः प्रमुच्यते ॥ देवमार्गे मृतानां च नराणां भावितात्मनां ॥ न भवेत्पुनरावृत्तीरुद्रलोकात्कदाच न ॥ दिवमार्गस्य महात्म्यं भक्त्या श्रुत्वा च मानवः ॥ प्रमादजनितात्पापान्मुच्यते नात्र संशयः ॥ स्नानदानजपैः पार्थ श्राद्धैर्देवार्चनैरपि ॥ अर्घ्यर्कपुष्पदानेन तुष्यते परमेश्वरः ॥ पंचायतनसंस्थोयं कपाली पंचधा गतः ॥ पंचधा संश्रिते शर्वे देवमार्ग इति स्थितः ॥ इति श्रीरेवायां वल्लकेश्वरतीर्थं ॥ इति पंचवटीपंचतीर्थं ॥ श्रीमार्कंडेय उवाच ॥ तथैव भ्रमता तेन महेशेन युधिष्ठिर ॥ यत्रं मुक्तं कपालं च लीलया नर्मदातटे ॥ कपालेश्वरसंज्ञं वै तत्र लिंगं समुत्थितं ॥ समकाले जनानां च वागुवाचाशरीरिणी ॥ भिक्षापात्रं कपालं यन्मुक्तंशर्वेण वै जनाः ॥ तत्र लिंगात्मको जातो महेशो दुःखनाशनः ॥ कपालेश्वरसंज्ञोयं तीर्थे पूज्यः सदाजनाः ॥ इत्युक्त्वोपरता देवी लोकास्तं चाभ्यपूजयन् ॥ ततः

१ कलादरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभृति तत्तीर्थं कपालेश्वरसंज्ञितं ॥ यत्र तत्र स्थितो वापि कपालेशं स्मरन्नरः ॥ क्षुधासंपीड्यमानोपि भोज्यार्थी भोजनं लभेत् ॥
तत्र स्नात्वा नृपश्रेष्ठ कापालेश्वरपूजनात् ॥ रोगदुःखार्दितो वापि लभते सुखमुत्तमं ॥ पापानि विलयं यांति शिवलोके महीयते॥
पुष्पगंधादिकंदत्वा दीपं देवाय भारत॥नरःस्वभक्त्या प्रणमन्महत्वमभिगच्छति॥इति श्रीरेवायां कपालेश्वरतीर्थं॥श्रीमार्कंडेय उवाच॥
श्रुत्वा तद्देवचरितं नारदोक्तं युधिष्ठिर॥लीलाविलसितं शंभोर्द्रष्टुं यातेन वै मया॥मम नाम्ना कृतं तीर्थमाषाढीतीर्थसंनिधौ॥तीर्थयात्रा
प्रसंगेन मार्कंडेश्वरसंज्ञितं॥तत्र जाप्यार्चनस्नानदानैः पापक्षयो भवेत्॥स्मृत्वा प्रणम्यदेवेशं शिवलोके महीयते॥इति मार्कंडेश्वरतीर्थं॥
क्रोशद्वयांतरे राजन् आमलेश्वरतीर्थतः ॥ कंपिलेश्वरतीर्थं तु यायादुःखौघनाशनं ॥ स्थापितं कपिलेनैव पुरा पार्थ महार्षिणा ॥ रे
वांबुधिभवां यात्रां कर्तुंयातेन शोभनां ॥ स्थापितं परमं लिंगं स्वाख्यया नृपसत्तम ॥ तत्र तीर्थे नरो भक्त्या स्नायात्पार्थ कथं च
न ॥ कपिलेश्वरमभ्यर्च्य दीपं दत्वा यथाविधि ॥ स्वशक्त्या भोजयेद्विप्रान् कपिलां गां ततो ददेत् ॥ स पाप सप्तजन्मोत्थं नाशये
त्तत्क्षणान्नरः ॥ शैवं वा वैष्णवं वापि जपन्मंत्रं शिवाग्रतः ॥ नाशयेदुरितं सर्वं मोदते देवसंनिधौ ॥ तत्र प्राणान्परित्यज्य विधि
नोक्तेन भारत ॥ सप्तलोकादिलोकेषु रमते शाश्वतीः समाः ॥ इति श्रीरेवायां कपिलेश्वरतीर्थं नामद्विसप्तत्यधिकशततमोऽध्यायः
॥ १७२ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेन्महाराज एरंडीसंगमं परं ॥ अखिलेष्वपि लोकेषु विश्रुतं पापनाशं ॥ एरंडस्य मु
नेः पूर्वं शक्तिः पुत्रित्वमागता ॥ अपुत्रस्य तपस्तीर्थे तप्यतः किल भारत ॥ विवाहसमये पुत्री वरं नेच्छति कंचन ॥ प्रार्थिता नृ
पपुत्रैर्हि ऋषिपुत्रैश्चसर्वदा ॥ पितृभ्यां बोधिता नित्यं यदा न कुरुते वचः ॥ उक्ता सा परुषं पित्रा वैमनस्यमवाप्य च ॥ रेवातीरं
समासाद्य चचार विपुलं तपः ॥ ततः कतिपयाहोभिः समुद्रः कामरूपधृक् ॥ वरणार्थं यदायातस्तदा सा सिंधुतां गता ॥ विवेश

१ कोलिआद.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नर्मदां देवीं शैलमूर्तिस्थिता तटे ॥ एरंडीनामविख्याता एरंडस्य मुनेः सुता ॥ तदा प्रभृति तत्तीर्थं संगमे लोक विश्रुते ॥ तद्धि तीर्थं महापुण्यं सर्वपाप प्रणाशनं ॥ उपवासपरो भूत्वा ब्रह्मचर्यपरायणः ॥ तत्र स्नात्वा च संपूज्य मुच्यते ब्रह्महत्यया ॥ संगमे वै नरः स्नात्वा पितॄन्संतर्प्य भक्तितः ॥ श्राद्धं दत्वा विधानेन नरकादुद्धरेत्पितॄन् ॥ अक्षयान् लभते लोकान् पितृभिः सह भारत ॥ एरंडीं पूजयेन्मूर्त्तौ यः स सौभाग्यपुत्रवान् ॥ प्रेतत्वनाशनं पुण्यं धर्म्यमायुर्विवर्द्धनं ॥ एरंडीसंगमं तीर्थं पुर्वं प्राह पितामहः ॥ इति श्रीरेवायां एरंडीसंगमतीर्थं ॥ मार्कंडेय उवाच ॥ ततो दंडसहस्रांते रामतीर्थं व्रजेन्नृप ॥ पुखिलं नाम विख्यातं यत्र सिद्धोजनार्दनः ॥ युधिष्ठिर उवाच ॥ कथं सिद्धो मुनिश्रेष्ठ वासुदेवो जगद्गुरुः ॥मानुषं लोकमागम्य लोकानां हितकृद्विभुः॥एतत्सर्वं यथा ज्ञेयं देवदेवस्य चक्रिणः ॥ चरितं श्रोतुमिच्छामि कथयस्व प्रसादतः ॥ मार्कंडेय उवाच ॥ असीत्पूर्वं महाराजा हैहयाधिपतिर्महान् ॥ कार्तवीर्यइति ख्यातो राजा बाहुसहस्रधृक् ॥ हस्त्यश्वरथसंपन्नः सर्वशास्त्रभृतां वरः ॥ माहिष्मतीपतिः श्रीमान् सर्वभूतभयावहः ॥ स कदाचिन्मृगान्हंतुं निर्ययौ नर्मदातटे ॥ बहुभिर्दिवसैः प्राप्तश्चाश्रमं पुण्यसंयुतं ॥ जमदग्निर्महातेजा यत्र तिष्ठति तापसः ॥ रेणुकासहितः श्रीमान् सर्वभूताभयप्रदः ॥ यस्य पुत्रो भवद्रामः साक्षान्नारायणो विभुः ॥ सर्वैः क्षत्रगुणैर्युक्तो ब्रह्मविद्ब्राह्मणोत्तमः॥ तोषयन्परया भक्त्या पितरौ परमार्थवित् ॥ कार्तवीर्यं ततो दृष्ट्वा जमदग्निर्मुनीश्वरः ॥ चरंतं मृगयां गत्वा आतिथ्येन निमंत्रयत् ॥ तथेति चोक्त्वाथ नृपः सभृत्य बलवाहनः ॥ सजगामाश्रमं पुण्यं ऋषेस्तस्य महात्मनः ॥ तत्क्षणादेव संपन्नं श्रिया परमयावृतं ॥ हर्म्यप्रासादसंबाधं शयनाशनभोजनैः ॥ सभावातायनैर्युक्तं मत्तवारुणशोभितं॥ स्वर्णराजतताम्रैश्च भांडभाजनकैर्वृतं दृष्ट्वा चैवाद्भुतं राजा विस्मयं परमं ययौ ॥ गलमात्रः सुसिद्धेन परमान्नेन भोजितः ॥ सभृत्यबलवान्राजा ब्राह्मणेन यदृच्छया ॥ यो यदिच्छति यावच्च तत्तेनाप्तं सुपुष्कलं ॥ किमेतदिति संचिंत्य राजा विस्मयमागत ः ॥ कामधेनोः प्रभावं तं ज्ञात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्राह ततो द्विजं ॥ राजाउवाच ॥ प्रसादं कुरु मे विप्र देहि मा धेनुमुत्तमां ॥ गवां शतसहस्रेण प्रयुतेनार्बुदेनच ॥ जमदग्नि रुवाच ॥ सहस्रकोटिलक्षेण प्रयुतेनार्बुदेन च ॥ कामधेनुरियं राजन् न दातव्या कदा च न॥ मार्कंडेय उवाच ॥ एवमुक्तः स नृपतिस्तेन विप्रेण धीमता ॥ क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥ सहस्रार्जुन उवाच॥ यदीदृशः कामकारो मयि ते विप्रपांसन ॥ तदहं पश्यतस्तेद्य नयिष्ये सुरभीं बलात् ॥ द्विजाधर्मं तिरस्कृत्य धेनुरेषा विगृह्यतां ॥ ऋषिरुउवाच ॥ कः क्रीडति सरोषेण कालसर्पेण निर्भयः ॥ मृत्युदंष्ट्रांतरगतो मम धेनुं नयेत यः ॥आज्ञानाज्ज्ञानतो वापि यः कुर्याद्वन्हिचुंबनं॥को लिहेज्जिव्हया खड्गं मम धेनुं नयेतयः ॥ एवमुक्त्वा महादंडं कालदंडमिवापरं ॥ गृहीत्वा परमक्रुद्धोजमदग्निरुवाच ह ॥ यस्यास्ति शक्तिस्तेजो वा क्षत्रियस्य कुलाधम ॥ इमां स धेनुं गृण्हातु क्षीणायुः सपरिछदः ॥ मार्कंडेय उवाच ॥ एवं धृत्वा वचः क्रूरं हैहयः सुभटैर्वृतः ॥ प्रधावते च वै योधा ब्रह्मदंडहता भुवि ॥ हुंकारेण ततो धेनोः पेतुः पार्थिव सत्तम ॥ धूयमानात्तया दहाद्धेन्वा जाताः सहस्रशः ॥ मुखनासाक्षिरोमभ्यो गुदयोनिश्रुतिद्वयात् ॥ नानाजातिसमाचारा नानासंज्ञा युधिष्ठिर ॥ अंगांतरेषु चोत्पन्नाः शतशोथ सहस्रशः ॥ अन्योन्यं ते समाहत्य हैहया धेनुजैः सह ॥ महारोषसमाविष्टा विनाशं जग्मुरंजसा ॥ जमदग्निं ततो हत्वा बाणैर्विध्वाच रेणुकां ॥ कामधेनुमनासाद्य गतो निजपुरीं नृपः ॥ कार्तवीर्यो जयं लब्ध्वा हत्वा चैव ऋषिं तदा ॥ प्रविवेश पुरीं हृष्टः कृतांतबलमोहितः ॥ ततो ज्ञात्वा निमित्तैः स त्वरन्रामः समागतः ॥ प्रेदृश्यदेवमीशानं गुरुं विश्वगुरुं बली ॥ ददर्शापितरौ तत्र क्रंदमानां च मातरं॥परं विषादमगमत्क्रोधं च पुरतः स्थितः॥राम उवाच॥केन मंदात्मना मातरज्ञानात्साहसंस्कृतं॥मृत्युनावेक्षितस्तेन मम ज्ञातं जिघांसता ॥ ततः सा रामवाक्येन गतसत्वेन रेणुका ॥ घातयंती तदात्मानं रामं पुत्रमुवाच ह॥रेणुका उवाच ॥

१ अपृछचः

CC-0. In Public Domain. Digitization by eGangotri

हैहयेन नृशंसेन सहस्रभुजशालिना ॥ इहागत्य पिता तेद्य निहतः क्षत्रियैः सह ॥ तस्यैतदुष्कृतं पश्य पापबुद्धेः सुपुत्रक ॥ त
मद्य निहत तातं ज्वलिते जातवेदसि ॥ संस्कृत्य विधिना पुत्र ततस्तर्पयतांबुना ॥ मार्कंडेय उवाच ॥ जनन्या वचनं श्रुत्वा
रामस्तामभिवाद्य च ॥ प्रतिज्ञामकरोद्घोरां तां शृणुष्व नराधिप ॥ रामउवाच ॥ निःक्षत्रियां महिं कृत्वा तेषां रक्तेन तर्पणं ॥
पितुस्ततः करिष्यामि कुरुक्षेत्रे न संशयः ॥ कार्तवीर्यस्य पापस्य छित्वा बाहुवनं रणे ॥ बलात्परशुना मातः पास्यामि रुधिरं त
तः॥ इति प्रतिज्ञाय तदा संस्कृत्य पितरं ततः ॥ माहिष्मतीं पुरीं रामो जगाम क्रोधमूर्छितः ॥छित्वा बाहुवनं तस्य हत्वा तं क्ष
त्रियाधमं ॥ सपुत्रभृत्यं नृपते न शांतिं चालभत्पुनः ॥ ततः स क्षत्रियांताय पृथिवीमवलोकयन् ॥ सप्तद्वीपार्णवयुतां सशैलवन
काननां॥ पूर्वतः पश्चिमाशांतं दक्षिणोत्तरतः कुरून् ॥ क्षत्रियान्बहुशो हत्वा रक्तं संचितवान्बहु ॥सामंतपंचके पंच चकार रुधिरन्ह
दान् ॥ त्रिः सप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियांबली ॥ स तेषु रुधिरांभस्तु न्हदेषु क्रोधमूर्छितः ॥ पितॄन्संतर्पयामास रुधिरेणेति
नःश्रुतं ॥ अथर्चीकादयो भ्येत्य पितरो ब्राह्मणर्षभं ॥ तं क्षमस्वेति निषिधुः सुतः स विररामह ॥ तेषां समीपे यो देशो न्हदानां
रुधिरांभसा ॥ सामंतपचकं तीर्थं पुण्यं तत्परिकीर्त्तितं ॥ निवृत्य कर्मणस्तस्मात्पितॄन्प्रोवाच भार्गवः ॥ रामः परमधर्मात्मा यदि
दं रुधिरं मया ॥ क्षिप्तं पंचसु तीर्थेषु तत्तीर्थं स्यादनुत्तमं ॥ मार्कंडेय उवाच॥ तथेत्युक्त्वा तु ते सर्वे पितरोंतर्हिता भवन्॥एतद्राम
स्य वचनं देववर्गेप्रतिष्ठितं ॥ शिवस्याराधनयादौस तीर्थं नार्मदं ययौ ॥ अध्येतुं स धनुर्विद्यां गुरुमीश्वरमाप्तवान् ॥ नैष्ठिको ब्रह्म
चारी तु तस्थौ वर्षशतत्रय ॥ ततः प्रभृति विख्यातं रामतीर्थमनुत्तमं ॥ पुंखितो यत्र बाणैर्वै विद्यारंभे महेश्वरात् ॥
पुंखिल तेन तत्तीर्थं उक्तंराजन्मनीषिभिः ॥ सर्वपापक्षयकरं दर्शनात्स्पर्शनान्नृणां ॥ तत्र तीर्थे नरः स्नात्वा सर्वशक्तियुतो भवेत् ॥

१ कुरुक्षेत्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्यंति पितरस्तस्य तर्पणश्राद्धदानतः ॥ इति श्रीरेवामाहात्म्ये पुखिलंरामतीर्थनाम त्रिसप्त्यधिकशततमोध्यायः ॥ १७३ ॥ मा
र्कंडेय उवाच ॥ क्रोशार्द्धमात्रे तत्रैव जमदग्निश्च रेणुका ॥ प्राप्तौ पुत्रहिते युक्तौ स्नेहाद्भरतसत्तम ॥ पुत्रं पुरा तपस्यंतं ज्ञात्वा रा
मं शिवार्थिनं ॥ समीपस्थावुभौ तत्र तपस्तप्तुमुपाश्रितौ ॥ तत्राश्रमवरो ह्याभ्यां रेवासागरसंगमे ॥ तत्र स्नानं तथा श्राद्धं ब्राह्म
णानां च भोजनं ॥ कुर्याद्यो भरतश्रेष्ठ स मुच्येपापकंचुकात् ॥ रेणुकासहितं वृद्धं जमदग्निं प्रपूजयेत् ॥ सप्तर्षिसंनिधौ लोके स
वसेत्कल्पमक्षयं ॥ इति जमदग्नितीर्थं ॥ मार्कंडेय उवाच ॥ तत्रैव परमं तीर्थं रेवासागरसंगमं ॥ सुरर्षयोयदिच्छंति दिविस्था ध
र्मनंदन ॥ तत्र स्नात्वा विधानेन मुच्यंते पातकैर्नराः ॥ कुशाग्रेणापि कौंतेय न स्प्रष्टव्यो महोदधिः ॥ तीर्थयात्रानिमित्तं हि स्नात
व्यं नृपसत्तम ॥ मंत्रः॥नमस्ते विष्णुरूपाय नमो विष्णोरपांपते ॥ सान्निध्यं कुरु देवेश सागरे लवणांभसि ॥ आवाहनमंत्रः ॥ अ
नश्वतेजो हि भवस्य देहोरेतो हि विष्णोरमृतस्यनाभिः ॥ एतद्ब्रुवन् पांडव श्रौतवाक्यं ततोवगाहेत पतिं नदीनां ॥ सर्वरत्नप्रधा
नस्त्वं सर्वरत्नाकराकरः ॥ सर्वामरप्रधानत्वाद्गृहाणार्घमपांपते॥इत्यर्घमंत्रः॥पंचरत्नसमायुक्तफलपुष्पाक्षतैर्युतं ॥ मंत्रेणानेन राजेंद्र
दद्यादर्घं महोदधेः ॥वाङ्मनःकायजनितात्पापान्मां लवणोदधे ॥ पाह्यर्चितो रत्ननिधेपर्वतः पार्वणोत्तम ॥को परः सागराद्देवात्स्वर्ग
द्वारविघादनः ॥ तत्र देवाःसगंधर्वा ऋषयः सिद्धचारणाः ॥ जमदग्निं हि सेवंते विरूपाक्षमयं शुभं ॥ रेणुकां चैव ये देवीं पश्यं
ति भुवि मानवाः ॥ भोगाढ्यास्ते शिवे लोके वसंति कालमीप्सितं ॥ तत्र स्नात्वा नरो राजन्तर्पयेत्पितृदेवताः ॥
तारयेन्नरकाद्धीरात कुलानां शतमुत्तमं ॥ पापक्षयकरं तीर्थं दर्शनादेव भारत ॥ रेणुकाप्रत्ययार्थं हिअन्येपि पितृदेवताः ॥ जले वि
यति वा भूप दृश्यंते पापहारिणः ॥ तत्र तीर्थे तु राजेंद्र नर्मदोदधिसंगमे ॥ स्नानं कृत्वा विधानेन कथं शोचेत्कृताकृते ॥ एवं
सागरपर्यंतं महातीर्थमनुत्तमं ॥ जामदग्न्येन रामेण तत्र देवः प्रतिष्ठितः ॥ तत्रैव देवगंधर्वा ऋषयः सिद्धचारणाः ॥ सेवयंति विरू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाक्षं जामदग्न्याश्रमे नृप ॥ रेणुकां चैव यो देवीं तत्र पश्यति मानवः ॥ शिवलोके वसेत्सोपि यावदाहूतसंप्लवं ॥ जामदग्न्याश्र
मं दृष्ट्वा जमदग्नेश्च भारत ॥ स्नात्वा संतर्प्य संपूज्य मुच्यते सर्वपातकैः ॥ तारयेन्नरकाद्घोरापितॄनेकोत्तरं शतं ॥ इति श्रीनर्मपायां
जमदग्नितीर्थे रेवासागरसंगमे स्नानविधिः ॥ मार्कंडेय उवाच ॥ अतः परं प्रवक्ष्यामि लुंठनेश्वरमुत्तमं ॥ संगमे नर्मदायास्तु स
र्वपापक्षयंकरं ॥ तत्र गोत्रे कुले जातं मातृके पितृकेथवा ॥ सप्तजन्मार्जितं नश्येत्पातकं चोपपातकं ॥ संसर्गजनितं वापि महापा
पमथापि वा ॥ तत्क्षणादेव राजेंद्र देवदेवस्य दर्शनात् ॥ युधिष्ठिर उवाच ॥ आश्चर्यभूतं लोकेषु नर्मदाचरितं महत् ॥ त्वया वै
कथितं विप्र सकलं पापनाशनं ॥ यदेकं परमं तीर्थं सर्वतीर्थफलप्रदं ॥ तदहं श्रोतुमिच्छामि कथयस्व प्रसादतः ॥ यत् श्रुत्वा स
र्वपापानि विधूय सहबांधवैः ॥ गच्छामि परमं स्थानं त्वत्प्रसादाद्द्विजोत्तम ॥ मार्कंडेय उवाच ॥ साधु साधु महाप्राज्ञ यस्य ते
मतिरीदृशी॥तत्नोर्थं कथयिष्यामि सर्वतीर्थफलप्रदं ॥ नर्मदा सरितां श्रेष्ठा सर्वतीर्थमयि शुभा ॥ विशेषः कथितस्तस्या रेवासागर
संगमे ॥ समुद्रे नर्मदा यत्र प्रविष्टा सा महानदी ॥ तत्रैव लिंगं शर्वस्य स्वयमेवोद्गतं महत् ॥ लिंगोद्भूता महाभागा नर्मदासरि
तां वरा ॥ लयं गता तथा लिंगे तेन लिंगमयी स्मृता ॥ नर्मदायां वसन्नित्यं नर्मदांबु सदा पिबन् ॥ दीक्षितः
सर्वयज्ञेषु सोमपानं दिनेदिने ॥ प्रसन्ना यस्य रेवेयं पावनी पुरभिद्भवा ॥ दुर्लभं त्रिषु लोकेषु तस्य वै नास्ति किंचन ॥
धर्मं चार्थं च कामं च मोक्षं च भरतर्षभ ॥ स लभेत्सर्वकालेषु यो रेवां वेत्ति सेवितुं ॥ पुरा कल्पे महाराज सुमहोर्मितरंगिणी
॥फेनहास्योज्वलां देवीं गभीरध्वनिनादितां ॥ हंसचक्रकलालापांसरितं प्रमदामिव ॥ आगच्छंतीं नृपश्रेष्ठ दृष्ट्वा रेवां महोदधिः ॥ के
यं कुतः समायातीत्यतिचिंताकुलोभवत् ॥ ज्ञात्वा स तावतो रेवां शर्वलिंगोद्भवां परां ॥ लुठन्वै संमुखस्तात गतो रेवां महोदधिः
॥ प्रणिपत्य पुनः प्रेम्णा संगतो रेवया सह ॥ समुद्रे नर्मदा यत्र प्रविष्टा सा यदा नृप ॥ तत्र देवाधिदेवस्य तदा लिंगं समुत्थितं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लयं गता तत्र लिंगे तेन पुण्यतमा हि सा ॥ लुंठनाद्वै जलनिधेर्यत्र लिंगसमुद्भवः ॥ लुंठनेश्वरसंज्ञो वै तत्र तीर्थे शिवोभवत् ॥ संगमे तत्र यो गत्वा लुंठनेश्वरमर्चयेत् ॥ सोश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ वाचिकं मानसं पापं कर्मणा यत्पुराकृतं ॥ लुंठनेश्वरमासाद्य विलयं याति तन्नृप ॥ कार्तिक्यां तु विशेषो वै कथितः शंकरेण हि ॥ तं शृणुष्व नृपश्रेष्ठ सर्वपापापनोदनं ॥ संप्राप्तां कार्तिकीं दृष्ट्वा गत्वा तत्र समाहितः ॥ चतुर्दश्यामुपोष्यैव स्नात्वा वै नर्मदाजले ॥ संतर्प्य पितॄन्देवांश्च श्राद्धं कृत्वा यथा विधि ॥ रात्रौ जागरणं कुर्याल्लुंठनेश्वरमर्चयन् ॥ सफलं जीवितं तस्य सफलं तस्य चेष्टितं॥ ततः प्रभाते विमले दृष्ट्वा नत्वा महोदधिं॥आमंत्र्य स्नानविधिना स्नानं तत्रैव कारयेत्॥ॐनमोविष्णुरूपाय नमो विष्णोरपांपते॥सांनिध्यं कुरु देवेश सागरे लवणांभसि॥आवाहनमंत्रः॥अग्निश्च तेजो हि मृडस्य देहो[1] रेतोधाविष्णुरमृतस्यनाभिः॥ब्रुवन्नेवं पांडवश्रौतवाक्यं ततोवगाहेत पतिं नदीनां॥ आजन्मसप्तकं पार्थ यत्पापं कुरुते नरः सकृत्स्नात्वा व्यपोहेत सागरे लवणांभसि ॥ पंगवस्ते न संदेहो जन्म तेषां निरर्थकं ॥ एकाग्रहृदयैर्यैस्तु न दृष्टो लुंठनेश्वरः ॥ पिशाचत्वं वियोनित्वं न भवेत्तस्य देहिनः ॥ संगमे तत्र यो गत्वा स्नात्वा संपूजयेच्छिवं ॥स्नायादुक्तविधानेन नान्यथा कुरुसत्तम कुशाग्रेणापि पुष्पैर्वा न स्पृष्टयो महोदधिः॥दत्वार्घं तु ततः स्नायान्मंत्रेणानेन पांडव॥सर्वरत्न प्रधानस्त्वं सर्वरत्नाकराकरः॥सर्वामरप्रधानस्त्वं गृहाणार्घं महोदधे॥अर्घमंत्रः॥पितॄन्देवान्मनुष्यांश्च संतर्पयेद्यथाविधि ॥ संपूज्य ब्राह्मणान् श्रेष्ठान् संतोष्य पुरतः स्थितः ॥ यदुष्कृतं पश्चात्तेभ्यः स्वं विनिवेदयेत्॥बाल्यात्प्रभृति यच्चैव कृतमाजन्मतो शुभ ॥ निवेदयामि विप्रेभ्यो भक्तिः प्रह्वपुरस्थितः ॥ त्रिधा कृतं पंचधा च सुकृतं यद्विधाकृतं ॥ तदक्षयं च संपूर्णमस्तु मे परमेश्वराः ॥ नर्मदोदधिशर्वांबु ब्राह्मणानां प्रसादतः ॥ तथैव दुष्कृतं यन्मे तत्क्षयं यातु चाखिलं ॥ तीर्थे देवद्विजाग्र्याणां प्रासादात्तीर्थसेवनं

१ देहो हीतिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ नर्मदायाः कृता यात्रा संपूर्णा चास्तु सत्तमाः ॥ विधिमंत्रक्रियाहीनं देशकालादिवर्जितं ॥ विप्रैः संपादितं यस्य संपन्नं तस्य त
त्फलं ॥ इत्युक्त्वा संलुठेत्पश्चात्तत्पुरोंबुधिसन्मुखं ॥अनुमान्य च तान्पूज्य पश्चात्स्नानं समाचरेत् ॥ पूर्वं स्नात्वाथवा पार्थ ततस्ता
ननुमान्य च ॥ श्राद्धे कृते च विधिवत्पितृणामनृणो भवेत् ॥ दद्याद्दानानि सर्वाणि यथाशक्त्या युधिष्ठिर ॥ एवं कृते नृपश्रेष्ठ सर्व
पापक्षयो भवेत् ॥ जिज्ञासार्थं च यस्तत्र ह्यात्मानं ज्ञातुमिच्छति ॥ शुभाशुभविधाने वै तस्य निष्ठामिमां शृणु ॥ स्नात्वा तत्र म
हातीर्थे लुंठमानो व्रजेन्नरः ॥ पापकर्माऽन्यतो याति धर्मकर्मा व्रजेन्नदीं॥ पापकर्मा ततः स्थाप्य स्वपापं पूर्ववर्जितं ॥ स्नात्वा ती
र्थवरे तस्मिन् दानं दत्वा यथाविधि ॥ एवं पापमपोह्याथ अवक्रगमनं व्रजेत॥ मुच्यते पापसंघातादेवमाह महेश्वरः॥तस्मात्सर्वप्रय
त्नेन ज्ञात्वैवं नृपसत्तम ॥ स्नातव्यं मानवैस्तत्र यत्र संनिहितो हरः ॥ एवं स्नात्वा विधानेन ब्राह्मणान् शास्त्रसंमतान् ॥ तोषये
द्विविधैर्दानैर्भोजनैर्भरतर्षभ ॥ सुवर्णं रजतं वस्त्रं मणिमौक्तिकभूषणं ॥ गोवृषं महिषींधान्यं दत्तं तत्राक्षयं भवेत् ॥ शुभं वाप्यशु
भवापि नात्र कार्या विचारणा ॥ दृष्ट्वा कामदुघां प्राप्तां हरस्य वृषभः पुरा ॥ लिंगे तत्रैव दिङ्मुढोदक्षिणं स्वखुरं ददौ ॥गोखुरालंकृ
तं तत्र लिंगं गर्तेन चिन्हितं ॥ तदा प्रभृति राजेंद्र शिवस्यातिमनोहरं ॥ नर्मदा लुंकिता तत्र लिंगे पूर्वं युधिष्ठिर ॥ तस्माल्लुंकेश्व
रं नाम्ना ख्यातं चैवापराङ्मुखं ॥ वृषखातं सरस्तत्र तस्मिन्स्नात्वा न सीदति ॥ तर्पयेच्च पितॄंस्तत्र भक्त्या वै श्राद्धमाचरेत् ॥ त
त्र तीर्थे तु यः कश्चित्प्राणत्यागं युधिष्ठिर ॥ भक्त्या करोति विधिवत्तस्य पुण्यफलं शृणु ॥ षष्टिवर्षसहस्राणि कोटिवर्षशतानि च॥
विमानवरमारूढः शिवलोके महीयते ॥ वेदवेदांगविद्विप्रो जायते वै ततो भुवि ॥ पुत्रपौत्रसमृद्धोसौ धनधान्यसमन्वितः ॥ सर्व
व्याधिविनिर्मुक्तो जीवेच्च शरदां शतं ॥ यद्वै द्वादशयात्राभिः सोमनाथेभिपूजिते ॥ प्रभासे भरतश्रेष्ठ फलं तदिह वै सकृत् ॥ कार्ति
क्यां कृत्तिकायोगे प्राप्यते लुंठनेश्वरे ॥ गयागंगाकुरुक्षेत्रनैमिषेषु च पुष्करे ॥ तत्पुण्यं लभते पार्थ लुंठनेश्वरदर्शनात्॥नर्मदा सर्वती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 र्थेभ्यः स्नानदाने च यत्फलं ॥ तत्फलं समवाप्नोति रेवासागरसंगमे ॥ यः शृणोति नरो भक्त्या पठ्यमानमिदं शुभं ॥ सर्वपापवि
निर्मुक्तो रुद्रलोके स गच्छति ॥ इति श्रीरेवामाहात्म्ये वायुप्रोक्तरुद्रसंहितायां रेवासागरसंगमे उत्तरे श्रीलुंठनेश्वरतीर्थनामचतुस्सप्त
त्यधिकशततमोऽध्यायः ॥ १७४ ॥ श्रीमार्कंडेय उवाच ॥ ततो गच्छेत राजेंद्र रेवाया दक्षिणे तटे॥क्रोशद्वयांतरे तीर्थं मातृतीर्था
दनुत्तमं ॥ नाम्ना हंसेश्वरं पुण्यं वैमनस्यविनाशनं ॥ कश्यपस्य कुले जातो हंसो दाक्षायिणीसुतः ॥ ब्रह्मणो वाहनं जातः पुरा त
प्त्वा तपो महत् ॥ सैकदा विधिनिर्देशं विना वैयग्र्यमास्थितः ॥ अभिभूतः शिवगणैः प्रननाश युधिष्ठिर ॥ दक्षयज्ञप्रमथने कांदि
शीको विधिंविना ॥ ब्रह्मणा संस्मृतोप्याशु नायाति स यदा खगः ॥ तदा तं शप्तवान् ब्रह्मा पातयामास वै पदात् ॥ ततः स श
प्तमात्मानं मत्वा हंसस्त्वरान्वितः ॥ पितामहमुपागम्य प्रणिपत्येदमब्रवीत् ॥ हंस उवाच ॥ तिर्यग्योनिसमुत्पन्नं भवान् शप्तुं न
चार्हति ॥ स्वभाव एव तिर्यक्षु विवेकविकलं मनः ॥ तथापि देव पापोस्मि यदहं स्वामिनं त्यजेत् ॥ किं तु धावद्भिरत्युग्रैर्गणैः
शार्वैः पितामह ॥ सहसाहं भयाक्रांतस्त्रस्तस्त्यक्त्वा पलायितः ॥ अद्यापि भयमेवाहं पश्यन्नास्मिविभो पुरः ॥ तेन स्मृतोपि भवता
नाव्रजन् भवदंतिके ॥ मार्कंडेय उवाच ॥ इति ब्रुवन्नेवहि धातुरग्रे हंसः श्वसत्पक्षिपूज्यः सुदीनः ॥ तिर्यंचं मां पापिनं मृढबु
द्धिं प्रभो पुरः पतितं पाहि पाहि ॥ एको देवस्त्वं हि सर्गस्य कर्ता नानाविधं सृष्टमेतत्त्वयैव अहं सृष्टस्त्वीदृशीयत्त्वया वै सोयं दो
षो धातरद्धा तवैव॥ शापस्यवानुग्रहस्यापि शक्तस्त्वत्तोनान्यं शरणं कं व्रजामि॥ सेवाधर्माद्विच्युतं दासभूतं च पेटैर्हं तव्यं तात मां
त्राहि भक्तं॥विद्याविद्ये त्वत्त एवाविरास्तां धर्माधर्मौ सदसद्युर्निशे च॥नानाभावो जगतस्त्वं विधात्सेतंत्वामेकं शरणं वै प्रपद्ये॥एको
सि बहुरूपोसि नानाचित्रैककर्मतः॥निष्कर्माखिलकर्मासि त्वमतः शरणं व्रजेनमो नमो वरेण्याय वरदाय नमो नमः॥नमो धात्रे वि
धात्रे च शरण्याय नमो नमः॥शिक्षाक्षरवियुक्तेयं वाणी मेस्तौति किं विभो॥का शक्तिः किं परिज्ञानं इदमुक्तं क्षमस्व मे ॥ मार्कंडेय उवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपसा शोधयात्मानं यथा शापांतमाप्नुयात् ॥ रे
च॥एवं वदतिहंसे वै ब्रह्मा प्राह प्रसन्नधीः॥शिक्षा दत्ता तवैवेयं माविषादं कृथाखग॥तपसा शोधयात्मानं यथा शापांतमाप्नुयात् ॥रे
वासेवां कुरु स्नात्वा स्थापयित्वा महेश्वरं॥अचिरेणैव कालेन ततः संस्थान मास्यसि॥यच्चेष्ट्वा बहुभिर्यज्ञैः समाप्तवरदक्षिणैः॥गोस्वर्ण
कोटिदानैश्चतत्फलं स्थापिते शिवे ॥ ब्रह्मघ्नो वा सुरापो वा स्वर्णहृद्गुरुतल्पगः ॥ रेवातीरे शिवं स्थाप्य मुच्यते सर्वपातकैः ॥ त
स्मान्नर्मसरित्तीरे स्थापयित्वा त्रियंबकं ॥ वियुक्तः सर्वदोषैस्त्वं यास्यते पदमुत्तमं ॥ एवमुक्तः स विधिना हृष्टतुष्टः खगोत्तमः ॥ तथे
त्युक्त्वा जगामाशु नर्मदातीरमुत्तमं ॥ तपस्तप्त्वा कियत्कालं स्थापयामास शंकरं ॥ स्वनाम्ना भरतश्रेष्ठ हंसेश्वरमनुत्तमं ॥पूजयित्वा
परं स्थानं प्राप्तवान् खगसत्तमः ॥ तत्र हंसेश्वरे तीर्थे गत्वा स्नात्वा युधिष्ठिर ॥ पूजयेत्परमेशानं स पापैः परिमुच्यते ॥ स्तुवन्नेकम
ना देवं न दैन्यं प्राप्नुयात्क्वचित् ॥ श्राद्धं दीपप्रदानं च ब्राह्मणानां च भोजनं ॥ दत्वा शक्त्या नृपश्रेष्ठ स्वर्गलोके महीयते ॥ त्रि
कालमेककालं वा यो भक्त्या पूजयेच्छिवं ॥ नवप्रसूतां धेनुं च दत्वा पार्थ द्विजोत्तमे ॥ षष्टिवर्षसहस्राणि शिवलोके महीयते ॥
इति श्रीरेवामा०हंसेश्वरतीर्थं ॥मार्कंडेय उ०॥ततः क्रोशांतरे गच्छेत्तिलादं तीर्थमुत्तमं॥तिलप्राशनकृद्यत्र जाबालिः शुद्धिमाप्तवान् ॥
पितृमातृपरित्यागी भ्रातुर्भार्याभिलाषकृत् ॥ पुत्रविक्रयकृत्पापः छलकृद्गुरुणासह ॥ एवं दोषसमाविष्टो यत्र यत्रापि गच्छति॥तत्र त
त्रापि धिक्कारं लभते सत्सुभारत ॥ न कोपि संगतिं धत्ते तेन सार्द्धं सभास्वपि ॥ इति लज्जान्वितो विप्रः काले
न महता नृप ॥ चिंतामवाप महतीमगतिज्ञो हि पावने ॥ चकार सर्वतीर्थानि रेवां चाप्यवगाहयत ॥ अणिवापांत
मासाद्य दाक्षिणे नर्मदातटे ॥ तस्थौ यत्र व्रतिः पार्थ जाबालिः प्राशयन् तिलान् ॥ तिलैरेकाशनं कुर्वंस्तथैवे कांतरा
शनं ॥ त्र्यहषट्द्वादशाहाशी पक्षमासाशनस्तथा ॥ कृच्छ्रचांद्रायणादीनी व्रतानि च तिलैरपि ॥ तिलादत्वमनुप्राप्तो ह्यद्दासप्त

१ तेलीद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिं क्रमात् ॥ कालेन गच्छता तस्य प्रसन्नोऽभवदीश्वरः ॥ प्रादादिहामुत्रिकीं तु शुद्धिं सालोक्यमात्मकं ॥ तेन संस्थापि
तो देवः स्वनाम्ना भारतर्षभ च तिलादेश्वर संज्ञां ॥ प्राप लोकादपि प्रभुः ॥ तदा प्रभृति विख्यातं तीर्थं पापप्रणाशनं ॥ तत्र ती
र्थे नरः स्नात्वा चतुर्दश्यष्टमीषु च ॥ उपवासपरः पार्थ तथैव हरिवासरे ॥ तिलहोमी तीलोद्वर्तीतिलस्नायी तिलोदकी ॥ तिलदा
ता च भोक्ता च नानापापैः प्रमुच्यते ॥ तिलैरापूरयेल्लिंगं तिलतैलेन दीपदः ॥ रुद्रलोकमवाप्नोति पुनात्यासप्तमं कुलं ॥ तिलपिं
डप्रदानेन श्राद्धे नृपतिसत्तम॥विकर्मस्थापि गच्छंति गतिमिष्टां हि पूर्वजाः॥स्वर्गलोकस्थिता श्राद्धैर्ब्राह्मणानां च भोजनैः ॥ अक्षयां
तृप्तिमासद्य मोदंते शास्वतीः समाः॥पितुः कुलं मातृकुलं तथा भार्याकुलं नृप॥कुलत्रयं समुधृत्य स्वर्गं नयति वै नरः॥इति श्रीरे
वायां तिलादेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ वासवं तीर्थमुत्तमं ॥ वसुभिः स्थापितं तत्र स्थित्वा वै द्वादशाब्द
कं ॥ धरो ध्रुवश्च सोमश्च आपश्चैवानिलोनलः ॥ प्रत्यूषश्च प्रभासश्च वसवोष्टाविमे पुरा ॥ पितृशापपरिः खिन्ना गर्भवासाय भारत
॥ नार्मदं तीर्थमासाद्य तपश्चक्रुर्यतेंद्रियाः ॥ आराधयंतः परमं भवानीपतिमव्ययं ॥ द्वादशाब्दानि राजेंद्र ततस्तुष्टो महेश्वरः ॥
प्रत्यक्षः प्रददौ तेभ्यस्त्वभीष्टं वरमुत्तमं ॥ ततः स्वनाम्ना संस्थाप्य वसवस्तं महेश्वरं ॥ जग्मुराकाशमाविश्य प्रसन्ने स्नाति शंकरे
॥ ततः प्रभृति विख्यातं तीर्थं तद्वासवाह्वयं ॥ तस्मिंस्तीर्थे महाराज यो भक्त्या पूजयेच्छिवं ॥ यथालब्धोपहारैश्च दीपं दद्यात्प्रय
त्नतः ॥ शुक्लपक्षे तदाष्टम्यां प्रत्यहं वापि शक्तितः ॥ अष्टौ वर्षसहस्राणि स वसेच्छिवसंनिधौ॥ ततः शिवालयं याति गर्भवासं न
पश्यति ॥ पुष्पैर्वा पल्लवैर्वापि फलैर्धान्यैस्तथापि वा ॥ पूजयेद्देवमीशानं स दैन्यं नाप्नुयात् क्वचित् ॥ सर्वलोकविभिर्मुक्तः स्वर्गलो
के महीयते ॥ एकाहमपि कौंतेय यो वसेद्वासवेश्वरे ॥ पापराशिं विनिर्धूय भानुवद्दिवि मोदते ॥ विप्रांश्च भोजयेद्भक्त्या दद्याद्वासां
सि दक्षिणां ॥ इति श्रीरेवायां वासवेश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पार्थ तीर्थं कोटिश्वरं परं ॥ यत्र स्नानं च द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं च जपहोमार्चनादिकं ॥ भक्त्या कृतं नरैस्तत्र सर्वं कोटिगुणं भवेत् ॥ तत्र देवाः सगंधर्वा ऋषयः सिद्धचारणाः ॥ जलधिं प्रति
गच्छंति नर्मदां वीक्षितुं किल ॥ मिलिता कोटीशो राजन् रेवासागरसंगमे ॥ विनोदमतुलं दृष्ट्वा रेवार्णवसमागमे ॥ स्नात्वा शिवं
च संस्थाप्य पूजयित्वा महेश्वरं ॥ कोटीश्वराभिधानं तु स्वस्वभक्त्या विधानतः ॥ कोटितीर्थे परां सिद्धिं संप्राप्ताः
सर्वतोषणात् ॥ तेन तत्पुण्यमतुलं सर्वतीर्थेषु चोत्तमं ॥ तत्र तीर्थे तु यत्किंचित् शुभं वा यदि वाशुभं ॥ क्रियते
नृपशार्दूल सर्वं कोटिगुणं भवेत् ॥ तत्र तीर्थे तु मार्गस्था ये केचिदृषिसत्तमाः ॥ सिद्धामृतपदं यांति पितृलोकं तथोत्तमं ॥ उत्तरे
नर्मदातीरे दक्षिणे चाश्रिताश्च ये ॥ देवलोकं गतास्तत्र इति मे निश्चिता मतिः॥बिल्वार्कपुष्प धत्तूरकुशकाशप्रसुनकैः॥रुतूद्भवैस्तथा
न्यैश्च पूजयित्वा महेश्वरं ॥ ननोपचारैर्विधिवत् मंत्रपूर्वं युधिष्ठिर॥ धूपदीपैर्नैवेद्यैस्तोषयित्वा च धूर्जटिं ॥ शिवलोकमवाप्नोति याव
दिंद्राश्चतुर्दश ॥ पौषकृष्णाष्टमीयोगे विशेषः पूजने स्मृतः ॥ नित्यं च नृपतिश्रेष्ठ चतुर्दश्यष्टमीषु च ॥ शिवमभ्यर्च्य विप्रांश्च भोज
येद्भक्तितो वरान् ॥ इति रेवायां कोटीश्वरतीर्थं ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे गच्छेत् अलिकांतीर्थमुत्तमं ॥ अलिकानाम
गांधर्वी कुशलिा कुटिलाशया ॥ चित्रसेनस्य दौहित्री विद्यानंदमृषिं गता ॥ वव्रे तं स्वीकृता तेन दशवर्षाणि तं श्रिता ॥ प
तिं जपान तं सुप्तं कस्मिंश्चित्कारणांतरे ॥ गत्वा निवेदयामासपितरं रत्नवल्लभं ॥ पित्रा मात्रा च संत्यक्ता बहुभिर्भर्त्सिता नृप ॥
गर्भघ्नी त्वं पतिघ्नी त्वमिति दर्शय मा मुखं ॥ ब्रह्मघ्नी याहि पापिष्ठे परित्यक्ता गृहाद्व्रज ॥ मार्कंडेय उवाच ॥ इति दुःखान्विता
मूढा ताभ्यां निर्भत्सितासति ॥ तनुं त्यक्तुं मनश्चक्रे प्राप्य तीर्थांतरं क्वचित् ॥ संपृच्छमाना तीर्थानि ब्राह्मणेभ्यो युधि
ष्ठिर ॥ श्रुत्वा पापहरं तीर्थं रेवासागरसंगमं ॥ तत्र पार्थ तपश्चक्रे निरहाराजितव्रता ॥ कृच्छ्रातिकृच्छ्रपाराक महासां

१ अणिताग्रामं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपनादिभिः ॥ चांद्रायणै र्ब्रह्मकुर्चैः कर्शयामास वै तनुं ॥ एवं वर्षशतं सार्द्धं व्यतीतं तपसा नृप ॥ शस्या विशुद्धिमिच्छंत्याः शिवध्यानार्चनादिभिः ॥ ततः कतिपयाहोभिस्तस्या ज्ञात्वा हठं परं ॥ परितुष्टः शिवः प्राह पार्व त्या परिनोदितः ॥ ईश्वर उवाच ॥ पुत्रि मा साहसं कार्षीः शुद्धदेहासि सांप्रतं ॥ तुष्टोहं तपसा तेद्य वरं वरय वांछितं ॥ अलिका उवाच॥यदि तुष्टोसि देवेश वरार्हा यद्यहं मता॥नानापापासितप्राया देहि शुद्धिं परां मम॥त्वं मे नाथो ह्यनाथायात्वमेव जग तां गुरुः ॥ दीनानाथ समुद्धर्त्ता शरण्यः सर्वदेहिनां ॥ ईश्वर उवाच ॥ त्वं भद्रे शुद्ध देहासि मा किंचिदनुशोचिथाः ॥ स्वनाम्ना स्थापयित्वेह मां ततः स्वर्गमिष्यसि ॥ इत्युक्त्वा देवेशस्तत्रैवांतरधीयत ॥ अलिकापि ततो भक्त्या स्नात्वा संस्थाप्य शंकरं॥ दत्वा दानं च विप्रेभ्यो लोकमाप महोत्कटं ॥ पितरं च समासाद्य मातरं च युधिष्ठिर ॥ तैश्च सन्मानिता प्रीत्या बंधुभिः सालिका ततः ॥ विमानवरमारूढा दिव्यमालान्विता नृप ॥ गौरी लोकमनुप्राप्ता सखित्वेद्यापि मोदते॥ ततः प्रभृति तत्पार्थ विख्यातमलिकेश्वरं ॥ तत्र तीर्थे तु या नारी पुरुषो वा युधिष्ठिर ॥ स्नात्वा संपूजयेद्भक्त्या महादेवमुमायुतं ॥ सपापैर्विविधैर्मुक्तो लोकमाप्नोति शांकरं ॥ मानसं वाचिकं पापं कायिकं यत्पुरा कृतं ॥ सर्वं तद्विलयं याति भोजयित्वा द्विजान् सदा ॥ दीपं दत्वा च देवाग्रे न रोगैः प रिभूयते ॥ धूपपात्रं विमानं च घंटां कलशमेव च ॥ दत्वा देवाय राजेंद्र शाक्रं लोकमवाप्नुयात् ॥ इति श्रीरेवायां सागरसंगमे अ लिकतीर्थनाम ॥ मार्कंडेय उवाच ॥ ततः क्रोशांतरे पुण्यं तीर्थं तद्विमलेश्वरं ॥ यत्र स्नानेन दानेन जपहोमार्चनादिभिः ॥ वि विमलेश्वरमाराध्य यो यदिच्छेत्स तल्लभेत् ॥ स्वर्गलाभादिकं वापि पार्थिवं वा यथेप्सितं ॥ पुरा त्रिशिरसं हत्वा त्वष्टुः पूत्रं शतक्र तुः ॥ यस्य तीर्थस्यमाहात्म्याद्वैमल्यं परमं गतः ॥ यत्र वेदनिधिर्विप्रो महच्चस्वा तपः पुरा ॥ नानाकर्ममलैः क्षीणैर्विमलोभवदर्कव त् ॥ महादेवप्रसादेन सोमवत्प्रियदर्शनः ॥ पुरा भानुमतीं भानुः सुतां स्मरशरार्दितः ॥ चक्षमे तेन दोषेण कुष्ठरोगार्दितो भवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ स चाप्यत्र तपस्तप्त्वा विमलत्वमुपागतः ॥ महादेवेन तुष्टेन स्वस्थानं मुदितो भजत्॥तथैव च पुरा पार्थ विभांडकसुतो मुनिः॥
योगिसंगं वने प्राप्य पुरे च नृपतेस्तथा ॥ राजसंसर्गदोषाद्वै मालिन्यं परमात्मनः ॥ विचारयन्नभ्युपेत्य रेवासागरसंगमं ॥ शांतया
भार्यया सार्द्धं तप्त्वा द्वादशवत्सरान् ॥ कृच्छ्रचांद्रायणैर्देवं तोषयन् त्र्यंबकं मुनिः॥ महादेवेन तुष्टेन सोपि वैमल्यमाप्तवान् ॥ शर्वा
ण्या प्रेरितः शर्वः पुरा दारुवने नृप ॥ मोहनान्मुनिपत्नीनां स्वं वीक्ष्य विमलं किल ॥ विचार्य परमस्थानं नर्मदोदधिसंगमं ॥
तत्र स्थित्वा महाराज तपस्तप्त्वा सहोमया ॥ विमलोसौ यतो जातः तेनासौ विमलेश्वरः ॥ तेन नाम्ना स्वयं तस्थौ लोकान
हितकाम्यया ॥ ततस्तिलोत्तमां सृष्ट्वा ब्रह्मा लोकपितामहः ॥ प्रजानाथोपि तां सृष्टां दृष्ट्वाग्रे सुमनोहरां ॥ भावियोगबलाक्रांतः स
तस्यामधिकोभवत् ॥ तेन वीक्ष्य सदोषत्वं रेवातीरद्वयं श्रितः ॥ तीर्थान्यनुसरन्मौनी त्रिस्नायी संस्मरन्शिवं ॥ रेवार्णवसमायोगे
स्नात्वा संपूज्य शंकरं ॥ कालेनाल्पेन राजर्षेब्रह्माप्यमलतां गताः ॥ एवमन्येपि बहुशो देवर्षिनृपसत्तमाः ॥ त्यक्त्वा दोषमलं तत्र
बहुधा विमलाभवन् ॥ तथा त्वमपि राजेंद्र तत्र स्नात्वा शिवार्चनात् ॥ अमलोपि विशेषेण वैमल्यं प्राप्स्यसे परं ॥ तत्र स्ना
त्वा नरो नारी पूजयित्वा महेश्वरं ॥ पापदोषविनिर्मुक्तो ब्रह्मलोके महीयते ॥ तत्रोपवासं यः कृत्वा पश्येत विमलेश्वरं ॥
अष्टम्यां च चतुर्दश्यां सर्वपर्वसु पार्थिव ॥ सप्तजन्मकृतं पापं हित्वा याति शिवालयं ॥ श्राद्धं कृत्वा विधानेन पितृणा
मनृणी भवेत ब्राह्मणान् भोजयेच्छक्त्या तेभ्यो दद्याच्च दक्षिणां॥ यद्यदिष्टतमं लोके यच्चैवात्महितं गृहे ॥ तत्तद्गुणव
ते देयं तत्रैवाक्षयमिच्छता ॥ स्वर्णधान्यानि वासांसि छत्रोपानत्कमंडलुं ॥ गृहं देवस्य वै शक्त्या कृत्वा स्याद्भुवि
भूपपिः ॥ गीतनृत्यकथाभिश्च तोषयेत्परमेश्वरं ॥ इति श्रीरेवायां विमलेश्वरतीर्थनामपंचसप्तत्यधिकशततमोऽध्यायः ॥१७५
॥ मार्कंडेय उवाच ॥ एतानि तव संक्षेपात्प्राधान्यात्कथितानि च ॥ न शक्तो विस्तराद्वक्तुं संख्यां तीर्थेषु पांडव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एषा पवित्रा विमला नदी त्रैलोक्यविश्रुता ॥ नर्मदा सरितां श्रेष्ठा महादेवस्य वल्लभा ॥ मनसा संस्मरेद्यस्तु न
 र्मदां सततं नृप ॥ चांद्रायणशतस्याशु लभते फलमुत्तमं ॥ अश्रद्दधानाः पुरुषा नास्तिकाश्चात्र ये स्थिताः ॥ पतंति नरके घोरे
प्राहेवं परमेश्वरः॥नर्मदां सेवते नित्यं स्वयं देवो महेश्वरः॥तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी॥इयं माहेश्वरी गंगामहेश्वरतनूद्भवा
॥प्रोक्ता दक्षिणगंगेति भारतस्य युधिष्ठिर॥जान्हवी वैष्णवी गंगा ब्राह्मी गंगा सरस्वती॥इयं माहेश्वरी गंगा रेवा नास्त्यत्र संशयः॥
यथा हि पुरुषे देवस्त्रैमुर्त्यत्वमुपाश्रितः॥ब्रह्मविष्णुमहेशाख्यं नभेदस्तत्र वै यथा तथा सरित्त्रये पार्थ भेदं मनसिमा कृथा॥कोटिशो ह्यत्र
तीर्थानि लक्षशश्चापि भारत॥तथा सहस्रशो रेवातीरद्वयगतानि तु॥वृक्षांतरिक्षसंस्थानि जलस्थलगतानि च॥कः शक्तस्तानि निर्णे
तुं वागीशोवा महेश्वरः॥स्मरणाज्जन्मजनितं दर्शनाच्च त्रिजन्मजं॥सप्तजन्मकृतं नश्येत्पापं रेवावगाहनात्॥देवकार्यकृतं तेन अग्नयो
विधिवद्धुताः॥अधीताश्चतुरो वेदा येन रेवावगाहिता॥प्रधान्याच्चापि संक्षेपात्तीर्थान्युक्तानि ते मया॥न शक्यो विस्तरः पार्थ श्रोतुं वक्तुं च
वै मया॥युधिष्ठिर उवाच॥ विधानं च नियमांश्च वदस्व मे॥प्रायश्चितार्थगमने को विधिस्तं वदस्वमे॥मार्कंडेय उवाच॥साधु पृष्टं महारा
ज यच्छ्रेयः पारलौकिकं शृणुष्वावहितो भूत्वा यथाज्ञानं वदामि ते॥अध्रुवेण शरीरेण ध्रुवकर्म समाचरेत्॥अवश्यमेव यास्यंति प्राणाः
प्राघूर्णिका इवदानं विनादृतं वाचः कीर्तिधर्मौ तथायुषः॥परोपकरणं कायादसारात्सारमुद्धरेत्॥अस्मिन्महामोहमये कटाहे सूर्याग्निना
रात्रिदिवेंधनेन॥मासर्तुदर्वीपरिघट्टनेन भूतानि कालः पचतीति वार्ता॥ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि ॥नायं लोकोस्ति
नपरो न सुखं संशयात्मनः ॥ मंत्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ अश्रद्धया हु
तं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च प्रेत्य च नो इह ॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारकः ॥ न स
सिद्धिमवाप्नोति न सुखं न परां गतिं ॥ संतीह विविधोपाया नृणां देहविशोधनाः ॥ तीर्थसेवासमं नास्ति स्वशरीरस्य शोधनं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृच्छ्रचांद्रायणाद्यैर्वा द्वितीयं तीर्थसेवया ॥ यदा तीर्थं समुद्दिश्य प्रयाति पुरुषो नृप ॥ तदा देवाश्च पितरस्तं व्रजंत्यनु खेचराः ॥
परंमदर्षपूर्णास्ते प्रयांत्यस्यानुपायिनः ॥ कृत्वा भ्युदयिकं श्राद्धं समापृच्छय तु देवतां ॥ इष्टबंधूंश्च विष्णुं च शंकरं सगणेश्वरं ॥ व्र
द्विजाभ्यनुज्ञातो गृहीत्वा नियमानपि ॥ एकाशनं ब्रह्मचर्यं भूशय्यां सत्यवादितां ॥ वर्जनं चपरान्नस्य प्रतिग्रहविवर्जनं॥वर्जयित्वा
तथा द्रोहवंचनादि नृपोत्तम॥साधुवेषं समास्थाय विनयेन विभूषितः॥दंभाहंकारमुक्तो यः स तीर्थफलमश्नुते ॥ यस्यहस्तौ च पादौ
च मनश्चैव सुसंयतं॥विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते॥अक्रोधनश्च राजेंद्र सत्यशीलो दृढव्रतः॥आत्मोपमश्च भूतेषु स तीर्थफ
लम श्नुते ॥ मुंडनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ॥ वर्जयित्वा कुरुक्षेत्रं विशालं विरजं गयां ॥ स्नानं सुरार्चनं चैव श्राद्धे
वै पिंडपातनं ॥ विप्राणां भोजनं शक्त्या सर्वतीर्थेष्वयं विधिः ॥ प्रायश्चित्तानिमित्तं च यो व्रजेत् यतमानसः ॥ तस्यापि च विधि
वक्ष्ये शृणु पार्थ समाहितः ॥ एकाशनं ब्रह्मचर्य मक्षारलवणाशनं ॥ स्नात्वा तीर्थाभिगमनं हविष्यैकान्नभोजनं ॥ वर्जयेत्पतिला॥
बहुभाषणमेव च ॥ पारिवादं परान्नं च नीचसंगं विवर्जयेत् ॥ व्रजेच्च निरुपानत्को वसानो वाससी शुचिः ॥ संकल्पं मनसा कृ
त्वा ब्राह्मणानुज्ञया व्रजेत् ॥ तीर्थे गत्वा यथा स्नात्वा कृत्वा चैव सुरार्चनं ॥ दुष्कर्मतो विमुक्तः स्यादनुतापी भवेद्यदी ॥ वेदे ती
र्थे च देवे च दैवज्ञे चौषधे गुरौ ॥ यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ उक्ततीर्थफलानां च पुराणेषु स्मृतिष्वपि ॥ अर्थ
वादभवां शंकां विहाय भरतर्षभ ॥ कृत्वा विचारं शास्त्रोक्तं परिकल्प्य यथोचित्तं ॥ कायेन कृच्छ्रचरणे ह्यशक्तानां विशुद्धये ॥
ज्ञात्वा तीर्थविशेषं हि प्रायश्चित्तं समाचरेत् ॥ तच्छृणुष्व महाराज नर्मदायां यथोचितं ॥ चतुर्विंशति संख्येभ्यो योजनेभ्यो
व्रजेन्नरः ॥ चतुर्विंशति कृच्छ्राणां फलमाप्नोति शोभनं ॥ अत ऊर्द्ध्वं योजनेषु पादकृच्छ्र उदाहृतः ॥ तन्मध्ये च महाराज
व्रजेच्छुद्धिकांक्षया ॥ योजने योजने तस्य प्रायश्चित्तं विदुर्बुधाः ॥ प्रणवाख्ये महाराज तथा रेवोरिसंगमे ॥ भृगुक्षेत्रे तथा गत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंतद्विगुणं स्मृतं ॥ संगमे देवनद्याश्च शूलभेदे नृपोत्तम॥द्विगुणं पादहीनं स्यात्करजासंगमे तथा ॥ एरंडीसंगमे तद्वत्कपिलायाश्च
संगमे ॥ केचित्त्रिगुणितं प्राहुःकुब्जारेवोत्थसंगमे॥ॐकारेच महाराज तदपिस्यात्समंजसं॥ संगमेषु तथान्यासां नदीनां रेवया सह
॥ प्राहुस्ते सार्द्धकृच्छ्रं वै फलं पूर्वं युधिष्ठिर ॥ त्रिगुणं कृच्छ्रमाप्नोति रेवासागरसंगमे ॥ कृच्छ्रं चतुर्गुणं प्रोक्तं शुक्लतीर्थे युधिष्ठिर ॥
योजने योजने गत्वा चतुर्विंशति योजनं ॥ तत्र तत्र वसेद्यस्तु चिरं नृपवरोत्तम ॥ रेवासेवासमाचारः संयुक्तः शुद्धिबुद्धिमान् ॥
दंभाहंकाररहितः शुध्यर्थं स विमुच्यते ॥ इति ते कथितं पार्थ प्रायश्चित्तार्थलक्षणं ॥ रेवायात्राविधानं च गुह्यमेतद्युधिष्ठिर ॥ युधि
ष्ठिर उवाच ॥ योजनस्य प्रमाणं मे वद त्वं मुनिसत्तम ॥ यज्ज्ञात्वा निश्चितं मे स्यान्मनःशुद्धेस्तु कारणं ॥ मार्कंडेय उवाच ॥
शृणु पांडव वक्ष्यामि प्रमाणं योजनस्य यत् ॥ तथा यात्रा विशेषेण विशेषं कृच्छ्रसंभवं ॥ तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्र
यः ॥ प्रमाणमंगुलस्याहुर्वितस्तिर्द्वादशांगुला ॥ वितस्तिद्वितीयं हस्तोचतुर्हस्तं धनुः स्मृतं ॥ स एव दंडो गदितो विशेषज्ञैर्युधिष्ठि
र ॥ धनुःसहस्रे द्वे क्रोशः चतुष्क्रोशं च योजनं ॥ एतद्योजनमानं ते कथितं भरतर्षभ ॥ येन यात्रां व्रजत्वेत्ति फलमानं निजार्जि
तं ॥ उक्तं कृच्छ्रफलं तीर्थे जलरूपे नृपोत्तम ॥ यथा विशेषं ते वच्मि पूर्वोक्ते तत्र तत्र च ॥ तन्मे शृणु महीपाल श्रद्दधानाय
कथ्यत ॥ यस्मिंस्तीर्थे हि यत्प्रोक्तं फलं कृछादिकं नृप॥तत्राप्युपोषणात्कृच्छ्रफलं प्राप्नोत्यथाधिकं ॥दिनजाप्याच्च लभते फलं
कृच्छ्रस्य शक्तितः॥तत्र विख्यातदेवेशं स्नात्वा दृष्ट्वाभिपूज्य च॥प्रणम्य लभते पार्थ फलं कृच्छ्रभवंसुधीः॥तीर्थे मुख्यफलं स्नानाद्द्वितीयं
चाप्युपोषणात् ॥ तृतीयं ख्यातदेवस्य दर्शनाभ्यर्चनादिभिः ॥ चतुर्थं जाप्ययोगेन देहशक्त्या त्वहर्निशं ॥ पंचमं सर्वतीर्थेषु कल्पनी
यं हि दूरतः ॥ तीरस्थो योजनादर्वाक् दशांशं लभतेफलं ॥ उक्ततीर्थफलात्पार्थ नात्र कार्या विचारणा ॥ उपवासेन सहितं म
हानद्यां हि मज्जनं॥ अप्यर्वाक् योजनात्पार्थ दद्यात्कृच्छ्रफलं नृणां ॥ षड्योजनवहा कुल्या नद्योल्पा द्वादशैव च ॥चतुर्विंशतिगा न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यो महानद्यतोऽधिकाः ॥ इति श्रीतीर्थयात्रादिविधानविशेषकथनंनाम षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥ युधिष्ठिरउ० ॥
परार्थं तीर्थयात्रायां गच्छतः कस्य किं फलं ॥ कियन्मात्रं मुनिश्रेष्ठ तन्मे ब्रूहि कृपानिधे ॥ मार्कंडेय उवाच ॥ परार्थं गच्छतस्त
न्मे वदतः शृणु पार्थिव ॥ यथा यावत्फलं तस्य यात्रादिविहितं भवेत् ॥ उत्तमेनेह वर्णेन द्रव्यल्लोभादिना नृप ॥ नाधमस्य
क्वचित्कार्यं तीर्थयात्रादिसेवनं ॥ धर्मकर्म महाराज स्वयं विद्वान्समचरेत् ॥ शरीरस्थाथवाशक्त्या अन्यद्वा कार्ययोगतः ॥ धर्मकर्म
सदा प्रायः सवर्णैनैव कारयेत् ॥ पुत्रपौत्रादिकैर्वापि ज्ञातिभिर्नविकान्वितैः ॥ श्रेष्ठं हि विहितं प्राहुर्धर्मकर्म युधिष्ठिर ॥ तैरेव कार
येत्तस्मान्नोत्तमैर्नाधमैरपि ॥ अधमेन कृतं सम्यक् न भवेदिति मे मतिः ॥ उत्तमश्चाधमार्थे वै कुर्वन् दुर्गतिमाप्नुयात् ॥ न शूद्राय
मतिं दद्यान्नोच्छिष्टं न हविष्कृतं न चास्योपदिशेद्धर्मं नचास्य व्रतमादिशेत् ॥ जपस्तपस्तीर्थयात्राप्रव्रज्या मंत्रसाधनं ॥ देवतारा
धनं दीक्षास्त्रीशूद्रपतनानि षट् ॥ पतिपत्नी पतत्येव विधवा सर्वमाचरेत् ॥ सभर्तृकाऽशके पत्यौ सर्वं कुर्यादनुज्ञया ॥
गत्वा परार्थं तीर्थादौ षोडशांशफलं लभेत् ॥ गच्छतश्च प्रसंगेन तीर्थमर्द्धफलं स्मृतं ॥ अनुसंगेन तीर्थस्य स्नाने स्नानफलं विदुः ॥
नैव यात्राफलं तज्ज्ञाः शास्त्रोक्तं कल्मषापहं ॥ पित्रार्थं च पितृव्यस्य मातुर्मातामहस्य च ॥ मातुलस्य तथा भ्रतुः श्वशुरस्य सुत
स्य च ॥ पोषकार्थादयोश्चापि मातामह्या गुरोस्तथा ॥ स्वसा मातृस्वसा पैत्री आचार्याध्यापकस्य च ॥ इत्यादर्थे नरः स्नात्वा स्व
यमष्टांशमाप्नुयात् ॥ साक्षात्पित्रोः प्रकुर्वाणश्चतुर्थांशमवाप्नुहात् ॥ पतिपत्न्योर्मिथश्चार्द्धफलं प्राहुर्मनीषिणः ॥ भागिनेयस्य शिष्यस्य
भ्रातृव्यस्य सुतस्य च ॥ षट्त्रिपंचषड्भागान् फलमाप्नोति वै नरः ॥ इति ते कथितंपार्थ पारंपर्यक्रमागतं॥ कर्तव्यं ज्ञातिवर्गस्य प
रार्थेधर्मसाधनं ॥ वर्षाऋतुसमायोगे सर्वा नद्यो रजस्वलाः ॥ मुक्त्वा सरस्वतीं गंगां नर्मदां यमुनानदीं ॥ इति रेवामाहात्म्ये परार्थ
तीर्थयात्राफलकथनंनाम षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥ मार्कंडेय उवाच ॥ एवं ते कथितं राजन् पुराणं धर्मसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितं ॥ शिवप्रीत्या यथा प्रोक्तं वायुना देवसंसदि ॥ शांतिरस्तु शिवं चास्तु लोकाः संतु निरामयाः ॥ गोब्राह्मणेभ्यः स्वस्त्यस्तु धर्मं धर्मात्मजाश्रयः ॥ नरकांतकरी रेवा सतीर्था विश्वपावनी ॥ नर्मदा धर्मदा चास्तु शर्मदा पार्थ ते सदा ॥ सूत उवाच ॥ इत्युक्त्वोपररामाथ पांडोः पुत्राय वै मुनिः ॥ मृकंडतनयो धीमान्सप्तकल्पस्मरः पुरा ॥ मार्कंडमुनिना प्रोक्तं यथा पार्थाय सत्तमाः ॥ तथा वः कथितं सर्वं रेवामाहात्म्यमुत्तमं ॥ इयं पुण्यासरिच्छ्रेष्ठा रेवा विश्वैकपावनी ॥ रुद्रदेहसमुद्भूता सर्वभूतालयप्रदा ॥ ॐकारजलधिं यावदुवाच भृगुनंदनः ॥ तीर्थसंगमभेदान्वै धर्मपुत्राय पृच्छते ॥ समासेनैव मुनयस्तथाहं कथयामि वः ॥ सप्तषष्टीसहस्राणि षष्टिकोटयस्तथैव च ॥ कथं केनात्र शक्यंते वक्तुं वर्षशतैरपि ॥ तथाप्यत्र मुनिश्रेष्ठाः प्रोक्तं पार्थाय वै यथा ॥ तीर्थमोंकारमारभ्य वक्ष्ये तीर्थावलीं शुभां ॥ प्रोच्यमानां समासेन तां शृणुध्वं महर्षयः ॥ नत्वा सोमं महेशानं नत्वा ब्रह्माच्युतावुभौ ॥ सरस्वतीं गणेशानं वेदव्यासांघ्रिपंकजं ॥ पूर्वाचार्यांस्तथा सर्वान् दृष्टादृष्टार्थवेदिनः ॥ प्रणम्य नर्मदां देवीं वक्ष्ये तीर्थावलीमिमां ॥ ॐनमो विश्वरूपाय ॐकारायाखिलात्मने ॥ यमारस्य प्रवक्ष्यामि रेवातीर्थावलीं द्विजाः ॥ अस्मिन्मार्कंडगदिते रेवातीर्थक्रमे शुभे ॥ पुराणसंहिताध्याया मार्कंडाश्रमवर्णनं ॥ ततः प्रश्नाधिकारश्च प्रशंसा नर्मदोद्भवा ॥ तथा पंचदशानां च प्रवाहानां प्रकीर्तनं॥ नामाभिर्वचनं तद्वत्तथा कल्पसमुद्भवाः ॥ एकविंशतिकल्पानां तद्वन्नामानुकीर्तनं॥ मार्कंडेयानुभूतानां साप्तानां लक्षणानि च॥ माहात्म्यं चैव रेवायाः शिवविष्णोस्तथैव च ॥ संहारलक्षणं तद्वदोंकारस्य च संभवः ॥ तथैवोंकारमाहात्म्यममरंकटकीर्तनं ॥ अमरेश्वरतीर्थं च तथा दारुवनं महत् ॥ दारुकेश्वरतीर्थं च तीर्थं वै चरुकेश्वरं ॥ चरुकासंगमस्तद्वद्व्यतिपातेश्वरं तथा ॥ पातालेश्वरतीर्थं च कोटियज्ञाह्वयं तथा ॥ वरुणेश्वरतीर्थं च लिंगान्यष्टोत्तरंशतं ॥ सिद्धेश्वरं यमेशं च ब्रह्मेश्वरमतः परं॥सारस्वतं चाष्टरुद्रं सावित्रं सोमसंज्ञितं॥शिवखातं महातीर्थं रुद्रावर्तं द्विजोत्तमाः॥ब्रह्मावर्तं परं तीर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्यावर्तमतः परं ॥ पिप्पलावर्त तीर्थंच पिप्पाल्याश्चैव संगमः ॥ अमरंकटमाहात्म्यं कपिलासंगमस्तथ॥ विशल्यासंभव
श्चापि भृगुतुंगाद्रिकीर्तनं ॥ विशल्यासंगमः पुण्यः करमर्दासमागमः ॥ करमर्देश्वरं तीर्थं चक्रतीर्थमनुत्तमं संगमो नी
लगंगायाः विध्वंसस्त्रिपुरस्य च ॥ कीर्तनं तीर्थदानानां मधुकतृतियाव्रतं ॥ अप्सरेश्वरतीर्थं च देहक्षेपे विधिस्ततः ॥ तीर्थं ज्वालेश्व
रं नाम ज्वालायाः संगमस्तथा ॥ शक्रतीर्थं कुशावर्तं हंसतीर्थं तथैव च ॥ अंबरीषस्य तीर्थं च महाकालेश्वरं तथा ॥ मातृकेश्वर
तीर्थं च भृगुतुंगानुवर्णनं॥तत्र भैरवमाहात्म्यं चपलेश्वरकीर्तनं ॥ चंडपाणेश्च माहात्म्यं कावेरीसंगमस्तथा ॥ कुबेरेश्वरतीर्थं च वा
राहिसंगमस्तथा ॥ संगमश्चंडवेगायास्तीर्थं चंडेश्वरं तथा ॥ एरंडीसंगमः पुण्य एरंडेश्वरमुत्तमं ॥ पितृतीर्थं च तत्रै
व ॐकारस्य च संभवं ॥ माहात्म्यं पंचलिंगानां ॐकारास्य मुनीश्वराः ॥ कोटितीर्थस्य माहात्म्यं तीर्थं काकन्हदं
तथा ॥ जंबुकेश्वरतीर्थं च सारस्वतमतःपरं ॥ कपिलासंगमस्तद्वतीर्थं च कपिलेश्वरं ॥ दैत्यसूदनतीर्थं च चक्रतीर्थं च वामनं॥
तीर्थलक्षं विदुः पूर्वे कपिलायास्तु संगमे ॥ स्वर्गस्य नरकस्यापि लक्षणं मुनिभाषितं ॥ व्यवस्थानं शरीरस्य गोप्रदानानुवर्णनं॥ अ
शोकवनिकातीर्थं मतंगाश्रमवर्णनं ॥ अशोकेश्वरतीर्थं च मतंगेश्वरमुत्तमं ॥ तथा मृगवनं पुण्यं तत्र तीर्थं॥ नोरथं ॥संगमगारगर्ता
याः अंगारेश्वरमुत्तमं ॥ तथा मेघवनं तीर्थं देव्या नामानुकीर्तनं ॥ संगमश्चापि कुब्जायास्तीर्थं कुब्जेश्वरं तथा ॥ बिल्वाम्रकं तथा
तीर्थं पूर्णद्वीपमतः परं ॥ तथा हिरण्यगर्भायाः संगमः पुण्यकीर्तनं ॥ द्वीपेश्वरं नाम तीर्थं पुण्यं यज्ञेश्वरं तथा ॥ मांडव्याश्रमतीर्थं
च विशोकासंगमस्तथा ॥ वागीश्वरं नाम तीर्थं पुण्यो वै वागुसंगमः ॥ सहस्रावर्तकं तत्र तीर्थं सौगंधिकं तथा ॥ संगमश्च सरस्व
त्या ईशानं तीर्थमुत्तमं ॥ देवतात्रयतीर्थं च शूलखातं ततः परं॥ ब्रह्मोदं शांकरं सौम्यं सारस्वतमतः परं॥सहस्रयज्ञतीर्थं च कपा
लमोचनं तथा ॥ आग्नेयमदितीशं च वाराहं तीर्थमुत्तमं ॥ तथा देवपथं तीर्थं तीर्थं यज्ञसहस्रकं ॥ शुक्रतीर्थं दीप्तिकेशं विष्णुतीर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च योधनं ॥ नर्मदेश्वरतीर्थं च वरुणेशं च मारुतं ॥ योगेशं रोहिणीतीर्थं दारुतीर्थं च सत्तमाः ॥ ब्रह्मावर्तं च पत्रेशं वान्हं सौरं
च कीर्त्यते ॥ मेघनादं दारुतीर्थं देवतीर्थं गुहाश्रयं ॥ नर्मदेश्वरसंज्ञं तत् कपिलातीर्थमुत्तमं ॥ करंजेशं कुंडलेशं पिप्पलादमतः परं॥
॥ विमलेश्वरतीर्थं च पुष्करिण्याश्च संगमं ॥ प्रशंसा शूलभेदस्य तत्रैवांधकविक्रमः ॥ देवाश्वासनदानं च तथैवांधकनिग्रहः ॥ शू
लभेदस्य चोत्पत्तिस्तथा पात्रपरीक्षणं ॥ प्रशंसा दानधर्मस्य ऋषिश्रृंगानुभावनं ॥ स्वर्गतिं दीर्घतपसो भानुमत्यास्तथैंगितं॥ शबर
स्वर्गगमनं माहात्म्यं शूलभेदजं ॥ कपिलेश्वरतीर्थं च मोक्षतीर्थमतः परं ॥ संगमोमोक्षनद्याश्च तीर्थं च विमलेश्वरं ॥ तथैवोलूक
तीर्थं च पुष्करिण्याश्च संगमः ॥ आदित्येश्वरतीर्थं च तीर्थं वै संगमेश्वरं संगमो भीमकुल्याया तीर्थं भीमेश्वरं शुभं ॥ मार्कंडेश्वर
तीर्थं च तथावै पिप्पलेश्वरं ॥ करोटीश्वरतीर्थं च तीर्थमिंद्रेश्वरं शुभं ॥ अगस्त्येशं कुमारेशं व्यासेश्वरमनुत्तमं ॥ वैद्यनाथं च केदा
रं आनंदेश्वरसंज्ञितं मातृतीर्थं च मुंडेशं सौरं कामेश्वरं तथा ॥ संगमश्चानुदुह्या वै तीर्थे भीमार्जुनाव्हये ॥ तीर्थं धर्मेश्वरं नाम
लुकेश्वरमतः परं ॥ ततो धनदतीर्थं च जटेशं मंगलेश्वरं ॥कपिलेश्वरतीर्थं च गोपारेश्वरमुत्तमं॥मणिनागेश्वरं नाम मणिनद्याश्च सं
गमः॥तिलकेश्वरतीर्थं च गौतमेशमतः परं॥तत्रैव मातृतीर्थं च मुनिनोक्तं मुनिश्वराः॥शंखचूडं च केदारं पाराशरमतः परं॥भीमेश्वरं
च चंद्रेशनश्ववत्याश्च संगमः ॥ बाह्वीश्वरं नारदेशं वैद्यनाथं कपीश्वरं ॥ कुंभेश्वरं च मार्कंडं रामेशं लक्ष्मणेश्वरं ॥ मेघेश्वरं मत्स्य
केशमप्सराव्हदसंज्ञकं ॥ दधिस्कंदं मधुस्कंदं नंदिकेशं च वारुणं ॥ पावकेश्वरतीर्थं च तथैव कपिलेश्वरं ॥ नारायणाव्हयं तीर्थं च
क्रतीर्थमनुत्तमं ॥ चंडादित्यं परं तीर्थं चंडिकातीर्थमुत्तमं॥यमहासाव्हयं तीर्थं तथा गंगेश्वरं शुभं॥ नंदिकेश्वरसंज्ञं च नरनारायणा
व्हयं ॥ नलेश्वरं च मार्कंडं शुक्रतीर्थमतः परं ॥ व्यासेश्वरं परं तीर्थं तत्रासिद्धेश्वरं तथा ॥ कोटितीर्थ प्रभातीर्थं वासुकीश्वरमुत्तमं ॥
संगमश्च करंजायाः मार्कंडेश्वरमुत्तमं ॥ तीर्थं कोटीश्वरं नाम तथा संकर्षणाव्हयं कनकेशं मन्मथेशं तीर्थं चैवानसूयकं ॥ एरंडीसंग

CC-0. In Public Domain. Digitization by eGangotri

मः पुण्यो मातृतीर्थं च शोभनं ॥ तीर्थं स्वर्णशिलाकाख्यं तथा चैवांबिकेश्वरं ॥ करंजेशं भरतेशं नागेशं मुकुटेश्वरं ॥ सौभाग्यसुं
दरी तीर्थं धनदेश्वरमुत्तमं ॥ रोहिण्यं चक्रतीर्थं च उत्तरेश्वरसंज्ञितं ॥ भोगेश्वरं च केदारं निष्कलंकमतः परं॥ मार्कंडं धौतपापं च
तीर्थमांगिरसेश्वरं ॥ कोटवीसंगमः पुण्यं कोटितीर्थं च तत्र वै ॥ अयोनिजं परं तीर्थं अंगारेश्वरमुत्तमं ॥ स्कंदं च नार्मदं ब्राह्मं
वाल्मीकेश्वरसंज्ञितं ॥ कोटितीर्थं कपालेशं पांडुतीर्थं त्रिलोचनं ॥ कपिलेशं कंबुकेशं प्रभासं कोहनेश्वरं ॥ इंद्रेशं वालुकेशं च देवे
शं शाक्रमेव च ॥ नागेश्वरं गौतमेशं अहल्यातीर्थमुत्तमं ॥ रामेश्वरं मोक्षतीर्थं तथा कुशलवीश्वरौ ॥नर्मदेशं कपर्दीशं सागरेशम
तः परं॥ धौरादित्यं परं तीर्थं तीर्थं वापरयोनिजं ॥पिंगलेश्वरतीर्थं च भृग्वीश्वरमनुत्तमं ॥ दशाश्वमेधिकं तीर्थं कोटितीर्थं च सत्त
माः ॥ मार्कंडं ब्रह्मतीर्थं च आदिवाराहमुत्तमं ॥ तीर्थमाशापुराख्यं च कौबेरं मारुतं तथा ॥ वरुणेशं यमेशं च रामेशं कर्कटेश्वरं
॥ शक्रेशं सोमतीर्थं च नंदान्हदमनुत्तमं ॥ वैष्णवं चक्रतीर्थचं रामकेशवसंज्ञितं ॥ तथैव रुक्मिणीतीर्थं शिवतीर्थमनुत्तमं ॥जय
वाराहतीर्थं च तीर्थं ममाहकाह्वयं ॥ अंगारेशं च सिद्धेशं तापेश्वरमतः परं ॥पुनः सिद्धेश्वरं नाम तीर्थं च वरुणेश्वरं॥पराशरेश्वरं
पुण्यं कुसुमेशमनुत्तमं॥कुंडलेश्वरतीर्थं च तथा कलकलेश्वरं॥न्यंकुवाराहसंज्ञं च अंकोलं तीर्थमुत्तमं॥श्वेतवताहतीर्थं च भार्गलं भार्ग
लं सौरमुत्तमं ॥ हुंकारस्वामितीर्थं च शुक्लतीर्थं च शोभनं ॥ संगमो मधुमत्याश्च तीर्थं वै संगमेश्वरं॥नर्मदेश्वरसंज्ञं च नदीत्रितयसं
गमः ॥ अनकेश्वरतीर्थं च सर्पेशं मोक्षसंज्ञितं ॥ कावेरीसंगमः पुण्यस्तीर्थं गोपेश्वराह्वयं ॥ मार्कंडेशं च नागेशमुदंबर्याश्च संगमः ॥
सांबादित्याह्वयं तीर्थमुदंवर्याश्चसंगमः ॥ सिद्धेश्वरं च मार्कंडं तथा सिद्धेश्वरीकृतं ॥ गोपेशं कपिलेशं च वैद्यनाथमनु
त्तमं ॥ पिंगलेश्वरतीर्थं च सैंधवायतनं महत् ॥ भूतीश्वराख्यं तीर्थं गंगावाहमतः परं ॥ गौतमेश्वरतीर्थं च दशाश्व
मेधिकं तथा ॥ भृगुतीर्थं तथा पुण्यं ख्याता सौभाग्यसुंदरी ॥ वृषखातं च तत्रैव केदारं धूतपातकं ॥ तीर्थं धू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तेश्वरीसंज्ञं एरंडीसंज्ञकं तथा ॥ तीर्थं च कनकेश्वर्या ज्वालेश्वर्यं तत परं॥ शालीग्रामाह्वयं तीर्थं सोमना थमनुत्तमं
॥ तथैवोदीर्णवाराहं तीर्थं चंद्रप्रभासकं॥द्वादशादित्य तीर्थं च तथा सिद्धेश्वराभिधं॥कपिलेश्वरतीर्थं च तथा त्रैविक्रमं शुभं ॥
विश्वरूपाह्वयं तीर्थं नारायणकृतं तथा॥मूलश्रीपतितीर्थं च चौलश्रीपतिसंज्ञकं॥देवतीर्थं हंसतीर्थं प्रभासं तीर्थमुत्तमं॥मूलस्थानं च कंठेशं
अट्टहासमतः परं॥भूर्भुवेश्वरतीर्थं च ख्याता शूलेश्वरी तथा॥सारस्वतं दारुकेशमाश्विनोस्तीर्थमुत्तमं॥सावित्रीतीर्थमतुलं वालिखिल्ये
श्वरंतथा॥नर्मदेशं मातृतीर्थं देवतीर्थमनुत्तमं॥मत्स्यकेश्वरतीर्थं च शिखितीर्थं च शोभनं ॥ कोटितीर्थं मुनिश्रेष्ठास्तत्र कोटीश्वरी मृ
डा ॥ तीर्थं पैतामहं नाम मांडव्येश्वरसंज्ञितं ॥ तत्र नारायणेशं च अक्रूरेशमतः परं॥ देवखातं सिद्धरुद्रं वैद्यनाथमनुत्तमं॥ तथैव
मातृतीर्थं च उत्तरेशमतः परं ॥ तथैव नर्मदेशं च मातृतीर्थं तथा पुनः ॥ तथा च कुररीतीर्थं ढौंढेशं दशकन्यकं ॥ सुवर्णबिंदुतीर्थं
च ऋणपापप्रमोचनं ॥ भारभूतेश्वरं तीर्थं तथा सुंडीश्वरं विदुः ॥ एकशालं डिंडिपाणिं तीर्थं चाप्सरसंपरं ॥ मुन्यालयं च मार्कंडं
गणितादेवताह्वयं ॥ आमलेश्वरतीर्थं च तीर्थं कंथेश्वरं तथा ॥ आषाढीतीर्थमित्याहुः शृंगीतीर्थं तथै च ॥ वल्कलेश्वरतीर्थं च कपा
लेशं तथैवच ॥ मार्कंडं कपिलेशं च एरंडीसंगमस्तथा ॥ एरंडीदेवतातीर्थं रामतीर्थमतःपरं ॥ जमदग्नेः परं तीर्थं रेवासागरसंगमः॥
लुंठनेश्वरतीर्थं तल्लुकेशंनामयं विदुः ॥ वृषखातं तत्र कुंडं तथैव ऋषिसत्तमाः ॥ तथा हंसेश्वरं नाम तिलादं वासवेश्वरं ॥ तथा
कोटीश्वरं तीर्थं मालिकातीर्थमुत्तमं ॥ विमलेश्वरतीर्थं च रेवासागरसंगमे ॥ एवं तीर्थावली पुण्या मया प्रोक्ता महर्षयः ॥ तीर्थमु
क्तावली पुण्या ग्रथिता तटरज्जुना॥नर्मदानीरनिर्णिक्ता मार्कंडेयविनिर्मिता॥मंडनायेह साधुनां सर्वलोकहिताय च॥दुरितध्वांतशमनी
धार्या धर्मार्थिभिः सदा॥अहोरात्रकृतं पापं सकृज्जप्त्वाशु नाशयेत्॥त्रिकालं जप्त्वा मासोत्थं शिवाग्रे च त्रिमासिकं॥मासं जप्त्वाथ वर्षो
त्थंवर्षं जप्त्वाशताब्दिकं॥श्राद्धकाले चविप्राणां भुंजतां पुरतः स्थितः॥पठन्तीर्थावलीं पुण्यां गया श्राद्धप्रदो भवेत्॥पूजाकाले चदेवानां

CC-0. In Public Domain. Digitization by eGangotri

श्रद्धया पुरतः पठन्॥प्रणियेत्सर्वदेवांश्च पुनाति सकलं कुलं॥एवं तीर्थावली पुण्या रेवातीरद्वयाश्रिता॥मया प्रोक्ता मुनिश्रेष्ठास्तथैव शृणुतानघाः ॥ इति श्रीनर्मदामहात्म्ये उत्तरखंडे तीर्थावलीकथनंनाम सप्तसप्तत्याधिकशततमोध्यायः ॥१७७॥ श्रीसूत उवाच ॥ तथैव तीर्थस्तबकान्वक्ष्येहमृषिसत्तमाः ॥ यैस्तु तीर्थावलीगुंफः पूर्वोक्तैरेकतः कृते ॥ विभक्तो भक्तलोकानाऽमानंदप्रथनः शुभः ॥ मृकंडतनयः पूर्वं प्राह पार्थाय पृच्छते ॥ यथा तथाहं वक्ष्यामि तीर्थानां स्तबकानिह ॥ शिवांबुधानजा पुण्या रेवा कल्पलता किल ॥ तीरद्वयोद्भूततीर्थप्रसूनैः पुष्पिता शुभा ॥ यत्पुण्यगंधलक्ष्म्या वै त्रैलोक्यं सुरभीकृतं ॥ तत्पुष्पमकरंदस्य रसास्वादाविदुत्तमः ॥ भ्रमरः खलु मार्कंडो मुनिर्मतिमतां वरः ॥ तत्पुष्पमालां हृदये तीर्थस्यबकाचित्रितां ॥ दधाति सततं पुण्यां मुनिर्भृगुकुलोद्वहः ॥ तस्यास्तबकसंस्थानं वक्ष्येहमृषिसत्तमाः ॥ ॐकारतीर्थमारभ्य यावत्पश्चिमसागरं ॥ संगमाः पंचत्रिंशद्वै नदीनां पापनाशनाः दशोकमुत्तरे तीरे सत्रिविंशति दक्षिणे॥पंचत्रिंशत्तमः श्रेष्ठो रेवासागरसंगम ॥ संगमैः सहितान्येवं रेवातीरद्वयेपि च ॥ चतुः शतानि तीर्थानि प्रसिद्धानि द्विजोत्तमाः ॥ त्रिशतं शिवतीर्थानि त्रयस्त्रिंशत्समन्वितं ॥ तत्रापि व्यक्तितो वक्ष्ये शृणुध्वं तानि सत्तमा ॥ मार्कंडेश्वरतीर्थानि दश तेषु मुनीश्वराः ॥ दशादित्यभवान्यत्र नवैव कपिलेश्वराः ॥ सोमसंस्थापितान्यष्टौ तावंतो नर्मदेश्वराः ॥ कोटितीर्थान्यथाष्टौ च सप्त सिद्धेश्वरास्तथा ॥ नागेश्वराश्च सप्तैव रेवातीरद्वयेपि तु ॥ सप्तैव वन्हिविहितान्यथाप्यावर्तसप्तकं ॥ केदारेश्वरतीर्थानि पंच पंचेंद्रजानि च ॥ वरुणेशाश्च पंचैव पंचैव धनदेश्वराः ॥ देवतीर्थानि पंचैव चत्वारो वै यमेश्वराः ॥ वैद्यनाथाश्च चत्वारश्चत्वारो वानरेश्वराः ॥ अंगारेश्वरतीर्थानि तावंत्येव मुनीश्वराः॥सारस्वतानि चत्वारी चत्वारो दारुकेश्वराः ॥ गौतमेश्वरतीर्थानि त्रीणि रामेश्वरास्त्रयः ॥ कपालेश्वरतीर्थानि त्रीणि हंसकृतानि च ॥ त्रीण्येव मोक्षतीर्थानि त्रयो वै विमलेश्वराः॥ सहस्रयज्ञतीर्थानि त्रीण्येव मुनिरब्रवीत् ॥ भीमेश्वरास्त्रयः ख्याताः स्वर्णतीर्थानि त्रीणि च ॥ धौतपापद्वयं प्रोक्तं करंजेशद्वयं तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋणमोचनतीर्थे द्वे तथा स्कंदेश्वरद्वयं ॥ दशाश्वमेधतीर्थे द्वे नंदीतीर्थद्वयं द्विजाः ॥ मन्मथेशद्वयं चैव भृगुतीर्थद्वयं तथा ॥ पराशरेश्वरौ द्वौ च अयोनीसंभवद्वयं ॥ व्यासेश्वरद्वयं प्रोक्तं पितृतीर्थद्वयं तथा ॥ नंदिकेश्वरतीर्थे द्वे द्वौ च गोपेश्वरौ स्मृतौ॥ मारुतेशद्वयं तद्वद्द्वौ च ज्वालेश्वरौस्मृतौ ॥ शुक्लतीर्थद्वयं पुण्यमप्सरेशद्वयं तथा ॥ पिप्पलेश्वरतीर्थे द्वे मांडव्येश्वरसंज्ञिते ॥ द्वीपेश्वरद्वयं चैव प्राह तद्वद्भृगूद्वहः ॥ उत्तरेश्वरतीर्थे द्वे अशोकेशद्वयी तथा ॥ द्वे योधनपुरे चैव रोहिणीतीर्थजद्वयं ॥ लुंकेश्वरद्वयं ख्यातमाख्यानं मुनिना तथा ॥ सैकोनविंशति शतं तीर्थान्येकैकशोद्विजाः ॥ स्तबकेषु कृतं तीर्थं द्विशतं सचतुर्दशं ॥ शैवान्येतानि तीर्थानि वैष्णवानि च सत्तमाः ॥ शृणुध्वं प्रोच्यमानानि ब्राह्मशाक्तानि च क्रमात् ॥ अष्टाविंशति तीर्थानि वैष्णवान्यब्रवीन्मुनिः ॥ तेषु वाराहतीर्थानि षडेवमुनिसत्तमाः ॥ चत्वारि चक्रतीर्थानि शेषाण्यष्टादशैव हि ॥ विष्णुनाधिष्ठितान्येव प्राह पूर्वं मृकंडजः ॥ तथैव ब्रह्मणा सिद्ध्यै सप्ततीर्थान्यवीवदत् ॥ त्रिषु च ब्रह्मणः पूजा ब्रह्मेशाश्चतुरो परे ॥ अष्ट विंशन्मया ख्याता यथा संख्यं यथा क्रमं॥ एतत्पवित्रमतुलं ह्येतत्पापहरं परं ॥ नर्मदाचरितं पुण्यं महात्म्यं मुनिभाषितं ॥ सूत उवाच ॥ एवमुद्देशतः प्रोक्तो रेवातीर्थक्रमो मया ॥ यथापार्थाय संक्षेपान्मार्कंडो मुनिरब्रवीत् ॥ अवांतराणि तीर्थानि तेषु गुप्तान्यनेकशः ॥ यत्र यावत्प्रमाणानि तान्याकर्णयतानघाः ॥ ॐकारतीर्थपरितः पर्वतादमरंकदात् ॥ क्रोशद्वये सर्वादिक्षु सार्द्धकोटीत्रयी मता ॥ तीर्थानां संख्यया गुप्तप्रगटानां द्विजोत्तमाः ॥ कोटिरेका तु तीर्थानां कपिलासंगमे पृथक् ॥ अशोकवनिकायाश्च तीर्थे लक्षं प्रतिष्ठितं ॥ शतमंगारगर्तायाः संगमे मुनिसत्तमाः ॥ तीर्थानामयुतं तद्वत्कुब्जायाः संगमे स्थितं ॥ शतं हिरण्यगर्भायाः संगमे समवस्थितं ॥ तीर्थानामष्टषष्टिश्च विशोकासंगमे स्थिता ॥ तथा सहस्रतीर्थानां संस्थितं वागुसंगमे ॥ शतं सरस्वतीसंगे शुक्लतीर्थे शतद्वयं ॥ सहस्रं विष्णुतीर्थेषु माहिष्मत्यामथायुतं ॥ शूलभेदे च तीर्थानां सार्यं लक्षं स्थितं द्विजाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवग्रामे सहस्रं च तीर्थानां मुनिरब्रवीत् ॥ लुकेश्वरे च तीर्थानां साग्रा सप्तशती स्थिता ॥तीर्थान्यष्टोत्तरशतं मणिनद्याश्च संगमे॥
वैद्यनाथे च तीर्थानां शतमष्टाधिकं विदुः ॥ एवं तावत्प्रमाणानि तीर्थे कुंभेश्वरे द्विजाः ॥ साग्रं लक्षं च तीर्थानां स्थितं रेवोरिसंग
मे ॥ ततो चाप्यधिकानि स्युरिति मार्कंडभाषितं ॥ अष्टाशीति सहस्राणि व्यासद्वीपाश्रितानि च ॥ संगमे च करंजायाः स्थितम
ष्टोत्तरायुतं ॥ एरंडीसंगमे तद्वत्तीर्थान्यष्टाधिकं शतं ॥ धूतपापे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥ स्कंदतीर्थे शतं पुण्यं तीर्थानां
मुनिरुक्तवान् ॥ कोहनेशे च तीर्थानां षष्टिरष्टाधिका स्थिता ॥ सार्द्धकोटी च तीर्थानां स्थिता वै कोरिलापुरे ॥ रामकेशवतीर्थे च
सहस्रं साग्रमुक्तवान् ॥ अमाहके सहस्रं च तीर्थानि निवसंति हि ॥ लक्षाष्टकं सहस्रे द्वे शुक्लतीर्थे द्विजोत्तमाः ॥ तीर्थानि कथया
मास पुरा पार्थाय भार्गवः ॥ शतमष्टाधिकं प्राह प्रत्येकं संगमेषु च ॥ नदीनामवशिष्टानां कावेरीसंगमं विना ॥ कावेर्या संगमे वि
प्राः स्थिता पंचशती तथा ॥ तीर्थानां पर्वसुतथा विशेषो मुनिनोदितः ॥ मोक्षतीर्थे हि सत्प्राहुः पुराणपुरुषाश्रितं ॥ भृगोः क्षेत्रे
च तीर्थानां कोटिरेका समाश्रिता ॥ साधिकास्तामृषिश्रेष्ठा वक्तुं शक्तो हि को भवेत् ॥ सर्वामराश्रयं प्रोक्तं स
र्वतीर्थाश्रयं तथा॥ त्रिषु लोकेषु विख्यातं पूजितं सिद्धिसाधनं ॥ भारभूत्यां च तीर्थानां स्थितमष्टोत्तरं शतं॥ अक्रूरेश्वरतीर्थे च सा
र्द्धं तीर्थशतं स्थितं ॥ विमलेश्वरतीर्थे तु रेवासागरसंगमे ॥ दशायुतानि तीर्थानां साधिकान्यब्रवीन्मुनिः ॥ इति श्रीवायुक्ताशिवसं
हितायां श्रीनर्मदामहात्म्ये तीर्थावलीकथनंनाम अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥ सूत उवाच ॥ इति वः कथितं वि
प्रा रेवामाहात्म्यमुत्तमं ॥ यथोपदिष्टं पार्थाय मार्कंडेयेन वै पुरा ॥ १ ॥ तथा तीर्थकदंबाश्च तेषु तीर्थे विशेषतः ॥ प्राधान्येन मया
ख्याता यथा संख्यं यथा क्रमं ॥ २ ॥ एतत्पवित्रमतुलं ह्येतत्पापहरं परं ॥ नर्मदाचरितं पुण्यं माहात्म्यं मुनिभाषितं ॥ ३ ॥ स
प्तकल्पानुगो विप्रो नर्मदायां मुनीश्वराः ॥ मृकंडतनयो धीमान् परमार्थविदुत्तमः ॥४ ॥संसेव्य सर्वतीर्थानि नदीः सर्वाश्च वै पुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ बहुकल्पस्मरां रेवामालक्ष्य शिवदेहजा ॥ ५ ॥ मे कलेतिच शर्वोक्तां शरणं शर्वजां ययौ ॥ आजराममरां देवीं दैत्यध्वंस
करीं परां ॥ महाद्विभवसंयुक्तां भवघ्नीं भवजान्हवीं ॥ तस्यामावध्य सत्प्रेम जातः सोप्यजरामरः ॥ षष्टितीर्थसहस्राणि षष्टिकोट्य
श्च सत्तमाः ॥ व्यवस्थितानि रेवायास्तीरयुग्मे पदे पदे ॥ सरितः परितः संति सतीर्थास्तु सहस्रशः ॥ न तुलां यांति रेवायाः या
तिमन्ये मुनीश्वराः ॥ एतद्वः कथितं सर्वं यत्पृष्टमखिलं द्विजाः ॥ यन्महेशमुखाच्छ्रुत्वा वायुराह ऋषीन्प्रति ॥ तद्वन्मृकंडतनयोप्य
नुभूयाखिलां नदीं ॥ सतीर्थां पदशः प्राहपांडुपुत्राय पावनीं ॥ शैवीयं संहिता पुण्या वायुना परिकीर्तिता ॥ चतुर्विंशति साहस्री
मया वः समुदाहृता ॥ तत्रैतत्कथितं सर्वसंक्षेपेण द्विजोत्तमाः ॥ नर्मदाचरितं पुण्यं त्रिषु लोकेषु दुर्लभं ॥ किमन्यैः सरितां तो
यैः सेवितैस्तु सहस्रशः ॥ यदि संसेव्यते तोयं रेवायाः पापनाशनं ॥ मेकलाजलसंसेवी मुक्तिमाप्नोति शाश्वतीं ॥ यथा यथा भ
जेन्मर्त्यो यद्यदिच्छति तीर्थगः ॥ तत्तदाप्नोति नियतं श्रद्धयाऽश्रद्धयापि च ॥ इदं ब्रह्मा हरिरिदं इदं साक्षात्परो हरः ॥ इदं ब्रह्म
निराकारं कैवल्यं नर्मदाजलं ॥ तावद्गर्जंति तीर्थानि नद्यो त्वद्यफलप्रदाः ॥ यावन्न स्मर्यते रेवा सेवाहेवा कलौनरैः ॥ ध्रुवं लोके
हितार्थाय शिवेन स्वशरीरतः ॥ शक्तिः कापि सरिद्रूपा रेवेयमवतारिता ॥ तावद्गर्जंति यज्ञाश्च वनक्षेत्रादयो भृशं ॥ यावन्न नर्मदा
नाम कीर्तनं क्रियते कलौ ॥ गरिमा गण्यते तावत्तपोदानव्रतादिषु ॥ नरैर्वा प्राप्यते यावद्भुवि भर्गभवा धुनी ॥ ये वसंत्युत्तरे कूले
रुद्रस्यानुचरा हि ते ॥ वसंति याम्यतीरे ये लोकं ते यांति वैष्णवं ॥ धन्यास्ते देशवर्यास्ते येषु देशेषु नर्मदा ॥ नरकांतकरी श
श्वत्संश्रिता शर्वनिर्मिता ॥ कृतपुण्याश्च ते लोकाः शोकाय न भवंति ते ॥ ये पिबंति जलं पुण्यं पार्वतीपतिसिंधुजं ॥ इदं पवित्र
मतुलं रेवायाश्चरितं द्विजाः ॥ शृणोतियः कीर्तयते मुच्यते सर्वपातकैः ॥ यत्फलं सर्ववेदैश्च सषडंगपदक्रमैः॥ श्रुतैश्च पठितैस्तस्मा
त् फलमष्टगुणं भवेत्॥सत्रयाजीफलं यच्च लभते द्वादशाब्दिकं॥श्रुत्वा सकृच्चेरवायाश्चरितं तत्फलं लभेत्॥सर्वतीर्थावगाहाच्च यत्फलं साग

CC-0. In Public Domain. Digitization by eGangotri

रादिषु॥सकृत् श्रुत्वा च माहात्म्यं रेवाया स्तत्फलं लभेत्॥एतद्धर्म्यमुपाख्यानं सर्वशास्त्रेष्वनुत्तमं॥देशे वा मंडले वापि नगरे ग्राममध्यतः॥गृहे वा तिष्ठते यस्य लिखिते सार्ववर्णिके॥स ब्रह्मा स शिवः साक्षात्स च देवो जनार्दनः॥धर्मार्थकाममोक्षणां मार्गोयं देवसेवित॥गुरुणां च गुरुशास्त्रं परमं सिद्धिकारणं॥यश्चेदं शृणुयान्नित्यं पुराणंदेवभाषितं॥ब्राह्मणो वेदवान् भुयात् क्षत्रियो विजयी भवेत्॥धनाढ्यो जायते वैश्यः शूद्रो वै धर्मभाक्भवेत् ॥ सौभाग्यसंततिं नारी श्रुत्वैतत्समवाप्नुयात् ॥ श्रियं सौख्यं स्वर्गवासं जन्म चैवोत्तमे कुले॥रसभेदी कृतघ्नी च स्वामिध्रुक् मित्रवंचकः॥गोघ्नश्च गरदश्चैव कन्याविक्रयकारकः॥ब्रह्मघ्नश्च सुरापी च स्तेयी च गुरुतल्पगः॥नर्मदाचरितं शृण्वन्तामहं योभिषेवते ॥ सर्वपापविनिर्मुक्तो जायते नात्र संशयः ॥ पाकभेदी वृथापाकी देवब्राह्मणनिंदकः ॥ परिवादि गुरोः पित्रोः साधूनां नृपतेस्तथा ॥ तेपि श्रुत्वा च पापेभ्यो मुच्यंते नात्र संशयः ॥ ये पुनर्भावितात्मानः शास्त्रं शृण्वंति नित्यशः ॥ पूजयंति च तच्छास्त्रं नार्मदं वस्त्रभूषणैः ॥पुष्पैः फलैश्चंदनाद्यैर्भोजनैर्विविधैरपि ॥शास्त्रेस्मिन्पूजिते देवा पूजिता गुरवस्तथा॥इहलोके परे चैव नात्र कर्या विचारणा॥तस्मात्सर्वप्रयत्नेन गंधवस्त्रादिभूषणैः॥पूजयेत्परया भक्त्या वाचकं शास्त्रमेव च॥वेदपाठैश्च यत्पुण्य मग्निहोत्रैश्च पालितै॥तत्फलंसमवाप्नोति नर्मदाचारिते शुभे॥कुरुक्षेत्रे च यत्पुण्यं प्रभासे पुष्करे तथा॥रुद्रावर्ते गयायां च वारणस्यां विशेषतः॥गंगाद्वारे प्रयागे च गंगासागरसंगमे॥एवमादिषु तीर्थेषु यत्पुण्यं जायते नृणां नर्मदाचरितं श्रुत्वा तत्पुण्यं सकलं लभेत्॥आदिमध्यावसानेषु नर्मदाचरितं शुभं॥यः शृणोति नरो भक्त्या शृणुध्वं तत्फलं महत्॥समाप्य शिवसंस्थानं देवकन्यासमावृतः॥रुद्रस्यानुचरो भूत्वा शिवेन सह मोदते ॥ धर्माख्यानामिदं पुण्यं सर्वाख्यानेष्वनुत्तमं॥ गृहेपिपठ्यते यस्य चतुर्वर्णस्य सत्तमाः॥धन्यं तस्य गृहं मन्ये गृहस्थं चापि तत्कुलं ॥ पुस्तकं पूजयेद्यस्तु नर्मदाचरितस्य तु ॥ नर्मदा पूजिता तेन भगवांश्च महेश्वरः ॥ वाचके पूजिते तद्वत् देवाश्च ऋषयोर्चिताः ॥ लेखयित्वा च सकलं रेवाचरितमुत्तमं ॥ भूषणं सर्वशास्त्राणां यो ददाति द्विजन्मने॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नर्मदा सर्वतीर्थेषु स्नानदानेन यत्फलं ॥ तत्फलं समवाप्नोति स नरो नात्र संशयः ॥ एतत्पुराणं रुद्रोक्तं महापुण्यफलप्रदं ॥ स्वर्गदं पुत्रदं धन्यं यशस्यं कीर्त्तिवर्धनं ॥ धर्म्यमायुष्यमतुलं दुःखदुःस्वप्ननाशनं ॥ पठतां शृण्वतां चापि सर्वकामार्थसिद्धिदं ॥ यत्प्रदत्तमिदं पुण्यं पुराणं वाच्यते द्विजैः ॥ शिवलोके स्थितिर्यस्य पुराणाक्षरवत्सरी ॥ इति निगदितमेतन्नर्मदायाश्चरित्रं पवनगदितमय्यं शर्ववक्त्रादवाप्य॥त्रिभुवनजनवंद्यं त्वेतदादौ मुनीनां कुलपतिपुरतः सत्सूतमुख्येन साधु॥इति श्रीवायूक्तचतुर्विंशतिसहस्रसंहितायांउत्तरखंडे श्रीनर्मदामात्म्येपुराणसमाप्तिर्नामनवसप्तत्याधिकशततमोऽध्यायः ॥ १७९ ॥ ॥ श्री. ॥ चतुर्दशसहस्राणि खंडेऽस्मिन् मुनिना पुरा ग्रंथसंख्या निगदिता माहात्म्ये नार्मदे खिल ॥ १ ॥ तीर्थमोंकारमारभ्य तीर्थान्येवार्णवावधि॥ चतुः शतानि मुख्यानि तथैवान्यानि कोटिशः ॥ गुप्तप्रकटरूपाणि दिव्यभौमान्यसंख्यया ॥ २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ इति श्रीनर्मदामाहात्म्यं-रेवाखंडं समाप्तं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीनर्मदामाहात्म्यम्। (रेवाखण्डम्)

श्रीमद्वेदव्यासप्रणीतवायुसंहितान्तर्गतम्।

मुद्रितमेतत्

बालाभाई नगीनदास बुक्सेलर आमदाबाद इत्याख्येन

शास्त्रिणा वासुदेवेन संशोध्य

मुम्बय्याम्

'राजभक्तप्रींटिङ्ग प्रेस' नाम्नि मुद्रालये।



शके १८१२ संवत् १९४७

पुस्तकमेतत् १८६७तम ख्रिस्ताब्दिकपञ्चविंशतितमराजानियमानु सारेण राजलेखारूढी करणेन सर्वाधिकाराः प्रकाशकाधीनाः

मूल्यं १० रूपकाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥इति श्रीनर्मदामाहात्म्यम् । [रेवाखण्डम्] समाप्तं॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu